॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

# श्रीमन्न्यायसुधा

## परिमळाद्युपेता

सम्पुटम् - २२

चतुर्थाध्यायः

प्रकाशनम्

**श्रीगुरुसार्वभौमसंशोधनमन्दिरम्**

जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

श्रीमन्न्यायसुधा

परिमळाद्युपेता

सम्पुटम् - २२

प्रथमं मुद्रणम् - ई.सन् २०१५

Śrīman-Nyāyasudhā

Parimaḷādyupetā

Volume - 22

First Edition -2015 A.D.

ISBN No. 978-81-928761-1-5

मन्मथसंवत्सरे, गतशके १९३७, निजआषाढकृष्णत्रयोदश्यां, गुरुवासरे परमपूज्यपीठाधिपतीनां १००८ श्री सुबुधेन्द्रतीर्थश्रीपादानां तृतीयचातुर्मास्यव्रतग्रहणसमारम्भे प्रकाशितोऽयं ग्रन्थः

*Published by :*

**Śrī Gurusārvabhauma Saṁśodhana Mandiram**

**Jagadguru Śrīman Madvāchārya Mūla Mahāsamsthāna**

**Śrī Rāghavendra Swāmy Muṭha**

Mantrālayam - 518 345

India.

✻ मुद्रकः ✻

धनंजयाचार्य बाळाचार्य वरखेडकरः

सुधा मुद्रणम्

शंकरपुरम्, बेंगळूर - ५६० ००४

दूरवाणी– २६६००६३०, ६५६० २८३६

मोबाइल– ९२४३० ७४४१४

**SUDHA MUDRANA**

Shankarpuram, Bangalore - 560 004

Phone : 2660 0630, 6560 2836

Mobile : 92430 74414

श्रीमन्न्यायसुधाग्रन्थसम्पुटानां
श्री श्री १०८ श्री सुबुधेन्द्रतीर्थैः षोडशोपचारपूर्वकं

# श्रीवेदव्यासे समर्पणम्

श्रीवेदव्यासमुनये नारायणापरात्मने ।
मध्वद्वाराऽऽसनं दत्वा ग्रन्थरत्नं समर्पये ॥ १ ॥

ब्रह्मसूत्रकृते भक्त्या वेदतात्पर्यबोधिने ।
पद्मनाभात्पाद्यदाता ग्रन्थरत्नं समर्पये ॥ २ ॥

पुराणकर्त्रे दिव्याय पराशरसुताय च ।
जयातीर्थादर्घ्यदाता ग्रन्थरत्नं समर्पये ॥ ३ ॥

वासिष्ठकृष्णरूपाय शुकताताय योगिने ।
विबुधेन्द्रादाचमनं दत्वा भक्त्या समर्पये ॥ ४ ॥

द्वैपायनाय श्रीशाय ज्ञानदात्रे महात्मने ।
श्रीसुरेन्द्रात्स्नानदाता ग्रन्थरत्नं समर्पये ॥ ५ ॥

गीताबोधनदक्षाय सर्वलोकहितैषिणे ।
विजयीन्द्राद्वस्त्रदाता ग्रन्थरत्नं समर्पये ॥ ६ ॥

भागवतधर्मबोद्ध्रे बदरीक्षेत्रवासिने ।
सुधीन्द्राद्गन्धदाता ग्रन्थरत्नं समर्पये ॥ ७ ॥

वेदोद्धारकदेवाय वृन्दावनगताय च ।
राघवेन्द्रात्पुष्पदाता ग्रन्थरत्नं समर्पये ॥ ८ ॥

मोक्षदात्रे धीरताय सच्चिदानन्दमूर्तये ।
सुमतीन्द्राद्दीपदाता ग्रन्थरत्नं समर्पये ॥ ९ ॥

श्रीसुधानिधये पूर्णमर्थिनां निधये परम् ।
वादीन्द्राच्च नैवेद्यं दत्वा भक्त्या समर्पये ॥ १० ॥

श्रीरामचन्द्ररूपाय ब्रह्मदेवार्चिताय च ।
वरदेन्द्राच्च पानीयं दत्वा ग्रन्थं समर्पये ॥ ११ ॥

ब्रह्मवेदान्तवेद्याय दोषदूराय विष्णवे ।
धीरेन्द्राच्च जलं दत्वा ग्रन्थरत्नं समर्पये ॥ १२ ॥

सर्वव्याप्ताय पूर्णाय नित्यायाचिन्त्यशक्तये ।
सुशीलेन्द्रात्फलं दत्वा ग्रन्थरत्नं समर्पये ॥ १३ ॥

परमोङ्कारवाच्याय जगज्जन्मादिकारिणे ।
सुयमीन्द्राच्च ताम्बूलं दत्वा भक्त्या समर्पये ॥ १४ ॥

शास्त्रज्ञप्तिविषयाय शब्दवाच्याय सर्वशः ।
सुजयीन्द्रान्महादीपं दत्वा भक्त्या समर्पये ॥ १५ ॥

सज्ज्ञानभक्तिवैराग्यगम्याय परमात्मने ।
सुशमीन्द्रान्नमस्कारान् दत्वा भक्त्या समर्पये ॥ १६ ॥

स्वरूपानन्ददात्रे च त्रिगुणातीतरूपिणे ।
सुयतीन्द्रादर्थनां च दत्वा भक्त्या समर्पये ॥ १७ ॥

मध्वादिसुयतीन्द्रान्तान् गुरून्नत्वा च देशिकान् ।
वेदव्यासकृपायाची वेदव्यासे च दीक्षितः ॥ १८ ॥

सुबुधेन्द्रयतिर्धीमान् राघवेन्द्रकृपाबलः ।
श्रीसुधाग्रन्थरत्नानि वेदव्यासे समार्पयम् ॥ १९ ॥

॥ श्रीकृष्णार्पणमस्तु ॥

श्रीहंसनामकपरमात्मनः परम्परादागतस्य विद्यामठमिति ख्यातविसरस्य श्रीमन्मध्वाचार्यमूलमहासंस्थानस्य श्रीमठस्य पीठाधिपतित्वस्थानमलङ्कुर्वाणानां श्रीपद्मनाभतीर्थ,श्रीअक्षोभ्यतीर्थ,श्रीजयतीर्थ,श्रीविबुधेन्द्रतीर्थ, श्रीसुरेन्द्रतीर्थ,श्रीविजयीन्द्रतीर्थ,श्रीसुधीन्द्रतीर्थ,श्रीराघवेन्द्रतीर्थ,श्रीसुमतीन्द्रतीर्थ,श्रीवादीन्द्रतीर्थ,श्रीवरदेन्द्रतीर्थ, श्रीधीरेन्द्रतीर्थ, श्रीसुज्ञानेन्द्रतीर्थ,श्रीसुशीलेन्द्रतीर्थ,श्रीसुयमीन्द्रतीर्थ,श्रीसुजयीन्द्रतीर्थ,श्रीसुशमीन्द्रतीर्थ, श्रीसुयतीन्द्रतीर्थादिगुरुवर्याणां परमानुग्रहेण अधुना श्रीमन्मध्वाचार्यात् नवत्रिंशत्तमपीठाधिपतित्वस्थानमलङ्कुर्वाणः स्वरूपोद्धारकाणां श्रीश्रीसुजयीन्द्रतीर्थानां प्रपौत्रः श्रीश्रीसुशमीन्द्रतीर्थानां पौत्रः श्रीश्रीसुयतीन्द्रतीर्थानां वरकुमारकः **श्रीश्रीसुबुधेन्द्रतीर्थः** परिमळसहितपञ्चविंशतिटिप्पणीभिः अलङ्कृतं श्रीमज्जयमुनिविरचितं श्रीमन्न्यायसुधाग्रन्थं मुमक्षुजीवानामुपकाराय पाठप्रवचनादिसौकर्याय च संशोध्य मुद्राप्य प्राकाश्य च श्रीमूलरघुपतिवेदव्याससनिकटे श्रीगुरुराघवेन्द्रतीर्थ-सन्निधौ च श्रीमध्वादिसकलगुरुजनैः समर्पितषोडशोपचारपूजापुरस्सरं समार्पयत् ॥

★ ★ ★

॥ श्रीमन्मूलरामो विजयते ॥

श्रीमत्परमहंसपरिव्राजकाचार्य पदवाक्यप्रमाणपारावारपारङ्गत सर्वतन्त्रस्वतन्त्र
श्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापनाचार्य श्रीमन्मूलरघुपतिवेदव्यासदेवदिव्यश्रीपादपद्माराधक
**जगद्गुरु श्रीमन्मध्वाचार्यमूलमहासंस्थानाधीश्वराणां**
श्रीराघवेन्द्रस्वामिमठीयवेदान्तसाम्राज्यदिग्विजयविद्यासिंहासनाधीश्वराणां
**श्रीमत्सुशमीन्द्रतीर्थश्रीचरणकरकमलसञ्जात**
**श्रीमत्सुयतीन्द्रतीर्थवरकुमारकाणां**

## श्रीमत्सुबुधेन्द्रतीर्थश्रीपादानां

# अनुग्रहसन्देशः

महदिदं प्रमोदस्थानं यत् अस्मत्प्राचीनाचार्यकृतबहुग्रन्थमुद्रणावसरे माध्वग्रन्थेषु मध्ये मेरुसदृशस्थानं अलङ्कुर्वाणः श्रीमन्न्यायसुधाग्रन्थः परिमळादिविंशत्यधिकटिप्पणीभिरलङ्कृतः मुद्राप्य प्रकाश्यत इति । श्रीमन्न्याय-सुधायाः अगाधतां, विविधदर्शनविमर्शनसरणिं, श्रीमदाचार्याभिप्रेतप्रमेयनिरूपणपाटवं, भाषासौन्दर्यं च दृष्ट्वा परमतीयविद्वांसः अपि अत्यन्तसन्तोषभराः सन्तः मुक्तकण्ठेन ग्रन्थकर्तारं श्रीमज्जयतीर्थमुनिं अनन्यादृशगौरवेण संस्तुवन्ति । किञ्च पञ्चाशदधिकटिप्पण्यः ग्रन्थस्यास्य अर्थगौरवं स्फोरयन्ति । आसु टिप्पणीषु श्रीमद्राघवेन्द्र-गुरुसार्वभौमैः विरचिता 'परिमळ'ख्यटिप्पणी तत्त्वप्रपञ्चे मूर्धन्यस्थानं वहतीत्यत्र न कश्चित्सन्देहगन्धः । परिमळा-चार्यनाम्ना विख्याताः पण्डितधौरेयाः श्रीमद्राघवेन्द्रतीर्थाः श्रीमन्न्यायसुधामधिकृत्य 'प्रत्यक्षरं प्रतिपदं अनेकाकूत-गर्भिता' इति सुधायाः अनुपमगाम्भीर्यमुद्घोषितवन्तः ।

अस्मत्पूर्वाश्रमे एव प्रारब्धं बहुटिप्पणीयुतं एतत् सुधाग्रन्थमुद्रापणं अस्मत्परमगुरूणां श्रीमत्सुशमीन्द्रतीर्थानां तथा अस्मत्स्वरूपोद्धारकाणां श्रीमत्सुयतीन्द्रतीर्थगुरुचरणानां काले अतिशयं सम्प्राप्य अधुना समाप्तमिति वयं धन्यतामनुभवामः । द्वाविंशद्भागात्मकतया लोकार्पितस्य ग्रन्थस्यास्य सम्पादनकार्ये कृतभूरिपरिश्रमेभ्यो अस्म-त्पूर्वाश्रमपितृपादेभ्यः विद्यागुरुभ्यः श्री गिरिआचार्येभ्यः तथैव नैकविद्वद्भ्यः तथा ग्रन्थाध्ययन-अध्यापनशीलेभ्यः जिज्ञासुभ्यः, अपिच अत्यायाससाध्येऽस्मिन् मुद्रणकार्ये श्रद्धाभक्तियुक्तमनसा व्यापृतवते 'सुधामुद्रण'अधिकारिणे 'धनञ्जयवरखेडकर'नामकसाधकायापि इतोऽप्यतिशयेन आयुरारोग्यैश्वर्यादि-प्रदानपूर्वकमनुगृह्णातु इति अस्मदुपास्यं श्रीमद्राघवेन्द्रतीर्थगुर्वन्तर्गतं भारतीरमणमुख्यप्राणान्तर्गतं श्रीमूलरघुपति-वेदव्यासदेवं सम्प्रार्थयामः ।

*इति नारायणस्मृतिः ।*

मन्त्रालयक्षेत्रम्,
मन्मथसंवत्सरम्, गतशके १९३७, निजआषाढ कृष्ण पञ्चमी ।

जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थान-श्रीराघवेन्द्रस्वामिमठाधीशानां

श्री श्री सुयतीन्द्रतीर्थश्रीपादानां वरकुमारकाणां

## श्री श्री सुबुधेन्द्रतीर्थश्रीपादानां

परमानुग्रहेण सम्पादितोऽयं ग्रन्थः ।


**प्रधानसम्पादकाः**

महामहोपाध्यायाः राष्ट्रपतिप्रशस्तिपुरस्कृताः श्रीपादपुत्राः

**श्री राजा श्री गिरिआचार्याः**

**सम्पादकविद्वन्मण्डली**

विद्वान् डॉ. विद्यावाचस्पति श्री वादिराजाचार्य राघवेन्द्राचार्य पञ्चमुखी

*निर्देशकः श्रीगुरुसार्वभौमसंशोधनमन्दिरम्, श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः*

विद्वान् डॉ. श्री एन्. वादिराजाचार्यः

*प्रांशुपालाः श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्, मन्त्रालयः*

विद्वान् श्री कडप राघवेन्द्राचार्याः

विद्वान् श्री पुराणिक सुब्रह्मण्याचार्याः

विद्वान् आहिताग्नि श्री वरखेडकर भीमसेनाचार्याः



**प्रकाशनम्**

जगद्गुरुश्रीगुरुसार्वभौमसंशोधनमन्दिरम्

श्रीमन्मध्वाचार्यमूलमहासंस्थानम्

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

॥ श्रीमन्मूलरामो विजयते ॥

# उपोद्घातः

श्रीहंसनामकपरमात्मनः परम्परागते 'विद्यामठमि'ति ख्यातविसरे श्रीराघवेन्द्रस्वामिमठे अधुना दिव्यपीठे विराजमानानां श्रीश्रीसुबुधेन्द्रतीर्थानां चरणकमलयोः सप्रश्रयं प्रणतिततिं समर्प्य तत्त्ववादज्ञानभाण्डागारभूतस्य श्रीपरिमळोपेतपञ्चविंशतिटिप्पणीभिः समलङ्कृतस्य द्वाविंशतिसम्पुटात्मकस्य श्रीमदनुव्याख्यानन्यायसुधाग्रन्थस्य अन्तिमसम्पुटस्य प्रकाशनावसरे इदमुपोद्घातं लिखितुं प्रमोमुदीति अस्मच्चेतः ।

इदमुल्लेखनार्हं यत् कतिपयवर्षेभ्यः पूर्वं २००२ तमे वर्षे श्रीसुबुधेन्द्रतीर्था एव, आत्मनः पूर्वाश्रमे विद्वान् पवमानाचार्यः इति वायुसूनुनाम्ना कृतार्थीकृतात्मानः, पूर्वाश्रमपितृपादैः पण्डितकेसरीति बिरुदभूषितैः विद्वदग्रेसरैः श्री राजा एस्. गिरिआचार्याभिधैः परवाद्यभेद्यपाण्डित्यगिरिवदचलं स्थितैः आचार्यवर्यैः साकं श्रीमत्परिमळसहितपञ्चविंशतिव्याख्यानोपेतश्रीमन्न्यायसुधाग्रन्थस्य संशोधनप्रकाशनरूपं महत्कार्यं आयोज्य कार्यसिद्धिसम्पादनाय गङ्गावतरणरूपिबृहत्कार्यसंलग्नभगीरथवत् उपक्रान्तवन्तः आसन् । एतेषां उपक्रमः अधिगतसमग्रशास्त्रविषयाणां श्री १०८ श्रीश्रीसुजयीन्द्रतीर्थानां प्रेरणानुग्रहचालितः आसीदिति प्रणतिततिपूर्वकं स्मरणीयम् ।

अद्ययावत् भिन्नभिन्नकालेषु पञ्चदशसम्पुटानि संशोध्य प्रकाशितानि आसन् । अधुना श्रीश्रीसुबुधेन्द्रतीर्थाः प्रारब्धकार्यस्यान्तगामित्वसम्पादने बद्धकङ्कणाः भूत्वा, आश्रमस्वीकारानन्तरं अनुदिनमेव, उर्वरितसम्पुटानां संशोधनप्रकाशनार्थं कार्यप्रवृत्ताः अभूवन् । श्रीवेदव्यासश्रीजयतीर्थश्रीराघवेन्द्रतीर्थानां अनितरसाधारणानुग्रहभाजः श्रीपादाः, आत्मनः पूर्वाश्रमपितृपादानां विद्यानुदानगुरुस्थानमलङ्कुर्वतां श्री राजा एस्. गिरिआचार्याणां सम्पूर्णपरिश्रमोत्साहोपोद्बलितसाहचर्यबलेन दृढसङ्कल्पाः सन्तः, समग्रश्रीमदनुव्याख्यानन्यायसुधाग्रन्थस्य चतुर्णामप्यध्यायानां परिमळोपेतपञ्चविंशतिटिप्पणीसहितानां सम्पुटानां संशोधनप्रकाशनरूपिमहत्कार्यं सम्पादितवन्तः इत्यनेन जिज्ञासवः वयं सर्वे आत्मानं धन्यान् मन्यामहे ।

अस्मिन् शुभावसरे श्रीराघवेन्द्रानुग्रहभाजां श्रीश्रीसुशमीन्द्रतीर्थानां तच्छिष्यवर्याणां श्रीश्रीसुयतीन्द्रतीर्थानां च अनुग्रहविशेषं प्रणतिततिपूर्वकं स्मरामः ।

विदितचरमेव समेषां विदुषां यत् श्रीमन्मध्वाचार्याः सूत्रप्रस्थाने चत्वारि ग्रन्थरत्नानि व्यरीरचन् इति । श्रीमद्ब्रह्मसूत्रभाष्यम्, श्रीमदनुव्याख्यानम्, श्रीमन्न्यायविवरणम्, श्रीमदणुभाष्यमिति । प्रत्येकग्रन्थस्य विशिष्य भिन्नभिन्नोद्देशाः वर्तन्ते इत्येतत् अध्येतृभ्यः अधीतसर्वशास्त्राणां गुरुवराणामुपदेशेन विज्ञायते । तत्र श्रीमदनुव्याख्यानरूपस्य श्रीमद्ब्रह्मसूत्रव्याख्यानग्रन्थस्य मुख्योद्देशः, अनेकमतानां खण्डनपूर्वकं वेदव्याससम्मतस्य तत्त्ववादस्य प्रतिष्ठापनम् । श्रीमज्जयतीर्थैः रचितः श्रीमन्न्यायसुधाग्रन्थः श्रीमदाचार्याणां मूलोद्देशस्य सम्पादनं अत्यन्तं समर्थरीत्या विदधाति । तत्र भिन्नभिन्नदार्शनिकानां मतानां अनुवादपूर्वकं, तत्र प्रतिपादितानां भिन्नाभिन्नांशानां सुव्यवस्थितरीत्या खण्डनं, तदनु श्रीमध्वमतस्य स्थापनमिति श्रीमन्न्यायसुधाग्रन्थस्य विवरणप्रक्रिया जिज्ञासूनां महते उपकाराय कल्पते ।

श्रीराघवेन्द्रतीर्थानां श्रीपरिमळाख्या प्रगल्भविषयगम्भीरा टिप्पणी श्रीमन्न्यायसुधाऽऽस्वादनाय प्रेरयति ज्ञानामृतपिपासून् । श्रीमद्राघवेन्द्रतीर्थानां मङ्गलश्लोकेनैव इदं स्फुटीभवति—

ये तु न्यायसुधापानकामुका रसिका बुधाः ।
आघ्रायेमं परिमळं सेवन्तां ते सुधामिमाम् ॥

अन्यच्च, श्रीमन्न्यायसुधाग्रन्थस्यार्थप्रौढिमा श्रीराघवेन्द्रस्वामिनां निम्नलिखितश्लोकेन स्फुटीभवति—

प्रतिवाक्यं (प्रत्यक्षरं) प्रतिपदमनेकाकूतिगर्भिता ।
प्रतिभाति सुधाऽथापि ग्रन्थाल्पत्वाय नोच्यते ॥

श्रीमन्न्यायसुधाग्रन्थमधिकृत्य एकपञ्चाशद्विद्वांसः टिप्पण्यादिकं रचितवन्तः इति ज्ञायते । परं अधुना एतेषु द्वाविंशतिसम्पुटेषु पञ्चविंशतिटिप्पणीनां विशिष्य चितानां समावेशः कृतः वर्तते । तत्रापि काश्चन टिप्पण्यः विशेषपरिश्रमे कृतेऽपि सम्पूर्णतया नैवोपलब्धा इति निमित्तेन यावदुपलब्धं तावदेव संशोध्य अत्र निवेशितं वर्तते । अत्र निवेशितानां टिप्पणीनां नाम्नामुल्लेखः अन्यत्र कोष्टके प्रकाशितः उपलभ्यते ।

ब्रह्मसूत्रेषु, समन्वयाध्यायः, अविरोधाध्यायः, साधनाध्यायः, फलाध्यायः इति चत्वारः अध्यायाः भासन्ते किल । तदन्तर्भागतया स्थितानि २२२ सङ्ख्याकानि अधिकरणानि भिन्नभिन्नविशिष्टविषयानधिकृत्य परमत-खण्डनपूर्वकं स्वमतस्थापने प्रवृत्तानि । अधिकरणस्य व्याख्या अत्र उल्लेखनमर्हति ।

'विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
प्रयोजनं च पञ्चैतान् प्राञ्चोऽधिकरणं विदुः ॥' इति ।

श्रीजयतीर्थमुनिवर्याः प्रत्यधिकरणं प्रतिसूत्रं च विषय-विशय-पूर्वपक्ष-सिद्धान्त-प्रयोजनरूपाणि पञ्चाङ्गानि भिन्नभिन्नमतान्युल्लेख्य प्रतिपादयन्तीति अध्येतृभ्यः स्फुटमेव ।

एकादशसहस्रादधिकपत्रात्मकस्य द्वाविंशतिसम्पुटराशेः सम्पूर्णप्रकाशनं सम्पादितमित्ययं विषयः श्रीविद्यामठस्य श्रीराघवेन्द्रस्वामिमठस्य बौद्धिकेतिहासे सुवर्णाक्षरैर्लेखनार्हो वृत्तान्तः इति स्फुटमेव । अत्र वयं सर्वे जिज्ञासवः श्री १०८ श्रीश्रीसुबुधेन्द्रतीर्थानामानृण्यं स्मारं स्मारं तच्चरणकमलयोः भक्तिपूर्वकां प्रणतिततिं समर्पयामः ।

श्रीपरिमळोपेतश्रीमन्न्यायसुधाग्रन्थस्य नित्यं विंशत्यधिकजिज्ञासुभ्यः अध्यापनं कुर्वद्भ्यः श्रीचरणेभ्यः, विद्वद्वरेण्येभ्यः महामहोपाध्यायेति बिरुदालङ्कृतेभ्यः श्री राजा एस्. गिरिआचार्येभ्यश्च अस्माकं सकार्तज्ञभावं प्रणतिततयः ।

अस्मिन् सन्दर्भे श्रीगुरुसार्वभौमसंस्कृतविद्यापीठस्य श्रीगुरुसार्वभौमसंशोधनमन्दिरस्य च प्राध्यापकसंशोधकवर्गाय, सम्पादकमण्डल्याः सदस्यवर्येभ्यश्च अस्माकं सकार्तज्ञभावं अभिनन्दनानि निवेदयामः ।

समग्रसम्पुटराशेः सुन्दररीत्या मुद्रणं विधाय अनितरसाधारणसेवां विहितवद्भ्यः 'सुधामुद्रण'अधिकारिभ्यः श्रीधनञ्जयवरखेडकर महोदयेभ्यः अस्माकं विशिष्टानि कार्तज्ञभावपूर्वकाणि शुभाभिनन्दनानि ।

ब्रह्मसूत्ररूपिज्ञानसमुद्रस्य मथनेनोत्पन्नस्य ज्ञानामृतस्य पानेन साधकाः मुमुक्षवः अवश्यं भगवदनुग्रहस्य पात्राणि भवन्तीति आशास्महे ।

श्रीगुरुसार्वभौमाणामनुग्रहाकाङ्क्षी

श्रीमज्जयतीर्थाराधनादिनम्
दि. ४-८-२०१५

**वाचस्पति डॉ. वा. रा. पञ्चमुखी**
*कुलपतिः तथा प्रधाननिर्देशकः*

# श्रीमन्न्यायसुधा – परिमळाद्युपेता

## टिप्पणीनां क्रमः तथा सङ्क्षिप्तनामानि

| क्र.सं. | कर्तृनाम | टिप्पणीनाम | सङ्क्षिप्तनाम |
|---|---|---|---|
| १ | श्री विजयीन्द्रतीर्थाः | न्यायसुधाबिन्दुः | बिन्दुः— |
| २ | श्री राघवेन्द्रतीर्थाः | परिमळः | परि०— |
| ३ | श्री श्रीपादराजतीर्थाः | वाग्वज्रः | वाग्वज्रः— |
| ४ | श्री वादिराजतीर्थाः | गुर्वर्थदीपिका | गु०दी०— |
| ५ | श्री यदुपत्याचार्याः | टिप्पणी | यादु०— |
| ६ | श्री वंशपत्री श्रीनिवासाचार्याः | वाक्यार्थविवृतिः | वं०प०— |
| ७ | श्री गलगली नरसिंहाचार्याः | आनन्दः | आनन्दः— |
| ८ | श्री कंबालूरु रामचन्द्रतीर्थाः | विवृतिः | कं०रा०— |
| ९ | श्री श्रीनिधितीर्थाः | टिप्पणी | श्रीनिधि०— |
| १० | श्री विद्याधीशतीर्थाः | वाक्यार्थचन्द्रिका | वा०चं०— |
| ११ | श्री पाण्डुरङ्गि केशवाचार्याः | शेषवाक्यार्थचन्द्रिका | शे०चं०— |
| १२ | श्री पाण्डुरङ्गि नरसिंहाचार्याः | वाक्यार्थरत्नमाला | वा०र०— |
| १३ | श्री सत्यव्रततीर्थाः | सुधाविवृतिः | स०व्र०— |
| १४ | श्री कुण्डलगिरिआचार्याः | रसकूलङ्कषः | कुण्डल०— |
| १५ | श्री सत्यनाथतीर्थाः | दुर्घटवाक्यार्थविचारः | स०ना०— |
| १६ | श्री विट्ठलभट्टाः | टिप्पणी | विठ्ठ०— |
| १७ | श्री विष्णुतीर्थाः | रसरञ्जनी | रस०— |
| १८ | श्री अडवी कृष्णाचार्याः | लघुरसरञ्जनी | ल०र०— |
| १९ | श्री मन्नारी कृष्णाचार्याः | चषकः | चषकः— |
| २० | श्री एरी बाळाचार्याः | उपस्पर्शः | ए०बा०— |
| २१ | श्री काशी आचार्याः | काशी टिप्पणी | काशी०— |
| २२ | श्री गूढकर्तृकाचार्याः | गूढकर्तृका | गूढ०— |
| २३ | श्री प्रदीपकाराः | प्रदीपः | प्रदीपः— |
| २४ | श्री पांघ्री श्रीनिवासाचार्याः | टिप्पणी | पांघ्री०— |
| २५ | श्री कल्लापूर सत्याधिराजाचार्याः | हुग्गि | हुग्गि०— |

# टिप्पणीविषये स्पष्टीकरणम्

श्रीमज्जयतीर्थविरचितं महामेरुतुल्यं श्रीमन्न्यायसुधाग्रन्थमनेके व्याचख्युः । साम्प्रतमस्माभिः, उपलब्धाः श्रीमन्न्यायसुधाव्याख्याः सङ्गृह्यैकत्र मुद्रापयितव्याः इत्येकमात्रोद्देशेन अनेकव्याख्यासहिततया श्रीमन्न्यायसुधाग्रन्थः मुद्रापितः ।

श्रीमद्विजयीन्द्रतीर्थश्रीपादानां श्रीमद्राघवेन्द्रतीर्थश्रीपादानां च सुधाव्याख्यानयोः इदानीं मुद्रापितायां यस्यां कस्याञ्चित् सुधाव्याख्यायां यस्मिन् कस्मिंश्चिद्विषये भिन्नाभिप्राये सति (विरुद्धाभिप्राये सति) सः तद्व्याख्यातॄणामभिप्राय एव । सः श्रीमद्विजयीन्द्रतीर्थश्रीपादानां वा परिमलकाराणां वा सम्पादकानां वा प्रकाशकानां वा सम्मत इति न मन्तव्यमिति एतन्मूलकतया स्पष्टीकुर्मः ।

इत्थम्

**सम्पादकाः**

॥ श्रीमन्मूलरामो विजयते ॥

# प्रकाशकीयम्

द्वापरे श्रीगौतममहर्षिभिः शप्तेषु साधुजनेषु व्याकुलीभूतेषु श्रीब्रह्मरुद्रेन्द्रादिभिः प्रार्थितो भगवान्नारायणः श्रीवेदव्यासत्वेनावतीर्य राशीभूतान् वेदान् विभज्य, वेदार्थनिर्णायकानि चतुःषष्ट्यधिकपञ्चशत(५६४)ब्रह्मसूत्राणि व्यरचयत्।

एषां ब्रह्मसूत्राणां श्रीवाय्ववतारिणः सर्वज्ञाः श्रीमदानन्दतीर्थभगवत्पादाः भाष्यम्, श्रीमदनुव्याख्यानम्, न्यायविवरणम्, अणुभाष्यं चेति ग्रन्थचतुष्टयं विरचय्य महदुपाकुर्वन्।

श्रीमदाचार्याणां प्रियान्तेवासिनां श्रीत्रिविक्रमपण्डिताचार्याणां "व्यक्ततर्कततिं कुरु" इति प्रार्थनामनुरुध्य श्रीमदाचार्याः उपर्युक्तग्रन्थेष्वन्यतमं श्रीमदनुव्याख्यानग्रन्थं रचयामासुः।

अनुव्याख्यानस्यास्य इन्द्रांशसंभूताः श्रीमज्जयतीर्थश्रीमच्चरणाः श्रीमन्न्यायसुधानाम्नीं मेरुतुल्यामनुपमां टीकां व्यरचयन्।

ग्रन्थोऽयं चित्रपदपुञ्जमण्डितः, महागाम्भीर्यवान् महापण्डितवरेण्यानामपि महान्तं गर्वपर्वतं खण्डयितुं दक्षश्चकास्ति।

अस्यामोघस्य ग्रन्थस्य महत्त्वम् एतद्ग्रन्थस्य एतदीयानामनेकासां व्याख्यानां सद्भावैव व्यञ्जयति।

| | व्याख्यातारो महाभागाः | व्याख्यानस्य नाम |
|---|---|---|
| १) | श्री श्रीपादराजतीर्थाः | वाग्वज्रम् |
| २) | श्री विजयीन्द्रतीर्थाः | न्यायसुधाबिन्दुः |
| ३) | श्री वादिराजतीर्थाः | गुर्वर्थदीपिका |
| ४) | श्री राघवेन्द्रतीर्थाः | परिमलः |
| ५) | श्री यदुपत्याचार्याः | टिप्पणी |
| ६) | श्री वंशपल्ली श्रीनिवासाचार्याः | वाक्यार्थविवृतिः |
| ७) | श्री गलगली नरसिंहाचार्याः | आनन्दः |
| ८) | श्री कंबालूरु रामचन्द्रतीर्थाः | विवृतिः |
| ९) | श्री श्रीनिधितीर्थाः | टिप्पणी |

| | | |
|---|---|---|
| १०) | श्री विद्याधीशतीर्थाः | वाक्यार्थचन्द्रिका |
| ११) | श्री पाण्डुरङ्गि नरसिंहाचार्याः | वाक्यार्थरत्नमाला |
| १२) | श्री पाण्डुरङ्गि केशवाचार्याः | शेषवाक्यार्थचन्द्रिका |
| १३) | श्री कुण्डलगिरि आचार्याः | रसकूलङ्कषः |
| १४) | श्री सत्यव्रततीर्थाः | सुधाविवृतिः |
| १५) | श्री सत्यनाथतीर्थाः | दुर्घटवाक्यार्थविचारः |
| १६) | श्री विठ्ठलभट्टाः | टिप्पणी |
| १७) | श्री कल्लापूर सत्याधिराजाचार्याः | हुग्गि |
| १८) | श्री विष्णुतीर्थाः | रसरञ्जनी |
| १९) | श्री अडवि कृष्णाचार्याः | लघुरसरञ्जनी |
| २०) | श्री मन्नारि कृष्णाचार्याः | चषकः |
| २१) | श्री एरी बाळाचार्याः | उपस्पर्शः |
| २२) | श्री काशी तिम्मणाचार्याः | काशी टिप्पणी |
| २३) | श्री गूढकर्तृकटिप्पणीकाराः | टिप्पणी |
| २४) | श्री प्रदीपकाराः | प्रदीपः |
| २५) | श्री पांघ्री श्रीनिवासाचार्याः | टिप्पणी |
| २६) | श्री रोट्टि वेङ्कटभट्टाः | सुधाविवृतिः |
| २७) | श्री ताम्रपर्णी आचार्याः | टिप्पणी |
| २८) | श्री उमर्जी प्रह्लादकृष्णाचार्याः | उमर्जी |
| २९) | श्री व्यासतत्त्वज्ञतीर्थाः | कुलिशम् |
| ३०) | श्री महेश्वरसूरिः | टिप्पणी |
| ३१) | श्री पुट्ट तंबि आचार्याः | टिप्पणी |
| ३२) | श्री रत्नगर्भ ओडेयर् | टिप्पणी |
| ३३) | श्री अनन्तभट्टाः | टिप्पणी |
| ३४) | श्री सत्यनाथाचार्याः | टिप्पणी |
| ३५) | श्री जयवेङ्कटाचार्याः | टिप्पणी |
| ३६) | श्री गूढकर्तृकाचार्याः | सुधासारसङ्ग्रहः |
| ३७) | श्री गलगली गोविन्दाचार्याः | पञ्चरत्नस्तबकः |
| ३८) | श्री श्रीमुष्णाचार्याः | पञ्चाधिकरणी |

| | | |
|---|---|---|
| ३९) | श्री लिङ्गेरि श्रीनिवासाचार्याः | सिद्धान्तप्रभा |
| ४०) | श्री पाण्डुरङ्गि केशवाचार्याः | सुधावाक्यार्थविनोदः |
| ४१) | श्री उडुपि राघवेन्द्रतीर्थाः (पुत्तिगे मठः) | टिप्पणी |
| ४२) | श्री सत्यनाथाः | न्यायसुधापरशुः |
| ४३) | श्री सुमतीन्द्रतीर्थाः | भावरत्नकोशः |
| ४४) | श्री पाण्डुरङ्गि केशवाचार्याः | मञ्जरी |
| ४५) | श्री व्यासतत्त्वज्ञतीर्थाः | लघुरसरञ्जनी |
| ४६) | श्री व्यासतत्त्वज्ञतीर्थाः | गुरुरसरञ्जनी |
| ४७) | श्री भीमराव् कुलकर्णी कुम्बारगेरी | टिप्पणी |
| ४८) | श्री सत्यपराक्रमतीर्थाः | सुधाफक्किका |
| ४९) | श्री हुलिगि श्रीपत्याचार्याः | टिप्पणी |
| ५०) | श्री अहोबिलाचार्याः | टिप्पणी |
| ५१) | श्री सत्यप्रज्ञतीर्थाः | टिप्पणी |

एतादृशस्य अत्युत्तमग्रन्थस्य मुद्रणकार्यं श्रीमत्परमपूज्यानां प्रातःस्मरणीयानां श्रीमत्सुजयीन्द्रतीर्थ-श्रीमत्सुशमीन्द्रतीर्थ-श्रीमत्सुयतीन्द्रतीर्थ-श्रीमच्चरणानामादेशं सदिच्छां चानुरुध्य सम्प्रति श्रीराघवेन्द्रस्वामिमठीयपीठाधीश्वराः पूज्याः श्री १००८ श्रीमत्सुबुधेन्द्रतीर्थश्रीपादाः कारयन्तीति अस्माकं परमं प्रमोदस्थानम् ।

अस्य ग्रन्थस्य संशोधनकार्ये अस्मद्विद्यापीठीयप्राच्यग्रन्थालयस्थाः अधोनिर्दिष्टाः टिप्पण्यः हस्तप्रतिकृतयोऽपि उपयोजिता इति निवेदयितुं नितान्तं तुष्यामः ।

ग्रन्थस्यास्य प्रकाशनार्थं श्रीसुधाव्याख्यानं विठ्ठलभट्टीयं हस्तलिखितं अनुगृहीतवद्भ्यः परमपूज्येभ्यः श्रीउत्तरादिमठाधीश्वरेभ्यः सभक्ति प्रणामगणं समर्पयामः । संशोधनादिकार्येष्वनुकूलयितुं श्रीसुधाव्याख्यानं श्रीनिधितीर्थीयं तालपत्रस्थं अनुगृहीतवद्भ्यः परमपूज्येभ्यः श्रीपुत्तिगेमठाधीश्वरेभ्यः सभक्ति प्रणामगणं समर्पयामः । एवमेव मुद्रणकार्येऽस्मिन् साक्षाद्वा परोक्षे वा सहकृतवद्भ्यः परमपूज्येभ्यः श्रीमठाधीश्वरेभ्यः सर्वेभ्यः सभक्तिप्रणामगणं कार्तज्ञ्यमाविष्कुर्मः । श्रीनिधितीर्थीयं व्याख्यानं तालपत्रस्थं तौलवलिपिगतं देवनागरिलिपिगतं कृतवतः विद्वान् श्री साणूरु भीमभट्टतनूजः श्री कृष्णमूर्ति महाशयान् सन्दर्भेऽस्मिन् सप्रश्रयं स्मरामः ।

ग्रन्थस्यास्य संपादनविषये महदुपकृतवद्भ्यः विद्वद्भ्यः वैकुण्ठवासिभ्यः श्री आचार्य साणूरु भीमभट्ट महाशयेभ्यः तथा एतद्ग्रन्थसम्पादकेभ्यः विद्वद्भ्यः श्री कडप राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री पुराणिक सुब्रह्मण्याचार्येभ्यः, तथा विद्वद्भ्यः आहिताग्नि श्री वरखेडकर भीमसेनाचार्येभ्यः, एवं विठ्ठलभट्टीयां टिप्पणीं तथा एरी बाळाचार्याणां टिप्पणीं दत्तवद्भ्यः विद्वद्भ्यः श्री व्यासनकेरे प्रभञ्जनाचार्येभ्यः, तथा पांग्री श्रीनिवासाचार्याणां टिप्पणीं

दत्तवद्भ्यः विद्वद्भ्यः श्री पांग्री लक्ष्मणाचार्येभ्यः, तथा वाक्यार्थरत्नमालाख्यां टिप्पणीं, सत्यनाथतीर्थीयां टिप्पणीं, हुग्गिनामकटिप्पणीं च दत्वा उपकृतवद्भ्यः पंढरपुरीय पूर्णप्रज्ञमतोन्नाहिनीपाठशालाप्रांशुपालेभ्यः विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, तथा वाक्यार्थरत्नमालाटिप्पण्याः प्रतिकृत्यन्तरं दत्तवद्भ्यः विद्वद्भ्यः श्री के. टि. पाण्डुरङ्गि महाशयेभ्यः एवमेव प्रदीपटिप्पणीं दत्तवद्भ्यः मद्रपुरसर्वकारीयग्रन्थालयव्यवस्थापकेभ्यः श्रीमद्भ्यः, श्रीमन्न्यायसुधा-बिन्दुनाम्नीं टिप्पणीं दत्तवद्भ्यः श्रीमद्भ्यः केरलराज्यीय तिरुवाङ्कूरु ग्रन्थभाण्डारव्यवस्थापकेभ्यः, तथा रसरञ्जनी-लघुरसरञ्जनी इति व्याख्यानद्वयं दत्तवद्भ्यः विद्वद्भ्यः श्री गंगूरु हनुमेशाचार्येभ्यः, एवं ग्रन्थस्यास्य प्रतिकृतिसंशोधने श्रीमद्भिः सम्पादकैः सहकृतवद्भ्यः विद्वद्भ्यः श्री कुर्डि सुशीलेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री कडप राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री पुराणिक सुब्रह्मण्याचार्येभ्यः, विद्वद्भ्यः श्री एन् राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, विद्वद्भ्यः श्री गंगूरु हनुमेशाचार्येभ्यः, विद्वद्भ्यः श्री अक्कि राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री बण्डी शामाचार्येभ्यः, विद्वद्भ्यः श्री बाळगारु रोचनाचार्येभ्यः, विद्वद्भ्यः श्री के. वेङ्कटेशाचार्येभ्यः, विद्वद्भ्यः श्री भीमसेनाचार्येभ्यः, विद्वद्भ्यः श्री एल्. कृष्णाचार्येभ्यः, विद्वद्भ्यः श्री बि. मधुसूदनाचार्येभ्यः, विद्वद्भ्यः श्री हेच्. श्रीकान्ताचार्येभ्यः, विद्वद्भ्यः श्री ओडेयर् कनकाचलाचार्येभ्यः, विद्वद्भ्यः डॉ. श्री डि. माधवाचार्येभ्यः, विद्वद्भ्यः गरग जयरामाचार्येभ्यः, विद्वद्भ्यः श्री बि. भास्कराचार्येभ्यः, विद्वद्भ्यः श्री रमेशाचार्येभ्यः, विद्वद्भ्यः श्री जगन्नाथाचार्येभ्यः, विद्वद्भ्यः श्री अर्चक वेदव्यासाचार्येभ्यः, विद्वद्भ्यः श्री श्रीनाथाचार्येभ्यः, विद्वद्भ्यः श्री मोहनाचार्येभ्यः, विद्वद्भ्यः श्री प्रदीपसिंहाचार्येभ्यः, विद्वद्भ्यः श्री पु. वंशी कृष्णाचार्येभ्यः, विद्वद्भ्यः श्री उंडारु पांडुरंग श्रीनिवासमूर्ती आचार्येभ्यः, श्री कुर्डि पवनाचार्येभ्यः, विद्वद्भ्यः श्री पुरोहित वेणुगोपालाचार्येभ्यश्च, एवं विशेषतः अल्पीयस्येव काले महता परिश्रमेण सश्रद्धं ग्रन्थानां प्रतिकृतिसंशोधने श्रीमद्भिः सम्पादकैः सहकृतवद्भ्यः तथा सर्वाङ्गसौन्दर्येण मुद्राप्य दत्तवद्भ्यः 'सुधा मुद्रण'नेतृभ्यः विद्वद्भ्यः श्री वरखेडकर धनंजयाचार्येभ्यः, तथा ग्रन्थस्यास्य अध्ययनाध्यापनादिकर्तृभ्यः सर्वेभ्यः श्रीभगवान् सीताजानिः श्रीमूलरघुपतिवेदव्यासः आयुरारोग्यै-श्वर्यादीनि चानुगृह्य संरक्षत्विति अनन्यया भक्त्या सम्प्रार्थयामहे ।

अत्र मुद्रापितासु टिप्पणीषु काश्चन टिप्पण्यः प्राचीनहस्तप्रतिरूपेण शिथिलाः मध्ये मध्ये त्रुटिताः कदाचिदसमग्रा अपि तेनैव रूपेण पण्डितैः संशोध्य मुद्रापिताः । अत्र प्रकाशितभागे यदि कुत्रचित् स्खलितानि प्राज्ञैर्विद्वद्भिः विलोकितानि चेत् ते अस्मान्प्रति संसूचयेयुः । तेन वयं शुद्धिपत्रिकायाम् अग्रिमसम्पुटेषु वा तत्सर्वं समीकृत्य विदुषां पुरः उपस्थापयितुं शक्नुमः । येषां समीपे अस्माभिरमुद्रितटिप्पण्यः उपलभ्यन्ते ते कृपया तान् ग्रन्थान् अस्मभ्यं प्रेषयन्ति चेत् तत्सर्वमागामिसम्पुटेषु वयं सम्यक् संशोध्य मुद्रापयितुं महता सन्तोषेण स्वीकुर्मः ।

इत्थम् ।

भवदीयम्

**श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्,**

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

॥ श्रीमन्मूलरामो विजयते ॥

# प्रस्तावना

**यत्पदं वेदसंवेद्यं कटाक्षेणापि वीक्षितुम् ।**
**न क्षमन्ते विमतयः तमुपासे श्रियःपतिम् ॥**

भूर्भुवस्स्वरादिचतुर्दशभुवनात्मकसङ्ख्यातिगब्रह्माण्डकोटीः रोमकूपे सन्निवेश्य सकललोकजनन्या श्रिया सह सर्पतल्पे शयानेन भगवता सृष्टेषु भूलोकखण्डेष्वन्यतमेऽस्मिन् भरतखण्डे जनिमतामस्माकं महद्भागधेयमिदं यदत्र भगवान् तत्तद्युगेष्ववतीर्य बलकार्यं ज्ञानकार्यं च सम्पाद्य स्वभक्तानन्वग्रहीत् । तत्रापीदमतिशयितं वक्तव्येष्वाद्यं वचनं यदत्र तद्भक्ताग्रणीः पावनः पवमानः अनेकधाऽवतीर्य तत्रापि तृतीयेऽवतारे श्रीमध्वनाम्नाऽत्र प्रकटीभूय सज्जनानुददीधरत् । तदीयभक्तानुग्रहकार्येषु आचन्द्रार्कं दीप्यमानानि बहूनि कार्याणि यद्यपि वक्तव्यानि सन्ति तथाऽपि समस्तशास्त्रार्थसारभूतानां श्रीबादरायणसंज्ञकेन श्रीवेदव्यासमहर्षिणा निर्मितानां ब्रह्मसूत्राणां भाष्य-अणुभाष्य-अनुभाष्य-न्यायविवरण-ग्रन्थानां निर्माणमतितरां सर्वैरपि अध्यात्मविद्यारसिकैः विचारविमर्शकैः प्रशंसनीयं सर्वदा स्मरणीयं कार्यमिति निश्चप्रचं दृढतरं वयं वक्तुं शक्नुमः ।

तत्र च सूत्रसम्बन्धिग्रन्थचतुष्टये ब्रह्मसूत्र-अनुव्याख्यान-ग्रन्थराजः नभसि नक्षत्रपुञ्जमध्ये चन्द्रमा इव चकास्ति । एतादृशस्य ग्रन्थराजस्य इन्द्रावतारभूतैः प्रातःस्मरणीयैः परमपूज्यश्रीजयतीर्थमस्करीवरैः रचितम् अनुव्याख्यानव्याख्यानं न्यायसुधानामकं नैकाभिष्टिप्पणीभिः समलंकृतं श्रीराघवेन्द्रतीर्थगुरुवर्याणां प्रेरणया अनुग्रहेण च इदानीं सम्प्रकाश्य हरिगुरुभक्तानां करकमलयोः समर्पयितुं मोमुद्यते अस्माकं चेतः ।

उपनिषत्प्रस्थान-गीताप्रस्थान-सूत्रप्रस्थाननामकप्रस्थानत्रये सूत्रप्रस्थानमेव अन्तिमं निर्णायकं समस्तैः शिरसा धारणीयं च भवति । किं बहुना समस्तेषु वेदेषु समस्तेषु पुराणेष्वन्यत्राप्यभ्यर्हणीयवैदिकवाङ्मयेषु च उक्तानामर्थानां निर्णयाय सूत्राण्येव अस्माकमवलम्बभूतानि महार्णवे तरतामाधारभूतनौकास्थानीयानि । तेषां सूत्राणां व्याख्यानभूतानुव्याख्यानस्य व्याख्यानरूपा इयं सुधा देवलोकीयसुधातोऽप्यभ्यर्हिततमा जन्ममृत्यु-जरादिकं सर्वमपहृत्य स्वरूपानन्दाविर्भावरूपं मोक्षं दापयितुं समर्था । अस्य ग्रन्थस्य प्रशंसा कथं कार्या, कियती कार्या इत्यादिविषयाः आलोच्यमानाः अस्माकं जिह्वां पुरःसर्तुमेव न मुञ्चन्ति । यतो हि ग्रन्थकाराः श्रीमज्जयतीर्थश्रीमच्चरणाः पूर्वाश्रमे नाममात्रेण गृहस्थाश्रमप्रवेशं लब्ध्वा केनापि अनालोचनीयेन केवलं भगवता क्लृप्तेन घटनाविशेषेण संसारमिमं तुच्छीकृत्य स्वीये तरुणे वयसि संन्यासाश्रमं स्वीकृत्य स्वगुरूणां विद्यारण्यारण्यछेदकानां श्रीमदक्षोभ्यतीर्थगुरुवर्याणां सविधे शुकवत् शिक्षिता भूत्वा स्वीयया अलौकिकप्रज्ञया आचार्याणां अनेकग्रन्थानां टीकाः विरचय्य प्रायः अन्ते इमां न्यायसुधां भक्तेभ्यः नाकेन्द्रः सुधां इव प्रादुः । अस्य ग्रन्थस्य माहात्म्यं शेषोऽपि वर्णयितुं नालम् । बाल्यादारभ्य यौवनपर्यन्तं प्रायः संस्कृतभाषायाः वेदादिशास्त्राणां च परिचयहीना अपि केवलं

गुर्वनुग्रहेण शास्त्राण्यभ्यस्य अनन्तरं किञ्चित्समयपर्यन्तं सरस्वतीं संसेव्य तदनुग्रहेण घण्टां (लेखनीं) पूगं च लब्ध्वा लेखनकार्यं प्रारभन्त श्रीमज्जयतीर्थश्रीमच्चरणाः । तत्रापि गुहाया अन्तरुपविश्य पञ्चषशिष्यान् पाठयन्तः स्वयमेव वाणीकृपया लब्धया लेखन्या आचार्याणां ग्रन्थान् व्याख्यास्य, अनन्तरं तदुपरि पूगेन सम्मार्जनमात्रेण तत्सर्वं त्रुटिलेशरहितं भगवत्कृपया आविर्भावयन्तः ते लोके श्रीटीकाचार्याः इत्येव निरुपपदगौरवनाम्ना प्रथिताः बभूवुः ।

महानुभावाः श्रीमज्जयतीर्थश्रीमच्चरणाः मठीयवैभवादीन् हित्वा शिष्यैः भिक्षया आनीतेन यावनालान्नेन (भक्करि) जीवनं निरवहन् ।

महानुभावाः जयतीर्थश्रीमच्चरणाः गुरुभक्तिविषये अन्यादृशम् आदर्शम् अस्माकं पुरतः उपस्थापयामासुः । तद्यथा—

**न शब्दाब्धौ गाढा न च निगमचर्चासु चतुरा**
**न च न्याये प्रौढा न च विदितवेद्या अपि वयम् ।**
**परं श्रीमत्पूर्णप्रमतिगुरुकारुण्यसरणिं**
**प्रपन्ना मान्याः स्मः किमपि च वदन्तोऽपि महताम् ॥**

अनेन श्लोकेन प्रदर्शितः विनयः अनन्यसाधारणः लोकातिशायी सहृदयान् जिज्ञासून् रोमाञ्चयति । एतदपेक्षया अधिकः गुरुप्रवणः गुरोः दासानुदासः लोके यत्र कुत्रापि नोपलभ्येत इत्येवं सर्वैः सर्वथा अनुभूयते एव ।

अल्पीयसा अनेहसा स्वकीयप्रखरबुद्धिवैभवेन निर्मितस्य अस्य सुधाग्रन्थस्य वैशिष्ट्यं वर्णयितुं सहस्रवदनः शेषोऽपि नालम्, किमुत अल्पप्रज्ञाः तृणकल्पाः वयम् । एतदीयग्रन्थस्य माहात्म्यं संवर्णयन् कविरेकः एवमुद्गिरति स्म । यथा—

**आमूलाग्रनिबद्धतर्कजटिलं शब्दैकजीवातुकं**
**मीमांसानुनयं च शङ्करवचो हुङ्कारभङ्गप्रदम् ।**
**शास्त्रं तन्त्रचतुष्टयात्मकमिदं निस्स्वप्रतन्त्रान्तराः**
**व्याख्यास्यन्ति पठन्ति वा कथमहो किं वा कलौ दुर्घटम् ॥**

'अध्यात्मविद्या विद्यानाम्' इति श्रीकृष्णोक्त्यनुसारेण अद्वितीयाध्यात्मविद्याख्य-सूत्रव्याख्यानरूपा इयं न्यायसुधा नैकाभिष्टिप्पणीभिः सह संयोज्य, संशोध्य, संमुद्र्य अत्र प्रकाशं नीयते । महदिदं साहसकार्यं महापुरुषोत्तमस्य श्रीहरेः अविच्छिन्नभक्ताग्रेसर-श्रीमन्मुख्यप्राणावताराणां श्रीमदानन्दतीर्थभगवत्पादानां परमानुग्रहेणैव सम्पन्नः प्रह्लादावतारभूतानां श्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमानाम् आराधनासमये तत्करकमलाभ्यामेव श्रीमन्मूलरामचन्द्रदेवस्य पादकमलयोः तद्भक्तवृन्देन सप्रश्रयं सभक्ति समर्प्यतेतमाम् । श्रीकृष्णार्पणमस्तु ॥

*आचार्याः साणूरु भीमभट्टाः*

प्रथमपञ्चदशभागप्रधानसम्पादकाः

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

# श्रीमन्न्यायसुधा

## सम्पुटम् – २२

### विषयानुक्रमणिका



| विषयः | परिच्छेदः | पुटसङ्ख्या |
|---|---|---|
| **चतुर्थाध्यायस्य प्रथमपादः** | १-५५ | १०५०१-१०६१५ |
| फलाध्यायस्य सङ्गतिनिरूपणम् | १ | १०५०१-१०५११ |
| **आवृत्त्यधिकरणम्** | २-४ | १०५११-१०५१९ |
| श्रवणादेः पौनःपुन्येन कर्तव्यत्वसमर्थनम् | २ | १०५११ |
| रुद्रादिदेवानां 'श्रवणाद्यावृत्ति' विषये आगमोदाहरणम् | ३ | १०५१३ |
| श्रवणाद्यावृत्तिस्वरूपकथनम् | ४ | १०५१५ |
| **आत्मोपगमाधिकरणम्** | ५-११ | १०५२० |
| आत्मशब्दवाच्यः विष्णुरेव | ५-६ | १०५२०-१०५२६ |
| सज्जनैः विष्णुः आत्मत्वेन ज्ञातव्यः, उपास्यः, ध्येयश्च | ७ | १०५२६ |
| आत्मशब्दः स्वाम्यर्थकः | ८ | १०५२८ |
| स्वामित्वेन उपासने प्रमाणोक्तिः | ९-११ | १०५३०-१०५३२ |
| **प्रतीकाधिकरणम्** | १२-१४ | १०५३२-१०५४० |
| प्रतीकानां ब्रह्मत्वेनोपासनप्रतिषेधः | १२ | १०५३२ |
| मिथ्योपासनस्य अनर्थहेतुत्वे श्रुतयः | १३ | १०५३४ |
| प्रतीकगतत्वेन उपासने श्रुतितात्पर्यम् | १४ | १०५३९ |
| **ब्रह्मदृष्ट्यधिकरणम्** | १५-१६ | १०५४०-१०५४६ |
| विष्णुः पूर्णत्वेनापि उपास्यः | १५ | १०५४० |
| पूर्णत्वस्य अवश्योपास्यत्वे प्रमाणोल्लेखः | १६ | १०५४४ |

| | | |
|---|---|---|
| **परकीयव्याख्याननिरासः** | १७-५५ | १०५४७-१०६१५ |
| मायामते 'परमात्मा जीवत्वेन प्रतिपत्तव्यः' इति प्रथमसूत्रार्थः | १७ | १०५४७ |
| 'जीवप्रतीकयोः अभेदोपासननिषेधः' द्वितीयसूत्रार्थः | १८ | १०५४८ |
| आदित्यादिषु 'ब्रह्मत्वोपासनविधानं' तृतीयसूत्रार्थः | १९ | १०५५१ |
| आत्मशब्दस्य जीववाचकत्वं सूत्रकारस्य अनभिमतम् | २०-२३ | १०५५२-१०५५७ |
| आगमवाक्येन आत्मशब्दस्य विष्णुवाचकत्वसिद्धिः | २४ | १०५२८ |
| आत्मशब्दस्य जीवार्थकत्वं निवारयतः सूत्रकारस्य जीवब्रह्मैक्यं नाभिमतम् | २५ | १०५५९ |
| जीवेशयोः ऐक्ये सूत्रान्तरविरोधप्रदर्शनम् | २६ | १०५६० |
| जीवब्रह्मभेदः न भ्रान्तिसिद्धः | २७ | १०५६२ |
| भेदमात्रस्य भ्रान्तिसिद्धत्वे प्रतिज्ञायाः व्याहतत्वप्रसङ्गः | २८-३० | १०५६४-१०५६८ |
| 'भेदमात्रं भ्रान्तिकल्पितं' इति वाक्यार्थस्य भ्रान्तिकल्पितत्वे बाध्यत्वे च सर्वभेदानां पारमार्थिकत्वप्रसङ्गः | ३१ | १०५६८ |
| विरुद्धधर्मयोः एकस्य असत्यत्वसिद्धौ अपरस्य सत्यत्वसिद्धिः | ३२ | १०५७० |
| समानदेशकालयोः घटघटाभावयोर्मिथ्यात्वमनुपपन्नम् | ३३-३५ | १०५७२-१०५८० |
| प्रतीकविषयकत्वेन विष्णोः उपासननिषेध एव द्वितीयसूत्रार्थः | ३६ | १०५८० |
| प्रतीकविषयकोपासननिषेध इव प्रतीकगतत्वेनोपासनमपि सूत्रार्थः | ३७ | १०५८२ |
| जीवप्रतीकैक्यस्य अप्राप्तत्वात् तन्निषेधपरः सूत्रार्थः असमञ्जसः | ३८ | १०५८३ |
| आत्मशब्दवाच्यः विष्णुरेव तच्छब्देन परामृष्टः | ३९ | १०५८४ |
| मायामतरीत्या द्वितीयतृतीयसूत्रव्याख्यानयोः परस्परं विरोधः | ४०-४१ | १०५८५-१०५८८ |
| उत्कर्षप्राप्त्यभावस्य हेतुविशेषणत्वे प्रतीके आत्मत्वेनोपासनस्य अपरिहार्यत्वप्रसङ्गः | ४२ | १०५८८ |
| प्रतीकेषु ब्रह्मत्वध्यानं ब्रह्मणः नीचत्वध्याने पर्यवस्यति | ४३ | १०५९१ |
| अचेतने ब्रह्मत्वध्यानं अनर्थहेतुः | ४४ | १०५९२ |
| दृष्टान्तेन उक्तार्थसमर्थनम् | ४५-४६ | १०५९३-१०५९६ |
| प्रतीकत्वेन ब्रह्मोपासनं, ब्रह्मत्वेन प्रतीकोपासनं समानमेव | ४७ | १०५९६ |
| कथितार्थोपसंहारः | ४८ | १०६०० |
| **तदधिगमाधिकरणम्** | ४९-५४ | १०६०१-१०६१५ |
| उपासनेन साक्षात्कृता भगवता ज्ञानात्पूर्वं पापं नश्यति, आगामिपापलेपो नैव जायते | ४९ | १०६०१ |

| | | |
|---|---|---|
| मायावादव्याख्यानमयुक्तम् | ५० | १०६०२ |
| ब्रह्मद्वेषिणः द्वेषपरिपूर्तेः पूर्वस्य पुण्यस्य नाशः उत्तरपुण्यस्य अलेपश्च | ५१ | १०६०३ |
| 'यदेव विद्यये'ति सूत्रप्रतिपाद्यस्य न पौनरुक्त्यम् | ५२ | १०६०६ |
| प्रारब्धकर्मक्षयानन्तरमेव ज्ञानिनां द्वेषिणाञ्च तत्तद्योग्यमोक्षः | ५३ | १०६०७ |
| ब्रह्मादिदेवतानां प्रारब्धभोगकालनिरूपणम् | ५४ | १०६०८ |
| **चतुर्थाध्यायस्य द्वितीयपादः** | १-१४८ | १०६१६-१०९३३ |
| एतत्पादप्रतिपाद्यार्थनिरूपणम् | १ | १०६१६ |
| पादचतुष्टयस्य सङ्गतिनिरूपणम् | २ | १०६१९ |
| देवतामुक्तिक्रमनिरूपणम् | ३ | १०६२४ |
| देवतामुक्तेः पूर्वमेव अर्चिरादिमार्गाणां विनाशात् देवानां मार्गाभावः | ४ | १०६२७ |
| मानुषलोके जातानां देवानां कदाचिदुत्क्रान्तिसत्त्वेऽपि तदा मोक्षः नाङ्गीकृतः | ५ | १०६२८ |
| देवानां इतरेषाञ्च मोक्षक्रमः | ६ | १०६२९ |
| पूर्वोक्तार्थस्य व्याख्यानम् | ७ | १०६३४ |
| कर्मक्षयभोगौ सर्वसाधारणौ देवताभिन्नानामेव उत्क्रान्तिमार्गः | ८ | १०६३८ |
| भाष्यतात्पर्यस्पष्टीकरणम् | ९ | १०६३९ |
| वाद्यन्तरोक्तमोक्षस्वरूपस्य उत्प्रेक्षामूलत्वम् | १० | १०६४० |
| वादिनां मोक्षविषयकविवादे निमित्तकथनम् | ११ | १०६४१ |
| सत्त्वरजस्तमोगुणानां क्रमशः यथार्थ-मिश्र-विपरीतज्ञानजनकत्वम् | १२ | १०६४३ |
| मुक्त-लक्ष्मी-भगवज्ज्ञानानां जडभिन्नत्वात् न गुणजन्यत्वम् | १३ | १०६४५ |
| लक्ष्मीज्ञानस्य मुक्तज्ञानात् स्पष्टत्वं, भगवज्ज्ञानस्य असाधारणातिशयत्वं, लक्ष्मीचतुर्मुखज्ञानयोः प्रायः सादृश्यम् | १४-१६ | १०६४८-१०६५७ |
| चतुर्मुखेतरमुक्तज्ञानं सागरतरङ्गवत् वृद्धिह्रासयुक्तं, संसारिज्ञानं तु अग्नेः अग्निज्वालोत्पत्तिवत् अन्तःकरणजन्यम् | १७ | १०६५७ |
| वादिनां मोक्षस्वरूपान्यथाकथने तमोगुणस्यैव निमित्तत्वम् | १८ | १०६५९ |
| **जैनाभिमतमोक्षस्वरूपनिरासः** | १९-२६ | १०६६१-१०६७८ |
| अलोकाकाशे 'निरन्तरोर्ध्वगमनमेव' मोक्षः इति जैनमतम् | १९ | १०६६१ |
| जैनोक्तमोक्षस्य प्रत्यनुमानेन दुःखोपेतत्वसाधनम् | २० | १०६६३ |

| | | |
|---|---|---|
| सिद्धान्त्युक्तानुमाने उपाधिशङ्कानिरासः | २१-२२ | १०६६४-१०६७० |
| प्रतिपक्षानुमाने उपाधेः दूषणत्वाभावः | २३ | १०६७१ |
| 'शरीरिवृत्तित्व'रूपस्य साधनाव्यापकत्वभङ्गात् नोपाधित्वम् | २४ | १०६७४ |
| आपादनसन्दर्भे अपसिद्धान्तस्य न दोषत्वम् | २५ | १०६७५ |
| 'लोकाकाशगतित्व'रूपस्य साधनव्यापकत्वात् उपाधित्वाभावः | २६ | १०६७७ |
| **मोक्षविषये बौद्ध-मायामतयोः निराकरणम्** | २७-६० | १०६७९-१०७४६ |
| बौद्धमतस्य विष्णुप्रणीतत्वेऽपि अग्राह्यत्वमेव | २७ | १०६७९ |
| बौद्धमतप्रभेदनिरूपणम् | २८ | १०६८१ |
| शून्यवादिनां मोक्षनिरूपणम् | २९-३० | १०६८३-१०६८६ |
| एकात्मवादिनां संसारमोक्षस्वरूपनिरूपणम् | ३१-३३ | १०६८६-१०६९२ |
| अनेकात्मवादनिरूपणम् | ३४ | १०६९२ |
| संवृतिमाययोः साम्यात् शून्यवादमायावादयोः सादृश्यम् | ३५ | १०६९५ |
| निर्विशेषत्वाविशेषात् ब्रह्मशून्ययोः साम्यम् | ३६ | १०६९६ |
| ब्रह्मणः अखण्डत्वस्य अभ्युपगतत्वात् सत्यत्वादीनां न ब्रह्मलक्षणत्वम् | ३७ | १०६९६ |
| सत्यादिपदैः असत्यत्वादिव्यावृत्तिः उभयसाधारणा | ३८ | १०६९७ |
| निर्विशेषत्ववादिनोः उभयोः ब्रह्मशून्ययोः विशेषसाधनं व्याहतम् | ३९ | १०६९९ |
| मायावादिना अप्रामाण्यात्मकाऽतत्त्वावेदकत्वस्य वेदेऽङ्गीकारात् वेदप्रामाण्यविषये उभयोः साम्यम् | ४० | १०६९९ |
| ब्रह्मज्ञानैकबाध्यविषयप्रतिपादकत्वस्य अतत्त्वावेदकत्वे सुदीर्घभ्रमजनकत्वात् वेदानां अप्रामाण्यम् | ४१ | १०७०३ |
| एतादृशाऽतत्त्वावेदकत्वस्य स्वसमयसङ्केतत्वे नभोनैल्यज्ञानस्य प्रामाण्यापत्तिः | ४२-४३ | १०७०४-१०७०७ |
| 'तत्त्वमस्या'दिमहावाक्यार्थभूतं निर्भेदत्वं शून्यस्यापि अङ्गीकृतम् | ४४ | १०७०७ |
| अवान्तरवाक्यार्थभूतस्य 'निर्विशेषत्व'स्यापि अङ्गीकारः | ४५-४६ | १०७०८-१०७१० |
| अद्वैततत्त्वं न सूत्रकारस्य अभिमतम् | ४६अ | १०७१० |
| आत्मविनाशस्य मोक्षत्वस्वीकारे मोक्षस्य अपुमर्थत्वप्रसङ्गः | ४७-४८ | १०७११-१०७१६ |
| मोक्षस्य आत्मावधित्वाभावे घटशून्यत्वस्यापि मोक्षत्वप्रसङ्गः | ४९-५० | १०७१६-१०७२० |

| | | |
|---|---|---|
| मायिनां मोक्षोऽपि आत्मविनाशरूप एव | ५१ | १०७२० |
| 'आत्मशून्यतायाः अपि आत्मविशेषितत्वात् अमोक्षत्वप्रसङ्गः | ५२ | १०७२६ |
| आत्मशून्यतायाः सविशेषत्वानङ्गीकारे घटशून्यत्वेऽपि तथात्वं सुकरमेव | ५३ | १०७२७ |
| आत्मविनाशस्य मोक्षत्वसाधकानुमाने सत्प्रतिपक्षता | ५४ | १०७३० |
| मायावादे श्रुतेरप्रामाण्यात् श्रुत्या न प्रत्यनुमानबाधः | ५५-५६ | १०७३३-१०७३५ |
| 'अशरीरं वाव सन्तं' इति श्रुतिः मोक्षे प्राकृतशरीरराहित्यमेव प्रतिपादयति | ५७ | १०७३५ |
| परोक्तानुमानस्य दूषणान्तरं शून्य-मायावादयोः तिरस्कार्यत्वञ्च | ५८-६० | १०७३७-१०७४६ |
| **विज्ञानवादिनां मतनिरासः** | ६१-७५ | १०७४६-१०७६५ |
| 'अद्वितीयविज्ञानत्वप्राप्ति'रूपमोक्षे दूषणातिदेशसमर्थनम् | ६१ | १०७४६ |
| कालत्वहेतुकानुमानेन तदभिमतमोक्षनिरासः | ६२ | १०७४९ |
| कालस्य अङ्गीकार्यत्वात् अनुमाने नाश्रयासिद्धिः | ६३ | १०७५० |
| अवस्थात्वहेतुना मोक्षस्वरूपनिराकरणम् | ६४-६५ | १०७५१-१०७५२ |
| कालाभावः वक्तुं अशक्य एव | ६६ | १०७५२ |
| कालस्वरूपनिषेधे साक्षिविरोधः | ६७ | १०७५४ |
| साक्षिविरोधः मुख्यतः एकजीववादिमते | ६८-६९ | १०७५५-१०७५६ |
| कालत्वहेतुना मोक्षकाले प्रपञ्चसिद्धिः | ७०-७१ | १०७५६-१०७५८ |
| सिद्धान्तसाम्यात् कालैकत्वादिमतानां निराकरणम् | ७२ | १०७५९ |
| वैभाषिक-सौत्रान्तिकाभिमतमोक्षस्वरूपनिरूपणम्, तन्निरसनञ्च | ७३-७५ | १०७६१-१०७६५ |
| **साङ्ख्यवैशेषिकाभिमतमोक्षस्वरूपनिराकरणम्** | ७६-८० | १०७६५-१०८०० |
| साङ्ख्याद्यभिमतमोक्षस्वरूपवर्णनम् | ७६-७७ | १०७६५-१०७७० |
| मोक्षस्य सुखरहितत्वेऽपि दुःखनिवृत्तिरूपत्वात् पुरुषार्थत्वसमर्थनम् | ७८-७९ | १०७७१-१०७९८ |
| मोक्षे सुखराहित्यवादः श्रुतिविरुद्धः | ८० | १०७९९ |
| **'प्रियास्पृष्टि'श्रुतिविचारः** | ८१-८७ | १०८००-१०८११ |
| 'प्रियास्पृष्टि'श्रुतेः प्राकृतसुखाभावे तात्पर्यम् | ८१ | १०८०० |
| 'अप्रियास्पृष्टिः' न विभागेन व्याख्यातव्या | ८२ | १०८०१ |

| | | |
|---|---|---|
| सिद्धान्त्युक्तानुमाने उपाधिशङ्कानिरासः | २१-२२ | १०६६४-१०६७० |
| प्रतिपक्षानुमाने उपाधेः दूषणत्वाभावः | २३ | १०६७१ |
| 'शरीरिवृत्तित्व'रूपस्य साधनाव्यापकत्वभङ्गात् नोपाधित्वम् | २४ | १०६७४ |
| आपादनसन्दर्भे अपसिद्धान्तस्य न दोषत्वम् | २५ | १०६७५ |
| 'लोकाकाशगतित्व'रूपस्य साधनव्यापकत्वात् उपाधित्वाभावः | २६ | १०६७७ |
| **मोक्षविषये बौद्ध-मायामतयोः निराकरणम्** | २७-६० | १०६७९-१०७४६ |
| बौद्धमतस्य विष्णुप्रणीतत्वेऽपि अग्राह्यत्वमेव | २७ | १०६७९ |
| बौद्धमतप्रभेदनिरूपणम् | २८ | १०६८१ |
| शून्यवादिनां मोक्षनिरूपणम् | २९-३० | १०६८३-१०६८६ |
| एकात्मवादिनां संसारमोक्षस्वरूपनिरूपणम् | ३१-३३ | १०६८६-१०६९२ |
| अनेकात्मवादनिरूपणम् | ३४ | १०६९२ |
| संवृतिमाययोः साम्यात् शून्यवादमायावादयोः सादृश्यम् | ३५ | १०६९५ |
| निर्विशेषत्वाविशेषात् ब्रह्मशून्ययोः साम्यम् | ३६ | १०६९६ |
| ब्रह्मणः अखण्डत्वस्य अभ्युपगतत्वात् सत्यत्वादीनां न ब्रह्मलक्षणत्वम् | ३७ | १०६९६ |
| सत्यादिपदैः असत्यत्वादिव्यावृत्तिः उभयसाधारणा | ३८ | १०६९७ |
| निर्विशेषत्ववादिनोः उभयोः ब्रह्मशून्ययोः विशेषसाधनं व्याहतम् | ३९ | १०६९९ |
| मायावादिना अप्रामाण्यात्मकाऽतत्त्वावेदकत्वस्य वेदेऽङ्गीकारात् वेदप्रामाण्यविषये उभयोः साम्यम् | ४० | १०६९९ |
| ब्रह्मज्ञानैकबाध्यविषयप्रतिपादकत्वस्य अतत्त्वावेदकत्वे सुदीर्घभ्रमजनकत्वात् वेदानां अप्रामाण्यम् | ४१ | १०७०३ |
| एतादृशाऽतत्त्वावेदकत्वस्य स्वसमयसङ्केतत्वे नभोनैल्यज्ञानस्य प्रामाण्यापत्तिः | ४२-४३ | १०७०४-१०७०७ |
| 'तत्त्वमस्या'दिमहावाक्यार्थभूतं निर्भेदत्वं शून्यस्यापि अङ्गीकृतम् | ४४ | १०७०७ |
| अवान्तरवाक्यार्थभूतस्य 'निर्विशेषत्व'स्यापि अङ्गीकारः | ४५-४६ | १०७०८-१०७१० |
| अद्वैततत्त्वं न सूत्रकारस्य अभिमतम् | ४६अ | १०७१० |
| आत्मविनाशस्य मोक्षत्वस्वीकारे मोक्षस्य अपुमर्थत्वप्रसङ्गः | ४७-४८ | १०७११-१०७१६ |
| मोक्षस्य आत्मावधित्वाभावे घटशून्यत्वस्यापि मोक्षत्वप्रसङ्गः | ४९-५० | १०७१६-१०७२० |

| | | |
|---|---|---|
| मायिनां मोक्षोऽपि आत्मविनाशरूप एव | ५१ | १०७२० |
| 'आत्मशून्यतायाः अपि आत्मविशेषितत्वात् अमोक्षत्वप्रसङ्गः | ५२ | १०७२६ |
| आत्मशून्यतायाः सविशेषत्वानङ्गीकारे घटशून्यत्वेऽपि तथात्वं सुकरमेव | ५३ | १०७२७ |
| आत्मविनाशस्य मोक्षत्वसाधकानुमाने सत्प्रतिपक्षता | ५४ | १०७३० |
| मायावादे श्रुतेरप्रामाण्यात् श्रुत्या न प्रत्यनुमानबाधः | ५५-५६ | १०७३३-१०७३५ |
| 'अशरीरं वाव सन्तं' इति श्रुतिः मोक्षे प्राकृतशरीरराहित्यमेव प्रतिपादयति | ५७ | १०७३५ |
| परोक्तानुमानस्य दूषणान्तरं शून्य-मायावादयोः तिरस्कार्यत्वञ्च | ५८-६० | १०७३७-१०७४६ |
| **विज्ञानवादिनां मतनिरासः** | ६१-७५ | १०७४६-१०७६५ |
| 'अद्वितीयविज्ञानत्वप्राप्ति'रूपमोक्षे दूषणातिदेशसमर्थनम् | ६१ | १०७४६ |
| कालत्वहेतुकानुमानेन तदभिमतमोक्षनिरासः | ६२ | १०७४९ |
| कालस्य अङ्गीकार्यत्वात् अनुमाने नाश्रयासिद्धिः | ६३ | १०७५० |
| अवस्थात्वहेतुना मोक्षस्वरूपनिराकरणम् | ६४-६५ | १०७५१-१०७५२ |
| कालाभावः वक्तुं अशक्य एव | ६६ | १०७५२ |
| कालस्वरूपनिषेधे साक्षिविरोधः | ६७ | १०७५४ |
| साक्षिविरोधः मुख्यतः एकजीववादिमते | ६८-६९ | १०७५५-१०७५६ |
| कालत्वहेतुना मोक्षकाले प्रपञ्चसिद्धिः | ७०-७१ | १०७५६-१०७५८ |
| सिद्धान्तसाम्यात् कालैकत्वादिमतानां निराकरणम् | ७२ | १०७५९ |
| वैभाषिक-सौत्रान्तिकाभिमतमोक्षस्वरूपनिरूपणम्, तन्निरसनञ्च | ७३-७५ | १०७६१-१०७६५ |
| **साङ्ख्यवैशेषिकाभिमतमोक्षस्वरूपनिराकरणम्** | ७६-८० | १०७६५-१०८०० |
| साङ्ख्याद्यभिमतमोक्षस्वरूपवर्णनम् | ७६-७७ | १०७६५-१०७७० |
| मोक्षस्य सुखरहितत्वेऽपि दुःखनिवृत्तिरूपत्वात् पुरुषार्थत्वसमर्थनम् | ७८-७९ | १०७७१-१०७९८ |
| मोक्षे सुखराहित्यवादः श्रुतिविरुद्धः | ८० | १०७९९ |
| **'प्रियास्पृष्टि'श्रुतिविचारः** | ८१-८७ | १०८००-१०८११ |
| 'प्रियास्पृष्टि'श्रुतेः प्राकृतसुखाभावे तात्पर्यम् | ८१ | १०८०० |
| 'अप्रियास्पृष्टिः' न विभागेन व्याख्यातव्या | ८२ | १०८०१ |

| | | |
|---|---|---|
| सिद्धान्त्युक्तानुमाने उपाधिशङ्कानिरासः | २१-२२ | १०६६४-१०६७० |
| प्रतिपक्षानुमाने उपाधेः दूषणत्वाभावः | २३ | १०६७१ |
| 'शरीरिवृत्तित्व'रूपस्य साधनाव्यापकत्वभङ्गात् नोपाधित्वम् | २४ | १०६७४ |
| आपादनसन्दर्भे अपसिद्धान्तस्य न दोषत्वम् | २५ | १०६७५ |
| 'लोकाकाशगतित्व'रूपस्य साधनव्यापकत्वात् उपाधित्वाभावः | २६ | १०६७७ |
| **मोक्षविषये बौद्ध-मायामतयोः निराकरणम्** | २७-६० | १०६७९-१०७४६ |
| बौद्धमतस्य विष्णुप्रणीतत्वेऽपि अग्राह्यत्वमेव | २७ | १०६७९ |
| बौद्धमतप्रभेदनिरूपणम् | २८ | १०६८१ |
| शून्यवादिनां मोक्षनिरूपणम् | २९-३० | १०६८३-१०६८६ |
| एकात्मवादिनां संसारमोक्षस्वरूपनिरूपणम् | ३१-३३ | १०६८६-१०६९२ |
| अनेकात्मवादनिरूपणम् | ३४ | १०६९२ |
| संवृतिमाययोः साम्यात् शून्यवादमायावादयोः सादृश्यम् | ३५ | १०६९५ |
| निर्विशेषत्वाविशेषात् ब्रह्मशून्ययोः साम्यम् | ३६ | १०६९६ |
| ब्रह्मणः अखण्डत्वस्य अभ्युपगतत्वात् सत्यत्वादीनां न ब्रह्मलक्षणत्वम् | ३७ | १०६९६ |
| सत्यादिपदैः असत्यत्वादिव्यावृत्तिः उभयसाधारणा | ३८ | १०६९७ |
| निर्विशेषत्ववादिनोः उभयोः ब्रह्मशून्ययोः विशेषसाधनं व्याहतम् | ३९ | १०६९९ |
| मायावादिना अप्रामाण्यात्मकाऽतत्त्वावेदकत्वस्य वेदेऽङ्गीकारात् वेदप्रामाण्यविषये उभयोः साम्यम् | ४० | १०६९९ |
| ब्रह्मज्ञानैकबाध्यविषयप्रतिपादकत्वस्य अतत्त्वावेदकत्वे सुदीर्घभ्रमजनकत्वात् वेदानां अप्रामाण्यम् | ४१ | १०७०३ |
| एतादृशाऽतत्त्वावेदकत्वस्य स्वसमयसङ्केतत्वे नभोनैल्यज्ञानस्य प्रामाण्यापत्तिः | ४२-४३ | १०७०४-१०७०७ |
| 'तत्त्वमस्या'दिमहावाक्यार्थभूतं निर्भेदत्वं शून्यस्यापि अङ्गीकृतम् | ४४ | १०७०७ |
| अवान्तरवाक्यार्थभूतस्य 'निर्विशेषत्व'स्यापि अङ्गीकारः | ४५-४६ | १०७०८-१०७१० |
| अद्वैततत्त्वं न सूत्रकारस्य अभिमतम् | ४६अ | १०७१० |
| आत्मविनाशस्य मोक्षत्वस्वीकारे मोक्षस्य अपुमर्थत्वप्रसङ्गः | ४७-४८ | १०७११-१०७१६ |
| मोक्षस्य आत्मावधित्वाभावे घटशून्यत्वस्यापि मोक्षत्वप्रसङ्गः | ४९-५० | १०७१६-१०७२० |

| | | |
|---|---|---|
| मायिनां मोक्षोऽपि आत्मविनाशरूप एव | ५१ | १०७२० |
| 'आत्मशून्यतायाः अपि आत्मविशेषितत्वात् अमोक्षत्वप्रसङ्गः | ५२ | १०७२६ |
| आत्मशून्यतायाः सविशेषत्वानङ्गीकारे घटशून्यत्वेऽपि तथात्वं सुकरमेव | ५३ | १०७२७ |
| आत्मविनाशस्य मोक्षत्वसाधकानुमाने सत्प्रतिपक्षता | ५४ | १०७३० |
| मायावादे श्रुतेरप्रामाण्यात् श्रुत्या न प्रत्यनुमानबाधः | ५५-५६ | १०७३३-१०७३५ |
| 'अशरीरं वाव सन्तं' इति श्रुतिः मोक्षे प्राकृतशरीरराहित्यमेव प्रतिपादयति | ५७ | १०७३५ |
| परोक्तानुमानस्य दूषणान्तरं शून्य-मायावादयोः तिरस्कार्यत्वञ्च | ५८-६० | १०७३७-१०७४६ |
| **विज्ञानवादिनां मतनिरासः** | ६१-७५ | १०७४६-१०७६५ |
| 'अद्वितीयविज्ञानत्वप्राप्ति'रूपमोक्षे दूषणातिदेशसमर्थनम् | ६१ | १०७४६ |
| कालत्वहेतुकानुमानेन तदभिमतमोक्षनिरासः | ६२ | १०७४९ |
| कालस्य अङ्गीकार्यत्वात् अनुमाने नाश्रयासिद्धिः | ६३ | १०७५० |
| अवस्थात्वहेतुना मोक्षस्वरूपनिराकरणम् | ६४-६५ | १०७५१-१०७५२ |
| कालाभावः वक्तुं अशक्य एव | ६६ | १०७५२ |
| कालस्वरूपनिषेधे साक्षिविरोधः | ६७ | १०७५४ |
| साक्षिविरोधः मुख्यतः एकजीववादिमते | ६८-६९ | १०७५५-१०७५६ |
| कालत्वहेतुना मोक्षकाले प्रपञ्चसिद्धिः | ७०-७१ | १०७५६-१०७५८ |
| सिद्धान्तसाम्यात् कालैकत्वादिमतानां निराकरणम् | ७२ | १०७५९ |
| वैभाषिक-सौत्रान्तिकाभिमतमोक्षस्वरूपनिरूपणम्, तन्निरसनञ्च | ७३-७५ | १०७६१-१०७६५ |
| **साङ्ख्यवैशेषिकाभिमतमोक्षस्वरूपनिराकरणम्** | ७६-८० | १०७६५-१०८०० |
| साङ्ख्याद्यभिमतमोक्षस्वरूपवर्णनम् | ७६-७७ | १०७६५-१०७७० |
| मोक्षस्य सुखरहितत्वेऽपि दुःखनिवृत्तिरूपत्वात् पुरुषार्थत्वसमर्थनम् | ७८-७९ | १०७७१-१०७९८ |
| मोक्षे सुखराहित्यवादः श्रुतिविरुद्धः | ८० | १०७९९ |
| **'प्रियास्पृष्टि'श्रुतिविचारः** | ८१-८७ | १०८००-१०८११ |
| 'प्रियास्पृष्टि'श्रुतेः प्राकृतसुखाभावे तात्पर्यम् | ८१ | १०८०० |
| 'अप्रियास्पृष्टिः' न विभागेन व्याख्यातव्या | ८२ | १०८०१ |

| | | |
|---|---|---|
| मुक्तियोग्यजीवस्य अप्राकृतदुःखाङ्गीकारः अप्रामाणिकः | ८३ | १०८०२ |
| मोक्षसुखमप्राकृतमेव | ८४ | १०८०३ |
| सकलविधदुःखाभाव एव श्रुत्यभिप्रेतः | ८५ | १०८०५ |
| दुःखस्वरूपाणामसुराणां मोक्षाभावात् मोक्षे न दुःखप्रसक्तिः | ८६ | १०८०६ |
| अप्राकृतदुःखसद्भावे मोक्षस्यापुरुषार्थत्वप्रसङ्गः | ८७ | १०८०८ |
| **'नप्रेत्यसंज्ञाऽस्ति' श्रुतिविमर्शः** | ८८-१०२ | १०८१२-१०८३३ |
| मुक्तानां अमुक्ताज्ञेयत्वमेव श्रुत्यर्थः | ८८-८९ | १०८१२-१०८१५ |
| 'अयमात्माऽनुच्छित्तिधर्मा' इति श्रुत्या मुक्ते न ज्ञानप्रतिषेधः | ९०-९४ | १०८१५-१०८२१ |
| 'माध्यन्दिन' श्रुत्या मुक्तस्य विषयभोगसमर्थनम् | ९५ | १०८२२ |
| मोक्षे विषयोपभोगाभावमतस्य श्रुतिनिन्द्यत्वम् | ९६-९७ | १०८२३-१०८२५ |
| 'यत्र हि' श्रुतिरपि विषयभोगाभावमतं दूषयति | ९८ | १०८२६ |
| जीवब्रह्मणोः ज्ञेयत्वसमर्थनम् | ९९-१०० | १०८२७-१०८३१ |
| एकक्रियायां कर्तृकर्मभेदनियमः औत्सर्गिकः | १०१ | १०८३१ |
| मुक्तानां स्वविषयकज्ञानानङ्गीकारे ईश्वरज्ञानानङ्गीकारे च प्रमाणविरोधः | १०२ | १०८३२ |
| **मुक्तेषु विषयभोगसमर्थनम्** | १०३-११८ | १०८३४-८७१ |
| मुक्तस्य विषयभोगः श्रुतिसिद्धः | १०३ | १०८३४ |
| 'यत्र हि' इति श्रुतिघटक 'इव' शब्दस्य अर्थकथनम् | १०४ | १०८३५ |
| 'इव' शब्दस्य 'अस्वातन्त्र्या' र्थकत्वं प्रमाणसिद्धम् | १०५ | १०८३६ |
| 'अविनाशी' इत्यादिश्रुतेः अन्यथाव्याख्याने बाधकप्रदर्शनम् | १०६ | १०८३८ |
| मोक्षस्य सुखादिहानिरूपत्वे अपुरुषार्थत्वप्रसङ्गः | १०७-११० | १०८४०-८४६ |
| सुखलेशप्राप्तये महादुःखानुभवः लोकसिद्धः | १११-११३ | १०८४७-८५३ |
| मुक्तस्य सुखानङ्गीकारे दुःखाङ्गीकारप्रसङ्गः | ११४ | १०८५४ |
| मुक्तौ सुखसद्भावे प्रमाणप्रदर्शनम् | ११५ | १०८५७ |
| मुक्ते सुखाभावसाधनाय प्रयुक्तस्य शरीरादिराहित्यहेतोः असिद्धत्वनिरूपणम् | ११६ | १०८६० |
| मुक्तानां देहसद्भावे पुराणवाक्योपन्यासः | ११७ | १०८६२ |
| अनुमानेनापि मुक्तानां देहवत्त्वसिद्धिः | ११८ | १०८७० |

| | | |
|---|---|---|
| **अन्योक्तमोक्षस्वरूपनिराकरणम्** | ११९-१२८ | १०८७२-९०३ |
| भास्कराद्यभिमतजीवब्रह्मैक्यलक्षणे मोक्षे प्रमाणाभावः | ११९ | १०८७२ |
| 'कालत्व'हेतुना मोक्षे ऐक्यनिराकरणम् | १२० | १०८७६ |
| अनुमानान्तरेणापि 'जीवब्रह्मभेदे'सिद्धिः | १२१ | १०८८१ |
| यादवप्रकाशादिमतनिरासः | १२२ | १०८८३ |
| मोक्षवादोपसंहारः | १२३ | १०८८७ |
| न्यायमालास्थलानि | १२४-१२६ | १०८८९-८९८ |
| श्रुत्यनुरोधेन देवानां पञ्चस्वपि भूतेषु लयः | १२७ | १०८९९ |
| भूतप्रकरणे विद्यमान'वायु'शब्दः मुख्यप्राणार्थकः | १२८ | १०९०० |
| **शेषादिमार्गेण देवतानां लयक्रमः** | १२९-१४७ | १०९०३-९३३ |
| मुख्यप्राणद्वारा सर्वदेवानां विष्णौ लयः | १२९-१३० | १०९०३-९०५ |
| मार्गद्वयस्य स्थूलनिरूपणम् | १३१ | १०९०५ |
| शेषमार्गनिरूपणम् | १३२ | १०९०८ |
| मुक्तिप्रतिपादनावसरे 'उमा-रुद्र'शब्दयोः 'वारुणी-शेष'प्रतिपादकत्वं 'भारती-प्राण'शब्दयोः 'सरस्वती- ब्रह्म'प्रतिपादकत्वमप्यङ्गीकार्यम् | १३३ | १०९०९ |
| उमादिपदानां वारुण्यादिपरत्वे निमित्तोक्तिः | १३४ | १०९११ |
| गरुडमार्गनिरूपणम् | १३५ | १०९१२ |
| इन्द्रलयोक्तिसन्दर्भे उमारुद्रपदयोः 'सौपर्णी-गरुड'परत्वम् | १३६ | १०९१३ |
| भृग्वादीनां वैवस्वतादिमनूनाञ्च लयक्रमः | १३७ | १०९१५ |
| पृथिव्याकाशाभिमानिनोः सनकादीनाञ्च लयक्रमः | १३८ | १०९१६ |
| वर्णाश्रमनिष्ठमनुष्याणां, पितृदेवतानां, गन्धर्वादीनां लयक्रमः | १३९ | १०९१७ |
| सायुज्यमुक्तिनिरूपणम् | १४०-१४१ | १०९१८-९२१ |
| 'लय'विषये प्रमाणोल्लेखः | १४२-१४३ | १०९२१-९२७ |
| मुख्यप्राणदेवस्य 'लय-मुक्त्योः' निरूपणम् | १४४ | १०९२७ |
| मुक्तानां नित्यसुखवत्त्वम् | १४५ | १०९३० |
| निर्ऋतेः, मरुद्गणस्य, विष्वक्सेनादीनां लयक्रमः | १४६-१४७ | १०९३०-९३३ |

| | | |
|---|---|---|
| **चतुर्थाध्यायस्य तृतीयपादः** | १-४ | १०९३४-९४० |
| पादप्रतिपाद्यार्थनिरूपणम् | १ | १०९३४ |
| एतत्पादगताधिकरणानां पूर्वपक्षसिद्धान्तयुक्तयः | २ | १०९३५ |
| प्रतीकालम्बनानां अप्रतीकालम्बनानाञ्च गतिप्रकारः | ३ | १०९३८ |
| **चतुर्थाध्यायस्य चतुर्थपादः** | १-२५ | १०९४१-९९२ |
| अस्य पादस्य पूर्वपक्षसिद्धान्तयुक्तयः | १ | १०९४१ |
| मुक्तानां नियतान्यानियम्यत्वमेव सूत्रार्थः | २ | १०९४४ |
| विष्णुः मुक्तानां पतिः | ३ | १०९४६ |
| अनुमानेनापि मुक्तानां नियम्यत्वसिद्धिः | ४ | १०९४६ |
| ब्रह्मादीनां मुक्तस्वकीयावरनियामकत्वमात्रम् | ५ | १०९४८ |
| उक्तार्थे श्रुतिप्रमाणम् | ६ | १०९५० |
| चतुर्मुखस्यैव सर्वलोकाधिपत्यम् | ७ | १०९५२ |
| श्रुतिघटकलोकशब्दस्य मुख्याऽमुख्यवृत्त्या मुक्तवाचकत्वम् | ८ | १०९५४ |
| श्रुत्यन्तरसमाख्ययाऽपि लोकशब्दस्य मुक्तार्थकत्वम् | ९-१० | १०९५६-९५९ |
| योगवृत्त्याऽपि लोकशब्दस्य मुक्तार्थत्वम् | ११-१२ | १०९५९-९६० |
| मायावाद्यभिप्रेतश्रुत्यर्थनिराकरणम् | १३-१४ | १०९६१-९६४ |
| श्रुतेः अभेदपरत्वे दोषकथनम् | १५-१६ | १०९६५-९६८ |
| उपसंहारपूर्वकं सङ्क्षेपतः पादार्थकथनम् | १७ | १०९६८ |
| अन्तिममङ्गलपद्यानि | १८ | १०९७० |
| अनुव्याख्यानकारैः स्वस्वरूपकथनम् | १९-२० | १०९७३-९८३ |
| ग्रन्थोपसंहारः | २१ | १०९८४ |
| न्यायसुधायां अन्तिममङ्गलपद्यानि | २२-२५ | १०९८५-९९२ |


*॥ इति चतुर्थाध्यायस्य चतुर्थः पादः ॥*

★ ★ ★

श्रीमन्मध्वकरार्चित-श्रीदिग्विजयरामदेवः　　चतुर्युगमूर्तिब्रह्मकरार्चित-श्रीमन्मूलरामदेवः　　श्रीजयतीर्थकरार्चित-श्रीजयरामदेवः

# ॥ श्रीमदानन्दतीर्थभगवत्पादाचार्याः ॥

व्याप्तिर्यस्य निजे निजेन महसा पक्षे सपक्षे स्थिति-
व्यावृत्तिश्च विपक्षतोऽथ विषये सक्तिर्न वै बाधिते ।
नैवास्ति प्रतिपक्षयुक्तिरतुलं शुद्धं प्रमाणं स मे
भूयात्तत्त्वविनिर्णयाय भगवानानन्दतीर्थो मुनिः ॥

# ॥ श्रीमज्जयतीर्थाः ॥



सत्पद्मबन्धवो यस्य गावो विश्वतमोनुदः ।
स स्यात् तत्त्वप्रकाशाय जयतीर्थरविर्मम ॥

# ॥ श्रीविजयीन्द्रतीर्थाः ॥

धर्मः सत्ये च धीमानहिरिव वचसा भूसुराणां सभायां
जेता भीमैव वादे पवन इव गतौ सम्पदि श्रीरिवाढ्यः ।
धाता ज्ञाता च सर्वानहिपतिशयनं पूजयंस्तोषयंश्च
लोकैः सर्वैश्च पूज्यो भुवि मनुजवरैर्मानितोऽभून्मुनीन्द्रः ॥

# ॥ श्रीराघवेन्द्रतीर्थाः ॥

चित्ते चेन्मृदुता शिरीषसदृशो हय्यङ्गवीनं शिला
गाम्भीर्यं यदि यस्य सोऽन्धुरुदधिः शास्त्रेषु चेत्पाण्डिती ।
आचार्यो विबुधेशितुः कलयते विद्यार्थितामादरात्
औदार्यं यदि कल्पपादपमुखाः सम्भावयन्तेऽर्थिताम् ॥

प्राक्तनपीठाधिपतयः

परमपूज्याः श्री श्री १००८ श्रीसुजयीन्द्रतीर्थश्रीपादाः



प्राक्तनपीठाधिपतयः

परमपूज्याः श्री श्री १००८ सुयतीन्द्रतीर्थाः

प्रस्तुतपीठाधिपतयः
परमपूज्याः श्री श्री १००८ श्री सुबुधेन्द्रतीर्थाः

सुधाग्रन्थसमूहस्य गजराजोपरि शोभायात्रा

सुधाग्रन्थानावरणसमारम्भः

द्वाविंशत्संख्यापरिमितसुधाग्रन्थसमूहस्य श्रीगुरुसार्वभौमानां सविधे समर्पणम्



परमपूज्यानां श्रीमत्सुबुधेन्द्रतीर्थश्रीपादानां विद्यार्थिभ्यः सुधाध्यापनसन्निवेशः

परमपूज्यानां श्रीमत्सुबुधेन्द्रतीर्थश्रीपादानां विद्यार्थिभ्यः सुधाध्यापनसन्निवेशः

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

## श्रीमज्जयतीर्थयतिकृता

# श्रीमन्न्यायसुधा

## अथ चतुर्थाध्यायः

### अथ चतुर्थाध्यायस्य प्रथमः पादः

॥ अथ फलाध्यायस्य सङ्गतिनिरूपणम् ॥

१ सु०— यदीयचरणाम्भोजच्छायामाश्रित्य निर्वृताः ।
नन्दन्ति सततं मुक्ताः संश्रये तं श्रियः पतिम् ॥

फलं निगद्यतेऽस्मिन्नध्याय इति भाष्यम् । फलनिरूपणस्येदानीं का सङ्गतिरित्यत आह **समन्वयेति** ।

अनु०— समन्वयाविरोधाभ्यां सिद्धे वस्तुनि साधने ।
विचारितेष्वशेषेषु साधनेषु विशेषतः ।
नित्यशः कार्यमत्यन्तमवश्यम्भावि साधनम् ।
चिन्त्यते प्रथमं तत्र

**समन्वयाविरोधाभ्यां** प्रथमद्वितीयाध्यायप्रतिपादिताभ्यां, परब्रह्मादिरूपे वस्तुनि **सिद्धे** सति, **साधने** साधनविषये तृतीयाध्याये, **अशेषेषु** मोक्षसाधनेषु, विचारितेषु सत्सु, फलप्रतिपादनस्यावसरप्राप्तिः । जिज्ञासितेष्वर्थेष्वन्येषां विचारितत्वादस्यैवावशिष्टत्वात् । अतो मोक्षलक्षणं फलमत्राध्याये निगद्यते इति वाक्यशेषः ।

**पादचतुष्टयप्रतिपाद्यं सङ्गतिं च लाघवाय एकत्रैव वक्ष्यति । ततश्च फलविषये अस्मिन् अध्याये कर्मनाशाख्यं फलं प्रथमपादे निगद्यत इत्युक्तं भवति । तस्यापवादमाह विशेषत इति । तत्र (अत्र) चतुर्थस्य प्रथमपादे, प्रथमं कैश्चित्सूत्रैः, साधनमेव चिन्त्यते। कथम् विशेषतः परमादरेण, नित्यशो नैरन्तर्येण च कार्यमिति । कुतः यतो मोक्षसिद्धावत्यन्तमवश्यम्भावि ।**

**इदमुक्तं भवति । तृतीयेऽध्याये यानि साधनानि विचारितानि तेष्वेव केषाश्चित्परमादरनैरन्तर्याभ्यामनुष्ठेयत्वमत्रादौ प्रतिपाद्यते । तथा अनुष्ठान एव मोक्षस्य भावात्, अन्यथा अभावात् । एतज्ज्ञापना(यैव)य तृतीये इदमनुक्त्वा अत्र इदमुच्यते । तत्रानुक्त्या हि ततो वैलक्षण्यं ज्ञायते । फललक्षणे च उक्त्या फलान्तरङ्गत्वम् । अध्यायादिव्यवस्था च प्रायिकत्वादुपपद्यत इति ।**

**परि०—** आराधितः साधनैर्यो मुक्तिं दद्याच्चतुर्विधाम् ।
तं वन्दे कमलानाथमभीष्टावा(प्तये हरिम् ॥)प्तिसिद्धये ॥

मङ्गलमाचरति **यदीयेति** । **निर्वृताः** मुक्तक्लेशाः । **नन्दन्ति** सुखमनुभवन्ति । **मुक्ताः** चतुर्विधमुक्तिमन्तः । यद्वा **निर्वृताः** क्षीणकर्माणः, **मुक्ताः** देहबन्धादिति पादद्वयार्थः । **यदीये**त्यादिस्तृतीयपादार्थः । **नन्दन्ती**ति चतुर्थपादार्थः । प्रतिपाद्यमनुक्त्वा सङ्गत्युक्तिरनवसरदुःस्थेत्यत आह **फलमिति** ॥ **परब्रह्मादीति** । **आदि**पदेनाधिदैवाधिभूतादिग्रहः । 'साधन' इत्यध्यायपरमेतदित्याह **साधने साधनविषय इति** । विषयसप्तमीयमित्युक्तं भवति । अवसरप्राप्तं व्यनक्ति **जिज्ञासितेष्विति** । प्रथमसूत्रे जिज्ञासाविषयतयोक्तेषु ब्रह्मलक्षणप्रमाणसाधनमोक्षेष्वित्यर्थः ॥ **सङ्गतिमिति** । पादानामिति योज्यम् ॥ **वक्ष्यतीति** । द्वितीयपादे ॥

**यादु०—**

श्रीशं प्रक्षीणकर्मौघैरुत्क्रान्तैरर्चिरादिना ।
यथाप्राप्यं(यथायथं)भोगवद्भिर्मुक्तैः सेव्यं हरिं भजे ॥ १ ॥

व्यासपादाम्बुजे ध्यात्वा मध्वमानससंस्थिते ।
व्याकरिष्ये सुधाऽस्पष्टचतुर्थाध्यायफक्किकाः ॥ २ ॥

आद्ये श्लोके **मुक्ताः** इत्यस्य कर्मणो देहाच्चेत्यर्थः । तेनाद्यद्वितीयपादार्थकथनम् । **छायामाश्रित्य निर्वृता** इत्यनेन मार्गगमनं ध्वन्यते । मार्गगतानामेव छायाश्रयणेन निर्वृतत्वस्य प्रसिद्धत्वात् । तेन तृतीय-

पादार्थसूचनम् । अत एव निर्वृता नन्दन्तीत्यनयोरर्थभेदः । मार्गेषु निर्वृता आनन्दपूर्णा, वैकुण्ठादिस्थानेषु भोगातिशयेन नन्दन्तीति । **निर्वृता** इत्यस्य संसारमार्गे गमनप्राप्तक्लेशवर्जिता इत्यर्थः । अतो न पौनरुक्त्यमित्याहुः। **जिज्ञासितेष्विति** । जिज्ञास्यत्वेन प्रथमसूत्रोक्तेष्वित्यर्थः । तत्र ब्रह्मपदेन साधनफलयोरुपलक्षितत्वादिति भावः। **सङ्गतिं चेति** । पादानां परस्परमिति शेषः ॥ **वक्ष्यतीति** । द्वितीयपादारम्भे 'कर्मक्षयस्तथोत्क्रान्तिरि'त्यादिनेति शेषः ॥ **ततश्चेति** । कर्मक्षयस्य प्रथमपादप्रतिपाद्यतया वक्ष्यमाणत्वादित्यर्थः ॥ **इत्युक्तं भवतीति** । अनेन अध्याहृतवाक्यस्थानां 'फलमत्र निगद्यत' इति पदानामावृत्तिं प्रथममिति वक्ष्यमाणस्यात्राप्यन्वयं च सूचयति । **फललक्षण इति** । फलाध्याय इत्यर्थः ॥ **प्रायिकत्वादिति** । प्राधान्यादित्यर्थः । तेनास्य पादस्य प्रायेण साधनप्रतिपादकत्वात् कथं कर्मक्षयरूपफलप्रतिपादकत्वमिति शङ्काऽनवकाशः ।

**वं०प०— सङ्गतिं** अन्तर्भावलक्षणामानन्तर्यलक्षणां वेत्यर्थः ।

**कं०रा०— संश्रय इति** । 'स्वरितञितः कर्त्रभिप्राये क्रियाफल' इति श्रीपतिसंश्रयणरूपक्रियाजन्यफलस्य कर्तृगामित्वविवक्षया आत्मनेपदम् ॥ **पादचतुष्टयेति** । एतदध्यायगतपादचतुष्टयप्रतिपाद्यं तेषां पादानामन्तर्भावलक्षणामानन्तर्यलक्षणां च सङ्गतिं लाघवार्थमेकत्रैव 'कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोगश्चतुष्टम् । फलं मोक्ष इति प्रोक्तः क्रमात्पादेषु चोदित' इति द्वितीयपादे आचार्य एव वक्ष्यतीत्यर्थः । ननु फलाध्याये साधनविचारे अयं फलाध्यायः अयं साधनाध्याय इति व्यवस्था न स्यात् । तथा च कर्मक्षयरूपफलनिरूपणपरेऽस्मिन्पादे कैश्चित्सूत्रैः साधने विचार्यमाणे कर्मक्षयपादोऽयमिति व्यवस्था च न स्यादित्यत आह **अध्यायादीति** । न च वाच्यमस्मिन्नध्याये प्रायेण फलस्यैव निरूपितत्वेन अस्य फलाध्यायत्वसम्भवेऽपि एतत्पादस्य कर्मक्षयपादत्वं न सम्भवति । कर्मक्षयस्य 'तदधिगम उत्तरापूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादि'त्येकस्मिन्नेवाधिकरणे निरूपितत्वेन साधनस्य च 'आवृत्तिरसकृदुपदेशादि'त्यादिषु सप्तस्वधिकरणेषु विचारितत्वेन कर्मक्षयनिरूपणस्य प्रायिकत्वाभावादिति । कर्मक्षयप्रतिपादकसूत्राणां साधनप्रतिपादकसूत्राणां च अक्षरगणनायां साधनप्रतिपादकसूत्रेभ्यः कर्मक्षयप्रतिपादकसूत्राणां च आधिक्यस्य सत्त्वेन कर्मक्षयनिरूपणस्य प्रायिकत्वोपपत्त्या अस्य पादस्य कर्मक्षयपादत्वसम्भवात् ।

**शे०चं०—** सर्वाभीष्टप्रदं रामं सर्वानिष्टविनाशकम् ।
जानकीजानिमनिशं वन्दे सद्गुरुवन्दितम् ॥ १ ॥
वेदव्यासं तथाऽऽनन्दतीर्थं जयमुनिं गुरुम् ।
व्यासतीर्थं गुरून् साक्षादभिवन्द्य यथामति ॥ २ ॥
सुधाया भावगूढायास्तुरीयाध्यायपञ्चिका ।
प्रकाश्यते केशवेन गुरुराजोक्तमार्गतः ॥ ३ ॥
यद्विद्याधीशगुरोः शुश्रूषाऽन्या न रोचते तस्मात् ।
अस्त्येषा भक्तियुक्ता श्रीविद्याधीशपादयोः सेवा ॥ ४ ॥

एतदध्यायगतपादप्रतिपाद्यगुणविशिष्टभगवत्स्तुतिपूर्वकं तत्संश्रयणरूपं मङ्गलमाचरति **यदीयेति** । **मुक्ताः** भगवज्ज्ञानभोगाभ्यां निवृत्तसमस्तानिष्टकर्माणः तथा **मुक्ताः** स्वोत्तमप्रवेशेन ब्रह्मनाड्योत्क्रमेण वा परित्यक्तदेहाः स्वोचितेनार्चिरादिना वा पथा वैकुण्ठलोकवासिभगवच्चरणाम्भोजच्छायां, **आश्रित्य** हिरण्यगर्भेण सह प्राप्य, **मुक्ताः** भिन्नलिङ्गशरीराः तथा **मुक्ताः** विध्वस्तप्रकृतयः तथा **मुक्ताः** अत्यन्तनिवृत्तानिष्टाः तथा **मुक्ताः** अपसृतेश्वरेच्छावरणाः तत एव **निर्वृताः** सम्यगाविर्भूतानन्दादिगुणा यदीयचरणाम्भोजच्छायामाश्रित्य भगवत्समीप एव तमुपासीना इति यावत् । **नन्दन्ति** स्वरूपेण वा लीलागृहीतविग्रहैर्वा सङ्कल्पमात्रसाध्यान् दिव्यान् भोगांस्तारतम्येन सततं भुञ्जते । न कदाचित् पुनरावर्तन्त इति यावत् । सकलवाङ्मनसदेवतायाः श्रीदेव्याः पतिमहं संश्रय इति योजना । 'त्यदादीनि चे'ति वृद्धसंज्ञायां 'वृद्धाच्छ' इति यच्छब्दात् शैषिके छप्रत्यये तस्य ईयादेशे यदीयेति रूपसिद्धिः । छायान्तत्वेऽपि तत्पुरुषस्य पूर्वपदार्थबाहुल्यस्य अगम्यमानत्वेन नपुंसकत्वाप्राप्तेः यदीयचरणाम्भोजच्छायामित्येतत् साधु । नन्वेकवाक्यत्वादिसिद्धये अध्यायप्रतिपाद्यस्यावश्यं वक्तव्यत्वात् तदनुक्तिर्दोष इत्यतः तस्य भाष्य एव प्रतिपादनात् तदनुक्तिः न दोषायेत्यभिप्रेत्य तत्रानुक्तसङ्गतिप्रदर्शकतयोत्तरग्रन्थमवतारयितुमध्यायप्रतिपाद्यप्रदर्शनपरभाष्यमनूद्य सङ्गतिशङ्कामुत्थापयति **फलमिति** ।

मूले विचारितेष्वित्यतःपरमवसरप्राप्तं मोक्षलक्षणं फलमत्र निगद्यत इत्यपेक्षितशेषपूरणेन साकाङ्क्षत्वप्रयुक्तवाक्याभासतां परिहरन् फलनिरूपणस्यावसरप्राप्ततां चोपपादयन् समन्वयेत्यादिग्रन्थं व्याचष्टे **समन्वयेति** । मूले समन्वयाविरोधाभ्यामिति तदर्थयोरध्याययोरुपलक्षणमिति भावेन लक्षणाबीजसम्बन्धं दर्शयति **प्रथमेति** ॥ **सिद्ध इति** । अशेषजगत्कर्तृत्वनिर्दोषाशेषसद्गुणत्वरूपलक्षणविशिष्टतया निर्णीत इत्यर्थः । टीकायां ब्रह्मरूपे वस्तुनीति स्वरसः पाठः । तार्तीयटीकाग्रन्थानुसारात् ॥ **सतीति** । अनेन सिद्ध इति सतिसप्तमीत्युक्तं भवति । **साधनविषये तृतीयेऽध्याय इति** । अनेन मूले साधनशब्दस्तत्प्रतिपादकाध्यायोपलक्षक इत्युक्तं भवति ॥ **जिज्ञासितेष्विति** । जिज्ञास्यत्वेन प्रथमसूत्रप्रतिज्ञातस्वरूपसाधनफलेष्वित्यर्थः । न च ब्रह्मजिज्ञासेति कर्मषष्ठीपरिग्रहेण स्वरूपस्य जिज्ञास्यत्वप्रतिज्ञासिद्धावपि साधनफलयोः कथं तत्सिद्धिरिति वाच्यम् । प्रधानभूतब्रह्मवाचकेन ब्रह्मपदेन अप्रधानसाधनफलयोरुपलक्षणस्याङ्गीकृतत्वेन तदुपपत्तेः ॥ **अन्येषामिति** । स्वरूपसाधनानामित्यर्थः । तद्विचारस्य पूर्वकर्तव्यतायाश्च जन्मादिसूत्रोक्तहेतुरवधेयः ।

नन्वेवमस्याध्यायस्य फलरूपैकार्थप्रतिपादकत्वेनैकवाक्यत्वात् कथं पादभेद इत्यतः फलेऽप्यवान्तरभेदात् तत्प्रतिपादकतया युक्तः पादभेद इत्यभिप्रेत्य तथाऽप्येकवाक्यत्वादिसिद्धय एतत्पादप्रतिपाद्यस्य तत्सङ्गतेश्चावश्यं वक्तव्यत्वात् तदनुक्त्या भाष्यन्यूनत्वमेवेत्यत एतदध्यायगतपादचतुष्टयप्रतिपाद्यतत्सङ्गतिप्रतिपादकोत्तरग्रन्थेनैव एतत्पादप्रतिपाद्यतत्सङ्गत्योरपि सिद्धत्वान्न तदनुक्तिः भाष्यन्यूनत्वापादिकेत्याशयवान् भाष्ये तदनुक्तौ निमित्तकथनपूर्वकमुत्तरग्रन्थानुसारेणैतत्पादप्रतिपाद्यतत्सङ्गती लाघवाय दर्शयति **पादचतुष्टयेत्यादिनोक्तं भवतीत्यन्तेन**। कर्मक्षयोत्क्रान्तिमार्गभोगरूपमित्यर्थः । सङ्गतिं अन्तर्भावलक्षणामानन्तर्यलक्षणां चेत्यर्थः । एकीकृत्य पादचतुष्टयप्रतिपाद्यतत्सङ्गत्योरेकत्र कथने निमित्तमाह **लाघवायेति** । **एकत्रैव** अस्यैवाध्यायस्य द्वितीये, 'कर्मक्षय-

स्तथोत्क्रान्तिरि'त्यादिनेति शेषः ॥ **तस्येति** । अध्यायपादप्रतिपाद्यस्येत्यर्थः ॥ **कैश्चित्सूत्रैरिति** । 'तदधिगम' इत्येतत्प्राक्तनैरेतत्पादगतैरित्यर्थः ।

ननु तृतीयाध्याय एव अशेषमोक्षसाधनानां विचारितत्वेन पुनर्विचारस्य व्यर्थत्वात् अत्राध्याये विचारयिष्यमाणसाधनानामादरनैरन्तर्याभ्यामनुष्ठेयत्वे नियामकाभावेन पुनर्विचारस्य तत्सिद्ध्यर्थत्वायोगात् तत्सिद्ध्यर्थत्वेऽपि वा तृतीय एव पुनस्तद्विचारेणापि तत्सिद्ध्युपपत्त्या चतुर्थे तद्विचारानर्थक्यात् तत्रानुक्त्यत्रोक्तिभ्यामेव तत्सिद्ध्यर्थत्वस्याप्यदर्शनात् तत्फलाध्यायकर्मक्षयपादयोरपि साधनस्यैव विचारे चतुर्थः फलाध्यायः, तत्राप्याद्यः कर्मक्षयपाद इत्यध्यायपादव्यवस्थानुपपत्तेः नात्र साधनस्य विचार्यता सम्भवतीति न तथोक्तिः भाष्यटीकायां युक्ता इत्येताः शङ्काः क्रमेण परिहरन्नेव साधनस्य विचार्यतामुपपादयति **एतदुक्तं भवतीति** ॥ **प्रायिकत्वादिति** । यद्यप्यस्मिन्नध्याये फलस्येव कर्मनाशस्य प्रथमपादे बाहुल्येनाप्रतिपादनान्न प्रायिकत्वमस्ति तथाऽपि अध्याये फलस्येव पादेऽपि कर्मक्षयस्य अनन्यार्थतया प्रतिपादनात् साधनस्य च फलार्थतया निरूपणात् प्राधान्यरूपं प्रायिकत्वमभिप्रेत्येयमुक्तिरिति ध्येयम् ।

**वा०र०—**

विष्णुज्ञानविभोगनष्टसकलानिष्टस्वकर्मोत्तमा-
वेशेनोत्क्रमणेन वा परिगतस्वीयान्त्यकायैः परम् ।
प्राप्य स्वोचितमार्गतोऽनुविधि निर्लिङ्गैर्विशुद्धैः सुखा-
द्याविर्भावमवाप्य भोगिभिरलं सेव्यं भजे श्रीपतिम् ॥ १ ॥

श्रीमन्न्यायसुधागूढशेषवाक्यार्थचन्द्रिका ।
गुरुराजानुग्रहतोऽध्यायोऽन्त्यः सेव्यते मया ॥ २ ॥

टीकाकार एतदध्यायप्रतिपाद्यधर्मवत्तया भगवत्स्तुतिं कुर्वन्नेव तद्वन्दनरूपं मङ्गलमाचरति **सर्वाभीष्टेति** । यद्यपीष्टप्राप्तिरनिष्टविनाशोत्तरभाविनीति पश्चाद्वाच्या । तथापि सकलानिष्टनिवृत्त्यादेः श्रीहरिचरणाम्भोजसमीपे स्वोचितयथेष्टभोगप्राप्तिरूपेष्टप्राप्त्यर्थतया अन्यार्थत्वेनानन्यार्थया इष्टप्राप्तेरेव अभ्यर्हितत्वात् तदाशयेन प्रथमं तत्सङ्कीर्तनम् । तथाच अनेन स्वरूपानन्दाविर्भावोत्तरं यथेष्टभोगरूपं चतुर्थपादप्रमेयमुक्तम् । सर्वानिष्टेत्यनेन च ज्ञानभोगाभ्यामित्यादिवक्ष्यमाणटीकानुसारेण निवृत्तसमस्तानिष्टकर्मत्वस्य स्वोत्तमप्रवेशोत्क्रान्तिभ्यां निवृत्तचरमदेहत्वस्य योग्यमार्गेण ब्रह्मणा सह परब्रह्मप्राप्तानां लिङ्गदेहनाशस्य कथनेन आत्यन्तिकानिष्टनिवृत्तिप्रतिपादनलाभात् पूर्वपादत्रयार्थसङ्ग्रहः कृतो भवति । स्वयं पूर्णानन्दस्य स्वसमीपे प्राप्तेभ्य आनन्दावाप्तिकरत्वं युक्तमिति सूचयितुं राममिति यौगिकविशेष्यपदम् । 'कर्मण्यणि'त्यनेन कर्मण्युपपदे प्राप्ताणोऽपवादेन 'आतोऽनुपसर्गे क' इत्यनुपसर्गादेव आतो धातोः कप्रत्ययं विधायापि 'प्रे दाज्ञ' इति सूत्रेण प्रशब्दपूर्वकाद्ददातेर्जानातेश्च कप्रत्ययविधानेन सर्वप्रदो वसुप्रद इत्यादेः साधुत्वप्रतिपादनात् सर्वाभीष्टं प्रददातीति सर्वाभीष्टप्रद इति प्रशब्दपूर्वकाद्ददातेः

कप्रत्यये प्रदमिति साधु । एतेनातोऽनुपसर्ग इत्यनेन सोपसर्गाद्ददातेः कप्रत्ययाप्राप्तौ कर्मणीत्यनेनाणि 'आतो युगि'त्यनेन युकि च सति गोसन्दाय इतिवदभीष्टप्रदायमिति स्यादिति शङ्का गर्भस्रावेणैव गता ।

उक्तं च 'प्रे दाज्ञ' इति सूत्रीय*काशिकायाम्*। सोपसर्गार्थमारम्भ इति । कुम्भं करोतीति कुम्भकार इति तिङन्तेन विग्रहेऽपि कुम्भस्य कार इति प्रक्रियावाक्याश्रयणेन 'उपपदमतिङि'त्यनेन समासवत् प्रकृतेऽप्यभीष्टस्य प्रद इति प्रक्रियावाक्यमाश्रित्य 'उपपदमतिङि'त्यनेन समासः । सर्वाभीष्टं प्रददातीति द्वितीयान्तेन विग्रहस्तु अस्वपदविग्रह इत्यादि ज्ञेयम् । 'हत्याया मोक्षहेतुत्वमि'त्येतद्विचैवेत्येतदधिकरणीयानुव्याख्यानमूलटीकाप्रपञ्चावसरेऽवशिष्टं व्युत्पादनं ज्ञेयम् । सर्वानिष्टानां विनाशकमिति षष्ठीसमासविचारस्तु 'तत्तच्छक्तिप्रबोधकः मोक्षादिदातृत्वस्य श्रुतत्वत' इत्येतदनुभाष्यव्युत्पादनरूपमूलटीकातत्प्रपञ्चानुसारेणावधेयः । 'तृजकाभ्यां कर्तरि' इत्यनेन कर्तृषष्ठ्याः समासनिषेधेऽपि शेषषष्ठ्याः समासनिषेधाभावः । स निषेधो नित्यो न भवति । त्रकाभ्यामिति वक्तव्ये तृच्ग्रहणादित्यादिरूपेण तत्र तस्य स्पष्टत्वात् । **जानकीजानिमिति** । जानकी जाया यस्येति जायान्तबहुव्रीहिपदस्य 'जायाया निङि'ति सूत्रेण निङादेशे निङो ङित्वेन ङिच्चेति सूत्रे बलादन्त्यभूताकारस्यैव निकारे 'लोपो व्योर्वली' इति यलोपे 'जननाज्जनक' इति नवमस्कन्धभागवते जनी प्रादुर्भाव इत्यस्मात् कृत्यल्युटो बहुलमिति सूत्रीयबहुलमित्यकृन्मात्रे व्यभिचारप्रतिपादकत्वात् पादाभ्यां ह्रियते पादहारक इत्यत्रेव कर्मणि ण्वुलि वोरकादेशे निष्पन्नजनकशब्दादपत्यार्थे अणि टिड्ढाणञिति ङीपि निष्पन्नजानकीशब्दस्य भाषितपुंस्कत्वेऽपि 'न कोपधाया' इति निषेधादकसम्बन्धिकोपधात्वेन पुंवद्भावाप्राप्तौ तत्प्रयुक्तस्त्रीप्रत्ययप्रयोगप्राप्तौ च जानकीजानिरिति सिद्ध्यति । तथाच तेन श्रीः कलत्रं यस्येति लभ्यत इति भावेन जानकीजानिमिति प्रयुञ्जानेन मूले श्रियःपतिरिति पतिशब्देन देवतान्तरं प्रतीव श्रियं प्रति स्वामित्वमात्रं नाभिधीयते । किन्तु तस्य लक्ष्मीरूपकलत्रवत्त्वरूपतद्भर्तृत्वेन स्वामित्वमेवेति सूचयति । 'आत्मानं न विस्मरेदि'ति 'स्मर्तव्यः सततमि'त्युक्तेरनिशमित्युक्तम् । **मद्गुरुवन्दितमिति** *श्रीविद्याधीशतीर्थ*वन्दितत्वोक्त्या स्वस्य देवताप्रतीतिर्गुरुद्वारिकैवेति दृढनिश्चय आविष्कृतो भवतीत्यनेकमङ्गलानि । शास्त्रकर्त्रादिप्रणामपूर्वकं चिकीर्षितं निर्दिशति **वेदव्यासमित्यादि कुलकेन** । **गुरुमिति** । योग्यतया आनन्दतीर्थादिभिरपि सम्बध्यते । साक्षाद्गुरून् *श्रीविद्याधीशतीर्थान्*। भावगूढायाः सुधाया यस्तुरीयाध्यायस्तत्पञ्चिकेति नित्यसापेक्षत्वात्समासः । सर्वोऽपि स्वव्यापारो गुरुसेवात्वबुध्येति व्यञ्जयन्नेतद्व्याख्यानकरणं गुरुसेवात्वेनाह **यद्विद्येति** । मात्राधिक्यादेर्यतिभङ्गादेरिव काव्यादोषत्वादत्र युक्तपदे संयोगसत्त्वेन तस्मिन् परे पूर्वस्योकारस्य दीर्घत्वप्राप्त्या तत्प्रयुक्तं मात्राधिक्यमिति न शङ्कनीयम् । उक्तं च प्रमाणलक्षणटीकायां 'अप्राप्तकालक्षणे छन्दोभङ्गादिवदर्थाविरोधादि'ति । अधिकमानन्दमयाधिकरणप्रारम्भे ज्ञेयम् । **एतदध्यायेति** । व्याचिख्यासिततया बुद्धिसन्निहितफलाध्यायेत्यर्थः ।

**पादप्रतिपाद्येति** । पादचतुष्टयप्रतिपाद्येत्यर्थः । कर्मक्षयादिरूपैतदध्यायगतपादचतुष्टयप्रतिपाद्यविशेषणानां यदीयेति यदित्यप्रतीतेर्नास्योक्तविशेषणविशिष्टतया भगवत्स्तुतिपरत्वमित्यतो मुक्ता इत्यादेर्विशेषणस्य 'कर्मक्षयस्तथोत्क्रान्तिरि'त्याद्यनुव्याख्यानलब्धार्थकथनरूपं भवेदेवं पादार्थः सङ्गतिश्च । 'यदि भगवदि'त्याद्युत्तर-

पादीयमूलानुसारेण पादचतुष्टयार्थप्रतिपादकत्वं दर्शयति । **मुक्ता भगवदित्यादिना** । निष्ठकर्माण इत्यन्तेन प्रथमपादार्थकथनम् । देहा इत्येतेन द्वितीयस्यार्थकथनम् । यदीयचरणाम्भोजच्छायामाश्रित्येत्यस्य मुक्ता इत्यनेनापि सम्बन्धमभिप्रेत्य तृतीयपादार्थमाह **स्वोचितेनेति** । गरुडशेषान्यतरमार्गेणेत्यर्थः । मार्गेण गच्छतां श्रमपरिहाराय छायाश्रयणं प्रसिद्धमित्यत्र तथा योजितम् । आश्रित्येत्यस्य व्याख्यानं **प्राप्येति** । अनेन मार्गगम्ययोरुभयोरप्यभिधानं सिद्धमिति सम्पूर्णतृतीयपादार्थाभिधानसिद्धिः । उत्तरपादमूले आत्यन्तिकात्यन्तानिष्टनिवृत्तीष्टप्राप्त्योरत्रैवान्तर्भावादित्युक्तम् । 'परमं मोक्षमायन्ति लिङ्गभङ्गेन योगिनः' इत्यनुव्याख्यानोदाहृतप्रमाणव्याख्यावसरे परमं मोक्षमित्यस्यैव विवरणं लिङ्गभङ्गेनेति चोक्तम् । एवं चात्यन्तानिष्टानिवृत्तिर्लिङ्गभेदरूपा स्वगुणाच्छादकप्रकृतिध्वंसरूपा चेति लभ्यते । यतो लिङ्गभङ्गेनेव प्रकृतिध्वंसेनापि मोक्षे परमत्वप्रतीतिः । तदेतदनुसन्धाय मुक्ता इत्यनूद्य भिन्नलिङ्गशरीरा विध्वंसप्रकृतय इति चोक्तम् । तथा स्वोचितेनेति पाठः । पूर्वोत्तरसन्दंशादनुवर्त्यो वा तथाशब्दः । अत्यन्तेत्यतः प्रागत एवेति पूरणीयम् । अपसृतेत्यतः प्रागप्यत एवेति पूरणीयम् । अनेनेष्टप्राप्तिप्रतिबन्धकानिष्टात्यन्तनिवृत्तिरभिहिता । तत एवेत्यस्य प्रागुक्तलिङ्गभेदादित्यर्थः । अनेन चेष्टप्राप्तिरप्युक्ता भवति। अत एव लिङ्गभङ्गेन निमित्तेन परमं मोक्षमानन्दाविर्भावमायान्तीत्युत्तरपादे व्याख्यानम् । तत्र तत्राधिकरणे प्रतिपादितं प्रमेयमप्यनेन सङ्गृहीतं ज्ञेयम् । एवं पादत्रयार्थमभिधायेदानीं यदीयेति प्रागुक्तं विशेषणं नन्दन्तीत्यनेनाप्यन्वेतीत्यंशेन तथा योजयंश्चतुर्थपादप्रतिपाद्यमाह **यदीयेति** । अनेन ब्रह्मातिक्रमाभावप्रतिपादकसम्पचेति प्रथमाधिकरणार्थ उक्तो भवति । स्वरूपेणेत्यादिना त्वेवमप्युपन्यासात्पूर्वभावादित्यस्य द्वादशाहवदुभयविधमित्यादेश्चार्थः कथितः । अत्र व्याख्याने उत्तरपादानुक्तमपि यदीशेच्छावरणाय सरणमुक्तं तत्तत्रोपलक्षणया वक्ष्यमाणत्वाभिप्रायेण । तत्र च प्रधानावरणव्योम्नोरन्तरेत्यादि प्रमानुसारित्वं वक्ष्यते । विशेषविचारस्तु तत्रैव करिष्यत इति सकलमकलङ्कम् ।

**सकलेति** । अनेन विष्णुमित्यनभिधाय श्रियःपतिमित्युक्तिः ग्रन्थारम्भे अवश्यानुष्ठेयान्तरस्यापि सिद्ध्यर्थमिति सूचितं भवति । वृद्धिर्यस्याचामित्यनेन वृद्धत्वाप्राप्तेः छस्याप्राप्तिरित्याशङ्कनिरासायाह **त्यदादीनि चेतीति** । ईयेति दीर्घेकारपाठः । **शङ्कापरिहारायेति** । विशेषबलेनावयवावयविभावस्योपपत्तेरित्याशयः । नन्विक्षुच्छायमित्यादाविव छायान्तत्वेन तत्पुरुषस्यापि नपुंसकत्वे 'ह्रस्वो नपुंसक' इति ह्रस्वतायां छायामाश्रित्येति वाच्ये छायामिति स्त्रीलिङ्गायोग इत्यतो नपुंसकत्वविधायकेन 'छाया बाहुल्य' इत्यनेन पूर्वपदार्थबाहुल्य एव तद्विधानेन प्रकृते चाम्भोजयोर्द्वित्वेन बाहुल्यभावान्न नपुंसकत्वह्रस्वत्वप्रसङ्ग इत्याशयेनाह **छायान्तत्वेऽपीति** । विस्तरस्तु फणच्छायेति तृतीयाध्यायाद्यपद्यविचारे द्रष्टव्य इत्याशयेनात्र सङ्क्षेपोपपादनम् । तदुपपादनं चास्मदीयतदुपपादने ज्ञेयम् ।

**एकवाक्यत्वादीति** । स्वस्मिन्नेकवाक्यत्वस्येति योज्यम् । आदिपदेन पूर्वाध्यायैर्भेदस्य सङ्ग्रहः । **तत्र** भाष्ये । **अनुक्तसङ्गतीति** । असङ्गतार्थवचनेऽनवधेयवचनत्वप्रसङ्गात्सङ्गतिरवश्यं वक्तव्येति भावः । **तदर्थयोरध्याययोरिति** । साधन इत्यस्य साधनविषये तृतीयाध्याय इति व्याख्यानुसारेण । 'समन्वयाध्यायाविरोधा-

ध्याययोः समन्वयाविरोधाभ्यां वस्तुनि सिद्धे सतीति प्रतिपादनाभिप्रायेणैव **प्रथमद्वितीयाध्यायप्रतिपादिताभ्यामिति** मूले उक्तम् । अन्यथाऽध्यायसङ्गतिप्रदर्शनाय प्रवृत्तेन तत्प्रदर्शनं न कृतं स्यात् । तथाच प्रथमद्वितीययोर्वस्तुनि सिद्धे सति साधनाध्याये सति साधनेषु विचारितेष्ववसरप्राप्तं फलमत्राध्याये निगद्यत इत्येव वक्तव्यतया प्राप्यत इति भावः । अध्यायद्वये परब्रह्मरूपार्थस्य सिद्धत्वेऽप्यर्थान्तरासिद्धेः मूले परब्रह्मादीत्यादिपदायोग इत्यतोऽत्रादिपदघटितपाठ एव न भवति । ततश्च परब्रह्म इत्येवार्थकथनम्, अतो नानुपपत्तिरित्याशयेनाह **टीकायामिति** । ब्रह्मेत्यतः प्राक्परपदसद्भावस्यानुमतत्वेऽपि तदंशे विचाराभावात्तत्परित्यागेन ब्रह्मेत्येवानुवादः । न तु तार्तीयटीकानुसारादिति वक्ष्यमाणयुक्त्या परपदस्याऽप्यनावश्यकत्वाशयो ग्रन्थकारस्येति ज्ञातव्यम् । स्वरस इत्युक्त्या प्रधानतया जीवादिभिन्नत्वादिनाऽवगमोऽस्त्येवेत्यध्यायद्वये परब्रह्मातिरिक्तवस्तुप्रतिपादनमपि सिद्धमित्येवमादिपदार्थसार्थक्यं च कथञ्चित्कर्तुं शक्यमिति सूचयति । **तार्तीयटीकेति** । 'समन्वयाविरोधाभ्यां सञ्जाते वस्तुनिर्णय' इत्येतद्व्याख्यानावसरे वस्तुनिर्णय इत्यस्य ब्रह्मविनिर्णय इति व्याख्यानरूपेत्यर्थः ।

जन्माधिकरणीयमूलानुसारेणाह **प्रधानभूतेति** । अत्र जन्माधिकरणमूलानुसारेण लक्षणोक्तिः । जिज्ञासाधिकरणमूले 'एवं तर्हि लक्षणादिजिज्ञासापि प्रतिज्ञाता स्यादिति चेदि'त्यनेन शेषषष्ठीपरिग्रहे उपपादकमाशङ्क्य 'तस्याः विनाप्यभिधानेन लाभादि'ति प्रतिपादितम् । तत्र टीकायां तु तस्या इत्येतद्वाक्यमेवं व्याख्यातम् । अत्र ब्रह्मकर्मकजिज्ञासायास्तल्लक्षणप्रमाणादिजिज्ञासाव्यतिरिक्तताया अभावात् । तज्ज्ञानसाधनफलादिजिज्ञासायास्तद्व्यतिरिक्तत्वेऽपि ज्ञानेनाप्तुमिष्टतमत्वेन प्रधानभूते ब्रह्मणि जिज्ञासाकर्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्रह्मजिज्ञासा न सम्पूर्यते तज्जिज्ञासाया अर्थाक्षिप्ततया लाभेनाभिधानावश्यकतया वैयर्थ्यमेवेत्याशयेनाह **तस्या इतीति** । तदनुसारेणैव 'प्रमाणसाधनप्रयोजनादिपरिकरयुक्तस्यैव ब्रह्मणो जिज्ञासाकर्मत्वान्न प्रमाणादिविचारस्याप्रतिज्ञातताप्रसङ्ग' इति जिज्ञासाधिकरणीय*चन्द्रिका*वाक्यव्याख्यानावसरे टीकाकृता यैर्जिज्ञासितैर्विना ब्रह्मजिज्ञासा न सम्पूर्यते तज्जिज्ञासा अप्यर्थाक्षिप्ततयेत्यादिना साधनादिजिज्ञासाया अर्थादाक्षेप इति प्रतिपादितम् ।

उपासनापादीयमूले यद्यपि ब्रह्मविचारः कर्तव्य इत्युक्तम्, कृतश्चासौ, तथापि साधनफलविचारसहितस्य ब्रह्मविचारस्य कर्तव्यतयोक्तत्वात् कृतब्रह्मविचारस्याधिकारिणो यन्मया कार्यं साधनं तत्किं कथम्भूतमिति बुद्धिः स्यादिति प्रतिपादनमपि साधनादिजिज्ञासायाः अर्थाक्षेपमेवावगमयति । जन्माधिकरणस्थपूर्वोदाहृतवाक्यादुत्तरेऽस्मिन्साधनादिजिज्ञासामन्तरेणाकाङ्क्षानुपरमाच्चेति वाक्येऽपि साधनादिविचारस्यार्थाक्षेपे इत्येव प्रतीतेः । एतेनैव लक्षणास्वीकारे प्रयोजनमप्याहेत्येतद्वाक्यावतारोऽन्यथाख्यातिस्थो निरस्तः । तद्वाक्येऽपि ब्रह्मजिज्ञासापदेन साधनादिविचारस्यार्थाक्षेपस्यैवाभिप्रेततायाः 'तस्याः विनाऽप्यभिधानेन लाभादि'त्यादिजिज्ञासाधिकरणीयपूर्वोदाहृतमूलानुसारेण प्रत्येतुं शक्यत्वात् । 'प्रमाणसाधनप्रयोजनादिपरिकरयुक्तस्ये'ति प्रागुदाहृतचन्द्रिकावाक्यपर्यालोचनयापि पूर्वोक्तार्थाक्षेपस्यैव प्रतीतेः । साधनादिजिज्ञासामन्तरेण आकाङ्क्षानुपरमादित्यनेनाकाङ्क्षापूर्त्यन्यथानुपपत्त्या साधनादिविचारोऽपि कर्तव्यतया लब्धो भवतीत्येवार्थस्य प्रतीयमानत्वेन, गङ्गापदेन तीरे लक्षणया प्रतिपादिते तीरस्य शीतलत्वादिज्ञानरूपप्रयोजनसिद्धिरितिवत् ब्रह्मपदेन साधनफलयोर्लक्षणायां तयोरपि

जिज्ञास्यत्वसिद्धिरित्यर्थस्य प्रतीत्यभावेन च लक्षणाप्रयोजनकथनपरतयैतद्वाक्ययोजनायोगात् । किं मया कार्यमित्याकाङ्क्षानुपरमादिति चासत् । उपासनापादस्थ 'किं मया कार्यमित्येव स्याद्बुद्धिरधिकारिण' इत्येतदनुभाष्यमूले साधनफलविचारसहितब्रह्मविचारस्य कर्तव्यतयोक्तत्वात् कृतब्रह्मविचारस्याधिकारिणो यन्मया कार्यं साधनं तत्किं कथम्भूतमिति बुद्धिः स्यादिति व्याख्यानकरणेन साधनं किं मया कर्तव्यमित्याकाङ्क्षायां तत्पूर्त्यर्थं साधनादि विचार्यते इत्येवमाकाङ्क्षानुपरमस्य तदानीन्तनसाधनादिविचाराकरणोपपादकत्वप्राप्त्या एतद्वाक्यस्य तृतीयाध्यायगताधुना साधनादिविचारः कर्तव्य इत्येतत्प्रमेयसाधकत्वप्राप्तावपि ब्रह्मपदेन साधनफले कुतो लक्षणीये इति प्रयोजनाकाङ्क्षायां तयोरपि विचार्यत्वसिद्ध्यर्थमित्येवं लक्षणाप्रयोजनप्रतिपादनपरत्वाप्रतिभासेन तथायोजनाया अपरामर्शमूलत्वात् । अत एव किं मया कार्यमिति बुध्युत्पादे निमित्ततया साधनादिविचारसहितब्रह्मविचारस्य कर्तव्यतोक्तिरभिहिता । अनेन बुध्युत्पादेनैव साधनादेर्विचार्यत्वसिद्धिरित्यङ्गीकारे चोक्तबुध्यन्यथानुपपत्त्या साधनादेर्विचार्यत्वसिद्धिः तत्सिद्धौ च उक्तरीत्या बुद्ध्युत्पाद इत्यन्योन्याश्रयापातः । तस्मान्मूलवाक्याभिप्रायानवबोधविजृम्भितोऽयमवतार इत्यास्तामिति *वाक्यार्थविनोदे* निक्षे(क्षि)प्यम् ।

प्रकृतमनुसरामः । तदेवं जिज्ञासाधिकरणस्थमूलटीकाद्यनुसारेण राजाऽयमागच्छतीत्यादौ राजपदेन लक्षितपरिकरयुक्तस्य राज्ञ आगमनप्रतिपादनं वा राज्ञ आगमनप्रतिज्ञयैव परिकरागमनप्रतिपादनं वेति यथा स्वीक्रियते । तथा ब्रह्मपदलक्ष्यसाधनफलसहितब्रह्मणो विचारः ब्रह्मजिज्ञासापदेनोच्यत इति वा, ब्रह्मजिज्ञासायाः साधनादिति जिज्ञासां विना पूर्त्यभावेन तदन्यथानुपपत्त्या साधनादिविचारस्यापि प्रतिज्ञातत्त्वलाभ इति वा, सर्वत्रोदाहृतमूलटीकादावभिप्रेतत्वसिद्ध्या प्रधानेनाप्रधानस्योपलक्षणादिति जन्माधिकरणस्थपूर्ववाक्येन प्रथमोक्तार्थप्रतिपादनानन्तरं प्रवृत्तसाधनादिजिज्ञासामन्तरेणेति तदुत्तरवाक्यस्यार्थाक्षेपपक्षोपन्यासपरत्वसिद्ध्या तन्मूलोपजीवनेन जिज्ञासाधिकरणस्थ-'यैर्जिज्ञासितैर्विना' इत्युक्तप्रकारेणार्थात् साधनादिविचार आक्षिप्त इति ब्रह्मजिज्ञासापदेनैव साधनादीनां जिज्ञास्यत्वप्राप्तेरिति भाववर्णनमपि द्रष्टव्यम् । यथा हि भाट्टमते पदानां जातौ शक्तिः जातिविशिष्टव्यक्तौ तु लक्षणेति स्वीकारः । जातौ शक्तिः व्यक्तिस्त्वाक्षेपलभ्येति पक्षान्तरं च । तथा ब्रह्मपदेन साधनफलयोर्लक्षणेति पूर्ववाक्यार्थः । उत्तरवाक्यार्थस्तु अन्यथानुपपत्तिरूपानुमानेन साधनादिजिज्ञासाया लाभो न तु तत्र काचन वृत्तिरिति भेदः । एतावांस्तु विशेषः । तन्मते पदाज्जातिरुपस्थाप्यते, नैव पदेन व्यक्तिर्लक्ष्यते, पदोपस्थिततया च व्यक्तिराक्षिप्यते इति भेदः । इह तु ब्रह्मपदे लक्षणा ब्रह्मजिज्ञासापदेनोपस्थिता ब्रह्मजिज्ञासा साधनादिविचारमाक्षिपतीति ब्रह्मजिज्ञासाया आक्षेपकत्वमितीत्यलम् । अत्रोक्तप्रकारेण जन्माधिकरणजिज्ञासाधिकरणयोरपि प्रमेयनिष्कर्ष ऊह्यः । स्वरूपसाधनफलेषु फलातिरेके कृते मूलेऽन्ययोरिति वक्तव्यमित्यतः साधनानामनेकत्वात् तद्विवक्षया बहुवचनमित्याशयेनाह **साधनानामित्यर्थ इति** ॥ **जन्मादिसूत्रोक्त इति** । अत्र जन्मादीति न समग्रमेकसूत्रोपादानम्, अपि तु जन्मसूत्रं जन्माधिकरण इत्यादिवत् आदिपदेन सर्ववेदान्तप्रत्ययसूत्रं चेति सूत्रद्वयोपादानम् । तथाच जन्मसूत्रे साधनफलयोर्ब्रह्मोपहितत्वेन ब्रह्मणश्च प्रधानतयाऽभ्यर्हितत्त्वात् स्वरूपविचारस्य प्राथम्याभिधानात् फलविचारापेक्षया स्वरूपविचारस्य प्राथम्येऽभ्यर्हितत्वं हेतुरुक्तः । फलविचारापेक्षया साधनविचारस्य पूर्वभावित्वे च फलापेक्षया साधनस्य पूर्वभावित्वं उक्तसूत्रद्वयेनाप्युक्त इति

विवेकः । **एकवाक्यत्वादीति** । आदिपदेनोत्तरपादैर्भेदस्येवासङ्गतत्वाभावस्यापि परिग्रहः । **अन्तर्भावलक्षणामिति** । पादानामध्यायेऽन्तर्भावलक्षणां परस्परमानन्तर्यलक्षणां चेत्यर्थः ।

**पादचतुष्टयप्रतिपाद्यतत्सङ्गत्योरेकत्रेति** । एकत्रेति पदपरित्यागेनैकीकृत्येति पदयुक्तो वा पाठः । पदद्वययोगेऽप्येकस्य पादप्रतिपाद्यसङ्गत्योरेकीकरणमर्थः । पादप्रतिपाद्यानां स्थानभेदेन सङ्गत्या सहाभिधाने एकस्यैव पादप्रतिपाद्यस्य तत्सङ्गतेश्च प्रतिपाद्यत्वमात्रलाभेन लाघवाश्रयणस्य तन्मात्रफलकत्वप्रतीतिः स्यात् । तन्निरासाय द्वितीयस्योपादानम् । तस्य च पादप्रतिपाद्यानामेकस्थानावच्छेदेनाभिधानमर्थ इति न दोष इति प्रतिभाति ।

**विचारस्य व्यर्थत्वादिति** । अस्य नात्र साधनस्य विचार्यता सम्भवतीत्युत्तरेण सम्बन्धः । एवमदर्शनादित्यस्यापि पादव्यवस्थानुपपत्तेश्चेति चशब्दयुक्तः पाठः । **तत्रानुक्त्यन्यत्रोक्तिभ्यामेवेति** । तावन्मात्रेणेत्यर्थः । एतच्च तत्रानुक्त्या हीत्यादिव्यावर्त्याशङ्काभिधानम् । **अदर्शनादिति** । आदरनैरन्तर्याभ्यामनुष्ठेयत्वसिद्ध्युपायस्यान्यत्रानुक्त्यन्यत्रोक्तिमात्रेण यत्समर्पणं तत्प्रकाराप्रतीतेरिति भावः । अध्यायादीति वाक्यव्यावर्त्यशङ्कामाह **फलाध्यायेति** । अध्यायपादेत्युत्तरमूले अध्यायस्यादिपदोक्तपादेनैव साङ्कर्यस्य परिहार इति तथैव शङ्का दर्शिता । दर्शनात्फलाध्यायेति पाठः । **भाष्यकारीयेति** । उपलक्षणं चैतत् । सूत्रकारेणापि तद्विचारो न कर्तव्य इत्यपि द्रष्टव्यम् ।

**स०व्र०— पादचतुष्टयप्रतिपाद्यमिति** । कर्मक्षयोत्क्रान्तिमार्गभोगरूपमित्यर्थः । **सङ्गतिं** अन्तर्भावलक्षणामानन्तर्यलक्षणां वेत्यर्थः । **उपरि** द्वितीयपादे । **वक्ष्यति** 'कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोगश्चतुष्टयम् । फलं मोक्ष इति प्रोक्तं क्रमात्पादेषु चोदितम्' इत्यादिनेति शेषः । नन्वेवं फलाध्यायेऽप्यस्मिन् साधनप्रतिपादने कर्मनाशाख्यफलप्रतिपादकेऽप्यस्मिन् साधनप्रतिपादने अस्य साधनाध्यायत्वापत्त्या तृतीयः साधनाध्यायः चतुर्थः फलाध्याय इत्यध्यायव्यवस्था न स्यादित्यत आह **अध्यायादीति** । आदिपदेन पादव्यवस्थोक्तिः । अत्राध्यायव्यवस्थायां प्रायिकत्वं बाहुल्येन फलप्रतिपादकत्वम् । पादे तु साधनस्यैव बाहुल्येन प्रतिपादनात् प्रायिकत्वं उपदेश्यतया प्राधान्यमेव विवक्षितमिति ज्ञेयम् ।

**ए०बा०— यदीयेति ॥ यदीयचरणाम्भोजच्छायामाश्रित्य निर्वृताः । नन्दन्ति सततं मुक्ताः संश्रये तं श्रियः पतिम् ॥ १ ॥** मुक्ताः इत्यस्यादौ कर्मणो देहाच्चेति वा योज्यम् । तेन पादद्वयार्थलाभः । यस्येदं यदीयं 'त्यदादीनि चे'ति यच्छब्दस्य वृद्धसंज्ञायां 'वृद्धाच्छ' इति छप्रत्यये तस्येयादेशः । चरणमम्भोजमिव चरणाम्भोजम् । यदीयं च तत् चरणाम्भोजं च । चरणयोर्द्वित्वेऽप्यभेदाभिप्रायेणैकवचनम् । तस्य छाया ब्रह्मविद्या तामाश्रित्य निर्वृताः । 'ब्रह्मविद्या हरेश्छाया तदंशो हि सुरेष्वपी'ति तृतीयतात्पर्योक्तेः । यद्वा यदीयचरणाम्भोजं छायेव यदीयचरणाम्भोजच्छाया । 'छायेव विदुषां प्रभुः । आतपः पापिनामि'ति काठकभाष्योक्तेः । तामाश्रित्येत्यनेन तृतीयपादार्थसूचनम् । अध्वगानामेव छायाश्रयणप्रसिद्धेः । अत एव निर्वृता नन्दन्तीत्येतयोरर्थभेदः । मार्गेषु निर्वृताः आनन्दपूर्णा' वैकुण्ठादिस्थानेषु भोगातिशयेन नन्दन्तीति । निर्वृताः

इत्यस्य संसारगमनक्लेशवर्जिता इत्यप्याहुः । गुरुचरणास्तु नन्दन्तीत्यस्य वर्धन्त इत्यर्थः । टु नदी समृद्धाविति धातोः । एतेन 'ज्ञानान्मोक्षो भवत्येव सर्वाकार्यकृतोऽपि तु । आनन्दो ह्रसतेऽकार्याच्छुभं कृत्वा तु वर्धत' इति 'सहकारित्वेन चे'ति सूत्रोक्तस्मृत्युक्तप्रमेयविशेषोऽसूचीत्याहुः ॥ १ ॥

**॥ इति फलाध्यायस्य सङ्गतिनिरूपणम् ॥**

★ ★ ★

# ॥ अथ आवृत्त्यधिकरणम् ॥

**॥ अथ श्रवणादेः पौनःपुन्येन कर्तव्यत्वसमर्थनम् ॥**

## ब्र०सू०— ॐ आवृत्तिरसकृदुपदेशात् ॐ ॥

२　सु०— अधिकरणोत्थानकारणं दर्शयति **श्रवणादीति** ।

अनु०—　　श्रवणादिसकृत्क्रिया ।
आवृत्तिर्वेति सन्देहे

प्रथमं तत्रेति वर्तते । श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति दर्शनार्थं श्रवणादिकं विधीयते । तस्य श्रवणादेर्ज्योतिष्टोमादिवत् सकृत्क्रिया वा व्रीह्यवघातादिवत् **आवृत्तिर्वेति सन्देहे** सति । उपलक्षणमेतत् । **सकृत्क्रिया** इति पूर्वपक्षे च सतीत्यपि ग्राह्यम् । इदं अधिकरणं आरभ्यत इति शेषः । पूर्वपक्षबीजं च न्यायविवरणे स्पष्टमवगन्तव्यम् । सूत्रं व्याख्याति **कर्तव्येति** ।

कर्तव्याऽऽवृत्तिरेव हि ।
उपदेशोऽतत्त्वमसीत्यादिर्ह्यसकृदेव यत् ॥

श्रवणादीनामिति वर्तते । हिशब्दो तत्त्वमसीत्युपदेशस्य प्रसिद्धत्वं द्योतयति । यदि हि शिष्येणावृत्तिर्न कर्तव्या तदा गुरोरसकृदुपदेशोऽनर्थकः स्यात् । तेन ज्ञायते **कर्तव्या श्रवणावृत्तिरिति** ।

**परि०— उत्थानकारणमिति** । अवतारिकारूपं सूत्रव्यावर्त्यसंशयादिकं दर्शयतीत्यर्थः ॥ **इति वर्तत इति** । पूर्वं तत्रेत्यस्य चतुर्थाध्याये प्रथमपाद इति प्रथममित्यस्य 'तदधिगम' इत्यर्थतः- पूर्वं कैश्चित्सूत्रैरिति व्याख्यानात् इह च साधनविचाररूपसूत्रेषु प्रथममित्यर्थकतया पदद्वयमावर्तनीय- मित्यर्थः । श्रुत्यर्थनिर्णायकत्वलाभायाह **श्रोतव्य** इत्यादि **विधीयत** इत्यन्तम् । ज्योतिष्टोमादिदृष्टा- न्तोक्तोभयविधसाधनदर्शनं संशयबीजमुक्तं भवति ॥ **न्यायविवरण इति** । श्रवणाद्यनावृत्त्या अप- रोक्षज्ञानोदये सर्वेषां सुशकत्वमिति गुण इत्युक्तसु(खकरत्वयुक्तिरित्य)शकत्वयुक्तिरित्यर्थः । तद्विव- रणे च भाष्यटीकायामित्यर्थः ॥ **इति वर्तत इति** । बुद्ध्या विभज्य विपरिणम्य वर्तत इत्यर्थः ।

**यादु०— उत्थानकारणमिति** । संशयादिकमित्यर्थः ॥ **न्यायविवरण इति** । 'श्रवणाद्यनावृत्त्या अपरोक्षज्ञानोदये सर्वेषां सुशकत्वमिति गुण' इत्यनेनेति शेषः ।

**कं०रा०— पूर्वपक्षबीजमिति** । श्रवणादीनामनावृत्तिरिति पूर्वपक्षस्य बीजं च 'श्रवणाद्यनावृत्त्या अपरोक्षज्ञानोदये सर्वेषां सुशक्यत्वमिति गुण' इति न्यायविवरणे स्पष्टमुक्तं तत्रैवावगन्तव्यमिति भावः ।

**शे०चं०— उत्थानकारणमिति** । विषयादिकमित्यर्थः । श्रवणादेः कर्तव्यत्वासिद्धौ सकृत्कर्तव्य- त्वासकृत्कर्तव्यत्वादिविशेषविचारानुपपत्तेः तदुपपत्त्यर्थं विषयवाक्योदाहरणेन तत्कर्तव्यत्वसिद्धिं दर्शयति **श्रोतव्य इति** । ननु सूत्रावतारिकारूपपूर्वपक्षस्यैव सिद्धान्तसूत्रप्रापकत्वात् तदनुक्तौ कथं सन्देहोपदर्शनमात्रेण सिद्धान्त- सूत्रप्रवृत्तिरित्यतः पूर्वपक्षोपलक्षणतया सन्देहभाष्यं व्याचष्टे **उपलक्षणमेतदिति** ॥ **न्यायविवरण इति** । 'श्रवणाद्यनावृत्त्या अपरोक्षज्ञानोदये सर्वेषां सुशक्यत्वमिति गुण' इति न्यायविवरणे सुशक्यत्वरूपं पूर्वपक्षसाधकं स्पष्टमित्यर्थः ॥ **वर्तत इति** । यद्यपि श्रवणादीनामिति न पूर्वं श्रूयते यच्च श्रवणादीति श्रुतं तदपि सकृत्क्रिये- त्यनेन समस्तं नात्रान्वेतुमर्हति तथाऽपि समासे गुणभूतस्य तस्य बुद्ध्या विवेकेन इयमनुवृत्तिरिति ध्येयम् ॥ **हिशब्द इति** । उपदेशोऽतत्त्वमसीत्येतद्वाक्यगत इत्यर्थः । अप्रयोजकत्वं परिहरति **यदि हीति** । आद्यो हिशब्दो हेत्वर्थ इत्याशयेनाह **तेनेति** । ज्ञापकश्चायमर्थो न कारक इत्याशयेनाह **ज्ञायत इति** ।

**वा०र०— विचारानुपपत्तेरिति** । तदवकाशाभावादित्यर्थः । **कर्तव्यत्वसिद्धिं दर्शयतीति** । सिद्धिप्रदर्शनपूर्वकं कर्तव्या ब्रह्मजिज्ञासेत्युक्ते किमिति जिज्ञासासंशय इत्येवं लक्षणतयेति विशेषविचारावकाशं घटयतीत्यर्थः । **पूर्वपक्षोपलक्षणतयेति** । विपर्ययरूपपूर्वपक्षस्योपलक्षणे च मिथ्याज्ञानत्वसाम्यादिति नियामकं 'कर्तव्या ब्रह्मजिज्ञासेत्युक्ते किमिति संशय' इत्येतत्तार्तीयानुव्याख्यावसरे मूलेऽभिहितं ज्ञेयमित्याहुः । तन्न । तत्र पक्षे संशयानुक्तिं सोढ्वैव पूर्वपक्षपरतया उक्तत्वेनात्र च संशयपूर्वकपूर्वपक्षे चेत्यर्थस्य चशब्देनोक्ततया तार्तीय- मूलगतप्रथमपक्षाश्रयणायोगात् । किन्तु तत्रत्यद्वितीयपक्षाश्रयणमेवात्राभिमतम् । तथासत्येव संशयपूर्वकपूर्वपक्ष- निरासार्थमधिकरणारम्भविशिष्टार्थप्रतिपादनलाभात् । पूर्वपक्षे च सतीति चशब्दस्वारस्याच्चेति ज्ञेयम् । तार्तीय- टीकायामध्याहरतीत्युक्तिरपि तद्व्याख्यानावसर एवोपलक्षणार्थतया व्याख्याता । तत्राध्याहारेण व्याख्यानमत्र

तूपलक्षणया उपलक्षणमेतदिति स्पष्टमुक्तेः । तथाच प्रकारान्तरत्वे आश्रयितव्येऽध्याहरतीति तथा श्रुतमेव चेति न कश्चित् क्षुद्रोपद्रवः । अजहत्स्वार्थलक्षणाभिप्रायकमेवोपलक्षणमित्यपि उपशब्दचशब्दाभ्यां सूचितं मूले । **अनुवृत्तिरितीति** । अनुवृत्त्युक्तिरित्यर्थः । तथैव पाठस्तु स्वरस एव । आवृत्तिरेव हीतिशब्दस्योत्तरत्र तेनेति व्याख्यास्यमानत्वादुपदेश इति वाक्यगतस्य हेत्वर्थतायास्तदर्थकयच्छब्दसद्भावेनायोगात्तस्यैव मूले प्रसिद्धयर्थ-त्वाभिधानमित्याह **उपदेशाऽतत्त्वमसीत्येतद्वाक्येति** ॥ **न कारक इति** । गुरोरिति सकृदुपदेशस्य श्रवणावृत्ति-कर्तव्यत्वज्ञापकहेतुत्वेऽपि कर्तव्यत्वे वादकत्वरूपतत्कारकत्वाभावादित्यर्थः ।

**स०व्र०— पूर्वपक्षबीजं वेति** । 'श्रवणाद्यनावृत्त्या अपरोक्षज्ञानोदये सर्वेषां सुशकत्वमि'ति पूर्वपक्ष-बीजमित्यर्थः ।

**॥ इति श्रवणादेः पौनःपुन्येन कर्तव्यत्वसमर्थनम् ॥**

* * *

**॥ अथ रुद्रादिदेवानां 'श्रवणाद्यावृत्ति'विषये आगमोदाहरणम् ॥**

३ **सु०— अनेन श्रवणावृत्तेः कर्तव्यता सिद्धा । त्रयाणामप्यावृत्तिं साधयल्लिङ्गाच्चेति सूत्रं पठित्वा तदभिप्रेतानि लिङ्गान्यागमवाक्येनैव दर्शयति लिङ्गादित्यादिना ।**

**ब्र०सू०— ॐ लिङ्गाच्च ॐ ॥**

**अनु०— लिङ्गाल्लातव्यतः पूर्वमृजोर्ब्रह्मत्ववतः शतात् ।**
**शुश्रावोग्रतपा नाम योग्यो रुद्रपदस्य यः ।**
**सार्धं परार्धं विष्णोस्तु गुणान् भक्त्या सदोद्यतः ।**
**तत्त्रिभागमुपासां च चक्रे सम्भृतमानसः ॥**

**लातव्यः** आदातव्यः शिष्यैरुपासितव्यः । तस्मात् । **ब्रह्मत्वत** इति षष्ठीबहुवच-नान्तात् तसिः । ब्रह्मत्वानां **शतात्पूर्वम्** इति ऋजोर्विशेषणम् । यस्यैतस्माद्ब्रह्मकल्पादारभ्य ब्रह्मकल्पानां शते गते ब्रह्मत्वं भविष्यति तस्मादिति यावत् । **सार्धं परार्धमि**त्यत्यन्तसंयोगे द्वितीया । **तत्त्रिभागं** तस्य श्रवणकालस्य, तृतीयभागं कालम् । **उपासां** मनननिदि-ध्यासनरूपाम् । **सम्भृतमानसः** इति उपासितव्य एवार्थे धृतचित्तः ।

**परि०— लातव्य** इत्यनुवादः । **आदातव्य** इति व्याख्या । ला आदान इति धातोरिति भावः । उपासितव्य इति फलितोक्तिः ॥ **ऋजोर्विशेषणमिति** । ब्रह्मत्वानां शतात्पूर्वं विद्यमानो यो ब्रह्मपदयोग्यः ऋजुः (लातव्य इति नामा) तस्मात् शुश्राव रुद्रपदयोग्य इत्येवमर्थ इति भावः ॥ **अत्यन्तसंयोग इति** । 'कालाध्वनोरत्यन्तसंयोग' इति सूत्रं अत्यन्तसंयोगविषये द्वितीया भवतीत्यर्थः । तथा च सार्धं परार्धं ब्रह्मणः पञ्चसप्ततिवर्षमध्ये एकदिनमपि श्रवणशून्यमकृत्वा प्रतिदिनं शुश्रावेत्यर्थः ।

**गु०दी०— लिङ्गाल्लातव्यत** इत्यत्र लिङ्गात् अपरोक्षज्ञानित्वेन तत्त्वनिश्चयवत्त्व**लिङ्गात्** ॥४-१-१,३॥

**यादु०— ऋजोर्विशेषणमिति** । ततश्च **पूर्व**मित्यस्यानन्तरं विद्यमानादिति शेष इति भावः ॥ **मननध्यानरूपामिति** । 'सोपासना च द्विविधा शास्त्राभ्यासस्वरूपिणी । ध्यानरूपा परे'त्युक्तत्वादिति भावः ।

**वं०प०— ऋजोर्विशेषणमिति** । ब्रह्मत्वानां शतात्पूर्वं विद्यमानादृजोर्लातव्यत इत्यर्थो द्रष्टव्यः । एतद्विवृणोति **यस्यैतस्मादिति** । अपरोक्षज्ञानाधिकरणादित्यर्थः । यस्मिन्कल्पेऽपरोक्षज्ञानं जातमिति यावत् । तथाच यस्मिन्कल्पेऽपरोक्षज्ञानं जातं तदारभ्य शतब्रह्मकल्पानन्तरं ब्रह्मत्वं भवति । अत एव 'स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चतामेती'त्यस्यापि **स्वधर्मनिष्ठः पुमान्** अपरोक्षज्ञानीति यावत् । **सः शतजन्मभिः** अपरोक्षज्ञानाधिकरणभूतब्रह्मकल्पसाहित्येन शतजन्मभिः शतब्रह्मकल्पानन्तरं विरिञ्चतामेतीति द्रष्टव्यम् ।

**कं०रा०— त्रयाणामिति** । श्रवणमनननिदिध्यासनानामित्यर्थः ॥ **आदातव्य इति** । ला आदान इत्यस्मात् तव्यप्रत्यये निष्पन्नस्य लातव्यशब्दस्य दातव्य इत्यर्थ इति भावः । तस्य पर्यवसितार्थमाह **शिष्यैरुपासितव्य इति** ॥ **सार्धं परार्धमिति** । परार्धशब्देन चतुर्मुखस्यायुषोऽर्धमुच्यते । तस्य सार्धमित्यनेन अर्धसहितत्वमुच्यते । तथाच चतुर्मुखस्य पञ्चसप्ततिसंवत्सरात्मकं कालमित्यर्थः । ननूक्तकालस्य अधिकरणत्वात् सप्तम्या भवितव्यम् । सार्धं परार्धमिति द्वितीया तु कथमित्यत आह **अत्यन्तसंयोग इति** । 'कालाध्वनोरत्यन्तसंयोग' इति द्वितीयाया विहितत्वात् सा युक्तेति भावः ।

**शे०चं०— लिङ्गानीति** । उग्रतपःप्रभृतिभिरावर्त्यमानत्वरूपाणीत्यर्थः ॥ **लातव्य इति** । लातव्यनामेत्यर्थः । कथं तस्य नामत्वमित्यतो योगेन तदुपपादयति **आदातव्य इति** । ला आदान इति धातोरिति भावः । तत्त्वं चोपास्यतयेत्यभिप्रेत्य तत् व्याचष्टे **शिष्यैरुग्रतपःप्रभृतिभिरुपासितव्य इति** ॥ **बहुवचनान्तात्तसिरिति** । आद्यादिभ्य उपसङ्ख्यानादिति भावः ॥ **शतादिति** । एकोनशतादित्यर्थः ॥ **ऋजोर्विशेषणमिति** । ततश्च पूर्वमित्येतत्पूर्वादिति व्याख्येयमित्युक्तं भवति । ब्रह्मत्वतः शतात्पूर्वमित्युक्तमेव विवृणोति **यस्येति** ॥ **शते गत इति** । एकोनशते गत इत्यर्थः । एकोनशते ब्रह्मस्वतीतेष्विति *सन्न्यायरत्नावल्य*नुसारात्

सार्धं परार्धमित्यस्यायमर्थः । एकोनशतब्रह्ममहाकल्पेभ्यः पूर्वं महाकल्पस्यादिमारभ्य ब्रह्ममानपरिगणित-पञ्चसप्ततिवत्सरकालमिति । नन्वधिकरणत्वादधिकरणे सप्तमीति सप्तम्या भवितव्यं सार्धं परार्धमिति द्वितीया तु कथमित्यत आह **अत्यन्तसंयोगे इति** । **अन्तः** विरामः । अतिक्रान्तोऽन्तोऽत्यन्तः । स चासौ संयोग-श्चेत्यत्यन्तसंयोगो निरन्तरसन्निकर्ष इति यावत् । तत्र द्वितीयेत्यर्थः । 'कालाध्वनोरत्यन्तसंयोग' इति स्मरणा-दिति भावः । **तृतीयभागं कालमिति** । ब्रह्ममानपरिगणितपञ्चविंशतिसंवत्सरकालमित्यर्थः ॥ **मनननिदि-ध्यासनरूपामिति** । 'सोपासना च द्विविधे'त्याद्यनुसारेणोपासनाशब्दस्य श्रवणादित्रितयपरत्वेऽपि शुश्रावेति श्रवणस्यात्र पृथगुपादानादुभयमात्रपरतया व्याख्यातमिति ध्येयम् । विषयानुक्तेस्तं दर्शयन् व्याचष्टे **सम्भृतेति** ।

**वा०र०—** उग्रतपःप्रभृतिभिरित्यादि *सन्न्यायरत्नावल्य*नुसारेणाह **उग्रतपःप्रभृतिभिरिति** । तदनुसारेणैव व्याख्यातं **लातव्यनामेति** । तदनुसारेणैवैकोनशतादिति व्याख्यानम् । **आद्यादिभ्य इति** । एतदसकृदावेदि-तम् । पूर्वमित्येतत्पूर्वस्मादिति व्याख्येयमिति मूलकोशे पाठः । पूर्वादिति पाठे 'पूर्वादिभ्यो नवभ्यो वे'ति विकल्पेन स्मादेशविधानादत्र तदादेशाभावोपपत्तिरिति ज्ञेयम् । **सन्न्यायरत्नावल्यनुसारादिति** । 'लातव्यनामा ऋजुरेकोने'ति तद्वाक्यं 'लिङ्गाल्लातव्यत' इत्येतदनुव्याख्याव्याख्यायामस्तीत्याशयः । तदनुसारेणैव सार्धं परार्ध-मित्यस्यार्थाभिधानम् **एकोनशतेत्यादि कालमितीत्यन्तम्** । एवमुत्तरत्रापि तत्र तत्र । 'दशकल्पं तप' इति ज्ञानपादीयानुभाष्यव्याख्यानमूलटीकायां विस्तृतं प्रकारमनुरुध्याह **अन्त विराममिति** । मासमधीते इत्याद्युदा-हरणम् । व्याख्यानमिति पाठः ।

**स०व्र०—** **ब्रह्मकल्पानां शते गत इति** । एकोनब्रह्मसु अतीतेषु इति सन्न्यायरत्नावल्यामुक्तत्वात् तदनुसारेणापि तथैव व्याख्येयम् । सार्धं परार्धमित्यस्यायं भावः । एकोनशतब्रह्ममहाकल्पेभ्यः पूर्वं महाकल्प-स्यादिमारभ्य ब्रह्ममानपरिगणितपञ्चसप्ततिवत्सरकालमिति ॥ **तस्य श्रवणकालस्येति** । ब्रह्ममानपरिगणितपञ्च-विंशतिवत्सरकालस्येत्यर्थः ।

**॥ इति रुद्रादिदेवानां 'श्रवणाद्यावृत्ति'विषये आगमोदाहरणम् ॥३**

* * *

**॥ अथ श्रवणाद्यावृत्तिस्वरूपकथनम् ॥**

**अनु०—** दशमन्वन्तरं शक्रपदयोग्यो गरुत्मतः ।
पदयोग्यात् सुमनसः सुनन्दो नाम चाशृणोत् ।
उपासां चक्र उद्युक्तो मन्वन्तरचतुष्टयम् ।

सूर्याचन्द्रमसोश्चैव पदयोग्यौ सुतेजसौ ।
सुरूपः शान्तरूपश्च मन्वन्तरचतुष्टयम् ।
अशृण्वतां सुमनसो मन्वन्तरमुपासताम् ।
ततः प्रोक्तास्तु ते सर्वे भक्त्योग्रतप आदयः ।
अपश्यन् परमं विष्णुं तत्प्रसादैधिताः सदा ।
इत्युक्तं विष्णुना साक्षाद् ग्रन्थे सत्तत्त्वसंज्ञिते ॥

४ **सु०—** दश मन्वतराणि यस्मिन् काले स तथोक्तः । **गरुत्मतः पदयोग्यादिति** । गरुत्मतो यत्पदं तत्र योग्यादित्यर्थः । **सुतेजसावेव** सुप्रज्ञावेव न तु मन्दौ । **अशृण्वतां** अशृणुताम् । व्यत्ययो बहुलमिति द्विविकरणता । **सुमनस** एव । **मन्वन्तरं** मन्वन्तरावच्छिन्नं कालम् । **उपासताम्** उपासाताम् । छान्दसो वर्णविकारः ।

नन्वत्र श्रवणादिकालबाहुल्यमेव प्रतीयते । न पुनरावृत्तिः । श्रुतस्यैव वाक्यस्य पुनः श्रवणमित्यादिरूपा हि सेति । मैवम् । एकेन वाक्येनावगतस्य तत्त्वस्य पुनःपुनस्तेनान्येन वा अवगतिः श्रवणावृत्तिः । एवमेकया युक्त्याऽनुसंहितस्य भूयो भूयः तयाऽन्यया वा अनुसन्धानं मननावृत्तिरित्यभिप्रेतत्वात् ।

नन्वेवं चेत् सर्ववेदान्तप्रत्ययमित्यनेनैव गतमेतत् । सत्यम् । तस्यैवात्यन्तावश्यकत्वप्रदर्शनाय पुनरारम्भ इत्युक्तमेव । एवमुत्तरत्रापि द्रष्टव्यम् ॥ ४ ॥ १ । १ ॥

**परि०—** पदविशेषणत्वाप्रतीतेराह **गरुत्मतो यत्पदमिति** । नित्यसापेक्षत्वात्समास इति भावः । एवमव्याख्याने हि पदेत्यस्य कस्य पदेत्याकाङ्क्षा न शान्ता स्यादिति ज्ञेयम् ॥ **द्विविकरणतेति** । 'श्रु श्रवणे' इत्यस्य श्नुविकरणे कृते पश्चात् 'तुदादिभ्यश्शः' इत्युक्तशविकरणमपि कार्यम् । पश्चाद्यणादेशे 'अशृण्वतामि'ति छान्दसं रूपमित्यर्थः । शविकरणे हि गुणावादेशौ प्राप्नुतः। **वर्णविकार इति** । ह्रस्वरूपो विकार इत्यर्थः ॥ **इत्यनेनैव गतमिति** । तत्रैकत्रोक्तगुणानां केषाञ्चिच्छाखान्तरेऽपि श्रवणादेकस्यामपि केषाञ्चित् पुनः पुनः श्रवणादिति भावः ॥ ४-१-१ ॥

**यादु०**— सामानाधिकरण्यभ्रमं वारयितुमाह **गरुत्मतो यत्पदमित्यादि** । ततश्च नित्यसापेक्षत्वात् समास इति भावः । ननु श्रु श्रवण इति धातोः 'श्रुवः शृचे'ति श्नुप्रत्यये शृभावे च सति श्नोर्ङित्वाद्गुणाभावे शकारलोपे णत्वे अडागमे तसस्तामादेशे अशृणुतामित्येवंरूपेण भाव्यं कथमशृण्वतामिति रूपमित्यत आह **व्यत्ययो बहुलमिति** । यथायथं विकरणप्रत्ययाः शबादयो विहिताः तेषां छन्दसि विषये बहुलं व्यत्ययो भवतीति सूत्रार्थः । एवं चात्र श्नुप्रत्ययान्तरं शपोऽपि प्राप्तौ यणादेशेऽशृण्वतामित्यपि रूपं छन्दस्त्वादुपपन्नमिति भावः ॥ ४-१-१ ॥

**वं०प०**— **वर्णविकार इति** । आकारस्य अकारत्वेन विपरिणाम इत्यर्थः । 'सूर्याचन्द्रमसोश्चैवे'-त्यत्रस्यैवकारस्य 'सुतेजसावि'त्यनेन सम्बन्धमुक्त्वा 'सुमनस' इत्यनेनापि सम्बन्ध इत्याह **सुमनस एवेति** । न त्वनेनेत्यर्थः । ननु श्रवणावृत्तिर्नाम येनैकेन वाक्येन तत्त्वमवगतं तस्यैव तत्त्वस्य पुनः पुनस्तेनैव वाक्येनावगतिः । यथा 'स य एषोऽणिमे'त्यादि । मननावृत्तिः नाम यया एकया युक्त्या तत्त्वमनुसंहितं तयैव युक्त्या तस्यैव भूयो भूयोऽनुसन्धानम् । न ह्येतादृशी श्रवणाद्यावृत्तिः प्रकृते वक्तुं शक्यते । सार्धपरार्धादिकालपर्यन्तमेकेनैव वाक्येन तस्यैव तत्त्वस्य श्रवणेऽसुज्ञत्वप्राप्तेः । तत्त्रिभागकालपर्यन्तं तस्यैव तत्त्वस्य तयैव युक्त्यनुसन्धानकरणेऽपि तथा । अतः श्रवणाद्यावृत्तिमन्यथाप्याचष्टे **एकेन वाक्येनेत्यादिना** ॥ **अन्येन वा** वाक्येन। **अनुसंहितस्य** तत्त्वस्य । **तया अन्यया वेति** । युक्त्येत्यर्थः । तथा च बहुकालं तस्यैव तत्त्वस्य वाक्यान्तरेण श्रवणे, युक्त्यन्तरेणानुसन्धाने च विशेषावगतिसम्भवादिति भावः ॥ **सर्ववेदान्तेति** 'सोपासना च द्विविधा शास्त्राभ्यासस्वरूपिणी' इत्येवं शास्त्राभ्यासरूपश्रवणमननरूपोपासनायाः कर्तव्यत्वस्य तत्रैवोक्तत्वादिति भावः ॥ ॥ ४-१-१ ॥

**कं०रा०**— नन्वशृण्वतामित्येतत् कथमित्यत आह **व्यत्यय इति** । 'व्यत्ययो बहुलमि'ति सूत्रे क्वचिद्द्विविकरणता क्वचित्त्रिविकरणतेति काशिकावचनाद्विकरणद्वयवृत्तिराश्रिता । तथा च श्नुप्रत्ययात्परतः शप्रत्यये श्नुप्रत्ययोकारस्य 'हुश्नुवोः सार्वधातुक' इति यणादेशे 'तस्थस्थमिपां तान्तन्ताम' इति तसस्तामादेशे 'लुङ्लङ्लृङ्क्ष्वडुदात्त' इति अडागमे 'श्रुवः शृचे'ति शृभावे अशृण्वतामित्येतद्रूपं युक्तमिति भावः । न च वाच्यं शप्रत्यय एव क्रियतामिति । तथात्वे गुणावादेशापातेनाशृणवतामिति रूपप्रसङ्गात् । शपः पित्वेन 'सार्वधातुकमपिदि'ति ङित्वस्याप्राप्त्या गुणनिमित्तत्वात् । अत एवोत्तरधातुवृत्तौ सुनवानीत्यत्र 'आटि पित्वात् अङित्वाद्यणं बाधित्वा परत्वाद्गुण' इत्युक्तम् । भाषायां छान्दसप्रयोगश्च अधस्तादुपपादितः । **छान्दस इति** । उपासातामिति वक्तव्ये उपासतामिति यो वर्णविकारः स छान्दस इत्यर्थः । एतच्चोपलक्षणम् । भौवादिकस्य स्वरितेतः 'अस गतिदीप्त्यादानेष्वि'ति धात्वन्तरस्येदं रूपमित्यपि द्रष्टव्यम् । उपासनजन्यफलत्वेनाभिमतस्य भगवत्प्रसादस्याकर्तृगामित्वात् परस्मैपदम् । उपपूर्वस्य 'आस उपवेशन' इत्यस्येव तत्पूर्वस्य अस गतिदीप्त्यादानेष्वित्यस्य दानाद्यर्थत्वं च युक्तम् । तथा च छान्दसो वर्णविकारो न कल्पनीयोऽस्मिन्पक्षे ॥ **नन्वेवं चेदिति** । एकेन वाक्येनावगतस्य तत्त्वस्य पुनःपुनस्तेनान्येन वा अवगतेः श्रवणावृत्तिरूपत्वे, एकया युक्त्या अनुसंहितस्य भूयो

भूयस्तया अन्यया वा अनुसन्धानस्य मननावृत्तिरूपत्वे च 'सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषादि'त्यधिकरणे सर्वशाखाश्रवणमननयोः कर्तव्यत्वोक्त्यैव श्रवणाद्यावृत्तेः कर्तव्यत्वलाभात् तेन अधिकरणेन एतदधिकरणं गतार्थमित्यर्थः ॥ **एवमुत्तरत्रापीति** । 'आनन्दादयः प्रधानस्ये'त्यत्र आत्मत्वोपासनस्य कर्तव्यत्वोक्तेः 'आत्मेति तूपगच्छन्ति ग्राहयन्ति चे'त्यधिकरणं तेन गतार्थम् । तथा 'भूम्नः क्रतुवज्ज्यायस्त्वमि'त्यधिकरणे भूमगुणोपासनस्य कर्तव्यत्वोक्तेः 'ब्रह्मदृष्टिरुत्कर्षादि'त्यधिकरणं तेन गतार्थमित्याशङ्कायां तत्रोक्तस्य स्वामित्वाद्युपासनस्य अत्यन्तावश्यकत्वप्रदर्शनाय पुनरारम्भ इति समाधानं द्रष्टव्यमित्यर्थः ॥ ४-१-१ ॥

**शे०चं०**— दशमन्वन्तराणि समाहृतानीति समाहृतप्रधानद्विगुपक्षे, दशानां मन्वन्तराणां समाहार इति समाहारप्रधानद्विगुपक्षे वा कालालाभाद्बहुव्रीहिमाश्रित्य तल्लाभं दर्शयति **दशेति** । गरुत्मतः पदयोग्यादिति समानाधिकरणे पञ्चम्याविति भ्रमनिरासायाह **गरुत्मत इति** । देवदत्तस्य गुरुकुलमित्यादाविव नित्यसापेक्षत्वात् समास इति हृदयम् । 'सूर्याचन्द्रमसोश्चैवे'त्यत्र विरुद्धार्थयोश्चैवशब्दयोरेकत्र सम्बन्धानुपपत्तेश्चशब्दस्य यथाश्रुतसम्बन्धमङ्गीकृत्यैवशब्दं भिन्नक्रमतया योजयति **सुतेजसावेवेति** । अत्रापि किं तेनेत्यतस्तद्व्यावर्त्यमाह **न त्विति** । ननु शृ श्रवण इत्यस्माल्लुङि प्रथमपुरुषद्विवचने तसि श्रुवः शृचेति श्नुप्रत्यये शृभावे च सति अपित्वात्सार्वधातुकमपिदिति श्नोर्ङित्वाद् गुणाभावे शकारलोपे णत्वे च सति पूर्ववत्तसोर्ङित्वात् श्नोर्गुणाभावेऽडागमे तसस्तामादेशे अशृणुतामित्येव भवितव्यम् । तत्कथमशृण्वतामित्यत आह **व्यत्यय इति** । 'व्यत्ययो बहुलम्' इत्यस्मिन्सूत्रे 'छन्दसि शानजपी'ति पूर्वसूत्रात् छन्दस्यपीत्यस्यानुवृत्तौ सत्यां छन्दसि व्यत्ययो भवति । अपिशब्दाद्यथाप्राप्तं चेत्येतावन्मात्रेणेष्टसिद्ध्या बहुलग्रहणवैयर्थ्यमाशङ्क्य बह्वर्थादानप्रवृत्तिनिमित्तकबहुलग्रहणस्य प्रकृताप्रकृतसर्वाभिविधिव्यत्ययलक्षणव्यभिचारार्थताया आश्रितत्वात् 'इतिहासः पुराणः पञ्चमो वेदानां वेद' इति वेदेनैव सत्तत्त्वस्यापि छन्दस्त्वस्थित्या तद्बलेन द्विविकरणत्वस्यापि प्राप्त्या श्नोरनन्तरं तौदादिकस्य शस्यापि प्राप्तौ तस्य ङित्त्वाद् गुणासम्भवेन यणादेशे सति अशृण्वतामित्यस्यापि छन्दस्त्वादुपपत्तिरिति भावः । सूर्याचन्द्रमसोश्चैवेत्येवशब्दस्य सुमनस इत्यनेनापि सम्बन्ध इत्याशयेनाह **सुमनस एवेति** । ननु सुरूपशान्तरूपयोर्द्वित्वादुपपूर्वादास्तेर्लङात्मनेपदप्रथमपुरुषद्विवचने आतामि उपासातामिति द्विवचनेन भवितव्यम् । तत्कथमुपासतामित्यागमवाक्ये ह्रस्व इत्यत आह **छान्दस इति** । दीर्घस्य ह्रस्वत्वलक्षण इत्यर्थः ।

इत्यादीत्यादिपदेनानुसंहिताया युक्तेः पुनरनुसन्धानरूपमननावृत्तिपरिग्रहः ।

**नन्विति** । तत्र श्रवणाद्यावृत्तेः कर्तव्यत्वसिद्धेरिति भावः ॥ **उक्तमेवेति** । 'विशेषतो नित्यशः कार्यमत्यन्तमवश्यम्भावी'त्यादिनेति शेषः ॥ ४-१-१ ॥

**३अ वा०र०— द्विगुपक्षे वेति** । एतद्वयपक्षविचारस्तु 'अन्योऽप्यल्पमतिः शाखाचतुःपञ्चे'त्युपासनापादीयभाष्यमूलटीकाप्रपञ्चानुसारेण ज्ञेयः ।

**भ्रमनिरासायेति** । गरुत्मत इत्यस्य भिन्नपदतया पदपदेनान्वयायोग इति भवति भ्रान्तिः । परिहारे तु पदपदेन सम्बन्धाभिप्रायवर्णनाद्युक्तस्तन्निरास इति भावः । तथा सति सापेक्षयैकस्यैव पदपदस्य प्रधानत्वकार्याभावयोः प्राप्त्या तयोश्चैकस्मिन्नन्योन्यसापेक्षमसमर्थमिति न्यायावतारेण समासायोग इत्यत आह **देवदत्तस्येति** । विस्तृतं चैतत्प्रागेव । **गुणाभाव इति** । 'क्ङिति चे'ति सूत्रेण गित्किन्ङिन्निमित्तगुणनिषेधादिति भावः । **पूर्ववदिति** । अपित्सार्वधातुकत्वेनेत्यर्थः । **सर्वाभिविधीति** । एकविकरणोत्पत्त्यनन्तरं तद्विकरणान्ताद्धातोर्विकरणान्तरासम्भवस्यापि विधानात्तद्व्यभिचारोऽप्यनेन लब्ध इत्याशयः । द्विविकरणत्वस्यापीत्यत्र धातोरिति शेषः । 'इन्द्रो वस्तेन नेषतु' इत्यत्र नेषत्वित्यत्र शप्सिपौ विकरणौ । 'समपर्यजिद्वाजो अस्मां अविष्टुरि'ति प्रथमस्य सप्तमे चावतेर्लोटि सिपोऽपि प्रवृत्तेः । 'इन्द्रेण युजा तरूषेम वृत्रमि'ति पञ्चमाष्टकचतुर्थे तरुषेमेत्यत्र तरतेर्विकरणः शप्सिपौ त्रयमिति व्यत्ययो बहुलमित्येतत्सूत्रसिद्धान्तो रमायां स्पष्टम् । गुणाभावोपपत्त्यर्थं शप्परित्यागेन शाश्रयणमिति दर्शयताऽन्यथाख्यातिरयुक्तेति सूचितम् । मूले सुमनस एवेति सम्बन्धप्रदर्शनेन पूर्ववद्गुणभेदो नास्तीति स्पष्टितं भवति । आतामीत्यनन्तरं सतीति पूरणीयम् । ताविति रूपादेर्ग्रहणम् । **परिग्रह इति** । उत्तरस्य द्वयस्यैव व्याख्यानादत्र द्वयमेवाभिधित्सितमित्याशयेनादिपदेनैकस्यैव परिग्रहो वर्णितः । उपलक्षणतया मूलटीकयोध्र्यनिऽप्येवंभावाकल्पनं त्वसम्भवादिति ध्येयम् । **मूले एवमुत्तरत्रापीति** । उत्तराधिकरणेष्वपि गतार्थतापरिहारो विशेषत इत्यादिरीत्या कर्तव्य इत्यर्थः ।

**स०व्र०— द्विविकरणतेति** । श्नुविकरणता शब्विकरणतेति द्विविकरणतेत्यर्थः । **वर्णविकार इति** । दीर्घस्य ह्रस्वत्वलक्षण इत्यर्थः ।

॥ इति श्रवणाद्यावृत्तिस्वरूपकथनम् ॥

*॥ इति आवृत्त्यधिकरणम् ॥*

★ ★ ★

# ॥ अथ आत्मोपगमाधिकरणम् ॥

॥ अथ आत्मशब्दवाच्यः विष्णुरेव ॥

## ब्र०सू०— ॐ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॐ ॥

सु०— एतत्सूत्रं व्याख्यातुमात्मशब्दार्थं तावदाह **आत्मेति** ।

### अनु०— आत्मेति नाम कथितं साक्षान्नारायणस्य हि ।

**यस्मादात्मेति नाम साक्षान्मुख्यया वृत्त्या नारायणस्य कथितम् । मुख्ये च सम्भवत्यमुख्यं न युज्यते । तस्मादत्र सूत्रेऽपि आत्मा जनार्दनः आत्मशब्दोदितो जनार्दन इति वक्ष्यमाणेनान्वयः ।**

**परि०— आत्मेति** ।। **व्याख्यातुमिति** । तस्मादुपास्य इत्यादिनेति ज्ञेयम् । **हिशब्दार्थो यस्मादिति** ।

**वं०प०—** 'तस्मादात्मा जनार्दन' इति वक्ष्यमाणमनूद्य व्याख्याति **आत्मशब्दोदित इति** ।

**शे०चं०—** 'आत्मेति नाम कथितमि'त्यादेः 'तस्मादात्मा जनार्दन' इत्यन्तस्य भाष्यस्य असूत्रार्थकथनरूपत्वादानर्थक्यमाशङ्क्य सौत्रात्मशब्दार्थकथनरूपत्वान्न तदित्यभिप्रेत्य तत्कथनस्यापि प्रयोजनं दर्शयन् सौत्रात्मशब्दार्थकथनरूपतया भाष्यं सङ्गमयति **एतदिति** ।। **व्याख्यातुमिति** । 'तस्मादुपास्यो विष्णुरि'त्यादिनेति शेषः ।। **तावदिति** । पदार्थज्ञानपूर्वकत्वाद्वाक्यार्थज्ञानस्येति भावः । उत्तरत्र तस्मादिति श्रवणात् तदपेक्षितयस्मादित्यर्थतया हिशब्दं व्याचष्टे **यस्मादिति** । मूले साक्षात्पदमनर्थकमित्याशङ्क्यात्मशब्दस्य भगवन्नामतामात्रेण सौत्रात्मशब्दस्य भगवदर्थत्वे, तस्य जीवनामताया अपि सत्त्वेन सौत्रात्मशब्दस्य तदर्थत्वस्यापि प्राप्त्या, भगवन्नामतामात्रस्य सौत्रात्मशब्दार्थत्वव्यवस्थापकत्वानुपपत्त्या कथमनेन तत्सिद्धिरित्यतोऽत्रात्मशब्दस्य मुख्यया वृत्त्या भगवन्नामत्वस्यैवोक्तार्थव्यवस्थापकत्वेन तन्नामतामात्रस्य तद्विरहान्नातिप्रसङ्ग इत्यर्थसूचकत्वात् साक्षात्पदस्य नानर्थक्यमित्याशयेन तत्पदं मुख्यवृत्तिपरतया व्याचष्टे **साक्षान्मुख्यया वृत्त्येति** । नन्वथाऽप्यमुख्यया वृत्त्या अन्यनामत्वस्यापि सत्त्वात् अत्र सूत्रे अन्यनामत्वमपि तस्य किं न स्यादित्यतो भगवति तस्य मुख्यत्वोक्त्या तदसम्भव एव अन्यपरतायाः सूचितत्वात् न तत्सम्भवेऽपि तत् । अन्यथा मुख्यामुख्यन्यायविरोधादित्यभिप्रेत्य तात्पर्यमाह **मुख्ये चेति** । अव्यवहितग्रन्थान्वयानुपपत्तेर्योग्यतया व्यवहितान्वयमाह **तस्मादिति** । आत्मशब्दस्य मुख्यया वृत्त्या भगवन्नामतायाः सौत्रात्मशब्दस्य भगवदर्थत्वे एव हेतुत्वं तदविवक्षायां सौत्रात्मशब्दार्थकथनत्वासिद्ध्या भाष्यानर्थक्यप्रसङ्गाच्च आत्मपदं आत्मपदवाच्यपरतया व्याचष्टे **आत्मशब्दोदित इति** ।

**वा०र०— आनर्थक्यमाशङ्क्येति** ।। इत्याशङ्क्येत्यर्थः । तेन द्वितीयान्तानन्वय इति शङ्कानवकाशः । एवं तत्र तत्र इत्याशङ्क्येत्यस्य इत्यर्थसूचकत्वात् साक्षात्पदस्येत्युत्तरेण सम्बन्धः । **भगवन्नामतामात्रेणेति** । भगवन्नामत्वे प्रमाणतया कथनस्योक्तावपि आत्मशब्दार्थत्वे तन्नामत्वमेव हेतुतयाऽभिप्रेतं भाष्यमूलयोरित्याशयेन नामताया एव पुरस्कारः । एवमुत्तरत्रापीत्यवधेयम् । **जीवनामताया अपीति** । 'क्षेत्रज्ञ आत्मा पुरुष' इत्यभिधानसद्भावात् । 'हृदि ह्येष आत्मे'त्यादिप्रयोगश्चेति भावः । **सौत्रात्मेति** । पैङ्गिश्रुतिरूपाभिधाने नामत्वं जनार्दनस्य नात्मत्वसाधकमिति भावः । **व्यवस्थापकत्वेनेति** । व्यवस्थापकतयाऽभिप्रेतत्वेनेत्यर्थः ।

**न तत्सम्भवेऽपि तदिति** । अन्यपरतारूपमन्यनामत्वमित्यर्थः । व्यवहितस्यान्यनामत्वस्यैवायं परामर्श इत्यप्याहुः । **तदविवक्षायाम्** आत्मशब्दार्थत्वाविवक्षायामित्यर्थः । आत्मत्वमात्रमेवात्मनेत्यनेन प्रतिपाद्यत इत्यङ्गीकार इति यावत् ।

* * *

६ **सु०**— किं तदात्मशब्दस्य भगवन्नामत्वकथनमित्यत आह **आत्मेति** ।

**अनु०**— आत्मा ब्रह्म महाँस्तारः परमेशः शुचिश्रवाः ।
विष्णुर्नारायणोऽनन्त इति श्रीपतिरीर्यते ।
इति पैङ्गिश्रुतिश्चैव तथैव परमश्रुतिः ॥

**इति** नामभिः । **पैङ्गिश्रुतिः** आत्मशब्दं भगवन्नामत्वेनाह । **च**शब्दः श्रुत्यन्तरसमुच्चयार्थः । **श्रुतिरेव** न तु मानुषप्रणीतमभिधानमिति एवशब्दः । तेन 'क्षेत्रज्ञ आत्मा पुरुष' इत्यादिविरोधो नाशङ्कनीयः । ओमात्मेति **परमश्रुतिः** ।

ओमात्मा भगवान्विष्णुरात्मानन्दोऽक्षरः स्वराट् ।
विश्वत्राता नृसिंहोऽजो नारायण उरुक्रमः ।
अनसूया तथैवात्रेर्जज्ञे पुत्रानकल्मषान् ।
दत्तं दूर्वाससं सोममात्मेशब्रह्मसम्भवान् ।
इति भागवते चैव तस्मादात्मा जनार्दनः ॥

**आत्मानन्देति** समस्तमेकं नाम । **अनसूयेति** भागवते च आत्मशब्दस्य भगवत्येव प्रयोगोऽस्ति । **तथैवेति** तत्र प्रकृतेन समुच्चयार्थम् । **जज्ञे** जनयामास । अन्तर्णीत-(णिजर्थोऽत्र)ण्यर्थो वा अत्र जनिः । **आत्मेशब्रह्मसम्भवान्** विष्णुशिवब्रह्मसम्भवान् । सह भवन्तीति सम्भवाः । अत्र दत्तदूर्वाससौ विष्णुशिवावेव । सोमो ब्रह्मणा सहभूतः । तद्धर्मोऽन्ययोरप्युपचारादुच्यते । छत्रिण इति यथा ।

**परि०**— 'ईर्यत' इत्यस्य कर्त्राकाङ्क्षां पूरयितुं 'श्रीपतिरि'त्यतः पूर्वं शेषमाह **इति नामभिरिति** । प्रथमान्तस्यान्वयं शेषेणाह **पैङ्गिश्रुतिरिति** ॥ **श्रुत्यन्तरेति** । वक्ष्यमाणेति योज्यम् ॥ **इत्यादिविरोध इति** । जीवपर्यायत्वोक्तिपरामरकोशादिविरोधो न शङ्कनीय इत्यर्थः । अपौनरुक्त्यायाह **इति समस्तमेकं नामेति** । सप्तम्यन्तस्यान्वयं शेषोक्त्या आह **प्रयोगोऽस्तीति** ॥ **तत्र प्रकृतेनेति** । चतुर्थस्कन्धे प्रथमेऽध्याये 'याः कर्दमसुताः प्रोक्ता आसन् ब्रह्मर्षिपत्नयः' इत्युपक्रम्य 'पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजे'त्यादिना प्रकृतेनेत्यर्थः । षष्ठाध्यायबृहद्भाष्योक्तिं हृदि कृत्वा आह **अन्तर्णीतणिजर्थोऽत्र जनिरिति** । सोमस्य ब्रह्मानंशत्वात् सम्पदस्य सहार्थत्वमुपेत्य सम्भवपदं तदनुगुणतया व्याचष्टे **सहभवन्तीति** । **सोमो ब्रह्मणेति** । 'ब्रह्मणो नावतारोऽस्ति सन्निधानं तु केवलमि'त्यादितत्तात्पर्योक्तेरिति भावः ॥ **तद्धर्म इति** । सहभावरूपो धर्म इत्यर्थः ।

**यादु०**— **एकं नामेति** । अन्यथा पौनरुक्त्यमिति भावः ॥ **तत्र प्रकृतेनेति** । भागवते 'पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजे'ति पूर्वश्लोकोक्ते प्रकृतेनेत्यर्थः । जनयामासेति व्यत्ययमाश्रित्य व्याख्यानम् । अत एवापरितोषादाह **अन्तर्णीतण्यर्थो वेति** । ननु दत्तदूर्वाससोरात्मेशांशत्वेन तत्सम्भवत्वेऽपि न सोमस्य ब्रह्मसम्भवत्वं युक्तम् । तस्य तदनंशत्वात् । ब्रह्मणो भुव्यवताराभावाच्चेत्याशङ्कायां 'ब्रह्मणो नावतारोऽस्ति सन्निधानं तु केवलम् । ऋते विष्णोरात्मनश्च तदंशोक्तिः प्रवेशत' इति भागवततात्पर्यं मनसि निधाय सम्भवशब्दं व्याख्याति **सह भवन्तीति** । तथाच नायं सम्भवशब्दः रूढ्योत्पत्तिमात्रवाचकः किन्तु योगेन सहभूतत्ववाचकः । तच्चोक्तप्रमाणादस्त्येवेति भावः । अव्ययानामनेकार्थत्वात् । 'तां समभवत् । तेऽर्चिषमभिसम्भवन्ती'-त्यादिश्रुतौ 'सम्भोगप्राप्तिरि'ति सूत्रे 'सम्भोगो नेशजीवयोरि'ति स्मृतौ प्रयोगात् 'मम तेजोंऽशसम्भवमि'त्यस्य गीतातात्पर्यनिर्णये 'तेजोंऽशेन संयुक्तं भवती'ति व्याख्यानाच्च समित्यस्य साहित्यार्थता युक्तैवेति ध्येयम् । नन्वयं सहभूतत्वरूपो यौगिकार्थो यद्यपि सोमे सम्भवति; न दत्तदूर्वाससोः; तयोरात्मेशस्वरूपत्वादित्याशङ्क्यौपचारिकस्तत्रायं प्रयोग इत्याह **अत्र दत्तेत्यादिना** । सहभूत इत्यनन्तरम् इति यद्यपि तथापीति शेषः ॥ **तद्धर्म इति** । तस्य सोमस्य सहभूतत्वरूपो धर्म इत्यर्थः ॥ **उपचारादिति** । यद्यपि सम्भवशब्दस्योक्तरीत्या यौगिकत्वेऽपि आत्मा चेशश्च ब्रह्मसम्भवश्चेति द्वन्द्वाश्रयणेन व्याख्याने मुख्यवृत्त्यैवाभिमतसिद्धिः । तथाऽप्यात्मेशब्रह्मभिः सम्भवा इति तृतीयातत्पुरुषस्य झडिति प्रतीत्येत्थं समाहितमिति ज्ञातव्यम् ।

**वं०प०**— आत्मानन्द इत्यस्य पदद्वयमङ्गीकृत्य नामद्वयाभिप्राये पुनरुक्तिप्रसङ्गादाह **आत्मानन्द इतीति** । आत्मपदेन समस्तमानन्द इति पदमेकमेव अतो न पुनरुक्तिरित्यर्थः ।

**कं०रा०**— **तेनेति** । आत्मशब्दो विष्णुवाचक इत्यर्थग्राहकस्य 'आत्मा ब्रह्म महांस्तार' इत्यादिवाक्यस्य श्रुतितया मानुषप्रणीताभिधानरूपत्वाभावेन आत्मशब्दस्य जीववाचित्वग्राहकेण 'क्षेत्रज्ञ आत्मा पुरुष'

इत्यादिकोशवाक्येन विरोधो नाशङ्कनीयः । श्रुतेः प्रबलत्वात् कोशवाक्यस्य च पौरुषेयत्वेन दुर्बलतया तद्विरोधस्याकिञ्चित्करत्वादिति भावः । 'ओमात्मेति' आत्मशब्दस्य विष्णुनामत्वेन गृहीतत्वात् आत्मानन्द इति पुनरात्मशब्दग्रहणं व्यर्थमित्यत आह **आत्मानन्द इति समस्तमेकं नामेति** ॥ **तथैवेतीति** । 'अनसूया तथैवात्रेर्जज्ञे पुत्रानकल्मषानि'त्यत्र भागवतवाक्ये तथाशब्दः तत्र भागवते पूर्वप्रकृतेन समुच्चयार्थमित्यर्थः ॥ **अन्तर्णीतण्यर्थोऽत्र जनिरिति** । उत्तरधातुवृत्तौ 'जनी प्रादुर्भाव' इत्येतद्व्याख्यानावसरे 'प्रादुर्भाव उत्पत्तिरभिव्यक्तिर्वा । अत्रायमकर्मकः । यदा त्वन्तर्भावितण्यर्थ उत्पादनायामभिव्यञ्जनायां वा वर्तते तदा सकर्मक' इति जनेरन्तर्णीतण्यर्थत्वं सकर्मकत्वं चोक्तमिति भावः । **तद्धर्म इति** । स धर्मः सहभावोऽन्ययोर्दत्तदूर्वाससोरप्युपचारादुच्यते । छत्रिणो गच्छन्तीत्यादौ छत्रित्वमछत्रिष्वपि यथोपचारादुच्यते तथेत्यर्थः । तद्धर्मोऽनन्ययोरिति पाठे आत्मेशशब्दितविष्णुशिवाभ्यामनन्ययोर्दत्तदूर्वाससोः तत्सहचाराभावाभावेऽपि स धर्मः सहभावस्तयोरप्युपचारादुच्यत इत्यर्थः ।

शे०चं०— **इति नामभिरिति** । 'इति श्रीपतिरि'ति मूले ईर्यत इति प्रतिपाद्यतायाः श्रवणान्नाम्नामेव च प्रतिपादकत्वात् तदनुरोधेनेतीत्यतःपरं नामभिरित्यध्याहारो दर्शित इति ध्येयम् । साकाङ्क्षत्वादिति पैङ्गिश्रुतिरित्यतःपरं अपेक्षितं पूरयति **आत्मशब्दमिति** । विरुद्धार्थयोश्चैवशब्दयोः कथमेकत्रान्वय इत्यतोऽविरोधेनार्थमाह **चशब्द इति** । परमश्रुतिरूपवक्ष्यमाणश्रुत्यन्तरसमुच्चयार्थ इत्यर्थः । एवशब्दाभिप्रायकथनं **श्रुतिरेवेति** ॥ **इत्येवशब्द इति** । इति सूचयितुमेवशब्द इत्यर्थः । किमस्य मानुषप्रणीतत्वाभावसूचनेनापीत्यत आह **तेनेति** ॥ 'तथैव परमश्रुतिरि'त्यत्र परमश्रुतिरपि तथा उदाहृतपैङ्गिश्रुतिवदेवेत्यतो नोदाहृता । ओमात्मेत्यादिका त्वन्येत्यन्यथाप्रतीतिमपाकरोति **ओमात्मेति परमश्रुतिरिति** । अत्र च ओमात्मेति परमश्रुतिरपि तथैव आत्मशब्दं भगवन्नामत्वेनाहेति योजना । एवशब्दस्य तूक्तमेव प्रयोजनमवधेयम् । आत्मानन्द इत्यत्र भिन्नपदतायामोमात्मेत्यनेन पौनरुक्त्यप्रसङ्गादाह **आत्मानन्देतीति** ।

**तत्र प्रकृतेनेति** । भागवते 'पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजे'ति पूर्वश्लोकप्रकृतेनेत्यर्थः । जनेरकर्मकत्वात् कथं पुत्रानिति कर्मोक्तिरित्यत आह **जनयामासेति** । जज्ञ इत्यनेन जनयामासेत्यस्य कथं लाभ इत्यतः अनेकार्थत्वाद्धातूनां लक्षणया वा जनिरत्र ण्यर्थमप्यन्तर्भावयति तदा प्रयोज्येन कर्मणा सकर्मको भवतीत्याशयेनाह **अन्तर्भावितेति** । ननु दत्तादीनां त्रयाणामत्रेरुत्पन्नत्वेनात्मेशब्रह्मभ्यः सम्भूतत्वाभावात् कथं तत्सम्भूतत्वोक्तिरित्यतः सम्भवपदं व्याख्याति **सह भवन्तीति** ।

यद्यपि संशब्दः सम्यक्तामाह, तथाऽप्यव्ययानामनेकार्थत्वात् साहित्यार्थत्वम् । तर्हि दत्तादीनां त्रयाणामपि सहभूतता येन तदर्थसम्भवशब्दविषयतेत्यतो विवेकं दर्शयति **अत्रेति** ॥ **विष्णुशिवावेवेति** । 'दत्तो विष्णोस्तु योगवित्', 'दुर्वासाः शङ्करस्यांश' इति भागवतवचनादिति भावः ॥ **सोमो ब्रह्मणा सहभूत इति** । यद्यपि 'सोमोऽभूद्ब्रह्मणोंऽशेने'ति सोमस्यापि ब्रह्मांशत्वं तत्रैवोक्तम् । तथाऽपि 'ब्रह्मणो नावतारोऽस्ति

सन्निधानं तु केवलम् । ऋते विष्णोरात्मनश्च तदंशोक्तिः प्रवेशत' इति तात्पर्यानुसारेण सहभूतत्वमेव तदर्थ इत्यभिप्रायेणैवेयमुक्तिरिति ध्येयम् । नन्वेवं सोमस्य सहभूतत्वात् तस्यैव तदर्थकसम्भवशब्दविषयत्वेऽपि दत्तदूर्वाससोस्तद्विषयत्वाभावात् त्रयाणां तथोक्तिरयुक्तेत्यतः मुख्यतः सोमस्यैव तद्विषयत्वेऽपि अमुख्यवृत्त्या दत्तदूर्वाससोरपि तद्विषयत्वान्नानुपपत्तिरित्याह **तद्धर्म इति** । सोमधर्म इत्यर्थः । कथमन्यधर्मस्यान्यत्रोपचारादपि प्रयोग इत्यतोऽत्रानुरूपदृष्टान्तमाह **छत्रिण इतीति** ॥ **यथेति** । यद्यपि सम्भवशब्दस्योक्तरीत्या यौगिकत्वेऽप्यात्मा चेशश्च ब्रह्मसम्भवश्चेति द्वन्द्वाश्रयणेन व्याख्याने मुख्यवृत्त्यैवाभिमतसिद्धिरित्युपचाराश्रयणमनर्थकम् । तथापि दत्तदूर्वाससोरात्मेशत्वोक्तौ तयोरंशत्वस्याप्राप्त्यैतद्वाक्यबलेनांशत्वासिद्धेरुक्तसमासाश्रयणेन सम्भवशब्दस्य त्रिष्वप्यन्वयाङ्गीकारे वाक्यार्थानुपपत्त्या लक्षणाया अवश्याश्रयणीयत्वेन तत्प्रयोजनतयैतद्वाक्यादेव 'अथास्मदंशभूतास्त आत्मजा लोकविश्रुताः । भवितार' इति वरदानवाक्ये 'सोमोऽभूद्ब्रह्मणोंऽशेन दत्तो विष्णोस्तु योगवित् । दूर्वासाः शङ्करस्यांश' इति वाक्ये चोक्तस्य तदंशस्य सिद्धिसम्भवात् तदर्थमुक्तविग्रहमाश्रित्योपचाराश्रयणं कृतमित्यवधेयम् ।

**वा०र०**— कस्तदात्मभाव इत्यनुव्याख्यानार्थ इत्यत आह **अत्र चेति** । **भागवते पत्नी मरीचेरिति** । चतुर्थस्य प्रथम इति शेषः । **पूर्वश्लोकेति** । अत्र पूर्वत्वं नाव्यवहितपूर्वत्वं विवक्षितम् । येन मध्ये 'पूर्णिमाऽसूत विरजां विश्वगां च परन्तप । देवकुल्या हरेः पादशौचाद्याभूत्सरिद्वरे'ति श्लोकस्य विद्यमानतया तदनुपपत्तिप्रसङ्गात् । किन्तु व्यवहिताव्यवहितसाधारण्येन पूर्वत्वमात्रम् । ततो न दोषः । यद्यपि तत्र प्रकृतेनेति मूलस्य पूर्णिमाऽसूतेत्यव्यवहितपूर्णिमासमुच्चयार्थत्वेन व्याख्याने यथा पूर्णिमाऽसूत तथैवानुसूयाऽपि पुत्रान् जज्ञ इत्यव्यवहितसमुच्चयलाभः तथाप्यस्मिन्पक्षे पत्नी अनसूया तथैव पुत्रान् दत्तादीन् जज्ञ इत्यविशिष्टे यथा पूर्णिमेत्यनेन भर्तृभार्यादिविशेषोक्त्यभावेन दृष्टान्तसमर्पणं भवति तथा प्रधानात्रिसन्ततिकथनपरवाक्ये प्रधानमरीचिरूपऋषिसन्ततिसमुच्चय एव स्वरसः । प्रधानऋषिपत्न्योरेव च समुच्चयश्च स्वरस इत्यतोऽपि व्यवहितमेवोपादेयमित्याशयेन तद्वाक्यमेवोदाहृतमिति ज्ञेयम् । अत्रानुव्याख्याने 'अनुसूया तथैवात्रेर्जज्ञे पुत्रानकल्मषानि'त्येव भागवते प्रथमार्धपाठः । 'अत्रेः पत्न्यनुसूया त्रीन् जज्ञे सुयशसः सुतानि'ति प्रथमार्धपाठस्तु कल्पित इति ज्ञापनाय अनुसूयेति पूर्वार्धोदाहरणम् । अन्यथा आत्मशब्दस्य भागवते प्रयोगोपपादनस्य दत्तदुर्वाससमित्युत्तरार्धमात्रोदाहरणेनापि सिद्ध्या तदुदाहरणानर्थक्यापातात् । अत एव 'तन्निष्ठस्ये'ति *सूत्रभाष्ये* दत्तमित्युत्तरार्धस्यैवोदाहरणम् । अन्वयस्पष्टत्वायात्राधिकोदाहरणमिति कल्पनेऽपि अस्मत्पक्ष एव प्रयोजनान्तरमेवैतद्भविष्यति । अत एव *प्रदीपे* दत्तमित्येतत्पूर्वार्धतयाऽनुसूयया तथैवात्रेरित्येतदेवोदाहृतम् । सम्मतं चैतन्मूलकारस्य । अनसूयेति भागवतवाक्य इत्यनुसूययोरेवानुव्याख्याने पाठस्योपादानात् । तथैवेति पदमुपादाय व्याख्यानाच्च । तस्य च पाठान्तरे अभावादिति ज्ञेयम् ।

**अकर्मत्वादिति** । उपलक्षणं चैतत् । स्वोत्पत्तिप्रतिपादनस्य च बाधिततया पुत्रान् जज्ञ इत्येव वक्तव्ये सतीत्यपि ज्ञेयम् । **अनेकार्थत्वादिति** । धातूनामनेकार्थत्वाज्जनिरेव ण्यर्थमप्यन्तर्भावयति । लक्षणया वा 'जनिरेव

ण्यर्थमप्यन्तर्भावयतीति योजना । अयमर्थः । यद्यपि जनिधातुरुत्पत्तिमभिधत्ते । तदुत्तरप्रत्ययश्चोत्पत्तिकर्तृत्वम् । न तूत्पत्तिकारयितृत्वम् । तथा सति प्रत्ययस्य जनके उत्पत्तिकर्तृताऽप्यर्थः । धातूनामनेकार्थत्वात् । 'प्रयोगतोऽवगन्तव्या अनेकार्था हि धातव' इत्येके । ततो जनिप्रकृतेरेवोत्पत्तिमदर्थतया तदुत्तरप्रत्ययेन जनिमत्कर्तृत्वलाभात् कर्तरि प्रत्ययोपपत्तिः । कुलालो घटं जनयामासेत्यत्र तथैव प्रतीतेः । कुलालस्य घटकर्तृता तु प्रसिद्धैव। घटं करोतीत्यनेन समानार्थं िि घटं जनयामासेत्यत एव न । तथा सति जनिकर्तृत्वमनसूयाया स्यात् । तस्या जनिकर्तृत्वात् । तथाच भोजयतीत्यादिहेतुमण्णिजन्तसाम्यापात इत्यपि निरस्तम् । अत्र प्रयोजककर्तरि णिजन्तत्वमनाश्रित्योत्पत्तिमदर्थत्वमेव धातोरित्याश्रित्य धनवन्तं करोतीत्यादिवच्छुद्धकर्तर्येव प्रत्ययाङ्गीकारात् । घटजनिकर्ता घटकर्तेत्यनयोरर्थभेदाभाव इत्यादेस्तदनन्यत्वमारम्भणशब्दादिभ्य इत्यधिकरणीय-'अनवस्थान्यथा हि स्यादि'त्येतद्व्याख्यानरूपप्राचीनमूले स्पष्टत्वाच्च । उक्तसृष्ट्याश्रयणमस्मिन्पक्षे भवतीत्यपरितोषादेव **लक्षणया वेति** पक्षान्तरमुक्तम् । तत्पक्षे तु जज्ञ इत्यस्य जनयामासेत्यन्तर्भूतार्थस्य लक्षणया लब्धे सति पुत्राः जज्ञिरे तान् प्रवर्तयतीति हेतुमण्णिजन्तस्य भोजयतीत्यादिवत्प्रयोजककर्तरि लकारोऽयमिति लभ्यत इति । अन्तर्भूतण्यर्थादित्यधिकरणीयमूलव्याख्यानावसरे ऋग्भाष्यटीकाव्याख्याने च लक्षणयेत्यादेरानुगुण्यं योज्यम् । ऋग्भाष्यटीकाश्लोकार्थोऽवलोक्यः । अत्र ण्यन्ताजनधातोः 'कास्प्रत्ययादामतन्त्रे लिटी'त्यनेन प्रत्ययान्तत्त्वादामि टिलोपे अस्तेरनुप्रयोगे एधामासेत्यादाविव जनयामासेति परस्मैपदम् । दत्तदूर्वाससोरात्मेशांशत्वेन तत्सम्भूतत्त्वेपि सोमस्य ब्रह्मानंशत्वात् ततः सम्भूतत्वायोग इत्याशङ्कानिवर्तकतया सह सम्भवतीति सम्भवा इत्येतदन्यथाख्यातिरस्थावतारोऽसाधुरिति सूचनाय प्रकारान्तरेणावतारयति **नन्विति** । तदीयव्याख्यानादेर्निराकरणं तु *वाक्यार्थविनोदे* द्रष्टव्यमित्याशयेनेह तदुक्तप्रकारनिराकरणाभावः ।

एवं प्रायोनुष्ठानं टीकाकृतः क्वचित् एवञ्जातीयकस्थले तदुक्तनिराकरणमप्यस्ति । एतत्स्थलीयवाक्यार्थविनोदे निक्षिप्यं किञ्चिदुच्यते । यदपि तथा च नायं सम्भवशब्दो रुढ्योत्पत्तिमात्रवाचकः किन्तु योगेन सहभूतत्ववाचकः । तच्चोक्तप्रमाणात्समित्यस्य साहित्यार्थता युक्तैवेति निरूप्य नन्वयं सहभूतत्वरूपो यौगिकार्थो यद्यपि सोमे सम्भवति, न दत्तदूर्वाससोस्तयोरात्मेशस्वरूपत्वादित्याशङ्कां चोच्छेद्य तत्परिहारायौपचारिकस्तत्र प्रयोग इति भावेनात्रेति वाक्यं प्रवृत्तमिति वर्णनम् । तदप्यसत् । पूर्वोत्तरविरोधात् । उत्पत्तिमात्रवाचको न भवतीति मात्रपदं प्रयुञ्जानेनात्रार्थद्वयमप्यभ्यनुज्ञाय दत्तदूर्वाससोरुत्पत्तिः सोमस्य तु सह भवनमिति व्यवस्था स्वीकृता भवति । तथा च दत्तदूर्वाससोः सहभूतत्वानुपपत्तिशङ्कोदयः कथं स्यात् । शङ्कां कुर्वाणो वा कथं पूर्वेण न विरुद्धभाषी स्यात् । किञ्च अत्रेरुत्पन्नयोरनयोरात्मेशसम्भूतत्वाङ्गीकारोऽपि न युक्त एव । तदङ्गीकारोऽपि दत्तदूर्वाससोः सह भूतत्वानुपपत्तिशङ्काया इव सम्भूतत्वानुपपत्तिशङ्काया अप्युभयार्थत्वं वदतोत्थापनीयतया तद्धर्मोऽन्ययोरिति टीकायाश्चोपलक्षणतया दत्तदूर्वाससोः धर्मोऽन्यस्येति व्याख्येयतया च तदुभयायोगश्च स्यात्। यद्यपि सम्भवशब्दस्येत्युत्तरग्रन्थानुत्थानापाताच्चेत्येतावान् द्रष्टव्यः । तदनन्तरं यच्च सम्भवशब्दस्येत्यादिग्रन्थः ।

प्रकृतमनुसरामः । **अत्रेरुत्पन्नत्वेनेति** । अत्रैव वाक्येऽनुसूया पुत्रानत्रेर्जनयामासेति प्रतिपादनावसरेऽत्रेः सकाशादुत्पत्तिः सिद्धा । तत्रैवात्मेशादिभ्य उत्पत्तिवचनं पूर्वविरोधान्न यथाश्रुतार्थमित्यात्मादिसम्भूतत्वाभाव-

सिद्धिः । तत्सम्भूतत्वप्रापकान्तरं तु नास्त्येव । विद्यमानत्वे वाऽत्र तदभिधानविरोधापादकतया व्यर्थत्वेन च अयुक्तमित्याशयः । **दत्तो विष्णोस्त्विति** । योगवित् । अणिमादिसंयोगज्ञः दत्तो विष्णोरंश इति वक्ष्यमाणेनान्वयः । **इति भागवतेति** । अत्रिसन्तत्युपसंहाररूपोक्ताध्यायगतभागवतेत्यर्थः । सोमस्त्विति मूलपाठात् तथैव प्रतीकोपादानं तु शब्दाभावे वा तदर्थान्तर्भाविन व्याख्यानं कर्तव्यमित्याशयेन वा **सोमोऽभूदिति** । दत्तो विष्णोस्त्वित्येतत्पादस्यायं पाद इति ज्ञेयम् । **तात्पर्येति** । भागवततात्पर्येत्यर्थः । शङ्करस्यांश इतिवद्ब्रह्मणोंश इत्यनुक्त्वांशेनेति तृतीया प्रायेण ब्रह्मणः अंशेन सहाभूत् । ब्रह्मणः सन्निधानस्यान्यत्रापि सत्त्वे विशेषतः सन्निधानमेवार्थ इति योजना तात्पर्यकृतोऽभिप्रेतेति स्पष्टत्वान्नोक्तम् । **उपचारादपि प्रयोग इति** । अन्यत्रादृष्टेरिति शङ्काशयः । **यौगिकत्वेऽपीति** । तदङ्गीकारपक्षेऽपीत्यर्थः । **एतद्वाक्यबलेनांशत्वासिद्धेरिति** । अनेन वाक्येन अत्रेरुत्पत्तिकथनावसरे दत्तादीनामात्मेशेत्यनेनांशत्वादिकं स्वरूपादिज्ञापनाय प्रतिपाद्यते । अन्यथा तदभिधानवैयर्थ्यम् । तच्चांशत्वप्रतिपादनं तेभ्यः सम्भूता इत्यर्थाश्रयण एव भवतीति द्वन्द्वगर्भतत्पुरुषाश्रयणमेव कार्यमित्यर्थः । 'ननु कथं तदङ्गीकारस्तत्राप्यंशत्वालाभसाम्यादित्यतस्तेभ्यः सम्भवन्तीति सम्भवाः सम्भूता इति आत्मादीनामवधित्वोक्तिमात्रेणोपचरितसहभावोऽप्यंशत्व एव पर्यवसन्न इति सत्येव समाधाने लक्षणाप्रयोजनतया तल्लाभं दर्शयितुं प्रनाडिकामाह **उक्तसमासाश्रयणेति** । "ब्रह्मस्थश्चैव रुद्रस्थः स्वयं चापि हरिः प्रभुः । प्रजां त्रिपुरुषसमां यच्छत्वित्यत्रिरैच्छत ॥ तस्मात्स ब्रह्मरुद्राभ्यां सह विष्णुर्जगत्पतिः । आगत्य तु त्रिमूर्त्यंशान् पुत्रान् प्रादाज्जनार्दनः ॥" इति स्पष्टमंशपदप्रयोगोऽप्यत्र द्रष्टव्यः ।

**स०व्र०— अत्रेति** । **दत्तो** विष्णुः, **दुर्वासाः** शिव इति सम्बन्धः । नन्वेवं दत्तदुर्वाससोरेव विष्णुशिवरूपत्वे तत्सहभूतत्वाभावेन सम्भवशब्दानुपपत्तिरित्यत आह **तद्धर्म इति** । सोमधर्मः सहभाव इति शेषः । **अन्ययोः** दत्तदुर्वाससोः ॥ **छत्रिण इति** । छत्र्यच्छत्रिसमुदाये छत्रिपदस्येव सहभूतासहभूतसमुदाये सहभूतशब्दस्याप्युपपत्तेरिति भावः । ननु किमर्थं लक्षणाश्रयणम् । न च दत्तदुर्वाससो सहभूतत्वाभावेन सम्भवशब्दार्थस्तत्र नेति लक्षणाश्रयणम् । आत्मा चेशश्च ब्रह्मसम्भवश्चेत्येवं यथास्थितव्याख्यानपरित्यागे कारणाभावादिति चेत् न, 'तस्मात्स ब्रह्मरुद्राभ्यां सह विष्णुर्जगत्पतिः । आगत्य तु त्रिमूर्त्यंशान् पुत्रान् प्रादाज्जनार्दन' इति प्रमाणानुसारेणैवं व्याख्यातत्वात् ।

**॥ इति आत्मशब्दवाच्यः विष्णुरेव ॥**

* * *

**॥ अथ सज्जनैः विष्णुः आत्मत्वेन ज्ञातव्यः, उपास्यः, ध्येयश्च ॥**

**७ सु०— अस्त्वात्मशब्दो विष्णुपरस्तथाऽपि कः सूत्रार्थ इत्यत आत्मेतीति प्रतिज्ञांशं व्याख्याति(चष्टे) तस्मादिति ।**

## अनु०— तस्मादुपास्यो विष्णुरिति ज्ञातव्यः सज्जनैः सदा ।

यस्मादात्मशब्दो विष्णुपरस्तस्मात् । अयं प्रतिज्ञार्थः । आत्मा **विष्णुः** आत्मेति **सज्जनैः सदा ज्ञातव्यः उपास्यो** ध्येयश्च ।

हेत्वंशं व्याचष्टे **तथैवेति** ।

## तथैवोपासते सन्तस्तथैवोपदिशन्ति च ।

**अनेनात्म(त्मेति)शब्दस्याऽऽवृत्तिः तुशब्दश्चावधारणार्थ इत्युक्तं भवति । सतामेवोपासनोपदेशौ भाष्योदाहृताभ्यां श्रुतिभ्यां सिद्धौ । उपगच्छन्तीत्येतज्ज्ञानार्थमुपासनार्थं च । तत्र ज्ञानार्थत्वं स्पष्टमित्येक एवार्थो व्याख्यातः । अत एव प्राक् ज्ञातव्य उपास्यश्च इत्युक्तम् ।**

**परि०— प्रतिज्ञांशमिति** । आत्मेत्यंशमित्यर्थः । मूलं व्यत्यासेन योजयति **ज्ञातव्य इति** ॥ **ध्येयश्चेति** । सूत्रे शेषोक्तिरियम् ॥ **हेत्वंशमिति** । उपगच्छन्तीत्याद्यंशम् ।

**यादु०— अयं प्रतिज्ञार्थ इति** । इत्ययं प्रतिज्ञार्थ इत्यन्वयः । मूले शेषोक्तिः । अन्यथा तस्मादित्यस्य साध्याप्रतीत्या ॥ **स्पष्टमिति** । गत्यर्थानां ज्ञानार्थत्वादिति भावः ।

**कं०रा०—** 'आत्मा विष्णुरात्मेतीति सौत्र आत्मशब्द आवर्तनीयः' तथा च आत्मा विष्णुरात्मा इति सज्जनैः सदा ज्ञातव्यः । **उपास्यो ध्येयश्चेति** प्रतिज्ञार्थ इति भावः ।

**अनेनात्मेतिशब्दस्येति** । तथैव 'आत्मेत्येव सन्त उपासते तथैव आत्मेत्येवोपदिशन्ति चे'ति हेत्वंशव्याख्यानेन आत्मेतिशब्दस्यावृत्तिः तुशब्दश्चावधारणार्थ इत्युक्तं भवतीत्यर्थः । उपलक्षणमेतत् । अवधारणार्थ तुशब्दस्याप्यावृत्तिरुक्ता भवतीत्यपि द्रष्टव्यम् ॥ **सतामिति** । सतामात्मेत्युपासनोपदेशौ 'नान्यं विचिन्तये आत्मानमेवाहं विजानीयामात्मानमुपासे आत्मा हि ममैष भवति, 'आत्मेत्येवोपास्स्व आत्मेत्येव विजानीहि नान्यं कञ्चन विजानीहि आत्मा ह्येवैष भवती'ति भाष्योदाहृताभ्यां सिद्धावित्यर्थः ॥ **एक एवेति** । उपगच्छन्तीत्यस्य तथैवोपासते सन्त इत्येक एवार्थो व्याख्यात इत्यर्थः ॥ **अत एवेति** । उपगच्छन्तीत्यस्य ज्ञानोपदेशोभयार्थत्वादेव प्राक् प्रतिज्ञाव्याख्यानावसरे 'विष्णुरात्मेति ज्ञातव्यः उपास्यश्चे'त्युक्तमित्यर्थः ।

**शे०चं०—** तस्मादित्यस्य यस्मादित्येतत्सापेक्षत्वात् 'तस्मादात्मा जनार्दन' इति पूर्ववाक्यार्थमेव हेतुतया अनुवदन् प्रतिज्ञाव्याख्यानपरतया भाष्यं योजयति **यस्मादित्यादि** । तस्मादित्यस्योपास्य इत्याद्युत्तरेण

हेतुतया अन्वयानुपपत्तेर्योग्यं साध्यमध्याहरति **अयं प्रतिज्ञार्थ इति** । आत्मेतीति सौत्रप्रतिज्ञार्थ इत्यर्थः । तमेवोपदर्शयति **आत्मेति सज्जनैः सदा ज्ञातव्य इत्यादि** । यद्यपि कर्मणः उक्तत्वेऽपि कर्तुरनुक्तत्वादनभिहिते कर्तरि कर्तृकरणयोस्तृतीयेति प्राप्तायास्तृतीयाया बाधेन 'कर्तृकर्मणोः कृती'ति नित्यं प्राप्तया षष्ठ्या सज्जनाना-मिति षष्ठ्या भवितव्यम् । तथाऽपि नित्यप्राप्ताया अपि कृद्योगलक्षणषष्ठ्या विकल्पार्थप्रवृत्ते 'कृत्यानां कर्तरि वे'ति सूत्रे कृद्योगे कर्तरि तृतीयाषष्ठ्योरुभयोरप्यभ्यनुज्ञानात् पक्षे तृतीयोपपत्तिरिति ज्ञेयम् । उपास्य इत्यस्यैव विवरणं **ध्येय इति** । आत्मेतीति प्रतिज्ञांशस्य प्राग्व्याख्याततत्वेन तदर्थत्वासम्भवात् तथैवेति भाष्यखण्डस्य असूत्रार्थकथनरूपतया प्रसक्ताभाष्यत्वशङ्कां तस्य सौत्र-'आत्मेति त्वि'ति हेतुशरीरप्रविष्टपदव्याख्यानतोपदर्शनेन परिहरति **अनेनेति** ॥ **भाष्योदाहृताभ्यामिति** । 'नान्यं विचिन्तय आत्मानमेवाहं विजानीयां आत्मानमुपासे', 'आत्मेत्येवोपास्व आत्मेत्येव विजानीहि' इत्यादिश्रुतिभ्यामित्यर्थः । उपासत इत्यादिभाष्यानुसारेणोपगच्छन्तीति सौत्रपदस्योपासनामात्रार्थत्वभ्रान्तिं परिहरति **उपगच्छन्तीत्येतदिति** । तर्ह्युपासनस्येव ज्ञानस्यापि तदर्थतया भाष्ये वक्तव्यत्वान्नोपासनमात्रस्य तदर्थतयोक्तिर्युक्तेत्यतस्तदनुक्तेर्निमित्तं सूचयन्नेवैकार्थोक्तिं समर्थयते **तत्रेति** ॥ **स्पष्टमिति** । गत्यर्थानां ज्ञानार्थत्वादिति भावः । किमेवं क्लिष्टकल्पनया उपासत इति भाष्यस्वारस्यानुरोधेनोप-गच्छन्तीति सौत्रपदस्योपासनामात्रार्थत्वमेव भाष्यकृत्सम्मतं किं न स्यादित्यतोऽर्थद्वयस्य भाष्यकृत्सम्मतता-मुपदर्शयति **अत एवेति** । सौत्रपदस्योपगच्छन्तीतिपदस्य ज्ञानोपासनरूपोभयार्थतायाः सम्मतत्वादेवेत्यर्थः ।

**वा०र०**— सज्जनैर्ज्ञातव्य इत्यादीत्यादिपदेनोपास्य इत्येतस्य परिग्रहः । अत एव सामान्येन कर्मणो वचनाभिधानं यद्यपीति ग्रन्थे । ततश्च ज्ञातव्य इत्यादिपदद्वयेन उक्तत्वेऽपीत्यर्थः । एतत्स्थलं .........पादीय इत्यनुव्याख्यानमूलटीकाप्रपञ्चावसरे विचारितप्रायम् । तत एव प्रतिपत्तव्यम् । **षष्ठ्येति** । षष्ठ्यां सत्यामित्यर्थः। **षष्ठ्येति** । षष्ठ्यन्तप्रयोगेणेत्यर्थः । अनेन धान्येन धनवानयमित्यादाविव षष्ठीप्रयुक्तत्वषष्ठ्या इति च । षष्ठ्ये-त्येतद्द्वितीयस्याभावेन पाठस्तु स्वरस एव । तथैवोपासत इत्यत्र तथैवेत्यस्यात्मत्वेनेति व्याख्यानमभिप्रेत्य **तथैव इति भाष्यखण्डस्येत्युक्तम्** । सौत्रात्मा त्विति हेतुशरीरेति पाठः । आत्मतुशब्दयोरेव व्याख्यानात् । **हेतु-शरीरप्रविष्टेति** । आवृत्त्याश्रयणाद्धेतुशरीरप्रविष्टमिति ज्ञेयम् । आत्मानमेवाहं विजानीयामिति श्रुतिपाठः ।

**स०व्र०**— उपासां इत्यस्य व्याख्यानं **ध्येय इति** ॥ **भाष्योदाहृताभ्यामिति** । 'आत्मेत्येवोपास्वे'-त्यादिश्रुतिभ्यामित्यर्थः ।

**॥ इति सज्जनैः विष्णुः आत्मत्वेन ज्ञातव्यः, उपास्यः, ध्येयश्च ॥**

* * *

**॥ अथ आत्मशब्दः स्वाम्यर्थकः ॥**

८ **सु०— नन्वनेन विष्णुर्विष्णुरित्युपास्य इत्युक्तं भवति । ततश्च किमनेन कृतं स्यात् । न ह्यविष्णुत्वेनोपास्तिरत्र प्रसक्तेत्यत आह आदानेति ।**

## अनु०— आदानार्थत्वतश्चायमात्मशब्दः पतिं वदेत् ।

अयं सूत्रगत **आत्मशब्दः पतिं च वदेत्** । कथम् । **आदानार्थत्वत** आदानकर्तृत्वार्थत्वात् । आङ्पूर्वात् दाञः आतो मनिन्निति मनिन् प्रत्ययः आकारलोपो दस्य तश्च निर्वचनत्वात् । तथाच उक्तं 'यच्चाप्नोति यदादत्त' इत्यादि । पतिर्हि स्वीयतया भृत्यानादत्ते ।

**परि०— आतो मनिन्निति** । 'आतो मनिन्क्वनिब्वनिपश्चे'ति सूत्रेणेत्यर्थः । आकारलोपतकारौ केनेत्यतो निरुक्तिरूपप्रमाणादिति भावेन आह **निर्वचनादिति** ॥ **यच्चेति** । 'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य सन्ततो भावस्तस्मादात्मेति भण्यते' इति वाक्यशेषः ।

**यादु०— आतो मनिनिति** । 'आतो मनिन्क्वनिब्वनिपश्चे'ति सूत्रेणेत्यर्थः । सुपि उपपदे वा आकारान्तेभ्यः धातुभ्यः छन्दसि विषये मनिन्क्वनिब्वनिपश्चेति एते प्रत्यया भवन्तीति सूत्रार्थः । अश्वकामा सुपीवेत्याद्युदाहरणम् । **आकारलोप इति** । डुदाञ् दाने धात्वाकारलोप इति भावः । ननु प्रामाणिकेष्वेव निर्वचनेषु वर्णलोपादिकं विहितं न स्वेच्छाकल्पितेष्वित्याशङ्कायां इदमपि निर्वचनं प्रामाणिकमेवेत्याह **तथाच उक्तमिति** ।

**कं०रा०— आङ् पूर्वात् दाञ इति** । आङ् पूर्वात् डुदाञ् दान इत्यस्मात् 'आतो मनिन्क्वनिब्वनिपश्चे'ति मनिन्प्रत्यय इत्यर्थः । ननु दाञो मनिन्प्रत्यये 'हलन्त्यमि'ति नकारस्येत्संज्ञायां लोपे इकारस्योपदेशेऽनुनासिक इदि'तीत्संज्ञायां लोपे च धात्वाकारदकारयोः सतोः आत्मेति रूपनिष्पत्तिः कथमित्यत आह **अकारलोप इति** ॥ **निर्वचनत्वादिति** । 'वर्णागमो वर्णविपर्ययश्च तथा परौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तमि'त्युक्तत्वात् आकारलोपादिकं युक्तमिति भावः ॥ **यच्चाप्नोतीति** । 'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य सन्ततो भावस्तस्मादात्मेति भण्यत' इत्यात्मशब्दार्थनिर्वचनं कृतमिति भावः ।

**शे०चं०—** 'आदानार्थत्वतश्चे'ति चशब्दस्य हेत्वन्तरानुक्तितदसम्भवाभ्यां वैयर्थ्यविरुद्धार्थत्वप्राप्त्या यथाश्रुतसम्बन्धानुपपत्तेर्भिन्नक्रमतया तं योजयति **पतिं चेति** । कर्तृत्वार्थकमनिन्प्रत्ययस्य आत्मशब्दस्यादानकर्तृत्वार्थकत्वेऽप्यादानार्थत्वाभावाद्भाष्यानुपपत्तिमाशङ्क्य परिहरति **आदानकर्तृत्वार्थत्वादिति** । एतदेव प्रकृतिप्रत्यययोर्विभागोपदर्शनेनोपपादयति **आङ्पूर्वादिति** । नन्वेवं आदामेति भवितव्यम् । आत्मेति तु कथमित्यत आह **आकारेति** । ननु लोपादिप्रापकस्य शास्त्रस्याभावात् कथं तदित्यत आह **निर्वचनत्वादिति** । पृषोदरादित्वादित्यर्थः । नन्वेवं सर्वत्रापि लोपादिप्राप्त्या अतिप्रसङ्ग इत्यतोऽस्य न्यायस्य प्रामाणिकनिर्वचनविषयत्वान्नातिप्रसङ्ग इति भावेन प्रकृतनिर्वचनस्य लोपादिप्रसञ्जकस्य प्रामाणिकत्वं दर्शयति **तथाच उक्तमिति** । आदानकर्तृत्वार्थकत्वेऽप्यात्मशब्दस्य कथं पतित्वस्य तेन लाभ इत्यत आह **पतिर्हीति** ।

**वा०र०**— आतत्वाद्यर्थत्वस्यान्यत्रोक्तस्य विवक्षया समुच्चयः सम्भवतीति नानुक्तिप्रयुक्तवैयर्थ्यमित्यत उक्तं **तदसम्भवाभ्यामिति** । व्याप्त्याद्यर्थत्वे प्रकृतपतित्वाप्राप्तेः व्याप्त्याद्यर्थकत्वस्य पतिवाचकत्वोपपादकत्वाभावेन तस्य पतिवाचकत्वेन सम्बन्धाभावाद्व्याप्त्यादिवाचकत्वसाधकतया पतिरूपार्थातिरिक्तार्थान्तरवाचकत्वेनैव सम्बन्धाच्च प्रकृताननुगुणत्वरूपं विरुद्धार्थत्वमित्यत्र तात्पर्यमिति न प्रकारान्तरेण विरुद्धत्वोपपादनायोगशङ्कावकाश इति ज्ञेयम् । आदानकर्तृत्वार्थकत्वेऽपीति पाठः । अन्यादृशो लेखकप्रमादात् । **आदामेतीति** । दाञ्धातोरालोपस्य विधायकाभावेनायोगादिति भावः । **पृषोदरादित्वादिति** । 'पृषोदरादीनि यथोपदिष्टमि'ति सूत्रीयवर्णागम इति सङ्ग्रहश्लोके वर्णनाशस्यापि प्रतिपादनादिति भावः ।

**॥ इति आत्मशब्दः स्वाम्यर्थकः ॥**

* * *

**॥ अथ स्वामित्वेन उपासने प्रमाणोक्तिः ॥**

९ **सु०**— ततः किमित्यतः सूत्रार्थं विवृणोति **स्वामीति** ।

## अनु०— स्वामी मे विष्णुरित्येव नित्यदोपास्यमञ्जसा ।

**अत्र सूत्रे द्वावात्मशब्दौ । एकोऽनुवादार्थो द्वितीयो विध्यर्थः । आत्मात्मेत्युपास इति द्वावपि विष्णुविषयौ । तत्राद्योऽविवक्षितावयवार्थः संज्ञात्वेन वर्तते । द्वितीयो विवक्षितावयवार्थः स्वामिनं वदति । तथाच आत्मा विष्णुः आत्मेति स्वामीत्युपास्य इति सूत्रार्थो भवतीत्यर्थः । अञ्जसा परमादरेण ।**

**शे०चं०**— **सूत्रार्थमिति** । सौत्रप्रतिज्ञार्थमित्यर्थः । सूत्रे आत्मेतीत्येव श्रवणात् 'स्वामी विष्णुः' इत्यस्यासूत्रार्थत्वभ्रान्तिनिवारणाय तद्व्याख्येयभेदं दर्शयति **अत्रेति** । सूत्रे त्वेकेनैव चरितार्थत्वात् किं द्वाभ्यामित्यत आह **एक इति** । अनुवादविधिप्रकारमेव दर्शयति **आत्मेत्यादि** । शब्दभेदेऽर्थभेदनियमात् आत्मशब्दद्वयस्य सूत्रान्तर्भावे अर्थभेदोऽपि स्यादित्यत आह **द्वावपीति** । एवं तर्हि पौनरुक्त्यमित्यत आह **तत्राद्य इति**। सौत्रात्मादिपदार्थमुक्त्वा वाक्यार्थमाह **तथा चेति** । **सूत्रार्थः** सौत्रप्रतिज्ञार्थ इत्यर्थः ।

**वा०र०**— सूत्रेऽप्येकेनैवेति पाठः । अन्यादृशो लेखकप्रमादात् । अनुवादविधीति पाठः । **अर्थभेदनियमादिति** । अर्थभूतवस्तुभेदनियमादित्यर्थः । **तत्राद्य इतीति** । 'परि यदिन्द्र रोदसी' इत्यत्रेन्द्रशब्दद्वयवदिति योज्यम् ।

* * *

१० **सु०— नन्वेतदानन्दादयः प्रधानस्येत्यनेनैव गतम् । सत्यम् । सर्वथोपास्यत्वस्य ज्ञापनाय पुनर्वचनम् । तदिदमुक्तं नित्यदैवाञ्जसेति ।**

**यादु०— आनन्दादय इत्यनेनेति** । तत्र 'सत्यो ज्ञानः परमानन्दरूपः आत्मेत्येवं नित्यदोपासनं स्यादि'त्यात्मत्वेन ह्युपासनस्यापि कर्तव्यताया उक्तत्वादिति भावः ॥ ४-१-२ ॥

**कं०रा०— नित्यदैवाञ्जसेतीति** । 'सर्वैकान्यकिंयत्तदः काले दा' इति सूत्रे काले देति योगविभागः कर्तव्यः । 'इति सम्प्रार्थितो देवैर्विधिहीनोऽपि नित्यदे'त्यादौ नित्यदाशब्दप्रयोगदर्शनात् । तथाच नित्यशब्दात् दाप्रत्यये नित्यदेति रूपमिति भावः । यद्यपि 'एवमुत्तरत्रापि द्रष्टव्यमि'ति पूर्वाधिकरण एव 'आनन्दादयः प्रधानस्ये'त्यनेन एतदधिकरणस्य गतार्थत्वशङ्कायां परिहार उक्तः तथाऽप्यत्र आचार्यैर्वक्ष्यमाण एव परिहारः प्रसङ्गात् टीकाकारैः तत्रोक्तः इति न दोषः ।

**शे०चं०— गतमिति** । तत्रानन्दादेर्मोक्षार्थतयोपास्यत्वसमर्थनात् । स्वामित्वापरपर्यायस्य आत्मत्वस्य आनन्दादिचतुष्टयान्तर्भूतत्वेन तत्रैवोपास्यत्वसिद्धेरिति भावः ॥ मूले **नित्यदैवेति** । यद्यपि सर्वदा एकदा अन्यदा यदा कदेति सर्वादिभ्य एव 'सर्वैकान्यकिंयत्तदः काले दे'ति काले वाच्ये दाप्रत्ययोऽभिहितो न तु नित्यशब्दादपि । तथाऽपि काले देति योगविभागमाश्रित्य नित्यदेति प्रयुक्तमित्यवधेयम् ।

**॥ इति स्वामित्वेन उपासने प्रमाणोक्तिः ॥**

* * *

११ **सु०— अस्य सर्वथोपास्यत्वे किं प्रमाणमित्यत आह स्वामीति ।**

**अनु०— स्वामी विष्णुरिति ध्यानं विशेषणविशेष्यतः ।**
**कर्तव्यं सर्वथैवैतन्न कथञ्चन विस्मरेत् ।**
**इति सत्तत्त्ववचनं षाड्गुण्यवचनं परम् ।**
**मम स्वामी हरिर्नित्यं सर्वस्य पतिरेव च ।**
**इति ध्येयः सर्वदैव भगवान् विष्णुरव्ययः ॥**

**विशेषणविशेष्यत** इति स्वामित्वं विशेषणं विष्णुर्विशेष्य इति विशेषणविशेष्यभावेन एव । न तु तटस्थं स्वामित्वं निर्गुणस्य विष्णोरुपलक्षणमित्येवमित्यर्थः । **कथञ्चन**

**वा०र०**— आतत्वाद्यर्थत्वस्यान्यत्रोक्तस्य विवक्षया समुच्चयः सम्भवतीति नानुक्तिप्रयुक्तवैयर्थ्यमित्यत उक्तं **तदसम्भवाभ्यामिति** । व्याप्त्याद्यर्थत्वे प्रकृतपतित्वाप्राप्तेः व्याप्त्याद्यर्थकत्वस्य पतिवाचकत्वोपपादकत्वाभावेन तस्य पतिवाचकत्वेन सम्बन्धाभावाद्व्याप्त्यादिवाचकत्वसाधकतया पतिरूपार्थातिरिक्तार्थान्तरवाचकत्वेनैव सम्बन्धाच्च प्रकृताननुगुणत्वरूपं विरुद्धार्थत्वमित्यत्र तात्पर्यमिति न प्रकारान्तरेण विरुद्धत्वोपपादनायोगशङ्कावकाश इति ज्ञेयम् । आदानकर्तृत्वार्थकत्वेऽपीति पाठः । अन्यादृशो लेखकप्रमादात् । **आदामेतीति** । दाञ्धातोरालोपस्य विधायकाभावेनायोगादिति भावः । **पृषोदरादित्वादिति** । 'पृषोदरादीनि यथोपदिष्टमि'ति सूत्रीयवर्णागम इति सङ्ग्रहश्लोके वर्णनाशस्यापि प्रतिपादनादिति भावः ।

**॥ इति आत्मशब्दः स्वाम्यर्थकः ॥**

* * *

**॥ अथ स्वामित्वेन उपासने प्रमाणोक्तिः ॥**

९ **सु०**— ततः किमित्यतः सूत्रार्थं विवृणोति **स्वामीति** ।

## अनु०— स्वामी मे विष्णुरित्येव नित्यदोपास्यमञ्जसा ।

अत्र सूत्रे द्वावात्मशब्दौ । एकोऽनुवादार्थो द्वितीयो विध्यर्थः । आत्मात्मेत्युपास इति द्वावपि विष्णुविषयौ । तत्राद्योऽविवक्षितावयवार्थः संज्ञात्वेन वर्तते । द्वितीयो विवक्षितावयवार्थः स्वामिनं वदति । तथाच आत्मा विष्णुः आत्मेति **स्वामीत्युपास्य** इति सूत्रार्थो भवतीत्यर्थः । **अञ्जसा** परमादरेण ।

**शे०चं०**— **सूत्रार्थमिति** । सौत्रप्रतिज्ञार्थमित्यर्थः । सूत्रे आत्मेतीत्येव श्रवणात् 'स्वामी विष्णुः' इत्यस्यासूत्रार्थत्वभ्रान्तिनिवारणाय तद्व्याख्येयभेदं दर्शयति **अत्रेति** । सूत्रे त्वेकेनैव चरितार्थत्वात् किं द्वाभ्यामित्यत आह **एक इति** । अनुवादविधिप्रकारमेव दर्शयति **आत्मेत्यादि** । शब्दभेदेऽर्थभेदनियमात् आत्मशब्दद्वयस्य सूत्रान्तभवि अर्थभेदोऽपि स्यादित्यत आह **द्वावपीति** । एवं तर्हि पौनरुक्त्यमित्यत आह **तत्राद्य इति**। सौत्रात्मादिपदार्थमुक्त्वा वाक्यार्थमाह **तथा चेति** । **सूत्रार्थः** सौत्रप्रतिज्ञार्थ इत्यर्थः ।

**वा०र०**— सूत्रेऽप्येकेनैवेति पाठः । अन्यादृशो लेखकप्रमादात् । अनुवादविधीति पाठः । **अर्थभेदनियमादिति** । अर्थभूतवस्तुभेदनियमादित्यर्थः । **तत्राद्य इतीति** । 'परि यदिन्द्र रोदसी' इत्यत्रेन्द्रशब्दद्वयवदिति योज्यम् ।

* * *

१० **सु०— नन्वेतदानन्दादयः प्रधानस्येत्यनेनैव गतम् । सत्यम् । सर्वथोपास्यत्वस्य ज्ञापनाय पुनर्वचनम् । तदिदमुक्तं नित्यदैवाञ्जसेति ।**

**यादु०— आनन्दादय इत्यनेनेति** । तत्र 'सत्यो ज्ञानः परमानन्दरूपः आत्मेत्येवं नित्यदोपासनं स्यादि'त्यात्मत्वेन ह्युपासनस्यापि कर्तव्यताया उक्तत्वादिति भावः ॥ ४-१-२ ॥

**कं०रा०— नित्यदैवाञ्जसेतीति** । 'सर्वैकान्यकिंयत्तदः काले दा' इति सूत्रे काले देति योगविभागः कर्तव्यः । 'इति सम्प्रार्थितो देवैर्विधिहीनोऽपि नित्यदे'त्यादौ नित्यदाशब्दप्रयोगदर्शनात् । तथाच नित्यशब्दात् दाप्रत्यये नित्यदेति रूपमिति भावः । यद्यपि 'एवमुत्तरत्रापि द्रष्टव्यमि'ति पूर्वाधिकरण एव 'आनन्दादयः प्रधानस्ये'त्यनेन एतदधिकरणस्य गतार्थत्वशङ्कायां परिहार उक्तः तथाऽप्यत्र आचार्यैर्वक्ष्यमाण एव परिहारः प्रसङ्गात् टीकाकारैः तत्रोक्तः इति न दोषः ।

**शे०चं०— गतमिति** । तत्रानन्दादेर्मोक्षार्थतयोपास्यत्वसमर्थनात् । स्वामित्वापरपर्यायस्य आत्मत्वस्य आनन्दादिचतुष्टयान्तर्भूतत्वेन तत्रैवोपास्यत्वसिद्धेरिति भावः ॥ मूले **नित्यदैवेति** । यद्यपि सर्वदा एकदा अन्यदा यदा कदेति सर्वादिभ्य एव 'सर्वैकान्यकिंयत्तदः काले दे'ति काले वाच्ये दाप्रत्ययोऽभिहितो न तु नित्यशब्दादपि । तथाऽपि काले देति योगविभागमाश्रित्य नित्यदेति प्रयुक्तमित्यवधेयम् ।

**॥ इति स्वामित्वेन उपासने प्रमाणोक्तिः ॥**

* * *

११ **सु०— अस्य सर्वथोपास्यत्वे किं प्रमाणमित्यत आह स्वामीति ।**

अनु०— स्वामी विष्णुरिति ध्यानं विशेषणविशेष्यतः ।
कर्तव्यं सर्वथैवैतन्न कथञ्चन विस्मरेत् ।
इति सत्तत्त्ववचनं षाड्गुण्यवचनं परम् ।
मम स्वामी हरिर्नित्यं सर्वस्य पतिरेव च ।
इति ध्येयः सर्वदैव भगवान् विष्णुरव्ययः ॥

**विशेषणविशेष्यत** इति स्वामित्वं विशेषणं विष्णुर्विशेष्य इति विशेषणविशेष्यभावेन एव । न तु तटस्थं स्वामित्वं निर्गुणस्य विष्णोरुपलक्षणमित्येवमित्यर्थः । **कथञ्चन**

आधिव्याधिसत्त्वेऽपि । **परम्** उपरितनम् । मम स्वामीत्यनेन प्रसक्तमल्पत्वं निवारयति **सर्वस्येति** ॥ ४-१-२ ॥

**परि०— आधिव्याधीति** । **आधिः** मानसी व्यथा । **व्याधिः** ज्वरादिदेहपीडा ॥ **परं उपरितनमिति** । अनुपदमुदाहरिष्यमाणमित्यर्थः ॥ ४-१-२ ॥

**वं०प०— विशेषणमिति** । सार्वकालिकमित्यर्थः ॥ **तटस्थेति** । कादाचित्केत्यर्थः ॥ ४-१-२ ॥

**कं०रा०— मम स्वामीत्यनेनेति** । 'मम स्वामी हरिरि'ति हरेरल्पाधिपत्योक्त्या यदल्पत्वं प्रसक्तं तन्निवारयति 'सर्वस्य पतिरि'त्यनेनेत्यर्थः ॥ ४-१-२ ॥

**शे०चं०— विशेषणविशेष्यभावेनेति** । अनेन मूले विशेषणविशेष्येति भावप्रधानो निर्देश आद्यादित्वात् प्रकारार्थकतृतीयान्तात्तसिरित्युक्तं भवति । विशेषणविशेष्यत इत्येतद्व्यावर्त्यमाह **न त्विति** ॥४-१-२॥

**वा०र०—** सत्तत्त्ववचनापेक्षया षाड्गुण्यवचनस्योत्तमत्वं परशब्देनोच्यत इति प्रतीतिनिरासायाह मूले **परमुपरितनमिति** । वक्ष्यमाणमित्यर्थः । मम स्वामीति तस्योपर्यभिधानात् विष्णुरव्यय इति षाड्गुण्यवचनमिति सम्बन्धो ज्ञेय इति मूले स्पष्टत्वान्नोक्तम् ॥

***॥ इति आत्मोपगमाधिकरणम् ॥***

* * *

## ॥ अथ प्रतीकाधिकरणम् ॥

**॥ अथ प्रतीकानां ब्रह्मत्वेनोपासनप्रतिषेधः ॥**

### ब्र०सू०— ॐ न प्रतीके न हि सः ॐ ॥

१२ **सु०—** 'मनो ब्रह्मेत्युपासीते'त्यादिश्रुतिप्राप्तं मनःप्रभृतिप्रतीकानां ब्रह्मत्वेनोपासनमत्र प्रतिषिध्यते । तत्र प्रतीक इत्यधिकरणसप्तमीति प्रतीतिः स्यात् । प्रतीकाधिकरणस्य च उपासनं ब्रह्मणो युक्तमेव । अतोऽन्यथा प्रतिज्ञां व्याख्याति **प्रतीकेति** ।

**अनु०— प्रतीकविषयत्वेन न कार्या विष्णुभावना ।**

इत्थम्भूतलक्षणे तृतीया । इदं मनआदिकं विष्णुरित्येवंरूपोपासना **न कार्येत्यर्थः** । न हि स इति हेतुं व्याचष्टे **प्रतीकमिति** ।

**प्रतीकं नैव विष्णुर्यत्**

**यत्** यस्मात्, **प्रतीकं** ब्रह्मणः प्रतिमात्मकं, मनःप्रभृति, स **विष्णुः नैव** तस्मादिति पूर्वेणान्वयः । नन्वसङ्गतोऽयं हेतुः । प्रतीकस्य विष्णोश्चाभेदाभावो ह्यभेदस्य तत्प्रमितेश्च निवारको न त्वभेदभावनामात्रस्येत्यत आह **मिथ्येति** ।

**मिथ्योपासा ह्यनर्थदा ।**

न हि स विष्णुः प्रतीकम् । अतस्तयोरभेदभावना **मिथ्योपासना** । सा चानर्थस्यैव हेतुः । अतो न कर्तव्येत्येवं हेतुहेतुमद्भावः सूत्रकृतोऽभिप्रेतो न पुनः साक्षात् अतो न असङ्गतिः ।

**परि०**— व्याख्याने बीजमाह **तत्र प्रतीक इति** । अन्यथाप्रतिपत्तिप्रदर्शनायैव प्रागधिकरणप्रतिपाद्योक्तिः । कर्त्राद्यर्थत्वायोगादाह **इत्थम्भूतलक्षणे तृतीयेति** । प्रतीकविषयत्वप्रकारं प्राप्ता भावनेतीयं तृतीया भावनायां प्रतीकविषयत्वप्रकारप्राप्तिं लक्षयति ज्ञापयतीत्यर्थः । तद्दर्शयति **इदमित्यादि** ।

**यादु०**— **इत्थम्भूतलक्षणेति** । अकार्यत्वरूपं प्रकारं प्राप्तायां विष्णुभावनायां प्रतीकविषयकत्वं लक्षणम्, अतस्तृतीयेत्यर्थः ।

**कं०रा०**— प्रतीकाधिकरणस्य ब्रह्मण उपासनं युक्तमेव । न तु निषेद्धुमर्हति अतः अन्यथा प्रतिज्ञां व्याख्यातीत्यर्थः । 'प्रतीकविषयत्वेन न कार्या विष्णुभावने'त्यत्र प्रतीकविषयत्वस्य करणत्वाभावात् 'कर्तृकरणयोस्तृतीये'ति तृतीया न सम्भवतीत्यत आह **इत्थम्भूतलक्षण इति** । सिद्धान्त्यभिमतायाः प्रतीकसंस्थितत्वेन विष्णुभावनाया अपि प्रतीकविषयत्वात् प्रतीकविषयत्वेन न कार्या विष्णुभावनेत्येतदयुक्तमित्यतः तदभिप्रेतमर्थमाह इदं **मनआदिकमिति** ।

**शे०चं०**— प्रतीकविषयत्वेनेत्याद्युत्तरभाष्यानर्थक्यमाशङ्क्य न प्रतीक इति प्रतिज्ञाया अन्यथा व्याख्यानार्थत्वान्न तदिति भावेन तद्व्यावर्त्यां शङ्कामुत्थापयितुं विषयं तावदाह **मन इत्यादि** ॥ **इत्थम्भूतेति** । प्रतीकविषयत्वस्य कर्तृत्वाद्ययोगेन 'कर्तृकरणयोस्तृतीये'त्यनेन तत्र तृतीयाया अप्राप्तत्वादिति भावः । प्रतीक-

मित्यस्य व्याख्यानं **प्रतिमात्मकमिति** । तस्यैव भृङ्गिग्राहकतया प्रदर्शनं **मनःप्रभृतीति** ॥ **पूर्वेणेति** । **प्रतीकविषयत्वेनेति** प्रतिज्ञावाक्येनेत्यर्थः ॥ **नन्विति** । विवक्षितार्थासाधकत्वेन प्रकृतानुपयुक्त इत्यर्थः । प्रकृतानुपयोगमेवोपपादयति **प्रतीकस्येति** । कथमनेनासङ्गतिपरिहार इत्यतोऽपेक्षितं पूरयन् सङ्गतिं दर्शयति **न हीत्यादिना** ।

**वा०र०— आनर्थक्यमाशङ्क्येति** । आनर्थक्यमित्याशङ्क्येत्यर्थः । **अन्यथाव्याख्यानेति** । प्रतीतार्थापेक्षयेत्यर्थः । इत्थम्भूतलक्षणे तृतीयेत्येतद्व्याख्यानं तु ......पादीयेत्याद्यनुव्याख्यानमूलव्याख्यानावसरे तत्र तत्र कृतं लिङ्गभङ्गेनेत्येतदुपपादनावसरे तृतीयपादे च करिष्यत इति नात्र टीकाकारः कृतवान् । तद्व्याख्यानोपपादनं च गीताभाष्यटीकाविवरणेऽस्माभिः कृतं तत एव प्रतिपत्तव्यम् । अकार्यत्वरूपविष्णुभावनाप्रकारं प्राप्ताया भावनाया प्रतीकविषयत्वलक्षणं भवतीति स्पष्टत्वान्नोक्तमित्यादि योजनीयमस्ति । तर्हि स इति त्वकार्यत्वे हेतुः।

**स०व्र०— पूर्वेणान्वय इति** । प्रतिज्ञावाक्येनान्वय इत्यर्थः ।

**॥ इति प्रतीकानां ब्रह्मत्वेनोपासनप्रतिषेधः ॥**

* * *

**॥ अथ मिथ्योपासनस्य अनर्थहेतुत्वे श्रुतयः ॥**

१३ **सु०— मिथ्योपासनस्यानर्थहेतुत्वं कुत इत्यतस्तदुपपादनपूर्वकमिममेव सूत्राभिप्रायं स्पष्टमाचष्टे योऽन्यथेत्यादिना भगवान्प्रभुरित्यन्तेन** ।

अनु०— योऽन्यथासन्तमात्मेशमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥
योऽन्यथासन्तमात्मानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणेशापहारिणा ॥
योऽन्यथैव स्थितं विष्णुमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेण ब्रह्महारिणा ॥

**अन्यथासन्तं** प्रतीकभिन्नत्वादिप्रकारं सन्तम् । आत्मनां जीवानाम् ईशम् । **अन्यथा** प्रतीकत्वादिना । **प्रतिपद्यते** जानाति ध्यायति च । चोरत्वस्यैव विवरणं **आत्मापहारि-**

**णेति** । अभेदे खल्वेकावशेषः स्यात् । तत्र प्रतीकावशेषे ध्याते स्फुटं परमात्मापहारित्वम् । प्रतीकप्रविलयेऽप्यैश्वर्यापलापात् परमात्मापहारित्वमेव । **आत्मानं** परमात्मानम् ।

एतानि त्रीणि वाक्यानि विष्णोः प्रतीकताध्याने बाधकानि । प्रतीकस्य विष्णुत्वध्याने तु न बाधकमित्यतः स्वात्मानमिति वाक्यं पठितम् ।

स्वात्मानं प्रतिमां वापि देवतान्तरमेव वा ।
चेतनाचेतनं वाऽन्यद्ध्यायेद्यः केशवस्त्विति ।
किं तेन न कृतं पापं चोरेणेशापहारिणा ॥

**योऽन्यदिति** त्रीण्युभयार्थे ।

योऽन्यद्विष्णुरिति ध्यायेज्जानीयाद्वा हरिं तथा ।
अन्धेतमसि मज्जेत् स यत्र नैवोत्थितिः क्वचित् ॥
योऽन्यद्विष्णुरिति ध्यायेद्विष्णुरन्यदिति स्म वा ।
अन्यथाध्यानदोषेण सोऽन्धेतमसि मज्जति ॥
योऽन्यद्विष्णुरिति ध्यायेद्विष्णुरन्यदिति स्म वा ।
महातमसि मग्नस्य तस्य नैवोत्थितिः क्वचित् ॥

**यत्र** पतितस्य । अन्यथाध्यानमेव दोषः **अन्यथाध्यानदोषः** ॥

यत्किञ्चिदित्यादीनि प्रथमार्थ एव कैमुत्यार्थानि ।

यत्किञ्चिदन्यथासंस्थमन्यथा ध्यातमञ्जसा ।
ध्यातुर्महादोषकरं किमु सर्वेश्वरो हरिः ॥
यत्किञ्चिदन्यथासंस्थमन्यथाध्यातमञ्जसा ।
महादोषकरं विष्णुः किमु सर्वेश्वरेश्वरः ॥

यत्किञ्चिदन्यथासंस्थमन्यथाज्ञातमञ्जसा ।
अनर्थकारणं लोके किमु सर्वेश्वरेश्वरः ॥
न किञ्चिदन्यथा ज्ञेयं ध्येयं वा तेन कुत्रचित् ।
किमु सर्वोत्तमो विष्णुर्ज्ञेयो नीचतया क्वचित् ॥
तस्माद्वस्तु यथारूपं ज्ञेयं ध्येयं च सर्वदा ।
कारणं पुरुषार्थस्य नान्यथा भवति क्वचित् ॥

**यत्किञ्चित्** गङ्गोदकादिकम् **अन्यथासंस्थं** पवित्रं सत् **अन्यथा** अपवित्रं **ध्यातं ध्यातुः अञ्जसा** महादोषकरं **किमु सर्वेश्वरो हरिः** प्रकृष्टतया ध्यातः । **तेन** अनर्थप्रसङ्गेन ।

इति श्रुतिपुराणोक्तिबलतो न प्रतीकता ।
ध्येया विष्णोः क्वचिद्यस्मान्मिथ्याज्ञानमनर्थदम् ।
इत्यभिप्रेत्य न हि स इत्याह भगवान् प्रभुः ॥

**इति श्रुतिपुराणोक्तिबलतो मिथ्याज्ञानमनर्थदं प्रतीयते** यस्मात् तस्मात् **विष्णोः प्रतीकता न ध्येया इति** परम्परया हेतुहेतुमद्भावम् **अभिप्रेत्य भगवान्** सूत्रकारो **न हि स इति** हेतुम् **आह** । अतो नासङ्गतिरित्यर्थः । वक्ष्यमाणप्रकारेण द्विरूपस्यापि ध्यानस्य साम्यात् बलत इत्युक्तम् । ध्यानस्यापि ज्ञानविशेषत्वात् सङ्कीर्णोक्तिः ।

**परि०**— ननु विष्णोर्मनआदिनीचरूपत्वेन ध्यानस्य दोषकृत्त्वेऽपि मनःप्रभृतेरुत्कृष्टब्रह्मत्व-ध्यानं न दोषकृदित्यत आह **वक्ष्यमाणेति** । 'चण्डालो नृप इत्युक्ते नृपश्चण्डाल इत्यपि । को विशेष' इत्यादिना वक्ष्यमाणेत्यर्थः । ननूक्तवचनेषु क्वचिदन्यथाज्ञाननिषेधः क्वचिद्ध्यानस्य कुत एवं सङ्करोक्तिः ? ध्याननिरासस्यैव प्रस्तावादित्यत आह **ध्यानस्यापीति** ।

**यादु०**— **जानातीति** व्याख्यानं प्रसङ्गात् तथा ज्ञानस्याप्यनर्थहेतुत्वोपपादनाय । प्रकृताभिप्रायेण व्याख्यानं **ध्यायति चेति** । ननु विष्णोः प्रतीकताध्यानेऽनर्थकथनं युक्तम् । उत्तमस्य नीचताध्यानेऽनर्थदर्श-

नात् । प्रतीकस्य विष्णुत्वध्याने तु नानर्थः । क्षत्तरि राजदृष्ट्या फलदर्शनात् । अतः स्वात्मानमित्यादितन्निषेध-कथनं न युज्यत इत्यत आह **वक्ष्यमाणप्रकारेणेति** । चण्डालो नृप इत्युक्ते नृपश्चण्डाल इत्यपि । को विशेषः परिज्ञात' इत्यादिनेति शेषः । तथाच बलत इत्युक्त्या स्वात्मानमित्यादिवाक्यं वक्ष्यमाणोपपादनसापेक्षमेव स्वार्थप्रापकं न केवलमिति सूचितमिति भावः । ननु मिथ्याज्ञानमनर्थकं चेद्विष्णोः प्रतीकता न ज्ञेयेत्येव वक्तव्यं न तु ध्येयेति । ध्यानस्य ज्ञानभिन्नत्वादित्यत आह **ध्यानस्यापीति** । तथाच 'यस्मान्मिथ्याज्ञानमनर्थदं प्रतीयत' इति हेतुवाक्ये ज्ञानपदेन ज्ञानविशेषरूपस्य ध्यानस्यैव सङ्कीर्णतया साधारण्येन ज्ञानत्वेन रूपेणोक्तत्वान्न ध्येयेति वचनं नानुपपन्नमिति भावः ।

**कं०रा०— योऽन्य इति त्रीण्युभयार्थ इति** । 'योऽन्यद्विष्णुरिति ध्यायेदि'त्यादीनि त्रीणि वाक्यानि प्रतीकस्य विष्णुताध्याने विष्णोः प्रतीकताध्याने च बाधकानीत्यर्थः । 'यत्र नैवोत्थितिः क्वचिदि'त्यत्रापेक्षितांशं पूरयति **यत्र पतितस्येति** । ननु 'स्वात्मानं प्रतिमां चापि देवतान्तरमेव वे'त्यादिवाक्येन प्रतीकस्य विष्णुता न ध्येयेत्यर्थ एव लभ्यते न तु विष्णोः प्रतीकता ध्येयेत्यर्थः । अतः कथं 'इति श्रुतिपुराणोक्तिबलतो न प्रतीकता। ध्येया विष्णोरि'त्युच्यत इत्यत आह **वक्ष्यमाणेति** । 'चण्डालो नृप इत्युक्ते नृपश्चण्डाल इत्यपि । को विशेषः परिज्ञाते नृपेण स्यात् कथञ्चने'ति वक्ष्यमाणप्रकारेण विष्णोः प्रतीकताध्यानस्य प्रतीकस्य विष्णुताध्यानस्य च साम्यात् प्रतीकस्य विष्णुताध्याननिषेधपरेण स्वात्मानमित्यादिवाक्येन अर्थतो विष्णोः प्रतीकताध्याननिषेधस्यापि लाभात् 'इति श्रुतिपुराणोक्तिबलतो न प्रतीकता । ध्येया विष्णोरि'त्युक्तयुक्तिर्युज्यत एवेत्याशयेन बलत इत्युक्त-मित्यर्थः ।

**शे०चं०— इममेवेति** । उक्तप्रतिज्ञायां न हि स इत्यस्य परम्परया हेतुहेतुमद्भावलक्षणमेवेत्यर्थः । 'अन्यथा सन्तमि'त्यस्य मनआदिप्रतीकाद्यभिन्नं सन्तम् अन्यथा भिन्नत्वेन प्रतिपद्यत इति योजनायां वक्ष्य-माणस्य आत्मापहारित्वस्यालाभात् तदुपयोगितया तद् व्याचष्टे **प्रतीकभिन्नत्वादिप्रकारं सन्तमित्यादि** । आत्मा चासावीशश्चेति कर्मधारयपक्षे आत्मत्वाद्युक्तेः प्रयोजनविशेषालाभात् अन्यथासन्तमिति विशेषणोक्तभिन्न-त्वोपपादकतया प्रकृतोपयुक्तत्वलाभात् षष्ठीतत्पुरुषमेवाश्रित्य आत्मेशमित्येतद् व्याचष्टे **आत्मनामिति** ॥ **जानातीति** । पद्यतेर्गत्यर्थत्वाद्गत्यर्थानां ज्ञानार्थत्वादिति भावः । अन्यथोपासनस्याकर्तव्यतायाः प्रमाणारूढत्व-लाभायोपासनपरतयाऽपि व्याचष्टे **ध्यायति चेति** । ज्ञानध्यानयोरुभयोरप्यनर्थसाधनताया उत्तरत्रोक्तेस्तदनुरोधे-नात्रोभयार्थतया व्याख्यानं कृतम् । उत्तरत्रोभयोरनर्थसाधनत्वोक्तेः प्रयोजनं त्वाकर एव स्पष्टम् ॥ **विवरण-मिति** । अनेन कथमन्यथोपासकस्य चोरत्वमित्यत आह **आत्मापहारिणेतीति** । इति योजनोक्ता भवति । भवेदन्यथोपासकस्य चोरत्वं यद्यात्मापहारित्वं तस्य स्यात् । तदेव कथमित्यतस्तदुपपादयति **अभेदे खल्विति**। ततोऽपि किमित्यतस्तदवशिष्टं किं प्रतीकमुत ब्रह्मेति विकल्पं मनसि निधायाद्यं दूषयति **प्रतीकावशेष इति** ॥ **स्फुटमिति** । ब्रह्मस्वरूपोपमर्देन प्रतीकावशेषस्य ध्यातत्वादित्यर्थः । द्वितीयं दूषयति **प्रतीकप्रविलय इति** । प्रतीकस्वरूपोपमर्देन ब्रह्मावशेषे ध्यातेऽपीत्यर्थः ॥ **ऐश्वर्येति** । प्रतीकसापेक्षस्य तदैश्वर्यस्य तदवशेषे सम्भवेऽपि

तदुपमर्देऽसम्भवादित्यर्थः । अनेनात्मरूपधर्म्यपहारित्वं आत्मत्वरूपतद्धर्मापहारित्वं चेत्युभयविधमप्यात्मापहारित्वमिह विवक्षितमिति युक्तमस्य विवरणत्वमित्युक्तं भवति ।

बाधकानीत्यतःपरं अतोऽस्तु विष्णोः प्रतीकत्वेन ध्यानस्याकर्तव्यत्वमिति शङ्कावाक्यशेषः । बाधकमित्यतःपरं अतस्तस्य कर्तव्यत्वं स्यादेवेति शेषः । यच्छब्दार्थस्य तमस उत्थितिं प्रत्यनधिकरणत्वाद्यत्रेति सप्तम्यनुपपत्तिमाशङ्क्योत्थितिकर्तारं प्रत्याश्रयत्वात् तदुपपत्तिरिति भावेन तत्कर्तारं पूरयति **यत्र पतितस्येति** । अन्यथाध्यानस्य दोष इति षष्ठीतत्पुरुषे ध्यानजन्यो दोष इति मध्यमपदलोपिसमासाश्रयणे वा दोषस्यैवानर्थहेतुत्वप्राप्त्या अन्यथाध्यानस्य तदप्राप्तेः प्रक्रमविरोधः स्यादित्यत आह **ध्यानमेवेति** ॥ **प्रथमार्थ एवेति** । विष्णोः प्रतीकताध्यान एवेत्यर्थः । योग्यत्वादनर्थकारणत्वस्य तच्छब्देन तन्मात्रपरामर्श इत्याह **तेनानर्थप्रसङ्गेनेति** ।

ननु च 'इति श्रुतिपुराणोक्तित' इत्येव वक्तव्ये किं 'बलत' इत्यनेनेत्यत इति श्रुतिपुराणोक्तित उपासनद्वयस्याप्यनर्थसाधनत्वसिद्धेरकर्तव्यतेत्युक्तमसत् । राज्ञि क्षत्तृदृष्ट्याऽनर्थदर्शनात् । तन्न्यायेन ब्रह्मणि प्रतीकदृष्टेरनर्थसाधनत्वावश्यम्भावेन श्रुत्यादिना तदकर्तव्यतासिद्धावपि क्षत्तरि राजदृष्टेः फलवत्त्वदृष्ट्या तन्न्यायेन प्रतीके ब्रह्मदृष्टेरपि फलवत्त्वसम्भवेनोपपत्तिविरुद्धतयोदाहृतश्रुत्यादिना प्रतीके ब्रह्मदृष्टेरनर्थसाधनत्वासिद्धेरित्यत उदाहृतश्रुत्यादिमात्रेण तदसिद्धावपि 'पुरतो नरदेवस्ये'त्यादिना वक्ष्यमाणसिंहो देवदत्त इत्यादाविव राजत्वोपचारेणोक्तिमात्रस्यैव क्षत्तरि सद्भावेऽपि राजदृष्टेरभावात् तत्सद्भावेऽपि वा तत्राप्यनर्थस्यैव सद्भावेन फलवत्त्वाभावान्न प्रतीकेऽपि ब्रह्मदृष्टेः तन्न्यायेन फलवत्त्वम् अपि त्वनर्थसाधनत्वमेवेत्यादिरूपा योपपत्तिस्तत्सहितश्रुत्यादिना अनर्थसाधनत्वसिद्धिर्युक्तैव इत्याशयेन बलत इत्युक्तमित्याशयवानाह **वक्ष्यमाणेति** । वक्ष्यमाणोपपत्त्येत्यर्थः । तत्सहकारेणेति यावत् । उदाहृतश्रुत्यादिनेति शेषः । साम्यादनर्थसाधनत्वसिद्धेरिति यावत् । *तातचरणास्तु* 'तत्त्वं वाऽहमस्मि भगवो देवते अहं च त्वमसी'त्यादिवक्ष्यमाणप्रकारेण ब्रह्मणः प्रतीकत्वेन प्रतीकस्य च ब्रह्मत्वेन ध्यानस्य श्रौतत्वात् । अपिशब्दोक्ततन्निषेधस्यापि न किञ्चिदित्याद्युदाहृतश्रुत्यादिसिद्धत्वेनोभयोरपि श्रौतत्वसाम्ये कथं निर्णय इत्यतोऽन्यथोपासनकर्तव्यताप्रापकस्य 'त्वं वा अहमस्मी'त्यादेरागमस्य सावकाशत्वान्निषेधकस्य न किञ्चिदित्यादेश्च निरवकाशत्वेन प्राबल्याद्युक्तोऽनेन तस्य बाध इति दर्शयितुं बलत इत्युक्तमित्यर्थ इत्याहुः । ननु मिथ्योपासनस्यानर्थसाधनत्वप्रतिपादनमुखेन अकर्तव्यतामुपदर्शयितुं योऽन्यथासन्तमित्यादिवाक्येष्वन्यथोपासनस्यैवानर्थसाधनत्वेन कथनीयत्वात् अन्यथोपासनतज्ज्ञानयोः सङ्करेणानर्थतासाधनत्ववर्णनमयुक्तमित्यतः सङ्कीर्णोक्तौ निमित्तमाह **ध्यानस्यापीति** ।

**वा०२०— प्रकृतोपयुक्तत्वलाभादिति** । उपयुक्तत्वलाभाच्चेत्यर्थः । **उत्तरत्रोक्तेरिति** । 'न किञ्चिदन्यथा ज्ञेयं ध्येयं वा तेने'त्युत्तरानुव्याख्यान इत्यर्थः । **प्रयोजनं त्विति** । यस्मान्मिथ्याज्ञानमनर्थप्रदं प्रतीयते तस्मात् विष्णोः प्रतीकता न ध्येयेति परम्परया हेतुहेतुमद्भावसूचनरूपमित्यर्थः । प्रथमार्थ एवेतीति प्रतीकोपादानम् । **तेनानर्थप्रसङ्गेनेतीति च** । 'न च वाच्यं क्षत्तरी'त्यादि *तत्त्वप्रकाशिकानुसारेण* 'पुरतो नरदेवस्ये'-

त्येतदवताररूपमूलानुसारेण च व्यावृत्यशङ्कामाह **ननु चेति श्रुतिपुराणोक्तित** इत्यादिना । **वक्ष्यमाणेति** । अस्येत्यादिरूपा योपपत्तिरित्यनेन वक्ष्यमाणेनान्वयः । वक्ष्यमाणेति वाक्यार्थः *श्रीनिवासाचार्यटिप्पणपर्णे* अस्ति तमाह **तातचरणास्त्विति** । अत्र पक्षे वक्ष्यमाणपदस्यैतद्ग्रन्थवक्ष्यमाणत्वपरित्यागेन श्रुतौ वक्ष्यमाणग्राहकत्व-मङ्गीकार्यं परिहारस्य कल्पनीयत्वमित्यादिकं बहु भवति । 'चण्डालो नृप इत्युक्ते' इत्यादिस्यष्टानुव्याख्याना-ननुसरणं च भवतीति कठिणत्वमित्याशयो बोध्यः । **वक्ष्यमाणप्रकारेणेति** । श्रुत्युक्तप्रकारेणेत्यर्थः । अन्यथो-पासनस्यैवेति पाठः । **तथेति** । अन्यथेत्यर्थः ।

**स०व्र०**— ननु सूत्रकारेण 'न प्रतीके न हि सः' इति प्रतीकस्यैव ब्रह्मत्वेनोपासनस्य निषिद्धत्वात् तथोपासनस्यानर्थसाधनत्वप्रतिपादकवाक्योदाहरणस्यैव कर्तव्यत्वे योऽन्यथासन्तमित्यादिविष्णोर्मन आदिप्रतीका-त्मत्वोपासनस्याकर्तव्यत्वप्रतिपादकवाक्योदाहरणमयुक्तमित्यत आह **वक्ष्यमाणप्रकारेणेति** । 'ध्याते चैकस्य तद्भावे तद्भावोऽन्यस्य किं न तत्' इत्यादिवक्ष्यमाणप्रकारेण विष्णोः प्रतीकत्वेन प्रतीकस्य विष्णुत्वेनोपासन-मित्येवं द्विरूपस्यापि ध्यानस्य साम्यादित्यर्थः । उक्तार्थोऽपि न श्रौतः किन्त्वर्थापत्तिसिद्ध इत्याशयेन बलत इत्युक्तम् । **बलतः** श्रुतिद्वयप्राबल्यात् । 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि देवते' इत्यादि-वक्ष्यमाणप्रकारेण ध्यानद्वयस्य साम्यादित्यर्थ इति केचित् ।

**।। इति मिथ्योपासनस्य अनर्थहितुत्वे श्रुतयः ।।**

* * *

**।। अथ प्रतीकगतत्वेन उपासने श्रुतितात्पर्यम् ।।**

१४ **सु०— एवं तर्हि मनो ब्रह्मेत्यादिश्रुतीनां कोऽर्थ इत्यत आह प्रतीकेति ।**

## अनु०— प्रतीकसंस्थितत्वेन ध्येयो विष्णुर्न चान्यथा ।।

**व्यत्ययो बहुलं, सप्तसु प्रथमा, षट्सु द्वितीया, इत्यादिस्मरणाद्विभक्तिव्यत्ययेन अधिकरणार्थतया श्रुतयो व्याख्येया इति भावः ।। ४-१-३ ।।**

**परि०**— पाणिनीयं सूत्रमाह **व्यत्ययो बहुलमिति** । 'सप्तसु प्रथमा यस्माद् भूयोभूय-स्त्वतरस्तथा । षट्सु द्वितीया यस्माच्चेत्' इत्यादि **छान्दोग्यभाष्यं** हृदि कृत्वा आह **सप्तस्विति** । वाचं ब्रह्मेत्येतन्निर्वाहाय आह **षट्स्विति** । द्वितीयादिविभक्तिष्वित्यर्थः । **आदि**पदेन सुपां सुलुगि-त्यादिग्रहः ।। **विभक्तिव्यत्ययेनेति** । 'नामादिप्राणपर्यन्ताः सप्तम्यर्थाः प्रकीर्तिता' इति सप्तमे **छान्दोग्यभाष्योक्ति**रिति भावः ।। ४-१-३ ।।

**यादु०**— 'व्यत्ययो बहुलमि'ति प्रसिद्धव्याकरणस्थं विभक्तिव्यत्यनेन व्याख्याने विधायकमुक्तम् । महाव्याकरणस्थमपि तदाह **सप्तसु प्रथमेत्यादि** । 'सप्तसु प्रथमे'त्यादिविभक्त्यर्थेषु प्रथमाविभक्तिः स्यादिति आद्यसूत्रार्थः । प्रथमाविभक्त्यर्थं विना द्वितीयादिविभक्त्यर्थेषु षट्सु, द्वितीयाविभक्तिः स्यादिति द्वितीयसूत्रार्थः । इदं च सूत्रं 'स यो वाचं ब्रह्मेत्युपास्त' इत्यादिद्वितीयाऽपि सप्तम्यर्थ इति दर्शयितुम् । एवं चात्र विभक्ति-व्यत्ययेनेत्यस्य प्रसिद्धव्याकरणरीत्या विभक्त्यर्थस्तद्व्यत्ययेनेत्यर्थो ज्ञातव्यः ॥ ४-१-३ ॥

**कं०रा०**— **षट्सु द्वितीयेति** । 'स यः सङ्कल्पं ब्रह्मेत्युपास्ते, स य आकाशं ब्रह्मेत्युपास्ते, स यः स्मरं ब्रह्मेत्युपास्त' इत्यादिसङ्ग्रहाय षट्सु द्वितीयेत्येतदुदाहृतम् ॥ ४-१-३ ॥

**शे०चं०**— ननु मनो ब्रह्मेत्यादेर्विभक्तिव्यत्ययेनाधिकरणार्थतया व्याख्यानं भाष्यकारीयमनर्थकम् । विभक्तिव्यत्यये नियामकाभावात् इत्यतः तदाश्रयणे प्रसिद्धव्याकरणस्य नियामकं तावदाह **व्यत्यय इति** । व्युत्पादितमेतदत्रैव प्राक् । महाव्याकरणस्थमपि तन्नियामकमाह **सप्तस्विति** । सप्तसु प्रथमादिसप्तविभक्त्यर्थेषु प्रथमाविभक्तिः स्यादित्याद्यसूत्रार्थः । प्रथमाविभक्त्यर्थातिरिक्तद्वितीयादिषड्विभक्त्यर्थेषु द्वितीयाविभक्तिः स्यादिति द्वितीयसूत्रार्थः। स यो वाचं ब्रह्मेत्युपास्त इत्यादौ द्वितीयाया अपि सप्तम्यर्थत्वसिद्धये द्वितीयसूत्रोदाहरणं कृतम्। यद्यपि महाव्याकरणस्थसूत्रानुसारेण न विभक्तिव्यत्ययः तथाऽपि प्रसिद्धव्याकरणानुरोधेन तत्सद्भावात् टीकाया-मिह व्यत्ययेनेत्युक्तम् । अत एव टीकाकृता तस्य प्रथममुदाहरणं कृतमित्यवधेयम् ॥ ४-१-३ ॥

**वा०र०**— **प्रागिति** । अशृण्वतामित्यस्य द्विविकरणतोपपादनावसर इत्यर्थः ॥

**॥ इति प्रतीकगतत्वेन उपासने श्रुतितात्पर्यम् ॥**

***॥ इति प्रतीकाधिकरणम् ॥***

★ ★ ★

# ॥ अथ ब्रह्मदृष्ट्यधिकरणम् ॥

**॥ अथ विष्णुः पूर्णत्वेनापि उपास्यः ॥**

## ब्र०सू०— ॐ ब्रह्मदृष्टिरुत्कर्षात् ॐ ॥

१५ **सु०**— अत्र **ब्रह्मदृष्टिः** कर्तव्येत्युच्यते । कुत्रेत्याकाङ्क्षायां सन्निधानात् प्रतीक इति प्राप्नोति । तच्च योग्यताविरहान्निराकृतम् । अतः साकाङ्क्षं प्रतिज्ञावाक्यं व्याख्याति **ब्रह्मेति चेति** ।

अनु०— ब्रह्मेति च सदा ध्येयो भगवान्विष्णुरञ्जसा ।

अत्र चशब्दं प्रयुञ्जानेनात्मेत्यनेन व्यवहितेनाप्यस्य योग्यतयाऽन्वयः । आत्मशब्दश्च प्रथमान्तः प्रकृतः, सप्तम्यन्तेन चेहार्थः । अर्थवशाद्विभक्तिविपरिणामः । अतः सप्तम्यन्तोऽत्र अनुवर्तत इति सूचितम् । भगवान्विष्णुः **ब्रह्मेति ध्येय** इति तात्पर्यकथनं, नाक्षरार्थः । नन्वेतत् भूम्नः क्रतुवज्ज्यायस्त्वमित्यनेनैव गतमित्यतः **सदाऽञ्जसा** इत्युक्तम् । उत्कर्षादिति हेतुः । तत्र न ज्ञायते कस्योत्कर्ष इति । अतो व्याचष्टे **उत्कृष्ट इति** ।

## उत्कृष्टो ब्रह्मशब्दार्थः

यत इति वक्ष्यमाणमिहापि सम्बध्यते । उत्कर्षादुत्कर्षस्य ब्रह्मशब्दप्रवृत्तिनिमित्तत्वादिति सूत्रकृतोत्कर्षस्य ब्रह्मशब्दप्रवृत्तिनिमित्तत्वमुक्तम् । अनुव्याख्यानकृता तूत्कर्षवान् ब्रह्मशब्दाभिधेय इत्यभिहितम् । फलतस्त्वेक एवार्थः । कथमुत्कर्षो ब्रह्मशब्दप्रवृत्तिनिमित्तमित्यत आह **पूर्णत्वमिति** ।

पूर्णत्वं ब्रह्मता यतः ॥

वृद्ध्यर्थात् बृहतेः 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन्प्रत्ययः दृशिग्रहणसामर्थ्याद्धातोरमागमश्च । वृद्धिः पूर्णत्वमित्येक एवार्थः । ब्रह्मता ब्रह्मशब्दप्रवृत्तिनिमित्तम् । पूर्णत्वमेव चोत्कर्षः । हेतुहेतुमद्भावश्च भाष्य एव समर्थितः ।

परि०— **तच्च योग्यताविरहान्निराकृतमिति** । प्रतीकं ब्रह्मेत्येतच्चाभेदस्य बाधेन मिथ्योपास्तेर्निरासान्निराकृतमित्यर्थः । उपलक्षणमेतत् । प्रतीके ब्रह्मेत्युपास्तेर्योग्यत्वेऽपि पूर्वेण गतत्वान्नायमप्यर्थ इत्यपि ध्येयम् ॥ **योग्यतयाऽन्वय इति** । 'आनन्तर्यमचोदने'ति जैमिनिसूत्रे योग्यतैव बलीयसीत्युक्तेः । 'व्यवधानेनान्वयोऽपि योग्यतापेक्षया भवेदि'ति चतुर्थस्कन्धैकविंशाध्याये तात्पर्योक्तेश्च इति भावः ॥ **अन्येभ्योऽपीति** । विवृतमेतदस्माभिर्जिज्ञासासूत्रे ॥ **दृशिग्रहणेति** । दृशिग्रहणं प्रयोगानुसारार्थं इति वृत्तावुक्तेः ॥ **हेतुहेतुमद्भावश्चेति** । ब्रह्मशब्दार्थस्योत्कृष्टतया तथोपास्तेरन्योपास्त्यपेक्षयोत्कर्षात् ब्रह्मत्वोपास्तिः सर्वथा कार्येत्येवंरूपेण 'महत्त्ववाचिशब्दोऽयमि'ति स्मृत्युक्त्या समर्थित इत्यर्थः ।

**गु०दी०— धातोरमागमश्चेत्यत्र** 'मिदचोऽन्त्यात्पर' इति वचनात् मित्वात् बृ इत्यत्र विद्यमानादृकारात् परतोऽमादेशः । तेन 'इको यणची'ति सूत्रात् ऋकारस्य रेफे ब्रह्मशब्दनिष्पत्तिर्भवतीति भावः ।

**यादु०— योग्यतयाऽन्वय इति** । सन्निध्यपेक्षया योग्यतायाः बलवत्त्वादिति भावः ॥ **ब्रह्मशब्दप्रवृत्तिनिमित्तत्वादिति** । कथमिदं लभ्यत इति चेत् । सूत्रे ब्रह्मशब्दाभिधेयस्येत्यध्याहारबलादिति ब्रूमः ॥ उत्कृष्टो ब्रह्मशब्दार्थ इति धर्मिप्राधान्येनानिर्देशेन तथाविधाध्याहारस्य सूचितत्वात् । अन्यथा न ज्ञायते कस्योत्कर्षादिति षष्ठ्यन्ताकाङ्क्षाया अपरिहृतत्वेनोक्तानुव्याख्यानस्यासङ्गतत्वप्रसङ्गात् । ततश्च ब्रह्मशब्दाभिधेयस्योत्कर्षादुत्कृष्टत्वात्पूर्णत्वादिति सूत्रस्य श्रौतोऽर्थः सम्पद्यते । तद्बलादुत्कर्षस्य ब्रह्मशब्दप्रवृत्तिनिमित्तत्वं लभ्यते । शब्दाभिधेयविशेषणतयोच्यमानस्य धर्मस्य शब्दप्रवृत्तिनिमित्ततानियमादिति । नन्वातो मनिनित्याकारान्तधातोरेव मनिन्प्रत्ययविधानात् कथमत्र मनिन्प्रत्यय इत्यत आह **अन्येभ्योऽपीति** । अन्येभ्योऽपि धातुभ्यो नकारान्तेभ्यो मनिन्क्वनिप्वनिप्विचैते प्रत्यया भवन्तीति सूत्रार्थः । सुशर्मा प्रातरित्वेत्याद्युदाहरणम् । न च पूर्वसूत्रे सुप्युपसर्गेऽपीत्यनुवृत्तेरुक्तत्वादत्र च तयोरभावात् कथमस्य सूत्रस्य प्राप्तिरिति वाच्यम्। अपिशब्दः सर्वविधिव्यभिचारार्थः। तेन निरुपपदादपि भवन्तीति काशिकायामुक्तत्वात् ॥ **दृशिग्रहणसामर्थ्यादिति** । दृशिग्रहणं प्रयोगानुसारार्थमिति प्रकाशिकायामुक्तत्वादिति भावः ॥ **अमागम इति** । तथा च मित्त्वादन्त्यादचो ऋवर्णात्परममागमे ऋकारस्य चेको यणचीति यणादेशे ब्रह्मेति रूपमिति भावः । ननूत्कृष्टत्वस्य ब्रह्मशब्दप्रवृत्तिनिमित्तत्वं विष्णौ ब्रह्मदृष्टिः कार्येत्यत्र कथं हेतुरप्रयोजकत्वादित्यत आह **हेतुहेतुमद्भावश्चेति** । उत्कर्षस्य ब्रह्मशब्दप्रवृत्तिनिमित्तत्वाद्ब्रह्मत्वोपासनं नामोत्कृष्टत्वोपासनं तच्चान्येभ्य उपासनेभ्योऽतिशयेन विष्णुप्रीतिजनकम्, अतः तत्सर्वथा कार्यमिति परम्परया हेतुहेतुमद्भावो भाष्ये 'महत्त्ववाची शब्दोऽयं महत्त्वज्ञानमेव हि । सर्वतः प्रीतिजनकमतस्तत्सर्वथा भवेदि'ति स्मृत्युदाहरणेन समर्थित इत्यर्थः ।

**वं०प०— प्रथमान्त इति** । आत्मेति सूत्रे विद्यमानात्मशब्दः प्रथमान्त इत्यर्थः ॥ **सप्तम्यन्तेन चेहार्थ इति** । अस्मिन्सूत्रे सप्तम्यन्तेनार्थवानित्यर्थः । प्रथमान्तस्य कथं सप्तम्यन्तत्वमित्यत आह **अर्थवशादिति** । प्रथमाविभक्तेः सप्तमीविभक्तित्वेन विपरिणामः कर्तव्य इत्यर्थः ॥ **भूम्न इति** । पूर्णत्वेनोपासनायाः भूम्न इति सूत्रे कथितत्वादित्यर्थः ॥ **अञ्जसेति** । आवश्यकत्वमनेन द्योतयतीति भावः ।

**कं०रा०— सप्तम्यन्तेन चेति** । सप्तम्यन्तेन चात्मशब्देनेह ब्रह्मदृष्टिरिति प्रतिज्ञावाक्ये आकाङ्क्षापरिपूर्तिरूपं प्रयोजनं, प्रयोजनवशाच्च विभक्तिविपरिणामः । अतः सप्तम्यन्त आत्मशब्दोऽत्र अनुवर्तत इत्यर्थः । नन्वत्र विभक्तिपरिणामेन सप्तम्यन्तस्यात्मशब्दस्यानुवृत्तौ आत्मनि भगवति विष्णौ ब्रह्मदृष्टिः कार्येत्येव प्रतिज्ञार्थो वर्णनीयः, भगवान्विष्णुर्ब्रह्मेति ध्येय इति तदर्थकथनं कथमित्यत आह **भगवान्विष्णुरिति** ॥ **वृद्ध्यर्थेति** । वृद्ध्यर्थबृहेरातो मनिन्क्वनिब्वनिपश्चेत्यस्मादुत्तरेण अन्येभ्योऽपि दृश्यन्त इत्युत्तरेण मनिन्प्रत्यये दृशिग्रहणसामर्थ्यात् धातोरमागमे ऋकारस्य इको यणचीति यणादेशे च ब्रह्मशब्दो निष्पन्न इति भावः । एवं निष्पन्नस्य ब्रह्मशब्दस्य वृद्धिः प्रवृद्धिः प्रवृत्तिनिमित्तं वृद्धिश्च पूर्णत्वमेव । अतो ब्रह्मशब्दप्रवृत्तिनिमित्तं पूर्णत्वमेवेति पूर्णत्व-

रूपोत्कर्षस्य ब्रह्मशब्दार्थत्वं सम्भवतीत्यत आह **वृद्धिरिति** । ननूत्कर्षस्य ब्रह्मशब्दार्थत्वेऽपि तस्य सदोपास्यत्वं कुत इत्यत आह **हेतुहेतुमद्भावश्चेति** । 'ब्रह्मदृष्ट्या सदोपास्यो विष्णुः सर्वैरपि ध्रुवम् । महत्त्ववाची शब्दोऽयं महत्त्वज्ञानमेव हि । सर्वतः प्रीतिजनकमतस्तत्सर्वथा भवेदि'ति भाष्य एव हेतुहेतुमद्भावश्च समर्थ्यत इत्यर्थः ।

**शे०चं०**— सन्निधानादित्युपलक्षणम् । सप्तम्यन्ततया कुत्रेत्याकाङ्क्षापूरकत्वाच्चेत्यपि द्रष्टव्यम् । अस्तु तर्हि प्राप्तस्य तस्यैवात्रान्वयित्वमित्यतः प्रतीकस्य ब्रह्मत्वाभावेन तत्र तद्दृष्टेर्मिथ्यादृष्टित्वादनर्थसाधनत्वेन कर्तव्यतान्वयायोग्यत्वान्न तस्यान्वय इत्याह **तच्चेति** ॥ **निराकृतमिति** । पूर्वाधिकरण इति शेषः ॥ **योग्यतयेति** । आत्मनो ब्रह्मत्वेन तत्र तद्दृष्टेः सम्यग्दृष्टित्वादनर्थसाधनत्वाभावेन कर्तव्यत्वान्वययोग्यत्वात् 'यस्य येनार्थसम्बन्धो दूरस्थेनापि तेन सः । अर्थतो ह्यसमर्थनामानन्तर्यमकारणमि'त्युक्तरीत्या सन्निधानाद्योग्यताया एव बलवत्त्वात् । व्यवहितेनात्मेत्यनेनैवेत्यस्यान्वय इत्यर्थः ॥ **सप्तम्यन्तेनेति** । तस्यैव कुत्रेत्यधिकरणाकाङ्क्षापूरकत्वेन प्रथमान्तस्य तदभावादिति भावः । प्रथमान्ततया प्रकृतस्य कथं सप्तम्यन्तत्वं येन सप्तम्यन्तस्यात्रानुवृत्तिरित्यत उक्तम् **अर्थवशादिति** । नियामकं तु 'व्यत्ययो बहुलमि'ति प्रागुक्तमेवावगन्तव्यम् । इति सूचितमित्यस्य चशब्दं प्रयुञ्जानेनेति पूर्वेण सम्बन्धः । तर्हि 'ब्रह्मेति सदा ध्येयो भगवानि'ति भाष्यविरोधः । तदनुरोधेन प्रथमान्तस्यैवात्मशब्दस्यात्रान्वयप्रतिभासादित्यत आह **भगवानिति** । एवं सूत्रभाष्ययोर्विसंवादं परिहरति **उत्कर्षादिति** ॥ **बृहतेरिति** । यद्यपि बृंहेर्नोच्चेति बृंहेर्मनिनि नकारस्याकारे च सति ब्रह्मशब्दो व्युत्पादितः । तथाऽपि बृह बृहि वृद्धाविति बृहतेरपि पाठात् तस्य चेदं रूपमित्यभिसन्धायैवमुक्तम् । यद्यपि बृहते रूपाश्रयणेन दृशिग्रहणसामर्थ्यमाश्रयणीयं तथाऽपि बृहजातिजीवेति धात्वन्तरादप्येतद्रूपनिष्पत्तिरिति सूचनायैवमुक्तमिति द्रष्टव्यम् । उक्तरीत्या वृद्धेर्ब्रह्मशब्दप्रवृत्तिनिमित्तत्वप्राप्तावपि पूर्णत्वस्य तदप्राप्तेः । पूर्णत्वस्य ब्रह्मशब्दप्रवृत्तिनिमित्तत्वपरभाष्यानुपपत्तिमाशङ्क्याह **वृद्धिरिति** । उत्कर्षस्य ब्रह्मशब्दप्रवृत्तिनिमित्तत्वं कथम्भावशङ्कायां पूर्णत्वस्य ब्रह्मशब्दप्रवृत्तिनिमित्तत्वकथनमेव सङ्गतं न तु तस्य ब्रह्मत्वकथनमित्यतो ब्रह्मतेत्येतत् तत्परतया व्याचष्टे **ब्रह्मतेति** । तावताऽपि सूत्रितस्य ब्रह्मोत्कर्षस्य तच्छब्दप्रवृत्तिनिमित्तताया अलाभात् कथमुत्कर्षस्य ब्रह्मशब्दप्रवृत्तिनिमित्तत्वमिति शङ्काया अनिरास इत्यत आह **पूर्णत्वमेव चेति** । नन्वस्तूत्कर्षस्य ब्रह्मशब्दप्रवृत्तिनिमित्तत्वम्, तथाऽपि कथं तस्यात्मनि ब्रह्मदृष्टिः कार्येति प्रतिज्ञातार्थेन सह हेतुहेतुमद्भाव इत्यत आह **हेतुहेतुमद्भावश्चेति** । पूर्णत्वरूपोत्कर्षस्य ब्रह्मशब्दप्रवृत्तिनिमित्तत्वाद्ब्रह्मत्वोपासनं नामोत्कृष्टत्वोपासनमेव । तच्च अन्योपासनेभ्योऽतिशयेन भगवत्प्रीतिजनकम्, अतः तत्सर्वथा कार्यमिति परम्परया हेतुहेतुमद्भावश्च 'महत्त्ववाची शब्दोऽयं महत्त्वज्ञानमेव हि । सर्वतः प्रीतिजनकमतस्तत्सर्वथा भवेदि'ति स्मृत्युदाहरणेन भाष्ये समर्थित इत्यर्थः ।

**वा०र०**— **इत्युक्तरीत्येति** । भट्टवार्तिकोक्तरीत्येत्यर्थः । **एतच्च बलवत्त्वादिति** । बलवत्त्वाच्च इत्यर्थः । 'अर्थवशाद्विभक्तिपरिणाम' इति परिभाषावाक्यं मूलेऽनूदितमिति प्रतीयते तद्वाक्यं *परिभाषाभास्करानुसारेण* व्याख्येयम् । तत्परिभाषामूलं स्वयमाह **नियामकं त्विति** । **सदा अञ्जसेत्युक्तमिति** मूलम् ।

सर्वथोपास्यत्वज्ञापनाय पुनर्वचनमिति पूर्वोक्तमेव तात्पर्यमिति भावः । 'उत्कर्षादुत्कर्षस्ये'ति वाक्यमवतारयति **एवं सतीति** ॥ **बृंहेरिति** । ब्रह्मशब्दव्युत्पादनपरवाक्यार्थचन्द्रिकातत्त्वनिर्णयटीकोपदर्शितप्रकारानुसारेण एकवाक्यतया तद्व्युत्पादनं जिज्ञासाधिकरणे कृतमस्ति । **बृंहेर्मनिनीति** । बृंहेर्नोच्चेति सूत्रम् । बृंहेर्नलोपश्चेति सूत्रमपि व्याख्यातं जिज्ञासाधिकरणे ।

**स०व्र०— योग्यतयेति** । सन्निधानाद्योग्यतायाः प्राबल्यादिति भावः । **हेतुहेतुमद्भावश्चेति** । उत्कर्षः ब्रह्मत्वध्यानं प्रति हेतुः इति हेतुहेतुमद्भावश्चेत्यर्थः । **भाष्य एवेति** । 'महत्त्वज्ञानमेव हि । सर्वतः प्रीतिजनकम् अतस्तत्सर्वथा भवेदि'त्यादिना भाष्य एव समर्थितं इत्यर्थः ।

**॥ इति विष्णुः पूर्णत्वेनापि उपास्यः ॥**

* * *

**॥ अथ पूर्णत्वस्य अवश्योपास्यत्वे प्रमाणोल्लेखः ॥**

१६ **सु०— ब्रह्मत्वस्य सर्वथा ध्येयत्वे किं प्रमाणमित्यत आह आधिव्याधीति ।**

**अनु०— आधिव्याधिनिमित्तेन विक्षिप्तमनसोऽपि तु ।**
**ध्येयैव ब्रह्मता नित्यं विष्णोर्भक्त्या निरन्तरम् ।**
**इति प्रकाशिकायां च वचनं विष्णुनेरितम् ॥**

**आधिव्याधीति द्वन्द्वैकवद्भावः । तच्च तन्निमित्तं च, तेन । 'कृत्यानां कर्तरि वे'ति षष्ठी । चशब्देन भाष्योदाहृतानि वचनानि समुच्चिनोति ॥ ४-१-४ ॥**

**परि०—** निमित्तेनेत्येकवचनश्रवणादाह **द्वन्द्वैकवद्भाव इति** । 'कर्तृकरणयोस्तृतीये'ति विक्षिप्तमनसेति कर्तरि तृतीयया भाव्यमित्यत आह **कृत्यानामिति** । 'कृत्याः प्राङ्ण्वुल' इति सूत्रोक्तकृत्यसंज्ञकप्रत्ययानां योगे कर्त्रर्थे विकल्पेन षष्ठी भवतीति द्वितीयाध्यायतृतीयपादस्थसूत्रस्यार्थः । इह च यत्प्रत्ययान्त'ध्येये'त्यस्य कृत्यप्रत्ययान्तत्वादिति भावः ॥ **भाष्योदाहृतानीति** । अत्र सूत्रे एकस्यैव वचनस्योक्तावपि आत्मेत्यादिसूत्रोक्तवचनान्तरापेक्षया वचनानीत्युक्तम् ॥ ४-१-४ ॥

**गु०दी०— कृत्यानां कर्तरि वेति षष्ठीत्यत्र विक्षिप्तमनसोऽपीत्यत्र** षष्ठीत्यर्थः । अन्यथा विक्षिप्तमनसा ध्येयेति स्यादित्यर्थः ॥ ४-१-४ ॥

**यादु०— द्वन्द्वैकवद्भाव इति** । अन्यथैकवचनान्तनिमित्तशब्दविशेषणत्वानुपपत्तिरिति ज्ञेयम् । **कृत्यानामिति** । कृत्यानां कर्तरि षष्ठी विकल्पेन भवतीति सूत्रार्थः । भवता कटः कर्तव्यः । भवतः कटः कर्तव्य इत्याद्युदाहरणम् । प्रकृते च ध्येयेत्यस्य कृत्यप्रत्ययान्तत्वात् तद्योगे षष्ठ्युपपत्तिरित्यर्थः । अन्यथा कर्तुः प्रत्ययेनानभिधानात् तृतीयया भाव्यमिति भावः ॥ **भाष्योदाहृतानीति** । यद्यपि भाष्ये 'ब्रह्मदृष्ट्या सदोपास्य' इत्यादिब्रह्मतर्कवचनं 'आधिव्याधी'त्यादिना नारायणतन्त्रवचनं चेति वचनद्वयमेवोदाहृतम् । तथाऽपि 'आत्मेत्येवं यदोपास्ता तदा ब्रह्मत्वसंयुते'त्यस्यापि वचनस्य प्रकृतार्थसाधनतया अत्र विवक्षितत्वाद्बहुवचनोपपत्तिरिति द्रष्टव्यम् ।

**वं०प०—** नन्वाधिव्याधिनिमित्ताभ्यामिति वक्तव्यं, तत्कथं निमित्तेनेत्येकवचनमित्यत आह **द्वन्द्वैकवद्भाव इति** । आधिश्च व्याधिश्चाधिव्याधि(धी) तच्च तन्निमित्तं च, तेनेत्यर्थः ॥ ४-१-४ ॥

**कं०रा०—** आधिव्याधिनिमित्ताभ्यामिति वक्तव्ये आधिव्याधिनिमित्तेनेति कथं प्रायोजीत्यत आह **आधिव्याधीति द्वन्द्वैकवद्भाव इति** । आधिश्च व्याधिश्चाधिव्याधीति द्वन्द्वैकवद्भावे तच्च तन्निमित्तं चेति कर्मधारये च आधिव्याधिनिमित्तेनेत्येतत् साध्विति भावः ॥ **कृत्यानामिति** । 'विक्षिप्तमनसोऽपि तु ध्येयैव ब्रह्मे'त्यत्र ध्यै चिन्तायामित्यस्मात् 'अचो यदि'ति यत्प्रत्यये निष्पन्नस्य ध्येयशब्दस्य कृत्यप्रत्ययान्तत्वात् कृद्विशेषरूपकृत्ययोगे च 'कर्तृकर्मणोः कृती'ति नित्यत्वेन प्राप्तषष्ठ्या 'कृत्यानां कर्तरि वे'ति विकल्पितत्वात् विक्षिप्तमनस इति वैकल्पिकी षष्ठीत्यर्थः ॥ **चशब्देनेति** । 'इति प्रकाशिकायां च वचनमि'त्यत्र चशब्देन 'आत्मेत्येव यदोपास्ता तदा ब्रह्मत्वसंयुता । कार्यैवे'त्यादिवचनानि समुच्चितानीत्यर्थः ।

**शे०चं०—** आधिव्याध्योरेव मनोविक्षेपनिमित्तत्वात् तन्निमित्तस्य विक्षेपनिमित्तत्वाभावेन आधिव्याध्योर्निमित्तमिति षष्ठीतत्पुरुषस्य बाधितत्वाद्विशेषणसमास एवात्र कर्तव्यः । न चासौ युज्यते । आधिव्याध्योर्भेदेन आधिश्चासौ व्याधिश्चेति विशेषणसमासानुपपत्त्या आधिश्च व्याधिश्च आधिव्याधी इति द्विवचनान्तस्य आधिव्याधी इति द्वन्द्वस्याप्येकवचनान्तेन निमित्तशब्देन विशेषणविशेष्यभावासम्भवादित्यत उक्तरूपद्वन्द्वस्याप्येकवचनान्तत्वान्नानुपपत्तिरित्यभिप्रेत्य तदुपपादयति **द्वन्द्वैकवद्भाव इति** । सर्वो द्वन्द्वो विभाषयैकवद्भवतीति भावः । ननु ध्यायतेः कर्मणि अचो यदिति यति 'आदेच उपदेशेऽशिती'त्यात्वे ईद्यतीत्याकारस्य ईत्वे निष्पन्नस्य ध्येयशब्दस्य कर्मणि निष्पन्नतया कर्मणस्तेनोक्तत्वात् तिङाद्यनभिहिते कर्तरि 'कर्तृकरणयोस्तृतीये'ति प्राप्ततृतीयाबाधकतया नित्यं प्राप्तायाः कर्तृकर्मणोः कृतीति कृद्योगषष्ठ्याः 'कृत्यानां कर्तरि वे'ति सूत्रे कृद्योगे कर्तरि षष्ठ्या विकल्पितत्वात् । यत्प्रत्ययस्य च 'कृत्याः प्राङ्ण्वुल' इति कृत्यप्रत्ययत्वात् । तद्योगे षष्ठीपक्षे विक्षिप्तमनस इत्यस्योपपत्तेरित्याशयेनाह **कृत्यानामिति** ॥ **वचनानीति** । यद्यपि भाष्ये एतत्सूत्रव्याख्यानावसरे 'ब्रह्मदृष्ट्या सदोपास्य' इति ब्रह्मतर्कवचनमेकमेवोदाहृतम् । तथाऽपि उत्तराधिकरणोदाहृतस्याधिव्याधीत्यादिनारायणतन्त्रवचनस्य 'भूम्नः क्रतुवज्ज्यायस्त्वमि'त्युपासनापादीयाधिकरणोदाहृतस्य 'भूमैव देवः

परमो ह्युपास्य' इति वचनस्यापि तदवश्यकर्तव्यतासाधकत्वात् तद्विवक्षया वचनानीति बहुवचनम् । अत एव 'अतीताधिकरणसहितैतदधिकरणार्थे स्मृतिं चाहे'त्युत्तराधिकरणटीका 'नन्वेतद्ब्रूमः क्रतुवज्ज्यायस्त्वमि'त्येतदधिकरणीयपूर्वग्रन्थश्चेति द्रष्टव्यम् ॥ ४-१-४ ॥

**वा०र०—** सर्वो द्वन्द्वो विभाषयेत्येतत्परिभाषा तु प्रागनेकधा इत्याद्यनुव्याख्यानमूलव्याख्यानावसरे उपपादितेति नात्र तदुपपादनं कृतवान् टीकाकारः । तिष्यपुनर्वस्वोरित्येतत्सूत्रीयेयं परिभाषेति प्रागेवास्माभिरुक्तम् । ननु ध्यायतेरित्यादि ग्रन्थे नन्वितिपदपरित्यागेनैव पाठः । कर्तरि षष्ठ्या विकल्पितत्वादित्यत्र षष्ठ्येति तृतीयान्तम् । कृद्योगषष्ठ्या इत्यनेनैव विकल्पितत्वादित्यस्यान्वयात् । वास्तवसाधुत्वप्रकारकथनमात्राभिप्रायेणैव ध्यायतेरित्यादेः प्रवृत्त्या शङ्कासमाधानरूपत्वाभाव इत्येतस्य स्पष्टत्वात् । अत एव शङ्कासमाधानस्थले 'सज्जनैर्ज्ञातव्य' इत्यादौ यद्यपि तथापीत्यादिना शङ्कापरिहारौ दर्शितौ । एवमेव तृतीयेऽनुव्याख्यानसम्बन्धे । ननु कर्मणीत्यादिग्रन्थे ननुशब्दोऽधिक इति प्रतिभाति । लेखकैस्तु शङ्काप्रकारं दृष्ट्वा विवक्षितः । विस्तृतं चैतत् तत्रैव । यत्र यत्र नन्वित्यधिकं प्राप्तं तदेतद्ग्रन्थटीकानिमित्तकम् । अत्रत्यटीकायां हि ननु ध्यायतेरित्यादिना विक्षिप्तमनसेति तृतीयया भवितव्यमित्याशङ्कामुत्थाप्य तत्परिहारकतयोत्तरग्रन्थप्रवृत्तिवर्णनाय प्रवृत्तेन टीकाकृता प्रकारान्तरलेखने लाघवमनुसन्धाय प्रारब्धप्रकारपरित्यागं कुर्वता तृतीयया भवितव्यमित्यादिकं कुण्डलिकाकारेण विनाश्य बाध्यबाधकभावोपवर्णनमुखेनैकवाक्यतयैव वाक्यावतारो योजितः । तदा पूर्वत्र विद्यमानं नन्वित्येतन्न स्पष्टं नाशितमिति स्थितिम् । एतत्स्थलीयव्युत्पादनानुसारेण समानजातीयस्थलान्तरे लेख्यमित्याज्ञप्तेन लेखकेन तन्नाशमज्ञात्वा नन्वित्येतद्वाक्यान्तर्गततया लिखितमिति न कश्चिद्दोषः । 'ननु स्मृतकण्ठमणिरि'त्यत्रेव निश्चयार्थकं नन्विति पदमित्यप्याहुः । **तद्योगे षष्ठीपक्ष इति** । उपलक्षणं चैतत् । तद्योगे तृतीयापक्षे विक्षिप्तमनसेति तृतीयाप्रसङ्गेऽपीत्यपि ज्ञेयम् । तृतीयानुव्याख्यानव्याख्यानरूप इत्यादिमूलव्युत्पादनावसरे बहुस्थले एवं जातीयोक्तिसत्त्वात् । **उत्तराधिकरणटीकेति** । *तत्त्वप्रकाशिकायाम्* आदित्यादिमतयश्चाङ्ग उपपत्तेरित्यधिकरणे तथोक्तत्वादित्यर्थः ।

**स०व्र०—** ननु तिङाद्यनभिहिते कर्तरि तृतीयाया विहितत्वात् सुमनसां च तिङाद्यनभिहितत्वात् तत्र तृतीयायां सुमनोभिरिति भाव्यं सुमनस इति षष्ठी तु कथमित्यतो ध्येयेति कृत्यप्रत्यययोगेनेयं षष्ठी उपपद्यत इत्याह **कृत्यानामिति** ।

**॥ इति पूर्णत्वस्य अवश्योपास्यत्वे प्रमाणोल्लेखः ॥**

***॥ इति ब्रह्मदृष्ट्यधिकरणम् ॥***

★ ★ ★

# ॥ अथ आत्मोपगमाधिकरणान्यथाव्याख्याननिराकरणम् ॥

॥ अथ परकीयव्याख्याननिरासः ॥

॥ अथ मायामते 'परमात्मा जीवत्वेन प्रतिपत्तव्यः' इति प्रथमसूत्रार्थः ॥

१७ सु०— 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च', 'न प्रतीके न हि सः', 'ब्रह्मदृष्टिरुत्कर्षात्' इति त्रिसूत्रीमेकेऽन्यथा व्याचक्षते ।

तथाहि । परमात्मा किमहमिति ग्रहीतव्यः । किं वा मदन्य इति संशये नाहमिति ग्राह्य इति प्राप्तम् । कुतः । अपहतपाप्मत्वादिगुणो हि परमात्मा । तद्विपरीतगुणश्च शारीरः। अतः कथं तयोरभेदो भवेत् । ईश्वरस्य च संसार्यात्मत्वे ईश्वराभावस्ततः शास्त्रानर्थक्यम् । संसारिणोऽपि ईश्वरत्वेऽधिकार्यभावाच्छास्त्रानर्थक्यमेव । प्रत्यक्षादिविरोधश्च । एवं प्राप्ते ब्रूमः । आत्मेत्येव परमेश्वरः प्रतिपत्तव्यः । तथाहि परमेश्वरप्रक्रियायां जाबाला आत्मत्वेनैवैनमुपगच्छन्ति । 'त्वं वाऽहमस्मि भगवो देवते अहं वै त्वमसि देवते' इति । तथाऽन्येऽपि 'अहं ब्रह्मास्मी'त्येवमादय आत्मत्वोपगमा द्रष्टव्याः । ग्राहयन्ति चात्मत्वेनैवेश्वरं वेदवाक्यानि । 'एष त आत्मा सर्वान्तरः', 'तत्त्वमसी'त्यादीनि । 'अथ योऽन्यां देवतामुपास्त' इत्यादिका श्रुतिरपवदति च भेददर्शनम् । यत्तूक्तं विरुद्धगुणयोरन्योन्यात्मत्वं न सम्भवतीति तदसत् । विरुद्धगुणताया मिथ्यात्वात् । न चेश्वराभावप्रसङ्गः । न हि ईश्वरस्य संसारित्वं प्रतिपाद्यते किं तर्हि संसारित्वापोहेनेश्वरत्वम् । न चाधिकार्यभावः प्रत्यक्षादिविरोधश्च । प्राक् प्रबोधात् संसारित्वाभ्युपगमात् । तद्विषयत्वाच्च प्रत्यक्षादिव्यवहारस्य । प्रबोधे तु प्रत्यक्षाद्यभाव एव । तथा सत्याद्वैतश्रुतेरप्यभावप्रसङ्ग इति चेत् । इष्टमेवैतत् । तस्मादात्मेत्येवेश्वरे मनो दधीतेति प्रथमसूत्रार्थः ।

परि०— **एके इति** । अद्वैतिन इत्यर्थः । यथाश्रुतं परभाष्यमनुवदति **परमात्मा किमहमिति** । जीव इति ग्राह्य इत्यर्थः । ईश्वरस्यात्मत्वे आत्मन ईश्वरत्वपक्षे चोभयत्र दोषमाह **ईश्वरस्येत्यादिना** । आद्यपक्षाश्रयेण सिद्धान्तं तावदाह **आत्मेत्येवेति** ॥ सूत्रशेषस्यार्थमाह **परमेश्वरेति**। **उपगच्छन्ति** स्वीकुर्वन्तीत्यर्थः । **आत्मत्वोपगमाः** आत्मत्वाङ्गीकारा इत्यर्थः ॥ **इत्यादिकेति** । 'अन्योऽसावन्योऽहमस्मीति न स यथा पशुरि'ति वाक्यशेष आदिपदार्थः । द्वितीयकल्पमाश्रित्याह **न हीति** । दोषद्वयस्योत्तरं **प्राक्प्रबोधादिति** । ब्रह्मज्ञानात्प्रागित्यर्थः ।

**यादु०— उपगच्छन्तीति** । अभ्युपगच्छन्तीत्यर्थः ॥ **इत्यादिका श्रुतिरिति** । 'अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरि'त्यर्थः ।

**वं०प०— ईश्वराभाव इति** । ईश्वरस्य संसार्यात्माभेदाङ्गीकार इत्यर्थः ॥ **शास्त्रेति** । सदेव सोम्येत्यादि शास्त्रेत्यर्थः ॥ **ईश्वरत्वमिति** । संसारिण इति शेषः ।

**कं०रा०— प्राक्प्रबोधादिति** । अद्वैतसाक्षात्कारात्प्राक् इत्यर्थः ।

**वा०र०—** शाङ्करभाष्यव्याख्यानरूपभामत्यानन्दगिर्यादिकं मनसि कृत्वा शेषं पूरयति **ईश्वरेत्यादिना** । तदनुसारेणैव तत इत्यस्य व्याख्या । प्रत्यक्षादीत्यादिपदेन 'द्वा सुपर्णे'त्यादेरागमस्य ग्रहणम् । उक्तानुसारेण व्याचष्टे **तत्प्रकरण इति** । तत्त्वमसीत्यादीनीत्यादिपदेन मूले 'अहं ब्रह्माऽस्मि योऽहं सोऽसौ योऽसौ अहं स' इत्यादेः परिग्रह इति स्पष्टमिति टीकाकृद्भिर्नोक्तम् । तथाप्यन्योन्यामित्यादिभाष्यानुसारेण सङ्ग्राह्यमाह **आदिपदेनेति** । किं तर्हि संसारिण इति भाष्यानुसारेण शेषं पूरयति **संसारिण इतीति** । इत्यादिना दृश्यत इति शेष इति पाठो युक्तो मूलकोशे स च भाष्यानुसारी च । अन्यादृशस्तु लेखकप्रमादात् । 'इष्टत्वात् अत्र हि पिते'-त्यादिभाष्यानुसारेण भावमाह **अत्रेति** ।

**स०व्र०— तत इति** । प्रतिपाद्याभावादित्यर्थः । **परमेश्वरप्रक्रियायां** परमेश्वरप्रकरणे ।

**॥ इति मायामते 'परमात्मा जीवत्वेन प्रतिपत्तव्यः' इति प्रथमसूत्रार्थः ॥**

* * *

**॥ अथ 'जीवप्रतीकयोः अभेदोपासननिषेधः' द्वितीयसूत्रार्थः ॥**

**१८ सु०— 'मनो ब्रह्मेत्युपासीते'त्येवमादिषु प्रतीकोपासनेषु संशयः किं तेष्वप्यात्मग्रहः कर्तव्यो न वेति । किं तावत्प्राप्तम् । तेष्वप्यात्मग्रह एव युक्तः । कस्मात् । ब्रह्मण आत्मत्वात्, प्रतीकानामपि ब्रह्मविकारत्वात् ब्रह्मत्वे सत्यात्मत्वोपपत्तेरिति प्राप्ते ब्रूमः । न प्रतीकेष्वात्ममतिं बध्नीयात् । न हि स उपासकः प्रतीकानि यत्तान्यात्मत्वेनाकलयेत् । यत्पुनर्ब्रह्मविकारत्वात् प्रतीकानां ब्रह्मत्वं ततश्चात्मत्वमिति तदप्यसत् । प्रतीकाभावप्रसङ्गात् । विकारस्वरूपोपमर्देन हि नामादिजातस्य ब्रह्मत्वमेवाश्रितं भवति । स्वरूपोपमर्दे च नामादीनां कुतः प्रतीकस्वरूपत्वमात्मग्रहो वा । किञ्च यथा रुचकस्वस्तिकयोर्नेतरेतरात्मत्वम् । द्वयोरपि विकारत्वात् । तथा प्रतीकात्मनोरपि । सुवर्णात्मनेव ब्रह्मात्मनैकत्वे प्रतीकाभावप्रसङ्गमवोचाम । अतो न प्रतीकेष्वात्मदृष्टिः कर्तव्येति द्वितीयसूत्रार्थः ।**

**परि०**— द्वितीयसूत्रव्याख्यानमनुवदति **मनो ब्रह्मेतीत्यादिना** । **आत्मग्रहः** अहंत्वग्रह इत्यर्थः । प्रतीकाभावप्रसङ्गादित्युक्तं व्यनक्ति **विकारस्वरूपेति** ॥ **नामादिजातस्य** नामवागादिसमूहस्य ।

**गु०दी०**— **न हि स उपासकः प्रतीकानीति** वदता परेण प्रतीकानां जडत्वेनात्मनश्चेतनत्वेन च भिन्नत्वादिति व्यावहारिकभेदभीत्या एकत्वभावना त्याजिता । अयं च व्यावहारिको भेदः जीवस्याल्पज्ञत्वात् ईश्वरस्य सर्वज्ञत्वात् जीवेश्वरयोरपि समानः । अतः समानन्यायत्वाज्जीवेश्वरयोरप्येकत्वभावना न । एवंच समानन्यायत्वेऽपि पूर्वसूत्रे एकत्वभावनामङ्गीकृत्योत्तरसूत्रे तन्निषेधतः कथं न पूर्वोत्तरविरोधः । 'त्वं वा अहमस्मी'-त्यादिश्रुतेः का गतिरिति चेत् । 'नाम ब्रह्मोपास्त' इत्यादि चतुर्दशवाक्यानां या गतिः सैवेति ब्रूमः । स्वव्यतिरेकेणासत्त्वं तासामर्थश्चेत् अन्तर्यामितया नियामकेश्वरव्यतिरेकेण जीवात्मनोऽप्यसत्त्वं त्वदीयश्रुतीनामप्यर्थोऽस्तु । 'ब्रह्मदृष्टिरुत्कर्षादि'ति तृतीयसूत्रेऽपि आदित्यादिषु ब्रह्मदृष्टिः कर्तव्या । तेषामुत्कर्षप्राप्तेरिति वदता नहि स इति हेतोः स्वेनैवानैकान्त्यमुक्तम् । जडेष्वात्मत्वदृष्ट्या तेषामुत्कर्षात् ब्रह्मदृष्टिवदात्मदृष्टिरपि कर्तव्येति प्राप्तम् । तथाच प्राथमिकसूत्रप्रतिज्ञाऽपि तृतीयसूत्रार्थं वदतैव नाशिता । अत 'उत्पतन्नेव ये मृत' इति न्यायेन पूर्वपक्षोत्थानमेव गर्भस्रावेण गतम् । तस्माद्द्वेधाऽपि त्रिसूत्रीनाशार्थमेव परस्य संन्यास इति युक्तमुत्पश्यामः ।

**यादु०**— प्रतीकाभावप्रसङ्गादित्युक्तमुपपादयति **विकारस्वरूपोपमर्देनेति** । अन्यथैक्यानुपपत्तिरिति भावः । ननु यथा तत्त्वमसीत्यत्र जीवस्य ब्रह्मताबोधने जीवचैतन्ये विशिष्टाकारापगमः । एवं प्रतीकानामपि स्वरूपोपमर्द इष्ट एवेत्यत आह **स्वरूपोपमर्दे चेति** । तत्त्वमसीत्यत्र हि अवच्छिन्नतयाऽनूदितस्यानवच्छिन्नब्रह्मात्मताविधाने अवच्छिन्नस्य प्रविलयो युक्त एव । सर्पतया अनूदितस्य पुरोवर्तिनो रज्जुताविधाने सर्पत्वप्रविलय इव । न चैवं प्रकृते । प्रतीकानि हि आत्मत्वेनोपास्यतया प्रधानत्वेन विधित्सितानि । अतो न प्रधानीभूतानां तेषामुच्छेदो युक्तः । तथात्वे च विधेयस्याप्याश्रयाभावेनानुपपत्तिरिति । तदिदमाह **कुतः प्रतीकत्वमात्मग्रहो वेति** ॥ **तथा प्रतीकात्मनोरपीति** । यद्यप्यात्मनोऽनादित्वान्न विकारत्वं तथाऽपि अध्यस्तत्वमेव विकारत्वमत्राभिप्रेतम् ॥ तच्चात्मनोऽप्यविद्यावच्छिन्नस्याध्यासाङ्गीकारादस्त्येवेति ज्ञातव्यम् ।

**वं०प०**— **आत्मग्रहो** जीवात्माभेदेनोपास्तिः ॥ **ब्रह्मण आत्मत्वादिति** । ब्रह्मणो जीवाभिन्नत्वादित्यर्थः । ब्रह्मत्वे सतीत्यत्र प्रतीकानामिति वर्तते । **आत्मत्वोपपत्तेः** जीवाभेदोपपत्तेः । तथा च यद्यदभिन्नाभिन्नं तत्तेनाभिन्नमिति व्याप्तिबलात् प्रतीकानामात्माभिन्नब्रह्माभिन्नत्वात् आत्माभिन्नत्वमपि प्राप्तमित्यर्थः । **आकलयेत्** भावयीत ॥ **विकारस्वरूपेति** । ब्रह्मविकारभूतप्रतीकस्वरूपोपमर्देनेत्यर्थः । **नामादिजातस्य** नामवागादिप्रतीकसमुदायस्य ॥ नामादीनां स्वरूपोपमर्द इत्यन्वयः ।

**कं०रा०**— **तेष्विति** । प्रतीकेषु जीवाभेदग्रह एव युक्त इत्यर्थः ॥ **ब्रह्मण इति** । ब्रह्मणो जीवाभिन्नत्वादित्यर्थः । ननु ब्रह्मणो जीवाभिन्नत्वेऽपि प्रतीकानां जीवाभिन्नत्वं कुत इत्यत आह **प्रतीकानामपीति** ।

प्रतीकानामपि ब्रह्मविकारतया ब्रह्मात्मकत्वे सति जीवाभिन्नत्वोपपत्तेर्जीवाभिन्नब्रह्माभिन्नानां प्रतीकानां जीवाभिन्नत्वावश्यंभावादिति भावः ॥ **न हीति** । स उपासकः प्रतीकानि न हि येन तानि प्रतीकान्यात्माभिन्नत्वेनाकलयेदित्यर्थः ॥ **किञ्च यथेति** । यदा सुवर्णविकारयोः रुचकस्वस्तिकयोः न परस्परैक्यं, द्वयोरपि सुवर्णविकारत्वात् । तथा प्रतीकात्मनोरपि न परस्परैक्यम्, उभयोरपि ब्रह्मविकारत्वात्, अतः प्रतीकेष्वात्ममतिः न युक्तेत्यर्थः ॥ **तेष्वेवेति** । प्रतीकरूपोदाहरणेष्वेवेत्यर्थः ।

**शे०चं०**— प्रतीकानामपि ब्रह्मत्वे सत्यात्मत्वोपपत्तेरिति सम्बन्धः । तेषां ब्रह्मत्वे हेतुमाह **ब्रह्मेतीति**। विकारस्य च विकार्यनन्यत्वादिति भावः । अस्त्वेवं तेषां ब्रह्मत्वमात्मत्वं तु कुत इत्यत आह **ब्रह्मण इति** । तथा श्रुतिप्रसिद्धेरिति भावः ॥ **न हि स उपासक इति** । अनुभवाद्वा प्रतीकानामात्मत्वकल्पनं श्रुतेर्वा न त्वेतदुभयमत्रास्तीत्यर्थः । प्रतीकाभावप्रसङ्गमेवोपपादयति **विकारेति** । अन्यथैक्यानुपपत्तेरिति भावः । ननु यथा तत्त्वमसीत्यादाववच्छिन्नस्याहङ्कारास्पदस्यानवच्छिन्नब्रह्मात्मतया भवत्यभावः । एवं प्रतीकानामपि भविष्यतीत्यत आह **स्वरूपोपमर्दे च नामादीनामिति** । न तत्त्वमसीत्यादावहङ्कारास्पदमुपास्यमवगम्यते किन्तु सर्पत्वानुवादेन रज्जुत्वज्ञापन इवाहङ्कारास्पदस्यावच्छिन्नस्य प्रविलय एवावगम्यते । इह तु प्रतीकान्यहङ्कारास्पदत्वेनोपास्यतया प्रधानत्वेन विधित्सितानि । अतो न प्रधानीभूतानां तेषामुच्छेदो युक्तः । तथा सति हि विधेयस्याप्याश्रयाभावेनानुपपत्तेरिति भावः ॥ **तथा प्रतीकात्मनोरिति** । यद्यप्यात्मनोऽनादित्वान्न विकारित्वं तथाऽप्यध्यस्तत्वमेव विकारत्वमत्राभिमतम् । तच्चात्मनोऽप्यविद्यावच्छिन्नस्यानाद्यध्यासाङ्गीकारादस्त्येवेत्यभिप्रायेणेदमुक्तमिति ध्येयम् । ननु रुचकस्वस्तिकयोस्तत्त्वेन अभेदाभावेऽपि सुवर्णात्मनाऽभेदवत्प्रतीकात्मनोर्ब्रह्मविकारयोः प्रतीकत्वादिना अभेदाभावेऽपि ब्रह्मात्मनाऽभेदो भविष्यतीत्याशङ्क्याह **सुवर्णात्मनेवेति** ।

**वा०र०**— ब्रह्मण आत्मत्वादिति वाक्यमाकाङ्क्षाक्रमेण योजयति **प्रतीकानामपीत्यादिना** । श्रुतिष्वात्मत्वेन प्रसिद्धत्वादिति भाष्यानुसारेणोक्तं **तथाश्रुतीति** । कल्पनमित्यनन्तरमङ्गीकार्यमिति शेषः । एतच्च भामत्यनुसारेण । *कल्पतरौ* व्याख्यातप्रकारश्चानुसर्तव्यः । उपासकस्य प्रतीकानां भेदेऽपि प्रतीकेषु ब्रह्माभिन्नजीवदृष्टेः श्रुतिवशादुपपत्तेर्भाष्यायोगमाशङ्क्याह **अनुभवाद्वेति** । श्रुतिवशादात्मत्वकल्पनस्य घटादेरपि दृष्टिरूपातिप्रसङ्गेन तन्निरस्तत्वान्नोभयमप्यस्तीत्युक्तमिति । ननु यथावच्छिन्नस्येत्याद्युपपत्तिरितीत्यन्तं भामत्यनुसारेण अवतार्य व्याचष्टे **ननु यथा तत्त्वमसी**त्यादिना **भाव** इत्यन्तेन । इह हीत्यादेस्तात्पर्यार्थः कल्पतरावभिहितः । अप्रधानस्य जीवस्य वैशिष्ट्यत्यागेन ब्रह्मात्मना भवत्यभावप्रधानं तु प्रतीकं यथानिर्दिष्टं रक्षणीयम् । न तु रूपान्तरमापादयितव्यम् । प्रधानस्यैव व्याघातप्रसङ्गादित्यर्थ इत्यनेन । यद्यप्युपासको जीवात्मेति भामत्यनुसारेणाह **यद्यप्यात्मन इति** । मूले प्रतीकात्मनोरपि ब्रह्मविकारत्वान्नेतरेतरात्मत्वमिति पूरणं मनसि निधाय वेदमिति न दोषः । *आनन्दगिर्यनुसारेण* अवतारयति **ननु रुचकेति** । रुचकं स्वस्तिकं स्वर्णविकारौ प्रत्येकं भवतः भूषणविशेषौ ।

**स०व्र०**— प्रतीकाभावप्रसङ्गमेव दर्शयति **विकारेति** ।

**॥ इति 'जीवप्रतीकयोः अभेदोपासननिषेधः' द्वितीयसूत्रार्थः ॥**

**॥ अथ आदित्यादिषु 'ब्रह्मत्वोपासनविधानं' तृतीयसूत्रार्थः ॥**

**१९ सु०— तेष्वेवोदाहरणेष्वन्यः संशयः । किमादित्यादिदृष्टयो ब्रह्मणि कार्याः किं वा ब्रह्मदृष्टिरादित्यादिष्विति । सामानाधिकरण्यस्योभयथोपपत्तेः । तत्रानियमो नियमकारिणः शास्त्रस्य अभावात् । अथवाऽऽदित्यादिदृष्टय एव ब्रह्मणि कर्तव्याः । एवं हि ब्रह्मोपासितं भवति । ब्रह्मोपासनं च फलवदिति प्राप्ते ब्रूमः । ब्रह्मदृष्टिरेवादित्यादिषु स्यात् । कस्मात् । उत्कर्षात् । एवमुत्कर्षेणादित्यादयो दृष्टा भवन्ति। तथा च लौकिको न्यायोऽनुगतो भवति। क्षत्तरि खलु राजदृष्टिः क्रियते न तु राज्ञि क्षत्तृदृष्टिर्विपर्यये प्रत्यवायप्रसङ्गात् । यत्तु फलवत्त्वाय ब्रह्मोपासनं युक्तमिति तदयुक्तम् । आदित्याद्युपासनस्यापि फलवत्त्वोपपत्तेः । ब्रह्मैव च सर्वाध्यक्षत्वात् फलं दास्यति । इदमेव च ब्रह्मोपासनं यदादित्यादिषु तद्दृष्टिः प्रतिमादिष्विव विष्णवादीनामिति तृतीयसूत्रा(स्या)र्थ इति ।**

**परि०—** तृतीयसूत्रव्याख्यानमनुवदति **तेष्वेवेति** । 'मनो ब्रह्मे'त्यादिप्रागुक्तेष्वित्यर्थः । आदित्यो ब्रह्मेत्यादेश इत्यादेरपि तत्र श्रवणादिति भावः। लौकिकन्याय इत्युक्तं व्यनक्ति **क्षत्तरीति**। **विपर्यय इति** । उत्तमे नीचदृष्टिकरण इत्यर्थः । *अपव्याख्यानानुवादः ॥*

**गु०दी०—** यदुक्तं **क्षत्तरि राजदृष्टिः कर्तव्येति** तदपि न । अस्या अपि दृष्टेरतिनीचैक्यादिदृष्टित्वेन राज्ञः कोपकारणत्वात् ॥ ४-१-२,५,६,७,८ ॥

*इति श्रीमद्वादिराजपूज्यचरणविरचितायां गुर्वर्थदीपिकायां चतुर्थाध्यायस्य प्रथमः पादः ॥*

**यादु०— लौकिको न्याय इति** । उत्कृष्टदृष्टिर्हि निकृष्टेऽध्यवसितव्या, न निकृष्टदृष्टिरुत्कृष्ट इति लौकिको न्याय इत्यर्थः । अत्रोदाहरणमाह **क्षत्तरि खल्विति** । अत्र यथेत्यादौ पूरणीयम् । नन्वनुपासितं ब्रह्म कथं फलदं स्यादित्यत आह **इदमेव चेति** । ब्रह्मत्वप्रकारकमेवोपासनं न ब्रह्मविशेष्यकमपीत्यर्थः ।

**वं०प०— एवमिति** । **एवं सति** ब्रह्मविकारत्वेन ब्रह्मत्वे सतीत्यर्थः । **क्षत्तरि** ग्रामाद्यधिपे समर्थे शूद्रे । ननु तर्ह्यादित्यादीनामेवोपासितत्वेन ब्रह्मणोऽनुपासितत्वात् कथं ब्रह्म फलप्रदं स्यादित्यत आह **ब्रह्मैव चेति** ।

**कं०रा०— सामानाधिकरण्येति** । 'आदित्यो ब्रह्म, प्राणो ब्रह्म, विद्युद्ब्रह्मे'त्यादिसामानाधिकरण्यस्य ब्रह्मण्यादित्यादिदृष्टेः कर्तव्यत्वेऽप्युपपत्तेः संशयो जायत इति भावः । पूर्वपक्षमाह **तत्रेति** । ब्रह्मण्यादित्यादि-

दृष्टिः कार्या आदित्यादिषु ब्रह्मदृष्टिर्वेत्यत्र अनियमः । इयमेव दृष्टिः कार्या नान्येति नियमकारिणः शास्त्रस्याभावादित्यर्थः ॥ **अनियम इति** । पूर्वपक्षमुक्त्वा अनियममवलम्ब्यापि पूर्वपक्षमाह **अथवेति** ॥ **एवं हीति** । ब्रह्मण्यादित्यादिदृष्टिषु क्रियमाणास्त्वादित्यादिदृष्टिभिः ब्रह्म उपासितं भवति । ब्रह्मोपासनं च फलवदिति शास्त्रमर्यादा । तस्मात् 'न ब्रह्मदृष्टिरादित्यादिषु कार्ये'त्येवं प्राप्ते ब्रूम इत्यर्थः ॥ **इदमेव चेति** । आदित्यादिषु ब्रह्मदृष्टिरिति यदिदमेव ब्रह्मोपासनं प्रतिमादिषु विष्णवादीनां दृष्टिरेवेत्यर्थः ।

**शे०चं०— तेष्वेवेति** । मनो ब्रह्मेत्युपासीतेत्यादिष्वेवेत्यर्थः । किमस्य संशयस्य बीजमित्यतः सामानाधिकरण्यमेवेत्यभिप्रेत्य तस्य कोटिद्वयोपस्थापकतामुपपादयति **सामानाधिकरण्यस्येति** । आदित्यो ब्रह्म प्राणो ब्रह्मेति ब्रह्मशब्दस्यादित्यादिशब्दैः समानविभक्तिकत्वरूपसामानाधिकरण्यस्येत्यर्थः । नन्वेवं पूर्वपक्षस्य सन्देहादविशेषप्रसङ्ग इत्यरुचेराह **अथवेति** ॥ **एवं हीति** । ब्रह्मविशेष्यकोपासनस्यैव ब्रह्मोपासनत्वादिति भावः । **लौकिक इति** । निकृष्टदृष्टिर्नोत्कृष्टे किं तूत्कृष्टदृष्टिरेव निकृष्ट इति लौकिको न्याय इत्यर्थः । तमेवोपदर्शयति **क्षत्तरीति** । ननु ब्रह्मणः स्वातन्त्र्यात् फलदत्वसम्भवेन तदुपासनस्य फलवत्त्वसम्भवेऽप्यस्वतन्त्रतया आदित्यादीनां फलदत्वासम्भवात् कथं तदुपासनस्य फलवत्त्वमित्यत आह **ब्रह्मैव चेति** । ननु सर्वाध्यक्षत्वेऽपि ब्रह्मणोऽनुपासितस्य कथं फलदत्वमित्यत आह **इदमेव चेति** । ब्रह्मत्वप्रकारकत्वमेव तदुपासनतायां प्रयोजकं न तु तद्विशेष्यकत्वम् । तच्चादित्याद्युपासनस्याप्यस्त्येवेति न फलवत्त्वानुपपत्तिरिति भावः । ब्रह्मत्वप्रकारकत्वमेव तदुपासनत्वे प्रयोजकम् । अन्यथा विष्णवादिदृष्टेर्ब्रह्मविशेष्यकत्वाभावेन ब्रह्मोपासनत्वाभावप्रसक्त्या फलवत्त्वाभावप्रसङ्गादित्याशयेन तत्र दृष्टान्तमाह **प्रतिमादिष्विवेति** ।

**वा०र०—** आदित्यो ब्रह्मेत्यादिभाष्यानुसारेण व्याचष्टे **आदित्य इति** । अत्रादित्यो ब्रह्मेत्यत्र नपुंसकब्रह्मशब्दपाठः । पुल्लिङ्गपाठो लेखकागतः । *आनन्दगिर्यनुसारेण* आह **नन्वेवमिति** । शास्त्रमयदिति भाष्यानुसारेणाह **शास्त्रेति** । उत्कृष्टदृष्टिर्हीति भाष्यानुसारेणाह **निकृष्टेति** । आनन्दगिर्याद्यनुसारेणाह **ननु ब्रह्मणः स्वातन्त्र्यादित्यादिना** ।

**॥ इति आदित्यादिषु 'ब्रह्मत्वोपासनविधानं' तृतीयसूत्रार्थः ॥**

* * *

**॥ अथ आत्मशब्दस्य जीववाचकत्वं सूत्रकारस्य अनभिमतम् ॥**

२० **सु०— तत्र तावत्प्रथमसूत्रस्यापव्याख्यानं दूषयति नेति ।**

## अनु०— नात्मेतिसूत्रमीशस्य जीवत्वप्रतिपादकम् ।

**अत्र प्रतिपत्तिर्नाम प्रमितिरेव परस्याभिमता । प्रतीकदर्शनमित्याशङ्क्य निराकरणात् । अतो जीवत्वेन** प्रतिपत्तव्यत्वस्य **प्रतिपादकमिति**, जीवत्वस्य प्रतिपादकमिति च एक एवार्थः ।

**परि०**— ननु पूर्वसूत्रार्थानुवादवेलायां 'आत्मेत्येवेश्वरः प्रतिपत्तव्यः' इत्युक्त्या तथादृष्टिमात्रमेव न त्वीशस्य जीवत्वं वास्तवमिति ईशस्य जीवत्वेन दृष्टिमात्रप्रतिपादकं सूत्रमिति भाति । इह तूच्यते ईश्वरस्य (वास्तव)जीवत्वप्रतिपादकमिति तत्कथमित्यत आह **अत्र प्रतिपत्तिरिति** । प्रतिपत्तव्यपदोक्तेत्यर्थः । अभिमतेति कथं ज्ञायत इत्यत आह **प्रतीकेति** । परभाष्ये विरुद्धगुणयोर्जीवेशयोरभेदो न युक्तः इत्युक्त्वा तर्ह्यभेदोपदेशपरवाक्यानां का गतिरिति शङ्कित्वा ब्रह्मतादात्म्येन नामादिप्रतीकदर्शनं कार्यमित्येतत्परोऽयमभेदोपदेश इति पूर्वपक्षयित्वा तथात्वे अभेदोपदेशस्य गौणत्वप्रसङ्गादित्यादिना निराकृतम् । तेन ज्ञायते प्रतीकदृष्टिनिरासादीश्वर एव जीवत्वप्रतिपत्तिः प्रमितिरभिमतेति । तथाच जीवेशयोरभेदो यथार्थ एव प्राप्तः न तथा दृष्टिमात्रमिति प्रतिपत्तव्यत्वप्रतिपादकमिति जीवत्वप्रतिपादकमिति च एक एवार्थः सम्पन्न इत्यर्थः ।

**यादु०**— नन्विदं सूत्रं परेणेशस्यात्मेतिप्रतिपत्तव्यत्वप्रतिपादकमिति व्याख्यातं न त्वीशस्यात्मत्वप्रतिपादकमिति अतोऽनुक्तोपालम्भोऽयमित्यत आह **अत्र प्रतिपत्तिर्नामेति** ॥ **प्रतीकदर्शनमाशङ्क्येत्यादि** । अत्राशङ्क्येत्यस्यानूद्येत्यर्थः ॥ ततश्चायमर्थः । परेण हि स्वभाष्ये पूर्वपक्षग्रन्थेऽपहतपाप्मत्वादिगुणक ईश्वरस्तद्विपरीतगुणकश्च शारीरोऽतस्तयोर्विरुद्धधर्मत्वेन भेदनिश्चयान्नेश्वरोऽहमिति ग्राह्य इत्युक्त्वा, न चैवं तत्त्वमसीत्याद्यभेदोपदेशानुपपत्तिः । प्रतिमादिषु विष्ण्वादिदर्शनमिवाऽन्यत्वेऽपि तादात्म्यदर्शनं कर्तव्यमित्येवंपरत्वात् तेषामिति यदुक्तं, तत्सिद्धान्तग्रन्थे, यदुक्तं प्रतीकदर्शनमिति विष्णुप्रतिमान्यायेन भविष्यतीत्यनूद्य तदयुक्तं जीवेश्वरयोर्भेदे तत्त्वमसीत्यादिसामानाधिकरण्यस्य गौणत्वप्रसङ्गात् । प्रतीकदर्शनविधायकवाक्यवैरूप्याच्च । यत्र हि प्रतीकदृष्टिरभिप्रेयते सकृदेव तत्र वचनं भवति । यथा मनो ब्रह्मादित्यो ब्रह्मेत्यादि । इह च त्वमहमस्म्यहं च त्वमसीति चासकृदाह । अतः प्रतीकदृष्टिश्रुतिवैरूप्यादभेदप्रतिपत्तिः । भेददृष्ट्यपवादाच्च । तथा ह्याह । 'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेदे'त्यादिना निराकृतमिति । तथा चाभावनिराकरणपूर्वकं भावप्रतिपत्तिविधाने तत्प्रमितिविधानमेव लभ्यते । प्रमितिविधानं च तद्विषयसत्त्वविधान एव पर्यवसितम्, अतो नानुक्तोपालम्भोऽयमिति भावः ।

**वं०प०**— **प्रतिपत्तव्यत्वस्य** प्रमितिविषयत्वस्य ॥ **जीवत्वस्येति** । प्रामाण्यस्यार्थसत्ताघटितत्वादिति भावः ।

**कं०रा०**— नन्वात्मेति सूत्रमीशस्य जीवत्वेन प्रतिपत्तव्यस्य प्रतिपादकमिति परेणोक्तेः 'नात्मेति सूत्रमीशस्य जीवत्वप्रतिपादकमि'त्येतदसङ्गतमित्यत आह **अत्रेति** । आत्मेत्येव परमेश्वरः प्रतिपत्तव्य इत्यत्र

प्रतिपत्तिर्नाम प्रमितिरेव परस्याभिमता प्रतीकदर्शनमिदं विष्णुत्वप्रतिमान्यायेन भविष्यतीति प्रतिमादिषु विष्णवादिदर्शनस्येवोक्तप्रतिपत्तेरारोपरूपत्वमाशङ्क्य तदयुक्तं गौणत्वप्रसङ्गाद्वाक्यवैरूप्यप्रसङ्गाच्च । यत्र हि प्रतीक-दृष्टिरभिप्रेयते सकृदेव तत्र वचनं भवति यथा 'मनो ब्रह्मे'ति , 'आदित्यो ब्रह्मेति' । इह पुनः 'त्वमहमस्म्यहं च त्वमसी'त्याह-। अतः प्रतीकश्रुतिवैरूप्यादभेदप्रमितिरित्यादिना आरोपत्वस्य निराकरणात् अतो ब्रह्मणो जीव-त्वेन प्रतिपत्तित्वस्य प्रतिपादकमिति च एकमेवेत्यर्थः । तथा च 'नात्मेति सूत्रमीशस्य जीवत्वप्रतिपादकम्' इति मूलं सङ्गतमेवेति भावः ।

**शे०चं०—** नन्वस्य सूत्रस्य परेणेशस्य आत्मेति प्रतिपत्तव्यत्वप्रतिपादकतया व्याख्यातत्वेऽप्यात्मत्व-प्रतिपादकतया अव्याख्यातत्वात् 'नात्मेति सूत्रमीशस्य जीवत्वेन प्रतिपत्तव्यत्वप्रतिपादकमि'त्यनुवादोऽत्रोचितः । तत्कथं जीवत्वप्रतिपादकमित्यन्यथानुवाद इत्यत आह **अत्रेति** । प्रतिपत्तिशब्दस्योपासनामात्रपरत्वसम्भवे किं प्रमितिपरत्वकल्पनेनेत्यत आह **प्रतीकदर्शनमित्याशङ्क्येति** । पूर्वपक्षिणाऽपहतपाप्मत्वानपहतपाप्मत्वलक्षण-विरुद्धधर्मवत्त्वादीश्वरशारीरयोर्भिन्नत्वनिश्चयात् नेश्वरस्याहमिति ग्राह्यत्वमिति स्वप्रतिज्ञातार्थे तर्हि तत्त्वमसीत्या-द्यभेदोपदेशानुपपत्तिरिति बाधकमुद्भाव्य प्रतिमादिषु विष्णवादिदर्शनमिवान्यत्वेऽपि जीवेश्वरयोस्तादात्म्यदर्शनं कर्तव्यमित्येवंपरत्वात्तत्त्वमस्यादिवाक्यस्य न विरोधित्वमित्याशङ्कितं पक्षं, यदुक्तं प्रतीकदर्शनमिदं विष्णुप्रतिमा-न्यायेन भविष्यतीति सिद्धान्तेऽनूद्य तथा सति तत्त्वमसीत्यादिसामानाधिकरण्यस्य गौणत्वप्रसङ्गः । तत्प्रतिपाद्य-मुख्याभेदस्याभावात् प्रतीकदर्शनविधायकवाक्ये वैरूप्यप्रसङ्गश्च । यत्र हि प्रतीकदृष्टिरभिधीयते सकृदेव तत्र वचनं भवति । यथा 'मनो ब्रह्म', 'आदित्यो ब्रह्मे'त्यादि । इह पुनः 'त्वमहमस्म्यहं च त्वमसी'त्याह । अतः प्रतीक-श्रुतिवैरूप्यादभेदप्रतिपत्तिः । 'अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मी'ति भेददर्शनस्यापवादाच्चेति गौणत्वप्रसङ्गादिहेतुभिस्तन्निराकरणादित्यर्थः । अस्तु प्रतिपत्तिशब्दस्य प्रमितिपरत्वविवक्षा परस्य, किं तावता-ऽपीत्यत आह **अत इति** । प्रतिपत्तिशब्दस्य प्रमितिपरतया आत्मेति प्रतिपत्तव्यत्वविधानस्य तथाप्रमिति-परत्वापत्त्या तद्विधानस्य च तद्विषयसत्त्वाविधानेऽनुपपन्नतया तत्रैव पर्यवसन्नत्वेनेश्वरस्य जीवत्व एव पर्यव-सन्नत्वान्नानुक्तोपालम्भोऽयमिति भावः ।

**वा०र०—** **अनुवाद उचित इति** । अनूद्य निषेध उचित इत्यर्थः । अस्य निषेधपरत्वेऽप्यनुवाद-प्राधान्यविवक्षया तथोक्तिरिति ज्ञेयम् । भामत्यानन्दगिरिभाष्यानुसारेणार्थमाह **पूर्वपक्षिणेत्यादिना निराकरणा-दित्यर्थ इत्यन्तेन** । प्रतीकदर्शनविधायकवाक्यवैरूप्यायोगप्रसङ्गश्चेति पाठः । वैरूपप्रसङ्गश्चेति लेखकागतम् । वाक्यरूपेति पाठः । वैरूप्यसद्भावं दर्शयंस्तदन्यथानुपपत्याऽभेदप्रतीतिः स्वीकार्येत्याह **यत्र हीत्यादि** ॥ **गौण-त्वप्रसङ्गादीति** । आदिपदेन वैरूप्यायोगप्रसङ्गभेददर्शनापवादयोः परिग्रहः ।

**स०व्र०—** ननु 'आत्मेति' सूत्रमीशस्य जीवत्वेनोपास्यत्वप्रतिपादकमिति वक्तव्यम् । तस्यैव परेणोक्तत्वात् । न तु जीवत्वप्रतिपादकमिति । तस्य परेणानुक्तत्वेनानुक्तोपालम्भप्रसङ्गादित्यत आह **अत्रेति** ।

जीवत्वप्रतिपादकत्वं जीवत्वेनोपास्यत्वप्रतिपादकत्वं चैकमेव । न च आद्यपक्षे जीवत्वस्य विद्यमानता लभ्यते । द्वितीये त्वविद्यमानता । अविद्यमानस्यापि प्रतिपत्तव्यत्वस्य 'योषितमग्निं ध्यायीते'त्यादौ दृष्टत्वात् तत्कथमेतयोरैक्यमुच्यत इति वाच्यम् । जीवत्वेन प्रतिपत्तव्यत्वस्य प्रतिपादकमित्यत्र प्रतिपत्तिशब्देन प्रमितेरेव विवक्षितत्वेन पक्षद्वयस्यैक्योपपत्तेरिति । कुत एतत् प्रतिपत्तिशब्दस्य प्रमितिपरत्वकल्पनम् । 'योषितमग्निं ध्यायीते'त्यादाविव अविद्यमानोपासनापरत्वमेव किं न स्यादित्यत आह **प्रतीकेति** । प्रतीक आत्मत्वदर्शनमाशङ्क्य निवारितत्वादित्यर्थः । अयं भावः । यद्यत्र प्रतिपत्तिशब्दस्य प्रमितिपरत्वमनङ्गीकृत्य अविद्यमानोपासनापरत्वमङ्गीक्रियते तर्हि 'न प्रतीके न हि स' इत्युत्तराधिकरणे 'प्रतीकेऽप्यात्ममतिः कर्तव्या न वे'ति संशये ब्रह्मण आत्मत्वात् प्रतीकानामपि ब्रह्मविकारत्वेन ब्रह्मत्वे सति आत्मत्वोपपत्तेरात्मबुद्धिः कार्येत्याशङ्क्य प्रतीकानामात्मत्वाभावात् तत्त्वेन प्रतिपत्तिः न कार्येति निराकरणमनुपपन्नं स्यात् । तत्रापि प्रतिपत्तिशब्दस्योक्तार्थत्वसम्भवेन प्रतीकानामात्मत्वाभावेऽप्यात्मत्वोपासनायाः सम्भवात् । तथाच निराकरणान्यथानुपपत्त्या प्रतिपत्तिशब्दस्य प्रमितिपरत्वात् पक्षद्वयस्योक्तिर्युक्तेति । अन्ये तु प्रतीकदर्शनमिदं विष्णुप्रतिमान्यायेन भविष्यतीत्यादिना ईश्वरात्मत्वप्रतिपत्तेः प्रतीकदर्शनतुल्यप्रतिमारूपतामाशङ्क्य गौणत्वप्रसङ्गादित्यादिना निराकरणेन प्रमितिरूपत्वोपपादनादित्यर्थ इत्याहुः ।

* * *

२१ **सु०— कुतो नेत्यतः पदार्थज्ञानपूर्वकत्वाद्वाक्यार्थज्ञानस्य प्रथमं पदार्थं निराकरोति आत्मशब्दमिति ।**

**अनु०— आत्मशब्दं यतो हेतुं कृत्वा जीवं न्यवारयत् ।**
**स्वशब्दात्प्राणभृच्चैव नोक्त इत्येव वेदराट् ॥**

**स्वशब्दात्** एव **प्राणभृच्च नोक्त** इति **वेदराडेवात्मशब्दं हेतुं कृत्वा जीवं न्यवारयत्** यतः तस्मात् **आत्मशब्दोदितो विष्णुरेव न चापरो जीव इति योजना ।**

**परि०—** एवकारद्वयस्याप्यन्वयं दर्शयन् योजनामाह **स्वशब्दादेवेति** ।

**कं०रा०— पदार्थज्ञानपूर्वकत्वादिति** । यद्यपि सङ्गतिस्मरणवाक्यार्थयोर्मध्ये पदार्थज्ञानमेव नास्ति तथापि सङ्गतिस्मरणस्यावच्छेदकतया पदार्थविषयत्वात् वाक्यार्थज्ञानस्य पदार्थज्ञानपूर्वकत्वोक्तिः ॥ **पदार्थमिति** । पराभिमतमात्मपदस्यार्थमित्यर्थः ।

**शे०चं०— स्वशब्दादेवेति** । प्राणभृच्चैवेत्यत्रत्यस्यैवशब्दस्य विरुद्धार्थतया यथाश्रुतसम्बन्धासम्भवात् स्वशब्दादित्यनेन सम्बन्ध इति भावः । इत्येवेत्येवशब्दो भिन्नक्रमत्वान्नानर्थक इति भावेनाह **वेदराडेवेति** ॥ **इति योजनेति** । यत इत्यादेर्यदीत्यादिना सन्निधानेऽप्ययोग्यत्वाद्योग्यतया व्यवहितेनाप्यात्मशब्दोदित इत्युत्तर-ग्रन्थेनैवान्वय इति भावः ।

* * *

**२२ सु०— एतदुक्तं भवति । भवेदयं सूत्रार्थो यद्यात्मशब्दो जीववाची भवेत् । न चैवम् । सूत्रकारवचनसामर्थ्यदिव तस्य तद्वाचित्वाभावावगमात् । तथाहि । यस्मिन्द्यौरिति वाक्यमुदाहृत्य किमत्र द्युभ्वाद्यायतनत्वेन प्रधानमुच्यते उत जीवः किं वा परमात्मेति संशये प्रधानादौ प्राप्ते सिद्धान्तितम् । 'द्युभ्वाद्यायतनं स्वशब्दादि'ति । स्वशब्दात् 'तमेवैकं जानथ आत्मानमि'ति द्युभ्वाद्यायतने आत्मशब्दश्रवणात् द्युभ्याद्यायतनं परमात्मैवेति । ततो 'नानुमानमतच्छब्दात्' इति प्रधानं निराकृत्य जीवनिराकरणार्थं सूत्रितं प्राणभृच्चेति । तत्र चशब्दो नेत्यस्य स्वशब्दादिति हेतोश्चानुकर्षणार्थः । ततश्चात्मशब्दाज्जीवोऽपि नेत्यर्थः । यदेवमात्मशब्दं हेतुं कृत्वा जीवं निवारितवान् सूत्रकारः, तदन्यथाऽनुपपत्त्या जानीमः सूत्रकारस्यात्मशब्दो न जीववाचीत्यभिप्रेतमिति । तथाच कथं स्वाचरितविरुद्धमिदानी-माचरेदिति ।**

**परि०—** नन्वेतावता आत्मपदार्थो जीवो नेत्यत्र किमुक्तं भवति जीवनिरासे च तत्र का प्रसक्तिरित्यत आह **एतदुक्तमिति** । यद्यपि परभाष्ये वायुकोटिरप्युक्ता तथाऽपि तस्य प्रकृता-नुपयोगात् कोटित्रयमेवानुवदति **प्रधानमुच्यत इत्यादिना** ।

**कं०रा०— यस्मिन् द्यौरितीति** । 'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैस्तमेवैकं जानथात्मानमि'ति वाक्यमित्यर्थः । नन्वात्मशब्दस्य गुणपूर्तिवाचित्वेऽन्यैर्गुणपूर्णताया अनाप्तत्वादात्मादिशब्दा अन्यान्न वदन्तीति वक्तुं शक्यम् । तस्य तद्वाचित्वमेव कुत इत्यत आह **आत्मशब्दोऽपीति** ।

**शे०चं०—** ननु प्राणभृच्चेति सूत्रे स्वशब्दादिति हेतोः, नेति निषेधस्य चाश्रवणात् पूर्वत्राप्रकृतत्वेन सौत्रचशब्दस्य तदनुषङ्गाभिप्रायकत्वस्याप्यसम्भवात् । प्रकृतत्वेन तत्सम्भवेऽपि वा जीवस्याप्रसक्ततया तन्निषेधानर्थक्यात् । 'स्वशब्दात् प्राणभृच्च नोक्त' इति कथमेतत्सूत्रार्थानुवाद इत्यतो जीवस्य तत्प्रसक्तिं हेतु-निषेधयोः प्रकृततां च दर्शयन् तावताऽपि को दोष उक्तो भवतीत्यतः फलितं दोषं चोपदर्शयन् आकाङ्क्षाक्रमेण भाष्याभिप्रायमाह **एतदुक्तं भवतीति** ।

वा०र०— अश्रवणादित्यस्य कथमेतत्सूत्रार्थेति वक्ष्यमाणेनान्वयः । नन्वत्र सूत्रेऽश्रवणेऽपि पूर्वप्रकृततया पूर्वप्रकृतानुकर्षणार्थचकारेण तदनुत्कर्ष उक्तानुवादो युक्त इत्यत आह **पूर्वत्रेति** ॥ नानुमानमिति सूत्रेनेति निषेधस्य प्रकृतत्वेऽपि उभयोः प्रकृतत्वाभावादिति भावः । ननु स्वशब्दरूपहेतोः पूर्वसूत्रप्रकृतत्वेऽपि व्यवहितपूर्वसूत्रप्रकृतताऽस्त्येव । अतो युक्तस्तदुभयपरामर्श इत्याह **प्रकृतत्वेऽपीति** । व्यवधानाव्यवधानासाधारण्येन प्रकृतत्वेऽपीत्यर्थः । **प्रकृततां चेति** । व्यवधानाव्यवधानसाधारण्येन प्रकृततां चेत्यर्थः ।

* * *

२३ **सु०— एतदेव विशदयति यदीति ।**

**अनु०— यद्यात्मशब्दो जीवेऽपि कथं स विनिवारयेत् ।**
**आत्मशब्दोदितस्तस्माद्विष्णुरेव न चापरः ॥**

**जीवेऽपि 'वर्तत इति सूत्रकृतोऽभिप्रेतमि'ति शेषः । तर्हि कथं सूत्रकारो जीवम् आत्मशब्देन विनिवारयेत् । न हि गन्धवत्त्वेन घटो निवारयितुं शक्यते । अथवा यद्यात्मशब्दो जीवेऽपि वर्तेत तदा स आत्मशब्दः कथं जीवं निवारयेत् । प्रत्युत प्रतिपादयेदिति योजना ।**

**परि०**— 'स' इत्येतत् सूत्रकारपरतया पूर्वं व्याख्याय शब्दपरतया व्याचष्टे **अथवेति** ।

**शे०चं०**— ननु योग्यतया व्यवहितेनात्मशब्दोदित इत्यादिना आत्मशब्दमित्यादिपूर्वग्रन्थस्य सम्बन्धे तावतैव विवक्षितसिद्धेर्यदीत्यादिमध्यस्थवाक्यवैयर्थ्यमित्यत उक्तार्थविवरणरूपत्वात् तस्य नानर्थक्यमिति भावेनोक्तार्थविवरणतया तद्योजयति **एतदेवेति** । यदीत्यादिवाक्यस्य कथमुक्तार्थविवरणरूपत्वमित्यतोऽपेक्षितं पूरयन् वाक्यं व्याचष्टे **जीवेऽपीत्यादिना** । अत्र पक्षे वर्तत इत्याद्यनेकपदाध्याहारः समाश्रयणीयो भवतीत्यपरितोषात् पक्षान्तरमाह **अथवेति** । अत्र च वर्तेत जीवमित्येतयोरध्याहारेऽपि न पूर्ववद् बहोरध्याहार इति भावः ।

**वा०र०— पूर्वग्रन्थस्य सम्बन्ध इति** । यतस्तस्मादात्मेत्यादिना प्राक् मूले तदभिधानादिति भावः ।

**॥ इति आत्मशब्दस्य जीववाचकत्वं सूत्रकारस्य अनभिमतम् ॥**

* * *

॥ अथ आगमवाक्येन आत्मशब्दस्य विष्णुवाचकत्वसिद्धिः ॥

२४ सु०— आगमवाक्यमप्यत्र पठति आत्मेति ।

अनु०— आत्मब्रह्मादयः शब्दास्तमृते विष्णुमव्ययम् ।
न वदन्ति यतो नाप्ता क्वापि तैर्गुणपूर्णता ।
नारायणाध्यात्मगतमिति यद्वैष्णवं वचः ॥

अन्यान्न वदन्ति कुतो यत आत्मादिशब्दाः पूर्तिवाचिनस्तैरन्यैर्गुणपूर्णता क्वाप्यवस्थायां न प्राप्ता । यत्किञ्चित्पूर्णतार्थत्वे चामुख्यार्थतापात इति । आत्मशब्दोऽप्याङ्पूर्वात्तनोतेर्मनिन्प्रत्यये टिलोपे च सति निष्पन्नः पूर्णतावचनः । यद्यस्मादेवं वचोऽस्ति तस्मादपीति पूर्वेणैव अन्वयः ।

**परि०— अत्रेति** । आत्मशब्दार्थो विष्णुरेवेत्यत्रेत्यर्थः । 'न वदन्ती'त्यत्र कर्माकाङ्क्षायामाह **अन्यानिति** । शेषोक्त्या वाक्यं योजयति **कुत इत्यादिना** । तैरित्यस्यार्थः **अन्यैरिति** ।

**कं०रा०— मनिन्प्रत्यय इति** । 'आतो मनिन्क्वनिब्वनिपश्चे'त्यस्मादुत्तरेण 'अन्येभ्योऽपि दृश्यन्त' इति सूत्रेण आङ्पूर्वात्तनोतेर्मनिन्प्रत्यये दृशिग्रहणसामर्थ्याट्टिलोपे च सति निष्पन्न आत्मशब्दोऽपि गुणपूर्णतावचन इति भावः । **तस्मादपीतीति** । तस्मादपि विष्णुरेवात्मशब्दोदित इति पूर्वेणान्वय इत्यर्थः ।

**शे०चं०—** नन्वत्रात्मादिशब्दास्तमृते विष्णुं न वदन्तीति विष्णुवाचित्वाभावप्रतिपादनान्नास्यागमस्य विवक्षितार्थसाधकत्वेनोपन्यासो युक्त इत्यतोऽत्र नोक्तरीत्याऽन्वयः किं त्वन्यथैवेत्यभिप्रेत्य योग्यकर्माध्याहारेणान्वयमाह **अन्यान्न वदन्तीति** । उक्तप्रतिज्ञायां यतो नाप्तेत्याद्युक्तस्य हेतोरप्रयोजकत्वेनान्वयायोगात् तदुपपादकहेत्वन्तराध्याहारं दर्शयंस्तदुपपादकतया मौलं हेतुं योजयति **यत आत्मादिशब्दाः पूर्तिवाचिन इति** । कथमेतेषां पूर्तिवाचित्वमित्यतः प्रकृतिप्रत्ययविभागोपदर्शनेन तदुपपादयति **आत्मशब्दोऽपीति** । आङ्पूर्वात्तनोतेरौणादिके डमन्प्रत्यये डित्वाट्टिलोपे आत्मन्निति प्रातिपदिकनिष्पत्तिः । मनिन्निति पाठेऽपि अन्येभ्योऽपि दृश्यत इति मनिनि दृशिग्रहणसामर्थ्याट्टिलोपे च सति तन्निष्पत्तिः । विस्तृतिः पूर्तिश्चेत्येक एवार्थ इति भावः ।

**वा०र०—** अन्वयः किन्त्विति पाठः । **तनोतेरौणादिके डमन्निति** । सूत्रेणेति शेषः । ब्रह्मशब्दे मूलकृतोक्तं प्रकारमनुसृत्याह **मनिन्निति पाठेऽपीति** ।

॥ इति आगमवाक्येन आत्मशब्दस्य विष्णुवाचकत्वसिद्धिः ॥

॥ अथ आत्मशब्दस्य जीवार्थकत्वं निवारयतः सूत्रकारस्य जीवब्रह्मैक्यं नाभिमतम् ॥

२५ **सु०— इदानीं वाक्यार्थं दूषयति यदीति ।**

**अनु०— यदि जीवेशयोर्वेदपतिरैक्यं च मन्यते ।**
**आत्मशब्दं कथं तस्मान्निवारयति युक्तितः ॥**

**मन्यते (अत्र) तत्र सूत्रे तदा तस्मात् जीवादात्मशब्दं कथं निवारयति । कुत्र निवारितवानित्यत उक्तम् युक्तित इति ।**

जीवनिराकरणयुक्तित्वेनोक्तत्वादिति यावत् ।

**इदमुक्तं भवति । आत्मशब्दश्रवणात् द्युभ्वाद्यायतनं न जीव इति आत्मशब्दं जीवनिवारणे हेतुं वदता सूत्रकारेणात्मशब्दो जीवान्निवारित इति गम्यते । नायं पुरुषो विषाणित्वादिति यथा । न हि तत्रस्थेन तन्निरासो युज्यते । नायं गौर्विषाणित्वादित्यपि प्रसङ्गात् । प्रथमसूत्रे च द्युभ्वाद्यायतनं परमेश्वरो न जीव आत्मशब्दादित्यात्मशब्दस्य परमेश्वरे प्रवृत्तिरभ्युपगता । अन्यथा तेन तत्साधनानुपपत्तेः । तत्र यदि जीवेश्वरावेकमेव तत्त्वमिति सूत्रकारस्य मतं स्यात् । तदा तेनात्मशब्दस्तत्रैव वर्तते, न वर्तते चेत्युक्तं भवति । न च व्याहतं सूत्रकारो भाषत इति युक्तम् । तस्मान्न जीवेश्वरैक्यं तस्य मतमिति गम्यत इति ।**

**उपलक्षणं चैतत् । द्युभ्वाद्यायतनं परमेश्वरो, न जीव इति, प्रतिज्ञाद्वयं च व्याहत- मित्यपि द्रष्टव्यम् ।**

यादु०— ननु सूत्रकृज्जीवेशयोरैक्यं न मन्यत इत्यत्र नात्मशब्दस्य जीवान्निवारणं हेतुप्रयोजकत्वा- दित्यतोऽस्य वाक्यस्य व्याहतौ तात्पर्यमित्यभिप्रेत्य तामुपपादयितुमाह **प्रथमसूत्रे चेत्यादिना ।**

कं०रा०— **द्युभ्वाद्यायतनं परमेश्वरो न जीव इति प्रतिज्ञाद्वयमिति** । यदि जीवेश्वरावेकमेव तत्त्वमिति सूत्रकारमतं स्यात् तदा द्युभ्वाद्यायतनं परमेश्वरो न जीव इति प्रतिज्ञाद्वयं च व्याहतमित्यपि द्रष्टव्य- मित्यर्थः ।

**वं०प०—— नायं पुरुषो विषाणित्वादिति** । अयं गौः । अनेन विषाणित्वं पुरुषान्निवारितवानिति गम्यते । कुत इत्यत आह **न हि तत्रस्थेनेति** । तत्रस्थेनापि धर्मेण तन्निरासाङ्गीकारे गवि विद्यमानेन विषाणित्वेनापि गौर्नेति निषेधप्रसङ्गादित्याह **नायं गौरिति** । **अयं** गोत्वेन दृश्यमानः । **प्रथमसूत्रे** द्युभ्वाद्यायतनमिति सूत्रे ॥ **अत्र यदीति** । आत्मेति त्विति सूत्र इत्यर्थः ॥ **प्रतिज्ञाद्वयं चेति** । जीवेश्वरैक्ये परमेश्वरस्य द्युभ्वाद्यायतनत्वे जीवस्यैव द्युभ्वाद्यायतनत्वप्राप्तेः न जीवो द्युभ्वाद्यायतनमित्युक्ते व्याहतिरिति भावः ।

**शे०चं०—— युक्तित्वेनोक्तत्वादितीति** । अनेन मूले युक्तिशब्दो युक्तित्वेनोक्तिपर इत्युक्तं भवति । ननु जीवनिवारणे आत्मशब्दस्य युक्तित्वेन सूत्रकारस्य उक्तिरेवासिद्धेति न तया आत्मशब्दस्य जीवान्निवारणसिद्धिः। जीवनिवारणे युक्तित्वेन तदुक्तिसिद्धावपि जीवसाधारणस्यापि तस्य तन्निवारणे हेतुत्वेनोक्तिसम्भवान्न तस्य जीवान्निवारणसिद्धिः । अस्तु वा तस्य तत्सिद्धिः तथाऽपि न तेनैक्यानभ्युपगमः शक्य उपपादयितुमप्रयोजकत्वात् । न चैक्याभ्युपगन्तुः स्वव्याहत्युपपादनार्थत्वेन तत्साधकत्वाभावान्नाप्रयोजकत्वं, जीवान्निवारणसिद्धावपि परमेश्वरे वृत्त्यभ्युपगमे नियामकाभावेन तदसिद्ध्या स्वव्याहत्यप्रसङ्गात् । तत्प्रसङ्गेऽपि वा नानिष्टं पश्यामः इत्येताः शङ्काः क्रमेण परिहरन्नेव तात्पर्यमाह **इदमुक्तं भवतीति** ॥ **प्रथमेति** । द्युभ्वाद्यायतनं स्वशब्दादिति तदधिकरणप्रथमसूत्र इत्यर्थः । एवमात्मशब्दस्य जीवेऽवृत्तिं परमेश्वरे वृत्तिं चोपपाद्यैक्याभ्युपगमे सूत्रकारस्य स्वव्याहतिमुपपादयति **तत्रेति** ॥ **प्रतिज्ञाद्वयं चेति** । यदि जीवेश्वरैक्यं सूत्रकारस्य मतं स्यात् तदा परमेश्वरस्य द्युभ्वाद्याश्रयत्वप्रतिज्ञाने तदभिन्नजीवस्यापि तत्प्रतिज्ञालाभान्न जीवो द्युभ्वाद्यायतनमिति प्रतिज्ञा स्वव्याहता स्यात् । एवं न जीवो द्युभ्वाद्याश्रय इति प्रतिज्ञयैव तदभिन्नेश्वरस्य द्युभ्वाद्याश्रयत्वाभावलाभात् पुनस्तस्य तदाश्रयत्वप्रतिज्ञा सूत्रकारस्य स्वव्याहता स्यात् । इति प्रतिज्ञाद्वयं परस्परं व्याहतमित्यर्थः ।

**वा०र०——** जीवान्निवारणेति पाठः । **जीवेऽवृत्तिमिति** । जीवे वृत्त्यभावमित्यर्थः ।

**स०व्र०—— प्रतिज्ञाद्वयं चेति** । यदि जीवपरमात्मनोरेकत्वं सूत्रकारस्याभिप्रेतं स्यात् तर्हि परमेश्वरस्य द्युभ्वाद्याश्रयत्वे प्रतिज्ञाते जीवस्यापि तदभिन्नत्वेन द्युभ्वाद्याश्रितत्वं प्रतिज्ञातमेवेति न जीवे द्युभ्वाद्याश्रय इति प्रतिज्ञाते व्याघातः स्यात् । एवं न जीवो द्युभ्वाद्याश्रय इति प्रतिज्ञयैव तदभिन्नेश्वरस्य द्युभ्वाद्याश्रयत्वाभावलाभात् पुनर्विष्णुर्द्युभ्वाद्याश्रय इति प्रतिज्ञाते व्याघातः स्यादित्यर्थः ।

**॥ इति आत्मशब्दस्य जीवार्थकत्वं निवारयतः सूत्रकारस्य जीवब्रह्मैक्यं नाभिमतम् ॥**

* * *

**॥ अथ जीवेशयोः ऐक्ये सूत्रान्तरविरोधप्रदर्शनम् ॥**

२६ **सु०—— सूत्रान्तरविरोधं चाह भेदस्येति ।**

अनु०— भेदस्य व्यपदेशं च स्थितिं चादनमेव च ।
भेददार्ढ्ये हेतुमाह सतात्पर्यं जगत्पतिः ॥

यदि **जगत्पतिः** सूत्रकारो जीवेश्वरयोरैक्यं मन्येत तर्हि कथं स एव 'भेदव्यपदेशादि'ति **भेदस्य व्यपदेशं च** 'स्थित्यदनाभ्यां चे'ति **स्थितिं चादनं च सतात्पर्यं** जीवेशभेदं दृढयितुं हेतुमाह । भेदस्य प्रागपि प्रतिपादितत्वात् **'दार्ढ्य'** इत्युक्तम् । अत्राप्यनेकप्रमाणोपन्यासात् सतात्पर्यमिति ।

**परि०— प्रागपीति** । पूर्वपादद्वये 'भेदव्यपदेशाच्चान्यः', 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयते', 'विशेषणभेदव्यपदेशाभ्यां च नेतरौ' इति सूत्रैरित्यर्थः ॥ **अत्रापीति** । द्युभ्वाद्यधिकरणेऽपि स्वशब्दमुक्तोपसृप्यत्वावस्थित्यदनरूपविरुद्धधर्माधिकरणत्वानाम् अनेकप्रमाणानामुक्तेः सतात्पर्यमुक्तमित्युक्तमित्यर्थः ।

**यादु०— प्रागपीति** । प्रथमपादद्वितीयपादयोरित्यर्थः ॥ **अत्रापीति** । द्युभ्वाद्यधिकरणेऽपीत्यर्थः ॥ **अनेकप्रमाणोपन्यासादिति** । स्वशब्दात् प्राणभृच्च नोक्त इत्यात्मशब्दस्य जीवनिराकरणहेतुत्ववचनाद्यन्यथाऽनुपपत्तेः । भेदव्यपदेशादित्यागमस्य 'स्थित्यदनाभ्यां चे'ति विरुद्धधर्माधिकरणत्वरूपानुमानस्योक्तत्वादिति भावः ।

**कं०रा०— भेदस्येति** । 'भेदव्यपदेशाच्चान्य' इत्यादौ प्रागपि जीवेशभेदस्य प्रतिपादितत्वात् दार्ढ्य इत्युक्तमित्यर्थः ॥ **अनेकप्रमाणोपन्यासादिति** ॥ भेदव्यपदेशादिति 'जुष्टं यदा पश्यत्यन्यमीशमि'ति भेदव्यपदेशरूपप्रमाणरूपस्य 'स्थित्यदनाभ्यां चे'ति 'अनश्नन्नन्योऽभिचाकशीती'त्युक्ता या परमात्मसम्बन्ध्यदनं विना स्थितिः 'तयोरन्यः पिप्पलं स्वाद्वत्ती'त्युक्तं यच्च जीवसम्बन्ध्यदनं तद्रूपविरुद्धधर्माध्यासलक्षणप्रमाणस्य च उपन्यासात् सतात्पर्यमित्युक्तमित्यर्थः । अनेकप्रमाणोपन्यासेन सूत्रकारस्य जीवेशभेदे तात्पर्यं ज्ञायत इति भावः ।

**शे०चं०— प्रागपीति** । 'भेदव्यपदेशाच्चे'त्यादिना प्रथमपादे 'शारीरश्चोभयेऽपि ही'त्यादिना द्वितीयपादे चेत्यर्थः ॥ **अत्रापीति** । द्युभ्वाद्यधिकरणेऽपीत्यर्थः ॥ **अनेकेति** । जीवनिवारणे हेतुत्वेनोक्तयन्यथाऽनुपपत्त्यादिरूपानेकप्रमाणेत्यर्थः ।

**॥ इति जीवेशयोः ऐक्ये सूत्रान्तरविरोधप्रदर्शनम् ॥**

* * *

**॥ अथ जीवब्रह्मभेदः न भ्रान्तिसिद्धः ॥**

२७ **सु०—** न कोऽप्ययं विरोधोऽस्ति । परमार्थतो जीवेशयोरेकत्वेऽपि हि व्यावहारिकभेदोऽस्ति तदपेक्षया तानि सूत्राणि । इदं तु परमार्थापेक्षयेति व्यवस्थोपपत्तेरित्याशयेन शङ्कते **व्यावहारिकेति** ।

## अनु०— व्यावहारिकभेदश्चेत्

**अत्र व्यावहारिकशब्देन भ्रान्तिसिद्धोऽभिप्रेयते । प्राक् प्रबोधादित्युक्तानुवादत्वात् । जीवेश्वरभेदो भ्रान्तिसिद्ध इति वदन् प्रष्टव्यः । किमयमेव भेदो भ्रान्तिसिद्धः किं वा भेदमात्रमिति । नाद्यः । अपसिद्धान्तात् । द्वितीये दोषमाह केति ।**

## क्वासावव्यावहारिकः ।

**भ्रान्तेरभ्रान्तिपूर्वकत्वात् जीवेश्वरभेदस्य भ्रान्तिकल्पितत्वे क्वचित्सत्यो भेदोऽङ्गीकर्तव्यः । क्वासौ न क्वापि । कुत्रापि भेदस्य सत्यत्वानङ्गीकारे जीवेशभेदारोपोऽपि न सम्भवतीति भावः ।**

**परि०—** मूलमवतारयति **न कोऽपीति** ॥ **तानीति** । त्रिपाद्यामुक्तानि ॥ **इदं त्विति** । 'आत्मेती'ति सूत्रमित्यर्थः । व्यावहारिकशब्देन व्यवहारसिद्धत्वोक्तौ सत्यत्वप्राप्त्याऽग्रेतनमूलघटनाऽयोगादाह **अत्र व्यावहारिकशब्देनेति** । कथमेवमभिप्रायो ज्ञायत इत्यत आह **प्राक्प्रबोधादिति**। परभाष्ये सिद्धान्ते जीवेशयोरेकत्वे संसार्यभावं प्रत्यक्षविरोधं च पूर्वपक्ष्युक्तमनूद्य प्रबोधात्प्राक्संसारिसत्त्वाभ्युपगमादित्युक्त्या भ्रान्तिसिद्ध इत्यवगम्यते । तदनुवादत्वान्मूलस्येत्यर्थः ।

**यादु०—** अत्र व्यावहारिकशब्दो न व्यवहारनिर्वाहहेतुत्वरूपार्थक्रियाकारित्वपरो विवक्षितः, वक्ष्यमाणदूषणानुपपत्तेः । नापि बाध्यत्वपरः, 'तस्यापि बाध्यता चेत्स्यादि'ति ग्रन्थपर्यालोचनया बाध्यत्वस्य व्यावहारिकत्वादन्यत्वेनावगमात् । अत आह **अत्र व्यावहारिकशब्देनेति** ॥ **प्राक्प्रबोधादित्युक्तत्वादिति** । परेण ह्यत्र सिद्धान्तग्रन्थे, यदप्युक्तमधिकार्यभावः प्रत्यक्षादिविरोधश्चेति पूर्वपक्ष्युक्तमनूद्य तदप्यसत् । प्राक् प्रबोधात् संसारित्वाभ्युपगमात् । तद्विषयत्वाच्च प्रत्यक्षादिव्यवहारस्येत्याद्युक्तम् । अत्र प्रबोधात्प्रागित्युक्त्या भ्रान्तिदशाया-

मित्यर्थलाभे भ्रान्तिसिद्धो भेद इत्यभिप्रेतमिति ज्ञायते । तदनुवादरूपं मूलवाक्यमित्यर्थः ॥ **अभ्रान्तीति** । आरोप्यसदृशप्रधानप्रमितिपूर्वकत्वादित्यर्थः ।

**वं०प०— इदं त्विति** । आत्मेति सूत्रमित्यर्थः । **अयमेव** जीवेश्वरभेद एव ।

**कं०रा०— इदं न्विति** । 'आत्मेति तूपगच्छन्ति ग्राहयन्ति चे'ति सूत्रं तु पारमार्थिकजीवेशैक्यापेक्षयेत्यर्थः ॥ **प्राक्प्रबोधादित्युक्तानुवादत्वादिति** । प्राक्प्रबोधात्संसारित्वाभ्युपगमादित्यत्र अद्वैतसाक्षात्कारात्प्राग् जीवस्य भेदभ्रमादिरूपसंसारोऽस्तीति यदुक्तं तदनुवादरूपत्वात् व्यावहारिकभेद इत्यस्य व्यावहारिकभेदेन भ्रान्तिसिद्धोऽभिप्रेयत इति भावः ।

**शे०चं०—** ननु व्यावहारिकेत्युत्तरवाक्यमनर्थकम् । न चैतदुदाहृतभेदसूत्राणां विषयकथनेन भिन्नविषयत्वोपपादकतया तत्सूत्रविरोधपरिहारार्थत्वान्न तदिति वाच्यम् । भेदसूत्रविषयोपदर्शनेऽप्यात्मेति त्वित्यभेदसूत्रविषयानुपदर्शनेन भिन्नविषयत्वासिद्ध्याऽस्योदाहृतसूत्रविरोधपरिहाराय अपर्याप्तत्वादित्यतोऽत्र भेदव्यावहारिकत्वकथनेनाभेदपारमार्थिकत्वस्य सूचितत्वेन भेदाभेदसूत्रयोर्भिन्नविषयत्वसिद्धिसम्भवाद्युक्तमस्य तद्विरोधपरिहारकत्वमित्यभिप्रेत्य शङ्काग्रन्थतात्पर्यमाह **न कोऽपीति** । विरोधितयोदाहृतसूत्रेषु न केनापि विरोध इत्यर्थः । व्यावहारिकशब्दस्य भ्रान्तिसिद्धपरत्वे उपष्टम्भकमाह **प्राक् प्रबोधादित्युक्तानुवादत्वादिति** । 'व्यावहारिकभेदश्चेदि'त्यस्याः शङ्काया इति शेषः । तत्र प्रबोधात्प्राक्पदस्य भ्रान्तिदशापरत्वेन भेदस्य भ्रान्तिसिद्धत्वावभासादिति भावः । ननु जीवेश्वरभेदस्य भ्रान्तिसिद्धत्वेऽपि भेदमात्रस्य तदनभ्युपगमादभ्रान्तिपूर्वकभेदारोपसम्भवात् तदसम्भवपरकासावित्युत्तरग्रन्थासङ्गतिरित्यतो नेदं जीवेश्वरभेदमात्रस्य भ्रान्तिसिद्धत्वे दूषणं किन्तु भेदमात्रस्य तथात्वे एवेत्यतो नानुपपत्तिरित्यभिप्रेत्य तत्पक्षदूषणपरतयोत्तरग्रन्थं योजयितुं सम्भावितविकल्पद्वयप्रदर्शनपूर्वकमाद्यं पक्षं बहिरेव दूषयति **जीवेश्वरभेद इत्यादि** ॥ **अपसिद्धान्तादिति** । भेदमात्रस्य भ्रान्तिसिद्धतायास्तत्सिद्धान्तत्वेन जीवेश्वरभेदस्यैव तत्सिद्धत्ववर्णनस्य सिद्धान्तविरुद्धत्वादिति भावः ॥ **अभ्रान्तीति** । आरोप्यसदृशप्रधानप्रमितिपूर्वकत्वादित्यर्थः ॥ **अङ्गीकर्तव्य इति** । तस्य भ्रान्तिहेतुभूतप्रधानप्रमित्युपपादकत्वादिति भावः ॥ **न क्वापीति** । भेदमात्रस्य भ्रान्तिसिद्धत्वाभ्युपगमादिति भावः । किमनेनोक्तं भवतीत्यतस्तात्पर्यमाह **कुत्रापीति** ।

**वा०र०— परिहारार्थत्वादिति** । परिहारशङ्कनार्थत्वादित्यर्थः । आत्मेति त्वित्यभेदेति पाठः । **प्रबोधात्प्राक् पदस्येति** उक्तरूपपदस्येत्यर्थः ।

**स०व्र०— प्राक्प्रबोधादित्युक्तानुवादत्वादिति** । अस्याः शङ्कायाः इति शेषः ।

**॥ इति जीवब्रह्मभेदः न भ्रान्तिसिद्धः ॥**

॥ अथ भेदमात्रस्य भ्रान्तिसिद्धत्वे प्रतिज्ञायाः व्याहतत्वप्रसङ्गः ॥

२८ **सु०—** स्यादेतत् । नास्त्येव कोऽपि भेदः सत्यः । तथाऽपि जीवेशभेदभ्रान्तिरुपपद्यते । भ्रान्तिर्हि संस्कारमपेक्ष्यते । संस्कारश्च ज्ञानमात्रम् । अतः पूर्वपूर्वभ्रमसंस्कारादुत्तरोत्तरभ्रान्त्युत्पादः । अनादिश्चायं संस्कार इति । मैवम् । भेदमात्रस्य मिथ्यात्वे प्रमिते खलु तद्बलादेषा कल्पनोपपद्यते । न चैवम् । सर्वोऽपि भेदो भ्रान्त इति हि प्रतिज्ञैव तावद्व्याहता । दूरे प्रमाणोपन्यास इत्याशयवान् सोपपत्तिकं तावत् पृच्छति **व्यावहारिकमिति** ।

## अनु०— व्यावहारिकमित्येव वचनं व्यावहारिकम् । उत नेति विकल्पे तु

भेदमात्रमिति शेषः । तिष्ठतु तावदन्यदिति **एवार्थः** । **इति विकल्पे तु** पक्षद्वैते-(द्वये)(द्वैधे)(तु) सम्भवति (सति), कं पक्षमवलम्बस इति शेषः । अत्र सर्वत्र **वचन**शब्देन तदर्थो लक्ष्यते । सर्वोऽपि भेदो भ्रान्तिकल्पित इति वाक्यार्थो भ्रान्तिकल्पितोऽथ परमार्थ इति प्रश्नार्थः ।

**परि०—** सृष्ट्यादौ कथमित्यत आह **अनादिश्चेति** ॥ **सोपपत्तिकमिति** । तृतीयकल्पावकाशो यथा नास्ति तथा विकल्पकरणात् **सोपपत्तिकमित्युक्तम्** । यद्वा व्यावहारिकशब्दार्थमपृष्ट्वा तत्तद्रूपविकल्पकरणात् सोपपत्तिकमित्युक्तम् ॥ **इति शेष इति** । भेदमात्रं व्यावहारिकं इति वचनमित्यर्थः ॥ **अन्यदिति** । प्रमाणोपन्यासादीत्यर्थः ।

**यादु०—** आदिसृष्टौ कथमित्यत आह **अनादिश्चेति** । **सोपपत्तिकमिति** । मूले विकल्प इत्यनेन पक्षद्वयमेव सम्भावितम् । तृतीयश्च पक्षो न सम्भावितः । अत इत्युपपत्तेरुक्तत्वादिति भावः ॥ **अन्यदिति** । प्रमाणोपन्यासादिकमित्यर्थः ॥ **इति शेष इति** । अन्यथा सप्तम्या उत्तरवाक्येनानन्वय इति भावः ।

**कं०रा०—** **ज्ञानमात्रमिति** । मात्रशब्देन भेदसत्यत्वं व्यवच्छिद्यते अपेक्षित इति पूर्वेण सम्बन्धः ।

**शे०चं०—** **नास्त्येवेति** । ततश्च नापसिद्धान्त इति भावः । नन्वेवं भेदमात्रस्य कल्पितत्वप्राप्त्या आरोप्यसदृशसत्यप्रधानाभावेन न तत्सापेक्षजीवेश्वरभेदारोपः स्यादित्यत आह **तथाऽपीति** । तत्कथमित्यतो न तावत्प्रधानं स्वरूपेणोपयुज्यते । तथा सत्यज्ञातरजतस्यापि रजतारोपप्रसङ्गात् । नापि ज्ञानेन । ज्ञानस्य चिर-

विनष्टस्य कारणत्वानुपपत्तेः । किन्तु संस्कारेण । तथा च मिथ्यार्थस्याप्युपपद्यत एव प्राधान्यमित्याशयेनाह **भ्रान्तिर्हीति** । तर्हि भ्रान्तिहेतुभूतसंस्कारार्थतयैव प्रधानसत्तापेक्षाऽस्त्वित्यतः तस्य ज्ञानमात्रजन्यतया तत्प्रमयेव तद्भ्रमेणाप्युत्पादान्न प्रधानसत्तापेक्षत्वमित्याशयेनाह **संस्कारश्चेति** । न च संस्कारस्य ज्ञानमात्रजन्यत्वेऽपि प्रमाजन्यसंस्कारस्यैव भ्रान्तिहेतुत्वमिति संस्कारजनकप्रमोपयोगितया प्रधानसत्ताऽपेक्षितैवेति वाच्यम् । सत्यपि संस्कारे प्रमाजन्यत्वाभावापराधेन भ्रमाभावादर्शनेन प्रमाभ्रमसाधारणज्ञानमात्रस्यैव तद्धेतुत्वात् । न च तार्किकस्येवारोप्यमेव देशान्तरादौ सदित्यावयोर्मतमित्याशयात् । नन्वेवमपि पूर्वभेदभ्रमानुपपत्तिः । प्रधानाभावादिति चेत् । न तत्पूर्वं भ्रान्तिसिद्धभेदस्यैव तत्र प्रधानत्वाभ्युपगमेन तदप्रसङ्गादित्याशयेनाह **अत इति** । **भ्रमसंस्कारात्** भ्रमजन्यसंस्कारादित्यर्थः । नन्वेवमपि कल्पाद्यभेदभ्रमानुपपत्तिः । तत्पूर्वं भेदभ्रमाभावेन तज्जन्यसंस्काराभावादित्यतः तत्कल्पीयभ्रमजन्यसंस्काराभावेऽपि पूर्वकल्पीयभ्रमजन्यसंस्कारसद्भावान्न तदनुपपत्तिरपीत्याशयेनाह **अनादिश्चेति** ॥ **सोपपत्तिकमिति** । पक्षद्वयस्यैव विकल्पनीयत्वप्रयोजकीभूतसम्भावनारूपायाः पक्षान्तराविकल्पनिमित्तभूतासम्भावनारूपायाश्चोपपत्तेर्मूले विकल्प इत्यनेन सूचितत्वादिति भावः । भेदः स्यात् पारमार्थिक इत्युत्तरग्रन्थानुरोधेनापेक्षितं पूरयति **भेदमात्रमितीति** । ननु प्रतिज्ञाया इव तत्प्रमाणस्याप्युक्तरीत्या विकल्प्य दूषयितुं शक्यत्वादेवकारवैयर्थ्यमित्याशङ्क्य तात्कालिकतद्दूषणानास्थासूचकत्वात् तस्य नानुपपत्तिरित्याशयेन तदर्थमाह **तिष्ठतु तावदिति** ॥ **इति शेष इति** । अन्यथा विकल्प इति सप्तम्या अनन्वयापातादिति भावः ॥ **अत्र सर्वत्रेति** । वचनेति यत्र श्रूयते यत्रानुवर्तते तत्र सर्वत्र इत्यर्थः । वचनशब्देन तदर्थलक्षणया सिद्धविकल्पार्थमाह **सर्वोऽपीति** ।

**वा०र०**— न चात्मन्यनात्मभ्रमः कुत्रापि दृष्ट इति *तत्त्वनिर्णय*वाक्यावताररूपे प्रधानं किं स्वरूपेणेति ग्रन्थं मिथ्यात्वहेतूनां प्रतिकूलतर्ककथनावसरे 'किन्तु तत्संस्कारः स च तत्प्रमयेवे'त्यादि *न्यायामृतं* च मनसि निधायाह **न तावत्प्रधानमित्यादिना आशयादित्यन्तेन** ॥ **यत्र चानुवर्तत इति** । उपलक्षणं चैतत् । अत्र तस्येति परामृश्यते । तत्रापि द्रष्टव्यम् । 'स्ववाचो सत्यते'त्युत्तरानुभाष्यगतवाक्यपदस्य तु वागर्थस्येति व्याख्यानं मूल एवास्ति ।

* * *

२९. **सु०**— आद्यं शङ्कते **यदीति** ।

**अनु०**— **यदि स्याद्व्यावहारिकम् ।**

**एतद्वचनमिति वर्तते । अत्रापि पृच्छामो वाक्यार्थोऽयं बाध्यो न वेति । नेति पक्षे भ्रान्तकल्पितोऽपि न भवेत् । कुत्रापि कदाऽपि केनाप्यबाध्यस्य भ्रान्तिकल्पितत्वे ब्रह्मणोऽपि तथात्वापत्तेः । प्रथमं शङ्कते तस्येति ।**

**॥ अथ भेदमात्रस्य भ्रान्तिसिद्धत्वे प्रतिज्ञायाः व्याहतत्वप्रसङ्गः ॥**

२८ **सु०—** स्यादेतत् । नास्त्येव कोऽपि भेदः सत्यः । तथाऽपि जीवेशभेदभ्रान्तिरुपपद्यते । भ्रान्तिर्हि संस्कारमपेक्ष्यते । संस्कारश्च ज्ञानमात्रम् । अतः पूर्वपूर्वभ्रमसंस्कारादुत्तरोत्तरभ्रान्त्युत्पादः । अनादिश्चायं संस्कार इति । मैवम् । भेदमात्रस्य मिथ्यात्वे प्रमिते खलु तद्बलादेषा कल्पनोपपद्यते । न चैवम् । सर्वोऽपि भेदो भ्रान्त इति हि प्रतिज्ञैव तावद्व्याहता । दूरे प्रमाणोपन्यास इत्याशयवान् सोपपत्तिकं तावत् पृच्छति **व्यावहारिकमिति** ।

**अनु०—** व्यावहारिकमित्येव वचनं व्यावहारिकम् ।
उत नेति विकल्पे तु

भेदमात्रमिति शेषः । तिष्ठतु तावदन्यदिति **एवार्थः** । **इति विकल्पे तु** पक्षद्वैते-(द्वये)(द्वैधे)(तु) सम्भवति (सति), कं पक्षमवलम्बस इति शेषः । अत्र सर्वत्र **वचन**शब्देन तदर्थो लक्ष्यते । सर्वोऽपि भेदो भ्रान्तिकल्पित इति वाक्यार्थो भ्रान्तिकल्पितोऽथ परमार्थ इति प्रश्नार्थः ।

**परि०—** सृष्ट्यादौ कथमित्यत आह **अनादिश्चेति** ॥ **सोपपत्तिकमिति** । तृतीयकल्पावकाशो यथा नास्ति तथा विकल्पकरणात् **सोपपत्तिकमित्युक्तम्** । यद्वा व्यावहारिकशब्दार्थमपृष्ट्वा तत्तद्रूपविकल्पकरणात् सोपपत्तिकमित्युक्तम् ॥ **इति शेष इति** । भेदमात्रं व्यावहारिकं इति वचनमित्यर्थः ॥ **अन्यदिति** । प्रमाणोपन्यासादीत्यर्थः ।

**यादु०—** आदिसृष्टौ कथमित्यत आह **अनादिश्चेति** । **सोपपत्तिकमिति** । मूले विकल्प इत्यनेन पक्षद्वयमेव सम्भावितम् । तृतीयश्च पक्षो न सम्भावितः । अत इत्युपपत्तेरुक्तत्वादिति भावः ॥ **अन्यदिति** । प्रमाणोपन्यासादिकमित्यर्थः ॥ **इति शेष इति** । अन्यथा सप्तम्या उत्तरवाक्येनानन्वय इति भावः ।

**कं०रा०—** **ज्ञानमात्रमिति** । मात्रशब्देन भेदसत्यत्वं व्यवच्छिद्यते अपेक्षित इति पूर्वेण सम्बन्धः ।

**शे०चं०—** **नास्त्येवेति** । ततश्च नापसिद्धान्त इति भावः । नन्वेवं भेदमात्रस्य कल्पितत्वप्राप्त्या आरोप्यसदृशसत्यप्रधानाभावेन न तत्सापेक्षजीवेश्वरभेदारोपः स्यादित्यत आह **तथाऽपीति** । तत्कथमित्यतो न तावत्प्रधानं स्वरूपेणोपयुज्यते । तथा सत्यज्ञातरजतस्यापि रजतारोपप्रसङ्गात् । नापि ज्ञानेन । ज्ञानस्य चिर-

विनष्टस्य कारणत्वानुपपत्तेः । किन्तु संस्कारेण । तथा च मिथ्यार्थस्याप्युपपद्यत एव प्राधान्यमित्याशयेनाह **भ्रान्तिर्हीति** । तर्हि भ्रान्तिहेतुभूतसंस्कारार्थतयैव प्रधानसत्तापेक्षाऽस्त्वित्यतः तस्य ज्ञानमात्रजन्यतया तत्प्रमयेव तद्भ्रमेणाप्युत्पादान्न प्रधानसत्तापेक्षत्वमित्याशयेनाह **संस्कारश्चेति** । न च संस्कारस्य ज्ञानमात्रजन्यत्वेऽपि प्रमाजन्यसंस्कारस्यैव भ्रान्तिहेतुत्वमिति संस्कारजनकप्रमोपयोगितया प्रधानसत्ताऽपेक्षितैवेति वाच्यम् । सत्यपि संस्कारे प्रमाजन्यत्वाभावापराधेन भ्रमाभावादर्शनेन प्रमाभ्रमसाधारणज्ञानमात्रस्यैव तद्धेतुत्वात् । न च तार्किकस्येवारोप्यमेव देशान्तरादौ सदित्यावयोर्मतमित्याशयात् । नन्वेवमपि पूर्वभेदभ्रमानुपपत्तिः । प्रधानाभावादिति चेत् । न तत्पूर्वं भ्रान्तिसिद्धभेदस्यैव तत्र प्रधानत्वाभ्युपगमेन तदप्रसङ्गादित्याशयेनाह **अत इति** । **भ्रमसंस्कारात्** भ्रमजन्यसंस्कारादित्यर्थः । नन्वेवमपि कल्पाद्यभेदभ्रमानुपपत्तिः । तत्पूर्वं भेदभ्रमाभावेन तज्जन्यसंस्काराभावादित्यतः तत्कल्पीयभ्रमजन्यसंस्काराभावेऽपि पूर्वकल्पीयभ्रमजन्यसंस्कारसद्भावान्न तदनुपपत्तिरपीत्याशयेनाह **अनादिश्चेति** ॥ **सोपपत्तिकमिति** । पक्षद्वयस्यैव विकल्पनीयत्वप्रयोजकीभूतसम्भावनारूपायाः पक्षान्तराविकल्पनिमित्तभूतासम्भावनारूपायाश्चोपपत्तेर्मूले विकल्प इत्यनेन सूचितत्वादिति भावः । भेदः स्यात् पारमार्थिक इत्युत्तरग्रन्थानुरोधेनापेक्षितं पूरयति **भेदमात्रमितीति** । ननु प्रतिज्ञाया इव तत्प्रमाणस्याप्युक्तरीत्या विकल्प्य दूषयितुं शक्यत्वादेवकारवैयर्थ्यमित्याशङ्क्य तात्कालिकतद्दूषणानास्थासूचकत्वात् तस्य नानुपपत्तिरित्याशयेन तदर्थमाह **तिष्ठतु तावदिति** ॥ **इति शेष इति** । अन्यथा विकल्प इति सप्तम्या अनन्वयापातादिति भावः ॥ **अत्र सर्वत्रेति** । वचनेति यत्र श्रूयते यत्रानुवर्तते तत्र सर्वत्र इत्यर्थः । वचनशब्देन तदर्थलक्षणया सिद्धविकल्पार्थमाह **सर्वोऽपीति** ।

**वा०र०—** न चात्मन्यनात्मभ्रमः कुत्रापि दृष्ट इति *तत्त्वनिर्णय*वाक्यावताररूपे प्रधानं किं स्वरूपेणेति ग्रन्थं मिथ्यात्वहेतूनां प्रतिकूलतर्ककथनावसरे 'किन्तु तत्संस्कारः स च तत्प्रमयेवे'त्यादि *न्यायामृतं* च मनसि निधायाह **न तावत्प्रधानमित्यादिना आशयादित्यन्तेन** ॥ **यत्र चानुवर्तत इति** । उपलक्षणं चैतत् । अत्र तस्येति परामृश्यते । तत्रापि द्रष्टव्यम् । 'स्ववाचो सत्यते'त्युत्तरानुभाष्यगतवाक्यपदस्य तु वागर्थस्येति व्याख्यानं मूल एवास्ति ।

* * *

२९ **सु०—** आद्यं शङ्कते **यदीति** ।

**अनु०—** यदि स्याद्व्यावहारिकम् ।

एतद्वचनमिति वर्तते । अत्रापि पृच्छामो वाक्यार्थोऽयं बाध्यो न वेति । नेति पक्षे भ्रान्तकल्पितोऽपि न भवेत् । कुत्रापि कदाऽपि केनाप्यबाध्यस्य भ्रान्तिकल्पितत्वे ब्रह्मणोऽपि तथात्वापत्तेः । प्रथमं शङ्कते **तस्येति** ।

## तस्यापि बाध्यता चेत्स्यात्

**तस्य वचनस्य न केवलं भ्रान्तिकल्पितत्वं किन्तु बाध्यताऽपि स्यात् चेदित्यर्थः । दूषयति भेद इति ।**

## भेदः स्यात्पारमार्थिकः ।

**सर्वोऽपि भेदो भ्रान्त इति वाक्यार्थस्य भ्रान्तत्वे बाध्यत्वे च सकल(लो )भेदः पारमार्थिकः स्यात् ।**

**यादु०— किन्तु बाध्यताऽपीति** । अत्रोक्तवाक्यार्थस्यासत्यतालाभायोभयोक्तिः । एकैकमात्रोक्तौ तदलाभात् । तथा हि । भ्रान्तिकल्पितत्वमात्रोक्तौ परीत्या अनिर्वाच्यत्वमेव स्यात् न असत्यत्वम् । बाध्यत्वमात्रोक्तौ च 'विज्ञातस्यान्यथा सम्यग्विज्ञानं ह्येव तन्मतमि'त्यस्मद्रीत्या सत्यत्वमेव स्यात् । असत्यत्वालाभे च 'भेदः स्यात् पारमार्थिक' इति वक्ष्यमाणमापादनं न श्लिष्टतरं' परस्परविरहरूपत्वाप्रात्या वक्ष्यमाणव्यात्यसम्भवात् । उभयोक्तौ भ्रान्तिकल्पितस्य बाध्यत्वं त्रैकालिकनिषेधप्रतियोगित्वमेव प्राप्नोति नान्यत् । तदेव असत्यत्वमिति तल्लाभः । एवं चाग्रेतनमेकस्यासत्यतायां हि इत्याद्युदाहरणवाक्यमपि श्लिष्टतरं भवति । न च व्यावहारिकपदेनोक्तरूपमसत्यत्वमेव कस्मान्न विवक्षितमिति वाच्यम् । प्राक् प्रबोधादित्यादिना तदलाभेनानुक्तोपालम्भापत्तेरिति ।

**शे०चं०—** आद्यपक्षस्य मूलारूढतामुपदर्शयितुमपेक्षितं पूरयति **एतद्वचनमितीति** । भेदमात्रं व्यावहारिकमित्येतद्वचनमित्यर्थः । ततश्च सर्वोऽपि भेदो भ्रान्तिकल्पित इति वाक्यार्थो व्यावहारिको मूलार्थोऽवधेयः। ननूक्तवाक्यार्थस्य भ्रान्तिसिद्धत्वेऽप्यबाध्यत्वाभ्युपगमात् । तद्बाध्यतोपजीवनेन भेदपारमार्थिकत्वापादनपरोत्तरग्रन्थानुपपत्तिरित्यतोऽस्य बाध्यत्वपक्ष एव दूषणत्वेन तत्पक्षदूषणत्वाभावान्नानुपपत्तिरित्यभिप्रेत्यात्र सम्भावितपक्षद्वयं विकल्प्य द्वितीयपक्षं बहिरेव प्रदूष्य आद्यपक्षशङ्कासमाधानपरतयोत्तरग्रन्थं सङ्गमयति **अत्रापीति** ॥ **वाक्यार्थोऽयमिति** । सर्वोऽपि भेदो भ्रान्तिकल्पित इत्येतद्वाक्यार्थ इत्यर्थः । तद्बाध्यत्वाबाध्यत्वविचारस्यैव तद्भ्रान्तिसिद्धत्वाभ्रान्तिसिद्धत्वोपपादकत्वादिति भावः ॥ तस्यापीति मूले तच्छब्दपरामर्शविषयो न प्रतीयते । अपिशब्दस्यापि यथाश्रुतसम्बन्धे वैयर्थ्यं चेत्यतस्तस्येत्येतत्परामर्शविषयप्रदर्शनपूर्वकमपिशब्दस्य भिन्नक्रमत्वेन समुच्चयप्रदर्शनेन च सार्थक्यं दर्शयन्नेव शङ्काभाष्यं व्याचष्टे **तस्येत्यादि** । सर्वोऽपि भेदो भ्रान्तिसिद्ध इत्येतद्वचनार्थस्येत्यर्थः । प्रथमपक्षदूषणतां भाष्यस्य मूलारूढां कर्तुमपेक्षितमापादकं पूरयन् योजयति **सर्वोऽपीति** । सर्वोऽपि भ्रान्तिसिद्ध इति वाक्यार्थः परमार्थ इति द्वितीयमित्यर्थः ।

वा०र०— **मूलार्थ इति** । व्यावहारिको यदीत्येतावन्मूलार्थो निष्पन्नोऽवधेय इत्यर्थः । इत्येतावन्मूलार्थसिद्ध इत्यवधेयमिति यावत् । भिन्नक्रमत्वमात्रोक्तावपि न वैयर्थ्यपरिहारोऽर्थालाभादित्यत उक्तं **समुच्चयेति** । सर्वोऽपीत्येतत्प्रतीकोपादानानन्तरं सर्वोऽपि भेद इत्यतः प्राग्द्वितीयमितीतिप्रतीकोपादानयुक्तः पाठः । तदभावस्तु लेखकप्रमादात् ।

* * *

३० **सु०— द्वितीयमाशङ्कते अन्यावहारिकत्वमिति ।**

**अनु०— अव्यावहारिकत्वं चेत्**

**'तस्य वचनस्ये'ति वर्तते । निराकरोति भेद इति ।**

**भेदोऽयं सत्यतां गतः ।**

**तिष्ठतु तावदन्यः । वाक्यार्थस्य सत्यत्वे तस्य ब्रह्मणश्च यो भेदो, यश्च पदार्थानामसत्यत्वे(मसत्त्वे) वाक्यार्थस्य सत्यत्वानुपपत्तेः पदार्थानां परस्परं वाक्यार्थाद्ब्रह्मणश्च भेदः; स तावत् सत्यतां गतः । उभयथाऽपि वाक्यार्थो व्याहत इत्यर्थः ।**

परि०— **अन्य इति** । भेदान्तरसत्त्वोपपादनादित्यर्थः । 'यश्चे'त्यस्य भेद इति दूरेण अन्वयः ॥ **पदार्थानामसत्त्वेति** । 'सर्वोऽपि भेदो भ्रान्तिकल्पित' इति वाक्यगतानि यानि पदानि तदर्थनामसत्त्वे इत्यर्थः ॥ **वाक्यार्थसत्यत्वेति** । पदार्थसंसर्गातिरिक्तवाक्यार्थस्य अभावादिति भावः ॥ **उभयथाऽपीति** । भेदमात्रं भ्रान्तिसिद्धमिति वाक्यार्थस्य भ्रान्तिसिद्धत्वाभ्रान्तिसिद्धत्वपक्षद्वयेऽपि भेदमात्रं भ्रान्तिसिद्धमिति वाक्यार्थोऽनुपपन्न इत्यर्थः ।

यादु०— **व्याहत इति** । प्रमाणबाधित इत्यर्थः । तथाचाद्ये बाधो, द्वितीयेंऽशे बाध इति ज्ञातव्यम् ।

वं०प०— **अन्यो** घटपटादिभेदः । यो भेदः स तावत् सत्यतां गत इत्यन्वयः । पदार्थानां परस्परं भेदस्य सत्यत्वोपपादनायोक्तं **पदार्थानामसत्यत्व इति** ॥ **वाक्यार्थेति** । पदसमुदायरूपत्वाद्वाक्यस्येत्याशयः । पदार्थानां यः परस्परं भेदो यश्च पदार्थानां वाक्यार्थात् भेदः यश्च पदार्थानां ब्रह्मणः सकाशाद्भेद इति योज्यम् ।

शे०चं०— द्वितीयपक्षशङ्काया भाष्यारूढतामुपदर्शयितुमपेक्षितमनुवृत्त्या पूरयति **तस्येति** । वर्तत इति तत्परामृष्टदर्शनं **वचनस्येति** । सर्वोऽपि भेदो भ्रान्तिसिद्ध इत्येतद्वचनार्थस्येत्यर्थः । अयमितीदमाव्यावर्त्यतया

## तस्यापि बाध्यता चेत्स्यात्

**तस्य वचनस्य न केवलं भ्रान्तिकल्पितत्वं किन्तु बाध्यताऽपि स्यात् चेदित्यर्थः । दूषयति भेद इति ।**

## भेदः स्यात्पारमार्थिकः ।

**सर्वोऽपि भेदो भ्रान्त इति वाक्यार्थस्य भ्रान्तत्वे बाध्यत्वे च सकल(लो )भेदः पारमार्थिकः स्यात् ।**

**यादु०— किन्तु बाध्यताऽपीति** । अत्रोक्तवाक्यार्थस्यासत्यतालाभायोभयोक्तिः । एकैकमात्रोक्तौ तदलाभात् । तथा हि । भ्रान्तिकल्पितत्वमात्रोक्तौ पररीत्या अनिर्वाच्यत्वमेव स्यात् न असत्यत्वम् । बाध्यत्वमात्रोक्तौ च 'विज्ञातस्यान्यथा सम्यग्विज्ञानं ह्येव तन्मतमि'त्यस्मद्रीत्या सत्यत्वमेव स्यात् । असत्यत्वालाभे च 'भेदः स्यात् पारमार्थिक' इति वक्ष्यमाणमापादनं न श्लिष्टतरं' परस्परविरहरूपत्वाप्राप्त्या वक्ष्यमाणव्याप्त्यसम्भवात् । उभयोक्तौ भ्रान्तिकल्पितस्य बाध्यत्वं त्रैकालिकनिषेधप्रतियोगित्वमेव प्राप्नोति नान्यत् । तदेव असत्यत्वमिति तल्लाभः । एवं चाग्रेतनमेकस्यासत्यतायां हि इत्याद्युदाहरणवाक्यमपि श्लिष्टतरं भवति । न च व्यावहारिकपदेनोक्तरूपमसत्यत्वमेव कस्मान्न विवक्षितमिति वाच्यम् । प्राक् प्रबोधादित्यादिना तदलाभेनानुक्तोपालम्भापत्तेरिति ।

**शे०चं०—** आद्यपक्षस्य मूलारूढतामुपदर्शयितुमपेक्षितं पूरयति **एतद्वचनमितीति** । भेदमात्रं व्यावहारिकमित्येतद्वचनमित्यर्थः । ततश्च सर्वोऽपि भेदो भ्रान्तिकल्पित इति वाक्यार्थो व्यावहारिको मूलार्थोऽवधेयः । ननूक्तवाक्यार्थस्य भ्रान्तिसिद्धत्वेऽप्यबाध्यत्वाभ्युपगमात् । तद्बाध्यतोपजीवनेन भेदपारमार्थिकत्वापादनपरोत्तरग्रन्थानुपपत्तिरित्यतोऽस्य बाध्यत्वपक्ष एव दूषणत्वेन तत्पक्षदूषणत्वाभावान्नानुपपत्तिरित्यभिप्रेत्यात्र सम्भावितपक्षद्वयं विकल्प्य द्वितीयपक्षं बहिरेव प्रदूष्य आद्यपक्षशङ्कासमाधानपरतयोत्तरग्रन्थं सङ्गमयति **अत्रापीति** ॥ **वाक्यार्थोऽयमिति** । सर्वोऽपि भेदो भ्रान्तिकल्पित इत्येतद्वाक्यार्थ इत्यर्थः । तद्बाध्यत्वाबाध्यत्वविचारस्यैव तद्भ्रान्तिसिद्धत्वाभ्रान्तिसिद्धत्वोपपादकत्वादिति भावः ॥ तस्यापीति मूले तच्छब्दपरामर्शविषयो न प्रतीयते । अपिशब्दस्यापि यथाश्रुतसम्बन्धे वैयर्थ्यं चेत्यतस्तस्येत्येतत्परामर्शविषयप्रदर्शनपूर्वकमपिशब्दस्य भिन्नक्रमत्वेन समुच्चयप्रदर्शनेन च सार्थक्यं दर्शयन्नेव शङ्काभाष्यं व्याचष्टे **तस्येत्यादि** । सर्वोऽपि भेदो भ्रान्तिसिद्ध इत्येतद्वचनार्थस्येत्यर्थः । प्रथमपक्षदूषणतां भाष्यस्य मूलारूढां कर्तुमपेक्षितमापादकं पूरयन् योजयति **सर्वोऽपीति** । सर्वोऽपि भ्रान्तिसिद्ध इति वाक्यार्थः परमार्थ इति द्वितीयमित्यर्थः ।

**वा०र०— मूलार्थ इति** । व्यावहारिको यदीत्येतावन्मूलार्थो निष्पन्नोऽवधेय इत्यर्थः । इत्येताव-न्मूलार्थसिद्ध इत्यवधेयमिति यावत् । भिन्नक्रमत्वमात्रोक्तावपि न वैयर्थ्यपरिहारोऽर्थालाभादित्यत उक्तं **समुच्चयेति** । सर्वोऽपीत्येतत्प्रतीकोपादानानन्तरं सर्वोऽपि भेद इत्यतः प्राग्द्वितीयमितीतिप्रतीकोपादानयुक्तः पाठः । तदभावस्तु लेखकप्रमादात् ।

* * *

३० **सु०— द्वितीयमाशङ्कते अव्यावहारिकत्वमिति** ।

## अनु०— अव्यावहारिकत्वं चेत्

'तस्य वचनस्ये'ति वर्तते । निराकरोति **भेद इति** ।

## भेदोऽयं सत्यतां गतः ।

**तिष्ठतु तावदन्यः । वाक्यार्थस्य सत्यत्वे तस्य ब्रह्मणश्च यो भेदो, यश्च पदार्थानामसत्यत्वे(मसत्त्वे) वाक्यार्थस्य सत्यत्वानुपपत्तेः पदार्थानां परस्परं वाक्यार्थाद्ब्रह्मणश्च भेदः; स तावत् सत्यतां गतः । उभयथाऽपि वाक्यार्थो व्याहत इत्यर्थः ।**

**परि०— अन्य इति** । भेदान्तरसत्त्वोपपादनादित्यर्थः । 'यश्चे'त्यस्य भेद इति दूरेण अन्वयः ॥ **पदार्थानामसत्त्वेति** । 'सर्वोऽपि भेदो भ्रान्तिकल्पित' इति वाक्यगतानि यानि पदानि तदर्थनामसत्त्वे इत्यर्थः ॥ **वाक्यार्थसत्यत्वेति** । पदार्थसंसर्गातिरिक्तवाक्यार्थस्य अभावादिति भावः ॥ **उभयथाऽपीति** । भेदमात्रं भ्रान्तिसिद्धमिति वाक्यार्थस्य भ्रान्तिसिद्धत्वाभ्रान्तिसिद्धत्व-पक्षद्वयेऽपि भेदमात्रं भ्रान्तिसिद्धमिति वाक्यार्थोऽनुपपन्न इत्यर्थः ।

**यादु०— व्याहत इति** । प्रमाणबाधित इत्यर्थः । तथाचाद्ये बाधो, द्वितीयेंऽशे बाध इति ज्ञातव्यम् ।

**वं०प०— अन्यो** घटपटादिभेदः । यो भेदः स तावत् सत्यतां गत इत्यन्वयः । पदार्थानां परस्परं भेदस्य सत्यत्वोपपादनायोक्तं **पदार्थानामसत्यत्व इति** ॥ **वाक्यार्थेति** । पदसमुदायरूपत्वाद्वाक्यस्येत्याशयः । पदार्थानां यः परस्परं भेदो यश्च पदार्थानां वाक्यार्थात् भेदः यश्च पदार्थानां ब्रह्मणः सकाशाद्भेद इति योज्यम् ।

**शे०चं०—** द्वितीयपक्षशङ्काया भाष्यारूढतामुपदर्शयितुमपेक्षितमनुवृत्त्या पूरयति **तस्येति** । वर्तत इति तत्परामृष्टदर्शनं **वचनस्येति** । सर्वोऽपि भेदो भ्रान्तिसिद्ध इत्येतद्वचनार्थस्येत्यर्थः । अयमितीदमाव्यावर्त्यतया

द्वावेव यौ धर्मावित्यनुपपन्नम् । धर्माणां बहुत्वेन धर्मयोर्द्वित्वानुपपत्तेः । विरुद्धौ द्वावेवेत्यत्र नानुपपत्तिः । नित्यत्वानित्यत्वयोर्द्वयोरेव विरुद्धतया तद्विरोधिनस्तृतीयस्याभावादित्यर्थः । यौ द्वावेव विरुद्धौ तयोर्मध्ये एकस्यासत्यतायां सत्यामन्यस्य सत्यतैव स्यादित्यनुपपन्नम् । असत्यतासत्यतयोर्भिन्ननिष्ठतया व्यधिकरणत्वादित्यत आह **य इति** ।

**वा०र०**— भेदः स्यात्पारमार्थिक इतीति पाठः । **एवपदस्य कृत्यमाहेति** । द्वयोरेवेत्येवशब्दस्येत्यर्थः । द्वित्वानुपपत्तेरिति पाठः । विरुद्धौ द्वावेवेत्यत्र त्विति पाठः स्वरसः । इत्यत्र इत्युक्तावित्यर्थः ।

**स०व्र०**— ययोर्द्वयोरेव मध्ये एकस्यासत्यतायां सत्यामन्यस्य सत्यता स्यादित्येव व्याप्त्युपपत्तौ किं विरुद्धग्रहणेनेत्यत आह **द्वयोरिति विशेषणस्येति** । ययोर्द्वयोरित्येवोक्तेऽविरुद्धद्वयोर्मध्ये एकस्यासत्यतायां सत्यामपि अन्यस्य सत्यत्वाभावात् द्वयोरिति विशेषणस्यासमर्थत्वम् । तत्परिहाराय विरुद्धग्रहणम् । अयं भावः । वक्ष्यमाणप्रकारेण यः ययोर्द्वयोर्विरुद्धयोर्मध्ये एकासत्यत्ववान् स अपरसत्यत्ववान् इति व्याप्तिरत्राभिप्रेता । तत्र यदि विरुद्धद्वयोरिति नोच्येत तदा पटस्य घटत्वपृथुबुध्नोदराकारत्वरूपधर्मद्वयमध्ये एकासत्त्ववत्त्वेऽपि अपरसत्त्ववत्त्वाभावात् । तत्र व्यभिचारेण व्याप्तिरनुपपन्ना स्यात् । अतो विरुद्धग्रहणमिति । यौ द्वावेव विरुद्धौ तयोर्मध्ये एकस्यासत्यतायां सत्यां अन्यस्य सत्यता स्यादिति नोपपद्यते व्यधिकरणत्वात् । असत्यतासत्यतयोर्भिन्ननिष्ठत्वादित्यत आह **य इति** ।

**॥ इति 'भेदमात्रं भ्रान्तिकल्पितं' इति वाक्यार्थस्य भ्रान्तिकल्पितत्वे बाध्यत्वे च सर्वभेदानां पारमार्थिकत्वप्रसङ्गः ॥**

* * *

**॥ अथ विरुद्धधर्मयोः एकस्य असत्यत्वसिद्धौ अपरस्य सत्यत्वसिद्धिः ॥**

३२ **सु०**— निदर्शनमाह **असत्यमिति** ।

**अनु०— असत्यं नोक्तमित्युक्ते सत्यमुक्तमिति प्रजाः ।**
**जानन्त्युक्तं तु नो सत्यमित्युक्तेऽसत्यतामपि ॥**

आप्तेनोक्तम् **असत्यं नेत्युक्ते** सत्युक्तं **सत्यमिति प्रजा जानन्ति** । तथा विप्रलम्भकेनोक्तं सत्यं **नो इत्युक्ते तु** तस्यासत्यतामपि जानन्ति । सत्यत्वासत्यत्वयोर्द्वयोरेव विरुद्धता । तत्र आप्तोक्तेऽर्थे **असत्यतायामसत्यां** सत्यतायाः सत्त्वम् अनाप्तोक्ते च

सत्यतायाम् **असत्याम्** असत्यतायाः सत्त्वं च प्रसिद्धमित्यर्थः । 'इत्युक्त' इति प्रमितत्वोपलक्षणम् । **प्रजा जानन्तीत्यनेन** आऽविपालाङ्गनमेषा व्याप्तिः सिद्धा न केवलं परीक्षकाणामिति सूचयति ।

**परि०**— वचनमात्रस्याभासत्वेनाप्युपपत्त्या प्रकृतार्थानिर्वाहकत्वादाह **इत्युक्त इतीति** । यद्वा आप्तोक्तमसत्यं नेत्यनुमितेऽपि सत्यमुक्तमिति जानन्त्येव, अतः कथं वचनग्रहणमित्यत आह **इत्युक्त इति** ॥ **आऽविपालाङ्गनमिति** । आ अविपालाङ्गनाभ्यः अविपालाङ्गनापर्यन्तमित्यर्थः । 'आङ् मर्यादाऽभिविध्योरि'त्यव्ययीभावः ।

**यादु०**— भूयःसहचारप्रदर्शनाय मूले नो सत्यमित्याद्युक्तम् । तदुपपादयति **तथा विप्रलम्भकेनेति** । नन्वत्र लोकानुभव एव प्रदर्शितो न तु यः पदार्थो द्वयोरेवेत्यादिरूपा व्याप्तिरित्यत आह **सत्यत्वासत्यत्वयोरिति** । नन्वाप्तोक्तमसत्यं नेति प्रत्यक्षादिनाऽपि प्रमिते सत्युक्तं सत्यमिति प्रजानन्त्येवातः किमुक्त इति वचनमात्रग्रहणेनेत्यत आह **आऽविपालाङ्गनमिति** । आ अविपालाङ्गनेभ्य इति विग्रहे 'आङ् मर्यादाभिविध्योः' इत्यनेन अव्ययीभावसमासे सवर्णदीर्घादिके सति आऽविपालाङ्गनमिति रूपमिति ज्ञातव्यम् ।

**कं०रा०**— नन्वसत्यं नोक्तमित्याद्युक्तिमात्रेण सत्यमुक्तमित्यादिकं न प्रजानन्तीत्यत आह **इत्युक्त इति प्रमितत्वोपलक्षणमिति** । तथा च असत्यं नोक्तमित्यादिके प्रमिते सत्यमुक्तमित्यादिकं प्रजानन्त्येवेति भावः । आवीन् पालयतीत्याविपालः तत्पर्यन्तमित्यर्थः । 'आङ्मर्यादाभिविध्योः' इत्यव्ययीभावसमासः ।

**शे०चं०**— यः पदार्थो द्वयोरेवेत्यभिमतव्याप्तेरत्राप्रदर्शनात् कथमस्य निदर्शनत्वमित्यतो विरुद्धधर्मद्वयोपदर्शनेनोपपादयति **सत्यत्वेति** । नन्वाप्तेनोक्तमसत्यं नेति प्रत्यक्षादिनाऽपि प्रमिते सत्युक्तं सत्यमिति प्रतिजानन्त्येव तत्किमुक्तवचनग्रहणेनेत्यत आह **इत्युक्त इतीति** । ततश्च मूले प्रकृताभिप्रायेणैव वचनग्रहणम् । वस्तुतस्तु प्रमितमित्येव वक्तव्यमित्युक्तं भवति ॥ **आऽविपालाङ्गनमिति** । अविपालाङ्गना अभिव्याप्येत्यर्थः । ततश्च आबालं हरिभक्तिरित्यादाविव 'आङ् मर्यादावचन' इति वचनग्रहणादभिविध्यर्थकस्याङः कर्मप्रवचनतया तद्योगेन 'पञ्चम्यपाङ्परिभिरि'ति पञ्चम्यां जातायां कर्मप्रवचनीयस्याङः पञ्चम्यन्तेनाविपालाङ्गनाशब्देन आ अविपालाङ्गनाभ्य इति 'आङ् मर्यादाभिविध्योरि'त्यव्ययीभावसमासे विभाषेति महाविभाषाधिकारेणास्य समासस्य वैकल्पिकत्वेन समासाभावपक्षे आऽविपालाङ्गनाभ्य इति पञ्चमीश्रवणसम्भवेऽपि समासपक्षे सुपो धातुप्रातिपदिकयोरित्यवयवसुब्लोपादिके सत्याऽविपालाङ्गनमित्यस्योपपत्तिरिति ध्येयम् ।

**वा०र०**— **कथमस्य निदर्शनत्वमिति** । सम्यग्व्याप्तिप्रदर्शनपूर्वकं दृष्टान्ताभिधानाख्योदाहरणस्यैव निदर्शनापरपर्यायत्वादिति भावः । वस्तुतस्तु प्रमित इत्येवेति पाठो मूलकोशानुसाराद्युक्तत्वाच्च । **आबालं हरिभक्तिरित्यादाविवेति** । अस्याविपालाङ्गनमित्यस्योपपत्तिरिति वक्ष्यमाणेन सम्बन्धः । तत्रेवात्रापि समास-

सूचितं प्रदर्शयन्नेव तत्सङ्ग्राह्यं विशेषमुपदर्शयति **तिष्ठतु तावदिति** ॥ **वाक्यार्थस्य चेति** । सर्वोऽपि भेदो भ्रान्तिकल्पित इति वाक्यस्य योऽर्थस्तस्य परमार्थत्व इत्यर्थः ॥ **उभयथाऽपीति** । सर्वोऽपि भेदो भ्रान्तिकल्पित इति वाक्यार्थस्य भ्रान्तत्वे अभ्रान्तत्वे चेत्युभयथाऽपीत्यर्थः ॥ **वाक्यार्थ इति** । सर्वस्य भेदस्य भ्रमसिद्धत्वरूप इत्यर्थः ।

**वा०र०— तस्य वचनस्येति वर्तत** इति मूले तस्य वचनस्येत्येतावतोऽनुवृत्तिरिति प्रतीयते । न च तावता पूर्वप्रकृतताऽस्ति । तस्यापीति वाक्ये तस्येत्यस्यैव प्रकृतत्वात् । 'व्यावहारिकमित्येव वचनमि'त्यतो विभक्तिपरिणामेन वचनपदस्यानुवृत्तिं मिलित्वेदमुक्तमिति तु कल्पनामात्रम् । प्राक्तस्येत्यनूद्य वचनस्येति मूले व्याख्यानादित्यतोऽत्र न विशिष्टानुवृत्तिरभिप्रेता किन्तु तस्येत्यस्यैव । वचनस्येति तु पूर्ववत् तस्येत्यस्य व्याख्यानमिति न दोष इत्याशयेन मूलमाकाङ्क्षाक्रमेण योजयति **द्वितीयपक्षेति** ॥ **मूले पदार्थानामिति** । यः पदार्थानां परस्परं भेदः यश्च पदार्थानां वाक्यार्थाद्भेदः तथा तेषां ब्रह्मणः सकाशाच्च यो भेद इति योजना ।

**स०व्र०— वाक्यार्थस्येति** । सर्वोऽपि भेदो भ्रान्त इत्येतद्वाक्यस्य योऽर्थः सर्वस्य भेदस्य भ्रमसिद्धत्वमित्येवंरूपस्तस्येत्यर्थः । वाक्यार्थस्य सत्यत्वे भेदचतुष्टयस्य सत्यत्वम् । वाक्यार्थस्य ब्रह्मणश्च भेदस्तावदेकः, पदार्थानामसत्त्वे वाक्यार्थसत्यत्वानुपपत्तेः । पदार्थानां परस्परं भेदो द्वितीयः । पदार्थानां वाक्यार्थात् भेदः तृतीयः । पदार्थानां ब्रह्मणो भेदः चतुर्थ इति । **उभयथापीति** । सर्वोऽपि भेदो भ्रान्त इत्येतद्वाक्यार्थस्य भ्रान्तत्वेऽभ्रान्तत्वे चेत्यर्थः । **वाक्यार्थः** सर्वोऽपि भ्रान्त इत्येतद्वाक्यार्थः सर्वभेदस्य भ्रमसिद्धत्वादिरूपः । आद्ये सर्वस्यापि भेदस्य सत्यत्वापत्त्या द्वितीये भेदचतुष्टयस्योक्तरीत्या सत्यत्वापत्त्या वाक्यार्थस्य सर्वभेदभ्रान्तत्वस्य व्याहतत्वादित्यर्थः ।

**॥ इति भेदमात्रस्य भ्रान्तिसिद्धत्वे प्रतिज्ञायाः व्याहतत्वप्रसङ्गः ॥**

* * *

**॥ अथ 'भेदमात्रं भ्रान्तिकल्पितं' इति वाक्यार्थस्य भ्रान्तिकल्पितत्वे बाध्यत्वे च सर्वभेदानां पारमार्थिकत्वप्रसङ्गः ॥**

३१ **सु०—** सर्वोऽपि भेदो भ्रान्त इति वाक्यार्थस्य भ्रान्तत्वे बाध्यत्वे च सर्वस्यापि भेदस्य सत्यता स्यादित्युक्तम् । तत्कुत इत्यतस्तदुपपादनाय व्याप्तिं तावदाह **एकस्येति** ।

**अनु०—** एकस्यासत्यतायां हि द्वयोरेव विरुद्धयोः ।
अन्यस्य सत्यतैव स्यादिति केन निवार्यते ॥

प्राप्तिस्वीकारं निरूपयितुमाङ्मयदित्यादिकम् । **वचनग्रहणमिति** । उक्तं च काशिकादौ वचनग्रहणादभिविधिरपि गृह्यत इत्यादि । व्याख्यातं च टीकाकारैः । तेन विनेति हि मर्यादोच्यते तेन सहेति चाभिविधिः । एवं मर्यादाभिविध्योः भेदेन मर्यादावचन इत्युक्तेऽभिविधेरप्राप्तावपि वचनग्रहणसामर्थ्यात्परित्यक्तावान्तरभेदमवधिमात्रं विवक्ष्येते । तेनोभयत्रानुस्यूतावधित्वाश्रया संज्ञा सिद्ध्यति । यद्वा मर्यादायामित्येतावता पूर्तेर्यदधिकं वचनग्रहणम् । तेनात्र बहुव्रीहिः सूचितः । मयदिति शब्द उच्यतेऽस्मिंस्तन्मर्यादावचनं सूत्रमाङ्मर्यादाभिविध्योरिति। तत्सूत्रे चाङो मर्यादाभिविधिसम्बन्धितयैव दृष्टत्वादुभयसम्बन्धिनस्तस्य ग्रहणमात्रेति वचनग्रहणात्सिद्धमितीति भावः ।

नन्वाबालेभ्यो हरिभक्तिरित्यादाविव आविपालाङ्गनाभ्य इत्यपि रूपापत्त्या कथमाविपालाङ्गनमिति प्रयोग इत्यतः किं तावता उभयथा रूपस्यापि साधुत्वेन प्रकृते च समासाभावपक्षानाश्रयणेनाविपलाङ्गनाभ्य इत्येवंरूपानापत्त्या समासपक्षानाश्रयणेन च आविपालाङ्गनमित्येव रूपसम्भवादित्याशयेन समासविकल्पप्रापकमुदाहरन्नङ्गीकृतपक्षं च सूचयन् सुब्लोपमुपपादयति **कर्मप्रवचनीयस्याङः पञ्चम्यन्तेनेत्यादिना** ॥ **विभाषेतीति** । विभाषेति सूत्रस्याधिकारसूत्रत्वादिति भावः । व्याख्यातं च *काशिकायाम्* । 'विभाषेत्ययमधिकारो वेदितव्य' इति । 'अप परिबहिरञ्चवः पञ्चम्ये'त्यारभ्य महाविभाषा ततः पूर्वविहितोऽव्ययीभावो नित्यः । अत एव नित्यसमासः अस्वपदविग्रह इति तं प्राहुः । आङ्मर्यादाभिविध्योरिति सूत्रे विभाषानुवृत्तेर्महाविभाषाश्रयणोक्तिः । वाक्यापत्तिसाधिकायां सत्यामपि महाविभाषायां यत्र 'पारे मध्ये षष्ठ्या वे'त्यादौ विभाषोक्तिस्तत्र समासयोर्विकल्पादिरूपं विषयान्तरमेवेति काशिकादौ स्पष्टम् । आपरमाणोराचभूगोलकमिति *द्रव्यकिरणावल्यां* तूभयपक्षाश्रयणम् । परन्तु समासमध्ये चशब्दप्रयोगायोगात् प्रामादिक आचभूगोलमिति समासप्रयोगः । गोलकादिति तु वाच्यमिति नवीनाः ।

**॥ इति विरुद्धधर्मयोः एकस्य असत्यत्वसिद्धौ अपरस्य सत्यत्वसिद्धिः ॥**

* * *

**॥ अथ समानदेशकालयोः घटघटाभावयोर्मिथ्यात्वमनुपपन्नम् ॥**

**३३ सु०— ननु स्वप्नेऽत्र घट इति दृष्ट्वा नात्र घट इत्यपि पश्यति । तत्र घटः तदभावश्च द्वयमपि मिथ्या । अतो व्याप्तिभङ्ग इत्यत आह नेति ।**

**अनु०— न स्वप्नेऽपि द्वयं मिथ्या**

तत्किं द्वयमपि सत्यमित्यत आह **तत्रेति** ।

**तत्रैकं सत्यमेव हि ।**

**तत्र घटतदभावयोर्मध्ये । यदा अभावस्य असत्यता तदा घटः सत्य एव । यदा च घटस्य असत्यता तदा अभावः सत्य एवेत्यर्थः । तस्मान्न व्याप्तिभङ्ग इति हिशब्दार्थः । कुतो न द्वयमपि मिथ्येत्यत आह भावेति ।**

## भावाभावावुभौ तत्र कथं मिथ्या भविष्यतः ।

**यो यस्याभावो यश्च यस्याभावस्य प्रतियोगी तावुभावपि एकत्रैकदैव न मिथ्येति व्याप्तेः । स्वप्नेऽपि घटतदभावौ कथं तथा भविष्यत इति भावः ।**

**यादु०— यो यस्याभाव इत्यादि** । अत्र भावाभावयोः सत्त्वासत्त्वयोर्वा यत्परस्परनिषेधप्रतियोगित्व-मुच्यते तन्न निषेध्यत्वरूपं विवक्षितं किन्तु निषेधे प्रमितिजनकारोपप्रधानत्वरूपमन्यदेव पारिभाषिकम् । तेन सिद्धान्ते प्रामाणिकस्य निषेधप्रतियोगित्वाभावात् कथमेतदिति शङ्काऽनवकाशः । प्रामाणिकस्य प्रतिषेध्यत्वरूप-प्रतियोगित्वाभावेऽपि निरुक्तप्रतियोगित्वसम्भवात् । एवं यस्याभाव इत्येतत् यत्प्रधानकारोपविषयस्याभाव इति व्याख्येयम् । यस्याभावस्य प्रतियोगीत्येतदपि यदभावप्रमितिजनकारोपप्रधान इत्येव व्याख्येयम् । आरोपप्रधाने कथमारोप्यप्रतिषेधप्रतियोगित्वमिति चेत् । न । आरोप्यवत् तस्यापि तत्प्रतिषेधविरोधित्वेनानुभवात् । एवञ्च प्रतियोगिसत्त्वं अभावविरोधीत्यादिकमपि सिद्धान्ते समञ्जसं भवतीति ज्ञातव्यम् । अनेनैवाभिप्रायेण अग्रेतनं व्याहत्युपपादनं व्याख्येयम् ।

**कं०रा०— तत्र घटस्तदभावश्चेति** । स्वप्ने घटस्तदभावश्चेति द्वयमपि मिथ्या स्वप्ने प्रतीतत्वात् । तथा च स्वप्ने प्रतीतयोर्घटतदभावयोर्मध्ये एकस्यासत्यत्वेऽपि अन्यस्य सत्यत्वाभावात् । 'एकस्यासत्यतायां तु द्वयोरेव विरुद्धयोः । अन्यस्य सत्यतैव स्यादि'ति व्याप्तिभङ्ग इत्यत आहेत्यर्थः । **यदा अभावस्यासत्यता तदा घटः सत्य एवेति** । असत्यत्वस्य प्रतिपन्नोपाधिस्थतात्त्विकनिषेधप्रतियोगित्वरूपत्वात् अभावसत्यतायां घटः सत्य एव । घटस्यासत्यतायां च घटाभावः सत्य एवेति भावः । **कथं तथा भविष्यत इति** । कथं मिथ्या भविष्यत इत्यर्थः । न च वाच्यं स्वप्ने प्रतीतत्वात् घटतदभावावुभावपि मिथ्येति । स्वप्ने प्रतीतत्वस्य आत्मन्यनैकान्तिकत्वात् ॥

**शे०चं०— यो यस्याभाव इत्यादि** । यद्यपि सिद्धान्ते प्रामाणिकस्य निषेधप्रतियोगित्वाभावान्न भावाभावयोः परस्परनिषेधप्रतियोगिभावोऽस्ति तथापि तदभ्युपगन्तृतार्किकरीत्याऽयं ग्रन्थ इत्यविरोधः । यद्वा, प्रतियोगित्वमत्र न निषेध्यत्वं विवक्षितं किन्तु निषेधप्रमितिजनकारोपप्रधानत्वरूपमन्यदेव यत्किञ्चित्पारिभाषि-कम् । ततश्च प्रामाणिकस्य निषेध्यत्वरूपप्रतियोगित्वाभावेऽपि निरुक्तप्रतियोगित्वं नानुपपन्नमेव । यस्याभाव इत्येतदपि यत्प्रधानकारोपविषयस्याभाव इति व्याख्येयम् । यस्य भावस्य प्रतियोगीत्येतदपि यदभावप्रमिति-जनकारोपप्रधान इत्येव व्याख्येयम् । आरोप्यवत् प्रधानस्यापि तत्प्रतिषेधविरोधित्वेनानुभूयमानत्वात् । तत्प्रति-

यौ द्वावेव विरुद्धौ तयोर्मध्ये **एकस्यासत्यतायां** सत्यामन्यस्य सत्यता स्यादेवेति व्याप्तिः केन निवार्यते । उपाधिव्यभिचारयोरभावान्न केनापि । पुरोवर्तिनः पुरुषत्वेऽसति (निषेधे सति) स्थाणुत्वमेव भवतीति नियमो नास्ति । वल्मीकत्वस्यापि सम्भवात् । अतो **द्वयोरेव विरुद्धयोरित्युक्तम्** । द्वयोरिति विशेषणस्यासमर्थतापरिहाराय **विरुद्धग्रहणम्** । यः पदार्थो **द्वयोरेव विरुद्धयोरेकस्य** असत्यत्ववान् असावन्यस्य सत्यत्ववानित्युक्तं भवति ।

परि०— **असमर्थतेति** । व्याप्त्युपपादनासमर्थतेत्यर्थः । व्याप्तिप्रकारं निष्कृष्य दर्शयति **यः पदार्थ इति** ।

यादु०— **अतो द्वयोरेव विरुद्धयोरिति** । तथा चैवकारसमभिव्याहारेण परस्परविरुद्धरूपयोरित्यर्थलाभान्नोक्तव्यभिचारशङ्केति भावः ॥ **असमर्थतेति** । एवशब्दसमभिव्याहृतस्य द्वयोरिति विशेषणमात्रस्य योग्यताभावेन न स्वार्थबोधने समर्थता । नहि परस्परविरहरूपविरुद्धाविवाविरुद्धावपि क्वचित् द्वावेव प्रसिद्धौ येनात्र योग्यता स्यात् । अतस्तत्परिहाराय विरुद्धयोरिति वक्तव्यमिति भावः । एवञ्च रूपादिषु पञ्चसु मध्य इत्यस्येवाप्रसिद्धिवारकतया व्याप्तिग्रहोपयुक्तत्वेन विरुद्धयोरित्यस्य सार्थक्यमुक्तं भवतीति ज्ञातव्यम् । ननु परस्परविरहरूपयोरपि कथमेकासत्त्वमपरसत्त्वाक्षेपकं व्यधिकरणत्वादित्यत आह **यःपदार्थ इति** ।

कं०रा०— **तत्कुत इति** । भेदबाध्यत्वस्य भ्रान्तत्वे भेदस्य सत्यत्वं कुत इत्यतः तदुपपादनाय व्याप्तिं तावदाहेत्यर्थः ॥ **अतो द्वयोरेव विरुद्धयोरित्युक्तमिति** । द्वयोरेवेत्येवशब्दमहिम्ना परस्परविरहव्यापकत्वतदात्मकत्वरूपविरुद्धत्वस्य लाभात् तस्य च स्थाणुत्वपुरुषत्वयोरभावान्नोक्तव्याप्तिभङ्ग इति भावः । तेन तत्प्रकारकप्रमाविशेष्यत्वादेर्धर्मान्तरस्य विरोधिनः सत्त्वात् द्वयोरेवेत्यवधारणमयुक्तमिति चोद्यमनवकाशम् ॥ **द्वयोरिति विशेषणस्येति** । द्वयोरित्येवोक्ते कयोरित्याकाङ्क्षा जायते । तच्छामकपदाभावे च द्वयोरिति विशेषणस्य असमर्थता अनन्विता स्यात् तत्परिहाराय विरुद्धयोरित्युक्तमित्यर्थः । न च वाच्यं प्रकृते भेदस्य भ्रान्तिकल्पितत्वं बाध्यं चेत् तस्य सत्त्वं वास्तवं स्यादित्यापादनमयुक्तम्, अत्यन्तासति कूर्मरोमादौ भ्रान्तिकल्पितत्वाभावेऽपि सत्त्वाभावेन भ्रन्तिकल्पितत्वसत्त्वयोः परस्परविरहव्यापकत्वाभावेनोक्तरूपविरुद्धत्वाभावादिति । भ्रान्तिकल्पितत्वशब्देन तद्योग्यत्वस्य च कूर्मरोमादौ सत्त्वेन तदभावस्यैवाभावात् तदभाववति च ब्रह्मणि सत्त्वस्य विद्यमानत्वेन भ्रान्तिकल्पितत्वसत्त्वयोः परस्परविरहव्यापकत्वरूपविरुद्धत्वोपपत्त्योक्तापादनसम्भवादिति ।

शे०चं०— एकस्येत्याद्युत्तरग्रन्थस्य पूर्वोक्तार्थानुपपादकत्वादसङ्गतिमाशङ्क्य अव्यवहितार्थोपपादकत्वाभावात् तदसङ्गतावपि व्यवहितार्थोपपादकत्वेन तद्ग्रन्थसङ्गतिसम्भवान्नानुपपत्तिरित्यभिप्रेत्य तथा सङ्गतिमाह **सर्वोऽपीति** ॥ **उक्तमिति** । 'भेदः स्यात्पारमार्थिक' इत्यादिनेति शेषः ॥ **तदुपपादनायेति** । 'स्ववाचोऽसत्यता चेत्स्यादि'त्यादिनेति शेषः । एकपदस्य कृत्यमाह **पुरोवर्तिन इति** ॥ **विशेषणस्यासमर्थतेति** ।

षेधप्रतियोगित्वमप्युपपन्नम् । अत एव प्रतियोगित्वस्याभावविरोधित्वकथनमपि सैद्धान्तिकं समञ्जसम् । अनेनैवाभिप्रायेण अग्रेतनव्याहत्युपपादनमपि व्याख्येयमित्यन्यत्र विस्तरः ।

**वा०र०— सिद्धान्ते प्रामाणिकस्येति** । 'प्राक्प्रध्वंससदात्वेने'ति 'पूर्वापरसदात्वेने'ति च तत्त्वसङ्ख्यानविवेकयोः सदाभावनामकेन सदाभावोऽस्तीति कृत्वा निरवधिकोऽभावः सदाभाव इति लक्षणादिनिरूपणपरटीकाग्रन्थेऽन्यत्रापि शशविषाणाद्यत्यन्ताभावप्रतियोगिकत्वादिप्रतिपादनेन प्रामाणिकस्य कथं प्रतियोगत्वमित्यादि तत्त्वविवेकटीकाद्यनुसारेण च प्रामाणिकस्य निषेधप्रतियोगित्वाभावसिद्धेरिति भावः । **जनकारोपेति** । निषेधप्रमितिजनको य आरोपस्तत्र यत्प्रधानं तत्त्वरूपमित्यर्थः । अभावं प्रति प्रतियोगिज्ञानस्य कारणत्वाद्भ्रमस्थले च प्रतियोगिज्ञानस्यारोपरूपत्वात्प्रमितिजनकारोपेत्युक्तम् । आरोप एव च प्रधानापेक्षा न ज्ञानमात्रे । अतोऽप्यारोपेत्येवोक्तम् । आरोपे यत्प्रधानमित्यारोपापेक्षितं यत्प्रधानं तदिति ज्ञेयम् । आरोपस्य च सत्यप्रधानादिपूर्वकत्वम् 'अधिष्ठानं च सदृशं तथ्यवस्तुद्वयं विने'त्यादिवचनानुसारेण तत्त्वनिर्णयादावुपपादितं ज्ञेयम् । प्रधानत्वरूपं पारिभाषिकं किञ्चिदन्यदेवेति योजना । **यत्प्रधानकेति** । यत्प्रधानं यत्र यत्प्रधानकः स चासावारोपश्च तद्विषयस्येत्यर्थः । आरोपप्रधानमित्येवेति पाठः । प्रधान इत्येवेति लेखकागतमन्यथाख्यातिस्थपाठदर्शनमूलकं च । 'देहात्मनोरप्येकदेशस्थत्वादि'त्यादि *तत्त्वनिर्णयटीकायां* 'यद्यप्यधिष्ठानं प्रधानं चास्ती'त्याद्युक्तेः प्रधानशब्दस्यारोपप्रधाने नपुंसकलिङ्गत्वादिति ज्ञेयम् । ननु पारिभाषिकमपि प्रतियोगित्वं प्रकल्प्य प्रतियोगित्वकल्पनं तदा स्याद्यदि प्रतियोगिसाम्यं केनचिदसाधारणरूपेण भवेन्न चैतदस्तीत्यतस्तत्साम्यं दर्शयति **आरोप्यवदिति** ।

एतद्रूपाश्रयणं तु प्रतियोग्यभावविरोधादिव्युत्पादनाय । पूर्वप्रकाराश्रयणेऽपि विरोधनिमित्ताप्रतिभासात् । अत्र तु विरोधित्वं प्रतियोगित्वमिति स्वीकृत्य प्रधानस्यापि विरोधितास्फोरणेनैतद्रूपोक्त्या प्रतियोग्याभावव्यवहारादिव्युत्पादनलाभात् । ततश्च विरोध्यारोप्यसादृश्यमेव स्पष्टीकृतं भवतीति नेदं स्वतन्त्रं प्रकारान्तरमिति ज्ञातव्यम् । अनेनैव संसर्गाभावः स्वमते नास्तीति *तत्त्वसङ्ख्यानादौ* निरूपितम् । गोत्वादिसंसर्गाभावस्येति चादृश्यत्वाधिकरणीयमूलादौ व्यवहारः । तत्र तत्र टीकाकारीयोऽपि व्यवहारोऽस्ति सोऽप्युक्तरीत्योपपाद्यः । न तु गोत्वादीनां प्रामाणिकत्वेन तदत्यन्ताभावाप्रतियोगेऽपि गोत्वादिसंसर्गाभावस्यात्यन्ताभावोऽस्तीति टीकान्तरीयोपपादनानुसारेण *न्यायामृतीय*-अश्वे गोत्वं कदापि नास्तीत्यादौ तत्संसर्ग एव निषिध्यत इति मते देशपदमनपेक्षितमिति सत्त्वनिरुक्तिस्थलोक्त्यनुसारेण च संसर्गविषयतयोपपाद्य इति सूचनादन्यत्राप्येवमेवोपपादनं ज्ञेयम् । मिथ्यात्वं यदि दुःखादेरिति जिज्ञासाधिकरणीयभाष्यमूले स्वरूपसत्तामपि तादात्म्यतत्सम्बन्धाभ्यामारोपेणैव व्यवहारोपपत्तेरिति व्यवहारस्तु परीत्येत्यादि च प्रागेव व्युत्पादितम् । नैयायिकाभिमतान्यथाख्यातिनिरासावसरे यत्रारोप्यमधिष्ठानं सन्निहितं तत्र तादात्म्यमात्रं सदित्यादिकमप्यनुकूलनीयम् । कृतं चादृश्यत्वाधिकरणेऽस्माभिरेतत्समानप्रकारकल्पनया विचारणं तथा तत्त्वसङ्ख्यानटीकाव्याख्यानप्रपञ्चेत्युक्तं विस्तरेण । **अन्यत्र विस्तर इति** । इदमत्राकूतम् ।

**स०व्र०**— अस्तु विरुद्धयोर्धर्मयोर्मध्ये यत्र एकासत्यता तत्रापरसत्त्वमिति व्याप्तिः । प्रकृते तु किमायातमित्यत आह **मिथ्यात्वमिति** । भेद इत्यधिकरणसप्तमी । भेदरूपे धर्मिणीत्यर्थः । **तयोः** सत्यत्वमिथ्यात्वयोर्मध्ये ॥ **उक्तव्याप्तीति** । एकस्यासत्यतायामित्युक्तव्याप्तीत्यर्थः ।

* * *

३४ **सु०—व्याहतं च भावाभावयोरुभयोरसत्त्ववर्णनमित्याशयेनाह भावस्य हीति ।**

**अनु०— भावस्य हि निषेधे तु नाभावस्य निषेधनम् ।**

**हिशब्दो हेतौ । भावस्य निषेधे कृते तु अभावस्यैव विहितत्वात् । पुनर्नाभावस्य निषेधनं कर्तुं शक्यते, व्याघातात् । एवमभावस्य निषेधे कृते अभावाभावो भाव एव तद्व्याप्तो वेति भावस्य विहितत्वात् पुनर्न भावस्य निषेधनं युक्तं व्याहतत्वादिति । अस्त्वेवं व्याप्तिः ततः किमित्यत आह स्ववच इति ।**

**स्ववचोऽसत्यता चेत्स्यात्तस्माद्भेदस्य सत्यता ।**

**स्वशब्देन प्रतिवाद्युच्यते । तद्वागर्थस्य सकलभेदमिथ्यात्वस्य । तस्मात् व्याप्तिसद्भावात् मिथ्यात्वं सत्यत्वं च द्वौ विरुद्धधर्मौ । भेदे तयोः, मिथ्यात्वे असति सत्यत्वं सत्स्यादेव, उक्तव्याप्तिबलादित्यर्थः ।**

**परि०— प्रतिवाद्युच्यत इति** । अस्मत्प्रतिवादी मायावादीत्यर्थः । अत्र प्रकरणे वचनशब्दः तदर्थ इत्युक्तत्वात् **तद्वागर्थस्य सकलभेदमिथ्यात्वस्येत्युक्तम्** । मिथ्यात्वे अविद्यमान इत्यर्थः ।

**वं०प०— भेदे तयोर्मिथ्यात्वेऽसतीति** । तयोर्धर्मयोर्मध्ये **भेदे** भेदरूपे धर्मिणि मिथ्यात्वरूपधर्मेऽसतीत्यर्थः ।

**कं०रा०— तद्व्याप्तो वेति** । अभावाभावस्य भावव्याप्तत्वपक्षेऽपि व्याप्ये सति व्यापकस्यावश्यम्भावात् अभावस्य निषेधे कृते भावो विहित इति भावः । **भेदे तयोरिति** । भेदे तयोः सत्यत्वमिथ्यात्वयोरन्यतरस्य मिथ्यात्वस्य मिथ्यात्वे सति सत्यत्वं सत् स्यादेव । 'एकस्यासत्यतायां तु द्वयोरेव विरुद्धयोः अन्यस्य सत्यतैव स्यादि'त्युक्तव्याप्तिबलादित्यर्थः ।

**शे०चं०— अभावस्यैवेति** । तस्यैव भावनिषेधत्वादिति भावः ॥ **एवमिति** । निषेधविशिष्टभावनिषेधस्य विशेषणीभूतनिषेधविषयकत्वस्य सविशेषणे हीति लाघवमूलकन्यायसिद्धत्वान्निषेधनिषेधरूपातिशयलाभाय च नञ्द्वयसार्थक्यसम्भवान्निषेधनिषेधो भावविधिरेव सिद्ध्यतीत्यर्थः । एतच्चाभावप्रतियोगिकातिरिक्ताभावाङ्गीकारेऽनवस्थानात् स नास्तीति मतमवलम्ब्योक्तम् । अभावप्रतियोगिकातिरिक्ताभाववादिमतमाश्रित्याप्याह **तद्व्यासो वेति** । एतन्मते तृतीयाभावस्य प्रथमाभावत्वान्नानवस्थेति हृदयम् । नन्वस्तु विरुद्धयोरर्थयोर्यत्रैकस्यासत्त्वं तत्र परस्य सत्त्वमिति नियमोऽन्यत्र यथातथा । तावताऽपि प्रकृते किमायातमित्यत आह **मिथ्यात्वमिति** । भेदधर्मिणि तयोः सत्यत्वमिथ्यात्वयोर्मध्ये मिथ्यात्वेऽसतीत्यर्थः ।

**वा०र०—** विशिष्टविषयौ विधिनिषेधावित्यादि कर्मनिर्णयटीकोक्तप्रकारमाह **निषेधविशिष्टेति** । सारेणाह **एतच्चेति** । तदनुसारेणैवाह **एतन्मत इति** । भेद इति सप्तम्या निमित्तत्वादिकमर्थ इति भ्रान्तिनिरासायाह **भेदधर्मिणीति** । एकस्यासत्यताया हीति भाष्यमूले यौ द्वावेव विरुद्धौ तयोर्मध्ये एकस्यासत्यतायां सत्यामन्यस्य सत्यतेति नियमकथनेन यत्र विरोधिभूतयोरेकस्यासत्त्वं तत्रापरस्य सत्त्वमित्येवंरूपव्याप्तिशरीराभावसूचना तदाश्रयणपक्षे यद्दूषणं वन्ध्यासुते श्यामरूपस्य मिथ्यात्वेऽपि पीतरूपस्य सत्यत्वाभावात्तयोर्व्यभिचार इति । तद्गर्भस्रावेणैव गतमिति सूचितम् । द्वयोरेव विरुद्धयोरित्युक्त्यैव स्थाणुत्वादेरिव पीतादेरप्यप्राप्तेः । अत एव न्यायामृतीयसामान्यतो मिथ्यात्वभङ्गे निर्विशेषणव्याप्त्याश्रयणपक्षानुसारेण व्यभिचाररूपैतद्दूषणमभिधाय यौ द्वाविति सैद्धान्तिकव्याप्तिपक्षे उक्तदूषणप्रसङ्गं मत्वा न वा न स्वप्न इति विरुद्धगजतदभावयोरेव व्यभिचारः शङ्कितः । तत्र परिहारावसरे धर्मिसत्तानिरपेक्षत्वादेः कथनं तु सत्यपि द्वावेवेत्युक्ते परिहारे प्रतियोगित्वादिधर्माणां धर्मिसत्तासापेक्षता नास्तीति तन्निरपेक्षत्वविवक्षयापि परिहारो भवतीति वस्तुस्थितिसूचनाय मानसिकवक्ष्यमाणानुपपत्तिपरिहाराय च समाधानान्तरतया कृतमिति न दोषः ।

ननु वन्ध्यासुते श्यामरूपमिथ्यात्वेऽपि पीतरूपसत्यत्वाभावादित्युक्तव्यभिचारस्य यौ द्वावेव विरुद्धाविति नियमाश्रयणेन परिहारसम्भवेऽप्युदाहरणस्यानादरणीयत्वात्परस्परविरुद्धयोर्द्वयोर्नित्यत्वानित्यत्वरूपयोर्मध्ये वन्ध्यासुते नित्यत्वस्य मिथ्यात्वेति ध्वंसप्रतियोगित्वरूपानित्यत्वस्य सत्यत्वाभावेन तावादाय व्यभिचारः स्यादेवेति चेन्न । यद्यपि यौ द्वावेव विरुद्धौ पदार्थौ तयोर्मध्ये एकस्यासत्यतायामन्यस्य सत्येति धर्मिपुरस्कारं विना स्वातन्त्र्ययोरेव पदार्थत्वपुरस्कारो न नियमाङ्गीकारे व्यभिचारः । उक्तरूपयोः शशशृङ्गादितदभावयोर्मध्ये शशशृङ्गादेरसत्यत्वे तदभावस्य सत्यत्वात् । तथापि धर्मधर्मिसाधारण्येन व्याप्तिव्यभिचारावसरे सङ्कोचो न कार्यः । तत्रैक्यभेदयोरेवावस्थितावपि प्रियं चामिथ्यात्वमिथ्यात्वे सत्यत्वं सत्यं स्यादित्येवमादिस्थले एकधर्मिनिष्ठधर्मद्वयमध्ये एकस्यासत्यत्वेऽपरधर्मस्य सत्यत्वमित्येवं व्याप्तिपर्यवसानात् । तत्र वन्ध्यासुते श्यामरूपमिथ्यात्वेऽपि पीतरूपसत्यत्वाभावाद्व्यभिचार इत्याशङ्कावारणाय यस्मिन्धर्मिणौ द्वावेव विरुद्धौ प्रसक्तौ तयोरेकस्येत्याद्युक्तव्याप्त्याश्रयणेनैव व्यभिचारपरिहारस्य कर्तव्यत्वं 'सत्यता च भेदस्ये'त्येतन्मायावादखण्डनटीकास्थपरस्परविरुद्धयोरित्येतद्व्याख्याने लिखितं संशोध्योपयोगानुसारेण पूर्वोक्तमिदं च सङ्कलय्य लेखनीयमस्ति । 'भेदे

मिथ्यात्वतो भेदसत्यत्वं स्याद्बलादपी'ति जन्माधिकरणानुव्याख्यानमूले ययोर्दूरस्थयोर्वनस्पत्योरैक्यं मिथ्या तयोर्भेदः सत्य इति दृष्टमित्यभिधाय अथवा यस्य स्वरूपेण सतो यो भावो मिथ्या तस्य तद्विपरीतः सत्यो दृष्टः। यथा ब्रह्मणोऽनृतत्वादेर्मिथ्यात्वे सत्यत्वादिकं सत्यमिति सामान्यव्याप्त्याश्रयणेन प्रसङ्गोपपत्तिः । यथाहुः । परस्परविरोधे तु न प्रकारान्तरस्थितिरिति प्रतिपादितम् ।

तथा च वन्ध्यासुते श्यामरूपमिथ्यात्वेऽपीत्याद्युक्तव्यभिचारश्च यस्मिन्स्वरूपे सतीति विद्यमानयोरिति विवक्षणेन परिहारः । एकत्र प्रसक्तयोरिति विवक्षणेनैव गुणादिकेच्छानिमित्तकव्यभिचारपरिहार इति प्रकारान्तरं चानुगुणतयाऽऽकाङ्क्षाक्रमेण लेख्यम् । यदि धर्मा न केचनेति स्वप्राधिकरणीयानुव्याख्यानमूलोक्तोदाहरणे परिमाणशून्यगुणादौ वक्तृत्वशून्यकाष्ठे च महत्त्वाभावेऽणुत्वस्य तीव्रवचनाभावे मन्दवचनस्य चावकाशाभावेऽपि परिमाणसामान्यवति द्रव्ये वक्तरि च तदुभयावकाशसत्त्वस्य शङ्कामुखेन प्रतिपादनानुसारेण येषां धर्माणां यत्र प्रसक्तिस्तन्निषेधस्यैव तत्रोचिततया तद्धर्मिणि प्रसक्तत्वस्यापि विवक्षणात् । तथा च द्विविधविरुद्धधर्मप्रसक्तिः प्रसक्ताऽसति प्रसक्ता चेति ।

ते च प्रत्येकं द्विविधाः । धर्मिसत्तासापेक्षास्तदनपेक्षाश्च । तत्र सति घटादौ प्रसक्ता उभयविधा अपि द्वावेव विरुद्धावित्युक्तविरोधवन्तो ये धर्मा नित्यत्वानित्यत्वादिरूपास्तेषु द्वयोर्द्वयोर्विरुद्धयोरेकस्यासत्यत्वेऽन्यस्य सत्यत्वमित्यस्त्येव । असति प्रसक्तधर्मिसत्तानपेक्षप्रतियोगित्वप्रमेयत्वादिषु च तथात्वमेव । असति प्रसक्तधर्मिसत्तासापेक्षधर्माणां मध्य एव द्वयोरेव विरुद्धयोरित्युक्तरीत्या प्राप्तं द्वयोर्मध्ये एकस्यासत्यत्वेऽपरस्य च सत्यत्वं नास्ति । तथाच असति प्रसक्तधर्मिसत्तासापेक्षधर्म्यतिरिक्तत्वे यौ द्वावेव विरुद्धौ पदार्थौ तयोरेकस्यासत्यतायामन्यस्य सत्यत्वमिति व्याप्तिशरीरलाभान्नित्यत्वानित्यत्वरूपपदार्थयोश्च सति प्रसक्तकाले उक्तविशेषणाभावेन तत्र व्यभिचारानवकाशात् । एवं कार्यत्वादिधर्मयोर्व्यभिचारो निराकार्यः । मूलकत्ववक्तृत्वयोस्तु व्याघातसंरक्षणाय चेतनधर्म्याश्रयेण द्वावेव विरुद्धावित्युपपादनेऽप्युक्तरीत्यैव निरासः । परिमाणशून्ये गुणादौ वक्तृत्वशून्ये काष्ठादौ च परिमाणविशेषतावचनादेः प्रसक्तिरेव नास्तीति प्रसक्तयोर्मध्य इत्यनेनैवाणुत्वमहत्त्वादिव्यावृत्तिसिद्धिः । यदि च वन्ध्यासुतादावपि रूपविशेषनित्यत्वादेरप्रसक्तिस्तदा तत एव व्यावृत्तिरपि वक्तुं शक्या । एवमन्यत्रापि यथासम्भवमूह्यम् । 'साध्यधर्मोऽयं सन्नसन्वे'ति पृथगधिकरणीयानुव्याख्यानसुधायां मिथ्यात्वस्य धर्मिसत्त्वाभावे सत्त्वायोगमाशङ्क्य 'मिथ्यात्वं खल्वत्यन्ताभावप्रतियोगित्वं तच्च बुद्धिद्वारेणेत्यभिधाय असतोऽपि प्रतीतिरङ्गीक्रियते । तथा च मिथ्यात्वमस्तीत्यस्य तत्प्रतियोगिकोऽत्यन्ताभावः सन्नित्यर्थः । न चात्र कोऽपि विरोध' इत्युक्तम् । तट्टीका चास्ति । 'तत्समा .... तथा प्रतीत्या विरूपकत्वमिति चेत्' इत्यादि स्वप्राधिकरणसुधा तट्टीका च । एतत्स्थलद्वयसुधाद्यनुसारोऽपि व्याप्तिशरीरे योज्योऽस्ति । उक्ताशयेनैव *न्यायामृते* धर्म्यसत्त्वे धर्मासत्त्वमिति नियमस्य धर्मिसत्तासापेक्षधर्मविषयत्वमुक्तमिति तदनुसारेणात्रापि ग्रन्थे नित्यत्वानित्यत्वादिरूपयोः प्राप्तव्यभिचारपरिहारायास्या व्याप्तेरौत्सर्गिकत्वमभिप्रेतमिति वक्तुं शक्यत्वात् । स्वप्ने प्रतीतयोर्घटरूपपदार्थयोस्तूक्तरूपत्वे विद्यमानेऽपि तत्रैकसत्यमेव हीत्युक्तरीत्याऽन्यतरस्य सत्यत्वान्न व्यभिचारः । एवं

न्यायामृते गजतदभावयोर्व्यभिचारशङ्काया अपि तत्रैकमित्युक्तरीत्यैकस्यासत्यत्वेऽप्यपरस्य सत्यत्वाश्रयणेनैव परिहारे वक्तव्ये तमनभिधाय प्रकारान्तराभिधानं तदुक्तप्रकारस्यैतदनुव्याख्यानोक्तरीत्या ज्ञेयत्वं मनसि कृत्वा परीत्यैव । अत एव न वा स्वप्न इत्युक्तदोषपरिहारावसरे स्वाप्नस्यापि कल्पितत्वे इति तत्पक्षमाश्रित्यैव दूषणाभिधानमिति प्रकटीकृतमिति ज्ञेयम् ।

एवं यौ द्वाविति व्याप्तेर्निष्कर्षः प्रतिपादितः ।
तमालोच्य बुधास्तोषमायान्तु कृपया युताः ॥

केचित्तु श्यामत्वाद्यभाव इत्यनेन गौरवत्वविरुद्धा कोटिरेवोक्ता । ततश्चोदाहरणद्वयमपि विशिष्टव्याप्तेरेव व्यभिचारस्थलत्वेन न्यायामृते उदाहृतमिति मूलोक्तपरिहाराश्रयणेन तत्र श्यामत्वादौ व्यभिचारपरिहारासम्भवाद्धर्मिसत्तासापेक्षधर्मान्विहायेत्यादिनोत्सर्गो व्याप्तिरभिहितः । शिष्टं समानमिति वदन्ति ।

* * *

३५ **सु०— प्रकृतमुपसंहरति तस्मादिति ।**

## अनु०— तस्माज्जीवेशयोर्भेद उक्तन्यायेन गम्यते ॥

**भेदमिथ्यात्वासम्भवात् जीवेशयोः पारमार्थिकभेद एव उक्तन्यायेन द्युभ्वादिसूत्रैः गम्यते । तथा च तद्विरोधान्नेदमभेदं प्रतिपादयति सूत्रमिति सिद्धम् । श्रुतयस्तु प्रागेव सम्यग् व्याख्याताः । विरुद्धगुणसत्यता चोपपादिता । प्रत्यक्षादीनामतत्त्वावेदकत्वमपि नि(रस्तम्)राकृतम् । श्रुतिमिथ्यात्वस्यानिष्टत्वं च समर्थितमित्युक्त एव सूत्रार्थः ॥ ॥ ४-१-२ ॥**

**परि०—** तर्हि 'तत्त्वमसी'त्याद्यभेदश्रुतीनां का गतिरित्यत आह **श्रुतयस्त्विति** ॥ **प्रागेवेति** । पृथगुपदेशादित्यधिकरणे 'तथाऽपि तु चिदानन्दपूर्वास्ते सदृशा गुणा' इत्यादिना व्याख्याता इत्यर्थः । विरुद्धगुणताया मिथ्यात्वादिति प्रागुक्तं निराह **विरुद्धगुणसत्यता चेति** । 'न दुःखानुभवः क्वापि मिथ्याऽनुभवतां व्रजेदि'त्यादिना पृथगधिकरण एवोपपादितेत्यर्थः । तद्विषयत्वाच्च प्रत्यक्षादिव्यवहारस्येत्यादिनोक्तं निराह **प्रत्यक्षादीनामतत्त्वेति** ॥ **निराकृतमिति** । 'वेदवेद्यस्य मिथ्यात्वं यदि नैक्यस्य तत्कथम्' इत्यादिना 'ततो हि प्रत्यक्षसिद्धं नान्येन केनचित् । शक्यं वारयितुं क्वापी'त्यन्तेन भक्तिपादादाविति ज्ञेयम् ॥ **समर्थितमिति** । 'मिथ्यात्वं यदि दुःखादेस्तद्वाक्यस्याग्रतो भवेदि'त्यादिना जिज्ञासासूत्र इति भावः ॥ ४-१-२ ॥

**यादु०— प्रागेवेति** । पृथगधिकरण इत्यर्थः । विरुद्धगुणताया मिथ्यात्वादित्युक्तं दूषयति **विरुद्धगुणसत्यता चेति** । **उपपादिता** 'सत्यत्वात्तेन दुःखादेरि'त्यादाविति शेषः । तद्विषयत्वाच्च प्रत्यक्षादिव्यवहारस्येत्यनेनोक्तं प्रत्यक्षादेरतत्त्वावेदकत्वं निराकरोति **अतत्त्वावेदकत्वमपीति** । प्रथमाधिकरणादौ तत्र तत्र प्रपञ्चसत्यतायाः समर्थितत्वादिति भावः ॥ **अनिष्टत्वं च समर्थितमिति** । 'मिथ्यायाः साधकत्वं चे'त्यादाविति शेषः ।

**वं०प०— श्रुतयस्त्विति** । त्वं वाऽहमस्मि अहं ब्रह्माऽस्मीत्यात्मत्वोपगमप्रतिपादिका इत्यर्थः ।

**कं०रा०— द्युभ्वादिसूत्रैरिति** । 'द्युभ्वाद्यायतनं स्वशब्दात्', 'प्राणभृच्च', 'भेदव्यपदेशात्', 'स्थित्यदनाभ्यां चे'ति सूत्रैरित्यर्थः ॥ **तद्विरोधादिति** । परमार्थिकजीवेशभेदप्रतिपादकोदाहृतसूत्रविरोधात् 'आत्मेति तूपगच्छन्ति ग्राहयन्ति चे'ति सूत्रं जीवेशाभेदं न प्रतिपादयतीति सिद्धमित्यर्थः । तर्हि 'त्वं वाऽहमस्मि भगवो देवते, अहं वै त्वमसि देवते', 'अहं ब्रह्मास्मि' 'एष त आत्मा सर्वान्तरः', 'तत्त्वमसी'त्यादिश्रुतीनां का गतिरित्यत आह **श्रुतयस्त्विति** । श्रुतयस्तु पूर्वमेव 'तथाऽपि रुचिरानन्दपूर्वास्तत्सदृशा गुणाः । सारस्वरूपमस्यापि मुक्तावप्यवशिष्यते', 'अतो भेदवदेवैताः श्रुतयः प्रवदन्ति हि', 'पौराणानि च वाक्यानि सादृश्याभेदसंश्रयादि'त्यादिना द्वितीयाध्यायतृतीयपादे सम्यग्व्याख्याता इत्यर्थः । यदुक्तं परेण विरुद्धगुणयोर्जीवेशयोरन्योन्यात्मकत्वं न सम्भवतीत्याशङ्क्य विरुद्धगुणजातस्य मिथ्यात्वात् तयोरैक्यं सम्भवतीति तदयुक्तम् । जीवेशनिष्ठासर्वज्ञत्वसर्वज्ञत्वादिविरुद्धगुणानां निर्दोषसाक्षिश्रुतिप्रमितत्वेन 'अल्पशक्तिरसार्वज्ञ्यं पारतन्त्र्यमपूर्णता । उपजीवकत्वं जीवत्वमीशत्वं तद्विपर्ययः । 'स्वाभाविकं तयोरेतन्नान्यथा तु कथञ्चने'त्यादि प्रमाणावलम्बनेन च सत्यताया उपपादितत्वादित्याशयेनाह **विरुद्धगुणसत्यता चेति** । यच्चोक्तं प्राक्प्रबोधात् संसारित्वाभ्युपगमात् तद्विषयत्वाच्च प्रत्यक्षादिव्यवहारस्येति अद्वैतसाक्षात्कारपूर्वकालीनभ्रान्तिसिद्धविषयत्वेन प्रत्यक्षादीनामतत्त्वावेदकत्वमिति, तदप्ययुक्तम् । प्रत्यक्षादीनामतत्त्वावेदकत्वस्य प्राङ्निराकृतत्वादित्याशयेनाह **प्रत्यक्षादीनामिति** । यच्च प्रबोधे तु प्रत्यक्षाद्यभाव एवेति वदन्तं परं प्रति तथा सति अद्वैतश्रुतेरसत्त्वमिष्टमेवैतदिति अद्वैतश्रुतेरसत्त्वमिष्टमेवेत्युक्तम् । तदप्ययुक्तम् । अद्वैतश्रुतेर्मिथ्यात्वे वन्ध्यासुतवचस इव अर्थधीहेतुत्वाभावप्रसङ्गेन तस्मिन्मिथ्यात्वस्यानिष्टतायाः समर्थितत्वादित्याशयेनाह **श्रुतिमिथ्यात्वस्येति** ।

**शे०चं०—** उक्तन्यायेनेत्यस्य व्याख्यानं **द्युभ्वादिसूत्रैरिति** ॥ **इदमिति** । 'आत्मेति तूपगच्छन्ती'ति सूत्रमित्यर्थः । इदं सूत्रमिति सम्बन्धः । **श्रुतयः** तत्त्वमसीत्याद्याः ॥ **प्रागेवेति** । पृथगधिकरण इत्यर्थः । **व्याख्याताः** 'सादृश्याच्च प्रधानत्वादि'त्यादिना सादृश्याद्यर्थतया व्याख्याता इत्यर्थः । जीवेश्वरयोरपहतपाप्मत्वानपहतपाप्मत्वादिविरुद्धधर्मवत्त्वाच्च नैक्यमिति भावेनात्र यदुक्तं विरुद्धगुणताया मिथ्यात्वादिति तदपाकरोति **विरुद्धेति** । 'सत्यत्वात्तेन दुःखादेरि'त्यादिनेति शेषः । तद्विषयत्वाच्च प्रत्यक्षादिव्यवहारस्येत्यादिनोक्त-

प्रत्यक्षादेरतत्त्वावेदकत्वं निराकरोति **प्रत्यक्षादीनामिति** । प्रथमाधिकरणादौ तत्र तत्र प्रपञ्चसत्यतासमर्थनेनेति शेषः ॥ **अनिष्टत्वं चेति** । मिथ्यायाः साधकत्वं चेत्यादिनेति शेषः ।

**स०व्र०— श्रुतयस्त्विवति** । तत्त्वमस्याद्याः श्रुतय इत्यर्थः । **प्राक्** पृथगुपदेशादित्यत्र । किञ्च जीवपरयोः सर्वज्ञत्वासर्वज्ञत्वादिविरुद्धधर्माधिकरणत्वाच्च नैक्यम् । यदत्रोक्तं विरुद्धगुणताया मिथ्यात्वादिति तन्निराकरोति **विरुद्धेति** । अपि च प्रत्यक्षेण भेदस्य सिद्धत्वान्न जीवेश्वराभेदपरत्वमस्य सूत्रस्य । अन्यथा तद्विरोधात् । न च प्रत्यक्षमतात्त्विकभेदपरं श्रुतिस्तु तात्त्विकाभेदपरेति भिन्नविषयत्वान्न विरोध इति वाच्यम् । बाधाभावेऽपि तत्सिद्धभेदस्यातात्त्विकत्वे श्रुत्या सिद्धब्रह्मणोऽपि तदापत्त्या तात्त्विकपरत्वमेव वाच्यमित्याह **प्रत्यक्षादीनामिति** ।

**॥ इति समानदेशकालयोः घटघटाभावयोर्मिथ्यात्वमनुपपन्नम् ॥**

* * *

**॥ अथ प्रतीकविषयकत्वेन विष्णोः उपासननिषेध एव द्वितीयसूत्रार्थः ॥**

३६ **सु०—** एवं प्रथमसूत्रस्य अपव्याख्यां प्रत्याख्याय द्वितीयस्यापि प्रत्याख्याति **एतस्मादिति** ।

## अनु०— एतस्मादात्मशब्दोऽयं परमात्माभिधा भवेत् ।

**एतस्मात्** उक्तन्यायात् आत्मेति सूत्रगतोऽयम् **आत्मशब्दः परमात्माभिधा** परमात्मन एवाभिधायकः तावद्भवेत् । ततः किमित्यत आह **प्रतीकेति** ।

## प्रतीकविषयत्वेन विष्णुदृष्टिर्न तद्भवेत् ।

**तत्** तस्मात् पूर्वसूत्रगतस्यात्मशब्दस्य परमात्मवाचित्वात् न प्रतीक इति प्रतिज्ञा-वाक्यस्य **प्रतीकविषयत्वेन विष्णुदृष्टिः कर्तव्या न भवेदित्येवार्थः** । इदमुक्तं भवति । 'न प्रतीक' इत्यत्र तावदात्मेतीत्यनुवर्तनीयं पूर्वसूत्रात् । अन्यथा प्रतिज्ञावाक्यस्यापरिपूर्ण-त्वात् । पूर्वसूत्रे च 'आत्म'शब्दो विष्णुविषय इति समर्थितम् । तथाच प्रतीकविषयाया विष्णुदृष्टेरेवायं प्रतिषेधो व्याख्येयः । न प्रतीकेषु जीवमतिं बध्नीयादिति तु प्रतिज्ञाव्याख्याने प्रकृतपरित्यागोऽप्रकृतस्वीकारश्च प्रसज्येयातामिति ।

**परि०— उक्तन्यायादिति** । 'आत्मशब्दं यतो हेतुमि'त्यादिनोक्तन्यायादित्यर्थः । एतावता परकीयसूत्रार्थे किं दूषणमित्यत आह **इदमुक्तं भवतीति** ।

**वं०प०— पूर्वसूत्रेति** । आत्मेति त्विति सूत्र इत्यर्थः ॥ **विष्णुदृष्टेरेवेति** । तथा च प्रतीके आत्मा न, प्रतीकविषये आत्मशब्दोदितविष्णुदृष्टिः न कर्तव्येत्यर्थः ॥ **न प्रतीकेष्विति** । तथाच आत्मशब्दस्य जीववाचित्वमङ्गीकृत्य 'प्रतीके आत्मा न' प्रतीकविषये जीवमतिं न बध्नीयादिति न प्रतीक इति प्रतिज्ञाभागव्याख्याकरण इत्यर्थः ॥ **प्रकृतेति** । आत्मेति त्विति पूर्वसूत्रे आत्मशब्देन प्रकृतविष्णुपरित्यागोऽप्रकृतजीवस्वीकारश्चेत्यर्थः ।

**कं०रा०— प्रकृतपरित्यागोऽप्रकृतस्वीकारश्चेति** । आत्मशब्दार्थत्वेन प्रकृतस्य विष्णोः परित्यागः, अप्रकृतस्य जीवस्य स्वीकारश्चेत्यर्थः ।

**शे०चं०— प्रत्याख्यातीति** । प्रत्याख्यातुं तदुपयुक्ततया पूर्वोक्तमनुवदतीत्यर्थः । अत एव ततः किमितीति शङ्काग्रन्थः, उक्तस्य प्रमेयस्य प्रत्याख्यानोपयुक्ततासूचकस्तावच्छब्दश्चेति ध्येयम् । शक्त्या प्रतिपादकत्वरूपाया अभिधायाः शब्दधर्मत्वेन शब्दमात्रत्वानुपपत्तेराह **परमात्मन एवाभिधायक इति** । ततश्च मूलेऽभिधाशब्दोऽभिधावत्पर इति भावः । तदिति मौलपदस्य व्याख्यानं **तस्मादिति** । तस्यैव विवरणं **पूर्वसूत्रेत्यादि** । अपव्याख्याननिरासस्य भाष्यारूढतासिद्ध्यर्थं प्रतिज्ञावाक्यस्येत्याद्यपेक्षिताध्याहारप्रदर्शनपूर्वकं भाष्यं व्याचष्टे **न प्रतीक इतीति** । ननु न पूर्वसूत्रस्थस्यात्मशब्दस्य विष्णुविषयत्वमात्रेणात्रोक्तरीत्या प्रतिज्ञार्थसिद्धः । निमित्तनैमित्तिकभावाप्रतिभासनात् । न च तत्सूत्रस्यात्मशब्दानुवृत्तिबलात् तत्सिद्धिरित्यभिप्रायः । तदनुवृत्तेर्निर्मूलत्वादित्यतः तदनुवृत्तौ निमित्तकथनेन हेतुहेतुमद्भावं दर्शयन्नेव ततोऽपि किमपव्याख्यानस्य दूषणमुक्तं भवतीत्यतः फलितं दोषं दर्शयन्नेवाभिप्रायमाह **इदमुक्तं भवतीति** ॥ **प्रकृतेति** । आत्मशब्दार्थतया पूर्वसूत्रे प्रकृतस्य विष्णोः परित्यागात् तदर्थतया अप्रकृतजीवपरत्वाङ्गीकाराच्चेति भावः ।

**वा०र०—** परमात्मन एवाभिधायक इतीति प्रतीकोपादानम् । परमात्माभिधायक इति पाठेऽपि अर्थानुवादोऽयमिति ज्ञेयम् ।

**स०व्र०— किञ्चेति** । (?) प्रबोधे प्रत्यक्षाद्यभावश्रुतेरपि अभावे तदर्थत्वेनाप्रकृतजीवपरत्वाङ्गीकारः स्यात् । ननु चात्रोक्तं सत्यमिष्टमेवैतदिति तत्राह **प्रकृतपरित्याग इति** । आत्मशब्दार्थभूतविष्णुपरित्यागेन प्रकृतपरित्यागात्, तदर्थत्वेनाप्रकृतजीवपरत्वाङ्गीकारेण अप्रकृतस्वीकाराच्चेत्यर्थः ।

**॥ इति प्रतीकविषयकत्वेन विष्णोः उपासननिषेध एव द्वितीयसूत्रार्थः ॥**

* * *

**॥ अथ प्रतीकविषयकोपासननिषेध इव प्रतीकगतत्वेनोपासनमपि सूत्रार्थः ॥**

३७ **सु०—** 'मनो ब्रह्मे'त्यादिश्रुत्यर्थत्वेन यत्प्रतीकसंस्थितत्वेन इत्युक्तं तदपि नोत्सूत्र(त्रित)म् । किन्तु प्रतीक इति सप्तम्यन्तं पदमावर्तते । तत्राद्यं विषयसप्तम्यन्तं न इत्यनेन सम्बध्यते । द्वितीयमधिकरणसप्तम्यन्तं श्रुतिव्याख्यानम् । उभयत्रात्मेतीति पदद्वयं पूर्वसूत्रादनुवर्तत इत्याशयवान् प्रसङ्गाद् द्वितीयं व्याख्याति **प्रतीक इति** ।

## अनु०— प्रतीके विष्णुरित्येव तस्मात्कार्या ह्युपासना ।

**यस्मात् प्रतीकविषयत्वेन विष्णुदृष्टिः कर्तव्या न भवेत् तस्मात् इति श्रुत्यर्थ इति शेषः । हिशब्देन प्रथमादिविभक्तेः सप्तम्यर्थवाचित्वं शाब्दिकानां प्रसिद्धमिति द्योतयति ।**

**परि०—** परमते दोषोक्तिप्रस्तावे सिद्धान्तसूत्रार्थोक्तिरसङ्गतेत्यत आह **मनो ब्रह्मेति** । यद्वा भवदर्थोऽप्यप्रकृतस्वीकाररूप एव सूत्रेऽप्रतीतेरित्यत आह **मनो ब्रह्मेत्यादीति** ॥ **प्रसङ्गादिति** । सूत्रार्थदूषणप्रसङ्गादिति । यद्वा, स्मृतस्योपेक्षानर्हत्वरूपप्रसङ्गादित्यर्थः ॥ **शाब्दिकानामिति** । 'सप्तसु प्रथमे'ति पठतामित्यर्थः । तथाच श्रुतौ 'नाम्नि ब्रह्मे'त्यादि योजनेति भावः ।

**यादु०—** नन्वपव्याख्याननिराकरणसमये न स्वाभिप्रेतसूत्रव्याख्यानं सङ्गतम्, अत आह **प्रसङ्गादिति** ॥ **शाब्दिकानामिति** । सप्तसु प्रथमा षट्सु द्वितीयेत्येवं वदतामिति शेषः ।

**वं०प०—** **आवर्तत इति** । न प्रतीक इति सूत्रे प्रतीक इति पदमावर्तनीयमित्यर्थः ॥ **नेत्यनेनेति** । प्रतीकविषये विष्णुदृष्टिः न कर्तव्येति तदर्थः । **द्वितीयं** आवर्तितं प्रतीक इति पदम् ॥ **श्रुतीति** । 'मनो ब्रह्मे'-त्यादि श्रुतीत्यर्थः ॥ **उभयत्रेति** । प्रतीक इत्यस्य विषयसप्तम्यन्तत्वपक्षेऽधिकरणसप्तम्यन्तत्वपक्षे चेत्यर्थः । **द्वितीयं** अधिकरणसप्तम्यन्तं प्रतीक इति पदम् । तस्मादित्यर्थतया आद्यव्याख्यानमनुवदति **यस्मात्प्रतीकेति** ।

**कं०रा०—** **प्रतीकसंस्थितत्वेनेत्युक्तमिति** । 'प्रतीकसंस्थितत्वेन ध्येयो विष्णुः न चान्यथे'ति यत्प्रागुक्तं तदपीत्यर्थः ॥ **श्रुतिव्याख्यानमिति** । 'मनो ब्रह्मे'त्यादिश्रुतिव्याख्यानरूपमित्यर्थः ॥ **प्रथमादिविभक्तेरिति** । 'सुपां सुलुगि'त्येतत् सूत्रव्याख्यानावसरे काशिकायां 'सुपां स्थाने सुपो भवन्ती'ति वक्तव्यमित्युक्तत्वात् सप्तम्यादेशत्वेन प्रथमादिविभक्तौ कृतायां तस्याः सप्तम्यर्थवाचित्वं शाब्दिकानां प्रसिद्धमिति भावः ।

**शे०चं०—** ननु प्रतीकविषयत्वेनेति पूर्ववाक्येनैव अपव्याख्याननिराससिद्धेः उत्तरभाष्यखण्डवैयर्थ्यम् । न च मनो ब्रह्मेत्यादिश्रुतिव्याख्यानार्थत्वादस्य न तदिति वाच्यम् । तासां पूर्वमेव व्याख्याततत्वेनास्य तादर्थ्या-

योगादित्यतः पूर्वमुक्तस्य श्रुत्यर्थस्य सूत्रारूढत्वोपदर्शिनोत्सूत्रितत्वशङ्कापरिहारार्थत्वान्न तदानर्थक्यमिति भावेन तत्परतयोत्तरार्धं सङ्गमयितुमाह **मनो ब्रह्मेत्यादीति** । नन्वपव्याख्याननिरासेन न प्रतीक इत्यस्य चरितार्थत्वान्न प्रतीके विष्णुरित्यस्य श्रुत्यर्थतया सूत्राल्लाभ इत्याशयेन पृच्छति **किन्त्विति** । उत्तरमाह **प्रतीक इतीति** ॥ **द्वितीयमिति** । अधिकरणसप्तम्यन्तपदोपेतवाक्यमित्यर्थः ॥ **उभयत्रेति** । विषयसप्तम्यन्तेऽधिकरणसप्तम्यन्ते च प्रतीकपद इत्यर्थः । अपव्याख्याननिराकरणावसरे स्वाभिमतश्रुत्यर्थस्य सूत्रारूढताकथनस्यासङ्गततामाशङ्क्याह **प्रसङ्गादिति** । तस्मादित्यस्य यस्मादित्येतत्सापेक्षत्वात् प्रतीकविषयत्वेनेति पूर्ववाक्योक्तमर्थमेव हेतुतया योजयति **यस्मादिति** । अस्य भाष्यस्य श्रुत्यर्थतायाः मूलारूढतासिद्ध्यर्थमपेक्षितं पूरयति **इति श्रुत्यर्थ इति शेष इति** । प्रथमादीत्यादिपदेन द्वितीयापरिग्रहः ॥ **शाब्दिकानामिति** । 'व्यत्ययो बहुलमि'ति 'सप्तसु प्रथमा', 'षट्सु द्वितीये'त्यादिलक्षणशास्त्ररहस्यज्ञानिनामित्यर्थः ।

**वा०र०**— इत्यादिलक्षणशास्त्ररहस्येति पाठः ।

**स०व्र०**— **श्रुतिव्याख्यानमिति** । 'मनो ब्रह्मेत्युपासीते'त्यादिश्रुतिव्याख्यानमिति भावः । उभयत्र विषयसप्तम्यन्तेऽधिकरणसप्तम्यन्ते चेत्यर्थः ।

**॥ इति प्रतीकविषयकोपासननिषेध इव प्रतीकगतत्वेनोपासनमपि सूत्रार्थः ॥**

* * *

**॥ अथ जीवप्रतीकैक्यस्य अप्राप्तत्वात् तन्निषेधपरः सूत्रार्थः असमञ्जसः ॥**

३८ **सु०**— इतश्च नायं प्रतिज्ञार्थ इत्याह **न चेति** ।

## अनु०— न च विष्णुः प्रतीकं यत् तस्मात् ........ ॥ ३ ॥

यस्मात् विष्णुः प्रतीकं, चशब्दाज्जीवश्च न भवति; **तस्मात्** प्रतीकेष्वात्मेति जीव इति उपासना न प्रसक्तेति शेषः । अयमर्थः । प्राप्तौ सत्यां हि प्रतिषेधो वक्तव्यः । न च प्रतीकेषु उपासकस्य आत्मदृष्टिः प्रसक्ता प्रसञ्जकाभावात् । यत्तु प्रसञ्जकमुक्तं ब्रह्मण आत्मत्वं प्रतीकानां च ब्रह्मविकारत्वं तदुभयमप्रामाणिकं प्रमाणविरुद्धं च । न ह्यत्यन्ताभासेन प्रसक्तिर्भवति । अतिप्रसङ्गात् । ततः प्रसक्त्यभावात् प्रतिषेधोऽनर्थक इति ।

**परि०**— **प्रतीकेष्विति** । विषयसप्तमीयं न त्वाधारसप्तमी । अनेन कः प्रतिज्ञादोष उक्त इत्यत आह **अयमर्थ इति** ॥ **प्रसञ्जकाभावादिति** । 'नामब्रह्मे'त्येव श्रवणेन नामात्मेत्यश्रवणादिति

भावः ॥ **प्रमाणविरुद्धमिति** । 'द्वा सुपर्णा', 'निर्विकारोऽक्षर' इत्यादिप्रमाणविरुद्धमित्यर्थः ॥ **अतिप्रसङ्गादिति** । अङ्गुल्यग्रे हस्तिशतमित्यादेरपि केनचिदुक्तस्य निषेधप्रसङ्गादित्यर्थः ।

**यादु०**— नन्वेवं 'न च विष्णुप्रतीकं यदि'त्यस्य कथमुपयोग इत्याशङ्काया परोक्तप्रसञ्जकखण्डनाय तदित्याशयेनाह **अयमर्थ इति** ।

**कं०रा०— यत्तु प्रसञ्जकमुक्तमिति** । ब्रह्मणो जीवाभिन्नत्वात् प्रतीकानामपि ब्रह्मविकारत्वात् ब्रह्मत्वे सति आत्मत्वोपपत्तेः । प्रतीकेष्वात्मदृष्टिः कर्तव्येति ब्रह्मण आत्मत्वं प्रतीकानां च ब्रह्मविकारत्वं प्रतीकेष्वात्मदृष्टिप्रसञ्जनं यदुक्तं तदुभयमप्यप्रामाणिकं प्रमाणविरुद्धम् । ब्रह्मणो जीवाभिन्नत्वस्य अप्रामाणिकत्वप्रमाणविरुद्धत्वयोः पृथगधिकरणे व्युत्पादितत्वात् । प्रतीकानां च ब्रह्मविकारत्वस्याप्रामाणिकत्वप्रमाणविरुद्धत्वयोः प्रकृतिश्चेत्यादिसूत्रापव्याख्याननिरासावसरे निरूपितत्वादिति भावः । ननु ब्रह्मण आत्मत्वस्य प्रतीकानां ब्रह्मविकारत्वस्य च अप्रामाणिकत्वप्रमाणविरुद्धत्वाभ्यामाभासत्वेऽपि प्रसञ्जकत्वं सम्भवत्येव । आभासप्रसक्तस्य तत्र तत्र निषेधदर्शनादित्यत आह **न ह्यत्यन्ताभासेनेति** । अत्यन्ताभासस्य प्रसञ्जकत्वं कुत्रापि न दृष्टमिति भावः ।

**शे०चं०— अयमिति** । न प्रतीकेषु जीवमतिं बध्नीयादित्ययमित्यर्थः । उक्तस्य प्रतिज्ञार्थत्वाभावे हेत्वन्तरतया विवक्षितस्याप्रसक्तत्वस्य मूलारूढतासिद्ध्यर्थमपेक्षितं शेषमाह **प्रसक्तेति शेष इति** । ननु चोक्तप्रतिज्ञाहेतुतया प्रतीकानां जीवत्वाभावस्यैव भाष्यकारेण वक्तव्यत्वात् विष्णोर्जीवत्वप्रतीकत्वाभावप्रतिपादनपरस्य 'न च विष्णुः प्रतीकं यदि'ति भाष्यखण्डस्यानर्थक्यमित्यतोऽस्य प्रतीकेष्वात्मदृष्टिप्रसञ्जकतया पराभिप्रेतयुक्तिखण्डनार्थत्वान्नानर्थक्यमित्याशयेन प्रसञ्जकाक्षेपोत्थानपूर्वकं पराभिप्रेतां युक्तिमुपन्यस्य तन्निरासकतया तमंशं योजयन्नेव भाष्याभिप्रायमाह **अयमर्थ इति** ।

**वा०र०**— प्रतीकत्वाभावप्रतिपादनेति पाठः ।

**॥ इति जीवप्रतीकैक्यस्य अप्राप्तत्वात् तन्निषेधपरः सूत्रार्थः असमञ्जसः ॥**

* * *

**॥ अथ आत्मशब्दवाच्यः विष्णुरेव तच्छब्देन परामृष्टः ॥**

**३९ सु०— न हि स इति हेतुव्याख्यानं दूषयति न च विष्णुः प्रतीकं यत् तस्मादिति । तच्छब्दो हि प्रकृतपरामर्शो वर्तते प्रकृतश्चात्मा । आत्मशब्दश्च विष्णुवाच्येवेति समर्थितम् । तथाच हि यस्मात् स विष्णुः प्रतीकं नैव तस्मात् इत्येवार्थः सम्पद्यते । न हि स उपासकः प्रतीकानीति व्याख्याने तु प्रकृतपरित्यागेनाप्रकृतपरामर्शः प्रसज्यत इति ॥**

**परि०— तस्मादितीति** । हेत्वंशार्थोऽप्ययुक्त इति शेष इति भावः । अन्यथाऽनन्वय-प्रसङ्गात् ॥ **परामर्श इति** । पुनरनुसन्धानं **परामर्शः** ॥

**वं०प०— प्रकृतश्चात्मेति** । आत्मेति त्विति सूत्र इत्यर्थः ॥ ४-१-३ ॥

**शे०चं०—** प्रतिज्ञार्थस्येव हेत्वर्थस्याप्यनभिमततयाऽवश्यदूषणीयत्वात् तददूषणप्रयुक्तां भाष्ये न्यूनतां परिहर्तुं न चेत्यादिभाष्यमेव हेत्वपव्याख्याननिरासपरतयाऽपि योजयति **न हीत्यादि** ॥ **प्रकृतपरित्यागेनेति** । आत्मशब्दार्थस्य विष्णोरेव सर्वनामतया प्रकृतपरामर्शकतच्छब्दार्थतया प्रकृतत्वात् जीवस्य च अप्रकृतत्वा-दुक्तरीत्या हेतुव्याख्याने प्रकृतपरित्यागाप्रकृतस्वीकारप्रसङ्ग इति भावः ॥ ४-१-३ ॥

**स०व्र०— प्रकृतपरित्यागेनेति** । तच्छब्दस्य प्रकृतपरामर्शकत्वात् आत्मशब्दार्थविष्णोरेव पूर्वं प्रकृतत्वात् तत्परित्यागेनोपासनापरत्वे प्रकृतत्यागोऽप्रकृतस्वीकारश्चेत्यर्थः ।

**॥ इति आत्मशब्दवाच्यः विष्णुरेव तच्छब्देन परामृष्टः ॥**

* * *

**॥ अथ मायामतरीत्या द्वितीयतृतीयसूत्रव्याख्यानयोः परस्परं विरोधः ॥**

४० **सु०—** इदानीं ब्रह्मदृष्टिरिति सूत्रस्यापव्याख्यामपाकरोति **नात्मेति** ।

**अनु०—** नात्मेत्युपासना ।
इति पक्षो यदा ब्रह्मदृष्टिश्चात्र विरुध्यते ॥

**नात्मेत्युपासना** इत्येकदेशोत्कीर्तनेन 'न प्रतीके न हि सः' इति समग्रसूत्रार्थ-मनुवदति । प्रतीकेष्वात्मेति जीव इत्युपासना न कार्या । न हि स उपासकः प्रतीकानि **इति पक्षो यदा** इत्येवं पूर्वसूत्रव्याख्यानं यदा तदाऽत्र प्रतीकेषु **ब्रह्मदृष्टिश्च विरुध्यते** । **चशब्दो-ऽपव्याख्याननिराससमुच्चये** ।

**परि०—** 'इतिपक्षो यदे'त्यस्यार्थमाह **इत्येवमिति** । अत्रेति मूलानुवादः । **प्रतीकेष्विति** व्याख्या ॥ **चशब्दोऽपव्याख्यानेत्यादि** । न केवलं नात्मेत्यादिसूत्रार्थो न युक्तः किन्त्वेतत्सूत्रार्थो-ऽपीति **समुच्चय** इत्यर्थः ।

**वं०प०— पूर्वसूत्रेति** । न प्रतीक इति सूत्रे इत्यर्थः । **प्रतीकेषु** आदित्यादिषु ।

**शे०चं०**— कोऽसौ समग्रसूत्रार्थोपपादनानुवादकता एकदेशोत्कीर्तनेन नात्मेत्युपासनेति भाष्यस्योच्यत इत्यतः तं दर्शयन्नेवैकवाक्यतया योजयति **प्रतीकेष्विति** । इति पक्षो यदेत्येतदनूद्य विवृणोति **इतीति** । ब्रह्मदृष्टिर्विरुध्यत इत्येतावता पूर्तेर्दृष्टिश्चेति चशब्दस्यानर्थक्यमित्याशङ्क्य न केवलं पूर्वसूत्रापव्याख्यानमनुपपन्नम्, किं त्वेतत्सूत्रव्याख्यानमपीति पूर्वोत्तरसूत्रापव्याख्याननिराससमुच्चयार्थत्वान्नानर्थक्यमित्याशयेनाह **चशब्द इति** ।

* * *

४१ **सु०— एतद्विवृणोति स इति ।**

## अनु०— स नेति युक्तिस्तत्रापि समेत्युक्तविरुद्धता ।

**प्रतीकानामात्मत्वेनोपासनस्याकर्तव्यत्वे त्वया या तादात्म्याभावलक्षणा स नेति युक्तिरभिहिता सा तत्रापि ब्रह्मप्रतीकयोरपि समेति हेतोः प्रतीकेषु ब्रह्मदृष्टिः कर्तव्येति सूत्रे व्याख्यायमाने सति उक्तयुक्तिविरुद्धता भवतीति । एतदुक्तं भवति । प्रतीकेषु ब्रह्मदृष्टिः कर्तव्येति सूत्रव्याख्यानमसत् । प्रतीकं ब्रह्मतया नोपास्यम् । अब्रह्मत्वात् । यद्यन्न भवति न तत् तत्त्वेन उपास्यमिति युक्तिविरुद्धत्वात् । न चेयं युक्तिरप्रमा । प्रतीकानामात्मत्वेन उपासनस्य अकर्तव्यतायां पूर्वसूत्रे परेणैवोपन्यस्तत्वात् । अन्यथा अनैकान्त्येन तत्रापि साधिका न स्यात् । न च ब्रह्मप्रतीकयोरभेदः ब्रह्मणः सत्यत्वात् प्रतीकानां कल्पितत्वात् । पारमार्थिकभेदाभावः तावदस्तीति चेत् । तर्हि जीवप्रतीकयोरपि स नास्तीत्यसिद्धिः स्यादिति ।**

**परि०**— परमसाध्यं वदन्नेव युक्तिप्रकारं व्यञ्जयति **एतदुक्तं भवतीति** ॥ **अप्रमेति** । अप्रमाणमित्यर्थः ॥ **अनैकान्त्येनेति** । ब्रह्मप्रतीकयोरतादात्म्येऽपि ब्रह्मदृष्टेर्नामादावङ्गीकारादिति भावः । **तत्रापि** पूर्वसूत्रेऽपीत्यर्थः । हेतोरभावान्नानैकान्त्यमित्याशङ्क्य निराह **न चेति** ॥ **असिद्धिरिति** । तादात्म्याभावरूपहेतोरिति योज्यम् ।

**वं०प०**— **ब्रह्मप्रतीकयोरिति** । ब्रह्मादित्यादिप्रतीकयोरप्यभेदेन दृष्टेरकर्तव्यत्व इत्यर्थः । **अन्यथेति** । यद्यन्न भवति न तत्तत्त्वेनोपास्यमिति युक्तेरमानत्वाङ्गीकार इत्यर्थः ॥ **तत्रापीति** । प्रतीके जीवमतिं न बध्नीयादित्यत्रापीत्यर्थः । कुत इत्यत उक्तम् **अनैकान्त्येनेति** । ब्रह्मानात्मकेऽप्यादित्यादिप्रतीके ब्रह्मत्वेन दृष्ट्यङ्गीकारेण न हि स इत्युक्तेर्व्यभिचारप्रसङ्गादित्यर्थः ।

ननु स नेति युक्तिः समेत्युक्तमयुक्तम् । ब्रह्मप्रतीकयोरभेदाङ्गीकारादित्याशङ्क्य निराकरोति **न च ब्रह्मप्रतीकयोरभेद इति** । कुतो नेत्यतो विरुद्धधर्माधिकरणत्वादित्याह **ब्रह्मणः सत्त्वादिति** । सत्यत्वादित्यर्थः । **सः** पारमार्थिकभेदः ॥ **असिद्धिरिति** ॥ प्रतीकं जीवत्वेन नोपास्यमतत्वात् तादात्म्याभावादिति यावदित्येवं 'न हि स' इत्यनेनोक्तहेतोरसिद्धिः स्यात् । पारमार्थिकभेदाभावरूपतादात्म्यस्यैव सत्त्वादित्यर्थः ।

**कं०रा०—** **तादात्म्याभावलक्षणेति** । प्रतीकात्मनोरिति शेषः ॥ **पूर्वसूत्रेणैवोपन्यस्तत्वादिति** । तादात्म्याभावलक्षणयुक्तेरिति शेषः ॥ **न चेति** । ब्रह्मप्रतीकयोरभेद एव । तथा च प्रतीकं ब्रह्मतया नोपास्यमब्रह्मत्वादिति यो हेतुः सोऽसिद्ध इति न च । ब्रह्मणः सत्यत्वेन प्रतीकानां च कल्पितत्वेन ब्रह्मप्रतीकयोरभेदासम्भव इति । ननु ब्रह्मप्रतीकयोः पारमार्थिकभेदाभावस्तावदस्ति । न च तयोरभेदोऽनुमीयते । तथाच अब्रह्मत्वादिति हेतुरसिद्ध एवेत्याशयेन शङ्कते **पारमार्थिकेति** ॥ **तर्हीति** । जीवप्रतीकयोरपि पारमार्थिकभेदो नास्तीति पारमार्थिकभेदाभावेन तयोरप्यभेदस्य सुसाध्यत्वात् अतीतसूत्रोक्तस्तादात्म्याभावलक्षणहेतुः असिद्धः स्यादित्यर्थः ।

**शे०चं०—** उक्तस्यैव पुनर्वचनात् 'स ने'त्युत्तरभाष्यवैयर्थ्यमाशङ्क्य परिहरति **एतद्विवृणोतीति** । ननु युक्तिविरुद्धत्वकथनमात्रेणैव परकीयसूत्रव्याख्यानस्यापव्याख्यानत्वसिद्धेर्भाष्ये युक्तेः समत्वकथनमनर्थकमित्यतः प्रामाण्यासिद्धिपरिहारव्युत्पादनार्थत्वान्न तदिति भावेन युक्तिविरुद्धत्वोक्तिफलकथनपूर्वकं विरोधियुक्तिस्वरूपोपदर्शनपूर्वकं च वाक्यतात्पर्यमाह **एतदुक्तं भवतीति** । विशेषव्याप्तौ दृष्टान्ताभावेन व्याप्यत्वासिद्धिमाशङ्क्य तदभावेऽपि सामान्यव्याप्तित्वान्न तदिति भावेन तामुपदर्शयति **यद्यन्नेति** ॥ **अनैकान्त्येनेति** । अत्र अब्रह्मरूपस्यापि प्रतीकस्य ब्रह्मत्वेनोपास्यत्वेन प्रतीके अनैकान्त्यप्रसङ्गेनेत्यर्थः ॥ **तत्रापीति** । प्रतीकानामात्मत्वेनोपासनस्याकर्तव्यतायामपीत्यर्थः ॥ **अभेद इति** । ततश्च अब्रह्मत्वहेतुरसिद्ध इति भावः । न तथाऽप्यनैकान्तिकपरिहार इत्यत आह **प्रतीकानामिति** । प्रतीकेषु विशेषणाभावायत्तविशिष्टहेत्वभावप्राप्त्या हेत्वगमनान्नानैकान्तिकमिति भावः ।

**वा०र०—** अनैकान्त्येनेतीति प्रतीकोपादानम् । प्रसङ्गपदं लेखकप्रमादात् । अनैकान्त्यपरिहार इति नानेकान्त्यमितीति च पाठः ।

**स०व्र०—** **अन्यथेति** । अब्रह्मत्वयुक्तेरप्रमात्वं न वाच्यं तथासति प्रतीकानि आत्मतया नोपास्यानि अनात्मत्वादिति त्वदीयानुमानेऽपि अनात्मत्वस्याभासत्वं स्यादविशेषात् । अन्यथा ब्रह्मभूतानामपि प्रतीकानां ब्रह्मत्वेनोपास्यत्वदर्शने यद्यन्न भवति तत् तत्त्वेन नोपास्यमिति व्याप्तेरेव व्यभिचारेणासाधकत्वापातादित्यर्थः । प्रतीकं ब्रह्मतया नोपास्यं अब्रह्मत्वादित्यनुमानेऽसिद्धिमाशङ्कते **न चेति** ॥ **ब्रह्मण इति** । तथा च विरुद्धधर्माधिकरणत्वान्नाभेद इति भावः । ननु ब्रह्मप्रतीकयोर्विरुद्धधर्माधिकरणत्वेन काल्पनिकभेदसद्भावेऽपि पारमार्थिकभेदाभावेन अब्रह्मत्वरूपहेतुरसिद्ध एवेति शङ्कते **पारमार्थिकेति** । तर्हि प्रतीकं नात्मतयोपास्यं अनात्म-

त्वादिति त्वदीयानुमानेऽपि प्रतीकात्मनोर्विरुद्धधर्माधिकरणत्वेन काल्पनिकभेदसद्भावेऽपि पारमार्थिकभेदाभावेन अनात्मत्वहेतुरप्यसिद्धः स्यादित्याह **तर्हीति** ।

**॥ इति मायामतरीत्या द्वितीयतृतीयसूत्रव्याख्यानयोः परस्परं विरोधः ॥**

* * *

**॥ अथ उत्कर्षप्राप्त्यभावस्य हेतुविशेषणत्वे प्रतीके आत्मत्वेनोपासनस्य अपरिहार्यत्वप्रसङ्गः ॥**

४२ **सु०—** स्यादेतत् । 'न हि स' इति न निर्विशेषणो हेतुः सूत्रकारस्याभि(प्रेतो)मतो येन ब्रह्मदृष्टिः प्रतीकेषूक्तयुक्तिविरुद्धा स्यात् । किं तूपास्यस्योत्कर्षप्राप्त्यभावे सतीत्यनेन विशिष्टः । प्रतीकानां ब्रह्मत्वेनोपासने तूत्कर्षप्राप्तिरस्ति । अतोऽतद्भावेऽप्युपासना (कार्या) युज्यत इत्यत आह **यदीति** ।

अनु०— यद्यप्युत्कर्षमात्रेण ह्यतद्भावेऽप्युपासना ।

आद्योऽपिशब्दोऽतिप्रसङ्गसमुच्चयार्थः । **हि**शब्दस्योत्तरार्धेनान्वयः । यदि विशिष्टहेतुं व्याख्याय प्रतीकानाम् **अतद्भावे**ऽब्रह्मत्वेऽपि **उत्कर्षप्राप्तिमात्रेण** ब्रह्मत्वेनोपासनाऽङ्गीक्रियते । तदा आत्मत्वेनापि तदुपासनमङ्गीकार्यं न तु निराकार्यम् । कुत इत्यत आह **उत्कर्ष इति** ।

उत्कर्ष आत्मनोऽपि स्याच्चेतनत्वादचेतनात् ।

यस्माद्ब्रह्मवत् **आत्मनोऽपि** प्रतीकात् **उत्कर्षो**ऽस्ति । कथम् । आत्मनः **चेतनत्वात्** । अचेतनं खलु प्रतीकम् । तस्यात्मत्वेनोपासनायामुत्कर्षप्राप्तिः स्यादिति । अतिप्रसङ्गस्य विपर्ययपर्यवसानमाह **तस्मादिति** ।

तस्मादतत्त्वं नोपास्यमिति वेदविदां मतम् ।

यस्माद्विशिष्टहेतौ व्याख्यायमाने पूर्वसूत्रेऽसिद्धिः स्यात् । तत एव प्रतीकेषु ब्रह्मोपासनवदात्मोपासनं च प्रसज्येत । तस्मात्, अतत्त्वं, यद्यन्न भवति तत्तत्त्वेन **नोपास्यमिति**

**सामान्यमेव सूत्रकारस्याभिमतम् । न तु विशेषणप्रक्षेपः । तथा च ब्रह्मदृष्टिरिति प्रतिज्ञा स्वोक्तयुक्तिविरुद्धैव इति । अत्र व्याप्तेः निर्विशेषणत्वाभिधानस्य हेतोः निर्विशेषणत्व एव तात्पर्यम् । स्पष्टत्वार्थं तु व्याप्त्यभिधानमिति वाच्यम् ।**

**परि०— अतद्भाव इति** । तादात्म्येऽसत्यपीत्यर्थः ॥ **अतिप्रसङ्गसमुच्चयार्थ इति** । अविशिष्टहेतुपक्षे युक्तिविरुद्धत्वरूपातिप्रसङ्गेन सह विशिष्टहेतोरप्यात्मत्वेनोपासनापादनरूपातिप्रसङ्ग-समुच्चयार्थ इत्यर्थः । यद्वा विशिष्टहेतुव्याख्यानपक्षे न केवलं पूर्वसूत्रेऽसिद्धिः । किन्तु आत्मत्वोपा-सनप्रसङ्गश्चेत्येवं समुच्चयार्थ इत्यर्थः । **अतद्भाव** इत्यनुवादः । **अब्रह्मत्व** इति व्याख्या । हिशब्दार्थो **यस्मादिति** ॥ **असिद्धिः स्यादिति** । 'न हि स' इत्यत्राभिमतस्योपास्यस्य उत्कर्षप्राप्त्यभावे सत्यतद्भावरूपहेतोरिति योज्यम् । ननु परेण विशिष्टहेतोरुक्तत्वादिहातत्त्वान्नोपास्यमिति विशेषणं विना कृतस्य व्याप्त्युक्तिरसङ्गतेत्यत आह **अत्र व्याप्तेरिति** ।

**यादु०— अतिप्रसङ्गसमुच्चयार्थ इति** । न केवलं विशिष्टहेतौ व्याख्यायमाने पूर्वसूत्रेऽसिद्धिरेव 'उत्कर्ष आत्मनोऽपि स्यादि'त्यनेनोच्यते । अपि तु प्रतीकेषु ब्रह्मोपासनवत् आत्मोपासनं च प्रसज्येते-त्यतिप्रसङ्गोऽपि इति अतिप्रसङ्गसमुच्चयार्थ इत्यर्थः । ननु तस्मादतत्त्वादित्येव हेतुः न तु विशिष्ट इति हेतोः निर्विशेषणत्वे वक्तव्ये व्याप्तेर्निर्विशेषणत्ववचनमसङ्गतमित्यत आह **अत्र व्याप्तेरिति** ।

**वं०प०— अनेन विशिष्ट इति** । 'न हि स' इत्युक्तस्तादात्म्याभावरूपो हेतुरिति शेषः ॥ **असिद्धिः स्यादिति** । अचेतनानां चेतनत्वेन ध्यानप्राप्त्योत्कर्षप्राप्तेर्विशेषणासिद्धिः स्यात् इत्यर्थः ॥ **तत एवेति** । असिद्धेरेवेत्यर्थः । अचेतनानां चेतनत्वोपास्त्योत्कर्षप्राप्तेरेवेत्यर्थः ॥ **स्वोक्तयुक्तीति** । 'न हि स' इत्युक्त-युक्तीत्यर्थः । अतत्त्वं नोपास्यमित्येवं व्याप्तेर्निर्विशेषणत्वकथनमसङ्गतम् । अतत्त्वादित्येव हेतुर्वक्तव्यो न तूक्त-विशेषणविशिष्ट इत्येवं हेतोरेव निर्विशेषणत्वस्य वक्तव्यत्वादित्यत आह **अत्र व्याप्तेरिति** । **व्याप्त्यभिधानं** व्याप्तेर्निर्विशेषणत्वेनाभिधानम् ।

**कं०रा०—** ननु 'न हि स' इत्युक्तस्य तादात्म्याभावरूपहेतोरुत्कर्षप्राप्त्यभावलक्षणविशेषणविशिष्टत्वे शङ्किते 'तस्मादतत्त्वं नोपास्यमि'त्यनेन 'यद्यन्न भवति तत्तत्त्वेन नोपास्यमि'ति सामान्यत एव व्याप्तिः सूत्र-कारस्याभिमतेति व्याप्तेः निर्विशेषणत्वाभिधानमसङ्गतमित्यत आह **अत्र व्याप्तेरिति** ॥ **स्पष्टत्वार्थमिति** । हेतोर्विशेषणत्वस्य स्पष्टत्वार्थमित्यर्थः ।

**शे०चं०— अत इति** । हेत्वसिद्धेरित्यर्थः ॥ **अतिप्रसङ्गेति** । न केवलं विशिष्टहेतौ व्याख्यायमाने पूर्वसूत्रेऽसिद्धिरेव 'उत्कर्ष आत्मनोऽपि स्यादि'त्यनेनैवोच्यते किन्तु प्रतीकेषु ब्रह्मोपासनावदात्मोपासनमपि

प्रसज्येतेत्यतिप्रसङ्गोऽपीत्यतिप्रसङ्गसमुच्चयार्थः । ननु तस्मादतत्त्वादित्येव हेतुः न तु विशिष्ट इति हेतोर्निर्विशेषणत्वमेव वक्तव्यम् । व्याप्तेर्निर्विशेषणत्ववचनं तु असङ्गतमित्यत आह **अत्रेति** ।

**वा०र०—** हेतोर्विशेषणत्ववचनप्रकारप्रदर्शनं **तस्मादतत्त्वादित्यादि** । इदं च तस्मादतत्त्वमिति मूलस्य विपर्यासेन वचनम् । नन्वत्र हेतोर्विशेषरूपत्वेन विशेष्ययोश्च व्याप्तेरभावेन सामान्यव्याप्तिराश्रिता यद्यत्र भवतीत्यादिना प्राक् । ततः सामान्यव्याप्तावन्यथाऽनैकान्त्यमिति सिद्धान्तिनोक्ते तत्रोपास्योत्कर्षाभावेन विशिष्टत्वमाश्रितं पूर्वपक्षिणा । तत्र च असिद्धिः सिद्धान्तिनाऽभिहिता । तत उपसंहारे व्याप्तेर्निर्विशेषणत्वं हेतोस्तत्त्वं पर्यवस्यतीति चोक्तम् । तदेतत्कथम् । व्याप्तेः सामान्यतया तत्र व्याप्यमात्रस्य व्यभिचारप्राप्तावप्यात्मभिन्नस्य तत्त्वेनोपास्यताया अनङ्गीकारेण हेतोः व्यभिचारानुपपत्तेः । ब्रह्मभिन्नानां प्रतीकानां ब्रह्मत्वेनोपासनं काममस्तु । न चैतावताऽन्यदीयहेतोरस्ति वृत्तिः । असिद्ध्यभिधानं चासत् । व्याप्तौ प्राप्तव्यभिचारपरिहाराय तत्रैव विशेषणोपादाने कर्तव्येऽपि हेतौ तदभिधानेन तत्र तत्परिहाराय विशेषणोपादानस्यैवायोगात् । एवमन्येऽपि दोषा ज्ञेयाः । तत्कथमेतदिति चेत् । अत्र ब्रूमः । विशेषव्याप्तौ दृष्टान्ताभावेन सामान्यव्याप्त्याश्रयणेऽपि सामान्यव्याप्तेर्व्यभिचारो विशेषव्याप्तेरेव । सामान्यव्याप्तौ हि विशेषव्याप्तिघटनां यत्तदादिपदैरभिधानम् । पर्यवसाने तु विशेष एव लभ्यतेऽतस्तत्र सामान्यव्याप्तिगतं व्याप्यं पर्यवसन्नं हेतुर्भवतीत्यतस्तस्य व्यभिचारे हेतोरेव व्यभिचारो भवति । अत एवासिद्ध्यभिधानोपपत्तिः । तत्र प्राप्तव्यभिचारस्य हेतावेव प्राप्तेरङ्गीकारेण तत्परिहाराय विशेषणस्य तत्रैवाङ्गीकर्तव्यतयाऽसिद्धेर्वक्तुं शक्यत्वात् । अत एव प्रतीकानामात्मत्वेनोपासनस्याकर्तव्यतायां पूर्वसूत्र इत्यादिग्रन्थेषु सङ्करेणैव व्याप्तिव्याप्यस्य हेतोश्च मूले व्यवहारः । एवमन्येऽपि दोषाः परिहार्याः । अस्य ग्रन्थस्य पूर्वोत्तरपरामर्शे सामान्यव्याप्तिव्यभिचारादीनां तत्परिहाराणां च हेतुनिष्ठत्वस्यैव प्रतीतेः । एवं प्रयोगाणां स्वपरसिद्धान्ते बहुलं सांव्यावहारिकत्वादिति । कथं तर्हि तृतीयस्य चतुर्थे 'राजादावपि दृश्यत' इत्येतदनुव्याख्यानव्याख्यानरूपप्रेक्षावति राजादौ सेवानुरूपफलदानवैपरीत्यकर्तर्यप्रेक्षावति वैषम्यादिकमिति मूलव्याख्यानावसरे टीकायां प्रेक्षावतीति विशेषणं दृष्टान्ते साध्यवैकल्यपरिहारायेत्यभिधाय यत्र विचित्रसाधनाराधितत्वं तत्र विचित्रफलदातृत्वमिति सामान्यव्याप्तौ समफलदातरि राजादौ व्यभिचारपरिहाराय प्रेक्षावत्त्वस्य व्याप्तिशरीरप्रवेशेऽपि हेतुशरीरे न तत्प्रवेशो निर्दिष्टहेतावव्यभिचारादिति द्रष्टव्यमित्युक्तिरिति चेदत्र ब्रूमः । अत्रेव तत्र परोक्तयुक्तेरेवार्थान्तरसाधकतयोपन्यासादेरभावेन वस्तुतस्तावत्पर्यन्तं पर्यवसानेऽपि किं तदाश्रयणेन । तावन्मात्रेणैव व्यभिचारपरिहारस्य सम्भवादित्याशयेनैव निर्दिष्टहेतावव्यभिचारादित्युक्तम् । वस्तुतस्तत्रापि मूले हेतौ व्यभिचाराभिधानतत्परिहारे चाङ्गीकृतेऽपि न दोषः । न चैतट्टीकाकारस्यानभिप्रेतम् । निर्दिष्टहेतौ तदभावोक्तावपि पर्यवसानेनापि तदभावानभिधानात् । एवञ्च विशेषरूपेण व्यभिचारपरस्तार्तीयग्रन्थ इति तस्य नैतन्मूलग्रन्थविरोध इत्यादि ज्ञेयम् । इदं चर्चितं पुनः परामृश्य लेखनीयमस्ति ।

**स०व्र०— तत एवेति** । असिद्धेरेवेत्यर्थः ।

**॥ इति उत्कर्षप्राप्त्यभावस्य हेतुविशेषणत्वे प्रतीके आत्मत्वेनोपासनस्य अपरिहार्यत्वप्रसङ्गः ॥**

**॥ अथ प्रतीकेषु ब्रह्मत्वध्यानं ब्रह्मणः नीचत्वध्याने पर्यवस्यति ॥**

४३ सु०— एवं प्रतिज्ञाव्याख्यानम् अपाकृत्य उत्कर्षादिति हेतुव्याख्यानम् अपाकरोति **उत्कर्षादिति** ।

**अनु०— उत्कर्षाद्ब्रह्मताध्याने यदि स्यात् फलमञ्जसा ।**
**ब्रह्मणो नीचताज्ञानादनर्थः किं न जायते ।**

**ब्रह्मताध्याने** प्रतीकानामुत्कर्षात् **उत्कर्षस्य दृष्टत्वात् अञ्जसा फलं** पुरुषार्थरूपं फलं **यदि स्यात्** तदा, तदेव **ब्रह्मणो नीचताध्यानमिति**, तस्मात् **अनर्थः किं न जायते**, जायत एवेति **समव्ययफलत्वादकार्यमेवेदमिति** ।

**कं०रा०—** 'अञ्जसा फलमि'त्यस्य पर्यवसितार्थमाह **पुरुषार्थफलमिति** । 'पुमर्थेतरत्वात्पुरुषार्थ उक्त' इत्यन्यत्रोक्तेः ।

**शे०चं०—** हेत्वपव्याख्याननिरासस्य मूलारूढतासिद्ध्यर्थमपेक्षितं पूरयन् भाष्यं योजयति **प्रतीकानामिति** । ध्यानस्य वास्तवोत्कर्षानापादकत्वादाह **उत्कर्षस्य दृष्टत्वादिति** । प्रतीकानां ब्रह्मत्वेन ध्यानापेक्षया ब्रह्मणः प्रतीकत्वेन ध्यानस्य भिन्नत्वे, तस्यानर्थसाधनत्वेऽपि प्रतीके ब्रह्मताध्यानस्यानर्थसाधनत्वाप्राप्तेः तस्यैव ब्रह्मणो नीचताध्यानत्वमाह **तदेवेति** । अस्त्वेवमेकस्यैवार्थसाधनत्वमनर्थसाधनत्वं च । ततोऽपि किमित्यतः तत्फलं तस्यापि च फलं दर्शयति **समव्ययफलत्वादकार्यमेवेति** । 'असत्यानि दुरन्तानि समव्ययफलानि च। अशक्यानि च वस्तूनि नारभेत विचक्षणः' इत्यभियुक्तोक्तेरिति भावः ।

**वा०र०— तस्यापि चेति** । फलस्यापीत्यर्थः । **अभियुक्तोक्तेरिति** । नीतिशास्त्र इति शेषः । मोक्षवादे *न्यायमकरन्दव्याख्यायां* चित्सुखेन नीतिशास्त्रमुदाहरतीत्यवतारकरणादिति बोध्यम् । दुरन्तानि दुःखोत्तराणि । समे व्ययफले येषां तानि तथोक्तानि अशक्यानि साधकप्रयत्नासाध्यानि । शिष्टमुत्तरत्र टीकायां व्यक्तम् । **फलवत्त्वसमर्थनादिति** । प्राप्तमिति शेषः । **स्वात्मताध्यानं न कोपेति** । क्षत्तरि राजदृष्टेः राजकोपजनकत्वाभावादिति भावः ।

**॥ इति प्रतीकेषु ब्रह्मत्वध्यानं ब्रह्मणः नीचत्वध्याने पर्यवस्यति ॥**

* * *

॥ अथ अचेतने ब्रह्मत्वध्यानं अनर्थहेतुः ॥

४४ **सु०—** अभ्युपगम्येदं समन्वयफलत्वमुक्तम् । वस्तुतस्तु न पुरुषार्थः किं त्वनर्थ एवेत्याह **अचेतनस्येति** ।

**अनु०— अचेतनस्य ब्रह्मत्वध्याने तुष्टिर्न हि क्वचित् ।**
**नीचस्य स्वात्मताज्ञानात्कुप्यति ब्रह्म लोकवत् ॥**

तुष्ट्यभावाच्च न पुरुषार्थलाभः ततः । **क्वचित्** इत्यनेन यदचेतनं तदुपचिकीर्षालक्षणतुष्टिरहितमिति व्याप्तिं सूचयति । **नीचस्य** प्रतीकस्य **स्वात्मताध्यानात् ब्रह्म कुप्यति** । ततश्च अनर्थं प्रयच्छति । तत्र दृष्टान्तो **लोकवदिति** । यथा लोके शिलादिकं राजत्वादिना चिन्तितं न प्रसीदति नापि पुरुषार्थं प्रयच्छति । यथा च राजा चण्डालत्वेन ध्यातः कुप्यति अनर्थं च ददाति तथा इत्यर्थः । अनेन प्रतीकानामचेतनत्वेऽपि ब्रह्मैव सर्वाध्यक्षत्वात् फलं दास्यतीति च प्रत्युक्तम् । तस्य अनेनोपासनेन कुपितत्वात् ।

**परि०— तत इति** । अचेतनस्य ब्रह्मत्वध्यानान्न पुरुषार्थलाभ इति पूर्वेणान्वयः ।

**यादु०— ब्रह्म कुप्यतीति** । यद्यपि नीचस्य स्वात्मताध्यानं न कोपजनकं किन्तु स्वात्मनो नीचताध्यानमेव । तथाऽपि नीचस्य स्वात्मताध्यानं स्वात्मनो नीचताध्यानमपि भवतीति पूर्वमुक्तत्वात् तदभिप्रायेण ब्रह्म प्रकुप्यतीत्युक्तमिति ज्ञातव्यम् । अत एवात्र यथा राजा चण्डालत्वेन ध्यातः कुप्यतीति वक्ष्यमाणो दृष्टान्तोऽपि **सङ्गच्छत इति** ।

**शे०चं०—** प्रतीकानां ब्रह्मत्वोपासनस्य समन्वयफलत्वप्रतिपादनेन फलवत्त्वसमर्थनात् तदभावप्रतिपादनपरोत्तरग्रन्थस्य तद्विरोधमाशङ्क्य परिहरति **अभ्युपगम्येदमिति** । मूले प्रतीकानां ब्रह्मत्वध्यानस्य तुष्ट्यसाधनत्वमात्रप्राप्तावपि पुरुषार्थासाधनत्वालाभात् साध्यमाह **तुष्ट्यभावाच्चेति** । अचेतनस्य ब्रह्मत्वध्याने तुष्टिर्नेत्येतावता पूर्तेः किं क्वचिदित्यनेनेत्यतोऽचेतनत्वस्य तुष्ट्यभावसाधकत्वोपयोगिव्याप्त्युपदर्शकत्वान्न तस्यानर्थक्यमित्याह **क्वचिदितीति** ॥ **तत्रेति** । उभयविधव्याप्तावित्यर्थः ॥ **ब्रह्म कुप्यतीति** । यद्यपि नीचस्य स्वात्मताध्यानं न कोपजनकमपि तु स्वात्मनो नीचताध्यानमेव तथाऽपि नीचस्य स्वात्मताध्यानस्यैव स्वात्मनो नीचताध्यानताया उक्तरीत्या सिद्धत्वात् तदभिप्रायेण ब्रह्म कुप्यतीत्युक्तम्, अत एवात्र यथा राजा चण्डालत्वेन ध्यातः कुप्यतीति वक्ष्यमाणो दृष्टान्तोऽपि सङ्गच्छत इति ध्येयम् । अनेनेत्युक्तं हेतुमेव दर्शयति **तस्येति** ।

**स०व्र०—** अनेनेत्युक्तहेतुं दर्शयति **तस्येति** ।

॥ इति अचेतने ब्रह्मत्वध्यानं अनर्थहेतुः ॥

॥ अथ दृष्टान्तेन उक्तार्थसमर्थनम् ॥

४५ **सु०**— न वयं ब्रह्मणि प्रतीकत्वोपासनं ब्रूमः । येन ब्रह्म कुपितमनर्थं प्रयच्छेत् किन्तु प्रतीके ब्रह्मत्वोपासनम् । ततः पुरुषार्थप्राप्तिरित्यत आह **चण्डाल इति** ।

**अनु०**— चण्डालो नृप इत्युक्ते नृपश्चण्डाल इत्यपि ।
को विशेषः परिज्ञाते नृपेण स्यात् कथञ्चन ॥

चण्डालमुद्दिश्य **चण्डालो नृप** इत्युक्ते तथा नृपमुद्दिश्य **नृपश्चण्डाल** इत्युक्ते **नृपेण परिज्ञाते** सत्यनर्थप्राप्तौ **कथञ्चन कोऽपि विशेषः स्यात्** न कथञ्चित् कोऽपि । अत्र उक्त-शब्देन ध्यानमुपलक्ष्यते । अज्ञातोपासनो राजा नानर्थं करोतीति नृपेण परिज्ञात इत्युक्तम् । तथाच प्रतीकं ब्रह्मेत्युपासने ब्रह्म प्रतीकमित्युपासने च सम एवानर्थ इति वाक्यशेषः ।

**परि०**— शङ्कते **न वयं ब्रह्मणीति** ॥ **ततः पुरुषार्थप्राप्तिरिति** । अकुपितं ब्रह्मैव फलं दास्यतीति भावः । प्रकृतानुगुण्यायाह **अत्रोक्तशब्देनेति** । अन्यथोक्तिमात्रस्योपचारेणापि सम्भवा-दनानुगुण्यं स्यादिति ज्ञेयम् ।

**यादु०**— उक्तमभिप्रायं स्पष्टयितुं यथाश्रुते शङ्कामुत्थापयति **न वयमिति** ॥ **ततः पुरुषार्थप्राप्ति-रिति** । कोपकारणोपासनस्याभावेन ब्रह्मैव सर्वाध्यक्षः तत्फलं दास्यतीति भावः । ज्ञानस्यैव प्रकृतत्वादुक्ते-रुपचारेणाप्युपपत्त्या अनर्थहेतुत्वाभावसम्भवाचाह **अत्रोक्तशब्देनेति** ।

**वं०प०**— कथञ्चन को विशेषः स्यादिति पदानामन्वयं दर्शयित्वा अभिप्रायमाह **कथञ्चनेत्यादि** ।

**कं०रा०**— पुरुषार्थपदेन पुरुषैरर्थितत्वमुच्यते । **अज्ञातोपासन इति** । अज्ञातं चण्डालो नृप इत्या-द्युपासनं येन सः अज्ञातोपासनः ।

**शे०चं०**— गूढाभिसन्धिर्यथाश्रुते शङ्कते **न वयमिति** । **ततः पुरुषार्थप्राप्तिरिति** । कोपकारण-स्योपासनस्याभावेन ब्रह्मैव सर्वाध्यक्षत्वात् फलं दास्यतीति भावः । उक्तिसाम्यस्य वक्ष्यमाणत्वादत्र तद्विवक्षायां पौनरुक्त्यमित्यत्राह **अत्रोक्तशब्देनेति** । मूले दार्ष्टान्तिकमनुक्त्वा दृष्टान्तमात्रोक्तिरयुक्तेत्यतः तत्पूरयति **तथेति** ।

* * *

४६ **सु०**— ननु क्षत्तरि राजदृष्टिः फलवती, राज्ञि क्षत्तृदृष्टिरनर्थहेतुर्दृष्टा । तत्कथमुभयस्य साम्यमुच्यत इति चेन्न । तत्र दृष्टेरभावात् । उक्तिमात्रं तूपचारेण । सिंहो देवदत्त इति यथा । दृष्टौ तु तत्राप्यनर्थसाम्यमेवेत्याशयेनाह **पुरत इति** ।

**अनु०**— **पुरतो नरदेवस्य चण्डालो यदि पूज्यते ।**
**राजवत् किं न कोपः स्याद्राज्ञो लोकेऽभिपश्यति ।**

राजा यथा पूज्यते तथा । तदा राज्ञः कोपो न स्यात् किम् । लोकेऽभिपश्यति सतीति कोपातिशयप्रदर्शनार्थम् । पूजया दर्शनमुन्नीयत इत्यतः **पूज्यत** इत्युक्तम् ।

न केवलं दृष्टेरुन्नायिकायां पूजायामेव राजकोपः किन्तु तादृश्यामुक्तावपि इति आह **राज्ञस्त्विति** ।

**राज्ञस्तु पुरतः प्रोक्ते चण्डालो(ले) नृप इत्यपि ।**
**आत्मानं स इति प्रोक्तमितिवद्धयेव कुप्यति ॥**

नाज्ञाता प्रोक्तिः कोपजननीत्यतो **राज्ञस्तु पुरत** इत्युक्तम् । **चण्डाले नृप इति प्रोक्तेऽपि प्रकर्षेण न मयोपचारेणोच्यते** अपि तु वस्तुत एवेत्युक्तेऽपि राजा कुप्यत्येव हि । **आत्मानं** प्रति हि **स चण्डाल इति प्रोक्तं** प्रकर्षेणोक्तम् **इतिवत्** इत्यत्र यथा तथैवेत्यर्थः । पूजैव कोपकारणं न दर्शनमित्याशङ्कानिरासाय विवेकार्थमयं श्लोकः ।

**परि०**— राजवदित्यस्यार्थो **राजा यथेति** । 'तत्र तस्येवे'त्यस्य प्रायिकत्वात् प्रथमान्तादपि वतिरिति भावः । दृष्टेः प्रकृतत्वादाह **पूजयेति** ॥ **तादृश्यामिति** । दृष्टेरुन्नायिकायामित्यर्थः । प्रोक्तेऽपीत्यत्र प्रशब्दार्थं प्रकर्षेणेत्यनूद्य तं प्रकर्षं व्यक्तीकुर्वन्नाह **न मयेत्यादिना** । **इतिवदि**त्यनुवादः । **इत्यत्र यथा तथैवे**ति व्याख्या ॥ **विवेकार्थमिति** । पूजातोऽसङ्कीर्णस्य दृष्ट्युन्नायकस्य प्रवचनस्योक्त्यर्थमयं श्लोक इत्यर्थः । तर्हि तथा प्रोक्तिरेव कोपहेतुरस्त्विति न वाच्यम् । आचार्यपित्रादिना शिक्षारूपेणैतादृशवाक्योक्तौ कोपादर्शनेन तथादृष्टेरेव तथात्वादिति भावः ।

**यादु०**— 'तत्र तस्येवे'त्यस्य प्रकृतेऽसम्भवात् 'तेन तुल्यं क्रिया चेद्वतिरि'त्यस्यापि राजकर्तृकक्रियातौल्याभावेनासम्भवात् 'तत्र तस्येवे'त्यस्य लक्षणस्याभियुक्तैः प्रायिकत्वेन व्याख्याततत्वेन प्रथमान्तादयं

वतिरित्याशयेनाह **राजा यथा पूज्यत इति** ॥ **विवेकार्थमिति** । पूजाऽसङ्कीर्णस्य दर्शनस्यैव कोपकारणताप्रदर्शनार्थमित्यर्थः । न च तत्रापि तथा प्रोक्तिरेव कोपकरणं न दर्शनमिति वाच्यम् । शुकबालाद्युदीरिततथाविधप्रोक्तावपि कोपाभावात् । अतस्तादृशदर्शनोन्नायकप्रोक्तिरेव कोपकारणतया वाच्या । एवं च लाघवादावश्यकत्वादनुगतत्वाच्च तादृशं दर्शनमेव कोपकारणमिति निश्चीयत इति भावः ।

**वं०प०**— 'उन्नीयत इत्यतः' इत्यभिप्रेत्य ॥ **इत्युक्तेऽपीति** । न केवलं पूजिते सतीत्यर्थः । **प्रोक्तमितिवदिति** वतिः सप्तम्यर्थे इत्याह **इत्यत्र यथेति** ॥ **विवेकार्थमिति** । स्पष्टत्वार्थमित्यर्थः । **अयं श्लोकः** राज्ञस्त्विति श्लोकः । पूर्वं पूजया दर्शनमुन्नीयत इत्याशयेनैव पूज्यत इत्युक्तं न तु दर्शनं स्पष्टमुक्तम्; अत्र च प्रोक्त इति वचनात् तस्य च प्रकर्षेण न चोपचारेणोच्यते अपि तु वस्तुत एवेत्युक्त्या दर्शनस्य स्पष्टमवगमात् । वास्तवोक्तेर्ज्ञानाव्यभिचरितत्वात् । पूजा च न ज्ञानाव्यभिचारिणी । उत्कर्षज्ञानाभावेऽपि लोकानुकरणाय लोके पूजाया बहुलमुपलम्भादित्यवगन्तव्यम् ।

**कं०रा०**— **दृष्टौ त्विति** । क्षत्तरि राजदृष्टौ त्वित्यर्थः । राजवदित्यस्यार्थमाह **राजा यथा पूज्यते तथेति** । यदिशब्दश्रवणात् तदेत्यध्याहार्यमित्याशयेनाह **तदा राज्ञ इति** । ननु 'दृष्टौ तु तत्राप्यनर्थसाम्यमेवेत्याशयेनाहे'त्यवतारिकाननुगुणं मूलम्, तत्र 'पुरतो नरदेवस्य चण्डालो यदि पूज्यत' इति पूजाया एवोक्तत्वात् दर्शनस्यानुक्तत्वादित्यत आह **पूजयेति** । यज्ञवत् पूजया चण्डाले राजत्वदर्शनमुन्नीयत इत्यतः पूज्यत इत्युक्तमित्यर्थः ।

**शे०चं०**— पूर्वपक्ष्यभिसन्ध्युद्घाटनपूर्वकं तत्परिहारतयोत्तरवाक्यमवतारयति **ननु क्षत्तरीति** ॥ **उक्तिमात्रं त्विति** । दृष्ट्यनुन्नायकोक्तिरित्यर्थः ॥ **राजा यथेति** । अनेन मूले राजवदिति प्रथमान्ताद्वतिस्तत्र तस्येवेति लक्षणस्य प्रायिकत्वेनाभियुक्तैर्व्याख्याततया नियमत्वाभावादित्युक्तं भवति । नन्वत्र राजवच्चण्डालदर्शनस्यानर्थसाधनत्वाभिप्राये पूज्यत इति पूजाग्रहणानर्थक्यापत्त्या तदनुरोधेन राजवच्चण्डालपूजाया एवानर्थसाधनतया अकर्तव्यता लभ्यते । तत्कथमनेन दर्शनस्य तत्सिद्धिरित्यतो नात्र पूज्यत इत्युक्त्यनुरोधेन तथा पूजाया अनर्थसाधनत्वं शङ्कनीयम् । राजवच्चण्डालदर्शनस्यानर्थसाधनत्वेऽभिहिते परबुद्धेः परं प्रत्यप्रत्यक्षत्वात् कथं परसम्बन्धिनो राजवच्चण्डालदर्शनस्य परं प्रति सिद्धिरिति । येनानर्थसाधनत्वं तस्येत्यतः प्रत्यक्षेण तदसिद्धावपि पूजाया दर्शनकार्यतया तदविनाभूतत्वाच्च तदनुमापकत्वेनानुमानादेव तत्सिद्धिसम्भवान्न दर्शनस्यानर्थसाधनत्वानुपपत्तिरित्यनर्थसाधनदर्शनानुमापकतया पूज्यत इति पूजाग्रहणस्यार्थवत्त्वसम्भवेन अन्यथासिद्धतया न तदनुरोधेन तस्यास्तत्साधनत्वलाभ इत्याशयेनाह **पूजयेति** ॥ **तादृश्यामिति** । दृष्टेरुन्नायिकायामित्यर्थः । प्रोक्तिरित्यत्रोक्त इत्येतावता पूर्तेः किं प्रशब्देनेत्यत उक्तौ प्रकर्षसूचकत्वान्न तदानर्थक्यमित्यभिप्रेत्य कोऽसावुक्तेः प्रकर्षो यत्सूचकत्वं प्रशब्दस्य स्यादित्यतस्तदर्थकथनपूर्वकं तत्सूचितमुक्तौ विशेषमपि दर्शयति **प्रकर्षेणेत्यादि** । इतिवदित्यस्य विवरणम् **इत्यत्र यथेति** । ननु पूजाया अनर्थसाधनत्वाभिप्रायमेव पूजाग्रहणमस्तु किं तत्साधनदर्शनानुमापकतया

४६ **सु०**— ननु क्षत्तरि राजदृष्टिः फलवती, राज्ञि क्षत्तृदृष्टिरनर्थहेतुर्दृष्टा । तत्कथमुभयस्य साम्यमुच्यत इति चेन्न । तत्र दृष्टेरभावात् । उक्तिमात्रं तूपचारेण । सिंहो देवदत्त इति यथा । दृष्टौ तु तत्राप्यनर्थसाम्यमेवेत्याशयेनाह **पुरत इति** ।

**अनु०**— पुरतो नरदेवस्य चण्डालो यदि पूज्यते ।
राजवत् किं न कोपः स्याद्राज्ञो लोकेऽभिपश्यति ।

राजा यथा पूज्यते तथा । तदा राज्ञः कोपो न स्यात् किम् । लोकेऽभिपश्यति सतीति कोपातिशयप्रदर्शनार्थम् । पूजया दर्शनमुन्नीयत इत्यतः **पूज्यत** इत्युक्तम् ।

न केवलं दृष्टेरुन्नायिकायां पूजायामेव राजकोपः किन्तु तादृश्यामुक्तावपि इति आह **राज्ञस्त्विति** ।

राज्ञस्तु पुरतः प्रोक्ते चण्डालो(ले) नृप इत्यपि ।
आत्मानं स इति प्रोक्तमितिवद्धत्येव कुप्यति ॥

नाज्ञाता प्रोक्तिः कोपजननीत्यतो **राज्ञस्तु पुरत** इत्युक्तम् । **चण्डाले नृप इति प्रोक्तेऽपि** प्रकर्षेण न मयोपचारेणोच्यते अपि तु वस्तुत एवेत्युक्तेऽपि राजा कुप्यत्येव हि । **आत्मानं** प्रति हि **स** चण्डाल **इति प्रोक्तं** प्रकर्षेणोक्तम् **इतिवत्** इत्यत्र यथा तथैवेत्यर्थः । पूजैव कोपकारणं न दर्शनमित्याशङ्कानिरासाय विवेकार्थमयं श्लोकः ।

**परि०**— राजवदित्यस्यार्थो **राजा यथेति** । 'तत्र तस्येवे'त्यस्य प्रायिकत्वात् प्रथमान्तादपि वतिरिति भावः । दृष्टेः प्रकृतत्वादाह **पूजयेति** ॥ **तादृश्यामिति** । दृष्टेरुन्नायिकायामित्यर्थः । प्रोक्तेऽपीत्यत्र प्रशब्दार्थं प्रकर्षेणेत्यनूद्य तं प्रकर्षं व्यक्तीकुर्वन्नाह **न मयेत्यादिना** । **इतिवदित्यनुवादः** । **इत्यत्र यथा तथैवेति** व्याख्या ॥ **विवेकार्थमिति** । पूजातोऽसङ्कीर्णस्य दृष्ट्युन्नायकस्य प्रवचनस्योक्त्यर्थमयं श्लोक इत्यर्थः । तर्हि तथा प्रोक्तिरेव कोपहेतुरस्त्विति न वाच्यम् । आचार्यपित्रादिना शिक्षारूपेणैतादृशवाक्योक्तौ कोपादर्शनेन तथादृष्टेरेव तथात्वादिति भावः ।

**यादु०**— 'तत्र तस्येवे'त्यस्य प्रकृतेऽसम्भवात् 'तेन तुल्यं क्रिया चेद्वतिरि'त्यस्यापि राजकर्तृकक्रियातौल्याभावेनासम्भवात् 'तत्र तस्येवे'त्यस्य लक्षणस्याभियुक्तैः प्रायिकत्वेन व्याख्याततत्वेन 'प्रथमान्तादयं

वतिरित्याशयेनाह **राजा यथा पूज्यत इति** ॥ **विवेकार्थमिति** । पूजाऽसङ्कीर्णस्य दर्शनस्यैव कोपकारणताप्रदर्शनार्थमित्यर्थः । न च तत्रापि तथा प्रोक्तिरेव कोपकरणं न दर्शनमिति वाच्यम् । शुकबालाद्युदीरिततथाविधप्रोक्तावपि कोपाभावात् । अतस्तादृशदर्शनोन्नायकप्रोक्तिरेव कोपकारणतया वाच्या । एवं च लाघवादावश्यकत्वादनुगतत्वाच्च तादृशं दर्शनमेव कोपकारणमिति निश्चीयत इति भावः ।

**वं०प०**— 'उन्नीयत इत्यतः' इत्यभिप्रेत्य ॥ **इत्युक्तेऽपीति** । न केवलं पूजिते सतीत्यर्थः । **प्रोक्तमितिवदिति** वतिः सप्तम्यर्थे इत्याह **इत्यत्र यथेति** ॥ **विवेकार्थमिति** । स्पष्टत्वार्थमित्यर्थः । **अयं श्लोकः** राज्ञस्त्विति श्लोकः । पूर्वं पूजया दर्शनमुन्नीयत इत्याशयेनैव पूज्यत इत्युक्तं न तु दर्शनं स्पष्टमुक्तम्; अत्र च प्रोक्त इति वचनात् तस्य च प्रकर्षेण न चोपचारेणोच्यते अपि तु वस्तुत एवेत्युक्त्या दर्शनस्य स्पष्टमवगमात् । वास्तवोक्तेर्ज्ञानाव्यभिचरितत्वात् । पूजा च न ज्ञानाव्यभिचारिणी । उत्कर्षज्ञानाभावेऽपि लोकानुकरणाय लोके पूजाया बहुलमुपलम्भादित्यवगन्तव्यम् ।

**कं०रा०**— **दृष्टौ त्विति** । क्षत्तरि राजदृष्टौ त्वित्यर्थः । राजवदित्यस्यार्थमाह **राजा यथा पूज्यते तथेति** । यदिशब्दश्रवणात् तदेत्यध्याहार्यमित्याशयेनाह **तदा राज्ञ इति** । ननु 'दृष्टौ तु तत्राप्यनर्थसाम्यमेवेत्याशयेनाहे'त्यवतारिकाननुगुणं मूलम्, तत्र 'पुरतो नरदेवस्य चण्डालो यदि पूज्यत' इति पूजाया एवोक्तत्वात् दर्शनस्यानुक्तत्वादित्यत आह **पूजयेति** । यज्ञवत् पूजया चण्डाले राजत्वदर्शनमुन्नीयत इत्यतः पूज्यत इत्युक्तमित्यर्थः ।

**शे०चं०**— पूर्वपक्ष्यभिसन्ध्युद्घाटनपूर्वकं तत्परिहारतयोत्तरवाक्यमवतारयति **ननु क्षत्तरीति** ॥ **उक्तिमात्रं त्विति** । दृष्ट्यनुन्नायकोक्तिरित्यर्थः ॥ **राजा यथेति** । अनेन मूले राजवदिति प्रथमान्ताद्वतिस्तत्र तस्येवेति लक्षणस्य प्रायिकत्वेनाभियुक्तैर्व्याख्याततया नियमत्वाभावादित्युक्तं भवति । नन्वत्र राजवच्चण्डालदर्शनस्यानर्थसाधनत्वाभिप्राये पूज्यत इति पूजाग्रहणानर्थक्यापत्त्या तदनुरोधेन राजवच्चण्डालपूजाया एवानर्थसाधनतया अकर्तव्यता लभ्यते । तत्कथमनेन दर्शनस्य तत्सिद्धिरित्यतो नात्र पूज्यत इत्युक्त्यनुरोधेन तथा पूजाया अनर्थसाधनत्वं शङ्कनीयम् । राजवच्चण्डालदर्शनस्यानर्थसाधनत्वेऽभिहिते परबुद्धेः परं प्रत्यप्रत्यक्षत्वात् कथं परसम्बन्धिनो राजवच्चण्डालदर्शनस्य परं प्रति सिद्धिरिति । येनानर्थसाधनत्वं तस्येत्यतः प्रत्यक्षेण तदसिद्धावपि पूजाया दर्शनकार्यतया तदविनाभूतत्वाच्च तदनुमापकत्वेनानुमानादेव तत्सिद्धिसम्भवान्न दर्शनस्यानर्थसाधनत्वानुपपत्तिरित्यनर्थसाधनदर्शनानुमापकतया पूज्यत इति पूजाग्रहणस्यार्थवत्त्वसम्भवेन अन्यथासिद्धतया न तदनुरोधेन तस्यास्तत्साधनत्वलाभ इत्याशयेनाह **पूजयेति** ॥ **तादृश्यामिति** । दृष्टेरुन्नायिकायामित्यर्थः । प्रोक्तिरित्यत्रोक्त इत्येतावता पूर्तेः किं प्रशब्देनेत्यत उक्तौ प्रकर्षसूचकत्वान्न तदानर्थक्यमित्यभिप्रेत्य कोऽसावुक्तेः प्रकर्षो यत्सूचकत्वं प्रशब्दस्य स्यादित्यतस्तदर्थकथनपूर्वकं तत्सूचितमुक्तौ विशेषमपि दर्शयति **प्रकर्षेणेत्यादि** । इतिवदित्यस्य विवरणम् **इत्यत्र यथेति** । ननु पूजाया अनर्थसाधनत्वाभिप्रायमेव पूजाग्रहणमस्तु किं तत्साधनदर्शनानुमापकतया

तद्ग्रहणमित्यन्यथासिद्धिकल्पनयेत्यतः तादृशपूजाया एव अनर्थसाधनत्वे यत्र तादृशोक्त्युन्नीतदृष्ट्या अनर्थः तत्र तत्साधनपूजाया अभावेन अनर्थाभावापत्त्या पूजयोक्त्या वा उन्नीतदृष्टेरेव अनुगताया अनर्थसाधनत्वसम्भवे क्वचित्तादृशी पूजा क्वचिच्च तादृश्युक्तिरेव अनर्थसाधनमित्यननुगतयोः तादृशपूजोक्त्योः तत्साधनत्वकल्पनाया असम्भवेन उन्नीता दृष्टिरेव साधनं न पूजेति युक्तमन्यथासिद्धत्वकल्पनं पूजाग्रहणस्य इत्याशयवानाह **पूजैवेति**।

**वा०र०—** व्याख्याततया नियमत्वाभावादिति पाठः । व्याख्यानं च *कुसुमाञ्जलिवर्धमाने* । एतल्लक्षणस्य प्रायिकत्वं च परोक्तरीत्या आश्रित्योक्तम् । वस्तुतस्तु तत्प्रायिकत्वे प्रमाणभावेन तदभावस्य तृतीये उपासनापादे सर्वथापि त्वित्यधिकरणे टीकाकृतैवोपपादनात् तत्रत्योक्तरीत्यैव समाधानमवधातव्यम् । **अकर्तव्यता लभ्यत इति** । लभ्यत इति वाच्यमित्यर्थः । शङ्कनीयमित्यतः प्राक्प्राप्ततयेति शेषः । परं प्रति सिद्धिर्येनेत्येव पाठो मूले । इतिशब्दो लेखकागतः । इति कथमिति पूर्वेण सम्बन्धो ज्ञेय इत्यप्याहुः । **अनर्थसाधनत्वं तस्येत्यत इति** । अनर्थसाधनत्वानुपपत्तिशङ्कायां तत्परिहारायेत्यर्थः । प्रत्यक्षेण तदसिद्धावपि अनुमानादेव तत्सिद्धिसम्भवादिति सम्बन्धः । अनुमानादेव इत्यस्य पूजारूपादनुमापकधर्मादित्यर्थः । अनुमापकत्वोपपादनं **पूजाया दर्शनेत्यादि** ॥ **न दर्शनस्यानर्थसाधनत्वानुपपत्तिरिति** । युक्तो दर्शनस्यानर्थसाधनतया कर्तव्यतालाभ इत्यर्थः । **इत्यनर्थेति** । इत्येवमनर्थेत्यर्थः ।

**॥ इति दृष्टान्तेन उक्तार्थसमर्थनम् ॥**

* * *

**॥ अथ प्रतीकत्वेन ब्रह्मोपासनं, ब्रह्मत्वेन प्रतीकोपासनं समानमेव ॥**

**४७ सु०— एवमुद्देशविधानोक्त्या द्वैरूप्यमङ्गीकृत्य फलतः साम्यमुक्तम् । इदानीं तदपि नास्तीत्याह अभेदेनेति ।**

## अनु०— अभेदेनैतयोर्ध्याने को विशेषो वचस्यपि ।

एतयोर्ब्रह्मप्रतीकयोः **अभेदेन ध्यानेऽ**ङ्गीकृते न केवलमनर्थसाम्यं किन्तु **वचस्यपि को विशेषः** । वचनद्वयार्थोऽप्यविशिष्ट एवेत्यर्थः । अत्रैव दृष्टान्तमाह **अयमिति** ।

अयं राजा त्वमित्युक्ते चण्डालेऽथ नृपेऽपि च ।
चण्डाल इति तु प्रोक्ते सममेव हि दूषणम् ॥

व्यक्तिभेदेन दूषणपरिहारः स्यादित्यतोऽयमित्युक्तम् । **दूषणं** नीचत्वलक्षणम् । द्वयोरभेदेन ध्याने **दूषणं** सम्भवत्येव । न चैवम् । प्रतीकस्य हि ब्रह्मत्वं भाव्यते । न तु ब्रह्मणः प्रतीकत्वमित्यत आह **ध्यात** इति ।

**ध्यातेऽप्येकस्य तद्भावे तद्भावोऽन्यस्य किं न तत् ।**

**तत्** तयोः ब्रह्मप्रतीकयोः **एकस्य** प्रतीकस्य **तद्भावे** ब्रह्मभावे **ध्याते** सति **अन्यस्य** ब्रह्मणः **तद्भावः** प्रतीकभावः ध्यातो **न किम्** ।

एतदुक्तं भवति । भवेदयं परिहारो यदि प्रतीक(स्य)स्वरूपोपमर्देन तस्य ब्रह्मत्वमुपास्यमिति पक्षः स्यात् । न चैवम् । प्रतीकाभावप्रसङ्गस्य परेणैवोक्तत्वात् । भेदाभेदाभिप्रायेणायं परिहार इत्यपि नास्ति । न हि घटो मृदभिन्नो मृद्घटाद्भिन्नेति भेदाभेदौ किन्नाम परस्परम् । तस्मादनुपमर्दितस्वरूपस्य प्रतीकस्य ब्रह्मत्वे ध्याते ब्रह्मणोऽपि प्रतीकत्वं ध्यातमेवेति युक्तमुक्तमिति ।

ननु अस्मिन्नुपासने ब्रह्मणा ज्ञाते अनर्थः स्यात् न तु अज्ञाते । अतः तथोपासनं करिष्यत इत्यत आह **न चैवेति** ।

**न चैव तदविज्ञातं सर्वज्ञब्रह्मणा क्वचित् ॥**

**तत्** उपासनम् । ब्रह्मणोऽज्ञाने सर्वाध्यक्षं ब्रह्मैव फलं दास्यतीत्यपि रिक्तं वचः स्यात् ।

परि०— **द्वैरूप्यमिति** । नामादिप्रतीकोद्देशेन ब्रह्मत्वविधानं ब्रह्मोद्देशेन प्रतीकत्वविधानमित्येवमुद्देशविधानोक्त्योर्द्वैरूप्यमित्यर्थः ॥ **व्यक्तिभेदेनेति** । चण्डाले राजान्तरतादात्म्यमन्यस्मिन्देशान्तरे तस्मिन्नेव राज्ञि चण्डालत्वमुक्तं चेदपि पुरःस्थिते राजनि नीचत्वदूषणं न प्राप्नोति । अत एकस्मिन्नेव तद्वचनप्राप्त्यर्थमयमित्युक्तिरित्यर्थः । शङ्कते **द्वयोरभेदेनेत्यादि** । **भाव्यते** चिन्त्यत इत्यर्थः । तदित्यनुवादेन **तयोरिति** विपरिणामेन निर्देशः । **ब्रह्मप्रतीकयोरिति** व्याख्या । अभिप्रायस्यास्फुटत्वादाह **एतदुक्तं भवतीति** । ननु ब्रह्मकार्यस्य नामादिप्रतीकस्य ब्रह्मरूपकारणाभेदेऽपि

ब्रह्मरूपकारणस्य नामादितो भेदादित्येवं भेदाभेदाभिप्रायेण ब्रह्मणो नीचत्वं न प्राप्नोतीत्यत आह **भेदाभेदेति** । एवंविधं भेदाभेदं निराह **न हीति** । **मृदिति** भिन्नं पदम् । घटाद्भिन्नेत्यन्वयः ॥ **परस्परमिति** । कार्यस्य कारणात् कारणस्य कार्याद्भेदाभेदावित्यर्थः ॥ **तस्मादिति** । कारणे ब्रह्मणि कार्यभेदस्य सत्त्वादित्यर्थः ।

**यादु०— व्यक्तिभेदेनेति** । राजव्यक्तिभेदेनेत्यर्थः ॥ **दूषणपरिहार इति** । एकस्यैव राज्ञो नीचतादात्म्यरूपं दूषणं यदत्र वाक्यद्वयेऽभिप्रेतं तद्राजव्यक्तिभेदेन लभ्यत इत्यर्थः । शङ्कते **द्वयोरभेदेनेति** । द्वावुद्दिश्याभेदे ध्यात इत्यर्थः । न चैवमित्यस्यानन्तरं किन्चिति शेषः ॥ **प्रतीकस्वरूपोपमर्देनेति** । प्रतीकस्वरूपस्यैवाभावे कथं ब्रह्मणि तत्प्रतियोगिकाभेदध्यानं सम्भवतीति भावः । प्रतीकं हि ब्रह्मणः कार्यम् । कार्यं हि कारणादभिन्नम् । कारणं कार्याद्भिन्नम् । अतः कथं प्रतीके ब्रह्मत्वे ध्याते ब्रह्मणि प्रतीकता ध्याता स्यात् । उक्तरीत्या कार्यस्य प्रतीकस्य कारणादभिन्नत्वेऽपि कारणस्य ब्रह्मणः प्रतीकाद्भिन्नत्वाङ्गीकारादित्याशङ्क्य निराकरोति **भेदाभेदाभिप्रायेणेति** ॥ **परस्परमिति** । भेदाभेदौ द्वावपि कार्यकारणयोः परस्परप्रतियोगिकौ वर्तेते । भेदसाधकस्य खण्डितत्वादेरभेदसाधकस्य सामानाधिकरण्यादेरुभयत्र अविशिष्टत्वादित्यर्थः ॥ **तस्मादिति** । अभेदस्योभयगतत्वादित्यर्थः ।

**वं०प०— न चैवमिति** । ब्रह्मप्रतीकयोर्द्वयोरप्यभेदेन ध्यानं नाङ्गीक्रियत इत्यर्थः । तदुपपादयति **प्रतीकस्य हीति** । प्रतीकस्य ब्रह्मविकारत्वेन विकारभूतप्रतीकस्वरूपोपमर्देन ब्रह्मत्वं भाव्यत इत्यर्थः ॥ **न तु ब्रह्मण इति** । तस्य प्रतीकविकारत्वाभावेन तत्स्वरूपोपमर्दाभावादित्यर्थः । **उक्तत्वादिति** । 'प्रतीकाभावप्रसङ्गात् । विकारतत्स्वरूपोपमर्देन हि नामादिजातस्ये'त्यादिना ग्रन्थेनेत्यर्थः ॥ **भेदाभेदेति** । कार्यकारणयोर्भेदाभेदावङ्गीकृतौ । तत्रायं विवेकः । कार्यस्य कारणाभेदः कारणस्य कार्याद्भेद इति । तथा च प्रतीकस्य ब्रह्मविकारत्वेन ब्रह्मकार्यत्वात्प्रतीकस्वरूपोपमर्देनाभेदो ब्रह्मणाऽङ्गीक्रियते, कारणस्य ब्रह्मणस्तु प्रतीकाद्भेद एव । तथा च प्रतीकस्वरूपोपमर्देन तस्य ब्रह्मत्वे ध्याते ब्रह्मणि प्रतीकता कथं ध्याता स्यात् । तस्य ततो भिन्नत्वादित्येवं भेदाभेदाभिप्रायेणेत्यर्थः ॥ **अयं परिहार इति** । द्वयोरभेदेन ध्यानदूषणं समं भवत्येव । न चैवं प्रतीकस्य हि ब्रह्मत्वं भाव्यते न तु ब्रह्मणः प्रतीकत्वमित्युक्तः परिहार इत्यर्थः ॥ **परस्परमिति** । कार्ये कारणप्रतियोगिकभेदाभेदौ कारणेऽपि कार्यप्रतियोगिकभेदाभेदाविति परस्परमित्यर्थः । तदुपपादयति **न हीति** । कार्ये कारणाद्भेदकथनस्य प्रयोजनमाह **तस्मादिति** । कारणेन ब्रह्मणा कार्यस्य प्रतीकस्य भेदसद्भावादित्यर्थः । अनुपमर्दितस्वरूपस्य विकारस्येत्यत्रायं हेतुः । भेदसद्भावादेव विकारस्वरूपोपमर्दो नास्तीति ॥ **युक्तमुक्तमिति** । 'ध्याते त्वेकस्य तद्भाव' इत्युक्तं युक्तमित्यर्थः ।

**कं०रा०— व्यक्तिभेदेनेति** । चण्डालं प्रति 'राजा त्वमि'त्येवोक्ते राजान्तराभेदमादाय वाक्यपर्यवसानसम्भवाद्दूषणपरिहारः स्यादित्यतः अयमुक्त इत्यर्थः । 'तद्भावोऽन्यस्य किं न तदि'त्यत्र तदित्येतदव्ययं तत्रेत्यर्थे वर्तत इत्यभिप्रेत्य तस्य पर्यवसितार्थमाह **तयोर्ब्रह्मप्रतीकयोरिति** ॥ **भेदाभेदाभिप्रायेणेति** । प्रतीकस्य

ब्रह्माभेदो ब्रह्मणस्तु प्रतीकाद्भेद इति व्यवस्थितभेदाभेदाभिप्रायेणेत्यर्थः ॥ **न हीति** । उपादेयमुपादानाभिन्न-मुपादानं तूपदेयाद्भिन्नमित्येवं व्यवस्थितभेदाभेदौ कार्यकारणस्थले कुत्रापि न हि स्तः । किन्तु कार्यकारणे परस्परं भिन्नाभिन्ने इत्येव भेदाभेदौ प्रमितावित्यर्थः ।

**शे०चं०— पूर्वोत्तरविरोधपरिहारायाह एवमिति । द्वैरूप्यं** भिन्नार्थत्वम् । 'स्वं रूपं शब्दस्याशब्दसंज्ञे'त्यादाविव रूपशब्दस्याभिधेयपरत्वादिति भावः ॥ **तदिति** । द्वैरूप्यमित्यर्थः ॥ **व्यक्तिभेदेनेति** । राजव्यक्तिभेदेनेत्यर्थः । ननु प्रतीकस्य स्वस्वरूपानुपमर्देन ब्रह्मभावध्यानाभ्युपगमे भवेद् ब्रह्मणोऽपि प्रतीकभावस्य ध्यानत्वप्राप्तिः । न चैवमभ्युपगच्छामः । किं नाम प्रतीकस्वरूपोपमर्देन तस्य ब्रह्मभावध्यानम् । तत्कथं ब्रह्मणः प्रतीकभावस्य ध्यातत्वप्राप्तिः स्यात् । यद्वा कार्यं कारणाभिन्नं कारणं च कार्याद्भिन्नमिति कार्यकारणयोर्व्यवस्थितभेदाभेदाङ्गीकारात् प्रतीकस्य ब्रह्मकार्यतया तदभेदेऽपि कारणस्य ब्रह्मणः प्रतीकाद्भिन्नत्वेन प्रतीकस्य ब्रह्मत्वध्यानेऽपि न ब्रह्मणः प्रतीकतया ध्यातत्वप्राप्तिरित्यतोऽभिप्रायमाह **एतदुक्तं भवतीति** । यद्येवंरूपौ न भेदाभेदौ तर्हि किंरूपौ ताविति पृच्छति **किं नामेति** । परिहरति **परस्परमिति** । भेदाभेदौ द्वावपि कार्यकारणयोः परस्परप्रतियोगिकावेव वर्तेते भेदसाधकस्य खण्डितत्वादेरभेदसाधकस्य सामानाधिकरण्यस्य च उभयत्राविशिष्टत्वादिति भावः ॥ **तस्मादिति** । कार्यकारणयोः परस्परमभेदस्य सत्त्वादित्यर्थः ।

**वा०र०— अभिधेयपरत्वादिति** । ननु शब्दस्य हि रूपद्वयम् । शब्दाख्यमेकं रूपं बाह्योऽर्थश्च । तत्र गौरुपलभ्यतामिति लोके शब्देनार्थस्यैव प्रतीतेरातर्टगित्यादावपि शब्देनार्थस्यैवावगतिप्रसक्तौ शब्दस्य स्वमेव रूपं स्वाख्यं शब्दलक्षणमेव रूपं ग्राह्यम् । न बाह्योऽर्थ इति प्रतिपादनानुसारेण तत्र शब्दार्थद्वयं स्वरूपं बाह्यार्थश्चेत्येवं शब्देनाभिधेयं स्वरूपमिति प्राप्नोति । तत्कथं रूपपदमभिधेयार्थकतयाऽत्र प्राप्तम् । येन तस्य तदर्थकतायामिदमुदाहरणं स्यादिति चेन्न । अस्ति तावत्स्वरूपपदे स्वशब्दो रूपपदेन प्राप्तबाह्यार्थव्यावृत्त्यर्थ इति भावेन स्वरूपमेव प्राप्यं न बाह्योऽर्थ इत्यादिका वृत्त्यादावुक्तिः । तत्र बाह्यार्थे शब्दे चानुगतं रूपत्वं किमिति पृष्टे चेदभिधेयत्वमेवाभिप्रेततया वाच्यम् । तदन्यस्य निर्वक्तुमशक्यत्वात् । घटस्य स्वरूपमित्यत्र घटाख्यं रूपमितिवच्छब्दाख्यं रूपमेकमन्यच्च रूपमिति वस्तुद्वयमात्रप्रतिपादनमिति तु न कल्प्यम् । शब्देनार्थस्य स्वस्य चाभिधानेनाभिहितयोर्मध्येऽर्थो नाश्रयणीयः । अर्थस्य गौर्दुह्यतामित्यादावेव ग्राह्यत्वेऽप्यग्नेर्ढगित्यादावर्थात्प्रत्ययकार्यायोगेनाग्राह्यत्वात् । किन्तु प्रत्ययाश्रयतया शब्दाख्यमेवाभिधेयं ग्राह्यमित्येवार्थस्य प्रतीतेरभिधेयार्थत्वस्यैवाभिप्रेतत्वात् । अत एव स्वं रूपं शब्दस्येति सूत्रीयशब्देनार्थाधिगतेरित्यादिभाष्यादिवाक्येषु अर्थाधिगतिपुरस्कार इत्यादि कुसृष्ट्यादिना योज्यमेतत् । सर्वप्राणिनामवगाह्यानवगाह्यरूपमिति गीताभाष्यटीकायां रूपशब्दोऽभिधेयार्थः । स्वं रूपं शब्दस्येत्यत्र रूपशब्देन प्रसक्तस्य बाह्यार्थस्य व्यावृत्तये स्वमित्युक्तत्वादिति प्रतिपादितम् । सर्वव्यावृत्तये यस्मात्स्वशब्दो रूपशब्दस्येत्यादि...उपपादनं च कृतमस्ति तदप्यनुगुणं योज्यम् । वस्तुतस्तु इत्यादि ज्ञेयमिति अतद्गुणसंविज्ञानबहुव्रीह्याश्रयणेन आदिपदोक्तमित्यादौ तदर्थकत्वं नियामकमित्यप्याहुः ।

**॥ इति प्रतीकत्वेन ब्रह्मोपासनं, ब्रह्मत्वेन प्रतीकोपासनं समानमेव ॥**

॥ अथ कथितार्थोपसंहारः

४८ सु०— ननु श्रुतिविहितमाचरता कथं ब्रह्मकोपेनानर्थप्राप्तिरित्याशङ्कां परिहरन् अपव्याख्याननिराकरणमुपसंहरति **तस्मादिति** ।

**अनु०— तस्मादपेशलं सर्वमन्यस्य ब्रह्मतावचः ।**

**सर्वमिति** श्रुतिसूत्रव्याख्यानरूपम् ।

एतेन सालग्रामादौ विष्णवादिप्रतिपत्तिरपि परास्ता वेदितव्या ।

सूत्रव्याख्यानमुपक्रम्य अपव्याख्यानदूषणमसङ्गतमित्यतः स्वोक्तदार्ढ्यार्थमिति भावेन आह **तस्मादिति** ।

**तस्माद्यथोक्तमार्गेण ब्रह्मोपास्यं मुमुक्षुभिः ॥**

परकीयव्याख्यानस्य दूषितत्वात् । **यथोक्तमार्गेण** अस्मदुक्तं सूत्रार्थम् अनतिक्रम्य वर्तमानेन मार्गेण ॥ ४-१-४ ॥

**परि०— श्रुतिविहितमिति** । 'नामब्रह्मेत्युपासीते'त्यादिश्रुतिविहितमित्यर्थः ॥ **एतेनेति** । अन्यस्यान्य(थाध्या)ताध्यानादनर्थकथनेनेत्यर्थः ॥ ***परमतदूषणम् ॥*** ४-१-४ ॥

**यादु०— श्रुतिविहितमिति** । 'मनो ब्रह्मेत्युपासीते'त्यादिश्रुतिविहितमित्यर्थः । इयमाशङ्का मूलगतसर्वपदनिवर्त्या प्रदर्शितेति ज्ञेयम् ॥ ४-१-४ ॥

**वं०प०—** इदमेव च ब्रह्मोपासनं यदादित्यादिषु तद्दृष्टिः प्रतिमादिष्विव विष्णवादीनामित्युक्तं दूषयति **एतेनेति** । 'प्रतीकसंस्थितत्वेन ध्येयो विष्णुरिति' वचनेनेत्यर्थः ॥ ४-१-४ ॥

**कं०रा०— विष्णवादिप्रतिपत्तिरिति** । विष्णवाद्यभेदप्रतिपत्तिरित्यर्थः ॥ ४-१-४ ॥

**शे०चं०— श्रुतिविहितमिति** । मनो ब्रह्मेत्युपासीतेत्यादिश्रुतिविहितमित्यर्थः ॥ **एतेनेति** । तथा ध्यानस्य अनर्थफलकत्वकथनेनेत्यर्थः ॥ ४-१-४ ॥

**वा०र०—** प्रतिमादिष्विव विष्णवादीनामिति तृतीयसूत्रव्याख्यानावसरे परोक्तं निराकरोति **एतेनेति** मूलम् ।

॥ इति कथितार्थोपसंहारः ॥

# ॥ अथ तदधिगमाधिकरणम् ॥

॥ अथ उपासनेन साक्षात्कृता भगवता ज्ञानात्पूर्वं पापं नश्यति, आगामिपापलेपो नैव जायते ॥

## ब्र०सू०— ॐ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॐ ॥

४९ सु०— निवृत्ता साधनचिन्ता । प्रतिबन्धा(का)नां पूर्वोत्तराणाम् अनन्तकर्मणां भावान्न ज्ञानिनो मोक्षः सम्भवतीत्याशङ्कानिरासाय कर्मनाशाख्यं ज्ञानफलं इदानीं निरूप्यते । तत्र ज्ञानसामर्थ्येनैव कर्मक्षयो भवतीति प्रतीतिं निराकर्तुं सूत्रतात्पर्यमाह **तथेति** ।

**अनु०— तथोपास्याञ्जसा दृष्टं ब्रह्म पापं च भस्मसात् ।**
**करोति निखिलं पूर्वं पाश्चात्यस्याप्यसङ्गताम् ।**
**करोति**

**तथा** उक्तप्रकारेण, **अञ्जसा** आदरनैरन्तर्याभ्यां, **उपास्य दृष्टं**, ज्ञानात् **पूर्वं निखिलं पापं चशब्दादनिष्टं** पुण्यं च, **पाश्चात्यस्य** पापस्य अनिष्टपुण्यस्य च ।

अनेन 'अतोऽन्यदपीत्येकेषामुभयोरि'ति सूत्रतात्पर्यमुक्तं भवति ॥

**परि०—** पूर्वोत्तरमूलयोः सङ्गतिं वक्तुमाह **निवृत्तेति** । **निरूप्यते** सूत्रकृतेति योज्यम् ॥ **तत्रेति** । तदधिगमसूत्रे । **तथेत्यनुवादः**, **उक्तेत्यादि** व्याख्या । विष्णुः स्वामीति, प्रतीकेषु ब्रह्मास्तीति, विष्णुर्ब्रह्म गुणपूर्ण इति चोक्तप्रकारेणेत्यर्थः ॥ **अनेनेति** । अनिष्टपुण्यनाशकथनेनेत्यर्थः । अतः मुक्तावनुभवकारणादन्यत्पुण्यं नश्यति अप्रारब्धमनभीष्टं चेति तत्रार्थकथनादिति भावः ।

**कं०रा०— उपास्य दृष्टमिति** । 'उपास्य दृष्टं ब्रह्म निखिलं पापं भस्मसात्करोती'त्यनेन दर्शनविषयब्रह्मसामर्थ्येन कर्मक्षयो न तु ज्ञानसामर्थ्येनेत्युक्तं भवति । 'कर्माणि क्षपयेद्विष्णुरप्रारब्धानि विद्यये'ति वचनानुसारादेवमुक्तमिति ज्ञातव्यम् ॥ **अनिष्टं पुण्यं चेति** । 'बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते' इत्येतद्व्याख्यानावसरे 'सुकृतमप्यप्रियं मानुष्यादिफलं जहाती'ति गीताभाष्योक्तेर्मानुष्यादिफलमनिष्टं पुण्यमिति भावः । न बृहत्फलमुपासनादिनिमित्तं जहातीत्युपासनादिजनितस्य बृहत्फलकस्य पुण्यस्य नाशेनेति 'न हास्य कर्म

क्षीयत' इत्यादिप्रमाणेन तत्रैव समर्थितत्वात् उपासनादिजनितं पुण्यं अनिष्टपदव्यावर्त्यमिति द्रष्टव्यम् ॥ **अनेनेति** । दृष्टं ब्रह्मज्ञानात्पूर्वं अनिष्टं पुण्यं भस्मसात्करोति । पाश्चात्यस्य अनिष्टपुण्यस्य असङ्गतां करोति अनेन 'अतोऽन्यदपीत्येकेषामुभयोरि'ति सूत्रमुक्ततात्पर्यकं भवति । मुक्तावनुभवकारणादकाम्यपुण्यादन्यत्पूर्वोत्तरं पुण्यमपि नाशाश्लेषौ प्राप्नोति । अप्रारब्धमनभीष्टं चेत्यर्थप्रतिपादकत्वात् तस्य सूत्रस्य अपिशब्देन 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशावि'ति सूत्रं दृष्टं ब्रह्मज्ञानात् पूर्वं निखिलं ज्ञानं भस्मसात्करोति पाश्चात्यस्य पापस्य असङ्गतां करोतीत्यनेन उक्ततात्पर्यं भवतीत्युच्यत इति भावः ।

**शे०चं०— साधनचिन्तेति** । मोक्षान्तरङ्गतया अवश्यम्भाविसाधनचिन्तेत्यर्थः ॥ **पूर्वोत्तराणामिति** । द्वन्द्वे सर्वनामसंज्ञाया 'द्वन्द्वे चे'ति प्रतिषेधादामि सर्वनाम्नः सुडिति न सुडिति ज्ञेयम् । न च द्वन्द्वे चेति समुदायस्य संज्ञानिषेधेऽप्यवयवानामनिषेधात् तदन्तविधिना सर्वनाम्नः परस्यामः सुट् स्यादेवेति वाच्यम् । दक्षिणोत्तरपूर्वाणामिति भाष्यप्रयोगात् सर्वनाम्नो विहितस्याम एव सुड्विधानस्थित्या अत्र च समासादेव तस्योत्पन्नत्वेनावयवादविहिततया तदप्रसङ्गात् । पापं भस्मसात्करोतीत्येतावता पूर्तेः पापं चेति चशब्दानर्थक्यमाशङ्क्य ज्ञानिकृतज्ञानात्पूर्वभाव्यनिष्टपुण्यसमुच्चयार्थत्वान्न तदिति भावेन चशब्दं तदर्थतया व्याचष्टे **चशब्दादिति** । सूत्रेऽघमात्रस्य श्रवणादसूत्रितानिष्टपुण्यसमुच्चयार्थत्वे उत्सूत्रार्थत्वादभाष्यत्वमित्याशङ्क्य अत्र सूत्रे तस्याश्रुतत्वेऽपि सूत्रान्तरे श्रुतत्वात् तदर्थतया अस्य नाभाष्यत्वप्रसङ्ग इत्यभिप्रेत्य एतद्व्याख्येयसूत्रोदाहरणपूर्वकं तद्व्याख्यानतां भाष्यस्योपदर्शयति **अनेनेति** । अनिष्टपुण्यसमुच्चायकचशब्देनेत्यर्थः ।

**वा०र०**— दक्षिणोत्तरपूर्वाणामिति भाष्यप्रयोगादिति । .........इत्येतत्सूत्रे प्रयोगादित्यर्थः । एतदुपपादनं च ऋग्भाष्ये स्पष्टम् ।

**॥ इति उपासनेन साक्षात्कृता भगवता ज्ञानात्पूर्वं पापं नश्यति, आगामिपापलेपो नैव जायते ॥**

* * *

**॥ अथ मायावादव्याख्यानमयुक्तम् ॥**

## ब्र०सू०— ॐ इतरस्याप्येवमसंश्लेषः पाते तु ॐ ॥

**५० सु०— इदं सूत्रं केचिद्ब्रह्मविद एवाघस्येव पुण्यस्य अ(संश्ले)शेषो विनाशो भवति, शरीरपाते प्रत्यासन्ने सतीति व्याचक्षते; तदसत् । अतोऽन्यदपीत्यस्य पुनरुक्तताप्रसङ्गात् । व्याख्यानव्याख्येयभावस्य चानन्यगतित्वात् । पूर्वसूत्र एवाघपदस्थाने कर्मपदप्रक्षेपेणोपपत्तौ सूत्रान्तरारम्भवैयर्थ्यात् ।**

**परि०— पुनरुक्ततेति** । तत्रापि ब्रह्मविदः पुण्यनाशोक्तेरिति भावः ।

**यादु०— पुनरुक्तताप्रसङ्गादिति** । अत्रापि पुण्यनाशो एव प्रतिपाद्येते इति त्वयाऽङ्गीकारादिति भावः ।

**वं०प०— कर्मपदप्रक्षेपेणेति** । उत्तरपूर्वकर्मणोरिति कर्मपदप्रक्षेपेणेत्यर्थः ।

**कं०रा०—** 'नन्वितरस्याप्येवमसंश्लेषः पाते त्वि'त्यनेन सामान्यतो ब्रह्मविदः पुण्यस्य नाश इत्युक्तम् । तत्र कीदृशपुण्यस्य नाश इत्याकाङ्क्षायामतोऽन्यदपीत्यनेन मोक्षानुप्रवेशिनोऽन्यस्य पुण्यस्य नाश इति व्याख्यायते । अतो व्याख्यानव्याख्येयभावान्न पुनरुक्तिरित्यत आह **व्याख्यानेति** । 'यथाऽश्लेषो विनाशश्च मुक्तस्य तु विकर्मणः । एवं सुकर्मणश्चापि पततस्तमसि ध्रुवमि'त्याग्नेयवचनानुसारेण ब्रह्मद्विषः पाते प्रत्यासन्ने द्वेषपरिपूर्तेः पूर्वस्य पुण्यस्य नाशो भवति उत्तरस्याश्लेषश्चेत्यर्थपरतया सति गत्यन्तरे व्याख्यानव्याख्येयाभावाश्रवणस्यानुचितत्वादिति भावः ॥ **सूत्रान्तरेति** । 'इतरस्याप्येवमसंश्लेषः पाते त्वि'ति सूत्रान्तरारम्भस्य वैयर्थ्यादित्यर्थः ।

**शे०चं०— पुनरुक्ततेति** । अत्र सूत्रे ज्ञानिकृतपुण्यनाशस्यैव त्वया प्रतिपाद्यत्वाङ्गीकारात् तस्य चेतरस्याप्येवमित्यत्रैव प्रतिपादनादिति भावः । व्याख्यानव्याख्येयभावाभ्युपगमात् सूत्रद्वयस्य न तत्प्रसङ्ग इत्यत आह **व्याख्यानेति** । अत्र च अस्मदुक्तरीत्या गत्यन्तरस्यैव सत्त्वान्न तदाश्रयणं युक्तमिति भावः ।

**स०व्र०— अतोऽन्यदित्यस्येति** । इतरस्याप्येवमित्यनेनेति शेषः । ननु व्याख्यानव्याख्येयभावाभ्युपगमान्न पौनरुक्त्यमित्यत आह **व्याख्यानेति** । प्रकृते च अस्मदुक्तप्रकारेण गत्यन्तरमेवास्तीति न व्याख्यानव्याख्येयभाव इति भावः ॥ **पूर्वसूत्र एवेति** । तदधिगमेति पूर्वसूत्र एवेत्यर्थः ।

**॥ इति मायावादव्याख्यानमयुक्तम् ॥**

* * *

**॥ अथ ब्रह्मद्वेषिणः द्वेषपरिपूर्तेः पूर्वस्य पुण्यस्य नाशः उत्तरपुण्यस्य अलेपश्च ॥**

५१　**सु०— अस्माकं त्वग्निहोत्रादीत्यादिसूत्राणि पुण्येऽपि विभागसूचनार्थानि । ज्ञानोत्तरं पुण्यार्जनस्याभावादश्लेषशब्दो विनाशार्थो व्याख्यातव्यः । तथा च प्रकृतपरित्यागोऽप्रकृतस्वीकारश्चेत्याशयवानन्यथा सूत्रतात्पर्यमाह तद्विषश्चेति ।**

**अनु०—　तद्विषश्चैवं पुण्यनाशोऽप्यसङ्गता ।**

**ब्रह्मद्विषश्च । एवं ज्ञानिवत् । द्वेषपरिपूर्तेः** पूर्वस्य **पुण्यस्य नाशो भवति उत्तरस्य असङ्गता अपि ।** अत्र सूत्रं यदेव विद्ययेति हीति, तत्पुनरुक्तम् । एतदर्थस्य तच्छ्रुतेरिति सूत्रेण प्रागुक्तत्वादित्यत आह **यदेवेति** ।

## यदेव विद्ययेत्यत्र पूर्वोक्ताद्धि विशिष्यते ।

**'अत्रोक्तं प्रमेयमि'ति शेषः । अतो न पुनरुक्तिदोष इति हेरर्थः । वक्ष्यमाणोऽर्थ-विभागः प्रकरणवशात् प्रसिद्ध इति वा ।**

**परि०**— भवत्पक्षेऽपि कथं न पुनरुक्तिराद्यसूत्रेणेत्यत आह **अस्माकं त्विति** ॥ **सूत्राणीति** । 'अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्', 'अतोऽन्यदपीत्येकेषामुभयोः', 'भोगेन त्वितरे क्षपयित्वाऽथ सम्पत्स्यते' इति त्रीणि सूत्राणि यथाक्रमं काम्याकाम्यप्रारब्धरूपपुण्यविभागसूचनार्थानीत्यर्थः । 'यदेव विद्यये'ति सूत्रं त्वग्निहोत्रादिति सूत्रार्थोपोद्बलकमिति भावः । परोक्तसूत्रार्थे दोषान्तरमाह **ज्ञानोत्तरमिति** ॥ **प्रकृतेति** । पूर्वत्राश्लेषशब्दितासम्बन्धरूपार्थस्यैव प्रकृतत्वादिति भावः ॥ **सूत्रेणेति** । पुरुषार्थाधिकरणस्थसूत्रेणेत्यर्थः । दोषोक्तेः स्थानप्रदर्शनाय **अत्रे**त्यनुवादः ॥ **वक्ष्यमाण इति** । उत्तरश्लोक इति भावः ।

**यादु०**— नन्वेवं भवत्पक्षेऽपि तदधिगम इति पूर्वसूत्र एवाद्यपदस्थाने कर्मपदप्रक्षेपेणोपपत्तावग्रिमसूत्राणां वैयर्थ्यमित्यत आह **अस्माकं त्विति** । अस्माकमितरस्याप्येवमसंश्लेषः पाते त्विति सूत्रं तावन्न व्यर्थम् । तस्य ज्ञानिकृतपुण्यविषयत्वाभावस्याग्रे स्फुटत्वात् । नाप्यग्निहोत्रादीत्यादिसूत्राणां, तेषां ज्ञानिविषयत्वेऽपि तदीयपुण्ये विभागपूर्वकं विनियोगप्रतिपादकत्वात् । तथाहि । अग्निहोत्रादीत्यत्र यज्ज्ञानिसम्बन्धि अग्निहोत्रादिपुण्यमकाम्यं तज्ज्ञानात्पूर्वकालीनं ज्ञानायैव, ज्ञानोत्तरं तु मोक्ष आनन्दातिशयानुभवायेत्युच्यते । अतोऽन्यदपीत्यत्र तु अकाम्यपुण्यादन्यत् काम्यं पुण्यं ज्ञानात्पूर्वकालीनमप्रारब्धमनभीष्टं च तदघवदेव विनश्यति । ज्ञानोत्तरं तु काम्यं पुण्यमनिष्टं चैतरस्याश्लेष इत्युच्यते । 'यदेव विद्यये'त्यत्रापि ज्ञानोत्तरस्याकाम्यपुण्यस्य मोक्षानुप्रवेशः श्रुत्युदाहरणेन समर्थ्यते । ततश्चैवास्मन्मते पुण्ये विभागस्याभिप्रेतत्वेनाद्यपदस्थाने कर्मपदप्रक्षेपेण ज्ञानात्पूर्वोत्तरप्रारब्धानभीष्टकाम्यपुण्ययोरेव गृहीतुमशक्यत्वान्नोत्तरसूत्राणां वैयर्थ्यमित्यर्थः । किं चेतरस्याप्येवमिति सूत्रस्य त्वदुक्तार्थकत्वेऽत्रत्याश्लेषशब्दस्य पूर्वसूत्रगताश्लेषशब्दार्थतया प्रकृतसम्बन्धाभावरूपार्थपरित्यागः तत्राप्रकृतस्य विनाशस्यार्थतया कल्पनं च प्रसज्यत इत्याह **ज्ञानोत्तरमित्यादिना** । नन्वत्राप्यश्लेषशब्दो न विनाशार्थो व्याख्यायते किं त्वसम्बन्धार्थः एव, तथा च नोक्तदोष इत्यत उक्तं **ज्ञानोत्तरमिति** ॥ **हेरर्थ इति** । अव्ययानामनेकार्थत्वादिति भावः ।

**वं०प०—** एवं ज्ञानिवदिति व्याख्याने दृष्टं ब्रह्म पापं भस्मसात्करोतीतिवत् तद्विषोऽपि दृष्टं ब्रह्म पुण्यं भस्मसात्करोतीत्यपरोक्षज्ञानातिदेशोऽपि प्रतीयते । न चैतद्युक्तम् । निर्गुणस्य ब्रह्मणः साक्षात्कर्तुमशक्यत्वात् । 'न मे गुरोरप्यपरोक्षतां गतमि'ति मध्वविजयपञ्चमसर्गवचनात् । अतस्तेषां द्वेषपरिपूर्तिरिव पुण्यनाशसाधनमित्येवमपरोक्षज्ञानस्थाने द्वेषपरिपूर्तिरिव वक्तव्येत्याशयेनाह **द्वेषपरिपूर्तेरिति** । 'पश्यतो ब्रह्म निर्द्वन्द्वं हीनं च ब्रह्म पश्यतः' इत्यत्रापि हीनब्रह्मदर्शनं नाम तद्द्वेषपरिपूर्तिरिव नान्यत् । 'न मे गुरोरप्यपरोक्षतां गतम् । अतो निर्गुणोपासने मा स्म विश्वसीरि'त्यच्युतप्रेक्षं प्रति तद्गुरुणोक्तत्वादित्यवगन्तव्यमिति सम्प्रदायः ।

**कं०रा०—** ननु युष्माकं मतेऽपि 'तदधिगम उत्तरपूर्वाघयोरि'ति पूर्वसूत्र एवाघपदस्थाने कर्मपदं प्रक्षिप्यते । तेन काम्यं पुण्यं च विवक्षितत्वात् तस्य नाशाश्लेषयोरुक्तयोरन्यस्य मोक्षानुप्रवेशोऽर्थात्सेत्स्यतीति 'अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनादित्यादि'सूत्राणां वैयर्थ्यमित्यत आह **अस्माकं त्विति** । 'अग्निहोत्रादी'-त्यादिसूत्राणां पुण्यविभागसूचनार्थत्वं च तत्त्वप्रकाशिकायामुक्तं द्रष्टव्यम् ॥ **तथा चेति** । 'इतरस्याप्येवमसंश्लेष' इत्यत्र असंश्लेषशब्दे विनाशार्थतया व्याख्यायमाने तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशावित्यत्र अश्लेषशब्देन योऽयं सङ्गाभावरूपार्थः प्रकृतः तस्य अपरित्यागः तच्छब्देन अप्रकृतस्य विनाशरूपार्थस्य स्वीकारश्चेत्यर्थः ॥ **वक्ष्यमाण इति** । पूर्वं 'पुरुषार्थोऽतः शब्दादिति बादरायण' इत्यधिकरणस्य तच्छ्रुतेरिति गुणसूत्रे विद्यायुतं कर्म स्वर्गादिलब्ध्यर्थं वीर्यवत्त्वेन चोदितं, 'यदेव विद्ययेति ही'त्यत्र तु विद्यायुतं कर्म मोक्षे वीर्यप्रदमिति चोदितमिति वक्ष्यमाणोऽर्थविभागः प्रकरणवशादुदाहृतसूत्रयोः यत्पूर्वप्रकरणं तत्पर्यालोचनवशात् प्रसिद्ध इति वा हेरर्थ इत्यर्थः ।

**शे०चं०—** नन्वेवं भवत्पक्षेऽप्याद्यसूत्र एवाघपदस्थाने कर्मपदप्रक्षेपेणैवोपपत्तौ सूत्रान्तरारम्भवैयर्थ्यमविशिष्टमित्यतः अस्मन्मते इतरस्येत्यस्य ज्ञानिकृतपुण्यविषयत्वाभावस्य अग्रे स्फुटत्वान्न तद्वैयर्थ्यम् । नाप्यग्निहोत्रादीत्यादिसूत्राणाम् । तेषां ज्ञानिपुण्यविषयतायामपि तदीयपुण्ये विभागपूर्वकं विनियोगप्रतिपादकत्वात् । तथाहि अग्निहोत्रादीत्यत्र यज्ज्ञानिसम्बन्ध्यग्निहोत्रादिपुण्यमकाम्यं तस्य ज्ञानात्पूर्वकालीनस्य ज्ञानार्थतायाः तदुत्तरस्य च मुक्तावानन्दातिशयानुभवार्थतायाः, अतोऽन्यदपीत्यत्राकाम्यपुण्यादन्यस्य ज्ञानात्पूर्वकालीनस्याप्रारब्धानभीष्टभेदभिन्नस्य काम्यस्याघवदेव विनाशितायाः, प्रारब्धस्य चेष्टस्यानाशितायाः, उत्तरकालीनस्यापीष्टानिष्टरूपस्य संश्लेषाश्लेषयोर्यदिवेत्यत्र ज्ञानिकृताकाम्यकर्मणो महानन्दफलतया मोक्षानुप्रवेशस्य समर्थितत्वेन पुण्ये विभागस्य सद्भावादाद्यसूत्र एवाघपदस्थाने कर्मपदप्रक्षेपेण ज्ञानात्पूर्वोत्तरयोरप्रारब्धानभीष्टकाम्यपुण्ययोर्ग्रहीतुमशक्यत्वान्नोत्तरसूत्रवैयर्थ्यप्रसङ्ग इति भावेनाह **अस्माकं त्विति** ॥ किञ्चेतरस्यापीति सूत्रस्य त्वदुक्तार्थत्वेऽश्लेषशब्दस्य पूर्वसूत्रगताश्लेषशब्दार्थतया प्रकृतसम्बन्धाभावरूपार्थपरित्यागः तत्र अप्रकृतविनाशार्थतया विकल्पनं च प्रसज्यत इत्याह **ज्ञानोत्तरमिति** । नन्वत्राप्यश्लेषशब्दस्य सम्बन्धाभावार्थतया विनाशार्थत्वाभावान्न प्रकृतत्यागादीत्यत उक्तं **ज्ञानोत्तरमिति** । **प्रागिति** । तृतीयस्य चतुर्थ इति शेषः ॥ **हेरर्थ इति** । अव्ययानामनेकार्थत्वादिति भावः ॥ **वक्ष्यमाण इति** । पूर्वं स्वर्गादीत्यादिनेति शेषः ॥ **इति वेति** । हेरर्थ इति सम्बन्धः ।

**स०व्र०—** नन्वेवं भवतामपि तदधिगमेति पूर्वसूत्र एवाघपदस्थाने कर्मपदप्रक्षेपेणैवोपपत्तौ 'अतोऽन्यदपीत्येकेषामुभयोरि'त्यादिसूत्रवैयर्थ्यमित्यत आह **अस्माकं त्विति** । किञ्चेतरस्यापीति सूत्रस्य त्वदुक्तार्थे प्रकृतत्यागादि प्रसज्येत । तदधिगमेतिसूत्रेऽश्लेषशब्दस्य सम्बन्धाभावार्थत्वेन तस्यैव प्रकृतत्वेन विनाशार्थत्वे सम्बन्धाभावरूपप्रकृतपरित्यागात् तदर्थत्वेनाप्रकृतविनाशार्थत्वाभ्युपगमात् । न चाश्लेषशब्दो न विनाशपर इति नोक्तदोष इति वाच्यम् । ज्ञानोत्तरं पुण्यार्जनभावेन सम्बन्धाभावार्थकत्वानुपपत्त्या विनाशार्थकत्वस्यैवाङ्गीकार्यत्वात् । तथा च प्रकृतपरित्यागाप्रकृतस्वीकारौ स्यातामित्यत आह **ज्ञानोत्तरमिति** ॥ **वक्ष्यमाण इति** ॥ *इति चतुर्थे प्रथमः ॥*

**॥ इति ब्रह्मद्वेषिणः द्वेषपरिपूर्तेः पूर्वस्य पुण्यस्य नाशः उत्तरपुण्यस्य अलेपश्च ॥**

* * *

**॥ अथ 'यदेव विद्यये'ति सूत्रप्रतिपाद्यस्य न पौनरुक्त्यम् ॥**

५२ **सु०— कथं विशिष्यत इत्यतः पूर्वसूत्रतात्पर्यं तावदाह पूर्वमिति ।**

## अनु०— पूर्वं स्वर्गादिलब्ध्यर्थं वीर्यवत्त्वेन चोदितम् । कर्म विद्यायुतं

**स्वर्गादीति मोक्षेतरपुरुषार्थग्रहणम् । उत्तरसूत्रतात्पर्यमाह पश्चादिति ।**

## पश्चान्मोक्षे वीर्यप्रदं त्विति ।

**पश्चात्त्विति सम्बन्धः । विद्यायुतं कर्मेति वर्तते । वीर्यप्रदं आनन्दातिशयप्रदम् । इति चोदितमिति सम्बन्धः ।**

**परि०—** पूर्वत्रान्वितत्वात् पुनरनुसन्धानायाह **वर्तत इति** ।

**शे०चं०—** स्वर्गादीत्यादिपदसङ्ग्राह्यतावच्छेदकमाह **मोक्षेतरेति** ।

**वा०र०—** आदिपदेन मोक्षग्रहणनिरासायाह **मोक्षेतरेति** । **शब्दार्थतया प्रकृतेति** । शब्दार्थतया प्रकृतो यः सम्बन्धाभाव इति योजना । इत्यत उक्तज्ञानोत्तरमितीत्यतःपरं त्वत्पक्ष इति शेष इति पाठः ।

तदभावे वा मूले ज्ञानोत्तरमित्यनन्तरं त्वत्पक्ष इति उक्तज्ञानोत्तरमितीत्यतः शेषपूरणेन व्याख्यानं कार्यम् । तेनास्मत्पक्षे तदुत्तरमपि पुण्यार्जनस्य सद्भावात् कथमेतदिति चोद्यानवकाशः ।

**॥ इति 'यदेव विद्यये'ति सूत्रप्रतिपाद्यस्य न पौनरुक्त्यम् ॥**

* * *

**॥ अथ प्रारब्धकर्मक्षयानन्तरमेव ज्ञानिनां द्वेषिणाञ्च तत्तद्योग्यमोक्षः ॥**

५३ **सु०—** सकलकर्मक्षये तदैव मुक्तिः स्यात् । न चैवम् । जीवन्मुक्तानामुपलम्भादित्याशङ्कापरिहारायोक्तं सूत्रकारेण **अनारब्धकार्ये एव तु पूर्वे तदवधेः** इति । तर्हि प्रारब्धकर्मभावात् कथं मोक्ष इत्याशङ्क्य पुनः सूत्रितं **भोगेन त्वितरे क्षपयित्वाऽथ सम्पत्स्यत** इति । एतदपि न ब्रह्मविन्मात्रविषयमित्याशयवान् व्याचष्टे **तत** इति ।

## ब्र०सू०—ॐ भोगेन त्वितरे क्षपयित्वाऽथ सम्पत्स्यते ॐ ॥

**अनु०—** ततो भोगेन पुण्यं च क्षपयित्वेतरत्तथा ।
ब्रह्मद्विट् ब्रह्मदर्शी च तमोमोक्षाववाप्नुतः ॥

अनारब्धक्षयानन्तरम् । इतरत् पापम् ।

**परि०—** **अनारब्धेति** । अनारब्धकार्ये एव पूर्वपुण्यपापे विनश्यतः । 'तस्य तावदेव चिरं यावन्न विमोक्षे अथ सम्पत्स्यत इति तदवधेरिति' सूत्रार्थः ।

**वा०र०—** **उक्तं सूत्रकारेणानारब्धकार्ये एव त्विति मूलम्** । अनारब्ध एवेति सूत्रे ह्यप्रारब्धस्यैव ज्ञानेन नाशः । न तु प्रारब्धस्यापीति प्रतिपादनादिति भावः । उक्तं च तत्सूत्रावतारे मूले सकलकर्मक्षये तदैव मुक्तिः स्यात् । न चैवम् । जीवन्मुक्तानामुपलम्भादिति ।

**वं०प०—** इष्टापत्तिं परिहरति **न चैवमिति** । कुत इत्यत आह **जीवन्मुक्तानामिति** । शुकादीनामित्यर्थः ॥ ४-१-८ ॥

*इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचिते टीकाऽधृतसुधावाक्यार्थविवरणे चतुर्थाध्यायस्य प्रथमः पादः ॥*

**॥ इति प्रारब्धकर्मक्षयानन्तरमेव ज्ञानिनां द्वेषिणाञ्च तत्तद्योग्यमोक्षः ॥**

॥ अथ ब्रह्मादिदेवतानां प्रारब्धभोगकालनिरूपणम् ॥

५४ **सु०**— प्रारब्धकर्मणामनन्तत्वे भोगेन क्षयो न शक्य(ते) इत्याशङ्कामागमवाक्येन परिहरति **ब्रह्मणामिति** ।

**अनु०**— ब्रह्मणां शतकालात्तु पूर्वमारब्धसङ्क्षयः ।
ब्रह्मणस्त्वेव तावत्त्वं पञ्चाशद्ब्रह्मणस्तथा ।
रुद्रस्य विंशदेव स्यादिन्द्रस्यार्कादिके दश ।
अन्येषां ब्रह्ममात्रस्य त्वन्त आरब्धसङ्क्षयः ।
ब्रह्मणैव सहातश्च परं नारायणं व्रजेत् ।
इति सत्तत्त्ववचनं स्वयं भगवतोदितम् ॥

*इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने चतुर्थाध्यायस्य प्रथमः पादः ॥*

**ब्रह्मणां शतमिति** षष्ठ्या अलुक् । तस्य कालो ब्रह्मणां शतकालः तस्मात् तत्समाप्तेः पूर्वमेव सर्वेषां ज्ञानिनाम् **आरब्धसङ्क्षयो** भवति । अस्यैव विवरणं **ब्रह्मणस्तु तावत्त्वमेव** ब्रह्मकल्पानां शतेनैव कर्मक्षयवत्त्वम् । **ब्रह्मण** इति जातावेकवचनम् । पञ्चाशतां ब्रह्मणां कालात् पूर्वं **रुद्रस्यारब्धसङ्क्षयः** । **तथा**शब्दः समुच्चये । विंशतिपर्यायो **विंश**च्छब्दः । ब्रह्मणां विंशतिरेव तदवच्छिन्न एवेन्द्रस्य प्रारब्धकर्मसङ्क्षयकालः । **अर्कादिके** अर्कादीनां **दश** ब्रह्मणस्तदवच्छिन्नः कर्मक्षयकालः । **ब्रह्ममात्रस्य** एकस्यैव ब्रह्मणः । अतःपरं प्रारब्धकर्मसङ्क्षयानन्तरमपि ब्रह्मणा **सहैव नारायणं व्रजेत्** ॥ ४-१-८ ॥

**परि०**— 'ब्रह्मणामि'त्यस्य भिन्नपदत्वे शतपदेन समस्तेनान्वयसामर्थ्याभावादाह **ब्रह्मणां शतमितीति** । 'पङ्क्तिविंशतित्रिंशच्चत्वारिंशदि'त्यादिपञ्चमाद्यपादीयसूत्रे विंशतिपदस्यैवोक्तेर्विंशदिति कथमित्यत आह **विंशतिपर्याय इति** । प्रामाणिकप्रयोगात् सोऽपि शब्दोऽभ्युपेय इति भावः । ब्रह्मणां विंशतिरेवेन्द्रस्येत्यादेरन्वयमाह **ब्रह्मणां विंशतिरेवेत्यादि** । जातावेकवचनमित्युक्तेः **ब्रह्मणामित्युक्तिः** । व्यवहितत्वादन्वयमाह **ब्रह्मणा सह नारायणं व्रजेदिति** ॥ ४-१-८ ॥

*॥ इति श्रीमन्न्यायसुधापरिमळे चतुर्थाध्यायस्य प्रथमः पादः ॥*

**यादु०**— ननु ब्रह्मणामित्यस्य पृथक्पदत्वात् कथं तस्य कालपदसमस्तेन शतपदेनान्वय इत्यत आह **ब्रह्मणां शतमिति** ॥ **षष्ठ्या इति** । तथा चैकपद्यमैकस्वर्यं च समासप्रयोजनमित्युक्तत्वात् तदेकमेव पदमिति भावः । 'तथैव चत्वारिंशद्भिः पदं शैवं च जन्मभिरि'ति भागवततात्पर्यविरोधपरिहाराय बुद्ध्या विविक्तस्य कालादित्यस्य पूर्वमित्यस्य च अनुवृत्तिमभिप्रेत्य पञ्चाशद्ब्रह्मण इत्येतद्व्याचष्टे **पञ्चशतां ब्रह्मणामिति** ॥ **पूर्वमिति** । एकचत्वारिंशद्ब्रह्मकल्पानन्तरमित्यर्थः । रुद्रस्य शेषत्वानन्तरमेव मुक्तेः क्लृप्तत्वात् । ननु पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतमित्यत्र द्वयोर्दशतोर्विंशतिरिति शब्दस्य निपातनात् कथं विंशदिति प्रयोग इत्यत आह **विंशतिपर्याय इति** । विंशतिशब्दपर्यायो विंशदित्यपि शब्दः प्रमाणबलादङ्गीकार्य इति भावः । ननु ब्रह्मणां विंशतेर्ब्रह्मधर्मभूतायाः कथं कालत्वमित्यत आह **तदवच्छिन्न इति** । एवमग्रेऽपि । एकस्यैव ब्रह्मण इत्यत्रापि तदवच्छिन्नकालस्येत्यर्थः ॥ ४-१-८ ॥ ४-१ ॥

*॥ इति श्रीमद्वेदेशतीर्थपूज्यपादशिष्येण यदुपतिना कृतायां सुधाटिप्पण्यां चतुर्थाध्यायस्य प्रथमः पादः ॥*

**कं०रा०**— 'ब्रह्मणां शतकालादि'त्यत्र ब्रह्मणामित्यस्य शतशब्देनालुक्समासानाश्रयणे तस्य कालशब्देनान्वयापत्त्या ब्रह्मणां शतस्य यः कालः तत्समाप्तेः पूर्वमेवेति विवक्षितार्थस्यासिद्धिप्रसङ्गात् अलुक्समास आश्रितः । ननु ब्रह्मणामनेकेषां पञ्चाशत्वान्वययोग्यत्वात् पञ्चाशद्ब्रह्मणामिति वक्तव्ये पञ्चाशद्ब्रह्मण इत्येकवचनं कथमित्यत आह **ब्रह्मण इति जातावेकवचनमिति** । 'रुद्रस्य विंशदेवे'त्यत्र विंशच्छब्दः कथमित्यत आह **विंशतिपर्याय इति** । **ब्रह्मणा सहैवेति** । एतच्च 'एवं परेत्य भगवन्तमनुप्रविष्टा ये योगिनो जितमरुन्मनसो विभागाः । तेनैव साकममृतं पुरुषं पुराणं ब्रह्म प्रधानमुपयान्त्यगताभिमानाः', 'भगवन्तमनुप्राप्ता अपि तु ब्रह्मणा सह । परमं मोक्षमायान्ति लिङ्गभङ्गेन योगिन' इत्यादिप्रमाणोदाहरणेन द्वितीयपादे समर्थयिष्यते भगवता आचार्येणैवेति ॥ ४-१-८ ॥

*॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीमद्व्यासतीर्थमुनिवर्यपौत्रश्रीपतितीर्थपूज्यपादानां शिष्येण रामचन्द्रभिक्षुणा कृतायां श्रीमन्न्यायसुधाव्याख्यायां चतुर्थाध्यायस्य प्रथमः पादः ॥ ४-१ ॥*

**शे०चं०**— ब्रह्मणामित्येतस्य भिन्नपदत्वेन तत्सापेक्षशतशब्दस्यासमर्थत्वान्न कालशब्देन समासः सम्भवति । देवदत्तस्य गुरुकुलमित्यादाविव नित्यसापेक्षत्वात् समासकल्पनं तु अगतिका गतिरित्यतो ब्रह्मणां शतकालादित्येतावता एकपदतामाश्रित्य समासं समर्थयते **ब्रह्मणां शतमितीति** । तर्हि सुपो धातुप्रातिपदिकयोरिति सुलोपप्रसक्त्या ब्रह्मशतकालादिति भवितव्यम् । ब्रह्मणां शतकालादिति तु कथमित्यत आह **षष्ठ्या अलुगिति** । 'षष्ठ्या आक्रोश' इति स्मरणादिति भावः । सर्वज्ञानिप्रारब्धकर्मभोगस्य ब्रह्मशतकालाभिव्याप्तिप्रतीतिं परिहरति **तस्मादिति** । अनेन मूले कालशब्दस्तत्समाप्तिपर इत्युक्तं भवति । पौनरुक्त्यमाशङ्क्य परिहरति **अस्यैवेति** । ब्रह्मणो हिरण्यगर्भत्वयोग्यजीवस्येत्यर्थः ॥ **ब्रह्मकल्पानां शतेनैवेति** । ब्रह्मशतकालस्यादौ कियतः

कालस्य ब्रह्मापरोक्षज्ञानसाधनार्थं गतत्वात् । अपरोक्षज्ञानकालमारभ्य किञ्चिन्न्यूनब्रह्मकल्पशतेनैवेत्यर्थः । व्यक्त्यैक्यस्य बाधितत्वेन तन्निबन्धनैकवचनानुपपत्तेर्जातिरूपार्थैक्यविवक्षानिबन्धनं पञ्चाशद्ब्रह्मण इत्यत्र ब्रह्मण इत्येकवचनमित्याह **ब्रह्मण इतीति** । बुद्ध्या विविक्तस्य कालादित्यस्य पूर्वमित्यस्यारब्धसङ्क्षय इत्यस्य चानुवृत्तिमभिप्रेत्य पञ्चाशद्ब्रह्मणस्तथा रुद्रस्येत्येतद्व्याचष्टे **पञ्चाशतामिति** । यद्यपि रुद्रपदयोग्यस्य जीवस्य किञ्चिन्न्यूनपञ्चाशद्ब्रह्मकालमनुवर्तत इति सामान्यमेव *सन्न्यायरत्नावल्या*मुक्तं तथाऽपि 'तथैव चत्वारिंशद्भिः पदं शैवं च जन्मभिरि'ति *भागवततात्पर्य*स्थवाक्यानुरोधेन किञ्चिन्न्यूनशब्दस्तदर्थो व्याख्येयः । ततश्चैकचत्वारिंशद्ब्रह्मकल्पसमाप्तेः पूर्वमित्यर्थः । रुद्रस्य शेषत्वानन्तरमेव मुक्तेः क्लृप्तत्वादिति ध्येयम् । ननु पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतमिति सूत्रे द्वयोर्दशतोर्विंशतिरित्येव वक्तव्यम्, विंशदिति तु कथमित्यतः प्रमाणबलाद्विंशतिशब्दपर्यायविंशच्छब्दस्यापि सिद्धत्वान्नानुपपत्तिरित्याह **विंशतीति** । ब्रह्मणां विंशतेर्ब्रह्मधर्मत्वेन न कालत्वमित्यत आह **तदवच्छिन्न इति** । किञ्चिन्न्यूने तद्विंशतीत्यवच्छिन्न एवेत्यर्थः । 'इन्द्रादिपदयोग्यानामप्येवं कालतो ह्रासक्रमो भवती'ति सन्न्यायरत्नावल्यामुक्तत्वादिति ध्येयम् । ब्रह्मण इत्यादि षष्ठी । प्राय(:)-पठितत्वाद्योग्यत्वाच्चार्कादिक इति सप्तमी षष्ठ्यर्थे । एकवचनं तु जात्यभिप्रायमित्यभिप्रेत्य व्याख्याति **अर्कादीनामिति** । अनुवृत्तस्य षष्ठ्येकवचनान्तस्य ब्रह्मशब्दस्य दशेति प्रथमाबहुवचनेन सामानाधिकरण्यानुपपत्तेः तन्निर्वाहाय विभक्तिविपरिणामं जात्येकवचनतां चाभिप्रेत्य विशेष्यमाह **दशब्रह्मण इति** । दशब्रह्मणामेवारब्धसङ्क्षयकालत्वानुपपत्तेराह **तदवच्छिन्न इति** । दशब्रह्मण इति क्वचित्पाठः । तत्र दशशब्दो दशकपरः । ब्रह्मण इत्यनुवर्तते । तच्च जात्यभिप्रायम् । ततश्च ब्रह्मणां दशकमर्कादीनामारब्धसङ्क्षय इति योजना । तदवच्छिन्नेत्यादि पूर्ववदेव योज्यमित्यवगन्तव्यम् ॥ **एकस्यैव ब्रह्मण इति** । एकब्रह्मावच्छिन्नः काल इत्यर्थः । ब्रह्मणैवेत्येवकारस्य वैयर्थ्यादिप्रसङ्गेन यथाश्रुतसम्बन्धानुपपत्तेर्भिन्नक्रमतया तं योजयति **सहैवेति** ॥ ४-१-८ ॥

*इति श्रीमत्पदवाक्यप्रमाणविदामग्रेसराणां श्रीमत्सकलविद्वच्चक्रचूडामणीनां श्रीमद्विद्याधीशतीर्थपूज्यचरणानां निजशिष्यस्य केशवस्य कृतौ गुरुराजोपदिष्टमार्गानुवर्तिन्यां श्रीमन्न्यायसुधाविषमपदवाक्यार्थविवृतौ शेषवाक्यार्थचन्द्रिकायां चतुर्थाध्यायस्य प्रथमः पादः ॥*

**वा०र०**— न च भागवतधर्मप्रवृत्तये ज्ञानिनः कमपि कालमवस्थापयंस्तदर्थं प्रारब्धानि कर्माण्यवशेष्येति विद्यैवेत्यधिकरणीयपूर्वमूलानुसारे भगवानेव प्रारब्धकर्माण्यवशेषयति, एवं जिज्ञासाधिकरणसुधायां ज्ञानिनां सङ्गः शरीरपाते ब्रह्मोपदेशाः पातशतशब्दस्यासमर्थत्वादिति, अदृश्यत्वाधिकरणादिमूलटीकाव्याख्यानयोरसामर्थ्यादि निरूपितमस्ति । तत्प्रकारेणेहापि तदुपपादनं ज्ञेयम् । परं त्वेवमादिस्थले न्यायविवरणस्थ-'कृष्णस्य सूत्रानुव्याख्यानन्याये'त्यत्रेव समासे गुणभूतस्यापि शतपदस्य बुद्ध्या विविक्तस्य ब्रह्मणामिति भिन्नपदेन विशेषणं सम्भवतीत्यपि प्रकारो वक्तुं शक्यते । उक्तं च न्यायविवरणटीकायाम् । समासे गुणभूतस्यापि सूत्रपदस्य बुद्ध्या विविक्तस्य भिन्नपदेन विशेषणं युज्यत इति । एवं उपमाधिकरणमूले 'जीवेशभेददृष्ट्यैव समुदायैकता कुत' इत्यनुव्याख्यानमूले समासे गुणभूतेनापि बुद्ध्या विविक्तेन भेदशब्देनैवकारसम्बन्ध इत्युक्तम् ।

टीकास्वपि तत्र तत्र । मुक्तयः सन्तीति देवदत्तस्य गुरुकुलमित्यादिकमप्येवमुपपादयितुं शक्यम् । नित्यसापेक्षत्वेन समासत्वे सर्वत्रैवमेव । शोध्यमेतत् । **षष्ठ्या आक्रोश इतीति** ॥ **सर्वज्ञानिप्रारब्धकर्मेति** ॥ **ब्रह्मणां शतेति** । वातपुत्रीयाः प्रसज्येरन् इत्युक्तिस्थले स्तुतयेऽनुमतिर्वेत्यधिकरणीयसुधायां 'सर्वात्मना त्वभोगो ही'त्येतद्व्याख्यावसरे ब्रह्मदर्शिनामपि प्रारब्धस्य सर्वात्मना क्षये ब्रह्मविदां संसारावस्थानं न स्यान्निर्बीजत्वादित्युक्तिस्थले च ज्ञेयम् ' विचारणे हि सर्वज्ञानिसाधारण्येन प्रारब्धकर्मक्षयकालो निरूप्यते । ब्रह्मत्वे वेत्याद्युत्तरवाक्येषु हिरण्यगर्भादिप्रारब्धकर्मभोगक्षयकालानां विशिष्य निरूपणेनैतच्चरणे तथा तस्यावश्यमङ्गीकार्यत्वादित्यभिप्रायेण मूले **सर्वेषां ज्ञानिनामिति** सर्वज्ञानिप्रारब्धकर्मक्षयकालनिरूपणपरत्वेनैतच्चरणो योजित इति सिद्धवत्कृत्य सर्वज्ञानिप्रारब्धेति तदनुसार्यनुवादः ।

ननु सर्वज्ञानिप्रारब्धकर्मभोगस्य कथं ब्रह्मशतकालाभिव्याप्तिप्रतीतिः । यतो ब्रह्मणामिति वाक्ये शतकालात्पूर्वमिति पूर्वत्वविशेषणप्रयोगोऽस्ति । तेन च यावान् ब्रह्मशतावच्छिन्नः कालस्ततः पूर्वमिति तत्कालाभिव्याप्तिप्राप्तेः । यदि तु कालादित्येवोच्येत तदा तावता कालेन भोग इति प्रतीतेः प्रसक्तिः स्यात् । ल्यबन्तलोपाश्रयणे वा कालमभिव्याप्येति स्पष्टमेव तत्प्रतीतिः स्यात् । न चैवम् । तत्कथमेतदिति चेन्मैवम् । अयमत्राशयो ग्रन्थकारस्य । अत्र तावद् ज्ञानात्पूर्वाणि कर्माणीत्यादौ ज्ञानावधिककर्मणां पूर्वकत्वं तदवधिकत्वमेव यथा भवति तथैतद्ब्रह्मशतावच्छिन्नकालावधिकत्वं पूर्वत्वं न वक्तुं युक्तम् । तथा सत्युक्तशतं कालातिरिक्तं तत्पूर्वब्रह्मशतकालान्तरस्यैवैतच्छतब्रह्मकालप्रविष्टसर्वज्ञानिप्रारब्धकर्मभोगकालत्वापत्तिः स्यात् । नापि ब्रह्मत्वतः शतात्पूर्वमृजोरित्यत्र तत्कालमारभ्य शतब्रह्मत्वविवक्षावत् प्रकृते एकोनशतात्पूर्वत्वविवक्षा । तथा सति शतसङ्ख्याककालेषु प्रथमस्यैकस्यैव कालस्योक्तभोगकालत्वप्राप्तिः स्यात् । नापि न पुरायुषः प्रैतोरित्यादौ आयुषो मध्ये इत्याद्यर्थकत्ववत्पूर्वपदस्य ब्रह्मशतकालमध्य इत्यर्थकत्वम् । तथा सति रुद्रादीनां तन्मध्ये भोगावसानसम्भवेनैतद्वाक्यस्य तत्परत्वसम्भवेऽपि सम्पूर्णशतकालेन भोगावसानवतो हिरण्यगर्भस्य तन्मध्ये तदवसानस्याभावेनैतद्वाक्यस्य हिरण्यगर्भविषयत्वाभावापत्त्या सर्वज्ञानिविषयत्वाभावप्रसङ्गात् । तदेवं पूर्वमित्यस्य विवक्षणे ब्रह्मणामिति वाक्यस्य रुद्रादिप्रारब्धकर्मभोगविषयत्वोपपत्तावपि हिरण्यगर्भप्रारब्धभोगकालविषयत्वानापत्तेः तद्विषयत्वोपपत्त्यर्थं पूर्वमविवक्षितमिति वक्तव्ये ब्रह्मणां शतकालात् सर्वेषां ज्ञानिनां प्रारब्धकर्मभोग इत्युक्तौ तद्भोगस्य ब्रह्मशतकालाभिव्याप्तिप्रतीतिर्युक्तैवेति । निष्कर्षस्तु ब्रह्मणामिति वाक्ये पूर्वत्वं विवक्षितं न वा । नाद्यः । तथात्वेऽस्य वाक्यस्य हिरण्यगर्भविषयत्वाभावप्रसङ्गात् इत्याद्यपक्षदूषणं बहिरेवाभिप्रेत्य द्वितीयपक्षे प्राप्तानुपपत्तिं दर्शयंस्तद्दूषणद्वयनिरासकतयोत्तरमूलमवतारयति **सर्वज्ञानिप्रारब्धेत्यादीति** ॥ **परिहरतीति** । पूर्वत्वं विवक्षितमित्याश्रित्य तत्पक्षदोषो यथा न स्यात् तथा कालात्पूर्वमित्येतद्व्याचष्ट इत्यर्थः । **समाप्तिपर इति** । तथा च ब्रह्मशतकालसमाप्तेः पूर्वं सर्वज्ञानिनां प्रारब्धकर्मक्षय इत्यभिधानप्राप्त्या हिरण्यगर्भस्य शतकालेन कर्मभोगवत्त्वेऽपि तत्समाप्तेः पूर्वं तत्क्षयवत्त्वमेव । एवं रुद्रादीनामपि एकचत्वारिंशदादिकालेन तत्क्षयवत्वेऽपि शतकालसमाप्तेः पूर्वमेव तत्क्षयवत्त्वमित्येवं हिरण्यगर्भादिसर्वज्ञानिप्रारब्धकर्मक्षयकालप्रतिपादकत्वं ब्रह्मणामिति चरणस्य युक्तमिति मूलाभिप्रायः सूचितोऽनेनेति ज्ञातव्यम् । **अस्यैवेतीति** । मूले विवरणमित्यनन्तरं ब्रह्मण-

स्त्वित्यादियोजनाप्रदर्शनेन **ब्रह्मणस्त्वित्यादीति** शेष इति सूचितम् । 'ब्रह्मप्राप्त्यनन्तरं शतकल्पैः प्रारब्धक्षय इत्यसम्भावितमित्याशङ्कानिरासाय प्रवृत्तहिरण्यगर्भत्वयोग्यजीवस्ये'ति *सन्न्यायरत्नावली* मनसि कृत्वा ब्रह्मण इत्येतन्न तत्पदप्राप्तपरम् । अपि तु तत्पदयोग्यर्जुपरम् । तस्य च ब्रह्मशतकल्पैस्तत्क्षयोऽस्त्येवेति नासम्भावितार्थकत्वापत्तिरित्याशयेन ब्रह्मण इत्यनूद्य तथा व्याचष्टे **ब्रह्मण इति** ।

आरब्धकर्मक्षयस्यापरोक्षज्ञानोत्तरकालभावित्वाच्छतकल्पेभ्यः 'पूर्वमपरोक्षज्ञानाभावाच्छतकल्पैः प्रारब्धक्षयवचनमप्यसङ्गतमित्यतः ब्रह्मशतकालस्यादावि'त्यादि सन्न्यायरत्नावलीवाक्यमेवानुकरोति । **ब्रह्मशतकालस्येति** । कियत इत्यत्र तु ......... इत्यादिकं प्रमाणं ज्ञेयम् । एवञ्च किञ्चिन्न्यूनेत्येतदपि प्रमाणोक्तकालपरं व्याख्येयम् । **व्यक्त्यैक्यस्येति** । एक एव यो ब्रह्मा तद्रूपव्यक्त्यैक्यस्येत्यर्थः । एकमात्रब्रह्मकालस्य रुद्रीयप्रारब्धकर्मभोगावसानाधिकरणत्वस्य तथैव चत्वारिंशद्भिः पदमित्यादि वक्ष्यमाणप्रमाणविरुद्धत्वादिति भावः । **जातिरूपार्थैक्यविवक्षेति** । जातिर्नामायमेकोऽर्थः । तदभिधानविवक्षायां त्वेकवचनमेकत्वादेव द्व्येकयोरित्यनेन सिद्धमिति भावः । द्व्यैकयोरिति सूत्रविहितेऽभिमानिन्यधिकरणे टीकोक्तेः । 'द्व्येकयोर्द्विवचनैकवचन इत्यनेने'ति वैराग्यपादटीकोक्तेः । अनेकव्रीहीषु सम्पन्नेषु सम्पन्ना व्रीहय इत्येव वक्तव्ये व्यक्तिपरित्यागेन जातेराख्या विवक्षिता चेदनेकेष्वप्येकजातिनिमित्तमेकवचनं व्रीहिः सम्पन्न इत्येवं दृष्टमेवमनेकपाकादिषु पाकः सम्पन्न इत्यादिकमेकवचनं पाकत्वादिजातेराख्याविवक्षया दृष्टमिति भावः । पूर्वत्र यत्र यत्र जात्यैक्यविवक्षयैकवचनोक्तिस्तत्र सर्वत्रापि व्यक्तिपुरस्कारे व्यक्तीनामनेकत्वेन बहुवचनप्रसङ्गेऽपि तत्रत्यजातिपुरस्कारे तस्या एकत्वादेकवचनमित्येवोपपाद्यम् । एवमेकवचनोपपत्तिमभिप्रेत्य मञ्जर्यादौ जातिपुरस्कारस्तु तज्जातीयत्वेन तेषामभिधानविवक्षा । न तु व्रीहित्वं गोत्वमित्यादाविव जातेरेवाभिधानम् । तत्र व्रीहिसम्पन्ना इत्यादौ विद्यमानसम्पन्नादिपदार्थान्तरानन्वयात् । प्रयोक्तुरनभिप्रेतत्वाच्च । व्यक्तिपर्यन्तत्वाभिधाने जातिव्यक्त्योस्तादात्म्यं सम्बन्ध इति जातिरूपेण व्यक्तीनामभिधाने एकवचनं सिद्धमिति जात्याख्यायामित्येतत्सूत्रप्रत्याख्यानावसरे उक्तः । व्याख्यातं च *कुसुमविकासे* । 'व्यक्तिपर्यन्तत्व इत्येतद्व्यक्तिपरं तन्त्रजात्यभिधान इत्यर्थ इती'ति । एवं यत्र जातौ बहुवचनमित्युच्यते तत्र व्यक्त्यैक्येऽपि जातावेवावयवबहुत्वापेक्षया बहुवचनम् । वर्षासु इन्द्रगोप इत्यत्र वर्षारूपऋतुबहुत्वाप्रतीतेर्व्यक्त्यैक्येऽपि ऋतुगतावयवबहुत्वापेक्षया बहुवचनस्य जात्याख्यायामित्यनेन समर्थसूत्रटीकाकृद्भिः स्वीकारात् । यवः सम्पन्नः यवाः सम्पन्ना इति जात्याख्योदाहरणेऽप्येकस्मिन्नर्थे जात्याख्यायां विकल्पेन बहुवचनं तु काशिकादावुदाहृतमेवेत्युपपादनप्रकारोऽवधेयः । बहुवचनपदार्थकथनं तु 'न शब्दाब्धौ गाढा' इत्येतत्पद्यव्याख्यानावसरे प्रागेव विस्तरेणोक्तं ज्ञेयम् । अत्राधिकविचारो वैराग्यपादेऽस्माभिः कृतोऽवसेयः । उपयोगानुसारेणैकवाक्यतां कृत्वा अत्रापि लेख्यम् । नविलक्षणत्वाधिकरणीय-'कथास्तिस्रो विजानतामि'त्येतद्भाष्यमूलटीकाव्याख्यावसरे व्याख्यायामस्माभिस्तदप्युपयुक्तं ज्ञेयम् ।

विंशत्यवच्छिन्नः काल इत्याद्युत्तरग्रन्थानुसारेण पञ्चाशदवच्छिन्नः कालो रुद्रकर्मक्षयस्येत्यर्थप्रतीतिवारणाय **पञ्चाशतामिति** मूले योजना प्रदर्शिता । तत्र पञ्चाशदित्येतद्वाक्ये कालादित्यादेरप्रतीतेः कथं तदन्त-

भविन योजनेति प्राप्तशङ्कानिरासायाह **बुद्ध्या विविक्तस्येत्यादि** । शतपदेन समस्तस्य कालादित्यस्य कथं पृथक्करणमित्यत उक्तं **बुद्ध्या विविक्तस्येति** ॥ **रुद्रपदेति** । अनेनैव मूले रुद्रस्येत्यस्य रुद्रपदयोग्यस्येति व्याख्यानं कार्यमिति सूचितम् । **सन्न्यायरत्नावल्यामुक्तमिति** । पञ्चाशतां ब्रह्मणां कालात्पूर्वमिति मूलकारोक्तेः किञ्चिन्न्यूनेनेत्येतत्सन्न्यायरत्नावलीग्रन्थमूलकत्वस्य सिद्धत्वान्मूलभूतसन्न्यायरत्नावलीवाक्यमेव निर्णेयतयोपात्तम् । एतेन पञ्चाशतां ब्रह्मणां कालात्पूर्वमिति सामान्यमेवोक्तमित्येव वर्णनायानुवादः कार्य इति शङ्कानवकाशः । मूलभूततद्वाक्यार्थनिर्णये मूलभूतैद्ग्रन्थस्याप्यर्थकथनलाभाशयात् । अत एव तदर्थनिर्णयसाध्यं प्रकृतमूलार्थं ततश्चेति वक्ष्यतीति ज्ञेयम् । तथैव चत्वारिंशद्भिरिति भागवततात्पर्यपाठानुसारी पाठः । मूले कोशे तथैव सत्त्वात् । तथैकेत्येकपदं लेखकागतम् । **भागवतेति** । चतुर्थस्कन्धीयाध्यायगतेति शेषः । **तदर्थो व्याख्येय इति** । अत्रार्थशब्द आवर्तनीयः । तथा च तद्वाक्योक्तोऽर्थो यस्येति तदर्थः । तदर्थकतयेति यावत् । एवं सन्न्यायरत्नावलीवाक्यव्याख्याने सिद्धे तन्मूलकैतन्मूलग्रन्थस्यापि तदनुसारेण लब्धार्थं दर्शयति **ततश्चैकेति** । अनेनैव हिरण्यगर्भे कालो न्यूनतयोक्तोऽपरोक्षज्ञानार्थः प्रथमभागस्थः । रुद्रे तु पञ्चाशत्कालमध्ये न्यूनकायो भागश्चरम इति विशेषोऽप्युक्तो भवति । यद्यप्यत्र वाक्ये एकचत्वारिंशद्ब्रह्मकल्पैरित्येव वक्तव्यम् । पञ्चाशतां ब्रह्मणां कालात्पूर्वमित्यनेन भागवततात्पर्यमनुसृत्य तावत एवार्थस्य लाभात् । तथा हिरण्यगर्भादिसर्वज्ञानिसाधारणवाक्ये पूर्वपदान्तर्भावाय समाप्तिलक्षणां स्वीकृत्य योजनावदिहापि तदन्तभविन योजनायाः कर्तुं शक्यत्वात् मूलस्थपूर्वपदान्तभविनैव व्याख्यानं कार्यमिति ज्ञापयितुं समाप्तेः पूर्वमित्युक्तम् । फलतस्त्वेकचत्वारिंशत्कल्पैरित्येवार्थः । एतावांस्तु विशेषः । पूर्वत्र सर्वज्ञानिसाधारणार्थानुगताकाङ्क्षदर्शनं समाप्तिलक्षणादिकम् । इह तु हिरण्यगर्भांशे ब्रह्मशतकालसमाप्तेः पूर्वमिति यथास्थितकथनवदेकचत्वारिंशत्कल्पसमाप्तेः पूर्वमिति रुद्रेऽपि यथास्थितकथनरूपत्वमितीति न दोषः । ननु चत्वारिंशद्भिरित्युदाहृततात्पर्यवाक्ये 'शतजन्मभिः पुमान्विरिञ्चतामेती'त्यादौ विवेकेन चत्वारिंशद्भिरित्येव व्याख्यातव्यत्वेन शैवपदस्यैव चत्वारिंशत्तमपदतया चत्वारिंशद्ब्रह्मकल्पत्वमाप्तेः पूर्वमेवेत्येव तात्पर्यानुसारेणार्थस्य लब्धतया तथैव पर्यवसितार्थकथनीये कथमेकचत्वारिंशद्ब्रह्मेति पर्यवसितार्थकथनमित्यत आह **रुद्रस्य शेषत्वानन्तरमेवेति** । सत्यं तात्पर्यानुसारेण रुद्रपदं चत्वारिंशत्तमं पदमिति । तथापि रुद्रस्य शेषत्वानन्तरमेव मुक्तेः सद्भावेन शेषजन्ममेलनेनैकचत्वारिंशद्ब्रह्मकल्पसमाप्तेः पूर्वमित्यस्य पर्यवसितार्थत्वोपपत्तेः । तात्पर्ये शैवपदान्तभविन चत्वारिंशत्वमात्रोक्तावपि मुक्तिपूर्वकालीनशेषजन्ममेलनेनैकचत्वारिंशत्वकथने विरोधानापत्तेरिति भावः ।

**ननु पङ्क्तिविंशतीत्यादिशतमिति सूत्र इति** । पञ्चमाध्यायगतसूत्र इत्यर्थः । **निपातनादिति** । यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धमित्यादि काशिकायां द्वयोर्दशतोर्विन्भावः शतिप्रत्ययः । द्वौ दशतौ परिमाणमस्य विंशतिरिति प्रतिपादनात् द्वयोर्दशतोर्विनादेशो शतिप्रत्यये च विंशतिरिति निपातनादित्यर्थो ज्ञेयः । **प्रमाणबलादिति** । एतद्विंशत्वं रूपं प्रमाणबलादित्यर्थः । 'त्रयी नः श्रुतिगोचरे'त्याद्यर्षिप्रयोगाणां तत्र तत्र प्रमाणीकरणात् प्रमाणवाक्ये प्रयोगस्याप्यभिधानतुल्यत्वादिति भावः । अत एव 'विंशल्लक्षणत' इति ब्रह्माण्ड-

पुराणे प्रयोगः । एवमन्यत्रापि । **किञ्चिन्न्यूने तद्विंशतीति** । अत्रापि प्रमाणं शोध्यम् । किञ्चिन्न्यूनेत्यत्रोपष्टम्भकमाह **इन्द्रादीति** । इन्द्रादिपदप्राप्तानां प्रारब्धकर्मभोगस्योक्तकालत्वाभावात् तत्पदयोग्या एवात्र इन्द्रादिपदेनोच्यन्त इत्यप्यनेन सूचितम् । यद्यपि हिरण्यगर्भरुद्रविषयवाक्ययोः किञ्चिन्न्यूनेत्युक्तवदिन्द्रादिविषयवाक्ये तदुक्तिर्नास्ति । एवं कालतो ह्रासक्रमो भवतीत्येतत्तु रुद्रस्य शतब्रह्मकालात् ह्रस्वादिन्द्रस्य रुद्रकालादपि ह्रासः अर्कादीनामिन्द्रकालादपीत्येवं यथाश्रुतेन्द्रस्य विंशदेव स्यादिति प्रमाणोक्तार्थस्पष्टीकरणपरतया प्रतीयत इत्याभाति । तथापि रुद्रपदयोग्यस्याप्येवं किञ्चिन्न्यूनेति हिरण्यगर्भोक्तप्रकारस्यातिदेशेन पञ्चाशदित्यादियोजनां त्यक्त्वेन्द्रादिपदयोग्यानामप्येवमित्युक्तिसामर्थ्येन प्रमाणोक्तविंशदादौ किञ्चिन्न्यूनत्वांश एवातिदेश इति स्पष्टप्रतीतेः । अन्यथा कालतो ह्रासक्रम इत्येवोक्तिः स्यात् । एवपदं त्वनर्थकमेव स्यादित्येतत् । ततश्चेन्द्रादीति वाक्योक्तकालतो ह्रासः किञ्चिन्न्यूनतयैवोक्त इति सिद्ध्यतीति ज्ञेयम् । **ब्रह्मण इत्यादि षष्ठीति** । आदिपदेन रुद्रस्येन्द्रस्येत्यनयोर्ग्रहणम् । अयोग्यत्वप्रायपाठोऽप्यकिञ्चित्कर इत्यत उक्तं **योग्यत्वाच्चेति** ॥ **एकवचनं त्विति** । एतत्प्रागुक्तरीत्या व्याख्येयम् । **अनुवृत्तस्येति** । पञ्चाशद्ब्रह्मणस्तथेत्यत्रत्यब्रह्मशब्दस्येहानुवृत्तिः । **विभक्तीति** । प्रथमया विपरिणाम इत्यर्थः । अत्रापि किञ्चिन्न्यूनेति पूरणीयमिति प्रागुदाहृतसन्न्यायरत्नावलीवाक्यानुसारेण सिद्धमिति पृथङ् नोक्तम् । **दश ब्रह्माण इति** प्रथमान्तपाठाश्रयणेन व्युत्पादनं कृतम् । दशब्रह्मण इति षष्ठीपाठपक्षे तमप्युपपादयति **दश ब्रह्मण इति क्वचित्पाठ इति** । तत्रेति तत्पाठ इत्यर्थः । दशशब्दः अर्कादिके दशेति दशशब्द इत्यर्थः । **ब्रह्मण इतीति** । तत्रेत्यनुवर्तते । भाष्ये दशेत्यत्र ब्रह्मण इति पदमनुवर्तते । तच्च जात्यभिप्रायमिति योजनीयम् । न त्वेतत्पाठे स्वयमनुवृत्त्यंशप्रतिपादनमेतदिति न दोषः । अथवा ब्रह्मण इति यदुक्तं तदनुवर्तते । अनुवृत्तस्य ब्रह्मण इत्यस्य तत्र पाठे ब्रह्म इति कीर्तनमित्यर्थः । योजनेत्यतःपरं द्रष्टव्येति पाठ आसीत् । तदनन्तरं द्रष्टव्येत्येतद्विनाशितं वाक्यलाघवाय । तथाच योजनेत्यस्येत्यवगन्तव्यमित्युत्तरेण सम्बन्धोऽभिप्रेत इति ज्ञेयम् । अत्र टीकायामारब्धसङ्क्षयकाल इति । तदवच्छिन्न इत्यादीति च पाठः ॥ **पूर्ववदेवेति** । तदवच्छिन्नमेवेन्द्रस्येत्यत्रेवेहापि तदवच्छिन्नं यदुक्तं न तत्र ब्रह्मणां विंशतेर्ब्रह्मधर्मतया कालत्वानुपपत्तिरिति शङ्कापरिहारायेवेहापि ब्रह्मणां दशकस्य तद्धर्मतया कालत्वानुपपत्तिरिति शङ्कापरिहाराय आदिपदेन तत्रेवात्रापि किञ्चिन्न्यूनेति पूरणीयमिति सङ्गृह्णाति । यद्वा पूर्ववदित्यस्य दश ब्रह्मण इति च पाठादित्यर्थः । उपपादनं तु समानम् । **काल इत्यर्थ इति** । आरब्धकर्मक्षयकाल इत्यर्थः । पूर्वग्रन्थानुसारात् वैयर्थ्यादीत्यादिपदेन विरुद्धत्वपरिग्रहः । सहगन्तृज्ञानिनां बहुत्वेन ब्रह्मणैवेत्यवधारणेन तद्व्यावर्तनस्य सहगन्तृव्यक्त्यन्तरावेदकप्रमाणविरुद्धत्वादिति भाव इति मङ्गलम् ।

आनन्दाब्धिप्रजातत्रिदशतरुगुरुश्रीनिवासानुज-
श्रीविद्याधीशाख्यरत्नाद्भुतविदमृतगोः केशवाचार्यवर्यात् ।
रुग्मिण्यायां प्रजातस्य विबुधनरसिंहस्य गुर्वीय-
सौधव्याख्यापाठादिशोधात्मकविवृतिकृतावाद्यपादश्चतुर्थे ॥

*इति श्रीमत्सकलविद्वच्चक्रचूडामणिश्रीमद्गुरुराजवर्यविरचितश्रीमन्न्यायसुधाशेषवाक्यार्थचन्द्रिकायाः व्याख्यापाठादिशोधात्मकविवृतौ पाण्डुरङ्गिनरसिंहकृतायां वाक्यार्थरत्नमालायां चतुर्थाध्यायस्य प्रथम पादः ॥*

**॥ इति ब्रह्मादिदेवतानां प्रारब्धभोगकालनिरूपणम् ॥**

**॥ इति परकीयव्याख्याननिरासः ॥**

* * *

५५ **सु०—**

इति श्रीमत्पूर्णप्रमतिभगवत्पादसुकृते-
रनुव्याख्यानस्य प्रगुणजयतीर्थाख्ययतिना ।
कृतायां टीकायां विषमपदवाक्यार्थविवृतौ
चतुर्थेऽध्यायेऽस्मिन् प्रथमचरणः पर्यवसितः ॥

*इति श्रीमन्न्यायसुधायां चतुर्थाध्यायस्य प्रथमः पादः ॥*

★ ★ ★

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

# अथ चतुर्थाध्यायस्य द्वितीयः पादः

॥ अथ एतत्पादप्रतिपाद्यार्थनिरूपणम् ॥

१ **सु०—** द्वितीयपादप्रतिपाद्यप्रदर्शनपरं भाष्यं 'देवानां मोक्ष उत्क्रान्तिश्चास्मिन्पाद उच्यत' इति । तत्र देवानामित्येतद्यदि मोक्षोत्क्रान्तिभ्यां सम्बध्यते तदा देवेभ्योऽन्येषां सशरीराणामेव अवस्थानमिति प्राप्नोति । अन्यत्र वा तच्छरीरपरित्यागप्रकारश्चिन्तनीयः । अचिन्तने वा कारणं वाच्यम् । यदि च मोक्षेणैव सम्बध्यते तदा देवानां मोक्ष इतरेषामुत्क्रान्तिश्चेत्युक्तं भवति । मोक्षश्च प्रकरणवशाद्देहादिति गम्यते । तथा च प्रथमपादे कर्मनाशाख्यं फलमस्मिन्पादे उच्यत इति यथा सामान्येनोक्तं तथाऽत्राप्युत्क्रान्तिरस्मिन्पाद उच्यत इति वक्तव्यम् । किमनेन विभागे(नेत्य)न कृतं स्यादित्यत आह **देवानां चेति** ।

**अनु०—** देवानां च मनुष्याणामेतावत् सममेव हि ।
उत्क्रान्तिमार्गौ देवानां न प्रायेण भविष्यतः ॥

यदतीतपादे चिन्तितं कर्मनाशाख्यं फलमेतावत् **देवानां मनुष्याणां च सममेव** । कर्मनाशाभावे तत्फलानुवृत्तेरावश्यकत्वात् । मनुष्यशब्दो देवव्यतिरिक्तान् लक्षयति । तस्मात् सामान्येन पूर्वपादप्रतिपाद्यमुक्तम् । एतत्पादप्रतिपाद्या देहात् **उत्क्रान्तिः** तृतीयपादप्रतिपाद्योऽर्चिरादि**मार्गश्च देवानां न प्रायेण भविष्यतः** अतो विभागेनोक्तिर्युक्तेति । अनेन 'मार्गो गम्यं चास्मिन्पाद उच्यत' इत्येतद्भाष्यमपि देवव्यतिरिक्तानां मार्गः सर्वेषां गम्यं चेति व्याख्येयमिति सूचितं भवति । स्फुटं चैतद्वक्ष्यति । 'उत्क्रान्तिमार्गश्च विमुक्तगम्यमि'ति ।

**परि०—** 'स्वयं कृताऽपि तद्व्याख्ये'त्यादिस्वप्रतिज्ञानुसारेण भाष्यं स्पष्टीकरोतीत्याशयेन मूलमवतारयितुं स्पष्टीकृतौ काऽनुपपत्तिरित्यतो भाष्यमनूद्य तत्रानुपपत्तिं दर्शयति **द्वितीयेति** ॥

**अन्यत्र वेति** । पादान्तरे ॥ **प्रकरणेति** । देहत्यागोक्तिप्रकरणवशादित्यर्थः ॥ **देहादिति** । तथा च मोक्षोऽप्युत्क्रान्तिरूप एव प्राप्त इति भावः । ऋषिगन्धर्वादिग्रहणायाह **मनुष्यशब्द इति** ॥ **न प्रायेणेति** । प्रायपदव्यावर्त्यस्याग्रे 'जातानां मानुषे लोके' इत्यादिना मूल एव व्यक्तत्वादिहानुक्तिः ॥ **एतद्भाष्यमपीति** । उत्तरपादभाष्यमपीत्यर्थः ॥ **स्फुटं चैतदिति** । इति व्याख्येयमिति स्वोक्तं प्रमेयं उत्तरपादे 'ये शरीरादुत्क्रान्ताः मानुषाः तेषां भगवल्लोकागमनार्थो मार्गः ये कर्मणो देहाच्च विमुक्ताः तेषां सर्वेषामपि गम्यमिदमुभयमेतत्पादोदितमि'ति वक्ष्यतीत्यर्थः ।

**गु०दी०— अतो विभागेनोक्तिर्युक्तेति** वदता देवानां **मोक्षो न देहात्** । **येन** साऽप्युत्क्रान्तिः स्यात् । किन्तु देहनाश एव ।

**यादु०— देहादिति** ॥ **गम्यत इति** । तथा च मोक्षोऽप्युत्क्रान्तिरूप एवेति प्राप्तमिति भावः । ततः किमित्यत आह **तथा च प्रथमपाद इति** । प्रायेणेत्यस्य व्यावर्त्यं 'जातानां मानुषे लोक' इत्यत्राचार्यः स्वयमेव दर्शयिष्यति । 'उन्क्रान्तिमार्गश्च विमुक्तगम्यमि'त्यस्य ये शरीरादुत्क्रान्ता मानुषाः तेषां मार्गो भगवल्लोकगमनार्थः । ये कर्मणो देहाच्च विमुक्तास्तेषां सर्वेषामपि गम्यमित्यर्थः ।

**वं०प०— तथाऽत्राप्युत्क्रान्तिरिति** । तथा च देहान्मोक्षस्याप्युत्क्रान्तिरूपत्वेन सर्वसाधारण्यादिति भावः ॥ **विभागेनेति** । इतरेषामुत्क्रान्तिरिति विभागेनेत्यर्थः ।

**कं०रा०— तच्छरीरपरित्यागप्रकार इति** । देवेभ्योऽन्येषां शरीरपरित्यागप्रकार इत्यर्थः ॥ **अचिन्तन इति** । तच्छरीरपरित्यागप्रकारस्येति शेषः ॥ **मोक्षेणैव सम्बध्यत इति** । देवानामित्येतदनुवर्तते ॥ **प्रायेण भविष्यत इति** । प्रायेणेत्यस्य व्यावर्त्यमनुपदमाकर एव स्पष्टं भविष्यति ॥ **अनेनेति** । 'उत्क्रान्तिमार्गो देवानां न प्रायेण भविष्यत' इत्यत देवानामर्चिरादिमार्गाभावप्रतिपादनेनेत्यर्थः ॥ **स्फुटं चेति** । 'उत्क्रान्तिमार्गश्च विमुक्तगम्यं पादोदितममि'ति तृतीयपादोपक्रमे ये उत्क्रान्ता देवव्यतिरिक्ताः तेषां मार्गः सर्वेषां विमुक्तानां गम्यं च तृतीयपादोदितमिति मार्गस्य देवव्यतिरिक्तविषयत्वं गम्यस्य सर्वसाधारण्यं च आचार्यः स्फुटं वक्ष्यतीत्यर्थः । देवतदितरसाधारणस्य चरमदेहनाशस्यैकस्य द्वितीयपादप्रतिपाद्यत्वात् तस्यैकवाक्यत्वं युक्तमिति भावः । मार्गशब्देन प्राप्यं ब्रह्म च लक्ष्यत इत्यर्थः । तेन 'मार्गो गम्यं च अस्मिन्पाद उच्यत' इति भाष्यवाक्येन 'उत्क्रान्तिमार्गश्च विमुक्तगम्यं पादोदितमि'त्यागाम्यनुव्याख्यानवाक्येन च न विरोधः । न चैवमपि मार्गगम्ययोरुभयोस्तृतीयपादप्रतिपाद्यत्वेन एकार्थत्वाभावात् तस्य एकवाक्यत्वं न स्यादिति वाच्यम् । ब्रह्मप्राप्त्यर्थ मार्गस्यापि गम्यतया उभयोरपि गम्यत्वेन एकीकरणात् एकवाक्यत्वेनोपपत्तेः । एतेनेदं निरस्तम्— मार्गशब्देन ब्रह्मप्राप्तिश्च लक्ष्यत इति । चशब्देन अजहत्स्वार्थलक्षणोक्ता सा अनुपपन्ना 'काकेभ्यो दधि रक्ष्यतामि'त्यादौ शक्याशक्योपसङ्ग्राहकदध्युपघातकत्वादिरूपधर्मे सत्येवाजहत्स्वार्थलक्षणाया दृष्टत्वात् प्रकृते च मार्गशब्द-

शक्येऽर्चिरादावशक्यायां ब्रह्मप्राप्तौ चैकस्य धर्मस्य अभावादिति । 'मार्गो गम्यं चास्मिन्पाद उच्यत' इत्याचार्यवचनानुसारेण ब्रह्मप्राप्तिशब्देन गम्यस्य ब्रह्मण एव विवक्षितत्वात् तस्य च प्रधानगम्यत्वेन मार्गस्य अवान्तरगम्यत्वेन च वैलक्षण्यसत्त्वेऽप्युभयत्रापि गम्यत्वस्य सत्त्वेनाजहत्स्वार्थलक्षणोपपत्तेः । न च वाच्यं मार्गशब्देन ब्रह्मप्राप्तिश्चेत्यत्र चशब्देन पूर्ववाक्यस्थस्य लक्ष्यत इत्यस्य अनुकर्षणमेव सूच्यते न तु लक्षणायाः स्वार्थत्याग इत्येव परिहारः किं नोच्यत इति । चशब्दस्य तत्सूचकत्वाभावेऽपि जहत्स्वार्थलक्षणाङ्गीकारे मार्गस्य तृतीयपादप्रतिपाद्यत्वाभावापातेन अजहत्स्वार्थलक्षणाया अङ्गीकर्तव्यत्वात् तत्र च उपसङ्ग्राहकाभावशङ्कायां उक्तपरिहारस्य आश्रयणीयत्वात् । वस्तुतस्तु अर्चिरादिमार्गस्य गम्यब्रह्मणश्च ज्ञानासाध्यत्वेन अफलतया फलाध्यायान्तर्गततृतीयपादप्रतिपाद्यत्वायोगात् प्राप्तिविशिष्टत्वेन तयोः फलत्वे च आवश्यकतया तत्प्राप्त्योरेव फलत्वस्योचितत्वात् । 'मार्गो गम्यं च अस्मिन्पाद उच्यत' इत्यादिवाक्ये मार्गशब्देन तत्प्राप्तेर्गम्यशब्देन गम्यब्रह्मप्राप्तेश्च विवक्षणीयत्वावश्यम्भावात् । सन्न्यायरत्नावल्यां अर्चिरादिमार्गगमनस्य च ज्ञानसाध्यत्वेन मोक्षान्तर्भूतत्वादित्युक्तम् । तथा च ब्रह्मप्राप्तिश्चेति यथाश्रुतमेव सुधावाक्यं साधु । न चैवं मार्गशब्देन मार्गप्राप्तिब्रह्मप्राप्त्योरुभयोर्लक्षणायां लक्षणद्वयापत्तिः ब्रह्मप्राप्तिमात्रस्य लक्ष्यत्वे तु मार्गप्राप्तेरसङ्ग्रहापत्तिरिति वाच्यम् । अर्चिरादिमार्गसाध्यप्राप्तित्वाकारेणैकीकृतस्य प्राप्तिद्वयस्य लक्षत्वाङ्गीकारेणोक्तदोषानवकाशात् । समाने ह्यर्चिरादिमार्गकर्मकप्राप्तौ तत्साधनकब्रह्मप्राप्तौ च अर्चिरादिमार्गसाध्यत्वम्, अत एव तृतीयपादस्यैकवाक्यत्वं चोपपन्नमिति न किञ्चिदवद्यमिति ।

**शे०चं०**— यद्विद्याधीशगुरोः शुश्रूषाऽन्या न रोचते तस्मात् ।
अस्त्वेषा भक्तियुक्ता श्रीविद्याधीशपादयोः सेवा ॥

ननु देवानां च मनुष्याणामिति भाष्यमनर्थकम् । न च देवानां मोक्ष उत्क्रान्तिश्चास्मिन्पाद उच्यत इति विभागेन पादप्रतिपाद्योक्तिसमर्थनार्थत्वान्नानर्थक्यमिति वाच्यम् । तथा पादप्रतिपाद्योक्तिं विना तदलाभेन तत्समर्थनार्थत्वायोगात् कथञ्चिल्लाभेऽपि विभागेनोक्तौ बाधकाप्रतिभासेन तत्समर्थनानर्थक्याच्चेत्यतोऽत्रानुक्तावपि भाष्ये तथोक्त्या तल्लाभात् तत्रानुपपत्तिशङ्कामुत्थापयति **द्वितीयपाद इति** ॥ **अन्यत्रेति** । पादान्तर इत्यर्थः । अन्यथा अनियमाधिकरणविरोधादिति भावः ॥ **कारणं वाच्यमिति** । शास्त्रान्तरसिद्धत्वासम्भावनादिराहित्यरूपमित्यर्थः । अन्यथा अवश्यवक्तव्यानुक्तिप्रसङ्गादिति भावः ॥ **प्रकरणवशादिति** । कर्ममोक्षानन्तरभावितया वक्ष्यमाणमार्गादिरूपतत्प्राप्तिपूर्वभावितया च देहमोक्षस्यैवावशिष्टतया प्रकरणप्राप्तत्वादित्यर्थः । किमत आह **तथा चेति** ॥ **उत्क्रान्तिरस्मिन्पाद उच्यत इति वक्तव्यमिति** । चरमदेहनाशोऽत्र प्रतिपाद्यत इत्येव वक्तव्यम् । उत्क्रान्तिर्मोक्ष इति विभागेनोक्तिर्व्यर्थेति भावः ॥ **मनुष्यशब्द इति** । यद्यपि देवशब्दस्यैव लक्षकत्वमाश्रयितुं शक्यम् । प्रथमपठितदेवपदत्यागेन चरमश्रुतमनुष्यशब्दे तत्स्वीकारायोगात् । तथाऽपि एकप्रकरणपठितत्वादुत्तरवाक्यगतदेवशब्दस्यापि तथा सति तल्लक्षकत्वप्रसङ्गेन तन्निरासार्थं मनुष्यपदस्यैव लक्षणाश्रयणमिति भावः । ननु 'देवानां च मनुष्याणामेतावत् सममेव हि । उत्क्रान्तिमार्गो देवानां न प्रायेण भविष्यतः' इत्येतावतैव भाष्य-

खण्डेन देवानामित्यादिविभागेन पादप्रतिपाद्योक्तिसमर्थनसिद्धेरितरांशवैयर्थ्यमित्यतः तावतैतत्पादप्रतिपाद्यार्थविभागोक्तिपरभाष्यसमर्थनसिद्धावपि तृतीयपादप्रतिपाद्यार्थविभागोक्तिपरभाष्यसमर्थनासिद्धेः तत्समर्थनार्थत्वान्न तदंशस्यापि वैयर्थ्यमिति भावेन तदुदाहरणपूर्वकमनेन सूचितं तद्व्याख्यानप्रकारं दर्शयति **अनेनेति** । मार्ग इत्याद्यंशान्तरेणेत्यर्थः ।

**वा०र०— पादप्रतिपाद्योक्तीति** । भाष्यकारीयपादप्रतिपादनेत्यर्थः । **नानर्थक्यमिति** । विभक्तिपरिणामेन भाष्यस्येति वर्तते । **पादप्रतिपाद्योक्तिं विनेति** । भाष्यकारीयपादप्रतिपाद्याभिधायकवचनं विनेत्यर्थः । **तदलाभेनेति** । प्रतिपाद्याभिधानरूपोक्तिलाभाभावेनेत्यर्थः । **तत्समर्थनेनेति** । विभागेन पादप्रतिपाद्यप्रतिपादनसमर्थनेनेत्यर्थः । **अत्रानुक्तावपीति** । पादप्रतिपाद्यस्येति शेषः । पादप्रतिपाद्याभिधायकवचनस्याभावेऽपीति यावत् । **भाष्ये तथोक्त्येति** । पादप्रतिपाद्याभिधायकवचनसद्भावादित्यर्थः । **लाभादिति** । वचनोत्पाद्यविभागेन पादप्रतिपाद्याभिधानरूपोक्तिक्रियालाभादित्यर्थः । वस्तुतस्तूक्तिपदस्य सर्वत्र वचनपरतामेवाश्रित्य विभागोक्तिपरभाष्यसमर्थनेत्यादि वक्ष्यमाणानुसारेणोक्तिपदं तत्परभाष्यपरम् । उक्तिं विनेत्यत्रोक्तिनिर्माणं विनेति तथोक्तेत्यत्र चोक्तिनिर्माणेनेति विवक्षितमिति ज्ञेयम् । **अनियमाधिकरणेति** । 'अनियमः सर्वेषामविरोधादि'त्यधिकरणे सर्वोपसंहार इव ज्ञानिनां मुक्तावनियमो नास्ति । किन्तु 'न कश्चिद्ब्रह्मवित्स्मृतिमनुभवति मुक्तो ह्येव भवती'त्यादिश्रुत्यादिबलेन ज्ञानानन्तरं मुक्तिनियमप्रतिपादनेन शरीरपरित्यागाभावस्यैवाङ्गीकारे मुक्तत्वाभावापत्त्या तदधिकरणविरोधः स्यादित्यर्थः । **पूर्वभावितया चेति** चशब्दयुक्तः पाठः । तदभावे तावदर्थान्तभविनार्थो ज्ञेयः । उत्क्रान्तिशब्देनेत्युत्तरमूलानुसारेणाह **चरमदेहेति** । देवशब्दस्येत्यवधारणे हेतुमाह **प्रथमपठितेति** ॥ **उत्तरवाक्येति** । उत्क्रान्तिमार्गौ देवानामित्युत्तरेत्यर्थः । **मूले वक्ष्यतीति** । तृतीयपादस्यादावित्यर्थः ।

**स०व्र०— अन्यत्र चेति** । पदान्तरे पादान्तरे इत्यर्थः ।

**॥ इति एतत्पादप्रतिपाद्यार्थनिरूपणम् ॥**

* * *

**॥ अथ पादचतुष्टयस्य सङ्गतिनिरूपणम् ॥**

२ **सु०— भवत्विदं प्रतिपाद्यं एत(त्पादप्रति)त्प्रतिपादने का सङ्गतिरित्यतः प्रसङ्गात् पादचतुष्टयस्यापि सङ्गतिमाह कर्मेति ।**

**अनु०— कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोगश्चतुष्टयम् ।**
**फलं मोक्ष इति प्रो(क्तं)क्तः**
**क्रमात्पादेषु चोदि(तं)तः ॥**

**तथाशब्दः समुच्चये । उत्क्रान्तिशब्देन देवतदितरसाधारणश्चरमदेहनाशो लक्ष्यते, मार्गशब्देन ब्रह्मप्राप्तिश्च । इतिशब्दो भोग इत्यतः परो (परं) योज्यः । क्वचित्पाठः प्रोक्तमित्युदितमिति च । तत्र यथास्थान एव इतिशब्दः । आद्ये मोक्षानुवादेन फल-चतुष्टयात्मकत्वं विधेयम् । द्वितीये तु विपर्ययेण । क्रमादित्येतदावर्तनीयम् ।**

**ततश्चायमर्थः । फलं खल्वत्राध्याये निरूपणीयम् । फलं च मोक्षः । स च कर्म-क्षयादिचतुष्टयात्मकः । आत्यन्तिकानिष्टनिवृत्तीष्टप्राप्त्योरत्रैवान्तर्भावात् । कर्मक्षयादयश्च क्रमाद्भवन्ति । ज्ञानोदयानन्तरमेव हि कर्मक्षयः क्षीणकर्मणश्चोत्क्रान्तिः उत्क्रान्तस्य च स्वयोग्यमार्गेण गतस्य ब्रह्मप्राप्तिः ततो भोग इति । तस्मादेतेषु पादेषु क्रमादेवोदिता इत्यन्तर्भावलक्षणा च आनन्तर्यलक्षणा च सङ्गतिरिति ।**

**परि०**— समस्तपादप्रतिपाद्यलाभायाह **उत्क्रान्तिशब्देनेति** ॥ **मार्गशब्देनेति** । प्राप्तिश्चेति लक्ष्यत इत्यन्वेति ॥ **विपर्ययेणेति** । चतुष्टयफलानुवादेन मोक्षत्वं विधेयमित्यर्थः ॥ **आवर्त-नीयमिति** । 'कर्मक्षयादयः क्रमात् भवन्त्यतः । पादेषु क्रमादुदिता इत्यावर्तिता इत्यन्वय' इत्यग्रे व्यक्तम् ॥ **स्वयोग्यमार्गेणेति** । अर्चिरादिमार्गेणेत्यर्थः । उत्क्रान्तिपदोपलक्षितदेवानां च स्वोत्तम-देवप्रवेशमार्गेणेत्यर्थः । शेषगरुडमार्गेणेति वाऽर्थः ॥ **अन्तर्भावेति** । फलाध्याये चतुर्विधफलबोधक-पादानामन्तर्भावात् क्रमिकार्थबोधकानां पूर्वपूर्वपादानन्तर्याच्चेति भावः । **अयमर्थ** इत्यनेन **इति-**शब्दान्वयः ।

**गु०दी०**— **आद्ये मोक्षानुवादेने**त्यत्र मोक्ष इति चतुष्टयं फलं प्रोक्तः । अन्यथा प्रोक्त इति पुल्लिङ्गा-सम्भव इति भावः । **द्वितीये त्वि**त्यत्र इति चतुष्टयं फलं मोक्ष इति प्रोक्तमित्यर्थः । तत्रापि भोग इत्यतःपरं इतिशब्द आवर्तनीयः ।

**यादु०**— ननु द्वितीयपादप्रतिपाद्यतयाऽभिमतस्य देवानां मोक्षस्य अत्र अपरिग्रहान्न्यूनता । तत्परिग्रहे च अर्थभेदात् कथं द्वितीयपादैक्यमित्यत आह **उत्क्रान्तिशब्देनेति** । ननु तृतीयपादप्रतिपाद्यतयाऽभिमताया ब्रह्मप्राप्तेरत्र अपरिग्रहान्न्यूनता स्यादित्यत आह **मार्गशब्देनेति** ॥ **ब्रह्मप्राप्तिरिति** । देवतदितरसाधारणीति शेषः । तथा च तृतीयपादे सर्वसाधारणब्रह्मप्राप्तिरेव प्राधान्येन प्रतिपाद्यतया विवक्षिता । मार्गस्तु तादर्थ्येन केषाञ्चिदेव अतो न पादैक्यानुपपत्तिरिति भावः । यथास्थाने इतिशब्दो विवक्षित एवेत्यर्थः । तथा च अत्र भोग इत्यतः परोऽपि योज्य इति भावः ॥ **स्वयोग्यमार्गेणेति** । मनुष्याणामर्चिरादिरूपेण देवानां स्वस्रष्टृप्रवेश-रूपेणेत्यर्थः ॥ **अन्तर्भावलक्षणेत्यादि** । उक्तरीत्या फलभूतमोक्षविशेषरूपकर्मक्षयादिप्रतिपादकानां पादानां

फलाध्यायेनान्तर्भावलक्षणा सङ्गतिः पूर्वपूर्वपादार्थस्योत्तरोत्तरपादार्थं प्रत्युपजीव्यत्वाच्च स्वस्वपूर्वपूर्वपादावधिकानन्तर्यलक्षणा सङ्गतिरुत्तरोत्तरपादस्येत्यर्थः ।

**वं०प०— आद्य इति** ॥ प्रोक्त उदित इति पुलिङ्गान्तपाठ इत्यर्थः ॥ **मोक्षानुवादेनेति** । मोक्षः कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोग इति चतुष्टयं फलं तदात्मक इति यावत् । (प्रोक्तः) स च क्रमात्पादेषूदित इति योज्यमित्यर्थः ॥ **द्वितीये त्विति** । प्रोक्तमुदितमिति नपुंसकान्तपाठ इत्यर्थः ॥ **विपर्ययेणेति** । फलचतुष्टयानुवादेन मोक्षत्वं विधेयमित्यर्थः । ततश्च कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोग इति फलचतुष्टयं मोक्ष इति प्रोक्तं तच्च क्रमात्पादेषूदितमिति योज्यमिति भावः । नन्वनिष्टनिवृत्तीष्टप्राप्तिरूपफलस्यैवैतदध्यायप्रतिपाद्यत्वात् कर्मक्षयादीनां च अतथात्वात् कथं तेषामध्यायान्तर्भाव इत्यत आह **आत्यन्तिकेति** । कर्मक्षयोत्क्रान्त्योरनिष्टनिवृत्तिरूपत्वात् मार्गभोगयोरिष्टप्राप्तिरूपत्वाद्युक्तस्तेषां फलाध्यायान्तर्भाव इति भावः ।

**कं०रा०—** ननु 'चतुष्टयं फलं मोक्ष इति प्रोक्तमिति वक्तव्यमि'ति वक्तव्ये प्रोक्त इत्येतत्कथमित्यत आह **इतिशब्दो भोग इत्यतः परो योज्य इति** । तथा च अस्मिन्पक्षे मोक्षः कर्मक्षयः तथा उत्क्रान्तिः मार्गो भोग इति चतुष्टयं फलं प्रोक्तः एतत्फलचतुष्टयात्मकत्वेन प्रोक्तः । स च क्रमात्पादेषूदितश्चेति मोक्षानुवादेन कर्मक्षयादिचतुष्टयात्मकत्वस्य च वक्ष्यमाणरीत्या विधेयत्वात् प्रोक्त इत्यादिपुलिङ्गोपपत्तिरिति भावः ॥ **द्वितीये त्विति** । प्रोक्तमित्युदितमिति क्वाचित्कपाठानुसारेणेतिशब्दस्य यथास्थानत्वमिति पक्षे तु विपर्ययेण विधेयं कर्मक्षयादिचतुष्टयात्मकं फलं मोक्ष इति प्रोक्तं तच्च क्रमात्पादेषूदितमिति फलचतुष्टयानुवादेन मोक्षात्मकत्वं विधेयमित्यर्थः । उत्क्रान्तस्य च स्वयोग्यमार्गेणेति उत्क्रान्तिशब्देन देवतदितरसाधारणचरमदेहनाशस्य विवक्षिततयोत्क्रान्तशब्देन चरमदेहनाशवतो देवादिरूपाधिकारिसामान्यस्योक्तत्वात् तदनुसारेण स्वयोग्यमार्गेणेत्युक्तम् । 'स्रष्टृष्वेव च सृज्यानां प्रवेशो ब्रह्मणो लये । देवानां मार्ग उद्दिष्ट' इति देवानामर्चिरादिमार्गव्यतिरिक्तः स्वयोग्यमार्गो वक्ष्यत इति भावः ।

**शे०चं०— पादचतुष्टयस्यापीति** । एकीकृत्य पादचतुष्टयस्यापि सङ्गतिप्रतिपादने निमित्तं तु लाघवायेति पूर्वपादोक्तमवधेयम् । ननु उत्क्रान्तिवद्द्वितीयपादप्रतिपाद्यतयाऽभिमतस्य देवानां मोक्षस्यावश्यवक्तव्यस्यापरिग्रहान्न्यूनत्वं तत्परिग्रहे च अर्थद्वयप्रतिपादकतया अर्थैकत्वाभावान्नैकपादत्वम् । एवं मार्गवद्गम्यस्यापि तृतीयपादप्रतिपाद्यतया तदनुक्तेर्न्यूनत्वं तस्याप्यत्र परिग्रहे च अर्थैक्याभावान्नैकपादत्वमित्यत आह **उत्क्रान्तिशब्देनेति** ॥ **देवतदितरसाधारण इति** । नाशो लक्ष्यत इत्यनुवर्तते । इतिशब्दस्य यथाश्रुतसम्बन्धे फलचतुष्टयानुवादेन मोक्षत्वविधानापत्त्या फलचतुष्टयं मोक्ष इति प्रोक्तमिति नपुंसकस्य वक्तव्यतया प्रोक्त इति पुलिङ्गानुपपत्तेर्नेत्थं वचनव्यक्तिः । किन्तु मोक्षः फलचतुष्टयं प्रोक्त इति मोक्षानुवादेन फलचतुष्टयत्वविधानमेवेति न पुलिङ्गानुपपत्तिरित्याशयेनेतिशब्दस्य भिन्नक्रमतयाऽन्वयमाह **इतिशब्द इति** ॥ **यथास्थान एवेति** । यद्यप्यत्र भोग इत्यतःपरं इतिशब्दस्यावश्यकत्वान्न यथाश्रुतस्थान एवेतिशब्दो योजयितुं शक्यत इति तथोक्तिरयुक्ता तथापि यथा पूर्वत्र यथाश्रुतसम्बन्धपरित्यागेन भिन्नक्रमतयैव तत्सम्बन्धो न तथा अत्र, किन्तु यथाश्रुतसम्बन्धोऽप्यस्तीत्यभिप्रायेणैवमुक्तम् । तदर्थं च यत्रेतिशब्दः श्रूयते तत्रास्त्येवेति योज्यम् । इतिशब्दस्य भिन्नक्रमत्वं

यथाश्रुतान्वयाश्रयणेन सूचितं पाठभेदेनोद्दिश्य विधानभेदमुपदर्शयति **आद्य इति** । पुल्लिङ्गपाठ इत्यर्थः ॥ **द्वितीय इति** । नपुंसकपाठ इत्यर्थः ॥ **विपर्ययेणेति** । फलचतुष्टयानुवादेन मोक्षात्मत्वं विधेयमिति विपर्ययेणेत्यर्थः ॥ **आवर्तनीयमिति** । अन्यथा कर्मक्षयादीनां क्रमात्पादेषूदितत्वप्रयोजकीभूतायाः कर्मक्षयादीनां क्रमभाविताया अलाभेन क्रमात् पादेषूदितत्वानुपपत्तिप्रसङ्गादिति भावः ।

ननु च भाष्यकारीयं फलस्य मोक्षत्वकथनमनर्थकम् । न च तस्यैतदध्यायप्रतिपाद्यत्वसिद्ध्यर्थं तदिति वाच्यम् । फलस्यैतदध्यायार्थत्वासिद्ध्या तदानर्थक्यात् । तत्सिद्धावपि फलस्यान्यादृशस्यापि सम्भवान्न तस्य मोक्षतायां नियामकमस्ति । अस्तु वा फलस्य मोक्षत्वमपि । तथाऽपि न तच्चातुर्विध्यं भाष्यकृदुक्तं युक्तम् । आत्यन्तिकानिष्टनिवृत्तीष्टप्राप्त्योरपि पृथक् सत्त्वात् । अस्तु वा तच्चातुर्विध्यमपि । तथाऽपि न भाष्यकृदुक्तस्तत्क्रमो युज्यते । उक्तक्रमे नियामकाभावात् । भावेऽपि क्रमादुदितत्वे न नियामकं पश्यामः । अस्तु वा क्रमेणोदितत्वमपि । तथाऽपि सङ्गत्यनुक्तिस्तदवस्थैवेत्येताः शङ्काः क्रमेण परिहरति **ततश्चेति** ॥ **फलमिति** । जिज्ञास्यतया प्रथमसूत्रप्रतिज्ञातेष्वर्थेषु फलस्यैवावशिष्टत्वादिति भावः ॥ **फलं चेति** । धर्मार्थकामानामनित्यतया फलत्वानुपपत्तेर्मोक्षस्य च नित्यतया तदुपपत्तिरिति भावः ॥ **अन्तर्भावादिति** । ततश्च नोक्तचातुर्विध्यानुपपत्तिरिति भावः । क्रममेवोपदर्शयति **ज्ञानोदयानन्तरमेवेत्यादिना** ॥ **स्वयोग्यमार्गेणेति** । मनुष्याणामर्चिरादिरूपेण देवानां स्वस्रष्टृप्रवेशार्थं तदभिसर्पणरूपेणेत्यर्थः ॥ **अन्तर्भावलक्षणेति** । कर्मनाशादिफलचतुष्टयस्योक्त्या तत्प्रतिपादकानां चतुर्णां पादानां फलाध्याये अन्तर्भावलक्षणा सङ्गतिरुक्तेत्यर्थः । पूर्वपूर्वपादस्योत्तरोत्तरपादार्थं प्रत्युपजीव्यत्वात् उत्तरोत्तरपादानां पूर्वपूर्वपादेन सह आनन्तर्यलक्षणा सङ्गतिरपि क्रमादुदितत्वोक्त्या भवतीत्याह **आनन्तर्येति** ।

**वा०र०**— उत्क्रान्तिवद् द्वितीयपादप्रतिपाद्यतयेत्यस्य पूर्वत्रापि सम्बन्धः । **मोक्षस्येति** । मोक्षस्यापीत्यर्थः । **नैकपादत्वमिति** । इयं च देवतदितरसाधारणश्रमेत्युक्तिनिवार्या शङ्का । अन्यथा मोक्षो लभ्यत इत्येतावतैव न्यूनत्वशङ्कापरिहारसिद्धेः साधारणप्रकारान्तरकल्पनावैयर्थ्यापातात् । एवं ब्रह्मप्राप्तिमात्रस्योत्तरत्र लक्षणावचनव्यावर्त्यतया तृतीयपादविषयेऽप्येकार्थत्वानुपपत्तिशङ्का प्रवर्तिता । स्वयोग्यमार्गेणेत्याद्युत्तरमूलानुसारेण ब्रह्मप्राप्तिमात्रस्य साधारणत्वाद्वक्ष्यति च । ब्रह्मतदितरसाधारणीति शेष इतीति ज्ञेयम् । गम्यस्यापि तृतीयपादप्रतिपाद्यतयेति पाठः । **विधानापत्त्येति** । मोक्षः प्रोक्त इतीति शब्दबलात् तथाऽनुवादविधानप्रतीतेरिति भावः । **मोक्षः फलचतुष्टयं प्रोक्त इतीति** । यद्यपि फलचतुष्टयानुवादेन मोक्षत्वविधानपक्षे इति प्रोक्तमितीतिशब्दसम्बन्धापत्तिवन्मोक्षानुवादेन फलचतुष्टयविधानपक्षेऽपि मोक्षः फलचतुष्टयमिति प्रोक्त इतीतिशब्दसम्बन्धाश्रयणेन वचनव्यतिरेकाश्रयणीयेति तथैवानुवादः कर्तव्यः । फलचतुष्टयं प्रोक्त इति तदनुवादो नानुगुणः । तथापि मूले इतिशब्दस्य भोग इत्यतःपरं सम्बन्धयोजनाभिधानेन तदनुसारेणेतिशब्दस्य फलचतुष्टयमित्यतःपरं सत्त्वं स्वीकृत्य मोक्षः फलचतुष्टयं प्रोक्त इत्येवानुवादः ।

**इतिशब्दस्य भिन्नक्रमतयेति** । यद्यपीतिशब्दबलेन मोक्षत्वविधानप्राप्त्या पुल्लिङ्गानुपपत्तिशङ्कायां तत्परिहारायेतिशब्दस्य फलचतुष्टयमित्यनेन सम्बन्धाश्रयणे फलचतुष्टयत्वविधानस्यैव प्राप्त्या मोक्षः'फलचतुष्टय-

मिति प्रोक्त इत्यनुवादविधानपक्षे पुलिङ्गानुपपत्तिशङ्काप्रसङ्गाभावेनेतिशब्दः फलमित्यतः परो योज्य इत्येव मूलकृता वक्तुमुचितम् । तथापीदमितिशब्दस्य भिन्नक्रमत्वाश्रयणेन योजनं न पुलिङ्गानुपपत्तिमात्रपरिहाराय मूलकृता कृतम् । अपि तु मोक्षो भोगश्चतुष्टयं फलं मोक्ष इत्युक्ते कर्मभोगादीनां प्रत्येकं चतुष्टयफलत्वप्रतीतिः स्यात् । कर्मक्षयोत्क्रान्तिमार्गभोगातिरिक्तं फलचतुष्टयमिति वा प्रतीतिः स्यात् । सा नाश्रयितुं युक्ता । ततश्च उक्तविधकर्मनाशादेर्मोक्षत्वविधानमपि न युक्तं स्यादित्याशङ्कापरिहारायेतिशब्दस्य भोग इत्यतःपरं योजनाश्रयणान्न प्रत्येकं कर्मनाशादेः फलचतुष्टयत्वादिप्रतीतिप्रसङ्गस्तत्प्रतीतिमूलकमोक्षत्वविधानानुपपत्तिप्रसङ्गश्च नास्ति । यथैवमर्थान्तरप्रतीतिनिरासायेतिशब्दस्य भिन्नक्रमत्वमाश्रितं तदा पुलिङ्गानुपपत्तिपरिहारोऽपि सिद्ध इत्याश्रयेणैव तेन तदाश्रयणं कृतम् । तथा च पुलिङ्गानुपपत्तिपरिहारायानुषङ्गिकतया तन्मात्रस्य फलचतुष्टयमित्यत्रेतिशब्दसम्बन्धाश्रयणेन असिद्धिसम्भवेऽपि कर्मनाशादेः प्रत्येकं फलचतुष्टयात्मकत्वानुपपत्तिपरिहारासिद्ध्या 'मोक्षः फलचतुष्टयं प्रोक्त' इत्येतावन्मात्रोक्तावपि विवक्षितार्थसिद्धिसम्भवे चोक्तानुपपत्तिद्वयपरिहारकभोगपदोत्तरेतिशब्दसम्बन्धाश्रयणेनैव योजनं युक्तम् । एतदेव मनसि निधाय टीकाकार उत्तरपक्षे यथास्थाने इतिशब्दसम्बन्धानुपपत्तिमाशङ्क्योभयत्रापि सम्बन्धाश्रयणतया योजनां करिष्यति । अत एव च द्वितीययोजनायामपि फलचतुष्टयं मोक्षः प्रोक्तमित्येवमनुवादविधानव्यत्यासमात्रेणापि विवक्षितार्थसिद्धिसम्भवेऽप्यत्र पक्षे पूर्वत्रेवेतिशब्दस्य न भिन्नक्रमत्वमात्राश्रयणम् । अपि तु यथास्थितसम्बन्धोऽप्यभिमतः । मोक्ष इत्यत्रापीतिशब्दसम्बन्धेऽर्थस्पष्टीकरणाभावात् । तत्सम्बन्धाश्रयणेन फलं मोक्ष इति प्रोक्त इति फलचतुष्टयानुवादादिसिद्धचैव पुलिङ्गानुपपत्तिपरिहारोऽपि लब्ध इति मूलाभिप्रेतमित्याशयेन टीकाकृतानुषङ्गिकं फलं विवक्षित्वैव पुलिङ्गानुपपत्तिपरिहारवर्णनं कृतमिति ज्ञायते । अन्यथा मोक्षानुवादपक्ष इव फलचतुष्टयानुवादपक्षेऽपीतिशब्दस्यानावश्यकतया यथास्थान इतिशब्दसम्बन्धाश्रयणवैयर्थ्यप्रसङ्गः । टीकाकृताऽपि यत्र श्रूयते तत्राप्यस्त्येवेति योजनाभिधानायोगप्रसङ्गश्चेत्यादि सुधीभिराकलनीयम् । एतन्मूलटीकयोः फलचतुष्टयेत्यनुवादस्तु फलं चतुष्टयमिति फलपुरस्कारे वा फलभूतं यच्चतुष्टयमिति कर्मनाशादिपुरस्कारे वा न कश्चन विशेष इति भावेनेति न दोषः । **भिन्नक्रमत्वं यथाश्रुतेति** । भिन्नक्रमत्वस्य यथाश्रुतान्वयस्य वाऽऽश्रयणेनेत्यर्थः । **अन्यादृशस्यापीति** । मोक्षातिरिक्तस्यापीत्यर्थः । **नोक्तचातुर्विध्येति** । आत्यन्तिकानिष्टनिवृत्तेस्तृतीयपादार्थभूतभगवत्प्राप्त्युत्तरभाविलिङ्गशरीरभङ्गस्वगुणाच्छादकप्रकृतिध्वंसरूपायास्तृतीयपादार्थे इष्टप्राप्तेश्च सङ्कल्पसाध्यदिव्यभोगभोजनरूपायाश्चतुर्थपादेऽन्तर्भावान्नोक्तचातुर्विध्यभङ्ग इत्यर्थः । भवेदयं पादार्थ इत्याद्युत्तरग्रन्थे त्वत एव वाक्यं निर्वृतनिष्ठा इत्यत एव स्वरूपेण लीलागृहीतेति च । अत एव इतिपदस्थलद्वयस्य योजना कार्येति मूलाभिप्रेतमित्यनेन सूचितं भवति ।

**सं०व्र०—** ननूत्क्रान्तेरनेकप्रकारत्वेन तत्प्रतिपादकस्यास्य पादस्यैकार्थप्रतिपादकत्वाभावादैक्यं न स्यादित्यत आह **उत्क्रान्तिशब्देनेति** ॥ **अन्तर्भावलक्षणेत्यादि** । कर्मक्षयादिचतुष्टयस्य फलत्वोक्त्या अन्तर्भावलक्षणा क्रमादुदितत्वोक्त्या चानन्तर्यलक्षणा च सङ्गतिरुक्ता भवतीत्यर्थः ।

**॥ इति पादचतुष्टयस्य सङ्गतिनिरूपणम् ॥**

॥ अथ देवतामुक्तिक्रमनिरूपणम् ॥

३ सु०— देवानां मार्गो नास्तीत्युक्तम् । तत्किं यत्र स्थितास्तत्रैव मुक्ता भवन्तीत्यत आह **स्रष्टृष्वेवेति** ।

अनु०— स्रष्टृष्वेव च सृज्यानां प्रवेशो ब्रह्मणो लये ।
देवानां मार्ग उद्दिष्टो

क्वचिदस्रष्टृष्वपीति चशब्दः, तथा च न्यायविवरणे । ब्रह्मणो लये प्रत्यासन्ने सति प्रवेशार्थं तदभिसर्पणमेव मार्गगमनमित्यर्थः । तर्हि देवानां मार्गो नास्तीत्युक्तस्य को विषय इत्यत आह **नेति** ।

नार्चिरादिः

देवानां देहादुत्क्रमो नास्तीत्युक्तम् । तत्कुतः । सदेहानामेवावस्थानप्रसक्तेरित्यत आह **न चेति** ।

न चोत्क्रमः ।

अत एवेत्युपस्कर्तव्यम् । चशब्देन सदेहानामवस्थानं समुच्चिनोति ।

एतदेव विवृणोति **स्रष्टु(स्त्विति)रिति** ।

स्रष्टुस्तु ग्रासभूतस्य देहस्तत्र लयं व्रजेत् ।
यतः सृज्यस्य देवस्य नैवोत्क्रान्तिस्ततो भवेत् ॥

**देहः** चेतनाधिष्ठित एव । **तत्र** स्रष्टरि । **उत्क्रान्तिः** शरीरात् । चेतननिष्क्रमणात्प्रागेव सृज्यानां देहः स्रष्टृषु विलीयत **यत** इत्यर्थः । स्रष्टृषु लये निमित्तं स्रष्टुर्ग्रासभूतस्य इति । देहस्त्विति सम्बन्धः ।

**परि०— न्यायविवरण इति** । 'भूतेषु तच्छ्रुतेरि'ति सूत्रन्यायविवरणे तत्तद्भूतोद्भवत्वात् तत्तद्देवानामित्युक्त्वा तत्समानानां च विशेषवचनाभावे स्वसमानलयस्थान एव लयोपपत्तेरित्युक्ते-रस्रष्टृष्वपि प्रवेशोऽभिमत इति भावः, यथाऽश्विप्रभृतीनां वरुणाद्यजातत्वेऽपि स्वसमानाऽबादि-देवतालयस्थाने वरुणादौ लय इति ध्येयम् । उक्तं हि भाष्ये । 'वरुणेऽश्विनावग्नावग्नयः तथा ऋभवः पृथिव्यां वरुणः आपोऽग्नय' इत्यादि । ननु ब्रह्मलयात् पूर्वमेव देवानां लयात् कथं स्रष्टृषु प्रवेशोक्तिः ब्रह्मणो लय इत्युच्यत इत्यत आह **प्रत्यासन्न इति** । ननु कथं प्रवेशो मार्ग उद्दिष्ट इत्यत आह **प्रवेशार्थमित्यादि** ॥ **अत एवेतीति** । स्रष्टृषु देहलयादेवेत्यर्थः । जीवे उत्क्रान्ते देहमात्रस्य तत्र लय इति भ्रमनिरासायाह **चेतनाधिष्ठित एवेति** । **तत्रे**त्यनुवादः, **स्रष्टरीति** व्याख्या । **तत** इत्यस्य **उपपत्तये यत** इत्यस्य अन्वयमाह **चेतनेत्यादि** ॥ **इति सम्बन्ध इति** । तेन चेतनाधिष्ठितत्व-रूपविशेषलाभ इति भावः ।

**गु०दी०— चेतननिष्क्रमणात् प्रागेवेति** वदता सर्पस्य मण्डूकदेह इवेति सूचयति ।

**यादु०— तथा च न्यायविवरण इति** । 'तत्समानानां च विशेषवचनाभावे स्वसमानदेवतालयस्थान एव लयोपपत्तिरिति न्यायविवरणेऽस्रष्टृष्वपि प्रवेशोऽभिहित इत्यर्थः । यथाऽश्विप्रभृतीनां वरुणाद्यनुत्पन्नत्वेऽपि स्वसमानाबादिदेवतालयस्थान एव वरुणादौ लय इति भावः । ननु ब्रह्मणो लये देवानामपि लयात् कथमेतदित्यत आह **प्रत्यासन्न इति** ॥ **मार्गो नास्तीत्युक्तमिति** । मार्गाभावे तत्र गमनं नास्तीत्यप्युक्तप्रायमिति भावः । ननु मूले मार्गगमनस्यानुक्तत्वात् कथमुक्तशङ्कापरिहार इत्यत आह **प्रवेशार्थमिति** । तथा च मूले प्रवेशशब्देन तदर्थकमभिसर्पणं, मार्गशब्देन च तद्गमनं लक्षणीयमिति भावः ॥ **अत एवेति** । स्रष्टृप्रवेशेन लयादेवेत्यर्थः ॥ **चेतनाधिष्ठित एवेति** । तत्र चेतनस्योत्क्रमणप्राप्तिरिति भावः । एतच्च विशेषार्थकतुशब्देन लब्धमिति ज्ञात-व्यम् । अत एव **देहस्त्विति सम्बन्ध** इति वक्ष्यति । ग्रासभूतस्येत्यनेन यो यद्ग्रासभूतः स तस्मिन् लीयत इति व्याप्तेर्ग्रासत्वं निमित्तमुक्तमिति ज्ञातव्यम् ।

**कं०रा०— क्वचिदस्रष्टृष्वपीति चशब्द इति** । वरुणाद्यनुत्पन्नानामश्विप्रभृतीनामस्रष्टृषु वरुणादिषु लयोऽस्तीत्यभिप्रायेण 'स्रष्टृष्वेव चे'ति चशब्दः प्रयुक्त इत्यर्थः ॥ **तथा च न्यायविवरण इति** । 'तत्समानानां च विशेषलयाभावे स्वसमानस्थान एव लयोपपत्तेरि'ति न्यायविवरणवाक्यम् । ततश्च तद्व्यावर्तनीयाशङ्कापूर्वकं तत्त्वप्रकाशिकायां 'न चाश्विप्रभृतीनां वरुणाद्यनुत्पन्नत्वान्न तत्र लयोपपत्तिरिति वाच्यम् । तेषां तदुत्पन्नत्वाभावे विशेषवचनाभावे च स्वसमानाबादिदेवतालयस्थाने वरुणादौ लयोपपत्तेरित्युक्तः । तदनुत्पन्नत्वे स्वसमानदेवता-लयस्थानत्वेन तत्र देवानां लयश्चेत् सौपर्ण्यादीनां स्वसमानवारुण्यादिलयस्थाने शेषादौ लयः स्यादित्याशङ्का-निरासाय न्यायविवरणवाक्ये विशेषवचनाभाव इत्युक्तम् ॥ **प्रवेशार्थमिति** । स्रष्टृप्रवेशार्थं तदभिसर्पणमेव

मार्गगमनमित्यर्थः । न चोपक्रम इत्यत्र हेतुर्नोक्त इत्यत आह **अत एवेत्युपस्कर्तव्यमिति** । **अत एव** इत्यस्य सृज्यानां स्रष्टृषु प्रवेशादेवेत्यर्थः ।

**शे०चं०— मार्गो नास्तीत्युक्तमिति** । मार्गाभावे च तत्र गमनमपि नास्तीत्युक्तप्रायमिति भावः । ननु तत्तत्सृज्यानां तत्तत्स्रष्टृष्वेव प्रवेश इति तु नियमो न युक्तः । तथा सत्यश्विप्रभृतीनां वरुणादौ लयाभावप्रसङ्गादित्यतोऽत्र चशब्देनास्रष्टृष्वपि लयप्रतिपादनेनोक्तनियमासिद्धेर्नानुपपत्तिरित्याशयेन चशब्दार्थमाह **क्वचिदिति** । तथा सति नियामकाभावादतिप्रसङ्ग इत्याशङ्क्याह **तथा चेति** । 'तत्समानानां च विशेषवचनाभावे स्वसमानलयस्थान एव लयोपपत्तेरि'ति अस्रष्टृष्वपि लयोऽभिहित इत्यर्थः । *न्यायविवरणे* वरुणाद्युत्पन्नाबादिदेवतासमानानां वरुणाद्यनुत्पन्नानामश्विप्रभृतीनां स्वसमानादिदेवतालयस्थाने वरुणे युक्त्या लयसमर्थनान्नातिप्रसङ्ग इति भावः । ननु ब्रह्मणो लयात्पूर्वमेव देवतानामपि लयावश्यम्भावात् कथं प्रवेशोक्तिः तदेत्यत आह **प्रत्यासन्न इति** । ननु मूले मार्गगमनस्यानुक्तत्वात् कथमनेनैवोक्तशङ्कापरिहार इत्यतोऽत्र प्रवेशशब्दस्य लक्षणया तदर्थाभिसर्पणपरत्वेन प्रवेशमात्रपरत्वाभावात् तस्यैव च मार्गगमनत्वसम्भवादुक्तशङ्कापरिहारकत्वमस्येत्याह **प्रवेशार्थमिति** । **तर्हीति** । तदभिसर्पणस्य मार्गगमनत्व इत्यर्थः । असति मार्गे तद्गमनानुपपत्त्या तत एव मार्गस्य सिद्धेरिति भावः ॥ **अत एवेति** । सृज्यदेहानां स्रष्टृप्रवेशेन लयादेवेत्यर्थः ॥ **चशब्देनेति** । अनेन अत एवोत्क्रमः चशब्दात् सदेहानामवस्थानं च नेति चशब्दो भिन्नक्रमतया योजितो भवति ॥ **एतदेवेति** । अत एवेत्युक्तमेवेत्यर्थः । मूले स्रष्टुस्त्विति तुशब्दो विशेषार्थ इति भावेन तं दर्शयति **चेतनाधिष्ठित एवेति** । अन्यथा तत्रत्यचेतनस्योत्क्रान्तिप्रसङ्गेन तन्निषेधानुपपत्तेरिति भावः । अनेनात एवेत्येतत् कथं विवृतं भवतीत्यतः तं प्रकारमाह **चेतनेति** । मूले स्रष्टुस्तु ग्रासभूतस्येत्यस्यानर्थक्यमाशङ्क्य सृज्यदेहस्य स्रष्टृषु लये किं निमित्तमित्याशङ्कानिरासाय तन्निमित्तोपदर्शनार्थत्वान्न तदिति भावेन तत्परतया तद्योजयति **स्रष्टृष्विति** । अनेन तत्र ग्रासत्वं तत्र लये निमित्तम् । यो यद्ग्रासः स तत्र लीयत इति व्याप्तेरित्युक्तं भवति ।

**वा०र०— विशेषार्थ इतीति** । अनेन न चेतनाधिष्ठितत्वं विशेष इत्युक्तं भवति ।

**स०व्र०—** ननु यदि तत्तदुत्पन्नानां तत्तत्स्रष्टृषु लयः । तर्हि वरुणाद्यनुत्पन्नाश्विप्रभृतीनां वरुणादौ लयो न स्यादित्यत आह **क्वचिदस्रष्टृष्वपीति चशब्द इति** । तत्र नियामकमाह **तथाचोक्तं न्यायविवरण इति** । 'तत्समानानां च विशेषवचनाभावे स्वसमानलयस्थान एव लयोपपत्तेरि'ति न्यायविवरणे उक्तमित्यर्थः । न्यायविवरणस्य चायमर्थः । वरुणाद्युत्पन्नाबादिदेवतासमानानां वरुणाद्यनुत्पन्नानामश्विप्रभृतीनां स्वसमानाबादिदेवतालयस्थाने वरुणादावेव लयोपपत्तेरिति ॥ **एतदेवेति** । अत एवेत्येतदेवेत्यर्थः ।

**॥ इति देवतामुक्तिक्रमनिरूपणम् ॥**

* * *

**॥ अथ देवतामुक्तेः पूर्वमेव अर्चिरादिमार्गाणां विनाशात् देवानां मार्गाभावः ॥**

४ **सु०**— देवनामर्चिरादिमार्गो नास्तीस्त्युक्तं तत्कुत इत्यतो यत्पुरा मार्गान्तरमुक्तं तत एवैतत्सिद्धमित्याशयवान् तदनुवादेन युक्त्यन्तरमाह **लयाच्चेति** ।

**अनु०**— लयाच्चैवार्चिरादीनां लोकानामपि सर्वशः ।
कथं मार्गो भवेत् तेषां विशतामुत्तरं स्वतः ।

देवतामुक्तेः प्रागेवेत्यर्थः । अर्चिरादीनां लोकानामिति व्यधिकरणे षष्ठ्यौ । **सर्वेषामपि भवेत्** अर्चिरादिरिति शेषः । **स्वत(कं) उत्तरं** विशतामित्युक्तानुवादः ।

**परि०**— **मार्गान्तरमिति** । स्रष्टरि प्रवेशार्थं तदभिसर्पणरूपमित्यर्थः । **सर्वश** इत्यस्यापि पदान्वयेनार्थः **सर्वेषामपीति** । भवेदित्यनुवादेन तत्र शेषमाह **अर्चिरादिरिति शेष इति** । अपौनरुक्त्यायाह **इत्युक्तानुवाद इति** ।

**गु०दी०**— **व्यधिकरणे षष्ठ्यौ** इति वदता अर्चिरादीनां ये लोकास्तेषामित्यर्थ उक्तो भवति ।

**यादु०**— **मार्गान्तरमिति** । स्रष्टृप्रवेशरूपमित्यर्थः ॥ **तत एवैतत्सिद्धमिति** । 'विशतामुत्तरं स्वत' इत्यनुवादेन देवतामुक्तेः प्रागेवेत्यस्य सूचितत्वादिति भावः ।

**वं०प०**— अर्चिरादीनां लोकानामिति सामानाधिकरण्यभ्रमं निवारयति **व्यधिकरण इति** । अर्चिरादीनां लयाल्लोकानां महरादीनां च सप्तानां लयादित्यर्थः । अर्चिरादयः अन्तरिक्षलोकान्तर्गता एवेत्याशयः । सर्वश इत्यस्यार्थः **सर्वेषामिति** ।

**कं०रा०**— 'लयाच्चैवार्चिरादीनां लोकानामि'त्यत्र षष्ठ्या सामानाधिकरण्यं प्रतीयते । तच्चानुपपन्नम् । 'अग्निर्ज्योतिरिति द्विधैवार्चिषः सम्प्रतिष्ठितः । अग्निं गत्वा ज्योतिरेति प्रथमं ब्रह्म स व्रजन्', 'एकस्मिंस्तु पुरे संस्थो द्विरूपोऽग्नेः सुतो महानि'त्यादिवचनेन अर्चिरादीनां देवत्वावगमादित्यत आह **अर्चिरादीनां लोकानामिति व्यधिकरणे षष्ठ्याविति** । तथा च अर्चिरादीनां ये लोकाः तेषां सर्वेषामपि देवतामुक्तेः प्रागेव लयादित्यर्थ इति भावः । देवानामपि कश्चिन्मार्गोऽङ्गीकृत एव । अतः 'कथं मार्गो भवेत्तेषामि'ति मार्गसामान्यनिषेधो न युक्त इत्यत आह **अर्चिरादिरिति शेष इति** ॥ **स्वत इति** । स्वस्मादुत्तमं देवं विशतामिति मार्गोत्तररूपपूर्वोक्तयुक्त्यनुवाद इत्यर्थः ।

**शे०चं०— मार्गान्तरमिति** । स्रष्टृप्रवेशरूपमित्यर्थः । अर्चिरादयो ये लोकास्तेषामिति समानाधिकरणा षष्ठीति भ्रमनिरासायाह **अर्चिरादीनामिति** । लोकानामपीत्यपिशब्दस्य वैयर्थ्यादिप्रसङ्गेन यथाश्रुतसम्बन्धानुपपत्तेर्भिन्नक्रमतया तं योजयति **सर्वेषामपीति** । स्रष्टृप्रवेशरूपमार्गसद्भावात् कथमित्याक्षेपानुपपत्तिमाशङ्क्य न तदाक्षेपोऽत्राभिमतः किं नाम अर्चिरादिरूपस्यैवेति नानुपपत्तिरिति भावेन अपेक्षितं शेषमाह **अर्चिरादिरिति शेष इति** ।

**स०व्र०— मार्गान्तरमिति** । सृज्यानां स्रष्टृषु प्रवेशरूपम् ॥

**॥ इति देवतामुक्तेः पूर्वमेव अर्चिरादिमार्गाणां विनाशात् देवानां मार्गाभावः ॥**

* * *

**॥ अथ मानुषलोके जातानां देवानां कदाचिदुत्क्रान्तिसत्त्वेऽपि तदा मोक्षः नाङ्गीकृतः ॥**

५ **सु०— ननु प्रायेणेत्युक्तत्वात् कदाचिद्देवानामुत्क्रान्तिमार्गावङ्गीकार्यौ । तत्रोक्तयुक्तिविरोध इत्यत आह जातानामिति ।**

**अनु०— जातानां मानुषे लोके देवानां तु कदाचन ।**
**उत्क्रान्तिमार्गौ भवतो न तदा मुक्तिरिष्यते ॥**

**यद्यपि भवतस्तथाऽपि न तदा मुक्तिरिष्यते किन्तु ब्रह्मणा सहैव । अतो नोक्तयुक्तिविरोधः । एतदुक्तं भवति । उत्क्रान्तिमार्गसामान्यमपेक्ष्यैव प्रायेणेत्युक्तम् । न तु मुक्तिकालीनौ उत्क्रान्तिमार्गौ । तस्य च व्यावर्त्यावमोक्षकालीनौ । युक्तिस्तु मुक्तिविषयेति न विरोध इति ।**

**परि०— इत्युक्तत्वादिति** । आद्यश्लोके उक्तत्वादित्यर्थः ॥ **उक्तयुक्तीति** । 'स्रष्टृष्वि'ति श्लोके 'लयाच्चैवे'ति श्लोके चोक्तयुक्तीत्यर्थः । ननु 'न तदा मुक्तिरि'त्यनेन न चोद्यपरिहारः । प्रायःपदव्यावर्त्यसत्त्वे प्रागुक्तयुक्तिविरोधः, तदसत्त्वे तत्पदवैयर्थ्यमित्यतः कालभेदेन समाधिमाह **एतदुक्तमिति** ॥ **सामान्यमिति** । मोक्षामोक्षकालीनत्वविशेषमनादाय मोक्षामोक्षकालीनसाधारण्यमपेक्ष्येत्यर्थः ।

**यादु०—** ननु मोक्षकालीनोत्क्रान्तिमार्गौ कदाचिद्देवानां विद्येते न वा । आद्ये उक्तयुक्तिविरोधः । द्वितीये प्राय इत्यस्य वैयर्थ्यमित्यत आह **एतदुक्तं भवतीत्यादि** ।

**वं०प०—** **उक्तयुक्तीति** । 'लयाच्चैवार्चिरादीनामि'त्युक्तयुक्तीत्यर्थः ॥ **प्रायेणेत्युक्तमित्यादि** । उत्क्रान्तिमार्गौ देवानां न भविष्यत इत्येतत्प्रायः कदाचिदुत्क्रान्तिमार्गौ भवत इति सामान्यमेव नेत्यस्य व्यावर्त्यं न तु मोक्षकालीनोत्क्रान्तिमार्गौ व्यावर्त्यकथनपरप्रायःशब्दार्थौ । देवानां मोक्षसमये उत्क्रान्तिमार्गौ न भवतः कदाचिन्मोक्षसमयेऽप्युत्क्रान्तिमार्गौ भवत इति व्यावर्त्यकथनपरप्रायःशब्दार्थो न भवतीत्यर्थः ॥ **तस्य चेति** । देवानामुत्क्रान्तिमार्गौ न भविष्यत इत्यस्य व्यावृत्तिकथनपरप्रायःशब्दार्थभूतौ न भविष्यत इत्यस्य व्यावर्त्यमित्यर्थः । तथा च देवानां मोक्षसमये उत्क्रान्तिमार्गौ न भविष्यत इत्येतत्प्रायः कोऽर्थः । कदाचिदमोक्षसमयेस्त इति ।

**कं०रा०—** **प्रायेणेत्युक्तत्वादिति** । 'उत्क्रान्तिमार्गौ देवानां न प्रायेण भविष्यत' इत्यत्र प्रायेणेत्युक्तत्वात् कदाचिद्देवानामुत्क्रान्तिमार्गावङ्गीकार्यौ, तदङ्गीकारे च देवानामुत्क्रान्तिमार्गयोरभावे या प्रागुक्ता युक्तिस्तद्विरोध इत्यत आहेत्यर्थः ॥ **न तु मुक्तिकालीनाविति** । न तु मुक्तिकालीनावुत्क्रान्तिमार्गावपेक्ष्य प्रायेणेत्युक्तमित्यन्वयः ॥ **तस्य चेति** । प्रायेणेत्यस्य च अमुक्तिकालीनावुत्क्रान्तिमार्गौ व्यावृत्तावित्यर्थः । देवानामुत्क्रान्तिमार्गाभावे या प्रागुक्ता युक्तिः सा तु मुक्तिकालीनोत्क्रान्तिमार्गाभावविषया न तूत्क्रान्तिमार्गसामान्यभावविषया अतो मानुषे लोके जातानां उत्क्रान्तिमार्गाङ्गीकारे युक्तिविरोधो नेति भावः ।

**शे०चं०—** ननु मुक्तिकालीनावुत्क्रान्तिमार्गौ कदाचिद्देवानां विद्येते न वा । आद्ये उक्तयुक्तिविरोधः । द्वितीये प्रायेणेत्यस्य वैयर्थ्यमित्यत आह **एतदुक्तं भवतीति** ।

**स०व्र०—** **उक्तयुक्तीति** । 'लयाच्चैवार्चिरादीनामि'त्युक्तयुक्तिविरोध इत्यर्थः । ननु प्रायेणेत्यस्य किं प्रयोजनमित्यतः 'उत्क्रान्तिमार्गौ देवानां न भविष्यत' इत्युक्तेर्मोक्षकालीनावुक्रान्तिमार्गौ प्रायेण न भविष्यतः कदाचित्तु भविष्यत इत्यर्थो लभ्यत इति भावेनाह **तस्य चेति** । प्रायेणेत्यस्यार्थः ।

**॥ इति मानुषलोके जातानां देवानां कदाचिदुत्क्रान्तिसत्त्वेऽपि तदा मोक्षः नाङ्गीकृतः ॥**

* * *

**॥ अथ देवानां इतरेषाञ्च मोक्षक्रमः ॥**

६ **सु०—** किं देवानामेव ब्रह्मणा सह मुक्तिः । अन्येषामपीति ब्रूमः । तर्हि 'भेजे खगेन्द्रध्वजपादमूलमि'त्यादिविरोध इत्यत आह **अन्येषामपीति** ।

**अनु०—** अन्येषामपि साक्षात्तु मुक्तिः प्राप्यापि तं हरिम् ।
सहैव ब्रह्मणा भूयादिति शास्त्रस्य निर्णयः ॥

**साक्षान्मुक्तिः** लिङ्गशरीरभङ्गलक्षणा । **प्राप्यावस्थितानामपीति योज्यम्** । **तमिति** वैकुण्ठादिस्थलम् । **'छन्दस्युभयथे'**ति अनाशीर्विषयस्यापि लिङ आर्धधातुकत्वाद्भूयादिति साधु । इतीश्वराशीरिति वा । **अस्मिन्पक्षे साध्यमादौ पृथग्वाच्यं तस्य निमित्तं ज्ञापकं च अनेनोच्यत इति** ।

**परि०— भेज इति** । प्रथमस्कन्धे सप्तदशोऽध्याये 'स वै महाभागवतः परीक्षिद्येनापवर्गाख्यमदभ्रबुद्धिः । ज्ञानेन वैयासकिशब्दितेने'ति पूर्वशेषः । समानकर्तृकक्रियापूर्वकालीनत्ववाचित्त्वाऽऽदेशल्यपो निर्वाहाय क्रियान्तरमाह **प्राप्यावस्थितानामपीति योज्यमिति** ।। **वैकुण्ठादिस्थमिति** । अमुक्तस्थानगतमिति भावः । ननु 'भूसत्तायामि'त्यतः आशिषि लिङ्लोटावित्याशीरर्थे लिङि लिङाशिषीति तस्यार्धधातुकसंज्ञायां तिबादेशशपोऽप्राप्तौ 'यासुट्परस्मैपदेषूदात्तो ङिच्चे'ति तिपो यासुडागमे गुणाभावे 'इतश्चे'ति तिप इकारलोपे 'स्कोःसंयोगाद्योरि'ति सकारलोपे भूयादिति रूपं भवति । न चेहाशीर्विषयत्वमस्ति येन लिङ आर्धधातुकतया शपोऽप्राप्तौ भूयादिति रूपं साधु स्यात्, किन्तु भवेदिति भाव्यमित्यत आह **छन्दसीति** । यद्यपि तृतीयाध्यायस्य चतुर्थपादे 'तिङ्शित्सार्वधातुकम्', आर्धधातुकं शेषः, लिट् च, लिङाशिषि, 'छन्दस्युभयथे'ति छन्दोविषये आशीर्लिङ् सार्वधातुकमार्धधातुकं चेत्युभयथा भवतीत्येव प्रस्तावात् प्राप्तं न त्वनाशीर्विषयविषयं आर्धधातुकमित्यपि तथाऽपि सर्वप्रकरणमपेक्ष्यैतदुच्यते । 'व्यत्ययो बहुलमि'त्यस्यैव अयं प्रपञ्च इति वृत्तावुक्तत्वादेतदपि तत्राभिप्रेतमिति भावः ।। **साध्यमादाविति** । साक्षान्मुक्तिर्लिङ्गभङ्गरूपा मुक्तिर्ब्रह्मणा सहैव भवेदिति साध्यं श्लोकस्यादौ वाच्यमित्यर्थः । कुतो हेतोरित्यतः यतः साक्षान्मुक्तिर्ब्रह्मणा सहैव भूयादितीश्वरस्याशीः आशासनमस्ति अतः कारणादिति निमित्तम् । कुतो ज्ञायत इत्यत इति शास्त्रनिर्णय इति ज्ञापकं चानेन श्लोकेनोच्यत इत्यर्थः । शास्त्रेण क्रियमाणो निर्णयः **शास्त्रनिर्णय** इति तस्यार्थो ध्येयः ।

**गु०दी०—** विधौ भवेदिति प्रयोगः सार्वधातुकः । भूयादिति प्रयोगस्त्वार्धधातुकः । आशिषि तु सोऽपि सार्वधातुक एवेति वैयाकरणानां प्रक्रिया । अतः **आर्धधातुकत्वात् भूया**दिति साधुरित्युक्तम् । **तस्मिन् पक्षे साध्यमादौ इत्यत्र** तं हरिं प्राप्यावस्थितानामपि मुक्तिः ब्रह्मणा सहैव भवति । यतस्तथा भूयादिति आशीरिति योजना ।

**यादु०— प्राप्यावस्थितानामिति** । अन्यथा त्त्वादेशल्यबनुपपत्तिरिति भावः ।। ननु भवतेर्लिङि तस्य तिपि 'लिङाशिषी'त्याशीर्विषयस्य लिङ आर्धधातुकत्वेन शबाद्यप्राप्तौ 'यासुट् परस्मैपदेषूदात्तो ङिच्चे'त्यनेन

यामुटि 'इतश्चे'तीकारलोपे 'स्कोः संयोगाद्योरन्ते चे'ति सकारलोपे भूयादिति रूपं भवति । अनाशीर्विषयत्वे तु आर्धधातुकत्वाभावाच्छबादिप्राप्त्या गुणावादेशादेरपि प्रसङ्गेन भवेदित्येवं रूपं स्यादित्यत आह **छन्दस्युभयथेति** । यद्यपीदं छन्दसि विषये उभयथा भवति सार्वधातुकमार्धधातुकं चेत्येव व्याख्यातं न त्वनाशीर्विषयस्याप्यार्धधातुकत्वमिति । तथाऽपि सर्वमपि प्रकरणमपेक्ष्यैतदुच्यत इति 'व्यत्ययो बहुलमि'त्यस्यैवायं प्रपञ्च इति च काशिकायामुक्तत्वादिदमप्यत्राभिप्रेतमिति भावः ॥ **साध्यमिति** । अन्येषां साक्षान्मुक्तिर्ब्रह्मणा सहैव भवतीति साध्यं पृथग्वाच्यं बहिरेवाध्याहार्यमित्यर्थः ॥ **तस्य निमित्तमित्यादि** । तस्य साध्यस्य किं कारकं किं वा ज्ञापकमिति जिज्ञासायां भूयादित्यनेनेश्वराशीर्लक्षणं कारकं, शास्त्रस्य निर्णय इत्यनेन ज्ञापकं चोच्यत इत्यर्थः ।

**वं०प०**— 'हरिं प्राप्य मुक्तिर्भूयादि'त्यत्र प्राप्तिभवनयोः पुरुषमुक्तिकर्तृकत्वेन समानकर्तृकत्वाभावात् क्त्वादेशभूतल्यबनुपपत्तिरित्यत आह **प्राप्यावस्थितानामिति** । तथा च प्राप्त्यवस्थानयोः पुरुषकर्तृकत्वान्न दोष इति भावः । भू इत्यस्मात् तिपि इप् इत्यस्य लोपे यासुडागमे सुट् इत्यस्य लोपे भूयादिति रूपम् । सार्वधातुकत्वे भवेदिति रूपं तस्य स्यादिति द्रष्टव्यम् ।

**कं०रा०**— 'अन्येषामपि साक्षात्तु मुक्तिं प्राप्यापि तं हरिम् । सहैव ब्रह्मणा भूयादि'त्यत्र भूयादिति क्रियाया मुक्तिकर्तृकत्वात्प्राप्येत्युक्तप्राप्तिक्रियायाश्च अधिकारिचेतनकर्तृकत्वात् क्रियाद्वयस्य समानकर्तृकत्वाभावेन 'समानकर्तृकयोः पूर्वकाले क्त्वे'तिविहितक्त्वादेशस्य प्राप्येति ल्यपोऽनुपपत्तिरित्यत आह **प्राप्यावस्थितानामिति योज्यमिति** । हरिं प्राप्यावस्थितानामपीति योजनायां प्राप्त्यवस्थानक्रिययोः समानकर्तृकत्वात् ल्यप उपपत्तिरिति भावः । ननु 'लिङाशिषी'त्याशीर्विषयलिङ एवार्धधातुकसंज्ञा विहिता न त्वनाशीर्विषयलिङः । तस्य तु 'तिङ्शित्सार्वधातुकमि'ति सार्वधातुकसंज्ञैव प्राप्नोति । तथा च प्रकृते लिङोऽनाशीर्विषयत्वेन सार्वधातुकसंज्ञायां शबादिके सति भवेदित्येव रूपं साधु, न तु भूयादित्येतद्रूपमित्यत आह **छन्दसीति** । 'छन्दस्युभयथे'ति सूत्रेण अनाशीर्विषयस्य लिङ आर्धधातुकत्वाच्छबाद्यभावे भूयादिति रूपं साध्विति भावः । यद्यपि 'छन्दस्युभयथे'त्यत्र काशिकायां छन्दसि विषये उभयथा सार्वधातुकमार्धधातुकं च भवतीत्युक्त्वा किं लिङि चानन्तरः सम्बध्यत इति जिज्ञासायां नैतदस्ति सर्वमेव प्रकरणमपेक्ष्य एतदुच्यते । तिङ्शिदादिः सर्व एव छन्दस्युभयथा भवतीति सर्वस्य तिङादेश्छन्दसि सार्वधातुकत्वमार्धधातुकत्वं चोक्त्वा 'उपस्थेयाम शरणं न वृक्षमि'त्यत्र सार्वधातुकत्वाल्लिङः सलोपः आर्धधातुकत्वादेत्वमिति कार्यद्वयं प्रदर्शितम् । तथाऽपीहार्धधातुककार्यस्यैव दर्शनेनार्धधातुकत्वादित्येवोक्तमिति ध्येयम् ॥ **इतीश्वराशीरिति वेति** । सहैव ब्रह्मणा भूयादितीश्वराशीरिति योजनायां भूयादित्यस्याशीरर्थत्वान्न कोऽपि दोष इति भावः ॥ **अस्मिन्पक्ष इति** । इतीश्वराशीरिति योजनापक्षेऽन्येषामपि ब्रह्मणा सहैव मुक्तिर्भवतीति साध्यमादौ पृथग्वक्तव्यम् । तस्य च साध्यस्य निमित्तं ज्ञापकं च 'अन्येषामपि साक्षात्तु मुक्तिः प्राप्यापि तं हरिम् । सहैव ब्रह्मणा भूयादिति शास्त्रस्य निर्णय' इत्यनेनोच्यते ।

**साक्षान्मुक्तिः** लिङ्गशरीरभङ्गलक्षणा । **प्राप्यावस्थितानामपीति योज्यम्** । **तमिति** वैकुण्ठादिस्थलम् । 'छन्दस्युभयथे'ति अनाशीर्विषयस्यापि लिङ आर्धधातुकत्वाद्भूयादिति साधु । इतीश्वराशीरिति वा । अस्मिन्पक्षे साध्यमादौ पृथग्वाच्यं तस्य निमित्तं ज्ञापकं च अनेनोच्यत इति ।

**परि०— भेज इति** । प्रथमस्कन्धे सप्तदशोऽध्याये 'स वै महाभागवतः परीक्षिद्येनापवर्गाख्यमदभ्रबुद्धिः । ज्ञानेन वैयासकिशब्दितेने'ति पूर्वशेषः । समानकर्तृकक्रियापूर्वकालीनत्ववाचित्त्वाऽऽदेशल्यपो निर्वाहाय क्रियान्तरमाह **प्राप्यावस्थितानामपीति योज्यमिति** ॥ **वैकुण्ठादिस्थमिति** । अमुक्तस्थानगतमिति भावः । ननु 'भूसत्तायामि'त्यतः आशिषि लिङ्लोटावित्याशीरर्थे लिङि लिङाशिषीति तस्यार्धधातुकसंज्ञायां तिबादेशशपोऽप्राप्तौ 'यासुट्परस्मैपदेषूदात्तो ङिच्चे'ति तिपो यासुडागमे गुणाभावे 'इतश्चे'ति तिप इकारलोपे 'स्कोःसंयोगाद्योरि'ति सकारलोपे भूयादिति रूपं भवति । न चेहाशीर्विषयत्वमस्ति येन लिङ आर्धधातुकतया शपोऽप्राप्तौ भूयादिति रूपं साधु स्यात्, किन्तु भवेदिति भाव्यमित्यत आह **छन्दसीति** । यद्यपि तृतीयाध्यायस्य चतुर्थपादे 'तिङ्शित्सार्वधातुकम्', आर्धधातुकं शेषः, लिट् च, लिङाशिषि, 'छन्दस्युभयथे'ति छन्दोविषये आशीर्लिङ् सार्वधातुकमार्धधातुकं चेत्युभयथा भवतीत्येव प्रस्तावात् प्राप्तं न त्वनाशीर्विषयविषयं आर्धधातुकमित्यपि तथाऽपि सर्वप्रकरणमपेक्ष्यैतदुच्यते । 'व्यत्ययो बहुलमि'त्यस्यैव अयं प्रपञ्च इति वृत्तावुक्तत्वादेतदपि तत्राभिप्रेतमिति भावः ॥ **साध्यमादाविति** । साक्षान्मुक्तिर्लिङ्गभङ्गरूपा मुक्तिर्ब्रह्मणा सहैव भवेदिति साध्यं श्लोकस्यादौ वाच्यमित्यर्थः । कुतो हेतोरित्यतः यतः साक्षान्मुक्तिर्ब्रह्मणा सहैव भूयादितीश्वरस्याशीः आशासनमस्ति अतः कारणादिति निमित्तम् । कुतो ज्ञायत इत्यत इति शास्त्रनिर्णय इति ज्ञापकं चानेन श्लोकेनोच्यत इत्यर्थः । शास्त्रेण क्रियमाणो निर्णयः **शास्त्रनिर्णय** इति तस्यार्थो ध्येयः ।

**गु०दी०—** विधौ भवेदिति प्रयोगः सार्वधातुकः । भूयादिति प्रयोगस्त्वार्धधातुकः । आशिषि तु सोऽपि सार्वधातुक एवेति वैयाकरणानां प्रक्रिया । अतः **आर्धधातुकत्वात् भूयादिति** साधुरित्युक्तम् । **तस्मिन् पक्षे साध्यमादौ इत्यत्र** तं हरिं प्राप्यावस्थितानामपि मुक्तिः ब्रह्मणा सहैव भवति । यतस्तथा भूयादिति आशीरिति योजना ।

**यादु०— प्राप्यावस्थितानामिति** । अन्यथा त्त्वादेशल्यबनुपपत्तिरिति भावः ॥ ननु भवतेर्लिङि तस्य तिपि 'लिङाशिषी'त्याशीर्विषयस्य लिङ आर्धधातुकत्वेन शबाद्यप्राप्तौ 'यासुट् परस्मैपदेषूदात्तो ङिच्चे'त्यनेन

यासुटि 'इतश्चे'तीकारलोपे 'स्कोः संयोगाद्योरन्ते चे'ति सकारलोपे भूयादिति रूपं भवति । अनाशीर्विषयत्वे तु आर्धधातुकत्वाभावाच्छबादिप्राप्त्या गुणावादेशादेरपि प्रसङ्गेन भवेदित्येवं रूपं स्यादित्यत आह **छन्दस्युभयथेति** । यद्यपीदं छन्दसि विषये उभयथा भवति सार्वधातुकमार्धधातुकं चेत्येव व्याख्यातं न त्वनाशीर्विषयस्याप्यार्धधातुकत्वमिति । तथाऽपि सर्वमपि प्रकरणमपेक्ष्यैतदुच्यत इति 'व्यत्ययो बहुलमि'त्यस्यैवायं प्रपञ्च इति च काशिकायामुक्तत्वादिदमप्यत्राभिप्रेतमिति भावः ॥ **साध्यमिति** । अन्येषां साक्षान्मुक्तिर्ब्रह्मणा सहैव भवतीति साध्यं पृथग्वाच्यं बहिरेवाध्याहार्यमित्यर्थः ॥ **तस्य निमित्तमित्यादि** । तस्य साध्यस्य किं कारकं किं वा ज्ञापकमिति जिज्ञासायां भूयादित्यनेनेश्वराशीर्लक्षणं कारकं, शास्त्रस्य निर्णय इत्यनेन ज्ञापकं चोच्यत इत्यर्थः ।

**वं०प०**— 'हरिं प्राप्य मुक्तिर्भूयादि'त्यत्र प्राप्तिभवनयोः पुरुषमुक्तिकर्तृकत्वेन समानकर्तृकत्वाभावात् क्त्वादेशभूतल्यबनुपपत्तिरित्यत आह **प्राप्यावस्थितानामिति** । तथा च प्राप्त्यवस्थानयोः पुरुषकर्तृकत्वान्न दोष इति भावः । भू इत्यस्मात् तिपि इप् इत्यस्य लोपे यासुडागमे सुट् इत्यस्य लोपे भूयादिति रूपम् । सार्वधातुकत्वे भवेदिति रूपं तस्य स्यादिति द्रष्टव्यम् ।

**कं०रा०**— 'अन्येषामपि साक्षात्तु मुक्तिं प्राप्यापि तं हरिम् । सहैव ब्रह्मणा भूयादि'त्यत्र भूयादिति क्रियाया मुक्तिकर्तृकत्वात्प्राप्येत्युक्तप्राप्तिक्रियायाश्च अधिकारिचेतनकर्तृकत्वात् क्रियाद्वयस्य समानकर्तृकत्वाभावेन 'समानकर्तृकयोः पूर्वकाले क्त्वे'तिविहितक्त्वादेशस्य प्राप्येति ल्यपोऽनुपपत्तिरित्यत आह **प्राप्यावस्थितानामिति योज्यमिति** । हरिं प्राप्यावस्थितानामपीति योजनायां प्राप्त्यवस्थानक्रिययोः समानकर्तृकत्वात् ल्यप उपपत्तिरिति भावः । ननु 'लिङाशिषी'त्याशीर्विषयलिङ एवार्धधातुकसंज्ञा विहिता न त्वनाशीर्विषयलिङः । तस्य तु 'तिङ्शित्सार्वधातुकमि'ति सार्वधातुकसंज्ञैव प्राप्नोति । तथा च प्रकृते लिङोऽनाशीर्विषयत्वेन सार्वधातुकसंज्ञायां शबादिके सति भवेदित्येव रूपं साधु, न तु भूयादित्येतद्रूपमित्यत आह **छन्दसीति** । 'छन्दस्युभयथे'ति सूत्रेण अनाशीर्विषयस्य लिङ आर्धधातुकत्वाच्छबाद्यभावे भूयादिति रूपं साध्विति भावः । यद्यपि 'छन्दस्युभयथे'त्यत्र काशिकायां छन्दसि विषये उभयथा सार्वधातुकमार्धधातुकं च भवतीत्युक्त्वा किं लिङि चानन्तरः सम्बध्यत इति जिज्ञासायां नैतदस्ति सर्वमेव प्रकरणमपेक्ष्य एतदुच्यते । तिङ्शिदादिः सर्व एव छन्दस्युभयथा भवतीति सर्वस्य तिङादेश्छन्दसि सार्वधातुकत्वमार्धधातुकत्वं चोक्त्वा 'उपस्थेयाम शरणं न वृक्षमि'त्यत्र सार्वधातुकत्वाल्लिङः सलोपः आर्धधातुकत्वादेत्वमिति कार्यद्वयं प्रदर्शितम् । तथाऽपीहार्धधातुककार्यस्यैव दर्शनेनार्धधातुकत्वादित्येवोक्तमिति ध्येयम् ॥ **इतीश्वराशीरिति वेति** । सहैव ब्रह्मणा भूयादितीश्वराशीरिति योजनायां भूयादित्यस्याशीरर्थत्वान्न कोऽपि दोष इति भावः ॥ **अस्मिन्पक्ष इति** । इतीश्वराशीरिति योजनापक्षेऽन्येषामपि ब्रह्मणा सहैव मुक्तिर्भवतीति साध्यमादौ पृथग्वक्तव्यम् । तस्य च साध्यस्य निमित्तं ज्ञापकं च 'अन्येषामपि साक्षात्तु मुक्तिः प्राप्यापि तं हरिम् । सहैव ब्रह्मणा भूयादिति शास्त्रस्य निर्णय' इत्यनेनोच्यते ।

'सहैव ब्रह्मणा भूयादि'तीश्वराशीरित्यनेन ईश्वरेच्छारूपनिमित्तस्योक्तेः 'इति शास्त्रस्य निर्णय' इत्यनेन शास्त्ररूपज्ञापकोक्तेश्चेति भावः ।

**शे०चं०**— ननु समानकर्तृकयोः पूर्वकाल इति समानकर्तृकत्व एव क्त्वाप्रत्ययविधानात् प्रकृते च हरिप्राप्तिं प्रति पुरुषाणां, भवनक्रियां प्रति च मुक्तेः कर्तृत्वात् क्रियाद्वयस्य समानकर्तृकत्वाभावेन क्त्वाप्रत्ययस्याप्रसक्त्या कथं तदादेशः प्राप्येति ल्यप् स्यादित्यतोऽवस्थितिरूपक्रियान्तराध्याहारस्याभिप्रेतत्वेन प्राप्त्यवस्थितिरूपक्रियाद्वयस्यैव कर्तृत्वेन क्त्वाप्रत्ययप्रसक्त्या न तदादेशस्य ल्यपोऽनुपपत्तिरित्याशयेन क्रियान्तरमध्याहरति **प्राप्यावस्थितानामपीति** । ननु भवतेर्लिङि तस्य लिङाशिषीत्याशीर्विषय एव लिङ आर्धधातुकसंज्ञाविधानेन प्रकृते च अनाशीर्विषयतया आर्धधातुकसंज्ञाया अप्रसङ्गेन तिङ्शित्सार्वधातुकमिति सार्वधातुकसंज्ञायां कर्तरि शबिति कर्त्रर्थकसार्वधातुकनिमित्तकशपि सार्वधातुकार्धधातुकयोरिति गुणे अवादेशे च सति, यासुट् परस्मैपदेषूदात्तो ङिच्चेति लिङ्निमित्तयासुटि सुट्तिथोरिति तकारनिमित्ते सुटि च सार्वधातुकलिङः लिङः सलोपोऽनन्त्यस्येति सकारद्वयस्यापि लोपे इतश्चेति तिप इकारलोपेन तकारमात्रावशेषे अतो येय इति या इत्यस्य ईयादेशे लोपो व्योर्वलीति यलोपे आद्गुण इति गुणे च सति भवेदिति भवितव्ये भूयादिति कथमित्यतश्छन्दस्युभयथेत्यनाशीर्विषयस्यापि लिङ आर्धधातुकसंज्ञोपपत्त्या सार्वधातुकसंज्ञाया अप्रसङ्गेन तन्निमित्तकशपोऽप्राप्त्या यासुट् परस्मैपदेष्विति यासुटि लिङो ङित्वे च तस्मिन्परतः क्ङिति चेति निषेधेन सार्वधातुकार्धधातुकयोरिति गुणाप्राप्त्या स्कोः संयोगाद्योरिति सलोपे इकारलोपे च सति भूयादित्यस्याप्युपपन्नत्वात् न दोष इत्याशयेनाह **छन्दस्युभयथेति** । यद्यपि छन्दसि विषये सार्वधातुकासार्वधातुकं चेत्युभयथापि भवतीत्येतावत्सूत्राल्लभ्यते न त्वनाशीर्विषयस्यापि आर्धधातुकत्वमिति नैतद्बलेन तत्सिद्धिः । तथाऽप्येतत्सूत्रव्याख्यानावसरे सर्वमपि प्रकरणमपेक्ष्यैव तदुच्यते व्यत्ययो बहुलमित्यस्यैवायं प्रपञ्च इति वृत्तिकृतोक्तत्वात् । एतत्सिद्ध्यभिप्रायेणास्यात्रोपन्यास इत्यवधेयम् । अस्मिन्पक्षे छान्दसत्वमाश्रयणीयं भवतीत्यपरितोषात् पक्षान्तरमाह **इतीश्वराशीरिति वेति** । नन्वेवं साध्यानुक्तिप्रसङ्गेन तत्किमित्याकाङ्क्षाऽनुपरमेण साकाङ्क्षत्वाद्वाक्याभासत्वं स्यादित्यत आह **अस्मिन्पक्ष इति** । ईश्वराशीरिति पक्ष इत्यर्थः । सर्वेषामपि ब्रह्मणा सहैव मुक्तिर्भवतीति साध्यं पृथगेव श्लोकाद्बहिरेव वाच्यमित्यर्थः ॥ **तस्येति** । तस्य साध्यस्य, किं कारणमिति जिज्ञासायामीश्वराशीर्लक्षणं तद्भूयादित्यनेन, किं ज्ञापकमित्याकाङ्क्षायां शास्त्रलक्षणं ज्ञापकं च शास्त्रस्य निर्णय इत्यनेनोच्यत इत्यर्थः ।

**वा०र०**— धातुकयोरिति गुण इति पाठः । लिङो ङित्वे चेति लिङो ङित्वेनेति मूलकोशे पाठः । पाठद्वयेऽपि लिङः सार्वधातुकमपिदिति सूत्रेणैव ङित्वे पित आर्धधातुकस्य च तेन ङित्वाप्राप्तेर्यासुट् परस्मैपदेष्वित्येतत्सूत्रगतङिच्चेत्यनेन ङित्वप्राप्तिरित्यर्थः । यासुट्सूत्रे हि यासुटो आगमतया गुणकार्यस्य च प्रत्ययनिमित्तत्वेन परभूते प्रत्यय एव ङित्वविधानसार्थक्याल्लिङादेशपरस्मैपदेष्वेवाङित्वविधानं न यासुटीति निर्णीतं प्रमेयं मनसि निधायेदमुक्तम् । अन्यथा यासुटो ङित्वे चेत्येव ब्रूयादिति ज्ञेयम् । लिङ इत्यस्य यासुडुपलक्षित-

लिङ इत्यर्थः । 'किदाशिषी'ति सूत्रेणाशिषि लिङः कित्वप्राप्तेः कित्वादेव गुणनिषेध इति तु नाश्रितम् । 'किदाशिषी'त्यत्र किद्विधानस्य जागर्तेर्ङित्वे गुणनिषेधेन गुणोपपत्त्यर्थं गुणादिप्रतिषेधरूपकार्यस्य तदुत्तरङितः कित्वसम्पादनार्थत्वेऽपि जजागरतुरित्यादौ 'वचिस्वपियजादीनां किती'त्यनेन कित्वप्रयुक्तसम्प्रसारेणार्थत्वेऽपि चान्यत्र गुणादिप्रतिषेधरूपकार्यस्य ङित्वाश्रयणेनैव सिद्ध्या तदर्थत्वाभावस्याकारे निर्णीतत्वेन तदर्थं कित्वाश्रयणे वैयर्थ्यप्रसङ्गादित्याशयात् । **सलोप इति** । अत्र क्रमस्याविवक्षित्वादादाविकारलोपः पश्चात्सलोप इति ज्ञेयम् । यश्च सुडागमसकारस्यापि लोप इत्याद्याकारे ज्ञेयम् । **उभयथापीति** । एकमेव सार्वधातुकमार्धधातुकं च भवतीत्यर्थः ।

**स०व्र०**— ननु प्राप्येति क्त्वाप्रत्ययोऽनुपपन्नः 'समानकर्तृकयोः पूर्वकाल' इति समानकर्तृकत्व एव क्त्वाप्रत्ययविधानात् । प्रकृते च हरिप्राप्तिं प्रति पुरुषाणां कर्तृत्वात् भवनक्रियां प्रति च मुक्तेः कर्तृत्वात् क्रियाद्वयस्य समानकर्तृकत्वाभावेन क्त्वाप्रत्ययानुपपत्तिरित्यत आह **प्राप्यावस्थितानामपीति** । तथा चोभयत्रापि पुरुषाणामेव कर्तृत्वेन न दोष इति भावः । ननु सर्वेषामपि ब्रह्मणा सहैव मुक्तिर्भवतीति वस्तुस्थितिरेव वक्तव्या भूयादित्याशीः कथनमयुक्तम् । न च भूयादित्यपि नाशीः । किं नाम वस्तुस्थितिरेवेति वाच्यम् । अनाशीर्विषयत्वे भूयादितिरूपनिष्पत्तेरेवासम्भवात् । तथाहि । 'लिङाशिषी'त्याशीर्विषय एव लिङस्तिङ आर्धधातुकसंज्ञाविधानेन प्रकृते आशीर्विषयत्वाभावे आर्धधातुकसंज्ञाऽभावापत्त्या 'तिङ्शित्सार्वधातुकमि'त्यनेन तिङ्सार्वधातुकसंज्ञाविधानेन कर्तरि शबिति शपि 'सार्वधातुकार्धधातुकयोरि'ति गुणे 'लिङः सलोपोऽनन्त्यस्ये'ति सलोपे 'इतश्चे'तीकारलोपे 'अतोयेयः' इति य इत्यस्य इयादेशे 'लोपो व्योर्वली'ति यलोपे 'आद्गुण' इति गुणे च भवेदित्येव स्यात्, न तु भूयादितीत्यतोऽनाशीर्विषयत्वेऽपि भूयादिति रूपनिष्पत्तिः सम्भवतीत्याह **छन्दस्युभयथेतीति** । आशीर्विषयेऽनाशीर्विषये वा, लिङस्तिङार्धधातुकसंज्ञा स्यादिति सूत्रार्थः । तथा च अनाशीर्विषयस्यापि लिङस्तिङ आर्धधातुकसंज्ञाविधानेन प्रकृतेऽप्यार्धधातुकसंज्ञायां जातायां आर्धधातुकत्वेन च शबाद्यप्राप्तौ भूयादिति रूपनिष्पत्तिरिति भावः । **अस्मिन्पक्ष इति** । भूयादितीश्वराशीरित्यस्मिन्पक्ष इत्यर्थः । सर्वेषामपि ब्रह्मणा सहैव मुक्तिर्भवतीति साध्यं पृथगेव श्लोकात् बहिरेव द्रष्टव्यम् । न तु पदार्थत्वेनेति भावः ॥ **तस्य निमित्तमिति** । अयं भावः । सर्वेषामपि ब्रह्मणा सहैव मुक्तिर्भवतीति प्रतिज्ञाते किमत्र निमित्तं किञ्चात्र ज्ञापकमिति शङ्काद्वयं प्राप्नोति । अत्र किं निमित्तमिति शङ्कानिरासाय ईश्वराशीर्लक्षणं निमित्तं भूयादित्यनेनोच्यते । किं ज्ञापकमिति द्वितीयशङ्कानिरासाय 'इति शास्त्रस्य निर्णय' इत्यनेन शास्त्रलक्षणज्ञापकमुच्यत इति सर्वं सुस्थम् । यद्वा यतो धूमवान् अत एवाग्निमान् इत्यत्र धूमस्य लिङ्गत्वे वह्निज्ञापकत्वमिव यतोऽन्येषामपि ब्रह्मणा सह मुक्तिः भूयादितीश्वराशीः अत एव ब्रह्मणा सहान्येषां मुक्तिर्भवतीत्यत्र अन्येषां मुक्तिभवने ईश्वराशिषो लिङ्गत्वेन ज्ञापकत्वमित्यर्थः ।

**॥ इति देवानां इतरेषाञ्च मोक्षक्रमः ॥**

* * *

॥ अथ पूर्वोक्तार्थस्य व्याख्यानम् ॥

७ **सु०—** इति शास्त्रस्य निर्णय इत्युक्तमेव विवृणोति क्ष्मेति ।

**अनु०—** क्ष्माम्भोनलानिलवियन्मनइन्द्रियार्थ-
भूतादिभिः परिवृतः प्रतिसंजिघृक्षुः ।
अव्याकृतं विशति यर्हि गुणत्रयात्मा
कालं परं स्वमनुभूय परः स्वयम्भूः ॥

एवं परेत्य भगवन्तमनुप्रविष्टा
ये योगिनो जितमरुन्मनसो विरागाः ।
तेनैव साकममृतं पुरुषं पुराणं
ब्रह्म प्रधानमुपयान्त्यगताभिमानाः ॥

भगवन्तमनुप्राप्ता अपि तु ब्रह्मणा सह ।
परमं मोक्षमायान्ति लिङ्गभेदेन योगिनः ।
प्राप्ता अपि परं देवं सहैव ब्रह्मणा पुनः ।
आनन्दव्यक्तिमायान्ति पूर्णा लिङ्गस्य भङ्गतः ।
इति श्रुतिपुराणोक्ति(णादि)बलाद्विज्ञायते च तत् ॥

भूतानामादिः **भूतादिः** । **क्ष्मा**ऽऽदिपदैः पञ्चानां महाभूतानां, मनसो, दशानामिन्द्रियाणां, पञ्चानां विषयाणां, भूतादिपदोपलक्षितस्य त्रिविधस्याप्यहङ्कारस्याभिमानिनो देवा उच्यन्ते । **अव्याकृतं** परमेश्वरम् । **यर्हि** यदा । गुणत्रयस्यात्माभिमानी । **परं** परसङ्ख्योपेतम् । **परः** क्ष्मादिभ्यः । **एवं** तदा । **भगवन्तमिति** तदीयं लोकम् । **अगताभिमानाः** अगतजीवभावाः । परमं मोक्षमित्यस्यैव विवरणं **लिङ्गभङ्गेनेति** । इत्थम्भूत-

**लक्षणे तृतीया । यद्वा । लिङ्गभङ्गेन निमित्तेन परमं मोक्षमानन्दाविर्भावमायान्तीति व्याख्येयम् । तच्चेति चशब्देन स्रष्टृष्वेवेत्युक्तं समुच्चिनोति । श्रुत्यादिकं भाष्योदाहृतं ग्राह्यम् ।**

**परि०**— क्ष्माम्भोनलेत्यादिनाऽपौनरुक्त्याय आह **भूतानामादिरिति** । स च त्रिविधोऽहङ्कार इत्यग्रे व्यक्तम् ॥ **त्रिविधस्येति** । तैजसतामसवैकारिकभेदेन त्रिविधस्येत्यर्थः । तामसाहङ्कारस्यैव भूतकारणतया भूतादिपदेन ग्रहणेऽप्यन्यांशयोरप्राप्तेः **भूतादिपदोपलक्षितस्य** इत्युक्तं छत्रिन्यायेनेति भावः ॥ **देवाः उच्यन्त इति** । तथा च भूतादिभिः परिवृतः सन् अव्याकृतं विशतीत्युपपन्नं जडत्वे तदयोगादिति भावः । परो विविक्त इत्यस्यावधिमाह **क्ष्मादिभ्य इति** । एवमित्यस्यार्थः **तदेति** । **भगवत्**पदेन तल्लोको विवक्षितः । अन्यथा ब्रह्मोपयान्तीत्युत्तरवाक्यानुपपत्तिरिति भावः । कर्त्राद्यर्थायोगादाह **इत्थम्भूतेति** । मुक्तत्वरूपप्रकारं प्राप्तानां लिङ्गभङ्गो लक्षणं ज्ञापकमिति कमण्डलुना तापसमद्राक्षीदितिवत् तृतीयेत्यर्थः । चशब्दान्वयेन अनुवादः **तच्चेति** । ननु सहैव ब्रह्मणेत्यत्र भगवन्तमिति श्रुतेः 'क्ष्मे'ति पुराणस्य चोक्तावपि चशब्देन समुच्चितेऽर्थे नोक्तं श्रुत्यादिकमित्यत आह **श्रुत्यादिकमिति** । 'नैकस्मिन्दर्शयतो ही'ति सूत्रे 'पृथिव्यामृभवो विलीयन्ते' इत्यादिश्रुतेः 'ऋभवः पृथिव्यामि'त्यादिश्रुतेः । तथा 'सोऽध्यक्ष' इति सूत्रे 'मुक्ताः सन्तोऽग्निमाविश्ये'त्यादिस्मृतिवाक्यादेरुक्तत्वादिति भावः ।

**यादु०**— **भूतानामादिरिति** । अन्यथा क्ष्मेत्यादेर्वैयर्थ्यमिति भावः ॥ **भूतादिपदोपलक्षितस्येति** । तामसाहङ्कारस्यैव भूतादिपदवाच्यत्वादिति भावः ॥ **देवा उच्यन्त इति** । जडानां वक्ष्यमाणमुत्त्यसम्भवादिति भावः ॥ **विवरणमिति** । विशेषकथनस्य सामान्योक्तिविवरणरूपत्वादिति भावः । लिङ्गभङ्गस्य कर्तृत्वकरणत्वयोरभावात् कथं तृतीयोपपत्तिरित्यत आह **इत्थम्भूतलक्षण इति** । परमत्वरूपप्रकारं प्राप्तो मोक्षः इत्थम्भूतस्तद्विशेषरूपतया तज्ज्ञापको लिङ्गभङ्गस्तल्लक्षणम्, अतः तत्र तृतीयेत्यर्थः । सामान्यविशेषयोरभेदेऽपि ज्ञाप्यज्ञापकभावः शिंशुपारूपवृक्ष इत्यादाविव नानुपपन्न इति ध्येयम् । 'भगवन्तमनुप्राप्ता' इत्यादिश्रुत्यपेक्षया 'क्ष्माम्भ' इत्यादिपुराणस्य प्रथममुक्तत्वेऽपि श्रुतेरव्यवधानेन प्रकृतत्वादभ्यर्हितत्वाच्च मूले **श्रुतिपुराणोक्ती**त्युक्तम् । ननु सर्वेषां ब्रह्मणा सहैव मुक्तिरित्यत्रैव श्रुतिपुराणयोरुदाहरणं कृतम् । चशब्दोक्ते स्रष्टृष्वेव सृज्यानां प्रवेश इत्यस्मिन्नर्थे तु न श्रुत्यादिकमुदाहृतम्, अतः कथं तत्प्रतिपत्तव्यमित्यत आह **श्रुत्यादिकमिति** । 'पृथिव्यामृभवो विलीयन्ते वरुणेऽश्विनावग्नावग्नयो वायाविन्द्रः सोम आदित्यो बृहस्पतिरित्याकाश एव साध्या विलीयन्त' इत्यादिका श्रुतिः 'मुक्ताः सन्तोऽग्निमाविश्य देवाः सर्वेऽपि भुञ्जते । अग्निरिन्द्रं तथेन्द्रश्च वायुमाविश्य सोऽपि तु । आविश्य परमात्मानं भुङ्क्ते भोगांस्तु बाह्यकानि'त्यादिका स्मृतिश्च भाष्योदाहृता चशब्देनोक्तेऽर्थे ग्राह्येत्यर्थः । अत्र मूले इतिशब्दो न ग्रन्थप्रकृतस्य परामर्शकः, किन्तु बुद्धिसन्निहितस्येति ज्ञातव्यम् ।

**कं०रा०— भूतादिरिति** । भूतानि प्रति तामसाहङ्कारस्य कारणत्वात् भूतादिशब्देन तामसाहङ्कार उच्यते ॥ **क्ष्मादिपदैरिति** । अभिमानिनो देवा उच्यन्त इति वक्ष्यमाणेनान्वयः ॥ **गुणत्रयस्यात्माभिमानीति** । एतत्क्ष्मादिभ्यः पर इति वक्ष्यमाणं च स्वयम्भूशब्दितचतुर्मुखस्य विशेषणम् ॥ **परं परसङ्ख्योपेतमिति** । परशब्देन चतुर्मुखस्य वर्षशतमुच्यते । तथाच परमित्यस्य वर्षशतरूपसङ्ख्योपेतमित्यर्थः इति भावः । एतत् आत्मीयवाचिस्वपदं च कालस्य विशेषणम् । पूर्वश्लोके यर्हीतिशब्दो यदेत्यर्थे वर्तत इत्युक्तम् । तदनुसारेणोत्तरश्लोकस्थैवंशब्दस्तदेत्यर्थपर इति व्याचष्टे **एवं तदेति** ॥ **अगतजीवभाव इति** । 'ब्रह्मैव सन् ब्रह्माप्येती'ति श्रुतौ जीव एव सन् ब्रह्माप्नोतीति जीवस्य जीवभावमविहायैव ब्रह्मप्राप्तेरुक्तत्वादगताभिमाना इत्यस्यागतजीवभावा इत्यर्थ इति भावः । न च वाच्यं श्रुतेरपि परब्रह्मैव सन् परब्रह्माप्येतीत्यर्थः किं न स्यादिति । तथात्वे जीवस्याप्येतीत्युक्तप्राप्तिकर्तृकत्वस्य ब्रह्मणश्च तत्कर्मताया अयोगेन अर्थान्तरानुपपत्त्या अस्मदुक्तार्थस्यैव ग्राह्यत्वात् । सन्न्यायरत्नावल्यां तु अगताभिमाना इत्यस्य अगतभगवद्बहुमाना इत्यर्थ उक्तः । 'भेददृष्ट्याभिमानेने'त्यादाविव अभिमानशब्दस्य बहुमानपरत्वं सम्भवतीत्यभिप्रेत्य यद्यपि 'एवं परेत्य भगवन्तमनुप्रविष्टा' इत्यादिद्वितीयश्लोकेनैव अन्येषामपि ब्रह्मणा सह मुक्तिरिति प्रमेयं सिद्ध्यति तथाऽपि तेनैव साकमिति द्वितीयश्लोकस्थतच्छब्दस्य पूर्वश्लोकस्थस्वयम्भूशब्दप्रकृतचतुर्मुखपरामर्शित्वं ज्ञापयितुं पूर्वश्लोकोदाहरणं कृतम् । ननु लिङ्गशरीरभङ्गस्यैव मोक्षरूपत्वेन तस्य तत्करणत्वाभावात् 'परमं मोक्षमायान्ति लिङ्गभङ्गेने'ति तृतीयानुपपत्तिरित्यत आह **इत्थम्भूतलक्षण इति** । 'प्राप्ता अपि परं देवं सहैव ब्रह्मणा पुनः । आनन्दव्यक्तिमायान्ति पूर्णा लिङ्गस्य भङ्गत' इति उत्तरप्रमाणानुसारेण प्रकारान्तरेण व्याख्येयमित्याह **यद्वा लिङ्गभङ्गेनेति** । 'इति श्रुतिपुराणोक्तिबलाद्विज्ञायते च तदि'त्यत्र चशब्दस्य यथाश्रुतान्वयो न युक्तः । समुच्चेयक्रियान्तराभावादित्यतः तस्य अन्वयं दर्शयंस्तत्समुच्चेयमर्थमाह **तच्चेति चशब्देनेति** ॥ तच्चेति चशब्देन 'स्रष्टृष्वेव च सृज्यानां प्रवेश' इत्युक्तं प्रमेयं समुचिनोतीत्यर्थः । तथा च श्रुत्यादिबलात् ब्रह्मणा सह मुक्तिरिति प्रमेयं स्रष्टृष्वेव सृज्यानां प्रवेश इति प्रमेयं च विज्ञायत इति मूलार्थ इति भावः । ननु 'ब्रह्मणा सह मुक्तिरि'ति श्रुत्यादिकमत्रोदाहृतं न तु 'स्रष्टृष्वेव सृज्यानां प्रवेश' इत्यत्र अतस्तत्र श्रुत्यादिकं किमित्याकाङ्क्षायामाह **श्रुत्यादिकमिति** । 'स्रष्टृष्वेव सृज्यानां प्रवेश' इत्यत्र प्रमाणभूतं श्रुत्यादिकं 'तस्य यावन्न वाङ्मनसि सम्पद्यते', 'मनः प्राणे', 'अग्नौ सर्वे देवा विलीयन्ते, अग्निरिन्द्रे, इन्द्र उमायाम्, उमा रुद्रे विलीयत एवमन्यानि दैवतानि यथानुकूलम्', 'मुक्ताः सन्तोऽग्निमाविश्य देवाः सर्वेऽपि भुञ्जते । अग्निरिन्द्रं तथेन्द्रश्च वायुमाविश्य सोऽपि तु' इत्यादिरूपं भाष्योदाहृतं ग्राह्यमित्यर्थः । यद्यपि 'क्ष्माम्भोऽनलानिले'त्यादिभागवतवाक्यस्य प्रथममुदाहृतत्वात् 'भगवन्तमनुप्राप्ता' इत्यादिश्रुतेश्च पश्चादुदाहृतत्वादिति पौराणवचनश्रुतिभ्यां ज्ञायते च तदिति वक्तव्यम् । तथाऽपि पुराणवाक्यस्य प्रसिद्धत्वात् श्रुतेस्त्वप्रसिद्धत्वात् तत्क्रमेणोदाहरणं कृतम्, इदानीं तु स्वरूपतः प्राधान्यमनुसृत्य 'इति श्रुतिपुराणोक्तिबलात् विज्ञायते च तदि'त्युक्तमिति ध्येयम् ।

**शे०चं०—** भूतादिपदस्य भूतेन्द्रियादिपरत्वे क्ष्माम्भोनलेत्यादिपूर्वेण पौनरुक्त्यप्रसङ्गादन्यथा व्याचष्टे **भूतानामादिरिति** । क्ष्मादिपदानां जडपरतायां वक्ष्यमाणमुक्त्यसम्भवप्रसङ्गाद्देवतापरतामाह **क्ष्मादिपदैरिति** ।

भूतादिपदस्य स्ववाच्यमात्रपरतायां तामसाहङ्कारस्यैव तथात्वेन भूतादिपदेन तदभिमानिमात्रलाभेन त्रिविधाहङ्काराभिमानिनामलाभप्रसङ्गात् तल्लाभाय लक्षणया त्रिविधाहङ्कारपरतया भूतादिपदं व्याचष्टे **भूतादिपदोपलक्षितस्येति** । क्ष्मादिपदानां तत्तद्देवतापरत्वे लक्षणाप्रसङ्ग इत्यतोऽभिमन्यमानवाचकशब्दानामभिमानिषु मुख्यताया अभिमान्यधिकरणसिद्धत्वान्न तत्प्रसङ्ग इत्याशयेनोक्तम् **अभिमानिन इति** । अमृतं पुरुषं पुराणं, ब्रह्म प्रधानमित्युत्तरत्र श्रवणादाह **अव्याकृतं परमेश्वरमिति** । 'सहैव ब्रह्मणा भूयादि'ति पूर्वोक्ताया, अन्येषां लिङ्गभङ्गस्य ब्रह्मलिङ्गभङ्गेन समानकालतायाः, क्ष्मेत्यादिप्रमाणारूढत्वस्यात्र प्रमाणे ब्रह्मलिङ्गभङ्गस्य कालविशेषस्य तत्कालेऽन्येषां लिङ्गभङ्गस्य चानुक्तावसम्भवात् तदुपपत्तये यर्ह्येवशब्दौ यदातदेत्यर्थतया व्याचष्टे **यर्हि यदा, एवं तदेति** । गुणत्रयमात्मा यस्येति न स्वरूपार्थकस्यात्मशब्दस्य बहुव्रीहिर्युक्तः, गुणत्रयस्यैतत्स्वरूपताया बाधितत्वादित्यभिप्रेत्य समासप्राबल्यात् षष्ठीतत्पुरुष इत्याह **गुणत्रयस्यात्मेति** । तथाऽपि हिरण्यगर्भस्य गुणत्रयस्वरूपताया बाधितत्वात् कथं षष्ठीतत्पुरुषोऽपीत्यतो वाऽऽत्मशब्दस्याभिमानिपरत्वेन स्वरूपार्थत्वाभावाद् गुणत्रयाभिमानितायाश्चाबाधितत्वान्नानुपपत्तिरित्याशयेनाह **अभिमानीति** । वैयर्थ्येनान्यत्वाद्यर्थकत्वासम्भवात् परशब्दस्य विवक्षितमर्थमाह **परमिति** । ब्रह्मवर्षशतरूपमित्यर्थः । हिरण्यगर्भस्य परत्वोक्तेर्मूले वैयर्थ्यमाशङ्क्य क्ष्मादिदेवैः कुतस्तस्य परिवृतत्वमित्यतः तत्र तदुत्तमत्वरूपहेतुकथनपरत्वान्न तदानर्थक्यमिति भावेन परशब्दं तदुत्तमत्वार्थतया व्याचष्टे **परः क्ष्मादिभ्य इति** । भगवन्तमिति भगवच्छब्दस्येश्वरपरत्वे तमनुप्रविष्टानां तेनैव साकमित्यादिनोच्यमानब्रह्मप्राप्त्युक्तिविरोधात् तल्लोकपरतया भगवत्पदं व्याचष्टे **भगवन्तमितीति** । नन्वगताभिमानिनां दोषित्वेन भगवत्प्राप्तेरयोगात् तथोक्तिरयुक्तेत्यतोऽत्रागताभिमानपदस्य जीवभावात्यागपरत्वेन दोषात्यागपरत्वाभावान्नानुपपत्तिरित्याशयेनाह **अगतेति** ॥ **विवरणमिति** । विशेषकथनतया लिङ्गभङ्गेनेत्यस्य परमं मोक्षमिति सामान्योक्तिविवरणत्वमिति भावः । लिङ्गभङ्गस्य कर्तृत्वकरणत्वयोरयोगेन तत्र तृतीयाया अयोगात् तदनुपपत्तिमाशङ्क्याह **इत्थम्भूतलक्षण इति** । किञ्चित्प्रकारं प्राप्त इत्थम्भूतस्तस्य लक्षणं चिह्नं तत्र तृतीयेत्यर्थः । तथा च परमत्वरूपं प्रकारं प्राप्तस्य मोक्षस्य लिङ्गभङ्ग एव चिह्नम् । **अनेनैव** मोक्षस्य परमत्वादिति भावः । 'आनन्दव्यक्तिमायान्ति पूर्णा लिङ्गस्य भङ्गतः' इत्युदाहरिष्यमाणप्रमाणानुसारेण लिङ्गभङ्गस्य पूर्णामानन्दव्यक्तिं प्रति निमित्तत्वस्थित्या लिङ्गभङ्गस्य कर्तृत्वाद्यभावेऽपि निमित्तत्वात् तत्रैवेयं तृतीयेति पक्षान्तरमाह **यद्वेति** । भगवन्तमनुप्राप्ता इत्यादिश्रुत्यपेक्षया क्ष्माम्भ इत्यादिपुराणस्य प्रथममुक्तत्वेऽपि श्रुतेरव्यवधानेन प्रकृतत्वादभ्यर्हितत्वाच्च मूले श्रुतिपुराणादीति श्रुत्यादित्वेन निर्देश इति ज्ञेयम् । चशब्दस्य मूले यथाश्रुतान्वये वैयर्थ्यप्रसङ्गात् स्रष्टृष्वेवेत्युक्तस्यार्थस्य श्रुत्यादिसिद्धत्वालाभप्रसङ्गाच्च तत्सिद्ध्यर्थं भिन्नक्रमतया तदन्वयप्रदर्शनपूर्वकं तत्प्रयोजनमाह **तच्चेति** ॥ **चशब्देनेति** । ननु ब्रह्मणा सहैव सर्वेषां लिङ्गभङ्गमित्यत्रैव पूर्वं श्रुतिपुराणयोरुदाहृतत्वात् स्रष्टृष्वेव सृज्यानां लय इत्यत्रार्थे तयोरनुदाहृतत्वात् कथं तस्य श्रुत्यादिप्रमाणकत्ववचनं सङ्गच्छेतेत्यतोऽत्र भाष्ये श्रुत्यादिशब्दस्य भाष्योक्तश्रुत्यादिपरत्वस्याप्यभिप्रेतत्वेनात्रोक्तश्रुत्यादिमात्रपरत्वाभावादत्रोदाहृतश्रुत्यादिना तदसिद्धावपि 'पृथिव्यामृभवो विलीयन्ते वरुणेऽश्विनावग्नावग्नयो वायाविन्द्रः सोम आदित्यो बृहस्पतिरित्याकाश एव साध्या विलीयन्त' इति 'मुक्ताः सन्तोऽग्निमाविश्य देवाः सर्वेऽपि भुञ्जते ।

कं०रा०— **भूतादिरिति** । भूतानि प्रति तामसाहङ्कारस्य कारणत्वात् भूतादिशब्देन तामसाहङ्कार उच्यते ॥ **क्ष्मादिपदैरिति** । अभिमानिनो देवा उच्यन्त इति वक्ष्यमाणेनान्वयः ॥ **गुणत्रयस्यात्माभिमानीति** । एतत्क्ष्मादिभ्यः पर इति वक्ष्यमाणं च स्वयम्भूशब्दितचतुर्मुखस्य विशेषणम् ॥ **परं परसङ्ख्योपेतमिति** । परशब्देन चतुर्मुखस्य वर्षशतमुच्यते । तथाच परमित्यस्य वर्षशतरूपसङ्ख्योपेतमित्यर्थः इति भावः । एतत् आत्मीयवाचिस्वपदं च कालस्य विशेषणम् । पूर्वश्लोके यर्हीतिशब्दो यदेत्यर्थे वर्तत इत्युक्तम् । तदनुसारेणोत्तरश्लोकस्थैवंशब्दस्तदेत्यर्थपर इति व्याचष्टे **एवं तदेति** ॥ **अगतजीवभाव इति** । 'ब्रह्मैव सन् ब्रह्माप्येती'ति श्रुतौ जीव एव सन् ब्रह्माप्नोतीति जीवस्य जीवभावमविहायैव ब्रह्मप्राप्तेरुक्तत्वादगताभिमाना इत्यस्यागतजीवभावा इत्यर्थ इति भावः । न च वाच्यं श्रुतेरपि परब्रह्मैव सन् परब्रह्माप्येतीत्यर्थः किं न स्यादिति । तथात्वे जीवस्याप्येतीत्युक्तप्राप्तिकर्तृकत्वस्य ब्रह्मणश्च तत्कर्मताया अयोगेन अर्थान्तरानुपपत्त्या अस्मदुक्तार्थस्यैव ग्राह्यत्वात् । सन्न्यायरत्नावल्यां तु अगताभिमाना इत्यस्य अगतभगवद्बहुमाना इत्यर्थ उक्तः । 'भेददृष्ट्याभिमानेने'त्यादाविव अभिमानशब्दस्य बहुमानपरत्वं सम्भवतीत्यभिप्रेत्य यद्यपि 'एवं परेत्य भगवन्तमनुप्रविष्टा' इत्यादिद्वितीयश्लोकेनैव अन्येषामपि ब्रह्मणा सह मुक्तिरिति प्रमेयं सिद्ध्यति तथाऽपि तेनैव साकमिति द्वितीयश्लोकस्थतच्छब्दस्य पूर्वश्लोकस्थस्वयम्भूशब्दप्रकृतचतुर्मुखपरामर्शित्वं ज्ञापयितुं पूर्वश्लोकोदाहरणं कृतम् । ननु लिङ्गशरीरभङ्गस्यैव मोक्षरूपत्वेन तस्य तत्करणत्वाभावात् 'परमं मोक्षमायान्ति लिङ्गभङ्गेने'ति तृतीयानुपपत्तिरित्यत आह **इत्थम्भूतलक्षण इति** । 'प्राप्ता अपि परं देवं सहैव ब्रह्मणा पुनः । आनन्दव्यक्तिमायान्ति पूर्णा लिङ्गस्य भङ्गत' इति उत्तरप्रमाणानुसारेण प्रकारान्तरेण व्याख्येयमित्याह **यद्वा लिङ्गभङ्गेनेति** । 'इति श्रुतिपुराणोक्तिबलाद्विज्ञायते च तदि'त्यत्र चशब्दस्य यथाश्रुतान्वयो न युक्तः । समुच्चेयक्रियान्तराभावादित्यतः तस्य अन्वयं दर्शयंस्तत्समुच्चेयमर्थमाह **तच्चेति चशब्देनेति** ॥ तच्चेति चशब्देन 'स्रष्टृष्वेव च सृज्यानां प्रवेश' इत्युक्तं प्रमेयं समुच्चिनोतीत्यर्थः । तथा च श्रुत्यादिबलात् ब्रह्मणा सह मुक्तिरिति प्रमेयं स्रष्टृष्वेव सृज्यानां प्रवेश इति प्रमेयं च विज्ञायत इति मूलार्थ इति भावः । ननु 'ब्रह्मणा सह मुक्तिरि'ति श्रुत्यादिकमत्रोदाहृतं न तु 'स्रष्टृष्वेव सृज्यानां प्रवेश' इत्यत्र अतस्तत्र श्रुत्यादिकं किमित्याकाङ्क्षायामाह **श्रुत्यादिकमिति** । 'स्रष्टृष्वेव सृज्यानां प्रवेश' इत्यत्र प्रमाणभूतं श्रुत्यादिकं 'तस्य यावन्न वाङ्मनसि सम्पद्यते', 'मनः प्राणे', 'अग्नौ सर्वे देवा विलीयन्ते, अग्निरिन्द्रे, इन्द्र उमायाम्, उमा रुद्रे विलीयत एवमन्यानि दैवतानि यथानुकूलम्', 'मुक्ताः सन्तोऽग्निमाविश्य देवाः सर्वेऽपि भुञ्जते । अग्निरिन्द्रं तथेन्द्रश्च वायुमाविश्य सोऽपि तु' इत्यादिरूपं भाष्योदाहृतं ग्राह्यमित्यर्थः । यद्यपि 'क्ष्माम्भोऽनलानिले'त्यादिभागवतवाक्यस्य प्रथममुदाहृतत्वात् 'भगवन्तमनुप्राप्ता' इत्यादिश्रुतेश्च पश्चादुदाहृतत्वादिति पौराणवचनश्रुतिभ्यां ज्ञायते च तदिति वक्तव्यम् । तथाऽपि पुराणवाक्यस्य प्रसिद्धत्वात् श्रुतेस्त्वप्रसिद्धत्वात् तत्क्रमेणोदाहरणं कृतम्, इदानीं तु स्वरूपतः प्राधान्यमनुसृत्य 'इति श्रुतिपुराणोक्तिबलात् विज्ञायते च तदि'त्युक्तमिति ध्येयम् ।

**शे०चं०**— भूतादिपदस्य भूतेन्द्रियादिपरत्वे क्ष्माम्भोनलेत्यादिपूर्वेण पौनरुक्त्यप्रसङ्गादन्यथा व्याचष्टे **भूतानामादिरिति** । क्ष्मादिपदानां जडपरतायां वक्ष्यमाणमुक्त्यसम्भवप्रसङ्गाद्देवतापरतामाह **क्ष्मादिपदैरिति** ।

भूतादिपदस्य स्ववाच्यमात्रपरतायां तामसाहङ्कारस्यैव तथात्वेन भूतादिपदेन तदभिमानिमात्रलाभेन त्रिविधाहङ्काराभिमानिनामलाभप्रसङ्गात् तल्लाभाय लक्षणया त्रिविधाहङ्कारपरतया भूतादिपदं व्याचष्टे **भूतादिपदोपलक्षितस्येति** । क्ष्मादिपदानां तत्तद्देवतापरत्वे लक्षणाप्रसङ्ग इत्यतोऽभिमन्यमानवाचकशब्दानामभिमानिषु मुख्यताया अभिमान्यधिकरणसिद्धत्वान्न तत्प्रसङ्ग इत्याशयेनोक्तम् **अभिमानिन इति** । अमृतं पुरुषं पुराणं, ब्रह्म प्रधानमित्युत्तरत्र श्रवणादाह **अव्याकृतं परमेश्वरमिति** । 'सहैव ब्रह्मणा भूयादि'ति पूर्वोक्ताया, अन्येषां लिङ्गभङ्गस्य ब्रह्मलिङ्गभङ्गेन समानकालतायाः, क्ष्मेत्यादिप्रमाणारूढत्वस्यात्र प्रमाणे ब्रह्मलिङ्गभङ्गस्य कालविशेषस्य तत्कालेऽन्येषां लिङ्गभङ्गस्य चानुक्तावसम्भवात् तदुपपत्तये यर्ह्येवशब्दौ यदातदेत्यर्थतया व्याचष्टे **यर्हि यदा, एवं तदेति** । गुणत्रयमात्मा यस्येति न स्वरूपार्थकस्यात्मशब्दस्य बहुव्रीहिर्युक्तः, गुणत्रयस्यैतत्स्वरूपताया बाधितत्वादित्यभिप्रेत्य समासप्राबल्यात् षष्ठीतत्पुरुष इत्याह **गुणत्रयस्यात्मेति** । तथाऽपि हिरण्यगर्भस्य गुणत्रयस्वरूपताया बाधितत्वात् कथं षष्ठीतत्पुरुषोऽपीत्यतो वाऽऽत्मशब्दस्याभिमानिपरत्वेन स्वरूपार्थत्वाभावाद् गुणत्रयाभिमानितायाश्चाबाधितत्वान्नानुपपत्तिरित्याशयेनाह **अभिमानीति** । वैयर्थ्येनान्यत्वाद्यर्थकत्वासम्भवात् परशब्दस्य विवक्षितमर्थमाह **परमिति** । ब्रह्मवर्षशतरूपमित्यर्थः । हिरण्यगर्भस्य परत्वोक्तेर्मूले वैयर्थ्यमाशङ्क्य क्ष्मादिदेवैः कुतस्तस्य परिवृतत्वमित्यतः तत्र तदुत्तमत्वरूपहेतुकथनपरत्वान्न तदानर्थक्यमिति भावेन परशब्दं तदुत्तमत्वार्थतया व्याचष्टे **परः क्ष्मादिभ्य इति** । भगवन्तमिति भगवच्छब्दस्येश्वरपरत्वे तमनुप्रविष्टानां तेनैव साकमित्यादिनोच्यमानब्रह्मप्राप्त्युक्तिविरोधात् तल्लोकपरतया भगवत्पदं व्याचष्टे **भगवन्तमितीति** । नन्वगताभिमानिनां दोषित्वेन भगवत्प्राप्तेरयोगात् तथोक्तिरयुक्तेत्यतोऽत्रागताभिमानपदस्य जीवभावात्यागपरत्वेन दोषात्यागपरत्वाभावान्नानुपपत्तिरित्याशयेनाह **अगतेति** ॥ **विवरणमिति** । विशेषकथनतया लिङ्गभङ्गेनेत्यस्य परमं मोक्षमिति सामान्योक्तिविवरणत्वमिति भावः । लिङ्गभङ्गस्य कर्तृत्वकरणत्वयोरयोगेन तत्र तृतीयाया अयोगात् तदनुपपत्तिमाशङ्क्याह **इत्थम्भूतलक्षण इति** । किञ्चित्प्रकारं प्राप्त इत्थम्भूतस्तस्य लक्षणं चिह्नं तत्र तृतीयेत्यर्थः । तथा च परमत्वरूपं प्रकारं प्राप्तस्य मोक्षस्य लिङ्गभङ्ग एव चिह्नम् । **अनेनैव** मोक्षस्य परमत्वादिति भावः । 'आनन्दव्यक्तिमायान्ति पूर्णा लिङ्गस्य भङ्गतः' इत्युदाहरिष्यमाणप्रमाणानुसारेण लिङ्गभङ्गस्य पूर्णामानन्दव्यक्तिं प्रति निमित्तत्वस्थित्या लिङ्गभङ्गस्य कर्तृत्वाद्यभावेऽपि निमित्तत्वात् तत्रैवेयं तृतीयेति पक्षान्तरमाह **यद्वेति** । भगवन्तमनुप्राप्ता इत्यादिश्रुत्यपेक्षया क्ष्माम्भ इत्यादिपुराणस्य प्रथममुक्तत्वेऽपि श्रुतेरव्यवधानेन प्रकृतत्वादभ्यर्हितत्वाच्च मूले श्रुतिपुराणादीति श्रुत्यादित्वेन निर्देश इति ज्ञेयम् । चशब्दस्य मूले यथाश्रुतान्वये वैयर्थ्यप्रसङ्गात् स्रष्टृष्वेवेत्युक्तस्यार्थस्य श्रुत्यादिसिद्धत्वालाभप्रसङ्गाच्च तत्सिद्ध्यर्थं भिन्नक्रमतया तदन्वयप्रदर्शनपूर्वकं तत्प्रयोजनमाह **तच्चेति** ॥ **चशब्देनेति** । ननु ब्रह्मणा सहैव सर्वेषां लिङ्गभङ्गमित्यत्रैव पूर्वं श्रुतिपुराणयोरुदाहृतत्वात् स्रष्टृष्वेव सृज्यानां लय इत्यत्रार्थे तयोरनुदाहृतत्वात् कथं तस्य श्रुत्यादिप्रमाणकत्ववचनं सङ्गच्छेतेत्यतोऽत्र भाष्ये श्रुत्यादिशब्दस्य भाष्योक्तश्रुत्यादिपरत्वस्याप्यभिप्रेतत्वेनात्रोक्तश्रुत्यादिमात्रपरत्वाभावादत्रोदाहृतश्रुत्यादिना तदसिद्धावपि 'पृथिव्यामृभवो विलीयन्ते वरुणेऽश्विनावग्नावग्नयो वायाविन्द्रः सोम आदित्यो बृहस्पतिरित्याकाश एव साध्या विलीयन्त' इति 'मुक्ताः सन्तोऽग्निमाविश्य देवाः सर्वेऽपि भुञ्जते ।

अग्निरिन्द्रस्तथेन्द्रश्चे'त्यादिभाष्योदाहृतश्रुत्यादिभिस्तत्सिद्धिसम्भवान्न तस्याप्यर्थस्य श्रुत्याद्यप्रामाणिकत्वप्रसङ्ग इत्याशयेनाह **श्रुत्यादिकमिति** ।

**वा०र०— त्रिविधाहङ्काराभिमानिनामिति** तैजसतामसवैकारिकेति त्रिविधेत्यर्थः । ब्रह्मलिङ्गस्य कालविशेषस्येति व्यधिकरणे षष्ठौ, तस्य यः कालविशेषः तस्येत्यर्थः । **गुणत्रयाभिमानितायाश्चेति** । तथात्वस्य .........इत्यनेन ...........प्रतिपादनादिति भावः । इत्थम्भूतत्वलक्षणे तृतीयेत्येतद्गीताभाष्यप्रथमपद्ये टीकाव्याख्याने टीककृता प्रपञ्चितमिति तत्प्रपञ्चोऽपि तद्व्याख्यावसरे तत्रैवास्माभिः कृतोऽवसेयः । **अन्यवधानेनेति** । उपलक्षणं चैतत् । द्व्यजन्ततयाऽल्पाच्तरतया च श्रुतिपुराणेत्यप्युक्तिसम्भवादित्यपि द्रष्टव्यम् ।

**॥ इति पूर्वोक्तार्थस्य व्याख्यानम् ॥**

* * *

**॥ अथ कर्मक्षयभोगौ सर्वसाधारणौ, देवताभिन्नानामेव उत्क्रान्तिमार्गः ॥**

८ **सु०— ननु यथा द्वितीयतृतीयपादप्रतिपाद्यमुत्क्रमादिकमसाधारणं तथा चतुर्थपादोदितो भोगः किमसाधारणः । किंवा प्रथमपादोदितकर्मक्षय इव साधारण इत्यपेक्षायामाह भोगस्त्विति ।**

## अनु०— भोगस्तु सर्वदेवानां नरादीनां च विद्यते ।

**असाधारण्ये प्रमाणाभावादिति भावः ।**

**कं०रा०— उत्क्रमादिकमिति** । आदिशब्देन अर्चिरादिमार्गगमनमुच्यते ।

**शे०चं०—** ननु भोगस्त्वित्युत्तरवाक्ये भोगस्य सर्वसाधारण्यमुच्यते । तदनर्थकम् । न च तस्य साधारण्यासाधारण्यजिज्ञासापरिपूर्त्यर्थं तदिति वाच्यम् । तत्साधारण्यासाधारण्यकोटिद्वयप्रापकाभावेन तन्मूलकजिज्ञासाया एवायोगेन तत्पूरकत्वानुपपत्तेरित्यतो द्विविधफलदर्शनस्यैव तत्प्रापकत्वसम्भवेन तन्मूलकजिज्ञासोदयसम्भवादित्यभिप्रेत्य तन्मूलोपदर्शनेन जिज्ञासायाः सम्भावितत्वं दर्शयन्नेव तत्परिपूरकतया उत्तरग्रन्थं योजयति **ननु यथेति** । ननु चोत्क्रान्तिवदसाधारण्यमेव तस्य किं न स्यादित्यत आह **असाधारण्य इति** ।

**॥ इति कर्मक्षयभोगौ सर्वसाधारणौ, देवताभिन्नानामेव उत्क्रान्तिमार्गः ॥**

* * *

**॥ अथ भाष्यतात्पर्यस्पष्टीकरणम् ॥**

९ **सु०— अस्मिन् प्रथमभाष्ये देवानां मोक्ष इति प्रथमनिर्देशः कृतः तस्य तात्पर्यमाह तत्रेति ।**

**अनु०— तत्र प्रवेशो देवानामुत्तरोत्तरतः क्रमात् ।
उच्यते**

**तत्र द्वितीयपादे । प्रथममिति शेषः । उत्तरोत्तरतः उत्तरोत्तरेषु । अतः प्रथममसौ निर्दिष्ट इति ।**

**परि०— अस्मिन्निति** । पाद इत्यर्थः ॥ **भाष्य इति** । श्रीमत्सूत्रभाष्य इत्यर्थः । 'आद्यादिभ्य उपसङ्ख्यानमि'ति तसिप्रत्ययान्तत्वमुपेत्याह **उत्तरोत्तरेष्विति** ॥ **अत इति** । सूत्रकृता प्रथमं देवानां लयस्योक्तत्वादित्यर्थः ।

**यादु०— तस्य तात्पर्यमाहेति** । तस्य प्रथमं कारणमाहेत्यर्थः ॥ **अतः प्रथममिति** । तथा च सूत्रकारेण द्वितीयपादे 'वाङ्मनसि दर्शनादि'त्यादिग्रन्थेन प्रथमं देवानां मोक्षस्यैव प्रतिपादितत्वात् तदनुसारिणा भाष्यकारेण भाष्ये देवानां मोक्ष एवं प्रथमं निर्दिष्ट इति कारणमनेनोक्तमिति ज्ञातव्यम् । सूत्रकारेणापीतरापेक्षया देवानां प्राधान्यात् तद्देहलय एवात्र प्रथममुक्त इति भावः ।

**शे०चं०— अस्मिन्प्रथमभाष्य इति** । 'देवानां मोक्ष उत्क्रान्तिश्चास्मिन्पाद उच्यत' इत्येतत्पादीयप्रथमभाष्ये देवानां मोक्ष इति प्रथमं देवमोक्षस्य निर्देशः कृत इत्यर्थः ॥ **तस्य तात्पर्यमाहेति** । किं तस्य प्रथमनिर्देशो कारणमिति जिज्ञासायां तदाहेत्यर्थः । यत्र क्वचिद्देवानामुत्तरोत्तरतः प्रवेशचिन्तनस्य द्वितीयपादे देवानां मोक्षस्य भाष्ये प्रथमनिर्देशे कारणत्वायोगात् तत्रेत्येतद्द्वितीयपादपरतया योजयति **तत्रेति** । द्वितीयपादे तत्प्रवेशनिरूपणस्य देवानां मोक्षे द्वितीयपादार्थत्वमात्रसम्भावकत्वेऽपि प्रथमनिर्देशे कारणत्वं कथमित्यतः प्रथमं तन्निरूपणस्यैव तत्प्रयोजकतयाऽभिमतत्वान्नानुपपत्तिरित्यभिप्रेत्य अपेक्षितं पूरयति **प्रथममिति शेष इति** ॥ **उत्तरोत्तरेष्विति** । अनेनोत्तरोत्तरत इत्याद्यादित्वात् सप्तम्यर्थे तसिरिति उक्तं भवति । अतः प्रथममिति सूत्रकारेण 'वाङ्मनसि दर्शनादि'त्यादिना ग्रन्थेन प्रथमं देवानां मोक्षस्यैव प्रतिपादितत्वात् तदनुसारेण भाष्यकृताऽपि भाष्ये 'देवानां मोक्ष एव प्रथमं निर्दिष्ट' इति न भाष्यकारीयः प्रथमं निर्देशो निर्निबन्धनः, सूत्रकृता त्वितरापेक्षया देवानां प्राधान्यात् तद्देहलय एव प्रथमं चिन्तित इति न तं प्रत्यपि पर्यनुयोगावकाश इति भावः ।

**स०व्र०— अस्मिन्प्रथमभाष्य इति** । एतत्पादीयप्रथमभाष्य इत्यर्थः ।

**॥ इति भाष्यतात्पर्यस्पष्टीकरणम् ॥**

॥ अथ वाग्यन्तरोक्तमोक्षस्वरूपस्य उत्प्रेक्षामूलत्वम् ॥

१० **सु०— नन्वयुक्तमेतत् । वाङ्मनसीत्यादिसूत्रेषु देवानामश्रवणात् । अथ वागादिशब्दास्तदभिमानिनामुपलक्षका इति मतं तदा, सति वाचके लाक्षणिकप्रयोगस्य प्रयोजनं वाच्यम् । यद्वा वाचका एवेति पक्षः तथाऽपि प्रसिद्धशब्दपरित्यागेन अप्रसिद्धपदप्रयोगे प्रयोजनं वक्तव्यमेवेत्यत आह देहेति ।**

## अनु०— देहगानां च वृत्तीनामेवमेव तु ।

**बाह्यतत्त्वव्यावृत्त्यर्थं देहगानामित्युक्तम् । वर्तते देह एताभिरिति वृत्तयो जडा वागाद्याः यथा मुच्यमानानां देवानामेवमेव देहगानां तदभिमतानां वागादीनामुत्तरोत्तरेषु मरणकाले लयो भवतीत्येतदपि प्रसङ्गाज्ज्ञापयितुं वागादिपदप्रयोग इति भावः । वागादिशब्दा देवानां वाचका एवेति तुशब्देन सूचयति ।**

**परि०— बाह्येति** । अण्डाद्बाह्यानां वागादीन्द्रियरूपतत्त्वानां तैजसाहङ्कारे लयात् मनस्तत्त्वस्य च वैकारिके लयादत्रोक्तलयो न तद्विषय इति ज्ञापनाय देहगानामित्युक्तिरित्यर्थः ॥ **वाचका एवेति** । तदधीनत्वन्यायादिति भावः । *पादार्थसङ्गत्योरुक्तिः ॥*

**यादु०— बाह्यतत्त्वेति** । ब्रह्माण्डबाह्यानां वागादीन्द्रियरूपतत्त्वानां तैजसेऽहङ्कारे मनस्तत्त्वस्य च वैकारिके विलयादत्रोक्तो विलयो न तद्विषय इति भावः ।

**कं०रा०— वाङ्मनसीत्यादीति** । 'वाङ्मनसि दर्शनाच्छब्दाच्चे'ति सूत्रेष्वित्यर्थः ॥ **तदभिमानिनामिति** । वागाद्यभिमानिनामिति ॥ **प्रसिद्धेति** । प्रसिद्धानामुमादिशब्दानां परित्यागेन अप्रसिद्धवागादिशब्दप्रयोगे प्रयोजनं वक्तव्यमित्यर्थः ॥ **बाह्यमिति** । ब्रह्माण्डाद्बहिर्विद्यमानं यद्वागादितत्त्वं तद्व्यावृत्त्यर्थं देहगानामित्युक्तमित्यर्थः ।

**शे०चं०— बाह्यतत्त्वेति** । ब्रह्माण्डबाह्यानां वागादीन्द्रियरूपतत्त्वानां तैजसाहङ्कारादुत्पन्नत्वात् तत्र, मनस्तत्त्वस्य च वैकारिकाहङ्कारकार्यत्वात् तत्रैव विलयादत्रोच्यमानो वागादीनां मन आदौ लयो न बाह्यतत्त्वविषय इत्यर्थः । एवमेवेत्युक्तं विवृण्वन्नेव किमनेन वागादिपदप्रयोजनमुक्तमित्याशङ्कापरिहारकतया वाक्यं योजयति **यथेति** । एतज्ज्ञापनस्य न प्रकृते कश्चिदुपयोगो दृश्यत इत्यत उक्तं **प्रसङ्गादिति** । ननु वागादिशब्दप्रयोगस्य प्रयोजनोक्त्या तैर्देवानां लक्षणया मुख्यवृत्त्या वा श्रवणसिद्ध्या तदश्रवणप्रयुक्त-नन्वित्युक्तदोषो-

द्वारसिद्धेः न भाष्ये तुशब्देन किञ्चित्प्रयोजनमित्यत आह **वागादिशब्दा** इति । अनेन भाष्ये तुशब्दो विशेषार्थो विशेषश्च वाचकत्वमित्युक्तं भवति ।

वा०र०— तैर्देवानामिति । वागादिशब्दप्रयोगेत्यत्र बुद्धया विवेकेन वागादिशब्दैरित्यर्थः ।

**॥ इति वाद्यन्तरोक्तमोक्षस्वरूपस्य उत्प्रेक्षामूलत्वम् ॥**

* * *

**॥ अथ वादिनां मोक्षविषयकविवादे निमित्तकथनम् ॥**

**११　सु०— भवेदेवं पादार्थः सङ्गतिश्च । यदि भगवज्ज्ञानभोगाभ्यां निवृत्तसमस्तानिष्ट-कर्माणः, स्वोत्तमप्रवेशेन ब्रह्मनाड्योत्क्रमेण वा परित्यक्तदेहाः, स्वोचितेनार्चिरादिना वा पथा वैकुण्ठलोकवासिनं भगवन्तं हिरण्यगर्भेण सह प्राप्ता भिन्नलिङ्गशरीराः विध्वस्त-प्रकृतयोऽत्यन्तनिवृत्तानिष्टाः सम्यगाविर्भूतानन्दादिगुणा भगवत्समीप एव तमुपासीनाः, स्वरूपेण वा लीलागृहीतविग्रहैर्वा सङ्कल्पमात्रसाध्यान्दिव्यभोगांस्तारतम्येन भुञ्जाना न कदाचित्पुनरावर्तन्त, इत्येतन्मोक्षस्वरूपं 'कर्मक्षयस्तथोत्क्रान्तिरि'त्यादिना उक्तं निश्चितं स्यात् । न चैवम् । तैस्तैः वादिभिरन्यथामोक्षस्वरूपस्य वर्णितत्वात् । विप्रतिपत्तौ च संशयस्य ध्रुवत्वादित्यत आह तत्रेति ।**

## अनु०— तत्र मोक्षस्वरूपं तु वादिनः प्रतिभाऽऽश्रयात् । नाना वदन्ति

**तत्र । तथा सति, सूत्रकारेणोक्तलक्षणे मोक्षे श्रुत्यादिप्रमाणैरुपपादिते सति । वादिनस्तु प्रतिभाश्रयात् स्वोत्प्रेक्षामात्रेण नाना वदन्ति । अतः प्रमाणमूलत्वादस्या-प्रमाणमूलानाम् उत्प्रेक्षामात्रयोनीनां वादानां च साम्याभावान्न संशयावकाशः ।**

परि०— मूलोक्तान् पादानामर्थान् बुद्ध्यारोहायानुवदन्नुत्तरग्रन्थसन्दर्भमवतारयति **भवेदेव-मित्यादिना** । **कर्माण** इत्यन्तं प्रथमपादार्थः । प्रारब्धबुद्ध्योक्तं **भोगाभ्यामिति** । देहा इत्यन्तं द्वितीयपादार्थः ॥ **स्वोचितेनेति** । शेषगरुडमार्गयोरन्यतरेणेत्यर्थः । **उपासीना** इत्यन्तं तृतीय-पादार्थः । **स्वरूपेणेत्यादि** चतुर्थपादार्थः ॥ **इत्यादिनोक्तमिति** । तत्र सङ्क्षेपेणोक्तस्य ग्रन्थकर्त्रभि-मतस्य विवरणेन अस्माभिरनूदित इति तत्रानुक्तानुवाददोषो न शङ्क्यत इति भावः ।

**यादु०— स्वोचितेनेति** । स्वयोग्येन शेषगरुडमार्गयोरन्यतरेणेत्यर्थः । वैकुण्ठलोकवासिनमित्यर्चिरादिमार्गगतानपेक्ष्यैवोक्तम् । न तु शेषादिमार्गगतान् । तेषां भगवत्प्राप्तेर्ब्रह्माण्डलयोत्तरभावित्वात् । वैकुण्ठलोकस्य च ब्रह्माण्डान्तःस्थत्वात् । ततश्च ये पूर्वमर्चिरादिना पथा वैकुण्ठलोकगतं भगवन्तं प्राप्ता ये च ब्रह्माण्डलये स्वोत्तमप्रवेशेन त्यक्तदेहाः स्वोचितेन पथा पुन्नामकं हिरण्यगर्भं प्राप्ताः ते सर्वेऽपि पुन्नामकेन हिरण्यगर्भेण सह विरजास्नानेन भिन्नलिङ्गशरीरा विध्वस्तगुणाच्छादिकादिप्रकृतयः, अत एवात्यन्तनिवृत्तानिष्टा इत्यनन्तरं महाप्रलये भगवदुदरे स्थित्वा, पुनः सृष्टौ भगवल्लोकाविभवि श्वेतद्वीपगतभगवद्दर्शनेनापगतभगवदिच्छावरका इत्येतद् ग्राह्यम् । अन्यत्रोक्तत्वात् । ततः सम्यगाविर्भूतानन्दादिगुणा इत्यादीत्येवं योजना द्रष्टव्या। एवं च 'अन्तिमावरणव्योम्नोरन्तरे विरजा नदी । विधेर्देहापगमने लिङ्गमात्रशरीरकाः । पूर्णसाधनसम्पन्ना अपरोक्षदृशश्च ये । निर्गत्य चोर्ध्वं वैकुण्ठादतीत्यावरणानि च । विरजायां कृतस्नाना ब्रह्मणा सह सर्वशः । त्यक्तलिङ्गास्ततः सर्वे स्वरूपेण व्यवस्थिताः' इत्यादिप्रमाणसद्भावादस्मिन्नेव कल्पे लिङ्गशरीरभङ्गः । न तु 'योगी तावन्न मुक्तः स्यादि'ति वचनबलादुत्तरकल्पे । योगी तावदिच्छावरकान्न मुक्तः स्यादित्यर्थकत्वेन सावकाशत्वात् । अन्यथोदाहृतप्रमाणविरोधादिति ज्ञातव्यम् ॥ **इत्यादिनोक्तमिति** । यद्यपि विध्वस्तप्रकृतय इत्यादिकं तत्र नोक्तं तथाऽपि उपलक्षणया तदपि तत्राभिप्रेतमित्याशयेनैवमुक्तमिति ज्ञातव्यम् ।

**कं०रा०— स्वरूपेण वेति** । स्वरूपविग्रहेण वेत्यर्थः ।

**शे०चं०— स्वोचितेनेति** । शेषगरुडमार्गयोरन्यतरेण स्वयोग्यमार्गेणेत्यर्थः ॥ **वैकुण्ठलोकवासिनमिति** । इदं चार्चिरादिमार्गगतानपेक्ष्योक्तं न तु गरुडशेषमार्गगतान् । तेषां भगवत्प्राप्तेर्ब्रह्माण्डलयोत्तरभावित्वेन ब्रह्माण्डान्तरस्थवैकुण्ठलोकगतभगवत्प्राप्तेरयोगात् । ततश्च 'ये पूर्वमर्चिरादिना पथा वैकुण्ठगतभगवन्तं प्राप्ता ये च ब्रह्माण्डलये स्वोत्तमप्रवेशेन त्यक्तदेहाः स्वोचितेन शेषगरुडमार्गयोरन्यतरेण पथा पुन्नामकं हिरण्यगर्भं प्राप्ताः ते सर्वेऽपि पुन्नामकेन हिरण्यर्भेण सह भिन्नलिङ्गशरीरा विध्वस्तगुणाच्छादकप्रकृतयः अत एव 'अत्यन्तनिवृत्तानिष्टा' इत्यतःपरं 'महाप्रलये भगवदुदरे स्थित्वा पुनः सृष्टौ भगवल्लोकाविभवि सति श्वेतद्वीपगतभगवद्दर्शनेनापगतभगवदिच्छाऽऽवरका' इत्येतावत् पूरणीयम् । ततः 'सम्यगाविर्भूतानन्दादिगुणा' इति योजना । एवं 'प्रधानावरणव्योम्नोरन्तरे विरजानदी । विधेर्देहापगमने लिङ्गमात्रशरीरगाः । पूर्णसाधनसम्पन्ना अपरोक्षदृशाश्च ये । निर्गत्य चोर्ध्वं वैकुण्ठादतीत्यावरणानि च । विरजायां कृतस्नाना ब्रह्मणा सह सर्वशः । त्यक्तलिङ्गास्ततः सर्वे स्वरूपेण व्यवस्थिता' इत्यादिप्रमाणानुरोधात् । अस्मिन्नेव कल्पे लिङ्गशरीरभङ्गो न तु 'योगी तावन्न मुक्तः स्यादि'ति वचनबलादुत्तरकल्पे स मन्तव्यः । 'योगी तावदिच्छाऽऽवरकान्न मुक्तः स्यादि'त्यर्थकत्वेन तस्य सावकाशत्वात् । अन्यथोदाहृतनिरवकाशप्रमाणविरोधादिति गुरुसम्प्रदायः ॥ तत्रेतिभाष्यपादानुवादेन तथा सतीति व्याख्यानम् । स्वपदव्याख्यानं **सूत्रकारेणोक्तलक्षणे मोक्षे प्रमाणैरुपपादिते सतीति** ॥ मोक्षस्वरूपं त्विति तुशब्दो भिन्नक्रम इत्याशयेनाह **वादिनस्त्विति** । कथमेतावताऽप्युक्तशङ्कापरिहार इत्यतः तत्रेति सूत्रकृदुक्तस्य मोक्षस्य प्रामाणिकत्वोक्त्या वाद्यन्तरोक्तमोक्षस्योत्प्रेक्षामूलकत्वोक्त्या च लब्धं परिहारमाह **अत इति** ।

**वा०र०—** हिरण्यगर्भेण सहेत्यतः परं विरजाग्रानेनेति पाठः । तथा मूलकोशे सद्भावात् । इत्यादि-प्रमाणानुरोधादिति । आदिपदेन 'ततो दृष्ट्वा शिंशुमारं श्वेतद्वीपं निरीक्ष्य च । विशन्ति वासुदेवाख्यं हरे रूपं चतुर्थकमि'ति *विष्णुरहस्य*गतवाक्यशेषपरिग्रहः । तथा प्रमाणानि च विष्णुरहस्ये अन्यत्र चोदाहृतानि ज्ञेयानि ।

**॥ इति वादिनां मोक्षविषयकविवादे निमित्तकथनम् ॥**

* * *

**॥ अथ सत्त्वरजस्तमोगुणानां क्रमशः यथार्थ-मिश्र-विपरीतज्ञानजनकत्वम् ॥**

१२ **सु०—** ननु यदि तथा तथा प्रमाणानि सन्ति तर्हि तत्तद्वादिनां तादृशानि ज्ञानानि कुतो न जायन्ते । प्रमाणाभासैर्विमोहितास्त इति चेत् । तत्त्वज्ञाभिमता अपि कुतस्तैर्न विमूढाः । दोषदर्शनादिति चेत् । इतरेऽपि कुतो न दोषान् पश्यन्ति प्रमाणैः तत्त्वज्ञानो-दयोऽपि समान इत्यतो मूलकारणमाह **पुंसां हीति** ।

**अनु०—** **पुंसां हि मतयो गुणभेदतः ।**
**पृथक् पृथक् प्रजायन्ते**

**गुणभेदः** गुणविशेषः । हिशब्देन 'ज्ञानं कर्म च कर्ते'त्यादिप्रमाणप्रसिद्धिं द्योतयति । एतद्विशदयति **तमसैवेति** ।

**तमसैवान्यथा मतिः ।**
**रजसा मिश्रबुद्धित्वं सत्त्वेनैव यथामतिः ॥**

मिश्रज्ञानेऽन्यथात्वं सम्यक्त्वं चास्तीत्यतोऽन्यथैवेत्युक्तम् । यथेति भिन्नं पदं सम्य-ग्वाची । तमोगुणः प्रमाणेषु चेतःप्रवृत्तिं प्रतिबध्याभासानां दोषानाच्छाद्य विपरीतज्ञान-(मुत्पा)मप्युत्पादयतीत्यादि द्रष्टव्यम् ।

**परि०—** इत्यादीति । गीतायामन्तिमेऽध्याये 'ज्ञानं कर्म च कर्ता च त्रिधैव गुण-भेदतः । प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपी'ति प्रतिज्ञापूर्वकं ज्ञानकर्मकर्तृणां सात्त्विक-

राजसतामसभेदेन प्रत्येकं त्रैविध्योक्तेरिति भावः । एवकारयोरन्वयं दर्शयन्नेव कृत्यं व्यनक्ति **मिश्रज्ञान इत्यादिना** । अव्ययीभावसमासे विसर्गो न युक्त इत्यत आह **भिन्नं पदमिति** । ननु यदीत्यादिना कृतचोद्यस्य कथं तमसाऽन्यथैव मतिरित्यनेन निरास इत्यत आह **तमोगुण इति** । **आभासानां** प्रमाणाभासानामित्यर्थः ॥ **इत्यादीति** । रजोगुणः प्रमाणेष्वेव चेतःप्रवृत्तिं प्रतिबध्य आभासेषु दोषानाच्छाद्य प्रमाणाभासानां सम्यग्बुद्धिमुत्पाद्य मिश्रज्ञानं जनयति । सत्त्वगुणः प्रमाणेष्वेव चेतःप्रवृत्तिमुत्पाद्य आभासेषु दोषान् व्यक्तीकृत्य यथावन्मतिं जनयतीत्येवं ज्ञेयमित्यर्थः ।

**यादु०**— 'ज्ञानं कर्म च कर्ता चे'त्यस्य 'त्रिधैव गुणभेदत' इत्युत्तरं वाक्यं तेन प्रकृतसिद्धिरिति ज्ञातव्यम् ॥ **भिन्नं पदमिति** । अन्यथा यथामतीति स्यादिति भावः ॥ **इत्यादीति** । रजोगुण एकत्रैव धर्मिणि विरुद्धाकारावगाहिनोः प्रमाणतदभासयोः स्वविषये प्रवृत्तिं प्रतिबध्य तयोर्गुणान् दोषाभावांश्चाच्छाद्य संशयरूपं ज्ञानमुत्पादयति । सत्त्वगुणस्तु आभासानां दोषान् प्रकाश्य तत्र चेतःप्रवृत्तिं प्रतिबध्य प्रमाणैर्यथार्थज्ञानमेवोत्पादयतीति द्रष्टव्यमित्यर्थः ।

**कं०रा०**— **हिशब्देनेति** । 'पुंसां हि मतयो गुणभेदत' इत्यत्र हिशब्देन 'ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः । प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि', 'सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकमि'त्यादिप्रमाणप्रसिद्धिं द्योतयतीत्यर्थः । 'तमश्चैवान्यथा मतिरि'त्यत्र च एवशब्दस्यान्वयं दर्शयन् प्रयोजनमाह **मिश्र इति** । अन्यथामतिरित्येवोक्ते संशयरूपज्ञानस्याप्येककोटावयथार्थत्वेन कोट्यन्तरे च यथार्थत्वेन ग्रहणं प्रसज्येत अतः तन्निरासाय अन्यथैवेत्युक्तमित्यर्थः । यथामतिरित्यस्य समासत्वेऽव्ययीभावत्वेन यथामतीति निर्देशापत्तिः विवक्षितार्थासिद्धिर्यथैवेत्यन्वयायोगश्चेत्यत आह **यथेति भिन्नं पदमिति** । यथेतिपदस्य सादृश्यवाचित्वे प्रकृतार्थासिद्धिरित्यतः तत्पदं सम्यक्त्ववाचीत्याह **सम्यग्वाचीति** । 'निवृत्तिमार्गः कथित आदौ भगवता यथे'त्यत्र यथाशब्दस्य सम्यग्वाचित्वदर्शनादिहापि तद्वाचित्वमिति भावः ॥ **आभासानामिति** । प्रमाणाभासानामित्यर्थः ।

**शे०चं०**— **नन्विति** । यद्यप्युत्प्रेक्षामात्रयोनीनामिति वादानामुत्प्रेक्षामात्रमूलत्वाभिधानान्नेयं शङ्का युक्ता । तथाऽपि तदेव व्यवस्थापयितुमुत्प्रेक्षायामपि मूलकारणं वक्तुं चेयं शङ्केति ध्येयम् ॥ **न विमूढा इति**। अविशेषादिति भावः । दोषदर्शनभावाभावाभ्यां विशेषादविशेषोऽसिद्ध इति शङ्कते **दोषेति** । अविशेषादेव दोषदर्शनभावाभावरूपविशेषस्याप्यनुपपत्तिरेवेत्यविशेषतादवस्थ्यमिति परिहरति **इतरेऽपीति** । प्रमाणजन्यतत्त्वज्ञानोत्पत्तितदनुत्पत्तिरूपवैलक्षण्याद्युक्तो दोषदर्शनभावाभावरूपो विशेष इत्याशङ्क्याविशेषादेव तत्त्वज्ञानोत्पत्त्यनुत्पत्तिरूपवैलक्षण्यस्याप्यनुपपत्तिरेवेत्यविशेषतादवस्थ्यमित्याह **प्रमाणैरिति** । इत्यादिप्रमाणेत्यत्रादिपदेन 'तथैव गुणभेदत' इति वाक्यशेषपरिग्रहः । 'तमसैवान्यथामतिः', 'सत्त्वेनैव यथामतिरि'त्यत्र तमसा 'सत्त्वेनेत्येतावता

पूर्तेरेवशब्दयोर्निष्प्रयोजनत्वात् तमसेव रजसाऽप्यन्यथामतेः, सत्त्वेनेव रजसाऽपि यथामतेश्च, दृष्टत्वेन विरुद्धार्थ-त्वाच्च नैवशब्दयोर्मूले यथाश्रुतसम्बन्धः किन्तु भिन्नक्रमतयेति भावेन तत्पक्षे तयोर्वैयर्थ्यं तद्व्यावर्त्योपदर्शनेन परिहरति **मिश्र इति** ॥ **अन्यथैवेत्युक्तमिति** । एतच्च वक्ष्यमाणभिन्नपदत्वसिद्धवत्कारेणैवोक्तमित्यवधेयम् । योग्यताद्यर्थकयथाशब्दस्य मतिशब्देनाव्ययीभावसमासे योग्यतादेरेव सत्त्वगुणजन्यत्वप्राप्त्या सम्यङ्मतेस्तदलाभात् 'अव्ययीभावश्चे'ति तस्याव्ययसंज्ञायाम् 'अव्ययादाप्सुप' इति सुब्लोपप्रसङ्गेन विभक्तिश्रवणानुपपत्तेश्च समासपक्षं परित्यज्य भिन्नपदतामाश्रित्य तत्रापि सादृश्यार्थताया बाधितत्वात् मतेः सम्यक्त्वसमर्पकपदाभावेन सम्यङ्मतेः सत्त्वगुणजन्यत्वासिद्धेश्च तत्सिद्ध्यर्थं यथापदं सम्यगर्थतया व्याचष्टे **यथेत्यादि** । 'निवृत्तिमार्गः कथित आदौ भगवता यथे'त्यादौ तद्दर्शनादिति भावः ॥ **इत्यादि द्रष्टव्यमिति** । रजोगुण एकत्रैव धर्मिणि विरुद्धकारावगाहिनोः स्वस्वविषये प्रवृत्तिं प्रतिबध्य तयोर्गुणान् दोषांश्चाच्छाद्य मिश्रज्ञानमुत्पादयति । सत्त्वगुणस्त्वाभासान् दोषान् प्रकाश्य तत्र चेतःप्रवृत्तिं प्रतिबध्य प्रमाणैर्यथार्थमेव ज्ञानमुत्पादयतीत्यस्यार्थस्यादिपदेन परिग्रहः ।

**वा०र०**— अनुव्याख्यानमूलानुसारेणाह **निवृत्तिमार्ग इति** । एकत्रैव धर्मिणीति पाठः । **विरुद्धा-कारावगाहिनोरिति** । प्रमाणतदाभासयोरिति शेषः ।

**॥ इति सत्त्वरजस्तमोगुणानां क्रमशः यथार्थ-मिश्र-विपरीतज्ञानजनकत्वम् ॥**

* * *

**॥ अथ मुक्त-लक्ष्मी-भगवज्ज्ञानानां जडभिन्नत्वात् न गुणजन्यत्वम् ॥**

१३ **सु०**— सम्यग्ज्ञानं सत्त्वगुणेन भवतीत्युक्तम् । तस्य मुक्तेषु तावत् अपवादमाह **गुणेति** ।

## अनु०— गुणातीता विमुक्तानां मतिः शुद्धचितिर्यतः ।
## सम्यगेवाथ नित्या च

यद्यपि **विमुक्तानां मतिः सम्यगेव** अथापि **गुणातीता** सत्त्वजन्या न भवति । कुतः **शुद्धचितिः नित्या च यतः** । जडं हि कुतश्चिज्जायते न चेतनम् । तथाऽनित्यमेव न नित्यम् । दैत्यानां स्वरूपज्ञानेष्वविद्यमानं सम्यक्त्वं तर्हि कथमित्यतः शुद्धेत्युक्तम् । स्वाभाविकदोषरहितेत्यर्थः ।

**स्वरूपोपाधिगतदोषनिबन्धनं हि दैत्यानां ज्ञानानामसम्यक्त्वम् । करणनिमित्तो ज्ञानानां विषयनियमो वैशद्यभेदश्च । तत्र यदि मुक्तानां ज्ञानं तर्हि निर्विषयं वा स्यात् सर्वविषयं वा । एवं वैशद्येऽपीति । तत्राह तत्तदिति ।**

**तत्तन्माहात्म्ययोगतः ।**

**बहुला चातिविशदा**

**तेषां तेषां माहात्म्यं योग्यतारूपं तदेव योगो निमित्तं ततस्तदनुसारेण (बहुल) बहुलार्थविषयिण्यतिविशदा च ।**

**परि०**— विधेयत्वे प्रकृतासङ्गतिरित्यत आह **यद्यपीति** ॥ **अनित्यमेवेति** । कुतश्चिज्जायत इत्यनुकर्षः । उत्तरवाक्यमवतारयितुं शङ्कामाह **करणनिमित्त इति** । 'यत्सन्निकृष्टेने'त्यादिना विषय-लक्षणस्य जिज्ञासासूत्रेऽन्यथाख्यातिवादेऽभिधानादिति भावः ॥ **वैशद्यभेदश्चेति** । प्रत्यक्षजन्यस्य वैशद्यं दृष्टं विषयगतरेखोपरेखादेरपि विषयीकरणात् अनुमानजातस्य च तदभावादिति भावः ॥ **सर्वविषयं वेति** । विशेषविषयनियामकादिति भावः ॥ **एवं वैशद्येऽपीति** । अविशदं वा सर्वथा विशदं वा स्यादित्यर्थः ।

**यादु०**— शङ्कते **करणनिमित्त इति** । 'यत्सन्निकृष्टेन करणेन यज्ज्ञानमुत्पद्यते स तस्य विषय' इति व्यवस्थाऽऽश्रयणादिति भावः ॥ **वैशद्यभेद इति** । रेखोपरेखादिविशेषविषयकत्वभेद इत्यर्थः । करणं यथा यथा स्वच्छं तथा तथा रेखोपरेखादिविशेषविषयकं ज्ञानं भवतीति भावः ॥ **एवं वैशद्येऽपीति** । अविशदं वा स्यात् सर्वत्र विशदं वा स्यादित्यापादनीयमित्यर्थः ।

**वं०प०**— तत्सन्निकृष्टकरणजन्यत्वाभावेऽपि तद्विषयकत्वाङ्गीकारे दोषमाह **सर्वविषयं वेति** । असन्निकृष्टकरणजन्यत्वाविशेषादित्यर्थः ।

**कं०रा०**— **मुक्तेष्विति** । मुक्तिज्ञान इत्यर्थः । भगवज्ज्ञानेऽपीत्युत्तरग्रन्थानुसारादनित्यमेव कुतश्चि-ज्जायते न नित्यमित्यर्थः । अत्र मुक्तानां मतिः न सत्त्वगुणजन्या चेतनस्वरूपत्वान्नित्यत्वादित्यनुमानद्वय-मभिप्रेतमिति भावः ॥ **करणनिमित्त इति** । 'यत्सन्निकृष्टकरणेन यज्ज्ञानमुत्पन्नं स एव तस्य विषयो नान्य' इति ज्ञानानां विषयनियमः करणनिमित्तको वैशद्यभेदश्च भूयोऽवयवेन्द्रियसन्निकर्षादिरूपकरणनिमित्तकः ।

**शे०चं०**— भगवदवतारसूत्रकृज्ज्ञान एवोक्तस्यापवादे वक्तव्ये तदधीनमुक्तादिज्ञानेष्वपवादकथनं कैमुत्यार्थमित्याशयेनाह **तस्य मुक्तेषु तावदिति** । स्पष्टा चेत्यादिना श्रीदेव्यादिमतावप्युत्तरत्रापवादकथनात् तावच्छब्दः ॥ **शुद्धचितिरित्यादि** । अनेन शुद्धचितित्वं नित्यत्वं चेति हेतुद्वयमुक्तं भवति । तत्राद्यहेतुमुपपादयति **जडं हीति** । द्वितीयमुपपादयति **तथेति** । कुतश्चिज्जायत इति प्रतिज्ञाद्वये शेषः । ननु जडं हि कुतश्चिज्जायते न चेतनमित्युक्तरीत्या चितित्वमात्रेणैव मुक्तमतेः सत्त्वगुणजन्यत्वाभावसिद्धयोक्तापवादसिद्धेः किमिति शुद्धत्वेन चितेर्विशेषणम् । न च तस्या याथार्थ्योपपादनार्थत्वान्नानर्थकमिदमिति वाच्यम् । चितित्वमात्रेणैव तत्सिद्धिसम्भवेनास्य तादर्थ्यायोगादित्यतश्चितित्वमात्रस्य तदसाधकत्वात् तेन तदसिद्धया याथार्थ्योपपादनाय शुद्धत्वविशेषणस्यार्थवत्वादिति भावेन चेतनत्वमात्रस्य तदसाधकत्वव्युत्पादनपूर्वकं तत्साधकतया शुद्धत्वं व्यापारयति **दैत्यानामिति** ॥ **तर्हि कथं सम्यक्त्वमिति** । सत्त्वगुणाजन्यत्वे मुक्तमतेः सम्यक्त्वं कथमित्यर्थः । ननु चेतनत्वमात्रेण तदस्त्वित्यत उक्तं **दैत्यादीनां स्वरूपज्ञानेष्वविद्यमानमिति** । यदि मुक्तमतेश्चेतनत्वमात्रेण सत्त्वगुणजन्यत्वाभावेऽपि याथार्थ्यं तर्ह्यविशेषाद्दैत्यादीनां स्वरूपज्ञानस्यापि चेतनत्वाद्याथार्थ्यं स्यात् । न चैतदस्ति । अतो न चेतनत्वेन मुक्तमतेर्याथार्थ्यसिद्धिरिति भावः । ननु मुक्तमतेः कथं शुद्धत्वोक्त्याऽपि याथार्थ्यसिद्धिरित्यतः तद्व्याचष्टे **स्वाभाविकेति** । दैत्यानां स्वरूपज्ञाने बाह्यदोषराहित्यस्य सत्त्वात् तस्यापि सम्यक्त्ववारणाय **स्वाभाविकेत्युक्तम्** । तथा च शुद्धत्वेन स्वतस्त्वापवादकदोषरहितत्वलाभात् तदप्रामाण्यशङ्कायां निरस्तायां स्वत एव तद्याथार्थ्यसिद्धिरिति भावः । स्वाभाविकदोषराहित्यस्याप्रयोजकत्वात् सम्यक्त्वासाधकत्वमाशङ्क्य व्यतिरेकव्याप्त्युपदर्शनेन तत्परिहरति **स्वरूपेति** । शङ्कते **करणनिमित्त इति** । यत्सन्निकृष्टकरणेन यज्ज्ञानमुत्पद्यते स तस्य विषय इति व्यवस्थाश्रयणादिति भावः । **वैशद्यभेद इति** । रेखोपरेखाद्यशेषविषयकत्वमित्यर्थः ॥ **एवं वैशद्येऽपीति** । यदि मुक्तानां ज्ञानं नित्यं स्यात् तर्ह्यविशदं वा स्यादतिविशदमेव वा स्यादिति प्रसङ्ग इत्यर्थः ।

**वा०र०**— जडं हीति प्रतीकोपादाने कार्ये हिशब्दोऽवधारणार्थ इति मत्वा जडमेवेतीति सार्थं प्रतीकमुपादानम् । **प्रतिज्ञाद्वयमिति** । उपलक्षणं चैतत् । न चेतनमिति प्राचीनप्रतिज्ञायामपि शेष इत्यपि ज्ञेयम् । वाक्यावतारानन्तरमाकाङ्क्षाक्रमेण योजयन् भावमाह **तर्हि कथमित्यादिना** । ननु मुक्तमतेरिति पाठः । **स्वतस्त्वापवादकेति** । यथार्थस्योत्पत्तौ स्वतस्त्वापवादकेत्यर्थः । यज्ज्ञानमुत्पद्यत इति पाठः ।

**स०व्र०**— शङ्कते **करणेति** ॥ **एवं वैशद्येऽपीति** । यदि मुक्तानां ज्ञानं नित्यं स्यात् तर्ह्यतिविशदं वा स्यात् अविशदमेव वा स्यादित्यर्थः ।

**॥ इति मुक्त-लक्ष्मी-भगवज्ज्ञानानां जडभिन्नत्वात् न गुणजन्यत्वम् ॥**

* * *

**॥ अथ लक्ष्मीज्ञानस्य मुक्तज्ञानात् स्पष्टत्वं, भगवज्ज्ञानस्य असाधारणातिशयत्वं, लक्ष्मीचतुर्मुखज्ञानयोः प्रायः सादृश्यम् ॥**

१४ सु०— श्रीदेव्यामप्युक्तस्यापवादमाह **स्पष्टा चेति** ।

अनु०— स्पष्टा चैव श्रियो मतिः ।
महाशुद्धचितित्वेन

**श्रियो मतिश्च** सम्यक्त्वेऽपि गुणातीतेति सम्बन्धः । **महाशुद्धचितित्वेनेति** पूर्ववदेव तत्र हेतुः । **महच्छब्देन** कदाऽपि (बाह्य)दोषसम्बन्धो नास्तीत्युच्यते । **स्पष्टैवेति** मुक्तमतेरप्यतिशयेन विशदेत्यर्थः । एतदपि पूर्ववद्व्याख्येयम् ।

भगवज्ज्ञानेऽप्यपवादमाह **ततोऽपीति** ।

ततोऽप्यतिमहाचितिः ।
अशेषोरुविशेषाणामतिस्पष्टतया दृशिः ।
नित्यमेकप्रकारा च नारायणमतिः परा ।
सूर्यप्रभावदखिलं भासयन्ती निरन्तरा ।
निर्लेपा वीतदोषा च नित्यमेवाविकारिणी ॥

**नारायणमतिश्च** सम्यक्त्वेऽपि **परा** 'गुणेभ्य' इति शेषः । तत्र पूर्ववदेव हेतुः । ततः श्रियोऽप्यतिशयेन **महाशुद्धचितिः** । विशिष्यन्त इति विशेषाः पदार्थाः । अशेषाणामुरूणामनन्तानां विशेषाणां **दृशिः** विषयीकारिणी । अतिस्पष्टतयाऽशेषपदार्थविषयेत्येतदपि बहुला चातिविशदेतिवद्व्याख्येयम् । दृशिः साक्षात्कार इति वा । **नित्यमेकप्रकारेत्युत्पत्ति**विनाशरहितेत्ययमपि गुणातीतत्वे हेतुः । केचिदेकमेवेश्वरज्ञानमित्यास्थिताः । अपरे त्वनेकानीति । तद्विवेकार्थमुक्तं **निरन्तरा** निर्भेदेति । तर्हि किं तेषु तेषु पदार्थेषु ज्ञातेषु विक्रियते नेत्याह **नित्यमविकारिण्येवेति** । कथं तर्हि तत्तद्विषयीकरणमित्यत उक्तं **सूर्येति** । यथा सूर्यप्रभा स्वयं निर्विकाराऽपि तान् तान् प्राप्तान् विषयान् प्रकाशयति तथेयमपीत्यर्थः । अत्र

**च विशेष एव निर्वाहकः । अत एवैकेत्यनुक्त्वा निरन्तरेत्युक्तम् । निर्लेपा वीतदोषा चेति शुद्धत्वव्याख्यानम् । लेपः कर्मसम्बन्धः । महच्छब्दव्याख्यानं पूर्ववत् । यद्वा नित्यमेवेति तदर्थमत्रापि योज्यम् । परा स्वतन्त्रेत्यतिशब्दस्य व्याख्यानत्वेनापि व्याख्येयम् । अत एव तत्तन्त्रत्वाच्चेति वक्ष्यति ।**

**परि०— गुणातीतेति** । सत्त्वगुणजन्या नेति तदर्थः प्रागेवोक्त इति भावः । कुतो न जायत इत्यत आह **महाशुद्धेति** । जडमनित्यं च कुतश्चिज्जायते । स्वरूपचेतनात्मकं नित्यं च । श्रियो ज्ञानं कथं जायेत इति चेतनत्वं नित्यत्वं चेतिद्वयं चेतिपदलब्धं तत्र हेतुरित्यर्थः । दैत्यरक्षः-प्रभृतीनां स्वरूपज्ञानेऽविद्यमानं सम्यक्त्वं श्रीज्ञाने कथमित्यतः **शुद्धेत्युक्तम्** । स्वाभाविकदोष-रहितेत्यर्थः । **इति** पूर्ववदेव व्याख्येयमिति भावः ॥ **एतदपीति** । ननु **स्पष्टैवेत्य**स्यातिविशदैवे-त्यर्थः । तत्र वैशद्यविषयनियमयोः यत्सन्निकृष्टकरणेनेत्युक्त्या करणनिमित्तत्वात् कथं श्रियश्चिति-रजन्यापि विशदैवेत्युच्यत इत्यतः 'तन्माहात्म्ययोगतः' इत्येतदत्राप्याकृष्य तदुपपादकत्वेन व्याख्ये-यमित्यर्थः ॥ **परा गुणेभ्य इति** । गुणजन्या नेत्यर्थः । 'महाशुद्धचितिरि'त्यनन्तरमितिशब्दो-ऽध्याहार्यः ॥ तथात्वे इति तत्र पूर्ववदेव हेतुरित्यन्वयः श्लिष्टो भवति । व्याख्यातप्रायमेतत् ॥ **इतिवद्व्याख्येयमिति** । वैशद्यविषयनियमयोः करणनिमित्तत्वदर्शनेऽपि यथा मुक्तज्ञानानां 'नित्य-माहात्म्ययोगत' इत्यनेन बह्वर्थविषयकत्वं वैशद्यं चोपपादितं अत्रापि तथोपपादनं कार्यमित्यर्थः ॥ **गुणातीतत्व इति** । गुणाजन्यत्व इत्यर्थः ॥ **विक्रियत इति** । तत्तदाकारतया मायावादमत इव विकारवत्किमित्यर्थः । ननु निर्भेदज्ञानस्याविकारिणस्तदा तदा प्राप्तानेकपदार्थविषयकत्वं कथमित्यत आह **अत्र च विशेष एवेति** । ज्ञानगतसामर्थ्यलक्षणविशेष एव भेदप्रतिनिधितया भेदकार्यनिर्वाहक इत्यर्थः ॥ **अत एवेति** । विशेषनिर्वाह्यत्वसूचनार्थत्वादेवैकाऽखण्डेत्यनुक्त्वा 'निरन्तरा निर्भेदे'त्युक्त्या भेदप्रतिनिधिविशेषः सूचित इति भावः । अपौनरुक्त्यायाह **इति शुद्धत्वव्याख्यानमिति पूर्वव-दिति** । कदापि बाह्यदोषसम्बन्धो नेति वक्तुं महच्छब्दप्रयोग इति भावः ॥ **नित्यमेवेति** । नित्य-मेवेति पदद्वयं न केवलमविकारिणीत्यत्रान्वेति, किन्तु **तदर्थं** महच्छब्दव्याख्यानार्थं **अत्रापि** वीतदोष इत्यत्रापि योज्यमित्यर्थः । तथा च **निर्लेपेति** शुद्धत्वव्याख्यानम् । **नित्यमेव वीतदोषेति** मह-च्छब्दव्याख्यानमिति भावः । यद्वा **नित्यमे**वेत्येतत् तदर्थं दोषसम्बन्धस्य सार्वकालिकत्वार्थमत्रापि महच्छब्देऽपि योज्यमित्यर्थः ॥ **व्याख्यानत्वेनापीति** । न केवलं गुणेभ्यः परेति गुणातीतत्व-व्याख्यानत्वेनेत्यपेरर्थः ।

**यादु०— पूर्ववद्व्याख्येयमिति** । करणनिमित्तत्वाद्वैशद्यभेदस्य श्रीज्ञानस्य नित्यत्वे स न स्यादित्याशङ्कानिवर्तकतया तन्माहात्म्ययोगत इत्यस्याप्यनुवृत्तिं कृत्वा पूर्ववदुपपादनीयमित्यर्थः ॥ **इतिवद्व्याख्येयमिति** । उक्तशङ्कापरिहारस्तत्र यथा माहात्म्ययोगत इत्यनेन कृतः तथा अत्रापि तदनुवर्त्य कर्तव्य इत्यर्थः । **विक्रियत इति** । तत्तत्पदार्थविषयकत्वेनेति शेषः ॥ **निर्विकाराऽपीति** । स्वप्रकाश्यवस्तुकृतविशेषशून्याऽपीत्यर्थः । ननु तथेयमपीत्ययुक्तम् । स्वभावतो निर्विषयकत्वेन तत्र प्रकाश्यवस्तुकृतविशेषानुत्पत्तावपि भगवन्मतेः सविषयकत्वस्वाभाव्यात् तदा तदा प्राप्ततत्तद्वस्तुविषयकत्वरूपविशेषाणां तत्रोत्पत्त्यवश्यम्भावेन तदभिन्नाया मतेर्निर्विकारत्वस्य वक्तुमशक्यत्वात् । अन्यथेदानीमेतद्विषया भगवन्मतिरिति कादाचित्कव्यवहारानुपपत्तिरित्यत आह **अत्र चेति** । चशब्देन श्रीमुक्तमत्योर्ग्रहणम् । भगवन्मतेः तदा तदा प्राप्ततत्तद्वस्तुविषयकत्वस्वाभाव्येऽपि निर्विकारत्व इत्यर्थः ॥ **विशेष एवेति** । अत्र विशेषशब्देन शक्तिव्यक्त्यात्मकत्वरूपावस्थाविशेषः । भेदप्रतिनिधिभूतश्चेत्युभावपि विवक्षितौ ॥ ततश्चायमर्थः । स्यादयं दोषो यदि भगवदादिमतौ कादाचित्कव्यवहारास्पदानां तत्तद्वस्तुविषयरूपविशेषाणां तदातदोत्पत्तिरित्यङ्गीकुर्मः । न चैवम् । किन्तु शक्त्यात्मना पूर्वं विद्यमानानामेव तेषां तदातदा व्यक्त्योक्तव्यवहारास्पदत्वमिति । तत्र शक्तिव्यक्त्योरपि परस्परमभेदात् कथमेतदित्याशङ्कायामभेदेऽपि भेदकार्यकारी विशेष एव निर्वाहकतया वक्तव्य इति ॥ **अत एवेति** । विशेषसूचनार्थमेवेत्यर्थः । नित्यमविकारिण्येवाखिलं भासयन्तीत्यनेनोक्तरीत्या भेदकार्यं प्रदर्श्य निरन्तरेत्यनेन तत्र भेदप्रतिषेधे तदुपपादको विशेषः तत्र कल्पनीय इति सूचितमिति भावः । नन्वेवं वीतदोषेत्यनेन बाह्यदोषसम्बन्धाभावस्यापि शुद्धशब्दार्थतया सामान्यतो व्याख्याततत्वेन महच्छब्दवैयर्थ्यमित्यत आह **महच्छब्दव्याख्यानमिति** । न बाह्यदोषसम्बन्धाभावमात्रं महच्छब्दार्थः । किन्तु तस्य सार्वकालिकत्वमपि । अत एव पूर्वं कदाऽपीत्युक्तमिति भावः ॥ **अत्रापीति** । निर्लेपा वीतदोषा चेत्यत्रापीत्यर्थः । तथा च नित्यगेवेत्यनेनासमभिव्याहृतं निर्लेपेत्यादिकं शुद्धत्वव्याख्यानं, तत्समभिव्याहृतं महत्त्वव्याख्यानमिति ज्ञातव्यम् ।

**कं०रा०— श्रीदेव्यामपीति** । सम्यग्ज्ञानं सत्त्वगुणेन भवतीति यदुक्तं तस्य श्रीदेवीज्ञानेऽप्यपवादमाहेत्यर्थः । ननु स्पष्टैवेति लक्ष्मीज्ञानस्य मुक्तमतेरप्यतिशयेन वैशद्यं यदुक्तं करणनिमित्तस्य वैशद्यस्य अजन्यलक्ष्मीज्ञानेऽनुपपत्तिरित्यत आह **एतदपीति** । लक्ष्मीज्ञानस्य स्पष्टत्वमपि मुक्तज्ञानस्य स्पष्टत्ववत् 'तत्तन्माहात्म्ययोगत' इत्युक्तन्यायेन व्याख्येयमित्यर्थः ॥ **बहुला चातिविशदेतिवद्व्याख्येयमिति** । मुक्तस्य नित्यज्ञानस्य करणनिबन्धने बहुलार्थविषयत्वविशदत्वेन सम्भवत इत्याशङ्कायां 'तत्तन्माहात्म्ययोगत' इति यथोपपादनं कृतं तथा नारायणज्ञानस्य नित्यस्यातिस्पष्टतया दोषपदार्थत्वं न सम्भवतीत्याशङ्कायां माहात्म्ययोगात् सम्भवतीत्युपपादनं कार्यमित्यर्थः ॥ **अयमपि गुणातीतत्वे हेतुरिति** । उत्पत्तिविनाशरहितत्वस्य गुणजन्यत्वाभावरूपगुणातीतत्वाद्भिन्नतया तत्र हेतुत्वं न सम्भवतीति भावः ॥ **निरन्तरा निर्भेदेति** । निर्गतमन्तरं भेदो यस्याः सेति निरन्तरशब्दस्य निर्भेदार्थत्वमिति भावः ॥ **तर्हीति** । ईश्वरमतिर्निर्भेदाच्च तेषु तेषु पदार्थेषु जातेषु तत्तद्विषयीकारित्वेन विक्रियते किमित्याकाङ्क्षायां नेत्याहेत्यर्थः ॥ **तथेयमपीति** । यथा सूर्यप्रभांयास्तत्पदार्थ-

प्रकाशकत्वं स्वरूपभूतं तथेश्वरमतेरपि तत्तद्विषयीकारित्वं स्वरूपभूतमेव, अतो न विकार इति भावः । ईश्वरमतेर्थप्रकाशकत्वस्य स्वरूपभूतत्वे मतिरखिलं भासयतीत्याद्यपर्यायशब्दप्रयोगः कथमित्यत आह **अत्रेति** ॥ **निरन्तरेत्युक्तमिति** । निरन्तरेति भेदाभावोक्त्या भेदरहितस्थले भेदप्रतिनिधिविशेषस्यैव भेदकार्यनिर्वाहकत्वात् अत्र भेदकार्यनिर्वाहको विशेष एवेति सूच्यत इति भावः ॥ **महच्छब्दव्याख्यानमिति** । महच्छब्देन कदाऽपि बाह्यदोषसम्बन्धो नास्तीत्युच्यत इति महच्छब्दव्याख्याने पूर्ववदित्यर्थः । यद्यप्येतद्व्याख्यानं श्रियोऽप्यतिशयेन 'महाशुद्धचितिरि'त्यत्र कर्तव्यं तथाऽपि 'निर्लेपा वीतदोषा चे'ति शुद्धशब्दव्याख्यानस्य आचार्यैरिदानीं क्रियमाणत्वात् तत्प्रसङ्गान्महच्छब्दव्याख्यानं टीकाकारैरिदानीं क्रियत इति ध्येयम् । महच्छब्दव्याख्यानमाचार्यैरेव यथा कृतं भवति तथा योजनामाह **यद्वेति** ॥ **तदर्थमिति** । महच्छब्दव्याख्यानार्थमित्यर्थः । नित्यमेव निर्लेपा निर्दोषा चेति योजनायां कदाऽपि दोषसम्बन्धो नास्तीत्युक्तत्वान्महच्छब्दव्याख्यानमाचार्यैरेव कृतं भवतीति भावः । पूर्वं परेति पदं गुणेभ्यः परेति भगवन्मतेर्गुणातीतत्वपरमिति व्याख्यातम्, इदानीं तन्मतेः स्वातन्त्र्यपरतयाऽपि व्याख्येयमित्याह **परेति** । परा स्वतन्त्रेत्यपि व्याख्येयसम्बन्धः । किमर्थमेवं व्याख्येयमित्यत उक्तम् **अतिशब्दव्याख्यानत्वेनेति** । एवं व्याख्यानेऽतिमहाचितिरित्यत्र अतिशब्दव्याख्यानं भाष्यकारैरेव कृतं भवति। अतस्तदर्थमित्थं व्याख्येयमिति भावः ॥ **अत एवेति** । यतः परेत्यनेन भगवन्मतेः स्वातन्त्र्यं विवक्षितम्, अत एव तत्तन्त्रत्वाच्च केवलं न तादृशीत्यत्र लक्ष्मीमतेः पराधीनत्वाद्भगवन्मतिसादृश्यं नेति वक्ष्यतीत्यर्थः ।

**शे०चं०— उक्तस्येति** । सम्यग्ज्ञानं सत्त्वगुणेन भवतीत्युक्तस्येत्यर्थः । चैवशब्दयोर्विरुद्धार्थतयैकत्र सम्बन्धासम्भवात् स्पष्टा चैवेत्यत्र यथाश्रुतमेव शब्दसम्बन्धमभ्युपगम्य चशब्दं भिन्नक्रमतया योजयति **श्रियो मतिश्चेति** ॥ **पूर्ववदेवेति** । मुक्तमतेर्गुणातीतत्वे शुद्धचितित्वस्येव श्रियो मतेर्गुणातीतत्वे महाशुद्धचितित्वस्य हेतुत्वव्युत्पादनप्रकारो द्रष्टव्य इत्यर्थः । चितित्वमात्रमेव पूर्ववत् तन्मतेर्गुणातीतत्वहेतुरन्यद्याथार्थ्यापवादकदोषनिरासायेति विशेषणकृत्यमपि तद्वदेव द्रष्टव्यमिति भावः । शुद्धत्वमात्रेणैव पूर्ववत् तन्निरासससिद्धेर्महदिति विशेषणवैयर्थ्यमित्याशङ्क्य स्वाभाविकदोषराहित्यस्य शुद्धत्वविशेषणेन लाभेऽपि बाह्यदोषसम्बन्धस्य कदाऽप्यभावात् तल्लाभाय महदिति विशेषणमित्याशयेन तत्परतया महच्छब्दं योजयति **महच्छब्देनेति** । इदं च स्वरूपकथनार्थमिति ज्ञेयम् । स्पष्टैवेत्येवशब्दवैयर्थ्यमाशङ्क्य तत्तात्पर्यकथनेन परिहरति **स्पष्टैवेतीति** ॥ **एतदपीति** । स्पष्टैवेत्येतदपि पूर्ववद् 'बहुला चातिविशदे'तिवद्व्याख्येयमित्यर्थः । करणनिमित्तकत्वाद्वैशद्यभेदस्य लक्ष्मीज्ञानस्य स न स्यादित्याशङ्क्य नित्यत्वेऽपि तद्योग्यतानुसारेणातिविशदत्वस्योपपत्तिरिति व्याख्येयमित्याशयः ।

**अपवादमिति** । उक्तस्येति शेषः । **पूर्ववदेवेति** । यथा शुद्धचितित्वं मुक्तमतेर्गुणातीतत्वे हेतुर्यथा वा महाशुद्धचितित्वं श्रियो मतेर्गुणातीतत्वे हेतुः तथा ततोऽप्यतिमहाशुद्धचितित्वं भगवन्मतेर्गुणातीतत्वे हेतुरित्यर्थः । गृहीतग्राहिणां ज्ञानानामित्यादाविव प्रकृत्यर्थस्याविवक्षया विषयीकारित्वमत्र दृशिरित्यस्यार्थ इत्याशयेनाह **दृशिर्विषयीकारिणीति** । **इतिवद्व्याख्येयमिति** । ईश्वरज्ञानस्य नित्यत्वे विषयनियमो वैशद्यभेदश्च

न स्यात् । तस्य करणनिमित्तकतया नित्येश्वरज्ञाने तदयोगादित्याशङ्क्य तन्माहात्म्ययोग्यतया तदुपपत्तिरिति व्याख्येयमित्यर्थः । दृशिरित्यत्र प्रकृत्यर्थस्याविवक्षाऽऽश्रयणीया भवतीत्यपरितोषादाह **दृशिः साक्षात्कार इति वेति** ॥ **विक्रियत इति** । तत्तत्पदार्थविषयकत्वेनेति शेषः ।

ननु दृष्टान्तमात्रस्यानिर्णायकत्वस्वाभाव्याद्भगवन्मतेः तदा तदा प्राप्ततत्तद्वस्तुविषयकत्वरूपविशेषाणां तत्रोत्पत्त्यवश्यम्भावेन तदभिन्नाया मतेः न निर्विकारत्वम् । अन्यथेदानीमेतद्विषया भगवन्मतिरिति कादाचित्क-व्यवहारानुपपत्तिप्रसङ्गात् इत्यत आह **अत्र चेति** । भगवन्मतेः तदा तदा प्राप्ततत्तद्वस्तुविषयकत्वस्वाभाव्येऽपि निर्विकारत्व इत्यर्थः । चशब्देन श्रीमुक्तमत्योः सङ्ग्रहः । विशेषशब्दश्च शक्तिव्यक्त्यात्मकत्वरूपावस्थाविशेष-वचनः । अयमर्थः । स्यादयं दोषो यदीश्वरादिमतिषु कादाचित्कव्यवहारास्पदानां तत्तद्वस्तुविषयकत्वरूप-विशेषाणां तदा तदोत्पत्तिरिति स्यात् । न चैवम् । किं नाम शक्त्यात्मना पूर्वं विद्यमानानामेव तेषां तदा तदा व्यक्त्योक्तव्यवहारास्पदत्वमिति । ननु शक्तिव्यक्त्योरपि परस्परमभेदात् कथमेतदपीत्यत्राप्येतदेवोत्तरम् ॥ **अत्र चेति** । शक्तिव्यक्त्योरभेदे चेत्यर्थः । **विशेषः** अभेदेऽपि भेदकार्यसम्पादनक्षमो विशेष एव निर्वाहक इत्यर्थः । भवेदेतद्यदि विशेषोऽपि ग्रन्थकृत्सम्मत इति स्यात् । तदेव कुतः सिद्धमित्यत आह **अत एवेति** । विशेषस्य ग्रन्थकृत्सम्मतत्वादेवेत्यर्थः । यद्वा विशेषसूचनार्थमेवेत्यर्थः । नित्यमविकारिण्येवाखिलं भासयन्तीत्यनेन भेद-कार्यमुपदर्श्य तत्कार्यकारकतया प्रसक्तं भेदं प्रतिषेद्धुं **निरन्तरेत्युक्तम्** । अन्यथैकैवेत्येवावक्ष्यदित्यर्थः । केचित्तु 'नैकस्या भगवन्मतेरनेकविषयत्वं तस्य भेदसाध्यत्वादित्यतो भेदाभावेऽपि तत्प्रतिनिधिविशेषसद्भावात् तद्बले-नैकस्या अपि भगवन्मतेरनेकविषयत्वमुपपन्नमेवेत्याह **अत्र चेति** । एकस्यानेकविषयत्वे चेत्यर्थः । चरस्त्वर्थः ॥ **अत एवेति** । भेदाभावेऽपि तत्कार्यनिर्वाहकविशेषाभ्युपगमादेवेत्यर्थः' इत्याहुः । अन्ये तु 'नन्वेतावता ज्ञाना-नेकत्वपक्षोऽभ्युपगतः स्यात् । न चासौ सम्भवति । अनेकत्वस्य भेदव्याप्तत्वेनैव भेदस्यापि तथा सति प्रसङ्गात् तस्य च प्रमाणविरुद्धत्वात् इत्यत आह **अत्र चेति** । ईश्वरज्ञानस्य भेदं विनाऽप्यनेकत्वे इत्यर्थः । ननु भवेदेवं यदीश्वरज्ञानानेकत्वं ग्रन्थकृत्सम्मतं स्यात् । तत्रैव किं नियामकमित्यत आह **अत एवेति** । ईश्वरज्ञान-स्यानेकत्वाभावे एकेत्येव ब्रूयान्न तु निर्भेदेति । तथाऽनुक्त्या निर्भेदेत्युक्त्या च ग्रन्थकृतोऽप्येतत्सम्मतमिति ज्ञायत इत्यर्थ' इत्याहुः । 'एकेत्युक्तौ बहुत्वानापत्त्या तत्प्रयोजकभेदस्याप्यप्रसक्ततया तन्निरासानुपपत्तेरखिलं भासय-न्तीति बहुत्वप्रयोजकभेदकार्यमभिधाय निरन्तरेति तन्निराकरणात् तत्प्रयोजकभेदप्रतिनिधिविशेषाङ्गीकारो ज्ञायत इत्यर्थः' इत्यप्याहुः ।

ननु भगवन्मतेरतिमहाशुद्धचितित्वप्रतिपादकेन 'ततोऽप्यतिमहाचितिरि'ति विशेषणेनैव शुद्धत्वकथनात् तत्प्रतिपादकस्य निर्लेपेत्यादेः पौनरुक्त्यमित्यतो व्याख्यानव्याख्येयभावान्न तदित्याशयेनाह **निर्लेपेत्यादि** । ननु वीतदोषेत्यस्य भवतु तद्व्याख्यानत्वं निर्लेपेत्यस्य तु कथमित्यतो लेपपदस्य पुण्यपापरूपकर्मसम्बन्धपरत्वेन दोषवाचकत्वात् तस्यापि शुद्धत्वव्याख्यानत्वोपपत्तिरित्याशयेन लेपपदार्थमाह **लेप इति** । ननु निर्लेपा वीतदोषा चेत्यनेन ततोऽपीत्येतत्पूर्ववाक्योक्तशुद्धत्वस्य व्याख्यानेऽपि तत्रोक्तमहत्त्वस्याव्याख्यानान्नास्य पूर्वेण व्याख्यान-

व्याख्येयभावो युक्त इत्यतो महाशुद्धचिनित्वेनेत्यत्रत्यमहच्छब्दव्याख्यानस्यैव 'ततोऽप्यतिमहाचितिरि'त्यत्रत्य-महच्छब्दव्याख्यानत्वसम्भवान्न पुनस्तदव्याख्यानं दोषायेत्याशयेनाह **महच्छब्देति** । अत्र पक्षे कस्यचित्पूर्वं व्याख्यानं कस्यचिदेव त्विदमिति वैचित्र्यमाश्रयणीयं भवतीत्यरुच्या पक्षान्तरमाह **यद्वेति** ॥ **तदर्थं** महच्छब्द-व्याख्यानार्थम् । नित्यमेवेति पदमत्रापि निर्लेपा वीतदोषा चेत्यत्रापि योज्यम् । न केवलमविकारिणीत्यत्रैव नित्यमिति सम्बन्ध्यते किन्तु निर्लेपेत्यादावपीत्यपिशब्दार्थः । ततश्च, ततोऽप्यतिमहाचितिरिति पूर्ववाक्योक्त-महत्त्वस्य नित्यमेवेत्यनेन, शुद्धत्वस्य च निर्लेपा वीतदोषा चेत्यनेन, व्याख्यानान्न व्याख्यानव्याख्येयभावानुप-पत्तिरिति भावः । यद्वा महच्छब्दार्थभूतकदाऽपिबाह्यदोषसम्बन्धाभावान्तर्गतकदाऽपीत्यंशस्यात्रानुक्तेः कथं व्याख्यानव्याख्येयभाव इत्यत आह **यद्वेति** ॥ **तदर्थं** महच्छब्दव्याख्यानोपपादनार्थं । नित्यपदस्यान्वयानन्व-याभ्यां यद्वेति पक्षान्तरोक्तिरिति ध्येयम् । तथाऽपि 'अतिमहाचितिरि'त्यत्रत्यातिशब्दस्याव्याख्यानान्न व्याख्यान-व्याख्येयभावः सम्भवतीत्यत आह **परा स्वतन्त्रेतीति** । न केवलं परेत्यस्य भगवन्मतेर्गुणातीतत्वोपपादकत्वं किं तु 'अतिमहाचितिरि'त्यत्रत्यातिशब्दार्थकथनत्वमपीत्यपिशब्दार्थः । **अत एवेति** । ईश्वरज्ञानस्यातिशब्देन स्वातन्त्र्यस्योक्तत्वादेवेत्यर्थः । **वक्ष्यति** लक्ष्मीज्ञान इति शेषः ।

**वा०र०— चैवशब्दयोरिति** । स्पष्टा चैवेत्यत्रत्ययोरित्यर्थः । **भिन्नक्रमतयेति** । यद्यपि स्पष्टैवेत्यनेन वैशद्योक्तावपि बह्वर्थविषयकत्वसमुच्चयसिद्ध्यर्थं चशब्द इति न विरुद्धार्थत्वमिति तत्परिहाराय भिन्नक्रमत्वं नावश्यकम् । तथापि निर्देशार्थं चशब्दसम्बन्धाभावेऽपवादकत्वं तु विज्ञेयमित्यतः उक्तसमुच्चयसिद्ध्यर्थस्यापि तस्य तत्रैव श्रिय इत्यत्रापि सम्बन्ध इत्याशयेन भिन्नक्रमत्वोक्तिः । अत्र चशब्देन बहुत्वस्य समुच्चयाभिधानं तु मूलकृताऽनाश्रितत्वात् । तत्रोक्तरीत्या मूलाशयवर्णने च स्ववाक्यस्याप्युपलक्षणया व्याख्यानोपपत्तेरित्याशयेन । एवं स्पष्टैवेति मुक्तमतेरपीति मूलमप्युपलक्षणतया ज्ञेयम् । एतदपीति वाक्यव्याख्यानावसरे स्पष्टतामात्रोप-पादकत्वेन व्याख्यानप्रदर्शनं तु मूले श्रीमतेः स्पष्टं बहुत्वानभिधानादित्याशयेन । अवश्यं चैतदेवं नित्यत्वे कारणशून्यत्वापत्त्या तया वैशद्याभावस्येव नियतविषयत्वाभावस्यापि मुक्तमताविव प्रागुक्तरीत्या प्राप्तेस्तत्परि-हाराय बहुलत्वोपलक्षणतया व्याख्येयत्वादित्यादि ज्ञेयम् ।

**गृहीतेति** । यथा गृहीतग्राहिणामित्यभियुक्तप्रयोगस्थले गृहीतगोचराणामित्येतावतैव पूरणाद्ग्राहिणा-मित्यस्य वैयर्थ्यप्रसङ्गात् तदवैयर्थ्याय ग्राहिणमित्यस्य विषयीकारित्वरूपधर्ममात्रमित्यर्थः । न तु विषयीकारि-स्वरूपं ज्ञानमर्थः । एवं दृष्टिरित्यत्रापि प्रेक्षणरूपधर्मिपरित्यागेन धर्मिनिष्ठविषयीकरणरूपधर्ममात्रमर्थः । अत एव उक्तं *मुरारिणा तर्कभाषाव्याख्यायाम्* अत्र प्रकृत्यर्थोऽविवक्षितः । तथा च विषयीकरणमिति । एवमन्यत्रापीति भावः । माहात्म्ययोगतस्तदुपपत्तिरिति पाठः । तन्माहात्म्यम् । तस्य विष्णोर्माहात्म्यं तदेव योगो निमित्तमिति पूर्ववद्व्याख्येयम् । **इदमितीति** । निर्लेपा वीतदोषा चेत्येतदित्यर्थः । तदर्थमित्यनूद्य महच्छब्देति व्याख्यानम् । अत्र पक्षे पूर्ववद्व्याख्यायोगादाह **महच्छब्दव्याख्यानेति** । नन्वेवं निर्लेपा वीतदोषाश्चेत्यस्यैव शुद्धत्वं महत्त्व-व्याख्यानरूपत्वमुक्तम् । तत्किं पक्षभेदः तदनभिधानेन । प्रथमत एव उभयथा व्याख्यानोपपत्तेरित्यतो भवेदेवं

यथावच्छुद्धत्वव्याख्यानं तावत एव महत्त्वव्याख्यानं तावत एव शुद्धव्याख्यानतेति स्यात् । न चैवम् । किन्तु नित्यपदानन्वितमेव निर्लेपे तच्छुद्धत्वव्याख्यानं तदन्वितत्वं तु महत्त्वव्याख्यानमिति विशेषान्न प्रथमत एवोभयार्थतायां अविशेषेण व्याख्यानमित्याशयेनाह **नित्यपदस्येति** । नित्यपदव्याख्यानान्वयः पूर्वपक्षे । उत्तरत्र तदन्वय इति विवेकः । अन्वयानन्वयाभ्यां निमित्ताभ्यां सर्वपक्षाद्यद्वेति पक्षान्तरमुक्तमित्यर्थः ।

**स०व्र०— पूर्ववदेवेति** । शुद्धचितिरित्यस्य यथा गुणातीतत्वे हेतुत्वमुपपादितं यद्वदित्यर्थः । **एतदपीति** । स्पष्टा चैवेत्येतदपि पूर्ववद् 'बहुला चातिविशदा चे'ति पूर्ववत् व्याख्येयमित्यर्थः । लक्ष्मीज्ञानस्य नित्यत्वे विषयनियमवैशद्ये न स्यातामित्याशङ्क्य तद्योग्यतानुसारेण लक्ष्मीज्ञानस्यातिविशदत्वस्य चशब्दोक्तस्य बहुलार्थविषयत्वस्य चोपपत्तिरिति व्याख्येयमिति भावः ॥ **पूर्ववदेवेति** । शुद्धचितिर्यत इत्येतद्वत् ततोऽप्यतिमहाचितिरिति गुणातीतत्वे हेतुरित्यर्थः । **अतिस्पष्टतयेति** । ईश्वरज्ञानस्य नित्यत्वे विषयनियमो वैशद्यभेदश्च न स्यात् इत्यत्र तात्पर्यम् । तद्योग्यतया तदुपपत्तिरिति व्याख्येयमित्यर्थः । न चैकस्यानेकविषयत्वं कथम् । तस्य भेदनिमित्तत्वादित्यतः भेदाभावेऽपि तत्प्रतिनिधिविशेषबलेनैकस्या अपि भगवन्मतेः अनेकविषयत्वमुपपन्नमित्याह **अत्र चेति** । एकस्यानेकविषयत्वे चेत्यर्थः । चस्त्वर्थे ॥ **अत एवेति** । भेदकार्यनिर्वाहकविशेषाभ्युपगमादेवेत्यर्थः । यद्वा नन्वेतावता ज्ञानानेकत्वपक्षोऽभ्युपगतः स्यात् । स च अनुपपन्नः अनेकत्वस्य भेदव्याप्तत्वेन भेदाङ्गीकारापत्तेः तस्य च प्रमाणविरुद्धत्वादित्यत आह **अत्र चेति** । ईश्वरज्ञानस्य भेदं विनाऽप्यनेकत्वरूपार्थ इत्यर्थः । नन्वीश्वरज्ञानानेकत्वस्य ग्रन्थकृदभिमतौ किं मानमित्यत आह **अत एवेति** । ईश्वरज्ञानस्यानेकत्वाभावे एकेत्येव प्रब्रूयात् । तथानुक्त्यैवैतज्ज्ञायत इत्यर्थः । ननु महाशुद्धचितित्वस्य ततोऽप्यतिमहाचितिरित्यनेनोक्तत्वात् 'निर्लेपा वीतदोषा चे'त्यनेन तदुक्तौ पौनरुक्त्यमित्यतो व्याख्यानव्याख्येयभावान्न दोष इत्याह **निर्लेपेत्यादिना** । ननु निर्लेपा वीतदोषा चेत्यनेन शुद्धत्वव्याख्यानेऽपि तत्रोक्तस्य महेत्यस्याव्याख्यानात् न व्याख्यानव्याख्येयभाव इत्यत आह **महच्छब्दव्याख्यानं पूर्ववदेवेतीति** । महाशुद्धचितित्वेनेत्यत्र महच्छब्दे यद्व्याख्यानं तदेव ततोऽप्यतिमहाचितिरित्यत्र महच्छब्दव्याख्यानमिति न पुनस्तद्व्याख्यातमिति भावः ॥ **नित्यमेवेति** । **तदर्थं** महच्छब्दव्याख्यानार्थं नित्यमेवेति पदं निर्लेपा वीतदोषा चेत्यत्रापि योज्यम् । न केवलमविकारिणीत्यत्रैव नित्यमिति सम्बध्यते किन्तु निर्लेपेत्यादावपीत्यपिशब्दार्थः । अयं भावः । व्याख्यानव्याख्येयभावेन पौनरुक्त्यपरिहारो युक्तः । ततोऽप्यतिमहाचितिरिति पूर्वमुक्तं इदानीं च नित्यं निर्लेपा वीतदोषा चेति व्याख्यानव्याख्येयभावस्योपपन्नत्वात् । ननु महच्छब्दार्थभूतकदापिबद्धदोषसम्बन्धातीतत्वान्तर्गतकदापीत्यस्य अत्र अनुक्तेः कथं व्याख्यानव्याख्येयभाव इत्यत आह **यद्वेति** ॥ **तदर्थं** महच्छब्दोपपादनार्थम् । नित्यपदस्यान्वयानन्वयाभ्यां **यद्वेति** पक्षान्तरत्वोक्तिरिति ध्येयम् । ततोऽप्यतिमहाचितिरित्यत्रत्यातिशब्दार्थाकथनात् कथं व्याख्यानव्याख्येयभावः तत्र आह **परेति** । न केवलं परेत्येतस्य भगवन्मतेर्गुणातीतत्वप्रतिपादकत्वं किं नाम अतिमहाचितिरित्यत्र अतिशब्दव्याख्यानत्वमपीत्यपिशब्दार्थः ॥ **अत एवेति** । ईश्वरज्ञानस्यातिशब्देन स्वातन्त्र्यस्योक्तत्वादेवेत्यर्थः ।

* * *

१५ सु०— एतानि विशेषणानि लक्ष्मीज्ञानेऽप्यतिदिशति विशेषानिति ।

अनु०— विशेषांस्तद्गतांस्त्यक्त्वा प्रायस्तल्लक्षणा श्रियः ।

**तद्गतान्** भगवद्गतान् तानि लक्षणानि यस्याः सा तथोक्ता । **श्रियः** मतिः प्रतिपत्तव्येति शेषः । भगवद्गताशेषविशेषविषयीकारित्वं विहाय अन्यधर्मवती ज्ञातव्येत्यर्थः । **प्राय** इत्युक्तस्य तात्पर्यमाह **तथैवेति** ।

तथैव स्पष्टताभावात् तत्तन्त्रत्वात्तु केवलम् ।
न तादृशी

यथा भगवन्मतेर्निरतिशयस्पष्टत्वं **तथैव** । **केवलं तत्तन्त्रत्वात्** भगवन्मात्राधीनत्वात् । अत्र **केवलमिति** स्वरूपकथनम् । पराधीनत्वादित्येव हेतुः । **तादृशी** भगवन्मतिसदृशी । अतः **प्राय** इत्युक्तमिति भावः ।

परि०— **स्वरूपकथनमिति** । तत्तन्त्रत्वमात्रस्य 'न तादृशी'त्यत्र हेतुत्वसम्भवादिति भावः ।

कं०रा०— **प्राय इत्युक्तस्येति** । श्रियो मतिर्भगवद्गताशेषविशेषविषयीकारित्वरूपभगवन्मतिधर्मं विहाय प्रायोऽन्यधर्मवतीति यदुक्तं तत्र प्राय इत्यस्य तात्पर्यमाहेत्यर्थः ॥ **केवलमिति** । लक्ष्मीमतेः स्वतन्त्रत्वाकारेण भगवन्मतिसादृश्यं नेत्यत्र पराधीनत्वस्यैव हेतुत्वसम्भवात् केवलं तत्तन्त्रत्वादित्यत्र केवलमित्येतत्स्वरूपकथनपरमित्यर्थः ।

शे०चं०— श्रियो मतेः भगवन्मतिसादृश्याभावे निरतिशयस्पष्टत्वाभावस्येव भगवन्मात्राधीनत्वस्य हेतुत्वमिति भ्रमनिरासायाह **अत्र केवलमितीति** । श्रियो मतेः भगवन्मात्राधीनत्वमेव न तु हिरण्यगर्भादिज्ञानवत् तदितराधीनत्वमप्यस्तीति वस्तुस्थितिकथनार्थमेव केवलं तत्तन्त्रत्वादिति तस्या भगवन्मात्राधीनत्वमुक्तं न तु तस्या भगवन्मतिसादृश्याभावे तस्य हेतुशरीरप्रविष्टत्वाभिप्रायेण तत्कीर्तनमित्यर्थः । उक्ताभिप्रायेणैव लक्ष्मीज्ञानस्य भगवन्मात्राधीनत्वमुक्तमित्येव किं न स्यात् किं स्वरूपकथनत्वाश्रयणेनेत्यत आह **पराधीनत्वादित्येवेति** । तावतैव श्रीमतेरपराधीनभगवन्मतिसादृश्याभावसमर्थनादिति भावः । अत्र लक्ष्मीज्ञानस्येव भगवज्ज्ञानस्यापि भगवदधीनत्वेन तन्मात्रेण लक्ष्मीज्ञानस्य भगवन्मतिसादृश्याभावसिद्ध्यनुपपत्तेर्भगवदधीनत्वादित्यनुक्त्वा पराधीनत्वादित्युक्तमित्यवधेयम् ॥ **अत इति** । श्रीमतेः भगवन्मतिसादृश्याभावादित्यर्थः ।

१६ **सु०— लक्ष्मीमतिविशेषणानि मुक्तब्रह्ममतावतिदिशति ब्रह्मणस्त्विति ।**

**अनु०— ब्रह्मणस्तु प्रायेणैवं श्रियो यथा ।**

**ब्रह्मणस्तु** मतिः **श्रियो यथैवं प्रायः** । तथा वैशद्याद्यभावात् **प्राय** इत्युक्तम् । केवलमित्युक्त्यभावाच्च । अत एव तत्र तदुक्तम् ।

**परि०— वैशद्यादीति** । अत्रादिपदेनेश्वरविषये श्रियो मतेरिवाधिकविषयत्वाभावादिति गृह्यते । **केवलमित्युक्तीति** । तस्य भगवन्मात्राधीनत्वार्थपरत्वेन ब्रह्ममतेश्चेशरमोभयाधीनत्वात् तदभिप्रायेण प्राय इत्युक्तमित्यर्थः ॥ **अत एवेति** । ब्रह्ममतिव्यावृत्त्यर्थत्वादेवेत्यर्थः ॥ **तत्रेति** । श्रीप्रकरणे केवलमित्युक्तमित्यर्थः ॥ अस्मिन्पक्षे न स्वरूपकथनं तदिति भाति ।

**यादु०— केवलमित्युक्तीति** । एवमित्यतिदिष्टे तत्तन्त्रत्वादिति ब्रह्ममतिविशेषणे केवलमित्युक्तेरयोग्यतापराहतत्वेनाभावादित्यर्थः । न हि ब्रह्ममतिः केवलं भगवत्तन्त्रा किन्तु रमातन्त्राऽपि तथा च भगवत्तन्त्रत्वरूपविशेषणे केवलमित्युक्तिः । नापि प्रायःपदव्यावर्त्येति भावः । केवलमित्युक्तिर्वचनं यस्येति बहुव्रीहेर्विवक्षितत्वेन कैवल्याभावाच्चेत्यर्थ इत्यप्याहुः ॥ **अत एवेति** । प्रायःपदव्यावर्त्यप्रदर्शनार्थमेवेत्यर्थः । तथा च स्वरूपकथनार्थमेव तन्न भवतीति भावः ।

**कं०रा०— केवलमित्युक्त्यभावाच्चेति** । केवलं तत्तन्त्रत्वादिति लक्ष्मीमतेर्यद्भगवन्मात्राधीनत्वमुक्तं तस्य ब्रह्ममतावभावाच्चेत्यर्थः ॥ **अत एवेति** । प्राय इत्यनेन केवलतत्तन्त्रत्वस्य व्यावर्त्यदिव लक्ष्मीज्ञाने केवलं तत्तन्त्रत्वमुक्तमित्यर्थः । अनेन स्वरूपकथनपरस्य केवलमित्यस्य प्रयोजनमुक्तं भवति ।

**शे०चं०— तथेति** । लक्ष्मीमतेर्यथा वैशद्यं तथा वैशद्याभावादित्यर्थः । तदुक्तौ निमित्तान्तरमाह **केवलमित्युक्त्यभावाच्चेति** । केवलमित्यनेन यल्लक्ष्मीज्ञानस्य भगवन्मात्राधीनत्वमुक्तं तस्य मुक्तब्रह्ममतावभावाच्च प्राय इत्युक्तमित्यर्थः । तस्य भगवदधीनत्ववल्लक्ष्म्यधीनत्वस्यापि सद्भावेन भगवन्मात्राधीनत्वाभावादिति भावः ॥ **अत एवेति** । मुक्तब्रह्मज्ञानस्य भगवन्मात्राधीनत्वाभावादेवेत्यर्थः । तत्र लक्ष्मीज्ञाने तन्मात्राधीनत्वमित्यर्थः । लक्ष्मीज्ञानस्य भगवन्मात्राधीनत्वोक्त्यन्यथाऽनुपपत्त्या मुक्तब्रह्मज्ञानस्य तदभावसिद्धेर्युक्ताऽत्र प्राय इत्युक्तिरिति भावः ।

**वा०र०— प्रसिद्धावित्यविरोध** इति पाठः । एते च पक्षा औत्प्रेक्षिकाः यत्र मध्यमोऽन्यथाख्यातिकारैरनुसृतोऽपि प्रमाणानुपन्यासादयुक्तं तेषां तदनुसरणम् **भगवन्मात्राधीनत्वमेवेति** । स्वातिरिक्तेशमध्ये भगवन्मात्राधीनत्वमित्यर्थः । तेन लक्ष्मीज्ञानेनासम्भव इत्युक्तमस्य स्वरूपकथनत्वमिति ज्ञेयम् । **अधीनत्वादित्युक्तमिति** । भगवतश्च स्वापेक्षया परतत्त्वाभावादिति भावः । **लक्ष्म्यधीनत्वस्यापीति** । स्वातिरिक्तलक्ष्म्य-

धीनत्वस्यापीत्यर्थः । तेन लक्ष्मीव्यावृत्तिसिद्धिरिति ज्ञेयम् । तस्य प्रायिकताया अपीति पाठः । **प्रमाणवाक्यमिति** । भाष्योदाहृतमित्यर्थः ।

**स०व्र०—** प्राय इत्युक्तौ निमित्तान्तरमाह **केवलमित्युक्त्यभावाच्चेति** । केवलमित्यनेन यल्लक्ष्मीज्ञानस्य भगवन्मात्राधीनत्वमभिहितं तस्य ब्रह्ममतावभावाच्च प्राय इत्युक्तमिति भावः । तस्य भगवदधीनत्ववत् लक्ष्म्यधीनत्वस्यापि सद्भावेन तन्मात्राधीनत्वस्याभावादिति भावः ॥ **अत एवेति** । ब्रह्मज्ञानस्य भगवन्मात्राधीनत्वाभावादेवेत्यर्थः । अत्र लक्ष्मीज्ञाने तन्मात्राधीनत्वमुक्तमित्यर्थः । यदि ब्रह्मज्ञानस्यापि भगवन्मात्राधीनत्वं स्यात् तर्हि लक्ष्मीज्ञानस्योच्यमानं भगवन्मात्राधीनत्वमयुक्तं स्यात् । तथा च तदन्यथानुपपत्त्या ब्रह्मज्ञानस्य तन्मात्राधीनत्वाभावात् प्राय इत्युपपद्यत इति ॥

**॥ इति लक्ष्मीज्ञानस्य मुक्तज्ञानात् स्पष्टत्वं, भगवज्ज्ञानस्य असाधारणातिशयत्वं, लक्ष्मीचतुर्मुखज्ञानयोः प्रायः सादृश्यम् ॥**

* * *

**॥ अथ चतुर्मुखेतरमुक्तज्ञानं सागरतरङ्गवत् वृद्धिहासयुक्तं, संसारिज्ञानं तु अग्नेः अग्निज्वालोत्पत्तिवत् अन्तःकरणजन्यम् ॥**

१७ **सु०—** ब्रह्मण इति विशिष्याभिधाने को हेतुरित्यत आह **मुक्तानां त्विति** ।

## अनु०— मुक्तानां तु तदन्येषां समुद्रतरलोपमा ।

विशेषबलेन वृद्धिहासवतीत्यर्थः । **यथोक्तं** 'अवृद्धिहासरूपत्वमि'त्यादि । मुक्तग्रहणस्य तात्पर्यमाह **अग्नीति** ।

## अग्निज्वालावदेव स्यात् सृतिगानां दृशो भवः ।

**अग्निज्वालाया** अग्नेरिव संसारिणां **दृशः** अन्तःकरणात् **भव** उत्पत्तिरेव स्यात् न तु व्यक्तिमात्रम् ।

**परि०—** 'समुद्रतरलोपमे'त्यस्य तात्पर्यार्थः **वृद्धिहासवतीति** । शक्तिव्यक्त्यात्मना बह्वर्थाल्पविषयिणीत्यर्थः । निर्भेदमतौ कथमेतदित्यत उक्तम् **विशेषबलेनेति** ॥ **यथोक्तमिति** । एतदध्यायान्ते 'भोगमात्रसाम्यलिङ्गाच्चे'ति सूत्रभाष्ये । 'अवृद्धिहासरूपत्वं मुक्तानां प्रायिकं भवेत् । कादाचित्कविशेषस्तु नैव तेषां निषिध्यते' इत्युक्तमित्यर्थः ।

**यादु०— अवृद्धिहाससरूपत्वमित्यादीति** । 'अवृद्धिहाससरूपत्वं मुक्तानां प्रायिकं भवेत् । कादाचित्कविशेषस्तु नैव तेषां निषिध्यत' इति भाष्योदाहृतवचने इदमुक्तमित्यर्थः । इदं च ज्ञानोत्तरकृतोपासनादिजनितपुण्यातिशयलब्धभोगविशेषभावाभावनिमित्तकमिति मन्तव्यम् ।

**शे०चं०— विशेषबलेन वृद्धिहासवतीत्यर्थ इति** । ननु कथं चतुर्मुखेतरमुक्तमतेर्वृद्धिह्रासवत्त्वं 'गुणदोषैः सुखस्यापि वृद्धिह्रासौ विमुक्तगौ । नृणामि'त्युक्तरीत्या मनुष्याणां सुखपदोपलक्षितज्ञानादेर्मुक्तौ वृद्धिह्रासवत्त्वेऽपि 'सुराणां मुक्तौ तु सुखं क्लृप्तं यथाक्रममि'त्यनेन देवानां मुक्तौ ज्ञानादीनां गुणानां वृद्धिह्रासाभावाभिधानात् । न चात्रापि चतुर्मुखेतरमुक्तमात्रस्य मतेः न वृद्धिह्रासावुच्येते किन्तु मनुष्याणामेवेत्यविरोध इति वाच्यम् । मुक्तानां तु तदन्येषामिति मूलग्रन्थास्वारस्यप्रसङ्गात् । 'समुद्रतरलोपमेति मुक्तरुद्रादिमतेः सङ्कोचविकासप्रकारो दर्शितः । अग्निज्वालावदिति अमुक्तरुद्रादिमतेरेवंरूपत्वातिशयो दर्शित' इति सन्न्यायरत्नावलीविरोधापाताचेति चेन्न । उदाहृतग्रन्थद्वयानुरोधेनात्र टीकायां सङ्कोचविकासरूपयोरेव वृद्धिह्रासयोरभिमततया निषिद्धवृद्धिह्रासपरत्वाभावेनाविरोधात् । ज्ञानोत्तरकृतोपासनादिजनितपुण्यातिशयलब्धभोगविशेषभावाभावयोरेव वृद्धिह्रासशब्दार्थतया विवक्षितत्वादविरोधः । 'भोगानां तु विशेषेषु वैचित्र्यं लभ्यते क्वचिदि'ति वचनादित्यप्याहुः । बहुपरिमाणत्वाल्पपरिमाणत्वरूपावेव वृद्धिह्रासाविहाभिमतौ 'अल्पतेजस्तथैवाल्पं जीवरूपं हि संसृतौ । करोति सुमहत्तेज' इति बृहद्भाष्यवचनान्न तु प्रसिद्धावित्यविरोध इत्यप्याहुः । तदन्यमुक्तमतेर्वृद्धिह्रासवत्त्वाभ्युपगमे 'न हीयते यत्र गत्वे'ति वृद्ध्याद्यभावप्रतिपादकश्रुत्यादिविरोध इत्यतः तस्य प्रायिकतयाऽपि प्रमाणेनैव प्रतिपादनान्न तद्विरोध इति भावेन तत्प्रायिकत्वप्रतिपादकं प्रमाणवाक्यं पठति **यथोक्तमिति** । अत्रोक्तयोरपि वृद्धिह्रासयोः सङ्कोचविकासमात्ररूपत्वेन निषिद्धवृद्धिह्रासरूपत्वाभावान्न कश्चिद्विरोध इति हृदयम् ।

**स०व्र०— विशेषबलेन वृद्धिह्रासवतीत्यर्थ इति** । ननु कथं चतुर्मुखेतरमुक्तमतेर्वृद्धिह्रासवत्त्वं 'गुणदोषैः सुखस्यापि वृद्धिह्रासौ विमुक्तिगौ । नृणामि'त्यनेन मनुष्याणां सुखपदोपलक्षितज्ञानादेर्मुक्तौ वृद्धिह्रासवत्त्वेऽपि सुराणां मुक्तौ तु सुखं क्लृप्तं यथाक्रममित्यनेन देवानां मुक्तौ ज्ञानादेर्वृद्धिह्रासाभावाभिधानात् । न च चतुर्मुखेतरमुक्तमात्रस्य मतौ वृद्धिह्रासौ नोच्येते किं तु मनुष्याणामेवेति साम्प्रतम् । 'समुद्रतरलोपमेति मुक्तरुद्रादिमतेः सङ्कोचविकासप्रकारो दर्शितः । अग्निज्वालावदित्यमुक्तरुद्रादिमतेरेवंरूपत्वातिशयो दर्शित' इति सन्न्यायरत्नावलीविरोधादिति चेत् सन्न्यायरत्नावल्यनुसारेण सङ्कोचविकासवत्त्वेऽपि वृद्धिह्रासवत्त्वाभावेनाविरोधादिति ।

**॥ इति चतुर्मुखेतरमुक्तज्ञानं सागरतरङ्गवत् वृद्धिह्रासयुक्तं, संसारिज्ञानं तु अग्नेः अग्निज्वालोत्पत्तिवत् अन्तःकरणजन्यम् ॥**

* * *

॥ अथ वादिनां मोक्षस्वरूपाऽन्यथाकथने तमोगुणस्यैव निमित्तत्वम् ॥

१८ **सु०**— भवत्वेवं ज्ञानानां गुणनिमित्तं नानाविधत्वम् । प्रकृते तु किमित्यत आह **एवंविधेष्विति** ।

**अनु०— एवंविधेषु ज्ञानेषु तमसा मुष्टदृष्टयः ।**

**ज्ञानेष्वेवंविधेषु** सत्सु **मुष्टदृष्टयो**ऽपहृतसम्यग्ज्ञानाः । सम्यग्ज्ञानाभावेऽन्यथादृक्त्वमपि नोपपद्यते । अधिष्ठानसामान्यज्ञानस्य भ्रान्त्युपयोगित्वादित्यत उक्तम् **खद्योतेति** ।

**खद्योतसदृशात्यल्पज्ञानत्वादन्यथादृशः ॥**
**वदन्ति वादिनो मोक्षं नानामतसमाश्रयात् ।**

यथा अन्धतमसे **खद्योता** अपि भयहेतवः तथा विपर्ययबहुलं अल्पं सम्यग्ज्ञानमपि तामसमेव । यथोक्तम् । अतत्त्वार्थवदल्पं चेति । **नानामतसमाश्रयात्** नाना वदन्तीति योजना । ज्ञानानां गुणवशादनेकविधत्वोपपत्तेस्तमसाऽऽवृता वादिनः प्रमाणावधीरणात् सम्यग्ज्ञानविकला आभासादरणादधिष्ठानसामान्यज्ञानवत्त्वाच्च विपरीतज्ञानिनो मोक्षं नानाविधमाचक्षत इत्यर्थः । कारणैकत्वान्मिथ्याज्ञानेनाप्येकविधेन भाव्यमिति चेन्न । सहकारिवैचित्र्याद्वैचित्र्योपपत्तेः । तदिदमुक्तं **नानामतसमाश्रयादिति** । मतानां च प्रवाहेणानादित्वमुक्तम् । मूलकारणे तमोगुणेऽपि वैचित्र्याच्च । अत एवोक्तं गुणभेदत इति ।

**परि०**— 'भयहेतव' इत्यस्यानन्तरं अत एव तामसा इति ग्राह्यम् ॥ **अन्धतमस इति** । 'अवसमन्धेभ्यस्तमस' इति समासान्तः ॥ **अतत्त्वेति** । गीतायामन्तिमेऽध्याये 'यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् । अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतमि'ति तामसज्ञानरूपमुक्तमित्यर्थः । अतत्त्वार्थविषयकं यदल्पं सम्यग्ज्ञानं तत्तामसमित्यर्थः । तत्र मोक्षस्वरूपमित्यादेर्व्यवहितत्वाद्बुद्ध्यारोहाय सर्वस्य निष्कृष्टार्थमाह **ज्ञानानामिति** । अवधीरणादनादरणादित्यर्थः । 'धृङ् अनादर' इति धातोः ॥ **सहकारीति** । नानाविधतत्तद्दर्शनरूपसहकारिवैचित्र्यादित्यर्थः । आधुनिकमतानां मोक्षविषयकभ्रमहेतुमूलकारणवैचित्र्यापादकं कथमित्यत आह **मतानामिति** । उक्तं समयपादादिभागे उक्तमित्यर्थः ।

**यादु०— अतत्त्वार्थवदल्पं चेति** । अतत्त्वार्थकल्पनायुक्तं यदल्पं सम्यग्ज्ञानं तत्तामसमुदाहृतमिति विपर्ययबहुलस्याल्पसम्यग्ज्ञानस्यापि तामसत्वमुक्तमित्यर्थः । **अवधीरणात्** अनादरणात् । धृङ् अनादर इति धातोः । अवज्ञानादिति यावत् ॥ **आभासेति** । प्रमाणाभासेत्यर्थः । न च आधुनिकानां मतानां कथं मोक्ष-विषयकनानाविधभ्रममूलकारणे सहकारित्वमित्यत आह **मतानां चेति** ॥ **उक्तमिति** । 'अनादिकालतो वृत्ताः समया हि प्रवाहतः' इति समयपाद इति शेषः ।

**कं०रा०— यथोक्तमिति** । 'अवृद्धिह्रासरूपत्वं मुक्तानां प्रायिकं भवेत् । कादाचित्कविशेषस्तु नैव तेषां निषिध्यत' इति भाष्योदाहृतप्रमाणवचने प्रायिकमित्युक्त्या वृद्धिह्रासवत्त्वं प्रतीयत इति भावः ॥ **अतत्त्वार्थवदिति** । 'अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतमि'ति गीतावाक्ये अतत्त्वार्थवद्यथास्थिताकारविपरीता-कारगोचरम् । 'अल्पमीषत्समीचीनं ज्ञानं तामसमि'ति विपर्ययबहुलस्याल्पसमीचीनज्ञानस्य तामसत्वमुक्तमिति भावः । न च वाच्यमत्र विपर्ययबाहुल्यं न प्रतीयत इति अल्पपदसमभिव्याहारेण अतत्त्वार्थवदिति मतुपो भूमा-र्थतया तत्प्रतीत्यवश्यम्भावात् ॥ **प्रमाणावधीरणादिति** । प्रमाणतिरस्करणादित्यर्थः ॥ **कारणैकत्वादिति** । मिथ्याज्ञानकारणस्य तमोगुणस्यैकत्वादित्यर्थः । ननु मतानां यदा सर्वात्मनोच्छेदः तदा तत्तन्मतसमाश्रयणरूप-सहकारिवैचित्र्याभावात् मूलकारणतमोगुणस्य चैकत्वात् मिथ्याज्ञानेनाप्येकविधेन भाव्यमित्यत आह **मतानां चेति** । 'अनादिकालतो वृत्ताः समया हि प्रवाहतः । न चोच्छेदस्तु कस्यापि समयस्येत्यतो विभुरि'ति समय-पादे मतानां प्रवाहरूपेण आद्यन्तशून्यत्वमुक्तमित्यर्थः । यद्वा, अनादिमिथ्याज्ञानवैचित्र्यं प्रतिपादितं ऽवैचित्र्यस्य प्रयोजकत्वं न सम्भवतीत्यतो मतानां चेत्युक्तमित्यवतार्य मतानां च प्रवाहतोऽनादित्वं समयपादे उक्तमिति व्याख्येयम् ॥ **गुणभेदत इति** । सत्त्वरजस्तमोगुणानामवान्तरवैचित्र्यमपि गुणभेदशब्देन विवक्षितमिति भावः ।

**शे०चं०— यथोक्तमिति ॥ अतत्त्वार्थवदल्पं चेति** । अतत्त्वार्थकल्पनायुक्तं यदल्पं सम्यग्ज्ञानं तत्तामसमुदाहृतमिति विपर्ययबहुलस्याल्पसम्यग्ज्ञानस्यापि तामसत्वं गीतायामुक्तमित्यर्थः ॥ **प्रमाणावधीरणा-दिति** । तमोगुणप्रयुक्तप्रमाणविषयकचेतःप्रवृत्तिप्रतिबन्धनिमित्ततदवज्ञानादित्यर्थः ॥ **आभासेति** । तमोगुण-प्रयुक्तप्रमाणदोषाच्छादननिमित्तकतदादरणादित्यर्थः । पूर्वेणैव शङ्कापरिहाराद्भाष्ये नानामतसमाश्रयादित्येतद्व्यर्थ-मित्याशङ्क्य तद्व्यावर्त्यां शङ्कामुत्थापयति **कारणैकत्वादिति** । मिथ्याज्ञानमूलकारणतमोगुणस्यैकत्वादित्यर्थः ॥ **सहकारीति** । सहकारिभूतानां मतानां वैचित्र्यादित्यर्थः । नन्वाधुनिकानां मतानां कथं मोक्षविषयकनानाविध-भ्रममूलकारणतमोगुणसहकारित्वं सङ्गच्छत इत्यत आह **मतानां चेति** ॥ **उक्तमिति** । 'अनादिकालतो वृत्ताः समया हि प्रवाहत' इत्यादिना समयपाद इति शेषः । अङ्गीकृत्य चेदं मूलकारणे तमोगुणेऽवैचित्र्यं सहकारि-वैचित्र्यान्मिथ्याज्ञानवैचित्र्योपपादनं कृतम् । वस्तुतस्तु मूलकारणस्यावैचित्र्यमेवासिद्धमित्याह **मूलकारण इति** ॥ **अत एवोक्तमिति** । अनेन गुणभेदत इति वाक्यं सत्त्वरजस्तमोलक्षणगुणभेदत इति, तमोगुणे भेदतो-ऽवान्तरभेदत इति च द्वेधा व्याख्यातं भवति ।

**वा०र०**— तद्भाष्यानुसारेण व्याख्याति **अतत्त्वार्थेति**। धृङ् अनादरण इति धातुं मनसि निधाया-वज्ञानादिति व्याख्यातम्। अवधार्यतामिति युक्तिपादीयमूलोपपादनावसरे तद्रूपोपपादनमस्माभिः कृतमस्ति। तद्वदेवैतद्रूपोपादनं ज्ञेयम्।

**स०व्र०**— अत एवोक्तं गुणभेदत इति। अनेन गुणभेदत इत्येतन्न केवलं सत्त्वरजस्तमोलक्षण-भेदात् नाना वदन्ति किं नाम तमोगुणेऽपि वैलक्षण्यात् नाना वदन्तीत्येवं वाक्यं व्याख्यातं भवति।

**॥ इति वादिनां मोक्षस्वरूपाऽन्यथाकथने तमोगुणस्यैव निमित्तत्वम् ॥**

* * *

**॥ अथ जैनाभिमतमोक्षस्वरूपनिरासः ॥**

**॥ अथ अलोकाकाशे 'निरन्तरोर्ध्वगमनमेव' मोक्षः इति जैनमतम् ॥**

१९ **सु०**— समधिगतमेतत् नानाविधेषु मोक्षवादेष्वेकः प्रमाणमूलोऽन्ये मिथ्याज्ञान-मूला इति। न तु विशेषोऽतः पुनः संशय एवेत्यतः परमतानां सर्वेषां हेयत्वं दिदर्शयिषु-रादौ तावज्जिनोदितं मोक्षस्वरूपमनुवदति **आश्रित्येति**।

**अनु०**— आश्रित्य प्रतिभामाह जिनस्तत्रातितामसीम्।

**तत्र** तेषु वादिषु। वेदप्रामाण्या(स्य)नङ्गीकारात् **अतितामसीम्** इत्युक्तम्। किमाहे-त्यत आह **ज्ञानादिति**।

ज्ञानात्कर्मक्षयान्मोक्षो भवेद्देहाख्यपञ्जरात्।

**ज्ञानात्** केषाञ्चित्कर्मणां क्षयो भवति। केषाञ्चिद्भोगात्। ततः **कर्मक्षयात्** पक्षिणः पञ्जरादिव आत्मनो देहात् **मोक्षो भवेत्**। देहावस्थानस्य कर्मनिमित्तत्वात्। ततः कथं वर्तत इत्यत आह **पञ्जरेति**।

पञ्जरोन्मुक्तखगवदलोकाकाशगोचरः।
नित्यमूर्ध्वं व्रजत्येव पुद्गलो हस्तपादवान्।
इति

**यादु०— अतत्त्वार्थवदल्पं चेति** । अतत्त्वार्थकल्पनायुक्तं यदल्पं सम्यग्ज्ञानं तत्तामसमुदाहृतमिति विपर्ययबहुलस्याल्पसम्यग्ज्ञानस्यापि तामसत्वमुक्तमित्यर्थः । **अवधीरणात्** अनादरणात् । धृङ् अनादर इति धातोः । अवज्ञानादिति यावत् ॥ **आभासेति** । प्रमाणाभासेत्यर्थः । न च आधुनिकानां मतानां कथं मोक्षविषयकनानाविधभ्रममूलकारणे सहकारित्वमित्यत आह **मतानां चेति** ॥ **उक्तमिति** । 'अनादिकालतो वृत्ताः समया हि प्रवाहतः' इति समयपाद इति शेषः ।

**कं०रा०— यथोक्तमिति** । 'अवृद्धिह्रासरूपत्वं मुक्तानां प्रायिकं भवेत् । कादाचित्कविशेषस्तु नैव तेषां निषिध्यत' इति भाष्योदाहृतप्रमाणवचने प्रायिकमित्युक्त्या वृद्धिह्रासवत्त्वं प्रतीयत इति भावः ॥ **अतत्त्वार्थवदिति** । 'अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतमि'ति गीतावाक्ये अतत्त्वार्थवद्यथास्थिताकारविपरीताकारगोचरम् । 'अल्पमीषत्समीचीनं ज्ञानं तामसमि'ति विपर्ययबहुलस्याल्पसमीचीनज्ञानस्य तामसत्वमुक्तमिति भावः । न च वाच्यमत्र विपर्ययबाहुल्यं न प्रतीयत इति अल्पपदसमभिव्याहारेण अतत्त्वार्थवदिति मतुपो भूमार्थतया तत्प्रतीत्यवश्यम्भावात् ॥ **प्रमाणावधीरणादिति** । प्रमाणतिरस्करणादित्यर्थः ॥ **कारणैकत्वादिति** । मिथ्याज्ञानकारणस्य तमोगुणस्यैकत्वादित्यर्थः । ननु मतानां यदा सर्वात्मनोच्छेदः तदा तत्तन्मतसमाश्रयणरूपसहकारिवैचित्र्याभावात् मूलकारणतमोगुणस्य चैकत्वात् मिथ्याज्ञानेनाप्येकविधेन भाव्यमित्यत आह **मतानां चेति** । 'अनादिकालतो वृत्ताः समया हि प्रवाहतः । न चोच्छेदस्तु कस्यापि समयस्येत्यतो विभुरि'ति समयपादे मतानां प्रवाहरूपेण आद्यन्तशून्यत्वमुक्तमित्यर्थः । यद्वा, अनादिमिथ्याज्ञानवैचित्र्यं प्रतिपादितं अवैचित्र्यस्य प्रयोजकत्वं न सम्भवतीत्यतो मतानां चेत्युक्तमित्यवतार्य मतानां च प्रवाहतोऽनादित्वं समयपादे उक्तमिति व्याख्येयम् ॥ **गुणभेदत इति** । सत्त्वरजस्तमोगुणानामवान्तरवैचित्र्यमपि गुणभेदशब्देन विवक्षितमिति भावः ।

**शे०चं०— यथोक्तमिति** ॥ **अतत्त्वार्थवदल्पं चेति** । अतत्त्वार्थकल्पनायुक्तं यदल्पं सम्यग्ज्ञानं तत्तामसमुदाहृतमिति विपर्ययबहुलस्याल्पसम्यग्ज्ञानस्यापि तामसत्वं गीतायामुक्तमित्यर्थः ॥ **प्रमाणावधीरणादिति** । तमोगुणप्रयुक्तप्रमाणविषयकचेतःप्रवृत्तिप्रतिबन्धनिमित्ततदवज्ञानादित्यर्थः ॥ **आभासेति** । तमोगुणप्रयुक्तप्रमाणदोषाच्छादननिमित्तकतदादरणादित्यर्थः । पूर्वेणैव शङ्कापरिहाराद्भाष्ये नानामतसमाश्रयादित्येतद्व्यर्थमित्याशङ्क्य तद्व्यावर्त्यां शङ्कामुत्थापयति **कारणैकत्वादिति** । मिथ्याज्ञानमूलकारणतमोगुणस्यैकत्वादित्यर्थः ॥ **सहकारीति** । सहकारिभूतानां मतानां वैचित्र्यादित्यर्थः । नन्वाधुनिकानां मतानां कथं मोक्षविषयकनानाविधभ्रममूलकारणतमोगुणसहकारित्वं सङ्गच्छत इत्यत आह **मतानां चेति** ॥ **उक्तमिति** । 'अनादिकालतो वृत्ताः समया हि प्रवाहत' इत्यादिना समयपाद इति शेषः । अङ्गीकृत्य चेदं मूलकारणे तमोगुणेऽवैचित्र्यं सहकारिवैचित्र्यान्मिथ्याज्ञानवैचित्र्योपपादनं कृतम् । वस्तुतस्तु मूलकारणस्यावैचित्र्यमेवासिद्धमित्याह **मूलकारण इति** ॥ **अत एवोक्तमिति** । अनेन गुणभेदत इति वाक्यं सत्त्वरजस्तमोलक्षणगुणभेदत इति, तमोगुणे भेदतोऽवान्तरभेदत इति च द्वेधा व्याख्यातं भवति ।

**वा०र०**— तद्भाष्यानुसारेण व्याख्याति **अतत्त्वार्थेति**। धृङ् अनादरण इति धातुं मनसि निधाया-वज्ञानादिति व्याख्यातम्। अवधार्यतामिति युक्तिपादीयमूलोपपादनावसरे तद्रूपोपपादनमस्माभिः कृतमस्ति। तद्वदेवैतद्रूपोपादनं ज्ञेयम्।

**स०व्र०**— अत एवोक्तं **गुणभेदत** इति। अनेन गुणभेदत इत्येतत्र केवलं सत्त्वरजस्तमोलक्षण-भेदात् नाना वदन्ति किं नाम तमोगुणेऽपि वैलक्षण्यात् नाना वदन्तीत्येवं वाक्यं व्याख्यातं भवति।

**॥ इति वादिनां मोक्षस्वरूपाऽन्यथाकथने तमोगुणस्यैव निमित्तत्वम् ॥**

* * *

**॥ अथ जैनाभिमतमोक्षस्वरूपनिरासः ॥**

**॥ अथ अलोकाकाशे 'निरन्तरोर्ध्वगमनमेव' मोक्षः इति जैनमतम् ॥**

१९ **सु०**— **समधिगतमेतत् नानाविधेषु मोक्षवादेष्वेकः प्रमाणमूलोऽन्ये मिथ्याज्ञान-मूला इति। न तु विशेषोऽतः पुनः संशय एवेत्यतः परमतानां सर्वेषां हेयत्वं दिदर्शयिषु-रादौ तावज्जिनोदितं मोक्षस्वरूपमनुवदति आश्रित्येति।**

**अनु०**— आश्रित्य प्रतिभामाह जिनस्तत्रातितामसीम्।

**तत्र** तेषु वादिषु। वेदप्रामाण्या(स्य)नङ्गीकारात् **अतितामसीम्** इत्युक्तम्। किमाहे-त्यत आह **ज्ञानादिति**।

ज्ञानात्कर्मक्षयान्मोक्षो भवेद्देहाख्यपञ्जरात्।

**ज्ञानात्** केषाञ्चित्कर्मणां क्षयो भवति। केषाञ्चिद्भोगात्। ततः **कर्मक्षयात्** पक्षिणः पञ्जरादिव आत्मनो देहात् **मोक्षो भवेत्**। देहावस्थानस्य कर्मनिमित्तत्वात्। ततः कथं वर्तत इत्यत आह **पञ्जरेति**।

पञ्जरोन्मुक्तखगवदलोकाकाशगोचरः।
नित्यमूर्ध्वं व्रजत्येव पुद्गलो हस्तपादवान्।
इति

**यथा पञ्जरोन्मुक्तः खग ऊर्ध्वं व्रजति एवमेव ऊर्ध्वं व्रजति । अयं तु विशेषः । अलोकाकाशो गोचरो यस्य स तथोक्तः । नित्यमेवेति च । देहपरिमाणस्यात्मनो देहाभावे परिमाणाभावप्राप्तौ उक्तं हस्तपादवानिति । चरमदेहस्य यः सन्निवेशः तथाभूत इत्यर्थः । इत्याहेति सम्बन्धः ।**

**परि०—** उत्तरग्रन्थमवतारयति **समधिगतमेतदित्यादिना** ॥ **एक इत्यादि** । सर्वस्य प्रमाणमूलत्वे हि विरुद्धानेकप्रकारता मोक्षस्य प्राप्नोति । सर्वस्य मिथ्याज्ञानमूलत्वे च वस्तुनो निःस्वरूपत्वता स्यात् अत एवं वाच्यमित्यर्थः । **हेयत्वं** मोक्षविषये इति योज्यम् । तेन समयपा(दापौ)दादपौनरुक्त्यं ध्येयम् । एवकारान्वयेनानुवादो **नित्यमेवेति चेति** । 'अयं' विशेष इति पूर्वेणान्वयः ।

**यादु०—** **एकः प्रमाणमूल इत्यादि** । वस्तुनि विकल्पापातेन परस्परविरुद्धानां सर्वेषां प्रमाणमूलत्वासम्भवादिति भावः ॥ **न तु विशेष इति** । सूत्रकारीय एव मोक्षवादः प्रमाणमूल इति विशेषो न समधिगत इत्यर्थः । यद्यपि निर्दोषश्रुत्यादिमूलः सूत्रकारीयो मोक्षवाद इतरे च न तथेति साम्याभावाद्विशेषनिश्चयोपपत्तिरिति पूर्वमुक्तम् । तथाऽपि मतानामपि प्रवाहतोऽनादित्वेन श्रुतितुल्ययोगक्षेमतैवेति मन्यमानस्येयं शङ्केति ज्ञातव्यम् । अत एव मतानामनादित्वं पूर्वोक्तं स्मारितम् ॥ **हेयत्वं दिदर्शयिषुरिति** । मोक्षविषय इति शेषः । तेन समयपाद एव तेषां हेयत्वस्य दर्शितत्वात् अत्र तत्प्रदर्शनं व्यर्थमिति शङ्काऽनवकाशः । तत्र जगत्कारणत्वविषय एव हेयताया दर्शितत्वात् । नित्यमेवेति च विशेष इत्यन्वयः । **तथाभूतः** तत्परिमाणः ।

**कं०रा०—** **दिदर्शयिषुः** दर्शयितुमिच्छुः ॥ **देहावस्थानस्येति** । आत्मनो देहावस्थानस्य कर्मनिमित्तकत्वादित्यर्थः ॥ **तत इति** । देहान्मोक्षानन्तरमित्यर्थः ॥ **सन्निवेश इति** । संस्थानविशेष इत्यर्थः ।

**शे०चं०—** **एकः प्रमाणमूल इति** । वस्तुनि विकल्पापत्त्या परस्परविरुद्धानां सर्वेषां वादानां प्रमाणमूलत्वस्य, निःस्वभावत्वापत्त्या च सर्वेषामप्रमाणमूलत्वस्य वाऽसम्भवात् । **न तु विशेष इति** । सूत्रकारीय एव मोक्षवादः प्रमाणमूलो न त्वन्य इति विशेषो न समधिगत इत्यर्थः । यद्यपि निर्दोषश्रुत्यादिमूलः सूत्रकारीयो मोक्षवाद इतरे त्वप्रमाणमूला उत्प्रेक्षामात्रमूला इति साम्याभावेन संशयानवकाशाद्विशेषावधारणमपि 'तत्र मोक्षस्वरूपं तु' इत्यादिना व्युत्पादितमिति नैवं शङ्काऽवकाशः । तथाऽपि तत्तद्वाद्युक्तप्रमाणाभासनिराकरणेन अप्रमाणमूलत्वमुत्प्रेक्षामात्रमूलत्वं च यावन्न व्युत्पाद्यते तावत् तदनुक्तप्रायमेवेति तदुपपादनार्थमेवायं यत्न इत्यवधेयम् । यद्वा मतानामपि प्रवाहतोऽनादित्वेन श्रुतितुल्यतां मन्यमानस्येयं शङ्का अत एव मतानां प्रागुक्तस्यानादित्वस्यात्र स्मारणं कृतम् । यथा च अनादिमतानां श्रुतितुल्यतया संशयाजनकत्वं तथा समयपादारम्भ एवोक्तमिति ध्येयम् ॥ **परमतानामिति** । अन्यमोक्षवादानामित्यर्थः । कर्मक्षयस्य देहान्मोक्षं प्रति हेतुतामुप-

पादयति **देहावस्थानस्येति** । **अयं त्विति** । अलोकाकाशगोचरत्वादिः दृष्टान्तापेक्षया दार्ष्टान्तिके विशेष एव । न तु यथा पञ्जरोन्मुक्तः खगोऽलोकाकाशगोचरो नित्यमूर्ध्वं व्रजति एवमेव नित्यमूर्ध्वं व्रजतीत्यलोकाकाशगोचरत्वाद्यन्तभविन व्याप्तिशरीरमिहाभिमतम् । तथा सति पञ्जरोन्मुक्तखगस्योर्ध्वं गतिसद्भावेऽपि उक्तविधगतेरभावाद्दृष्टान्तासिद्धिप्रसङ्गादिति भावः । नित्यमेवेति चेत्यतःपरं विशेष इत्यनुवर्तते । **परिमाणाभावप्राप्ताविति** । ततश्च परिमाणरहितस्य द्रव्यस्य शून्यत्वेनोर्ध्वगत्यनुपपत्तिरिति शङ्काशेषः । **तथाभूतः** तत्परिमाणः ।

**वा०र०**— मूलत्वस्य वा सम्भवादित्यनन्तरमिति भाव इति पाठः । मूलकोशे सत्त्वाद्युक्तेश्च । **मूले यः सन्निवेश इति** । य आकारविशेष इत्यर्थः । तथाभूत इत्यस्य संसारिहस्तपादाद्यर्थत्वनिवारणायाह **तथाभूतस्तत्परिणाम इति** । मुक्तस्य ज्ञानादिगुणता परेणाङ्गीकृतेत्यत्र नियामकमाह **अत्र चेति** । आद्यं वाक्यं जीवलक्षणम् । द्वितीयं घातिकबन्धलक्षणम् । तृतीयं मोक्षलक्षणम् । अनेन च स्वरूपगुणसिद्धिरिति भावः ।

**॥ इति अलोकाकाशे 'निरन्तरोर्ध्वगमनमेव' मोक्षः इति जैनमतम् ॥**

* * *

**॥ अथ जैनोक्तमोक्षस्य प्रत्यनुमानेन दुःखोपेतत्वसाधनम् ॥**

२० **सु०**— अनूदितं दूषयति **तदिति** ।

## अनु०— तत्केन मानेन मोक्षरूपं प्रदर्श्यते ॥

**प्रदर्श्यते परं प्रति जिनेन । यद्यप्यनन्तचतुष्टयावाप्तिर्मुक्तस्योच्यते जिनेन । तथाऽपि सा सम्प्रतिपन्नत्वान्नानूदिता नापि दूषिता ।**

**परि०— अनन्तचतुष्टयेति** । जीवो ज्ञानदर्शनसुखवीर्यगुण इति समयपादे सुधोक्तदिशा अनन्तं (पूर्णं) यच्चतुष्टयं ज्ञानादि तदवाप्तिः तदाविर्भाव इत्यर्थः । ज्ञानादेर्जीवस्वभावत्वात् अनन्तत्वं ज्ञेयम् । ज्ञानदर्शनयोः सामान्यविशेषभावेन भेदः ।

**गु०दी०— अनन्तचतुष्टयावाप्तिरित्यत्र** अनन्तचतुष्टयमात्यन्तिकदुःखनिवृत्तिः प्रभाव्याप्त्यादिकम् ।

**यादु०— यद्यप्यनन्तचतुष्टयेति** । अनन्तं यच्चतुष्टयं ज्ञानदर्शनसुखवीर्यरूपं तदवाप्तिराविर्भाव इत्यर्थः । जैनमते ज्ञानादिचतुष्टयस्यात्मस्वभावभूतस्यापि सत्त्वेन तेषामनन्तत्वात् । अत्र च 'जीवो ज्ञानदर्शनसुखवीर्यगुणः', 'मोक्षः स्वाभाविकात्मस्वरूपाविर्भावः' इति समयपादीयं वाक्यद्वयमेव ज्ञापकमिति ज्ञेयम् ।

**वं०प०— अनन्तचतुष्टयेति** । ज्ञानदर्शनसुखवीर्यरूपा जीवगणाः संसारे घातुकबन्धप्रतिबद्धा मुक्तावाविर्भवन्तीति जैनमतमिति समयपादे उक्तत्वादित्यवधेयम् ।

**कं०रा०— अनन्तचतुष्टयावाप्तिरिति** । जीवो ज्ञानदर्शनसुखवीर्यगुण इति जिनेनोक्तत्वात् आविर्भूतानन्तैतद्गुणचतुष्टयावाप्तिः मुक्तस्य तेन उच्यते इति भावः । अत एव समयचरणे जिनमतानुवादावसरे जीवो ज्ञानदर्शनसुखवीर्यगुण इत्युक्तम् । तत्र ज्ञानदर्शनयोः सामान्यविशेषरूपविषयकृतो भेदः चेतनाश्रित इति सिद्ध्यतीति पूर्वेणान्वयः ।

**शे०चं०**— ननु नित्योर्ध्वगतेरिवानन्तचतुष्टयावाप्तेरपि परैरभ्युपगतत्वेन तस्या अप्यनूद्य दूषणीयत्वात् तदभावाद्भाष्ये न्यूनतेत्याशङ्कामननुवादादौ निमित्तकथनेन परिहरति **यद्यपीति** ॥ **अनन्तचतुष्टयेति** । ज्ञानदर्शनवीर्यसुखलक्षणं यदनन्तचतुष्टयं तदवाप्तिराविर्भाव इत्यर्थः । अत्र जीवो ज्ञानदर्शनवीर्यसुखलक्षण इत्याद्यं, जीवगुणानां ज्ञानादीनां प्रतिबन्धकमिति, मोक्षः स्वाभाविकस्वरूपाविर्भाव इति च समयपादीयं वाक्यत्रयं ज्ञापकम् ।

**स०व्र०— अनन्तचतुष्टयावाप्तिरिति** । ज्ञानदर्शनवीर्यसुखलक्षणानन्तचतुष्टयावाप्तिरित्यर्थः । अत्र च 'जीवो ज्ञानदर्शनसुखवीर्यलक्षण' इत्याद्यं 'जीवगुणानां ज्ञानादीनां प्रतिबन्धकमि'ति च समयपादीयं ज्ञापकं बोध्यम् ।

**॥ इति जैनोक्तमोक्षस्य प्रत्यनुमानेन दुःखोपेतत्वसाधनम् ॥१६अ**

* * *

**॥ अथ सिद्धान्त्युक्तानुमाने उपाधिशङ्कानिरासः ॥**

२१ **सु०— कथमुक्तमोक्षस्वरूपमप्रामाणिकमिति चेत् । न तावदत्र प्रत्यक्षमस्ति नापि आगमः । तदीयागमस्य अस्माभिरनङ्गीकारात् । वेदादेश्च परेणानङ्गीकृतत्वात् । अतः केवलं किञ्चिदनुमानं वक्तव्यं तत्राह गतिरिति ।**

**अनु०— गतिरूर्ध्वा च दुःखेता गतित्वाल्लौकिकी यथा ।**
**इत्युक्ते चानुमानैकशरणस्य किमुत्तरम् ।**

**चशब्दोऽनुक्तसमुच्चयार्थः** । तेन विप्रतिपन्नेति प्रतिज्ञायां सिद्ध्यति । हेतौ च चेतनाश्रितेति । तेनाचेतनगतौ बाधो, देवदत्तगतौ सिद्धार्थत्वं, अचेतनगतौ व्यभिचारश्च न

सम्भवति । दुःखेनेता प्राप्ता **दुःखेता** । प्राप्तिश्च न साध्यसाध्यनभावलक्षणा । तथा सति देवदत्तस्य सुखार्थायां मन्दगतौ व्यभिचारापातात् । दूरत्वस्य च अनियतत्वात् । तीव्रत्वस्याप्यपरिनिष्ठितत्वात् । किं तर्हि समानकालीनेन दुःखेन सहैकाधिकरणत्वलक्षणा । कदाचित् देवदत्तः दुःखेन विनापि गच्छति तत्र व्यभिचार इति चेन्न । देवदत्तस्य कदाऽपि निर्दुःखताया अनङ्गीकारात् । आध्यात्मिकादिष्वन्यतमेन महताऽल्पेन वाऽयं खलु सदा संवलितः । चेतनशब्देन जाग्रतोऽभिधानान्न सुप्तगतौ व्यभिचारः । सुखार्थाऽपि गतिरल्पं दुःखमुत्पादयतीत्यभ्युपगम्य दुःखसाधनत्वं वा साध्यम् । **लौकिकी** देवदत्तादिगतिः । **इति** च प्रत्यनुमाने केनचिदुक्ते, एकं च तच्छरणं चैकशरणं **अनुमानमेकशरणं** यस्यासौ तथोक्तः । अन्यथा 'पूर्वकालैके'त्येकशब्दस्य पूर्वनिपातः स्यात् ।

परि०— **केवलमिति** । मूलप्रमाणशून्यमित्यर्थः । देहबन्धान्मुक्तो जीवः ऊर्ध्वगतिमान् बन्धमुक्तत्वात् पञ्जरोन्मुक्तखगवदित्यनुमानमित्यर्थः । यद्वा विमता गतिः सुखयुता दुःखहीना च ऊर्ध्वगतित्वात् पञ्जरोन्मुक्तखगगतिवदित्याद्यनुमानमित्यर्थः । **बाध इति** । विप्रतिपन्नेत्यनुक्तावचेतनदेवदत्तगत्योरपि पक्षतापत्तेर्बाधसिद्धार्थत्वे इत्यर्थः । हेतौ चेतनाश्रितेत्यनुक्तौ च अचेतनगतौ व्यभिचारश्च प्राप्नोतीत्यर्थः । 'दुःखेते'त्यत्र दुःखहेतुरिति भ्रमनिरासायाह **दुःखेनेति** । दूरगतित्वादिति वा तीव्रगतित्वादिति वा हेतुर्विशेष्यते अतो न व्यभिचार इत्यत आह **दूरत्वस्येति** । मुक्तगतेः संसारदशापन्नदुःखेन अस्ति सामानाधिकरण्यमित्यतः सिद्धार्थत्वनिरासाय 'समानकालीने'त्युक्तम् ॥ **सुप्तगताविति** । उत्तमानां जाग्रति चक्षुरादौ रूपान्तरस्य सतः प्राज्ञं प्रति गतौ तथा सर्वजीवानां हृत्कर्णिकामूलस्थानां कर्णिकामध्यस्थप्राज्ञं प्रति गतौ चेत्यर्थः । 'प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्ती'ति सुप्तस्य गतिश्रवणात् 'गतिशब्दाभ्यामि'ति सूत्रोक्तेश्च । एकत्र सुप्तस्यान्यत्र नीयमानस्य गताविति वाऽर्थः । एकं च तदनुमानं चेति विग्रहे त्वेकानुमानशरणस्येति भाव्यमित्यत आह **अन्यथेति** ॥ **पूर्वेति** । 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेने'ति समासविधायके द्वितीयाद्यपादस्थसूत्रे एकशब्दस्य प्रथमानिर्दिष्टतया 'प्रथमानिर्दिष्टं समास उपसर्जनमि'त्युपसर्जनसंज्ञायां 'उपसर्जनं पूर्वमि'ति पूर्वनिपातः स्यादित्यर्थः ।

गु०दी०— **सुखार्थायां मन्दगतौ व्यभिचारापाता**दित्यङ्गीकृत्योक्तम् । क्षणे क्षणे पादोद्धरणपादविक्षेपादिना तत्रापि किञ्चिद्दुःखमस्त्येव । अतो गतित्वादित्येवोक्ते न कुचोद्यावकाश इति द्रष्टव्यम् । **दूरत्वस्य चानियतत्वा**दित्यत्र मन्दगतौ व्यभिचारपरिहाराय दूरगतित्वादिति वक्तव्यम् । तच्चानियतमिति भावः ।

**अपरिनिष्ठितत्वा**दित्यस्य मन्दगतेः शीघ्रगमनं तीव्रमित्युच्यते । ततोऽपि पलायनं ततोऽपि धावनमित्यादिना अनियतत्वादित्यर्थः । **सुप्तगतौ व्यभिचार** इत्यत्र सुप्तस्यान्दोलिकायां गतावित्यर्थः । **पूर्वनिपातः स्या**दित्युपलक्षणम् । **अनेकशरण** इतिवत् कैवल्यार्थत्वेन न कोऽपि दोष इति द्रष्टव्यम् ।

**यादु०— किञ्चिदनुमानमिति** । विप्रतिपन्ना गतिः स्वसमानकालीनदुःखविरहसमानाधिकरणा बन्धमुक्तगतित्वात् पञ्जरबन्धमुक्तखगगतिवदित्यनुमानमित्यर्थः । व्यभिचारपरिहाराय दूरत्वविशेषणे त्वाह **दूरत्वस्येति** । पक्षे विवक्षितस्य दूरत्वस्य दृष्टान्ते, दृष्टान्तीयस्य च तस्य पक्षेऽभावादित्यर्थः । दूरत्वसामान्यविवक्षायां च तस्य यत्किञ्चिदपेक्षया मन्दगतावपि सत्त्वेन व्यभिचारापरिहारादिति भावः । एवं तीव्रत्वस्येत्येतदपि व्याख्येयम् । मुक्तगतेः पूर्वतनेन दुःखेन सहैकाधिकरणत्वसत्त्वात् सिद्धसाधनतापरिहाराय समानकालीनेनेति विशेषणम् ॥ **अन्यथेति** । एकपदस्यानुमानपदेन समानाधिकरणसमासे 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेने'ति सूत्रेण एकशब्दस्यानुमानशब्दापेक्षया पूर्वनिपातः स्यादित्यर्थः । यद्यपीदं सूत्रं समासविधायकमेव न पूर्वनिपातविधायकम् । तथाऽप्यत्रैकशब्दस्य प्रथमानिर्दिष्टत्वेनोपसर्जनसंज्ञायां 'उपसर्जनं पूर्वमि'ति पूर्वनिपातविधिप्रवर्तनात् परम्परया पूर्वनिपातविधायकमपि भवतीत्याशयेनैवमुक्तमिति ज्ञातव्यम् । इदं चैकशब्दस्य सङ्ख्यार्थत्वमाश्रित्यैव । केवलार्थत्वे तु दोषैकदृगित्यादाविव पूर्वनिपाताभावो न दोषायेत्यन्यत्रोक्तम् ।

**वं०प०— विप्रतिपन्नेति** । मोक्षकालीनोर्ध्वगतिरित्यर्थः ॥ **तेनेति** । प्रतिज्ञायां हेतौ च विप्रतिपन्नचेतनपददानेनेत्यर्थः ॥ **अचेतनगताविति** । उर्ध्वगतिमात्रस्य पक्षत्वे पाषाणस्योर्ध्वमुत्क्षेपणं कदाचित् क्रियते साऽप्यूर्ध्वगतिः पक्षवत्तया आयास्यति । तत्र दुःखेतत्वसाधने बाधः । यदा देवदत्त ऊर्ध्वलङ्घनं करोति तदा तदीयोर्ध्वगतौ सिद्धसाधनता च स्यात्, अतः प्रतिज्ञायां विप्रतिपन्नेत्युक्तमित्यर्थः । ननु मन्दगतौ व्यभिचारवारणाय दूरगतित्वादिति हेतुः क्रियत इत्यत आह **दूरत्वस्येति** । ननु तीव्रगतित्वं हेतुः अतो न मन्दगतौ व्यभिचार इत्यत आह **तीव्रत्वस्यापीति** ॥ **अपरिनिष्ठितत्वादिति** । देवदत्तस्य मन्दगतिरपि बालकगत्यपेक्षया तीव्रा भवत्येवेति एतावत्येव गतिस्तीव्रेति निष्ठा नास्तीत्यर्थः ॥ **सुप्तगताविति** । यदा गाढनिद्रया सुप्तमेव कञ्चित्पुरुषं हस्ते गृहीत्वा कश्चिन्नयति तदा तदीयायां गतौ व्यभिचार इत्यर्थः । ननु दुःखसाधनत्वे साध्ये सुखार्थायां देवदत्तगतौ व्यभिचारः स्यादित्यत उक्तं **सुखार्थाऽपीति** ॥ **एकं च तदिति** । एकशब्दः केवलार्थ इत्यर्थः । सङ्ख्यार्थत्वे बाधकमाह **अन्यथेति** । 'पूर्वकालैकसर्वजरत्पुराणनवकेवला' इति सूत्रे प्रथमानिर्दिष्टस्यैकशब्दस्य प्रथमानिर्दिष्टं समास उपसर्जनमिति उपसर्जनसंज्ञायामुपसर्जनं पूर्वमिति पूर्वनिपाते सत्येकानुमानेति स्यादित्यर्थः ।

**कं०रा०— तेनेति** । विप्रतिपत्तिविशेषणलाभेन ऊर्ध्वं प्रक्षिप्तस्य पाषाणादेः गतौ बाधः । देवदत्तस्य पर्वतारोहणादिरूपगतावसिद्धार्थत्वं च न भवति । हेतौ चेतनाश्रितेति विशेषणलाभेनाचेतनगतौ व्यभिचारश्च न भवतीत्यर्थः । न च वाच्यं पक्षतावच्छेदकैक्ये अंशतः सिद्धसाधनत्वमयुक्तमिति । पक्षैकदेशे साध्यसिद्धावंशतः सिद्धसाधनत्वमिति मतावष्टम्भेनैतद्ग्रन्थप्रवृत्तेः । ननु दूरगतित्वादिति दूरत्वेन हेतुर्विशेष्यते सुखार्थगतेश्च समीप-

गतित्वेनोक्तविशेषणाभावान्न तत्र व्यभिचार इत्यत आह **दूरत्वस्य चेति** । ननु सुखार्थायां मन्दगतौ व्यभिचार-निरासाय तीव्रत्वं विशेषणमस्त्वित्यत आह **तीव्रत्वस्यापीति** । ननु दुःखसाधनत्वलक्षणा प्राप्तिः न विवक्षिता चेत् का तर्हि विवक्षितेति पृच्छति **किं तर्हीति** । उत्तरमाह **समानकालीनेति** । दुःखेन सहैकाधिकरणत्व-मात्रसाधने मुक्तगतेः संसारकालीनदुःखसमानाधिकरणत्वात्सिद्धसाधनता स्यात् तन्निरासाय समानकालीनपदं स्वसमानकालीनपरम् । **महताऽल्पेन वेति** । दुःखेनेति शेषः ॥ **न सुप्तगताविति** । आन्दोलिकामारुह्य सुप्तः सन् यो गच्छति तदीयगतौ न व्यभिचार इत्यर्थः । लौकिकी यथेत्यत्र लौकिकीत्यनेन अचेतनगतिग्रहणे तत्र दुःखेनेतत्वरूपसाध्यवैकल्यापत्तिरित्यत आह **लौकिकी देवदत्तादिगतिरिति** ॥ **अन्यथेति** । एकशब्दस्यानु-मानविशेषणत्वे 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेने'ति समासशास्त्रे एकशब्दस्य प्रथमा-निर्दिष्टत्वेन 'प्रथमानिर्दिष्टं समास उपसर्जनमि'त्युपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वमि'ति पूर्वनिपाते एकानुमान-शरणस्येति निर्देशः स्यादिति भावः ।

**शे०चं०— न तावदिति** । मुक्तस्यातीन्द्रियत्वेन तदाश्रितपरिस्पन्दस्याप्यतीन्द्रियत्वेन प्रत्यक्षायोग्य-त्वादिति भावः । अनङ्गीकृतत्वादित्यत्र प्रमाणतयेति शेषः ॥ **किञ्चिदनुमानमिति** । विप्रतिपन्ना गतिः स्वसमानकालीनदुःखविरहसमानाधिकरणा बन्धमुक्तगतित्वात् पञ्जरबन्धमुक्तखगगतिवत् इत्यनुमानमित्यर्थः । गतिरूर्ध्वा दुःखेता गतित्वादित्येतावतैव पूर्तेः किं भाष्ये चशब्देनेत्यत आह **चशब्द इति** । किं तदनुक्ति-र्यत्समुच्चयार्थश्चशब्द इत्यतस्तद्दर्शयति **तेनेति** । अनुक्तसमुच्चयार्थकचशब्देनेत्यर्थः ॥ **चेतनाश्रितेति** । सिद्ध्य-तीति पूर्वेणान्वयः । किं प्रतिज्ञायां हेतौ चोक्तविशेषणसिद्ध्याऽपि प्रयोजनमित्यत आह **तेनेति** । प्रतिज्ञायां विप्रतिपन्नेति विशेषणेन हेतौ चेतनाश्रितेति विशेषणेनेत्यर्थः ॥ **अचेतनगताविति** । गतिमात्रस्य पक्षत्वेऽचेतन-गतावंशबाध इत्यर्थः ॥ **अचेतनगताविति** । चेतनगतिमात्रस्य पक्षत्व इति शेषः । ननु दूरगतित्वात् तीव्र-गतित्वादिति दूरत्वादिना गतिविशेषणाद्विशिष्टहेत्वगमनादेव न देवदत्तस्य सुखार्थायां मन्दगतौ व्यभिचार इत्यत आह **दूरत्वस्य चेत्यादि** । पक्षे विवक्षितदूरत्वस्य दृष्टान्ते, तत्र विवक्षितस्य च पक्षेऽसत्त्वात्साधनवैकल्यादि-कम् । दूरत्वसामान्यविवक्षायां च तस्य यत्किञ्चिदपेक्षया मन्दगतावपि सत्त्वाद्व्यभिचारतादवस्थ्यमिति भावः ॥ **अपरिनिष्ठितत्वादिति** । अनियतत्वादित्यर्थः । तथा च पूर्ववत् साधनवैकल्यमेवेति भावः । तर्हि किंरूपा प्राप्तिः साध्यतयाऽभिमतेति **पृच्छति किं तर्हीति** । उत्तरमाह **समानेति** । तथा च मन्दगतावपि गतिसमान-कालीनेन दुःखेन सहैकाधिकरणकत्वरूपवैवक्षिकदुःखप्राप्तिरूपसाध्यस्यापि सत्त्वान्न व्यभिचार इति भावः । उदाहरणस्यानादरणीयत्वान्मन्दगतौ व्यभिचारस्योक्तविवक्षया परिहारेऽप्यन्यत्र व्यभिचारो दुर्वार एवेत्याशयेन शङ्कते **कदाचिदिति** ॥ **अनङ्गीकारादिति** । तथा च साध्यस्यापि सत्त्वान्न व्यभिचार इति भावः । अनङ्गीकार-मेव तन्निमित्तकथनेनोपपादयति **आध्यात्मिकादिष्विति** । ननु सुप्तगतेश्चेतनगतित्वेऽपि तद्दशायां दुःखस्यासत्त्वेन समानकालीनदुःखसमानाधिकरणत्वस्य तत्राभावाद्व्यभिचार इत्यत आह **चेतनशब्देनेति** । तथा च हेतोरेवा-गमनान्न तत्र व्यभिचार इति भावः । उक्तरूपप्राप्तिविवक्षायां गौरवं मन्वानः साध्यसाधनभावलक्षणमेव प्राप्ति-साध्यत्वेन विवक्षितत्वात् तत्रोद्भावितं दोषं साध्यसद्भावप्रतिपादनेन परिहरति **सुखार्थाऽपीति** । नन्वेकशब्दस्य

पूर्वेणानुमानशब्देन समानाधिकरणसमासमनभ्युपगम्योत्तरेण शरणशब्देन तत्स्वीकारे किं निमित्तमित्यत आह **अन्यथेति** । पूर्वेणानुमानशब्देनानुमानं च तदेकं चेति 'विशेषणं विशेष्येण बहुलमि'ति विशेषणसमासो नाङ्गी-कर्तुं शक्यते । तस्य 'दिक्सङ्ख्ये संज्ञायामि'ति संज्ञायामेव नियमितत्वेन प्रकृते च एकशाठीत्यादाविव विशिष्टस्य संज्ञात्वाभावेन तदसम्भवात् । अतः सङ्ख्यार्थकस्यैकशब्दस्य समानाधिकरणेन समासविधानार्थं प्रवृत्तेन पूर्वकालैकेति सूत्रेणैव स वाच्यः । न चासौ वक्तुं शक्यः । तथा सति तस्य पूर्वकालैकेति समासशास्त्रे प्रथमानिर्दिष्टतया 'प्रथमानिर्दिष्टं समास उपसर्जनमि'ति उपसर्जनत्वेन 'उपसर्जनं पूर्वमि'ति पूर्वनिपातः स्यादि-त्यर्थः । ननु तथाऽप्यनुमानमेकं शरणं यस्येति त्रिपदबहुव्रीहिसम्भवे किं द्विपदबहुव्रीह्याश्रयणेनेति चेन्न । 'बहुव्रीहौ सर्वनामसङ्ख्ययोः प्राङ्निपातो वक्तव्य' इति सङ्ख्याया प्राङ्निपातनियमनादेकशब्दस्य पूर्वनिपातप्रसङ्गेन तत्परित्यागसम्भवात् । अत एवानित्यैकरूपा इत्यादावनित्यमेकं रूपं येषामिति त्रिपदबहुव्रीह्यनाश्रयणमभि-युक्तानाम् । किन्त्वेकं रूपमेकरूपं अनित्यमेकरूपं येषां ते तथोक्ता इति द्विपदबहुव्रीह्याश्रयणमेव । एकशब्दस्य सङ्ख्यार्थकत्वेऽपि एकरूपशब्दस्यासङ्ख्यार्थतया पूर्वनिपाताभावसम्भवात् । तथा प्रकृतेऽप्येकशब्दस्य सङ्ख्यार्थ-कत्वेऽप्येकशरणशब्दस्यासङ्ख्यार्थतया द्विपदबहुव्रीहौ सर्वनामसङ्ख्ययोरिति पूर्वनिपाताप्रसङ्गादित्याशयात् ।

**वा०र०— तस्य दिक्सङ्ख्ये संज्ञायामितीत्यादि** । सदागमैकविज्ञेयं गुणैकदेहमित्यादेर्व्याख्याना-नुसारेणात्र सविशेषविचारो ध्येय इति हृदयम् । अस्य पूर्वनिपाताविधायकत्वादाह **समासशास्त्र इति** ॥ **अत एवेति** । बहुव्रीहित्वमयुक्तं सङ्ख्यापूर्वनिपातक्षयादेवेत्यर्थः । **अभियुक्तानामिति** । **शेषानन्तेन** अनित्यैकरूपा इति सप्तपदार्थवाक्यव्याख्यावसरे तथाभिधानादिति भावः । अत्रत्यो विस्तरोऽपि 'निखिलपूर्णगुणैकदेहमि'ति प्रथमपद्यविचारपरटीकायां भक्तिपादीयपदेकेनाप्यनुव्याख्यानव्याख्यानरूपमूलटीकायामस्मदीयतदुपपादने च ज्ञेयः ।

**स०व्र०— अतः केवलं किञ्चिदनुमानं वक्तव्यमिति** । ननु दूरत्वं तीव्रत्वं वा गतौ विशेषणं दीयते अतो न देवदत्तस्य सुखार्थायां मन्दगतौ व्यभिचार इत्यत आह **दूरत्वस्येति** ॥ **अनिष्ठितत्वादिति** । अनियत-त्वादित्यर्थः ॥ **अन्यथेति** । अनुमानशब्देन एकशब्दस्य समास इत्यर्थः ।

* * *

२२ **सु०— प्रत्यनुमानस्योत्तरं शङ्कते अनूर्ध्वेति ।**

## अनु०— अनूर्ध्वगतिता तत्र यद्युपाधिः

**तत्र देवदत्तगतेर्दुःखेतत्वे अनूर्ध्वताविशिष्टं गतित्वं प्रयोजकं न गतित्वमात्रमिति यदि ब्रूयादित्यर्थः । पक्षेतरोऽयं कस्माच्छङ्कित इति चे(त्)न्न । लक्षणसम्पत्तौ तदुपाधित्व-स्योक्तत्वात् । निराकरोति खगस्येति ।**

खगस्य च ।
दूरोर्ध्वगमने दुःखमिति साध्यानुगो न सः ॥

तदा वदाग इत्यादावुपस्कर्तव्यम् । खगस्य पारावतादेः **दूरोर्ध्वगमने** च दुःख-मस्तीति हेतोः **स** उपाधिः **साध्यानुगः** साध्यव्यापको **न** भवतीत्यतोऽनुपाधिः ।

इदमुक्तं भवति । किमयं केवलसाध्यव्यापकोऽभिमतः किं वा साधनावच्छिन्न-साध्यव्यापकः । न प्रथमः । अधर्मे साध्यसद्भावेऽप्यनूर्ध्वताविशिष्टगतित्वस्याभावेन साध्याव्यापकत्वात् । न द्वितीयः । खगस्य दूरोर्ध्वगतौ गतित्वावच्छिन्ने दुःखेतत्वे सत्य-प्यनूर्ध्वगतित्वस्य अभावात् । अनेनोर्ध्वगतित्वाभावोऽनूर्ध्वगतित्वं केवलसाध्ये उपाधि-रित्यपि प्रत्युक्तमिति । दूरग्रहणं खगस्य दुःखं व्यञ्जयितुम् । तदा हि तस्मिन् दुःखकार्याणि दृश्यन्ते । प्रत्यागमनसमयवर्तिदुःखकार्याणि तानीति चेन्न । ऊर्ध्वं गच्छत्येव तद्दर्शनात् ।

**परि०— तत्रेत्यनुवादः देवदत्तेत्यादि** व्याख्या ॥ **अनूर्ध्वताविशिष्टमिति** । तच्च दृष्टान्ते सत्त्वात् पक्षे चासत्त्वात् साध्यव्यापकत्वे सति साधनाव्यापकत्वाद्भवत्युपाधिरिति भावः ॥ **लक्षणेति** । व्याप्तिरूपेत्यर्थः ॥ **उक्तत्वादिति** । युक्तिपादैतद्ग्रन्थे 'साध्यव्यापकवैलोम्यमि'त्युपाधि-लक्षणविवरणप्रकरणे साध्यसमव्यापकस्योपाधित्वखण्डनप्रस्तावे उक्तत्वादित्यर्थः । अधर्मत्यागेन खगगत्युक्तौ तात्पर्यं वक्तुमाह **इदमुक्तमिति** ॥ **अनेनेति** । खगगतौ साध्याव्यापकत्वकथनेने-त्यर्थः ॥ **प्रत्यागमनेति** । तथा च ऊर्ध्वगतौ दुःखेतत्वरूपसाध्यस्यैवाभावान्न साध्याव्यापकत्वदोष इति भावः ।

**गु०दी०—** शरगतिव्यावर्तनाय **विशिष्टं गतित्वमित्युक्तम्** । विशिष्टं गतित्वं चेतनगतित्वमिति यावत् ।

**यादु०— उक्तत्वादिति** । द्वितीयाध्याय इति शेषः ॥ **दुःखकार्याणीति** । पूर्ववद्वेगाभावादीनीत्यर्थः । तैश्च दुःखमनुमेयमिति भावः ।

**वं०प०— उक्तत्वादिति** । अनुकूलतर्काभावदशायामित्यर्थः ॥ **ऊर्ध्वगतित्वाभाव इति** । तथा च नाधर्मे साध्याव्यापकेति भावः । अयमप्युपाधिः खगस्य दूरोर्ध्वगतौ साध्याव्यापकत्वादेव प्रत्युक्त इत्यवधेयम् ।

पूर्वेणानुमानशब्देन समानाधिकरणसमासमनभ्युपगम्योत्तरेण शरणशब्देन तत्स्वीकारे किं निमित्तमित्यत आह **अन्यथेति** । पूर्वेणानुमानशब्देनानुमानं च तदेकं चेति 'विशेषणं विशेष्येण बहुलमि'ति विशेषणसमासो नाङ्गीकर्तुं शक्यते । तस्य 'दिक्सङ्ख्ये संज्ञायामि'ति संज्ञायामेव नियमितत्वेन प्रकृते च एकशाठीत्यादाविव विशिष्टस्य संज्ञात्वाभावेन तदसम्भवात् । अतः सङ्ख्यार्थकस्यैकशब्दस्य समानाधिकरणेन समासविधानार्थं प्रवृत्तेन पूर्वकालैकेति सूत्रेणैव स वाच्यः । न चासौ वक्तुं शक्यः । तथा सति तस्य पूर्वकालैकेति समासशास्त्रे प्रथमानिर्दिष्टतया 'प्रथमानिर्दिष्टं समास उपसर्जनमि'ति उपसर्जनत्वेन 'उपसर्जनं पूर्वमि'ति पूर्वनिपातः स्यादित्यर्थः । ननु तथाऽप्यनुमानमेकं शरणं यस्येति त्रिपदबहुव्रीहिसम्भवे किं द्विपदबहुव्रीह्याश्रयणेनेति चेन्न । 'बहुव्रीहौ सर्वनामसङ्ख्ययोः प्राङ्निपातो वक्तव्य' इति सङ्ख्याया प्राङ्निपातनियमनादेकशब्दस्य पूर्वनिपातप्रसङ्गेन तत्परित्यागसम्भवात् । अत एवानित्यैकरूपा इत्यादावनित्यमेकं रूपं येषामिति त्रिपदबहुव्रीह्यनाश्रयणमभियुक्तानाम् । किन्त्वेकं रूपमेकरूपं अनित्यमेकरूपं येषां ते तथोक्ता इति द्विपदबहुव्रीह्याश्रयणमेव । एकशब्दस्य सङ्ख्यार्थकत्वेऽपि एकरूपशब्दस्यासङ्ख्यार्थतया पूर्वनिपाताभावसम्भवात् । तथा प्रकृतेऽप्येकशब्दस्य सङ्ख्यार्थकत्वेऽप्येकशरणशब्दस्यासङ्ख्यार्थतया द्विपदबहुव्रीहौ सर्वनामसङ्ख्ययोरिति पूर्वनिपाताप्रसङ्गादित्याशयात् ।

**वा०र०— तस्य दिक्सङ्ख्ये संज्ञायामितीत्यादि** । सदागमैकविज्ञेयं गुणैकदेहमित्यादेर्व्याख्यानानुसारेणात्र सविशेषविचारो ध्येय इति हृदयम् । अस्य पूर्वनिपातविधायकत्वादाह **समासशास्त्र इति** ॥ **अत एवेति** । बहुव्रीहित्वमयुक्तं सङ्ख्यापूर्वनिपातक्षयादेवेत्यर्थः । **अभियुक्तानामिति** । **शेषानन्तेन** अनित्यैकरूपा इति सप्तपदार्थवाक्यव्याख्यावसरे तथाभिधानादिति भावः । अत्रत्यो विस्तरोऽपि 'निखिलपूर्णगुणैकदेहमि'ति प्रथमपद्यविचारपरटीकायां भक्तिपादीयपदैकेनाप्यनुव्याख्यानव्याख्यानरूपमूलटीकायामस्मदीयतदुपपादने च ज्ञेयः ।

**स०व्र०— अतः केवलं किञ्चिदनुमानं वक्तव्यमिति** । ननु दूरत्वं तीव्रत्वं वा गतौ विशेषणं दीयते अतो न देवदत्तस्य सुखार्थायां मन्दगतौ व्यभिचार इत्यत आह **दूरत्वस्येति** ॥ **अनिष्ठितत्वादिति** । अनियतत्वादित्यर्थः ॥ **अन्यथेति** । अनुमानशब्देन एकशब्दस्य समास इत्यर्थः ।

* * *

२२ **सु०— प्रत्यनुमानस्योत्तरं शङ्कते अनूर्ध्वेति ।**

## अनु०— अनूर्ध्वगतिता तत्र यद्युपाधिः

**तत्र देवदत्तगतेर्दुःखेतत्वे अनूर्ध्वताविशिष्टं गतित्वं प्रयोजकं न गतित्वमात्रमिति यदि ब्रूयादित्यर्थः । पक्षेतरोऽयं कस्माच्छङ्कित इति चे(त्)न्न । लक्षणसम्पत्तौ तदुपाधित्वस्योक्तत्वात् । निराकरोति खगस्येति ।**

खगस्य च ।
दूरोर्ध्वगमने दुःखमिति साध्यानुगो न सः ॥

तदा वदाम इत्यादावुपस्कर्तव्यम् । खगस्य पारावतादेः **दूरोर्ध्वगमने** च दुःख-मस्तीति हेतोः **स** उपाधिः **साध्यानुगः** साध्यव्यापको **न** भवतीत्यतोऽनुपाधिः ।

इदमुक्तं भवति । किमयं केवलसाध्यव्यापकोऽभिमतः किं वा साधनावच्छिन्न-साध्यव्यापकः । न प्रथमः । अधर्मे साध्यसद्भावेऽप्यनूर्ध्वताविशिष्टगतित्वस्याभावेन साध्याव्यापकत्वात् । न द्वितीयः । खगस्य दूरोर्ध्वगतौ गतित्वावच्छिन्ने दुःखेतत्वे सत्य-प्यनूर्ध्वगतित्वस्य अभावात् । अनेनोर्ध्वगतित्वाभावोऽनूर्ध्वगतित्वं केवलसाध्ये उपाधि-रित्यपि प्रत्युक्तमिति । दूरग्रहणं खगस्य दुःखं व्यञ्जयितुम् । तदा हि तस्मिन् दुःखकार्याणि दृश्यन्ते । प्रत्यागमनसमयवर्तिदुःखकार्याणि तानीति चेन्न । ऊर्ध्वं गच्छत्येव तद्दर्शनात् ।

**परि०— तत्रेत्यनुवादः** देवदत्तेत्यादि व्याख्या ॥ **अनूर्ध्वताविशिष्टमिति** । तच्च दृष्टान्ते सत्त्वात् पक्षे चासत्त्वात् साध्यव्यापकत्वे सति साधनाव्यापकत्वाद्भवत्युपाधिरिति भावः ॥ **लक्षणेति** । व्याप्तिरूपेत्यर्थः ॥ **उक्तत्वादिति** । युक्तिपादैतद्ग्रन्थे 'साध्यव्यापकवैलोम्यमि'त्युपाधि-लक्षणविवरणप्रकरणे साध्यसमव्यापकस्योपाधित्वखण्डनप्रस्तावे उक्तत्वादित्यर्थः । अधर्मत्यागेन खगगत्युक्तौ तात्पर्यं वक्तुमाह **इदमुक्तमिति** ॥ **अनेनेति** । खगगतौ साध्याव्यापकत्वकथनेने-त्यर्थः ॥ **प्रत्यागमनेति** । तथा च ऊर्ध्वगतौ दुःखेतत्वरूपसाध्यस्यैवाभावान्न साध्याव्यापकत्वदोष इति भावः ।

**गु०दी०—** शरगतिव्यावर्तनाय **विशिष्टं गतित्वमित्युक्तम्** । विशिष्टं गतित्वं चेतनगतित्वमिति यावत् ।

**यादु०— उक्तत्वादिति** । द्वितीयाध्याय इति शेषः ॥ **दुःखकार्याणीति** । पूर्ववद्वेगाभावादीनीत्यर्थः । तैश्च दुःखमनुमेयमिति भावः ।

**वं०प०— उक्तत्वादिति** । अनुकूलतर्काभावदशायामित्यर्थः ॥ **ऊर्ध्वगतित्वाभाव इति** । तथा च नाधर्मे साध्याव्यापकेति भावः । अयमप्युपाधिः खगस्य दूरोर्ध्वगतौ साध्याव्यापकत्वादेव प्रत्युक्त इत्यवधेयम् ।

**कं०रा०— पक्षेतरोऽयमिति** । यद्यप्यनूर्ध्वत्वविशेषणेनाचेतनाश्रितोर्ध्वगतेरपि व्यावर्तनात् पक्षमात्रव्यावर्तकविशेषणवत्त्वाभावेन पक्षेतरत्वमनूर्ध्वगतित्वस्य, तथाऽपि साधनव्यापकत्वोपयुक्तपक्षमात्रव्यावृत्तिप्रयोजकविशेषणवत्त्वात् पर्वतावयववृत्तिरूपादिव्यावर्तकविशेषणोपेतपर्वतावयववृत्त्यन्यत्वादेरिव पक्षेतरत्वमिति द्रष्टव्यम् ॥ **लक्षणेति** । साध्यव्यापकत्वसाधनाव्यापकत्वसम्पत्तौ पक्षेतरस्याप्युपाधित्वमस्तीत्युक्तत्वादित्यर्थः ॥ **अनेनेति** । खगस्य दूरोर्ध्वगतौ दुःखेतत्वे सत्यूर्ध्वगतित्वाभावस्याभावेन साध्यव्यापकत्वेनेत्यर्थः । **केवल इति** । अधर्मे दुःखेतत्वरूपसाध्यवत्यूर्ध्वगतित्वाभावरूपोपाधेरपि सत्त्वात् तस्य केवलसाध्य उपाधित्वं सम्भवतीति शङ्कितुर्हृदयम् ॥ **तदा हीति** । दूरोर्ध्वगमने हि खगे दुःखकार्याणि दृश्यन्त इत्यर्थः ॥ **ऊर्ध्वं गच्छत्येवेति** । ऊर्ध्वं गच्छत्येव खगे दुःखकार्याणां मुखग्लान्यादीनां पर्वतशिखरादूर्ध्वदेशस्थपुरुषेण दृश्यमानत्वादिति भावः ।

**शे०चं०—** अनुमानमात्रोच्छेदकत्वेन पक्षेतरस्यानुपाधित्वान्न तदाशङ्का युक्तेत्याशङ्कते **पक्षेतर इति** । ऊर्ध्वताविशिष्टगतित्वस्य पक्षेऽपि सत्त्वेनानूर्ध्वगतित्वस्य पक्षमात्रव्यावर्तकविशेषणवत्त्वात् पक्षेतरत्वमित्यर्थः ॥ **उक्तत्वादिति** । नविलक्षणत्वाधिकरणे 'साध्यव्यापकवैलोम्यमव्याप्तिः साधनस्य चे'त्येतद्ग्रन्थव्याख्यानावसरे 'तत्किं विशेषणद्वयसम्पन्नं न वे'त्यादिना ग्रन्थेन विशेषणद्वयसम्पन्नस्य पक्षेतरस्योपाधितायाः समर्थितत्वादित्यर्थः । खगस्येत्यादिग्रन्थस्य परिहारत्वे ज्ञापकाभावादपेक्षितं पूरयति **तदेत्यादि** । सर्वाणि वाक्यानि सोपस्कराणि भवन्तीत्यभियुक्तवचनादिति भावः । नन्वधर्मे साध्याव्यापकताया वक्तुं शक्यत्वात् तामनुक्त्वा स्वर्गस्य तदूर्ध्वगमनपर्यन्तं भाष्यकाराणां धावनमनर्थकमित्याशङ्क्य साधनावच्छिन्नसाध्यव्यापकत्वपक्षदूषणार्थत्वान्न तदिति भावेनात्र सम्भावितकल्पद्वयमाद्यपक्षदूषणं च बहिरेवोक्त्वा द्वितीयपक्षदूषणपरतया भाष्यं योजयितुमाह **इदमुक्तं भवतीति** । खगस्य दूरोर्ध्वगमनपर्यन्तं भाष्यकारीयधावनस्य प्रयोजनान्तरमप्याह **अनेनेति** ॥ **प्रत्युक्तमितीति** । खगस्य दूरोर्ध्वगतौ सत्यपि दुःखसाधनत्वे ऊर्ध्वगतित्वस्यैव सत्त्वेन तदभावरूपानूर्ध्वगतित्वस्य तत्राभावेनोक्तोपाधेरपि साध्याव्यापकत्वमिति भावः ॥ **तदा हीति** । दूरोर्ध्वगमने हीत्यर्थः ॥ **दुःखकार्याणीति** । गात्रस्वेदकम्पपूर्ववद्वेगाभावादीनीत्यर्थः ।

**वा०र०— पक्षमात्रव्यावर्तकेति** । खगगतेरपि व्यावर्तनात्कथमेतदिति न वाच्यम् । खगगतिमादायैव दूषयिष्यमाणत्वात् । 'साध्यव्यापकवैलोम्यमि'ति नविलक्षणत्वाधिकरणीयानुव्याख्यानमूले ।

**स०व्र०— अनेनेति** । खगस्य दूरोर्ध्वगतौ गतित्वावच्छिन्ने सुखेतत्वे सत्यपि ऊर्ध्वगतित्वस्यैव सत्त्वेन ऊर्ध्वगतित्वाभावरूपानूर्ध्वगतित्वस्य तत्राभावात् तत्साध्याव्यापकत्वेनेत्यर्थः ।

**॥ इति सिद्धान्त्युक्तानुमाने उपाधिशङ्कानिरासः ॥**

* * *

**।। अथ प्रतिपक्षानुमाने उपाधेः दूषणत्वाभावः ।।**

२३ **सु०—** मा भूदयमुपाधिः शरीरवृत्तित्वं तु भविष्यति । देवदत्तगतौ यद्दुःखेतत्त्वं तत्र न गतित्वं प्रयोजकं किं नाम शरीरवृत्तित्वम् । न चेदं साध्याव्यापकम् । यद्दुःखेतं तच्छरीरिवृत्तीत्यस्य व्यभिचारादर्शनादित्यतः सर्वोपाधिसाधारणं दूषणमाह **प्रतिसाधनेति** ।

**अनु०— प्रतिसाधनरूपस्य नानुमानस्य दूषणम् ।**
**उपाधिः**

जिनोक्तानुमानानां **प्रतिसाधनं** खल्वस्माभिरुपन्यस्तम् । **प्रतिसाधनरूपस्य अनुमानस्य** चोपाधिः **न दूषणम्** । अतोऽत्रोपाध्युद्भावनमेवासङ्गतं किं तद्दूषणगवेषणेन । पूर्वोपाधेस्त्वङ्गीकारेण दूषणमभिहितमिति । कुतो नेत्यत आह **प्रतिरूपं हीति** ।

**प्रतिरूपं हि साधनं तन्न चापरम् ।**

यदुपाधिर्नाम दूषणं तत्प्रतिरूपं साधनं **न** त्वनैकान्त्यादिकम् । **हि**शब्दो यस्मादित्यर्थे ।

**एतदुक्तं भवति । उपाधिस्तावत्प्रतिपक्षोन्नायकः नेतरथा दूषणम् । ततः प्रतिपक्षस्योपाधिमुद्भावयता प्रतिपक्ष एवोद्भावितो भवति । प्रतिपक्षश्च साधनाय प्रवृत्तं प्रतिबध्नाति न पुनः किञ्चित् साधयति । प्रथमेनैव प्रतिबद्धत्वात् । अतः प्रतिपक्षस्य प्रतिपक्षोऽकिञ्चित्करत्वान्न दूषणम् । अत एवोपाधिरपीति ।**

**परि०— शरीरवृत्तित्वमिति** । पक्षे च देहबन्धान्मुक्तगतौ गतित्वरूपसाध्ये सत्यपि उपाधेरभावात् साधनाव्यापकत्वमिति भावः । **तदि**त्यनुवादः **दूषणपदे**नान्वयः । उपाधिनिमित्तदूषणमित्यर्थः ।। **न त्वनैकान्त्यादिकमिति** । व्याप्यत्वासिद्धिः **आदिपदार्थः** । अस्फुटत्वादाह **एतदुक्तमिति** । उपाधेः प्रतिपक्षोन्नायकस्य प्रतिपक्षत्वोक्तिरयुक्तेत्यतो वाह **एतदुक्तमिति** । न त्वित्युक्त्या चरस्त्वर्थ इति सूचितम् । **अत एवेति** । अकिञ्चित्करत्वादेवोपाधिरपि न दूषणमित्यर्थः ।

**यादु०— प्रतिरूपं साधनमिति** । प्रतिरूपसाधनोन्नायकमित्यर्थः । न त्वनैकान्त्यादिकमित्यत्रापि नानैकान्त्याद्युन्नायकमित्यर्थः । आदिपदेन व्याप्यत्वासिद्ध्यादिकं ग्राह्यम् ।। **प्रतिपक्षश्चेति** । लोक इति शेषः ।। **न पुनः किञ्चिदिति** । स्वसाध्यं न साधयतीत्यर्थः । तथात्वे हि स्थापनानुमाने प्राबल्यसम्पादकतया प्रति-

पक्षान्तरं सार्थकं स्यादित्याशयः ॥ **अकिञ्चित्करत्वादिति** । अयमाशयः । प्रतिपक्षे प्रतिपक्षान्तरमुद्भाव्यमानं न तावत् स्वसाध्यं साधयति । पूर्वेण प्रतिपक्षेण प्रतिबद्धत्वात् । नापि पूर्वं प्रतिपक्षं प्रतिबध्नाति । तस्य स्थापनानुमानेनैव प्रतिबद्धत्वात् । नापि स्थापनायामनेकत्वप्रयुक्तं प्राबल्यं सम्पादयति पूर्वेण प्रतिपक्षेण प्रतिबद्धस्य तस्य स्वसाध्यसाधनासमर्थस्यान्यत्र प्राबल्यानापादकत्वात् । शतमप्यन्धानां न पश्यतीति न्यायादिति ॥ **अत एवेति** । अकिञ्चित्करप्रतिपक्षोन्नायकत्वादेव प्रतिपक्षानुमाने उपाधिरपि न दूषणमित्यर्थः ।

**वं०प०— व्यभिचारादर्शनादिति** । सुखे दुःखसमानाधिकरण्यरूपदुःखेतत्वशरीरवृत्तित्वयोः सद्भावेन कुत्रापि व्यभिचारादर्शनादित्यर्थः ॥ **प्रतिरूपं साधनमिति** । स्वव्यावृत्त्या पक्षे साध्याभावसाधकमित्यर्थः । सत्प्रतिपक्षरूपमिति यावदिति भावः ॥ **प्रथमेनैवेति** । यथा नित्यः शब्दः श्रावणत्वादित्यनुमानस्य प्रतिपक्षभूतं शब्दोऽनित्यः कृतकत्वादित्यनुमानं तत्र चेदुपाधिः कश्चनोद्भाव्यते । तर्हि तेन सत्प्रतिपक्षोन्नयने पुनर्नित्यमेव साधितं स्यात् । तच्च प्रथमेनानित्यत्वसाधककृतकत्वानुमानेनैव प्रतिरुद्धम् । न च नित्यत्वसाधकानुमानानामनेकत्वप्राप्त्या प्राबल्यमिति वाच्यम् । 'शतमप्यन्धानां न पश्यती'ति न्यायात् एकेनापि बहूनां प्रतिबन्धादिति भावः ॥ **अत एवोपाधिरपीति** । प्रतिपक्षस्याकिञ्चित्करत्वात् तदुन्नायकोपाधिरप्यकिञ्चित्कर इत्यर्थः ।

**कं०रा०— व्यभिचारादर्शनादिति** । यद्यपि खगशरीरनिष्ठोर्ध्वगतौ दुःखसाधनत्वरूपदुःखेतत्वे सत्यपि शरीरवृत्तित्वस्याभावाद्व्यभिचारः, तथाऽप्यभिमन्यमानगतधर्मस्य परम्परासम्बन्धेनाभिमानिवृत्तित्वमस्तीति न व्यभिचार इत्याशयः । शरीरासम्बद्धानामपि कण्टकादीनां दुःखसाधनत्वाभावात् तत्सम्बद्धानां तेषां दुःखसाधनत्वेऽपि शरीरद्वारा शरीरिवृत्तित्वस्यापि तत्र सत्त्वान्न व्यभिचार इति बोध्यम् । ननु प्रतिसाधनरूपेऽनुमाने उपाधेरदूषणत्वेन तदुद्भावनस्यैवासङ्गततया तद्दूषणस्यावक्तव्यत्वे प्रागनूर्ध्वगतित्वरूपोपाधेः कथं दूषणत्वमुक्तमित्यत आह **पूर्वोपाधेरिति** । पूर्वमुद्भावितस्यानूर्ध्वगतित्वरूपोपाधेः प्रतिसाधनरूपेऽनुमाने दूषणत्वमङ्गीकृत्य साधाव्यापकत्वेन तस्यादूषणत्वं व्युत्पादितम् । तथाच अभ्युपगमवादत्वेन पूर्वग्रन्थस्य प्रवृत्तत्वान्न पूर्वोत्तरविरोध इति भावः । प्रतिपक्षरूपानुमानस्य प्रतिबन्धक एव प्रतिपक्षोऽस्त्वित्यत आह **प्रथमेनैवेति** । प्रथमेन स्थापनानुमानेनैव प्रतिपक्षानुमानस्य प्रतिबद्धत्वान्न तत्प्रतिबन्धकत्वं प्रतिपक्षान्तरस्य युक्तमिति भावः ॥ **अत एवेति** । प्रतिपक्षानुमाने प्रतिपक्षस्यादूषणत्वादेव तदुन्नायक उपाधिरप्यदूषणमिति भावः ।

**शे०चं०— सर्वोपाधीति** । निरस्तानिरस्तसर्वोपाधीत्यर्थः ॥ **अत इति** । दूषणस्यैवोद्भाव्यत्वादित्यर्थः । **तद्दूषणेति** । उपाधेः साध्याव्यापकत्वरूपदूषणेत्यर्थः । तर्ह्यनूर्ध्वगतित्वरूपोपाधेरपि प्रतिसाधनरूपानुमानदूषणत्वाभावापत्त्या तस्याः साध्याव्यापकत्वेन दूषणं भाष्यकारीयं कथं सङ्गच्छत इत्यत आह **पूर्वोपाधेस्त्विति** ॥ **प्रतिरूपं साधनमिति** । प्रतिरूपसाधनोन्नायकमित्यर्थः । न त्वनैकान्त्यमित्यत्रापि नानैकान्त्याद्युन्नायकमित्यर्थः । आदिपदेन व्याप्यत्वासिद्ध्यादिपरिग्रहः ।

ननु व्यभिचाराद्युन्नायकत्वेनाप्युपाधेर्दूषणत्वसम्भवान्न प्रतिपक्षोन्नायकत्वेनैव तस्य दूषणत्वमिति नियमसिद्धिः । तत्सिद्धावपि प्रतिपक्षस्यापि प्रतिपक्षदूषणत्वसम्भवान्न तत्र तस्य अदूषणतासिद्धिः । तदसिद्धौ च

नोपाधेरपि प्रतिपक्षे दूषणत्वसिद्धिरित्यत आह **एतदुक्तं भवतीति** ॥ **उपाधिस्तावदिति** । पक्षादिप्रविभागोत्तरकालमिति शेषः ॥ **नेतरथेति** । व्यभिचारोन्नायकत्वेन दूषणं नेत्यर्थः । अयमाशयः । साधनस्य साध्यव्यापकपरित्यागो हि पक्षादन्यत्र वा स्यात्पक्षे वा । नाद्यः । स्फुटे व्यभिचारे सति तदर्थमुपाध्यप्रतीक्षणात् । द्वितीये साध्यव्यापकव्यावृत्तिः पक्षात्साध्यमपि व्यावर्तयतीति प्रतिपक्षोन्नायकतैव । न च तदाऽप्यव्याप्त्युन्नायकमेवास्तु । उपाधिव्यावृत्त्या साध्यरहिते पक्षे वर्तमानस्य हेतोर्व्यभिचारावश्यम्भावादिति वाच्यम् । तथा सति बाधप्रतिरोधयोरपि व्यभिचारोन्नायकत्वापातात् । तत्र ताभ्यामेवानुमाने दुष्टे किं तदुपजीविना व्यभिचारेणेति चेत् । तर्ह्यत्रापि व्यापकव्यावृत्तिरूपप्रतिपक्षेणैवानुमाने दुष्टे किं तदुपजीविना व्यभिचारेणेति तुल्यम् । किञ्च पक्षे व्यभिचारः किं निश्चित उत सन्दिग्धः । आद्येऽपि पक्षे साध्याभावो निश्चितो न वेति वाच्यम् । आद्येऽपि किं प्रमाणान्तरेणोत साध्यव्यापकोपाधिव्यावृत्त्या । प्रथमे तत एवानुमानं दुष्टमिति किमुपाधिना । न द्वितीयः । परस्पराश्रयत्वप्रसङ्गात् । नेति पक्षे उपाधेः साध्यव्यापकत्वानिश्चयात् कथं तद्व्यावृत्त्या पक्षे साधनस्य साध्यव्यभिचारः स्यात् । नान्त्यः । पक्षे सन्दिग्धव्यभिचारस्य स्वतःसिद्धत्वेन तदर्थमुपाधिमुखनिरीक्षणानपेक्षात् । सर्वानुमानोच्छेदापत्तेश्चेत्यन्यत्र विस्तरः ॥ **प्रतिपक्ष इति** । लोक इति शेषः ॥ **न पुनरिति** । स्वसाध्यं न साधयतीत्यर्थः । तथात्वे हि खलु स्थापनानुमाने प्राबल्यापादकतया प्रतिपक्षान्तरं सार्थकं स्यादिति भावः । अस्तु तर्हि प्रतिपक्षप्रतिबन्धकत्वेनैव प्रतिपक्षदूषणत्वं इत्यत आह **प्रथमेनैवेति** । स्थापनानुमानेनैव प्रतिपक्षस्य प्रतिबद्धत्वान्न प्रतिपक्षस्य तत्प्रतिबन्धकत्वमिति भावः । कुतः स्वसाध्यं न साधयतीत्यस्याप्येतदेवोत्तरं **प्रथमेनैवेति** ॥ **अकिञ्चित्करत्वादिति** । साधनबाधनान्यतरकारित्वाभावादित्यर्थः ॥ **अत एवोपाधिरपीति** । अकिञ्चित्करप्रतिपक्षस्योन्नायकत्वादेव प्रतिपक्ष उपाधिरपि न दूषणमित्यर्थः । एतच्चाङ्गीकृत्योक्तं न वस्तुतः । प्रतिपक्षेऽपि प्रतिपक्षोपाध्योः 'विमतं सकर्तृकं घटवदित्युक्ते विमतं विकर्तृकमस्मत्सम्मतकर्तृरहितत्वादित्युत्तरं, अकार्यत्वमुपाधिरित्युक्ते शरीरजन्यत्वमितरत्राप्युपाधिरित्युत्तरमि'ति तत्र तत्राचार्यैरुद्भावितत्वेन प्रतिपक्षेऽपि तयोर्दूषणत्वस्थितेः । न च प्रतिपक्षे उपाध्युद्भावनस्य वैयर्थ्यात् कथं दूषणत्वमिति वाच्यम् । स्वपक्षसाधनार्थमेकं परसाधनप्रतिरोधनार्थमपरमिति सार्थकत्वात् । न च पूर्वेण प्रतिपक्षेण प्रतिबद्धस्य कथं स्वपक्षसाधकत्वमिति वाच्यम् । एकेनैकस्य प्रतिबन्धसम्भवेऽपि बहूनामेकेन प्रतिबन्धस्यान्याय्यतया तदयोगात् । उक्तं च 'द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावतः' इति । अन्यथा बहुत्वप्रयुक्तस्य प्राबल्यस्य दत्तजलाञ्जलिता स्यात् । तस्यैतत्परित्यागेनासङ्कीर्णोदाहरणाभावात् । विस्तरस्तु *तर्कताण्डवे* द्रष्टव्यः ।

**वा०र०—** उपाधेर्दूषकताबीजकथनरूप*तर्कताण्डवं* च मनसि कृत्वाऽऽह **अयमाशय इति** ॥ **अन्यत्र विस्तर इति** । उत्तरस्थलीयतर्कताण्डवे नविलक्षणत्वाधिकरणीयोक्तमूले चेत्यर्थः । तत्र तुल्यमित्यन्तं तर्कताण्डवम् । उत्तरो ग्रन्थः 'यद्यपि पक्षे नोपाधी'त्यादिस्तत्त्वनिर्णयटीकाग्रन्थोऽप्यत्र योज्यः । स च व्याख्यानावसरोऽस्ति तर्कताण्डवे ।

**स०व्र०— अत एवोपाधिरपीति** । प्रतिपक्षे प्रतिपक्षयोगस्य अकिञ्चित्करत्वादेवेत्यर्थः ।

**॥ इति प्रतिपक्षानुमाने उपाधेः दूषणत्वाभावः ॥**

॥ अथ 'शरीरिवृत्तित्व'रूपस्य साधनाव्यापकत्वभङ्गात् नोपाधित्वम् ॥

२४ **सु०—** ननु पक्षादिप्रविभागोत्तरकालमुपाधिः प्रतिपक्षस्योन्नायको भवत्येव । प्राक् तु ततोऽव्याप्तेरुन्नायकः । अतः तदपेक्षया शरीर(रि)वृत्तित्वमुपाधिर्भवतु इत्यतः अभ्युपगम्य दूषयति **अथापीति** ।

## अनु०— अथाऽपि सशरीरत्वं चात्रोपाधिर्न वै भवेत् ।

यदि कयाचिद्विवक्षया प्रतिपक्षस्यापि **उपाधिरुच्यते** तथाऽपि **सशरीरत्वं** शरीरेण सह वर्तमानत्वं शरीरसमानाश्रयत्वं शरीर(रि)वृत्तित्वमिति यावत् । न केवलमनूर्ध्वगतित्वमिति **चशब्दः** । **अत्र** अस्मदुक्तानुमाने । **वैशब्दो**ऽवधारणे । कुतो न भवेदित्यत आह **गतित्वमिति** ।

## गतित्वं यत्र देहित्वमिति यत्साधनानुगम् ।

**यत्र गतित्वं** विशिष्टं तत्र **देहित्वं** देहेन सम्बन्धः पूर्वोक्तः देहिवृत्तित्वमिति यावत् । **इति** प्रकारेण शरीर(रि)वृत्तित्वं **साधनानुगं** साधनस्य विशिष्टगतित्वस्य व्यापकं **यत्** यस्मादित्यर्थः ।

**परि०— विशिष्टमिति** । (अचेतनव्यावृत्तमि)चेतनाश्रितत्वविशिष्टमित्यर्थः । **पूर्वोक्तः** पूर्ववाक्योक्तः ॥ **विशिष्टगतित्वस्य व्यापकमिति** । (उपाध्यभावादित्यर्थः ।) तथा च पक्षे तदभावात् तद्व्याप्यगतिरपि मुक्तस्य नोपपद्यत इति भावः । (दुःखेतत्वशरीरिवृत्तित्वरूपेणापीत्यर्थः)

**यादु०— विशिष्टमिति** । चेतनाश्रितत्वविशिष्टमित्यर्थः । अचेतनगतौ व्यभिचारपरिहारायेदमुक्तम् ।

**वं०प०— प्राक् तु इति** । पक्षादिप्रविभागात्प्राक् व्याप्तिग्रहणवेलायामित्यर्थः ॥ **कयाचिद्विवक्षयेति** । पक्षादिप्रविभागात् प्राक् व्याप्तिग्रहणवेलायां प्रवृत्तस्योपाधेरव्याप्त्युन्नायकत्वविवक्षयेत्यर्थः ॥ **शरीरसमानाश्रयत्वमिति** । शरीरेण सहैकस्मिन्नधिकरणे वर्तमानत्वं नाम शरीरसमानाश्रयत्वमेवेत्यर्थः । **गतित्वं विशिष्टमिति** । चेतनत्वविशिष्टं गतित्वमित्यर्थः । **पूर्वोक्तः** सामानाधिकरण्यरूपः ।

**कं०रा०— गतित्वं विशिष्टमिति** । चेतनाश्रितत्वविशिष्टं गतित्वमित्यर्थः । तथाच चेतनाश्रितगतित्वस्यैव साधनत्वेन प्राग्विवक्षितत्वात् तद्व्यापकत्वमनुपपाद्य केवलगतित्वव्यापकत्वोपपादनमसङ्गतं अयुक्तं च । शरीरवृत्तित्वस्य पाषाणादिगताभावेन तस्य केवलगतित्वं प्रत्यव्यापकत्वादिति चोद्यमनवकाशमिति भावः ।

शे०चं०— **प्राक् तु ततोऽव्याप्तेरुन्नायकमिति** । साध्यव्यापकं परित्यजतो हेतोः साध्यपरित्याग-स्यावश्यकत्वात् साध्यपरित्यागस्यैव च अव्याप्तित्वात् । न तु तदा सत्प्रतिपक्षस्य । पक्षे हि साध्योपसंहारे प्रतिपक्षावसरः । न तु ततः प्राक् । न च व्याप्तिग्रहणसमये पक्षे साध्योपसंहारोऽस्तीति कथं तदा सत्प्रतिपक्षत्वं स्यादित्यव्याप्त्युन्नायकत्वमेव तस्येत्याशयः । सशरीरत्वमिति भाष्यपदानुवादेन शरीरेण सह वर्तमानत्वमिति तदर्थो निरूपितः । तदुक्ताभिमतसम्बन्धप्रदर्शनं **शरीरसमानाश्रयत्वमिति** । तात्पर्यार्थकथनं **शरीरवृत्तित्वमिति यावदिति** । ननु घटादिगतौ गतित्वसत्त्वेऽपि देहवृत्तित्वरूपदेहित्वाभावेन कथमस्योपाधेः साधनव्यापकत्वमित्यत आह **यत्र गतित्वं विशिष्टमिति** । चेतनाश्रितत्वरूपविशेषणविशिष्टमित्यर्थः । घटादिगतौ च न विशिष्टं गतित्वमिति न तत्र व्यभिचार इति भावः ॥ **पूर्वोक्त इति** । देहसमानाश्रयत्वरूप इत्यर्थः ।

स०व्र०— ननु देहित्वरूपोपाधेः साधनव्यापकत्वमभिहितम् । तदयुक्तम् । घटादिगतौ गतित्वस्य सद्भावेऽपि देहित्वस्य तत्राभावादित्यत आह **यत्र गतित्वं विशिष्टमिति** । चेतनाश्रितत्वरूपविशेषणविशिष्ट-मित्यर्थः । घटादौ च न विशिष्टगतित्वमिति नोक्तदोषः ।

**॥ इति 'शरीरिवृत्तित्व'रूपस्य साधनाव्यापकत्वभङ्गात् नोपाधित्वम् ॥**

* * *

**॥ अथ आपादनसन्दर्भे अपसिद्धान्तस्य न दोषत्वम् ॥**

२५ **सु०— स्यादेतत् । यत्किञ्चिद्गतिपक्षीकारे बाधादिप्रसङ्गात् मुक्तानां गतिः पक्षीकर-णीया । तस्या दुःखेतत्वसाधने भवतामपसिद्धान्तः स्यात् । भवद्भिरपि मुक्तानां निर्दुःख-त्वस्याभ्युपगतत्वात् । तथा या गतिः सा दुःखेतेति व्याप्तिं वदता ईश्वरस्यापि दुःखमङ्गी-करणीयम् । अन्यथा तत्र व्यभिचारापत्तेः । ततोऽप्यपसिद्धान्त एव । शरीर(रि)वृत्तित्वस्य साधनव्यापकताऽङ्गीकारे गतिमत्त्वादीश्वरस्यापि शरीरित्वमङ्गीकार्यम् । ततश्चापसिद्धान्त एवेत्यत आह आगमेति ।**

## अनु०— आगमाननुसारित्वे प्रसङ्गोऽयं यतस्ततः ।
## नापसिद्धान्तता दोषः

**यतः वेदादिकमागममनुसृत्य मोक्षस्वरूपानुमाने अतिप्रसङ्गोऽयं अस्माभिरुक्तः यदि वेदादिनिरपेक्षस्त्वमेवमनुमिमीषे तदैवमपि कस्मान्नानुमिनुया इति । ततः कारणादप-सिद्धान्ततादोषो न भवति । प्रसङ्गेऽप्यपसिद्धान्तमुद्भावयन्तं बोधयितुमाह प्रसङ्ग इति ।**

**प्रसङ्गे यदि सा भवेत् ।**

**तदैवातिप्रसङ्गः स्यात्**

**सा** अपसिद्धान्तता । **भवेत्** दोष इति शेषः । कथमतिप्रसङ्ग इत्यत आह **नेति** ।

**न प्रसङ्गः क्वचिद्भवेत् ।**

**इतिशब्दोऽत्र अन्तेऽध्याहार्यः । सर्वेष्वपि प्रसङ्गेष्वपसिद्धान्तस्य कथञ्चिदुद्भावयितुं शक्यत्वादिति भावः । एतेन मुक्तानां सततोर्ध्वगतिः सिद्धा चेत् बाधः, अन्यथा आश्रया-सिद्धिरित्यपि परास्तम् । परसिद्धाश्रये प्रतिपक्षस्य प्रसञ्जनात् ।**

**परि०**— व्याघातानवस्थाद्यापादनस्थलेऽपसिद्धान्तस्याभावात् क्लेशेन तत्सम्पादनस्य तत्र कार्यत्वात् **कथञ्चिदित्युक्तम्** । कार्यमस्तु कारणं मास्तु, धूमोऽस्तु वह्निर्मास्तु, मूकोऽहमिति यदि ब्रूषे तर्हि स्वक्रियाविरोधः, इत्यादावपसिद्धान्तो न हि स्फुटोऽस्ति । तत्र तत्र हि कार्योद्देशेन तत्त-त्कारणे प्रवृत्तिस्तव न स्यादित्यादौ, प्रवृत्तेः प्रत्यक्षावगतत्वेन सर्वसम्मततया तदभावापादने-ऽपसिद्धान्त इत्यादिरूपेण क्लेशेनापसिद्धान्तस्य वाच्यत्वादिति भावः । **एतेन** प्रसङ्गरूपताकथनेने-त्यर्थः ॥ **बाध इति** । शरीरिवृत्तित्वरूपव्यापकनिवृत्त्या गतेरपि निवृत्त्युक्तौ बाध इति वा, सततो-र्ध्वगतिः दुःखहीनेत्याद्यनुमाने भवद्भिरुक्तदुःखेतत्वरूपप्रत्यनुमाने बाध इति वाऽर्थः ।

**गु०दी०**— **इतिशब्दोऽध्याहार्य** इति वदता तदा क्वचिदपि प्रसङ्गो न भवेदेवेत्यतिप्रसङ्गः स्यादेवेति योजना सूचिता ।

**यादु०**— **सर्वेष्वपि प्रसङ्गेष्विति** । यद्यपि धूमादिकं न कस्यापि सिद्धान्तः येन तदभावापादने-ऽपसिद्धान्तता । तथाऽपि प्रामाणिकं न परित्याज्यमप्रामाणिकं न स्वीकार्यमिति सामान्यतः सर्वैराचार्यैरभ्युप-गतत्वेन धूमाभावापादनमपि केनचित्क्रियमाणं सामान्यतः स्वाचार्याभ्युपगमविरुद्धमेव प्रामाणिकपरित्यागादि-रूपत्वात् । अतस्तत्राप्यपसिद्धान्तता वक्तुं शक्यैव । तदिदमाह **कथञ्चिदिति** । सामान्यतः स्वाचार्याभ्युपगत-विरुद्धाचरणरूपत्वेनेत्यर्थः ॥ **एतेनेति** । उक्तरीत्या मुक्तगतौ व्यभिचारस्य परिहर्तुं शक्यत्वेनेत्यर्थः ।

**वं०प०**— **नानुमिनुयाः** एवमपि कस्मान्नानुमानं करोषीत्यर्थः । **सततोर्ध्वगतिः** मुक्तिकालीना ॥ **सिद्धा चेदिति** । सिद्धान्तिनां भवतामिति शेषः ॥ **बाध इति** । दुःखेतत्वाभावादिति भावः ।

कं०रा०— **बाधादिप्रसङ्गादिति** । अचेतनगतौ बाधः । देवदत्तादिगतौ सिद्धार्थत्वमिति दूषणप्रसङ्गादित्यर्थः । **या गतिरिति** । या चेतनाश्रितगतिरित्यर्थः ॥ **गतिमत्त्वादिति** । ईश्वरस्यापि गतिमत्त्वात् तद्गतौ शरीरिवृत्तित्वोपपादनाय ईश्वरस्यापि शरीरित्वमङ्गीकार्यमित्यर्थः ॥ **इतिशब्दोऽत्रान्तेऽध्याहार्य इति** । तथाच 'न प्रसङ्गः क्वचिद्भवेदि'तीत्यतिप्रसङ्गः स्यादिति मूलस्यान्वय इति भावः ॥ **एतेनेति** । मुक्तगतौ चेतनाश्रितगतित्वेन शरीरिवृत्तित्वस्य साधनेनेत्यर्थः ।

**शे०चं०— बाधादीति** । अचेतनगतेर्दुःखेतत्वाभावस्य प्रमाणसिद्धत्वेन तत्र तत्साधने बाधः संसारिगतेर्दुःखेतत्वस्य प्रमाणसिद्धत्वेन तस्यास्तत्साधने सिद्धसाधनमित्यर्थः ॥ **तत्रेति** । ईश्वरगतावित्यर्थः । तत्र गतित्वसद्भावेऽपि दुःखेतत्वाभावादिति भावः । नन्वतिप्रसङ्गप्रकारोपदर्शकत्वेन प्रसङ्ग इत्यादिभाष्यस्य 'न प्रसङ्गः क्वचिद्भवेदि'ति भाष्ये इतिशब्देन भवितव्यमिति तदभावो दोष इत्यतस्तदध्याहारस्य अत्र अभिप्रेतत्वाद्युक्तमस्य तत्प्रकारोपदर्शकत्वमिति भावेनाह **इतिशब्द इति** ॥ **सर्वेष्वपीति** । यदि निर्वह्निः स्यात् तर्हि निर्धूमोऽपि स्यादित्यादिप्रसङ्गेष्वपीत्यर्थः ॥ **अपसिद्धान्तस्येति** । धूमादिलिङ्गजातस्य स्वयमभ्युपगतत्वेन निर्धूमत्वाद्युक्तेस्तद्विरुद्धत्वादिति भावः । 'प्रसङ्गार्थतया प्रोक्ता न सिद्धान्तस्य दूषका' इत्यादिभक्तिपादीयानुव्याख्यानतट्टीकोक्तरीत्या वस्तुतस्तत्रापसिद्धान्ताभावसिद्धेः कथञ्चिदित्युक्तम् । एतेनेत्युक्तमेव विवृणोति **परसिद्धेति** ।

**स०व्र०— बाधादिप्रसङ्गादिति** । अचेतनगतौ दुःखेतत्वाभावस्य प्रमाणसिद्धत्वेन तत्र तत्साधने बाधः । आदिपदेन देवदत्तस्य दुःखसाधनगतेरपि पक्षत्वप्राप्त्या तत्र दुःखेतत्वस्य सिद्धत्वेनांशतः सिद्धसाधनं स्यादित्यस्य सङ्ग्रहः ॥ **तत्रेति** । ईश्वरगतावित्यर्थः । गतित्वस्येश्वरगतौ सद्भावेऽपि दुःखेतत्वाभावेन व्यभिचारापातादिति भावः ।

**॥ इति आपादनसन्दर्भे अपसिद्धान्तस्य न दोषत्वम् ॥**

* * *

**॥ अथ 'लोकाकाशगतित्व'रूपस्य साधनव्यापकत्वात् उपाधित्वाभावः ॥**

२६ **सु०**— उपाध्यन्तरमाशङ्कते **लोकेति** ।

## अनु०— लोकाकाशगतित्वं चेदुपाधिः

अत्र लोकाकाशसम्बन्धित्वमेव **उपाधिः** । साध्यव्यापकत्वात् । गतित्वं तु स्वरूपकथनम् । दूषयति **साधनेति** ।

साधनानुगः ।

सोऽपीत्युक्ते वदेत् किं स

या गतिः सा लोकाकाशसम्बन्धिनीति सोऽप्युपाधिः **साधनमनुगच्छति** व्याप्नोति । मुक्तगतावुपाधेरभावान्नेति चेन्न । तत्रापि गतित्वेन तत्साधनात् । एतेन शरीरिवृत्तित्वस्यापि साधनव्यापकत्वं समर्थितं वेदितव्यम् । तदिदमुक्तं **इत्युक्ते वदेत् किं स इति** । स्वाभिमते मोक्षे प्रमाणमुपदर्शयन् उपसंहरति **तस्मादिति** ।

तस्माद्वेदोदितो भवेत् ।

मोक्षः

**जिनोक्ते मोक्षस्वरूपे प्रमाणाभावात्** ।

**परि०— एतेनेति** । गतित्वेन तत्साधनस्य कथनेन इत्यर्थः । तस्मादित्यस्य अर्थः **जिनोक्तेति** ॥ *जिनोक्तमोक्षस्वरूपभङ्गः* ॥

**वं०प०— एतेनेति** । मुक्तगतावपि गतित्वेन शरीरिवृत्तित्वसाधनादिति भावः ।

**शे०चं०— तत्रापीति** । मुक्तगतिर्लोकाकाशसम्बधिनी गतित्वादिति गतित्वेनैव लोकाकाशसम्बन्धित्वसाधनादित्यर्थः ॥ **एतेनेति** । लोकाकाशसम्बन्धित्वरूपोपाधेः साधनव्यापकत्वव्युत्पादनेनेत्यर्थः ॥ **समर्थितं वेदितव्यमिति** । या गतिः सा शरीरिनिष्ठेति शरीरिवृत्तित्वमपि साधनव्यापकमेव । न च मुक्तगतावुपाधेरभावान्न साधनव्यापकतेति वाच्यम् । तत्रापि गतित्वेनैव तत्साधनसौलभ्यादिति व्यभिचारपरिहारसम्भवादिति भावः ।

**स०व्र०— तत्रापीति** । मुक्तगतिर्लोकाकाशसम्बन्धिनी गतित्वादिति गतित्वेनैव लोकाकाशसम्बन्धित्वसाधनादित्यर्थः ॥ **एतेनेति** । लोकाकाशसम्बन्धित्वरूपोपाधिः साधनव्यापकत्वोपपादनेनेत्यर्थः । मुक्तगतिः शरीरिणि वर्तते गतित्वादिति तत्राप्युपाधेः पक्षे साधनसम्भवादिति भावः ।

**॥ इति 'लोकाकाशगतित्व'रूपस्य साधनव्यापकत्वात् उपाधित्वाभावः ॥**

**॥ इति जैनाभिमतमोक्षस्वरूपनिरासः ॥**

* * *

**॥ अथ मोक्षविषये बौद्ध-मायामतयोः निराकरणम् ॥**

**॥ अथ बौद्धमतस्य विष्णुप्रणीतत्वेऽपि अग्राह्यत्वमेव ॥**

२७ सु०— उक्तदोषातिदेशेन बौद्धोक्तमपि मोक्षं दूषयति **एवमिति** ।

अनु०— एवं स्वयं विष्णुर्यद्यपीशो ह्यशेषवित् ।
चकार सौगतमतं मोहायैव चकार यत् ।
असुराणामयोग्यानां वेदमार्गे प्रवर्तताम् ।
अतोऽसुराधिकारत्वान्न ग्राह्यं तन्मतं क्वचित् ॥

यथा अप्रामाणिकत्वाज्जैनमतं न ग्राह्यम्, एवं **तन्मतं** सौगतमतमपि **क्वचिद्** ग्राह्यं न भवति । ननु परमाप्तेन बुद्धरूपेण(पिणा) विष्णुना कृतमिदं कथं न ग्राह्यमित्यत उक्तं **स्वयमिति** । यद्यपि सौगतमतं स्वयं विष्णुश्चकार तथाऽपि न ग्राह्यमिति सम्बन्धः । **ईश** इति करणपाटवमभ्युपैति । **अशेषवित्** इति तत्त्वज्ञानम् । अभ्युपगमे कारणं प्रमाणप्रसिद्धिं **हि**शब्देनाह । तर्हि कुतो न ग्राह्यमित्यत उक्तं **मोहायैवेति** । **यद्**यस्मादसुराणां मोहायैव तच्चकार । अतोऽसुराधिकारत्वान्न ग्राह्यम् । अधिक्रियन्तेऽस्मिन्नित्यधिकारः । असुराणा-मधिकारोऽसुराधिकारः, तस्य भावः तत्त्वं, तस्मात् । असुराः कुतो मोहनीया इत्यत उक्तम् **अयोग्यानामिति** । वेदमार्ग इति पूर्वेणोत्तरेण च सम्बध्यते । एतदुक्तं भवति । यद्यपि भगवान् बुद्धः पटुकरणः तत्त्वज्ञानवांश्च श्रुत्यादिसिद्धः । ग्रन्थकरणादेव विवक्षुश्च । नैता-वताऽप्याप्तः । विप्रलम्भकत्वात् । यथोक्तम् 'ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम् । बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यती'ति । अतस्तदुक्तं मोक्षस्वरूपं हेयमेवेति ।

परि०— **तत्त्वज्ञानमिति** । अभ्युपैतीत्यन्वयः ॥ **अभ्युपगम इति** ॥ यद्यपीत्यादिना विष्णुकृतत्वाङ्गीकार इत्यर्थः । यद्वा करणपाटवाद्यभ्युपगम इत्यर्थः ॥ **प्रमाणेति** । 'मोहनार्थं दानवानामि'त्यादिप्रथमस्कन्धतात्पर्याद्युक्तप्रमाणेत्यर्थः ॥ **अधिक्रियन्त इति** । अधिपूर्वात्कृञः 'अकर्तरि च कारक' इति कर्मणि घञ्प्रत्यये 'अचोञ्णिती'ति वृद्धौ रूपमिति भावः । 'कर्तृकर्मणोः कृती'ति कर्तरि षष्ठीति भावेनोक्तम् ॥ **असुराणामिति** । असुरैरधिक्रियमाणत्वादित्यर्थः ॥ **पूर्वेणो-त्तरेणेति** । वेदमार्गे अयोग्यानां, वेदमार्गे प्रवर्ततामित्यर्थः । ननु पटुकरणतत्त्वज्ञानविवक्षावत आप्त-

त्वादाप्तोक्तं कुतो न ग्राह्यमित्यत आह **एतदुक्तं भवतीति** ॥ **यथोक्तमिति** । प्रथमस्कन्धे तृतीयेऽध्याये ।

**यादु०—** असुराणामधिकारो यस्मिन्निति व्यधिकरणबहुव्रीह्याश्रयणं जघन्यमित्याशयेनान्यथा व्याचष्टे **अधिक्रियन्त इति** ।

**वं०प०—** **बौद्धोक्तमिति** । बुद्धरूपिणा विष्णुनेत्यर्थः ॥ **अभ्युपगमे कारणमिति** । तत्त्वज्ञानादिमता आप्तेन बुद्धेन प्रणीतत्वादिदं मतमवश्यमभ्युपगन्तव्यम् । एतादृशमतस्याभ्युपगन्तव्यतायाः प्रमाणसिद्धत्वादित्यर्थः । असुराणामधिकार इति कर्तरि षष्ठी । तथा च असुराणामधिकारत्वादसुरैरधिक्रियमाणत्वादित्यर्थः ॥ **विवक्षुश्चेति** । तथा च तन्मतमभ्युपगन्तव्यमित्यर्थः ।

**कं०रा०—** **तत्त्वज्ञानमिति** । अभ्युपैतीति सम्बन्धः ॥ **अभ्युपगम इति** । बुद्धस्य करणपाटवतत्त्वज्ञानाभ्युपगम इत्यर्थः । 'असुराधिकारत्वादि'त्यत्र अधिकारशब्दस्य भावार्थत्वेन असुराणामधिकारो यस्मिन्निति व्यधिकरणबहुव्रीहिर्वक्तव्यः । स च जघन्य इत्यभिप्रेत्य तत्पुरुषोपपत्तयेऽधिकारशब्दस्य अर्थान्तरमाह **अधिक्रियन्तेऽस्मिन्निति** ॥ **वेदमार्ग इतीति** । 'असुराणामयोग्यानां वेदमार्गे प्रवर्ततामि'त्यत्र वेदमार्ग इति पदं वेदमार्गेऽयोग्यानां वेदमार्गे प्रवर्ततामिति पूर्वोत्तरेण च सम्बध्यत इत्यर्थः । **प्रवर्ततामि**त्यत्र परस्मैपदं 'चन्द्रादयस्तु मन्यन्ते सर्वस्मादुभयं पदमि'ति वा चक्षिङो द्व्यनुबन्धकरणात् 'अनुदात्तेत्वनिमित्तमात्मनेपदमनित्यमि'ति वा समाधानं द्रष्टव्यम् ।

**शे०चं०—** एवमित्यस्य 'न ग्राह्यं तन्मतं क्वचिदि'त्यनेन व्यवहितत्वेऽपि योग्यत्वात् सम्बन्ध इत्यभिप्रेत्य तद्व्याचष्टे **यथेति** । तत्त्वज्ञानमित्यतःपरमभ्युपैतीत्यनुवर्तते ॥ **अभ्युपगम इति** । बौद्धशास्त्रप्रणेतुर्बुद्धस्य करणपाटवतत्त्वज्ञानयोरभ्युपगम इत्यर्थः ॥ **प्रमाणेति** । श्रुत्यादिप्रमाणेत्यर्थः । अधिकारशब्दस्य अधिकृतिरधिकार इति भावसाधनत्वपक्षेऽसुराधिकृतित्वापत्त्या तदधिकारिकत्वालाभप्रसङ्गात् असुराणामधिकृतिरधिकारो यस्मिन्निति व्यधिकरणबहुवीह्याश्रयणस्य जघन्यत्वेनायोग्यत्वात् असुराधिकारिकत्वलाभायाधिकरणसाधनतामाह **अधिक्रियन्त इति** ॥ **पूर्वेणोत्तरेण चेति** । अयोग्यानामिति पूर्वेण वेदमार्ग इत्युत्तरेण चेत्यर्थः। अनेन वेदमार्गेऽयोग्यानामथापि वेगमार्गे प्रवर्ततामिति योजना सूचिता भवति । **यथोक्तमिति** । भागवत इति शेषः ।

**वा०र०—** **भागवत इति शेष इति** । इति प्रथमस्कन्धीयतृतीयाध्याये ।

**स०व्र०—** **अभ्युपगम इति** । बौद्धशास्त्रप्रणेतुर्बुद्धस्य करणपाटवतत्त्वज्ञानयोरभ्युपगम इत्यर्थः । अधिकरणमधिकार इति भावव्युत्पत्तिनिरासायाह **अधिक्रियन्त इति** ॥ **पूर्वेणोत्तरेण इति** । अयोग्यानामिति पूर्वेण, प्रवर्ततामित्युत्तरेण चेत्यर्थः । तथा च वेदमार्गे अयोग्यानां वेदमार्गे प्रवर्ततामिति योजना सूचिता भवति।

**॥ इति बौद्धमतस्य विष्णुप्रणीतत्वेऽपि अग्राह्यत्वमेव ॥**

॥ अथ बौद्धमतप्रभेदनिरूपणम् ॥

२८ **सु०—** एवं सामान्यतो दूषितं बौद्धमतं विशेषतो निराकर्तुं तद्भेदानाह **चतुरिति** ।

**अनु०— चतुष्प्रकारं तच्चोक्तं**

व्याख्यातृमतिभेदादिति भावः । कथमित्यत आह **शून्यमिति** ।

**शून्यं विज्ञानमेकलम् ।**

**अनुमेयबहिस्तत्त्वं तथा प्रत्यक्षबाह्यगम् ।**

**इति**

**एकलम्** अद्वितीयं **शून्यमेव** तत्त्वमित्येकं मतम् । एकं **विज्ञानमेव** तत्त्वमित्यपरम् । **अनुमेयं बहिस्तत्त्वं** ज्ञानव्यतिरिक्तं यस्मिंस्तत्तथोक्तम् । अस्त्येव ज्ञानव्यतिरिक्तमपि तत्त्वं किं तु तत् **अनुमेयमिति** सौत्रान्तिकमतमन्यदित्यर्थः । **तथा**शब्दः समुच्चयार्थः । **प्रत्यक्षं बाह्यगं** यस्मिंस्तद्वैभाषिकमतं चैकमित्येवं चतुष्प्रकारमिति । एतेषु शून्यवादिनोऽतितामसाः । प्रमितसकलवस्त्वपलापात् । ततो ज्यायांसो विज्ञानवादिनः । रूपाद्यपलापेऽपि विज्ञानमात्राङ्गीकारात् । ततः सौत्रान्तिका बाह्यार्थाभ्युपगमात् । तस्य चानुमेयत्वाभ्युपगमेन वैभाषिकेभ्यः कष्टाः । ततो वैभाषिकाः । बाह्यार्थमभ्युपगम्य तस्य यथायथं प्रत्यक्षादिगम्यताऽभ्युपगमादित्येतज्ज्ञापयितुमनेन क्रमेणोद्देशः कृतः ।

**परि०—** बहिस्तत्त्वमित्यस्यार्थो **ज्ञानव्यतिरिक्तमिति** ॥ **यस्मिन्निति** । मत इति योज्यम् । एवमग्रेऽपि । निर्देशक्रमबीजमाह **एतेष्विति** ॥ **प्रमितसकलेति** । शून्यं तु न प्रमितमिति तदङ्गीकारोऽप्रामाणिकाङ्गीकार इति **प्रमितसकलेत्युक्तम्** ॥ **रूपाद्यपलापेऽपीति** । अर्थात्मकनामात्मकप्रपञ्चापलापेऽपीति वा शून्यवाद्युक्तरूपविज्ञानवेदनासंज्ञासंस्काररूपजगदपलापेऽपीति वाऽर्थः ।

**यादु०—** **प्रमितसकलेति** । ज्ञानज्ञेयादिसकलेत्यर्थः । शून्यं तु न प्रमितमित्याशयः ॥ **रूपाद्यपलाप इति** । ज्ञेयप्रपञ्चापलापेत्यर्थः ।

**कं०रा०—** **तदनुमेयमिति** । अपरोक्षतयाऽवभासमानो ज्ञानगतो नीलाद्याकारः कादाचित्कत्वात् किमपि कारणमपेक्षमाणो बाह्यं नीलाद्यनुमातीति ज्ञानव्यतिरिक्तं बाह्यं नीलादिकमनुमेयमिति सौत्रान्तिकमतमिति

भावः ॥ **यथायथमिति** ॥ यथा स्वे यथार्थेति यथा स्वमित्यर्थे यथाशब्दस्य द्विर्वचननपुंसकलिङ्गत्वयोर्निपातितत्वाद्यथार्थमिति साधु ।

**शे०चं०**— शास्त्रकर्तुर्बुद्धस्यैकत्वात् कथं तच्चातुर्विध्यमित्यतो विनेयव्याख्यातृमतिभेदात् तदित्याशयेनाह **व्याख्यातृमतीति** । यद्यपि मन्दमध्योत्तमबुद्धिभेदाद्विनेयानां व्याख्यातृणां त्रैविध्यकथनात् तदनुरोधेन मतत्रैविध्यमेव वक्तुं युक्तम् । तथापि मन्दबुद्धीनां वैभाषिकसौत्रान्तिकभेदेन द्वैविध्याश्रयणात् साक्षात्परम्पराप्रयोजकोपाधीनेकीकृत्येदं चातुर्विध्यकथनमित्यवधेयम् । ननु चतुष्प्रकारत्वं प्रतिज्ञाय प्रकारपञ्चकोपदर्शनमसङ्गतमित्यत एकलमित्यस्य शून्यविज्ञानयोरद्वितीयत्वप्रतिपादनार्थतया विध्यन्तरोपदर्शकत्वाभावान्न तदनुपपत्तिरित्यभिप्रेत्य तथा योजनां दर्शयति **एकलमद्वितीयमित्यादि** । ननु समयपादे निरस्तत्वक्रमानुरोधेन तथा प्रत्यक्षबाह्यगमिति वैभाषिकमतस्य प्रथममनन्तरं चानुमेयबहिस्तत्त्वमिति सौत्रान्तिकमतस्य तदनन्तरमेकलं शून्यमिति माध्यमिकमतस्यानन्तरमेकलविज्ञानवादिमतस्य निर्देशः कर्तुमुचितः तत्कथं शून्यादित्वेन चातुर्विध्यप्रदर्शनमित्यतो निमित्तकथनपूर्वकं निर्देशक्रममुपपादयति **एतेष्विति** ॥ **प्रमितसकलेति** । ज्ञानज्ञेयरूपसकलेत्यर्थः । शून्यं त्वप्रमितमिति भावः । **रूपाद्यपलापेऽपीति** । ज्ञेयप्रपञ्चापलापेऽपीत्यर्थः । **सौत्रान्तिकाः** ज्यायांस इत्यनुवर्तते । एवमुत्तरत्रापि द्रष्टव्यम् ।

**वा०र०**— **शास्त्रकर्तुरिति** । आदिशास्त्रकर्तुरादिबुद्धस्येत्यर्थः । माध्यमिकादिष्वादिबुद्धशिष्येष्वपि बुद्धशब्दप्रयोगात् । यथा चैतत्तथा जिनानामिति जैनाधिकरणीयप्रयोगसमर्थनावसरेऽस्माभिरुपपादितप्रकारेण ज्ञेयम् । अत एव *परिमले* आदिबुद्धशिष्याणामिति व्यवहृतम् । चातुर्विध्यानुपपत्तिशङ्कापरिहाराय मूले व्याख्यातृमतिभेदादिति भावो वर्णितः । तत्र न ज्ञायते कस्य व्याख्यातुर्मतौ भेद इति शास्त्रप्रणेतुरपि व्याख्यानसम्भवेन तन्मतौ च भेदस्याभावः । अतः शास्त्रकर्तृबुद्धशिष्याणां मतिभेदादित्यर्थकमूलमित्याशयेन विनेयत्वरूपेण व्याख्यातारं विशिनष्टि **विनेयव्याख्यात्रिति** । माध्यमिकादिरूपविनेयेत्यर्थः । नन्वत्र 'समुदाय उभयहेतुके'-ऽपीत्येतदधिकरणीय... स च बहुप्रकारः । प्रतिपत्तिभेदात् । विनेयभेदाद्वेति शाङ्करभाष्योक्तरीत्या विनेयपदं माध्यमिकादिव्यतिरिक्तविनेयान्तरपरम् । तेषां व्याख्यातृत्वाभावात् । माध्यमिकादीनामेव च व्याख्यातृत्वाच्चेति ज्ञेयम् । ननूक्तशाङ्करभाष्यभामत्यादौ प्रतिपत्तिभेदादित्यस्य व्याख्यातृमाध्यमिकादिप्रतिपत्तिभेदमेवार्थतयोपादाय प्रतिपत्तिभेदशब्दविप्रतिपत्तिरत्र भवतां माध्यमिकादीनां सर्वज्ञतया पुरुषान्तरजन्या न सम्भवति । षोडशिग्रहणाग्रहणादिरूपवैकल्पिकार्थस्याक्रियारूपस्य प्रतिपत्तिस्तद्भेदेनैव भेदोऽपि न वस्तुप्रतिपत्तौ सम्भवति । वस्तुनि विकल्पायोगात् । तत्त्वस्यैकरूपत्वादिति पूर्वत्रारुच्या विनेयभेदाद्वेति द्वितीयपक्षमवतार्य उत्तममध्यमाधमधियो हि शिष्या भवन्ति । अतस्तद्बुध्यपेक्षया प्रतीतार्थभेदमाश्रित्य सर्वशून्यत्वादिपक्षभेदा आदिबुद्धेन सूचितास्ते च माध्यमिकादिभिः प्रस्थानभेदेन विव्रीयन्त इत्यादेर्निरूपितत्वेन विनेयमाध्यमिकादिमतिभेदो न व्याख्यात इति तदाश्रयणं कथम् । अत एव यद्यपि मन्दमध्योत्तमबुद्धिभेदादित्युत्तरग्रन्थेऽपि तदाश्रयणेन शङ्कापरिहारावपि कथमिति चेन्न । भामत्यादिवर्णितैतत्पक्षमनाश्रित्यादिबुद्धशिष्याणामेव माध्यमिकादीनां सर्वशून्यत्वादिविषयाः

प्रस्थानभेदास्तेषामेव प्रतिपत्तिभेदादिति केषाञ्चिद्वुद्धमतस्थानां वचनमाश्रित्य अत्र तथा व्याख्याद्युपपत्तेः । अत एव परिमले माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकाणामादिषु बुद्धशिष्याणामित्यादिना प्रथमे तत्पक्षं प्रतिपाद्यान्ये त्वाहुरित्यादिनोत्तममध्यमाधमभाविविनेयबुद्ध्यनुसारेणेति द्वितीयपक्षमुपदर्श्य तत्र द्वितीयं तन्मतं विवृणोतीति विनेयभेदादित्येतदवतार*भामतीव्याख्यानकल्पतर्व*वतारः कृतः । ततो विनेयपदं माध्यमिकादिप्रथमशिष्यापेक्षयेत्येव व्याख्येयमिति ज्ञेयम् ।

केचित्तु विनेयपदं भामत्यामुक्तभाविविनेयपरं तेषामेव हि बुद्धवाक्यात्प्रतीयमानोऽर्थो भिन्न इत्यत एव हि तद्विवक्षया माध्यमिकादीनां व्याख्यातृत्वे उक्तेऽप्यर्थतो विनेयानां व्याख्यातृताप्राप्तेरिति मन्तव्यम् । तेषां तथा-विधव्याख्यानाभावे तद्विवक्षया आदिशिष्याणां व्याख्यानमित्यस्याप्याश्रयितुमशक्यत्वात् । ततो विनेया ये मन्दमध्योत्तमबुद्धयो व्याख्यातार इत्येव व्याख्येयमित्याहुः । तत्पक्षे मन्दबुद्धीनां वैभाषिकेत्युत्तरटीका विरु-द्ध्यते । ततोऽत्रोभयं विमतिमपेक्ष्य प्रथमग्रन्थप्रवृत्तिः । मन्दबुद्धीनामित्युत्तरग्रन्थस्तु मूलशिष्यविवक्षयैवेति समा-धेयम् । **मन्दमध्योत्तमबुद्धीति** । अयं च क्रमो वैभाषिकादित्वेन समयपादोक्तक्रमानुसारेण । अत्र निरासक्रमस्तु न विवक्षित इति ज्ञेयम् । व्याख्यातृत्वोपपादनं च प्राग्वत् । **त्रैविध्यकथनादिति** । बोधिचित्तविवरण इति शेषः । *भामत्यां* यथोक्तं बोधिचित्तविवरणे । 'देवानां लोकनाथानां सत्त्वाशयवशानुगाः । भिद्यन्ते बहुधा लोके उपायैर्बहुभिः पुनः । गम्भीरो न भेदेने'त्यादि प्रतिपादनात् । व्याख्यातं च *कल्पतरौ* । बोधी बुद्धस्तस्य चित्त-मभिप्रायस्तद्विवरणग्रन्थे । लोकनाथानां बुद्धीनां देवानां अनागमप्रामाण्याभिप्रायानुसारिण्य इत्यादिनेति भावः । वैभाषिकसौत्रान्तिकमतयोरवान्तरविशेषानाश्रयणेन त्रिविधत्वमुपपादितं भामत्याम् । तदनुसारेण तस्य चेत्युत्तर-मूलानुसारेण च चतुष्ट्वं स्वयमुपपादयति **तथापि मन्देति** । अनेनैव योगाचारा मध्यमबुद्धयः । माध्यमिक-शब्दोक्तशून्यवादिनस्तूत्तमबुद्धय इति सूचितं भवति । प्रागुदाहृतपरिमलवाक्येऽपि माध्यमिकादित्वेन क्रम उक्तः सौत्रे चोत्तमादित्वेन निरासक्रमेणेति ज्ञेयम् । **उत्तरत्रापीति** । वैभाषिका इत्यत्रापीत्यर्थः । बाह्यार्थाभ्युपगमस्य साम्यात्कथं सौत्रान्तिकवैभाषिकयोर्वैषम्यमित्यतोऽवान्तरवैलक्षण्यमाह **तस्य चेति** मूले ।

**॥ इति बौद्धमतप्रभेदनिरूपणम् ॥**

* * *

**॥ अथ शून्यवादिनां मोक्षनिरूपणम् ॥**

२९ **सु०—** तत्र शून्यवाद्युक्तं मोक्षमनुवदति **तत्रेति** ।

**अनु०—** तत्र तु ये शून्यं वदन्त्यज्ञानमोहिताः ।
ते मोक्षं तादृशं ब्रूयुर्निःशङ्कं मायिनो यथा ॥

तेषु चतुर्षु । **ये शून्यमेव तत्त्वं वदन्ति ते मायिना यथाभूतं मोक्षं** आचक्षते तादृशमेव **ब्रूयुः** । इयांस्तु विशेषः । मायिनो वेदः प्रमाणमित्यभिमानात् 'परमं साम्यमुपैति', 'सोऽश्नुते सर्वान् कामानि'त्यादेर्वेदाच्छङ्कमानास्तस्यान्यथाव्याख्यानं विधाय स्वाभिमतं मोक्षं प्रतिपादयन्ति । शून्यवादिनस्तु वेदप्रामाण्यानभ्युपगमादुच्छृङ्खलमेवेति । तदिदमुक्तं **निःशङ्कमिति** । **अज्ञानेति** तमोगुणो लक्ष्यते । अज्ञानकारणत्वात् । 'प्रमादमोहौ तमसो भवतोऽज्ञानमेव चे'ति वचनात् । तेन मोहिताः ।

**परि०— अन्यथाव्याख्यानमिति** । साम्यशब्दस्यैक्यपरत्वेन सर्वानित्यस्यापरममुक्तिपरत्वेन व्याख्यानं विधायेत्यर्थः । मोहिता इत्युक्तं मिथ्याज्ञानं न ह्यज्ञानमात्राद्भवतीति मूलकारणमाह **तमोगुणो लक्ष्यत इति** । लक्षणाबीजमाह **अज्ञानकारणत्वादिति** । **अज्ञानं** तत्त्वज्ञानाभावः ॥ **इति वचनादिति** । गीतायां चतुर्दशेऽध्याये 'सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च । प्रमादे'-त्यादि ॥ **मोहिता इति** । मिथ्याज्ञानिन इत्यर्थः ।

**यादु०— अन्यथाव्याख्यानमिति** । गौणमुक्तिपरत्वेन व्याख्यानमित्यर्थः । अज्ञानमात्रस्य सज्जीवसाधारणत्वान्न मोहकारणत्वमत आह **तमोगुण इति** । अजहत्स्वार्थलक्षणेयं अधिष्ठानगतविशेषाज्ञानस्यापि मोहकारणत्वात् । लक्षणाबीजं शक्यार्थसम्बन्धं दर्शयति **अज्ञानकारणत्वादिति** । अत्र यद्यप्यज्ञानशब्देन नाधिष्ठानगताविशेषज्ञानप्रागभावात्यन्ताभावौ गृहीतुं शक्यौ तयोरजन्यत्वात् । अत एव न तद्विषयं भावरूपाज्ञानम् । तस्याप्यनादित्वात् । तथापि सज्जनसङ्गत्यादिना कथञ्चित्प्रसक्तस्याधिष्ठानगतविशेषज्ञानस्य प्रध्वंस एव ग्राह्य इत्याहुः । वस्तुतस्तु भावरूपस्यानाद्यज्ञानस्य ज्ञानप्रागभावस्य वा ग्रहणेऽपि न दोषः । तमोगुणोद्रेकेण तयोरग्रिमक्षणसत्त्वरूपस्य परिपालनस्य सत्त्वात् । परिपालनस्यैव चात्र कार्यतया विवक्षितत्वादिति ध्येयम् ।

**वं०प०— यथाभूतं** ब्रह्मभावरूपं परमं साम्यमित्यादि । ब्रह्मभावस्य मोक्षत्वे 'परमं साम्यमुपैती'ति श्रुतिविरोधः । साम्यस्य भेदगर्भत्वात् । 'सोऽश्नुत' इत्यत्र ब्रह्मणा सहेति भेदोक्तेः । **अन्यथाव्याख्यानं** व्यावहारिकभेदपरत्वरूपम् । ननु 'प्रमादमोहौ तमसो भवतोऽज्ञानमेव चे'त्यज्ञानमोहयोरुभयोरपि तमोगुणकार्यत्वेनाज्ञानमोहिता इति कथमुक्तं तमोगुणमोहिता इति वक्तव्यत्वादित्यतो लक्षणया तथैवोच्यत इत्याह **तमोगुण इति** । लक्षणाबीजं सम्बन्धं दर्शयति **अज्ञानकारणत्वादिति** । मुख्यार्थे बाधकं लक्षणाबीजसम्बन्धं च प्रमाणेन दर्शयति **प्रमादेतीत्याहुः** ।

**कं०रा०— अज्ञानेति** । तमसोऽज्ञानकारणत्वादज्ञानशब्देन तमोगुणो लक्ष्यत इत्यर्थः । प्रमादमोहादिति वचनोदाहरणेन तमोगुणस्याज्ञानकारणत्वं तमस एव मोहकारणत्वादज्ञानशब्देन तमोलक्षणेयमित्येतच्चोपपादितमिति ज्ञेयम् । उक्तं च भाष्यकृता । 'तमसैवान्यथामतिरि'ति ।

शे०चं०— **इयांस्तु विशेष इति** । दृष्टान्तापेक्षया दार्ष्टान्तिके निःशङ्कमिति विशेषोक्तिरेव । न तु एतदन्तर्भावेनापि दृष्टान्तदार्ष्टान्तिकभावोऽवधेय इति भावः ॥ **अन्यथाव्याख्यानमिति** । गौणमुक्तिपरत्वेन व्याख्यानमित्यर्थः । तमोगुणः प्रमाणेषु चेतःप्रवृत्तिं प्रतिबध्याभासानां दोषानाच्छाद्य विपरीतज्ञानमुत्पादयतीत्युक्तरीत्या **तमोगुणस्यैव** विपरीतमतिरूपमोहं प्रति मूलकारणत्वात् प्रमाणजन्यज्ञानाभावरूपस्याज्ञानस्य तन्मूलकारणत्वानुपपत्त्या अज्ञानशब्दस्य तत्परत्वानुपपत्तेः तमोगुणपर एवात्र अज्ञानशब्द इत्यभिप्रेत्य कथं तत्राशक्तः तत्परः स्यादित्यतो लक्षणयेत्याह **अज्ञानेति तमोगुणो लक्ष्यत इति** । लक्षणाबीजभूतं शक्यसम्बन्धमाह **अज्ञानकारणत्वादिति** । तमोगुणस्याज्ञानं प्रति कारणत्वादित्यर्थः । यद्यपि प्रमाणजन्यज्ञानप्रागभावरूपाज्ञानस्यानादित्वान्न तमोगुणजन्यत्वं सम्भवति । तथाऽपि तस्याग्रिमक्षणसम्बन्धरूपपरिपालनसद्भावात् तद्रूपकार्यत्वविवक्षयेयमुक्तिरिति द्रष्टव्यम् । ननु भवेदज्ञानशब्दस्य तमोलक्षकत्वं यदि तमोगुणस्य मोहकारणत्वमज्ञानस्य तमोजन्यत्वं च प्रमितं स्यादित्यतः तमोमोहयोरज्ञानतमसोश्च कार्यकारणभावोपपादकं प्रमाणं पठति **प्रमादेति** । तथा च मुख्यार्थानुपपत्तिशक्यसम्बन्धयोः प्रमाणेन सिद्धेर्युक्ता लक्षणेति भावः ।

वा०र०— **न त्वेतदन्तर्भावेनापीति** । मायिनो यथा निःशङ्कमेवं शून्यवादिनोऽपि निःशङ्कमिति दृष्टान्तदार्ष्टान्तिकभाव इत्यर्थः । **ज्ञानप्रागभावरूपाज्ञानस्येति** । अनेन भावरूपाज्ञानस्य स्वप्रमाणजन्यज्ञानप्रागभावत्वं लक्षणमुक्तं भवति । अग्रिमक्षणरूपं सम्बन्धपरिपालनमित्यर्थः । तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपं प्रयोज्यत्वमस्तीति भावः । इदं सम्यग्विचार्यम् । रक्षोहागमलघ्वसन्देहाः प्रयोजनमित्येतद्भाष्योक्तासन्देहो व्याकरणप्रयोजनमित्यादेरुपपादनं कैयटादौ तदनुसारेणानादेः साध्यत्वविचारोऽस्माभिरधिकरणे कृतोऽस्ति तृतीयस्य ........ प्रवर्तितोऽस्ति । तदनुसारेणात्रापि विचारः कार्योऽस्ति ।

स०व्र०— **अज्ञानेति** । अज्ञानस्य मोहकारणत्वाभावादिति भावः । नन्वज्ञानशब्देन कथं तमोगुणस्य लक्षणा । तद्बीजशक्यसम्बन्धाभावादित्यतस्तमाह **अज्ञानकारणत्वादिति** । अज्ञानं प्रति कारणत्वात् तमोगुणस्येति शेषः । एतेन कार्यकारणभाव एव शक्यसम्बन्ध इत्युक्तं भवति । नन्वेवमपि न लक्षणोपपद्यते । तस्य शक्यसम्बन्धस्येव मुख्यार्थानुपपत्तेरपि बीजत्वात् । प्रकृते च अज्ञानशब्दस्य मुख्यार्थत्वाभ्युपगमे बाधकाभावात् । किञ्च शक्यसम्बन्धोऽपि नास्त्येव । न च कार्यकारणभाव एव शक्यसम्बन्ध इति वाच्यम् । तमोगुणस्याज्ञानं प्रति कारणत्वे मानाभावात् इत्यतो मुख्यानुपपत्तिं वदन्नेव अज्ञानस्य तमोगुणकार्यत्वं च व्युत्पादयितुं प्रमाणवाक्यमेव पठति **प्रमादेति** । तथा च अज्ञानशब्दस्य मुख्यार्थत्वे मोहकारणत्वायोगः । तमोगुणस्य मोहकारणत्वस्योदाहृतप्रमाणसिद्धत्वेन तद्बाधादिति मुख्यार्थानुपपत्तिसम्भवात् लक्षणा सम्भवतीत्युक्तं भवति । तमोगुणस्याज्ञानकारणत्वस्य उदाहृतप्रमाणसिद्धत्वेन कार्यकारणभावरूपशक्यसम्बन्धश्चोपपादितो भवति ।

* * *

३० **सु०—** एवं सामान्येनोक्तं स्पष्टमाचष्टे **न किञ्चिदिति** ।

**अनु०— न किञ्चिन्मुक्त्यवस्थायामात्माऽऽत्मीयमथापि वा ।**

**किञ्चित्** इत्यस्यैव विवरणम् **आत्माऽप्यथवाऽऽत्मीयमिति** । आत्मेति (वि)ज्ञानमुच्यते । आत्मीयमिति ज्ञेयम् । तदुभयमपि मोक्षे नास्ति ।

**यादु०—** शून्यवादिमतेऽपि मुक्त्यवस्थायां शून्यस्यात्मनः सत्त्वादाह **आत्मेति ज्ञानमुच्यत** इति । एवं च विज्ञानवादिभिर्हि मुक्त्यवस्थायां ज्ञेयाभावादुपप्लवरहितं ज्ञानमात्रमस्तीति स्वीकृतम् । शून्यवादिभिस्तूभयमपि तत्र नास्तीत्युच्यत इति भावः ।

**शे०चं०— विवरणमिति** । अतो न पौनरुक्त्यमिति भावः ॥ **ज्ञानमुच्यत इत्यादि** । न तु तद्व्यतिरेकेणात्मा ज्ञेयव्यतिरेकेणात्मीयं वाऽस्त्येतन्मत इत्यर्थः ।

**॥ इति शून्यवादिनां मोक्षनिरूपणम् ॥**

* * *

**॥ अथ एकात्मवादिनां संसारमोक्षस्वरूपनिरूपणम् ॥**

३१ **सु०—** शून्यवादोऽपि द्विविधः । एकात्मवादोऽनेकात्मवादश्चेति । तत्र प्रथम एव मुख्यसिद्धान्तः । मन्दानां तु बुद्धावारोहाय तु द्वितीयोऽवतारितः । तदुभयसाधारणमुक्त्वा विशेषं विवक्षुरादावाद्यमाह **एकस्मिन्निति** ।

**अनु०— एकस्मिन्संसृतेर्मुक्ते न किञ्चिदवशिष्यते ।**

**किञ्चित्** चेतनमचेतनं च । एकमुक्तौ कुत एतदित्यत आह **तदिति** ।

**तत्संवृत्यैव भेदोऽयं चेतनाचेतनात्मकः ।**
**दृश्यते संसृतोर्ध्वंसे निर्विशेषैव शून्यता ।**

तस्यैकस्यैवात्मनः संवृत्याऽज्ञानेनैवायं परिदृश्यमानः **चेतनाचेतनात्मकः**, भिद्यत इति **भेदः** पदार्थसमूहो, **दृश्यते** । न तु परमार्थो नाप्यनेकाज्ञानकल्पितः । अंतस्तस्यैक-

स्यैवात्मनः **संवृतेर्ध्वंसे** जाते सति **शून्यतैव** पारमार्थिकी (अव)विशिष्यत इति युक्त-मेवेति । **निर्विशेषेति** शून्यस्य स्वरूपसङ्कीर्तनम् । संवृतेर्ध्वंस एव मोक्ष इति वक्ष्यति । निर्विशेषत्वमेव विवृणोति **न सत्त्वमिति** ।

न सत्त्वं नैव चासत्त्वं शून्यतत्त्वस्य विद्यते ।
न सुखत्वं न दुःखत्वं न विशेषोऽपि कश्चन ॥

**सत्त्वं** परसामान्यादिरूपम् । **असत्त्वं** अभावप्रतियोगित्वम् । किंबहुना **कश्चनापि विशेषो न विद्यते** ।

**परि०— भिद्यत इति भेद इति** । 'भिदृ विदारण' इत्यस्य कर्मणि घञि 'पुगन्ते'ति गुणे भेद इति रूपसिद्धेरिति भावः । भिन्नोऽयमित्यर्थः । भावसाधनत्वे अनन्वयादेवमुक्तम् । 'अयमि'-त्यस्यार्थः **पदार्थसमूह इति** । एवकारान्वयपूर्वकं शेषं पूरयति **शून्यतैवेत्यादि** । 'संवृतेर्ध्वंसे न किञ्चिदि'त्युक्तम् । तर्हि मोक्षः क इत्यत आह **संवृतीति** ॥ **वक्ष्यतीति** । 'निर्विशेषं स्वयं भातमि'त्यादौ वक्ष्यतीत्यर्थः । तत्र संवृतिवर्जितमिति संवृतिध्वंसोपलक्षितं शून्यं मोक्ष इत्युक्ता-वप्युपलक्षणार्थं भावनाद्युपयोग इति तत्रैव तात्पर्यात् संवृतिध्वंसो मोक्ष इति वक्ष्यतीत्युक्तम् ॥ **परसामान्येति** । सत्ता जातिर्वा तद्व्याप्यार्थक्रियाकारित्वादिर्वा नेत्यर्थः । ननु सत्त्वराहित्यमेवासत्त्वं तथा च सत्त्वं नेत्युक्त्वा कथमसत्त्वमपि नेत्युच्यते व्याघातादित्यत आह **असत्त्वमभावप्रति-योगित्वमिति** ।

**यादु०—** नन्वेवं संवृतिध्वंसदशायां न किञ्चिदवशिष्यत इत्यागतं न मोक्ष इत्यत आह **संसृतिध्वंस एवेति** ॥ **वक्ष्यतीति** । नानासंवृतिवर्जितमित्यत्रेति शेषः । यद्यपि तत्र संवृतिध्वंस एव मोक्ष इति नोच्यते किन्तु संवृतिध्वंसोपलक्षितं शून्यमेव मोक्ष इति । तथाऽपि भावनासाध्यो मोक्षः संवृतिध्वंसरूप एवेति तत्राभि-प्रेतत्वात् अत्र अवधारणोपपत्तिरिति ध्येयम् । ननु पारमार्थिकं शून्यस्वरूपभूतं परेणाङ्गीकृतम्, अतः कथमेत-दित्यत आह **परसामान्यादिकमिति** । आदिपदेन प्रमाणसिद्धत्वार्थक्रियाकारित्वादिरूपस्य सङ्ग्रहः । ननु परेण शून्यस्य शून्यत्वं तावदङ्गीक्रियते तदेव चासत्त्वम्, अतः कथं नैव च असत्त्वमित्युक्तमित्यत आह **अभाव-प्रतियोगित्वमिति** । तथा च अत्र निषिध्यमानसत्त्वमत्यन्ताभावप्रतियोगित्वरूपमिथ्यात्वापरपर्यायं, न निर्विशे-षत्वरूपशून्यत्वापरपर्यायमिति भावः ।

**कं०रा०— संवृत्याऽज्ञानेनेति** । संव्रियतेऽनेनेति संवृतिशब्दितमज्ञानमिति भावः । ननु प्राक् मुक्त्यवस्थायां न किञ्चिदित्युक्तमिदानीं संवृतेर्ध्वंसे शून्यतैवापारमार्थिकी श्लिष्यत इत्युच्यतेऽतो विरोध इत्यत आह **संवृतिध्वंस एव मोक्ष इति वक्ष्यतीति** ।

**शे०चं०— आद्यमिति** । एकात्मवादमित्यर्थः । किञ्चिदित्येतद्विवरणरूपात्मात्मीयमथापि वेति पूर्वग्रन्थानुसारेण चेतनाचेतनात्मक इत्युत्तरग्रन्थानुसारेण च किञ्चिदित्येतद्व्याचष्टे **किञ्चिच्चेतनमचेतनं वेति** । ज्ञानं ज्ञेयं चेत्यर्थः । तत्संवृत्यैवेत्यत्र तस्य संवृतिरिति विग्रहः ॥ एकस्मिन्निति प्रकृतस्यैवात्मनस्तदिति परामर्शी संवृत्यैवेत्येवकारस्यात्रापि सम्बन्धं चाभिप्रेत्य तत्संवृत्येत्यत्रत्यतत्पदार्थमाह **तस्यैकस्यैवात्मन इति** । चेतनाचेतनात्मकस्य प्रपञ्चस्य भेदत्वाभावान्मूले तथोक्तेरनुपपत्तिमाशङ्क्य तां घटयति **भिद्यत इति** । अज्ञानेनैवेत्येवकारव्यावर्त्यं दर्शयति **न त्विति** । पूर्ववाक्यार्थस्योत्तरवाक्यार्थहेतुत्वं तस्यैवेत्यस्यावृत्तिं चाभिप्रेत्य उत्तरार्धं योजयति **अत इति** । **स्वरूपसङ्कीर्तनमिति** । अनेन केयं शून्यता नामेत्यतो निर्विशेषेत्युक्तमिति मूले योजनोक्ता भवति । निर्विशेषत्वमेव शून्यत्वमित्यर्थः । नन्वेवं संवृतिध्वंसदशायां न किञ्चिदवशिष्यत इत्यायातं न तु मोक्षे तत्कथं न किञ्चिन्मुक्त्यवस्थायामित्युक्तार्थविशेषकत्वमस्येत्यत आह **संवृतिध्वंस एवेति** ॥ **वक्ष्यतीति** । 'नानासंवृतिवर्जितमि'त्यत्रेति शेषः । यद्यपि तत्र संवृतिध्वंसोपलक्षितं शून्यमेव मोक्ष इत्युच्यते न तु संवृतिध्वंसमात्रं मोक्ष इति ध्वंस एवेत्यवधारणं नोपपद्यते । तथाऽपि भावनाप्रकर्षसाध्यो मोक्षः संवृतिध्वंस एवेत्यभिप्रेत्येदमवधारणमिति ध्येयम् । ननु पारमार्थिकसत्त्वस्य शून्यस्वरूपभूतस्य परेणाप्यङ्गीकृतत्वान्न सत्त्वमिति कथं तन्निषेध इत्यतो नायमङ्गीकृतसत्त्वस्य निषेधः किं नाम अनभिमतस्यैव तस्येत्यतो नानुपपत्तिरित्यभिप्रेत्य तन्निरूपयति **परसामान्यादिरूपमिति** । आदिपदेन प्रमाणसिद्धत्वार्थक्रियाकारित्वयोः परिग्रहः । ननु च शून्यस्य शून्यत्वं तावत्परेणाभ्युपगम्यते तदेव चासत्त्वम् । अतः कथं नैव चासत्त्वमिति तन्निषेध इत्यतो नायं निर्विशेषत्वरूपशून्यत्वापरपर्यायस्यासत्त्वस्य निषेधः किन्त्वत्यन्ताभावप्रतियोगित्वरूपमिथ्यात्वापरपर्यायस्यैवासत्त्वस्येत्यतो नानुपपत्तिरित्याशयेनाह **अभावेति** । धर्माणामानन्त्यात्प्रातिस्विकरूपेण तन्निषेधस्य जन्मसहस्रेणापि कर्तुमशक्यत्वात् विशेषतः कांश्चिद्धर्मान्निषिध्य सामान्यतो विशेषमात्रनिराकरणपरस्य मूलस्थ-'न विशेषोऽपि कश्चने'त्यस्य तात्पर्यमाह **किं बहुनेति** । अयं धर्मो नास्त्ययं धर्मो नास्तीति विशिष्य किं बहुनोक्तेन शून्यातिरिक्तो न कोऽपि विशेषः शून्येऽस्तीत्यर्थः ।

**वा०र०—** अनेन केयमित्यारभ्य शून्यत्वमित्यर्थ इति ग्रन्थानन्तरमित्याहुः । घटशून्यत्वायामोक्षत्वप्रसङ्गस्याप्युद्भावनाभावाद्वक्ष्यमाणरीत्या अस्मदुक्तातिप्रसङ्गपरिहारार्थत्वेन पररीत्या वा वक्ष्यमाणनिर्विशेषेत्यस्यावाच्यत्वाद्यच्छून्यता मोक्षत्वेनोच्यते । सा स्वयं निर्विशेषेति स्वपररीत्या तत्स्वरूपसङ्कीर्तनमित्यर्थ इति पाठः । बुध्या विवेकेन निर्विशेषत्वं शून्यविशेषणं तथा च निर्विशेषं यच्छून्यं तत्त्वेति योजनामाश्रित्य निर्विशेषपदकृत्यमाह **निर्विशेषस्येति** । शून्यस्येति पाठः । **विशेषः कांश्चिदिति** । विशेषतः कांश्चिद्धर्मान्निषिध्य तथैव

सर्वधर्माणां प्रत्येकं निषेधस्य जन्मसहस्रेणापि कर्तुमशक्यत्वात् सामान्यतो विशेषमात्रनिराकरणपरं यन्मूलं तत्स्थं यन्न विशेषोऽपि कश्चनेत्येतस्य तात्पर्यमाहेति योजना । एवं मूलस्यैवैकदेशेन विशेषतो धर्मनिषेधकत्वमेकदेशान्तरेण च सामान्यतो धर्मनिराकरणपरत्वमिति लाभान्निषिध्येति ल्यबुपपत्तेर्न तदनुपपत्तिशङ्कावकाशः । न चैतद्योजनालाभायोगः । मूलपदस्य परपदेन सम्बन्धस्य दुर्घटत्वादिति चेत्सत्यम् । मूलस्थ न विशेषो कश्चनेत्यस्येत्यर्थादित्येतदंशकमूलस्येत्यर्थो लभ्यत इति न विशेषोऽपि कश्चनेति मूलस्येत्यर्थाश्रयणात् । निराकरणपरमूलस्थेति समस्तपाठस्तु स्वरस एव ।

**स०व्र०**— **आद्यम्** एकात्मवादम् ॥ **वक्ष्यतीति** । निर्विशेषमित्यादिना ज्ञाननिवृत्त्युपलक्षितं शून्यमेव मोक्ष इति वक्ष्यतीत्यर्थः ।

* * *

३२　**सु०— ननु मोक्षस्तावदसन्न भवति । सदा संसारापत्तेः । अतः सता मोक्षेण सविशेषं शून्यमित्यत आह निर्विशेषमिति ।**

**अनु०— निर्विशेषं स्वयं भातं निर्लेपमजरामरम् ।**
**शून्यं तत्त्वमसम्बाधं नानासंवृतिवर्जितम् ।**
**अशेषदोषरहितं मनोवाचामगोचरम् ।**
**मोक्ष इत्युच्यतेऽसद्भिः**

**शून्यं तत्त्वमेवासद्भिर्मोक्ष इत्युच्यते । न तु शून्यातिरिक्तो मोक्षोऽस्ति । अतो न तेन सविशेषत्वम् । तर्हि सर्वदा मोक्षभावाच्छून्यभावनादेर्वैयर्थ्यमित्यतो निर्विशेषमित्याद्युक्तम् । स्वयम्भातमित्यस्यैव विवरणं मनोवाचामगोचरमिति । निर्लेपं धर्माधर्मरहितं अजरं च तत् अमरं च अजरामरम् । सम्बाधो वस्त्वन्तरोपमर्दः । असम्बाधमद्वितीयमिति यावत् । दोषाः कामादयः । न केवलं शून्यं मोक्षः, किन्तु नानासंवृतिवर्जितत्वाद्युपलक्षितम् । उपलक्षणनिष्पत्तये च भावनाद्युपयोग इति ।**

**परि०**— नानासंवृतिवर्जितत्वादीति । वर्जितपदेन ध्वंसो ग्राह्यः ॥ **भावनादीति** । बौद्धागमश्रवणमननवैराग्याद्युपयोग इत्यर्थः ।

**यादु०— वस्त्वन्तरोपमर्द इति** । वस्त्वन्तरेणोपमर्द इत्यर्थः ।

**वं०प०— उपमर्दः** सम्बन्धविशेषः ।

**कं०रा०— स्वयम्भातमित्यस्यैव प्रपञ्चनमिति** । प्रमाणावेद्यत्वस्यैव तन्मते स्वयम्भातत्वशब्दार्थत्वादिति भावः । **नानासंवृतीति** । यद्यपि संवृतिरेका तथाऽपि तस्या आवरणविशेषाद्यनेकशक्तिमत्त्वान्नानात्वोक्तिः । वस्तुतस्तु संवृतिकार्यत्वेनाहङ्कारादीनां संवृतिसंज्ञकत्वस्य वक्ष्यमाणत्वात् तदभिप्रायेण नानात्वोक्तिरिति ध्येयम् ।

**शे०चं०—** शून्यभावनाऽऽदेरित्यादिपदेन शून्यज्ञानपरिग्रहः । 'विशेषणं विशेष्येण बहुलमि'त्यत्र बहुलग्रहणसामर्थ्याद्विशेषणयोरेव परस्परमयं समास इत्याशयेनाह **अजरं च तदमरं चेति** ॥ **वस्त्वन्तरोपमर्द इति** । वस्त्वन्तरेणोपमर्द इत्यर्थः । ननु शून्यस्यास्त्वेवंविधत्वं तथाऽपि शून्यतत्त्वरूपमोक्षस्य सर्वदा भावाच्छून्यभावनाऽऽदेर्वैयर्थ्यशङ्कायाः कथं परिहार इत्यत आह **न केवलमिति** ।

**स०व्र०—** बहुव्रीहेरन्यपदार्थप्रधानत्वेन जघन्यत्वात् तत्परित्यागेनोत्तरपदार्थप्रधानकर्मधारयमेवाह **अजरं चेति** ।

* * *

३३ **सु०— अज्ञाननिवृत्त्याद्युपलक्षितं शून्यमेव मोक्ष इत्येतत्कुत इत्यत आह नानेति ।**

## अनु०— नानासंवृतिदूषितम् ।
## संसृत्यवस्था विज्ञेया

**नानासंवृतिभिर्दूषितं शून्यमेव संसारावस्था विज्ञेया यतोऽतस्तद्विपरीतं शून्यमेव मोक्ष इति युक्तम् ।**

एतदुक्तं भवति । शून्यं तत्त्वं स्वतो निर्विशेषमेकमेव । तस्य परमसूक्ष्मस्य वाङ्मनसाऽतीतस्य स्वप्रकाशस्यावरणविक्षेपाद्यनेकशक्तिमत्या मूलसंवृत्या कर्तृत्वभोक्तृत्वशक्तिमदहङ्कारोपाधिवशात् किञ्चित्स्थूलता जायते, ततः सद्वितीयत्वेन सविशेषतायां स्थूलता सम्पद्यते । ततो मनोवचनगोचरत्वे जाते विधिनिषेधगोचरत्वेन सलेपत्वम् । रागादिदोषसंसर्गश्च । ततो देहेन्द्रियान्तःकरणविषयसम्बन्धे स्थूलतरता भवति । ततो ममकारवतो दुःखादिमत्त्वे स्थूलतमत्त्वमित्येवं संवृत्या तत्कार्यत्वात्संवृतिसंज्ञकैरह-

ङ्कारादिभिश्च संवलितं शून्यमेव संसारः । भावनाप्रकर्षादिना मूलसंवृतौ ध्वस्तायां तत्कार्य-प्रवाहे च विलीने तदुपलक्षितं शून्यमेव मोक्ष इति ।

शून्यमेव चेन्मोक्षः संसारश्च । तदा मोक्षसंसारशब्दयोः पर्यायत्वमित्यादिकमापद्यते इत्येतदपि चोद्यमनेनैव परिहृतमित्याशयवानाह **संवृत्यैवेति** ।

**संवृत्यैव विशिष्यते ।**
**स्थितया ध्वस्तया चैव संसृतिर्मोक्ष इत्यपि ॥**

यद्यपि **शून्यमेव संसारो मोक्षश्च** तथाऽपि **संसृतिरिति मोक्ष** इत्यपि **विशिष्यत** एव । कथम् ? **स्थितया च ध्वस्तया च संवृत्यैव** । उपलक्षणभेदादर्थभेदे सति न शब्द-पर्यायत्वादिकमिति भावः ।

**परि०— अज्ञानेति** । संवृतीत्यर्थः । **आदिपदेन** तत्कार्यनिवृत्तिग्रहः । ननु निर्विशेषादि-रूपशून्यस्य कर्तृत्वभोक्तृत्वादिनानावस्थापन्नत्वादिकं कथमित्यत आह **एतदुक्तं भवतीति** ॥ **परमसूक्ष्मस्येति** । अप्रतिघरूपस्येत्यर्थः । यद्वा स्थौल्यादिपरिमाणशून्यस्येत्यर्थः । स्वत इति सर्वत्रानुषज्यते ॥ **वाङ्मनसेति** । 'अचतुरविचतुरे'त्यादिसूत्रेण निपातनात् साधुः ॥ **आवरणेति** । **आवरकशक्तिः** स्वरूपाच्छादनशक्तिः । **विक्षेपशक्तिः** व्यामोहनशक्तिः । नानाविधतया भास-कत्वशक्त्यादिः **आदिपदार्थः** । संवृत्त्या विलसितो यः कर्तृत्वादिशक्तिमान् योऽहङ्कारः स एवोपाधिः तद्वशादित्यर्थः ॥ **भावनाप्रकर्षादिनेति** । शून्यमहमित्युपासनोत्कर्षेण आदिपदोक्ततप आदिना चेत्यर्थः । शङ्कते **शून्यमेव चेदिति** ॥ **इत्यादिकमिति** । भावनावैयर्थ्यादिः **आदिपदार्थः** ॥ **उपलक्षणेति** । संवृतिध्वंसरूपोपलक्षणभेदादित्यर्थः ।

**यादु०—** अज्ञाननिवृत्त्यादीत्यत्र आदिपदेन तत्कार्यप्रवाहनिवृत्तिर्ग्राह्या । **परमसूक्ष्मस्येति** । स्वभावतो वस्त्वन्तरोपमर्दरहितस्येत्यर्थः । अत एव किञ्चित्स्थूलतादिशब्दैरप्युपाधिशब्दाद्वस्त्वन्तरोपमर्द एव व्याख्येयः । तेन परैः शून्यस्यापरिच्छिन्नत्वाङ्गीकारात् कथमेतदिति शङ्काऽनवकाशः ॥ **उपलक्षणभेदादिति** । पाठक-पाचकादाविवेति भावः ।

**कं०रा०— तदुपलक्षितमिति** । संवृतिकार्यप्रवाहविलयोपलक्षितमित्यर्थः ।

**शे०चं०—** अज्ञाननिवृत्त्यादीत्यादिपदेन वक्ष्यमाणतत्कार्यप्रवाहनिवृत्तिपरिग्रहः । शून्यं तत्त्वमित्यस्यात्रावृत्तिं यतोऽत इत्यस्योपस्कारं चाश्रित्योक्तोपपादकतया वाक्यं योजयति **नानेति** ।

ननु नानासंवृतिदूषितस्य शून्यतत्त्वस्यैव संसारत्वे सिद्धे भवेदज्ञाननिवृत्त्याद्युपलक्षितस्य शून्यस्यैव मोक्षत्वम् । तदेव कुतः । किञ्च शून्यतत्त्वस्यासम्बाधमित्यद्वितीयत्वस्य निर्विशेषमिति निर्विशेषत्वस्य चोक्तत्वात् कथं तद्विरुद्धं सद्वितीयत्वं सविशेषत्वं च स्यात् संवृतेरेकत्वात् तन्नानात्ववचनमपि न युक्तम् । यथाकथञ्चिन्नानात्वाश्रयणेऽपि कास्ता नानाभूताः संवृतयः किञ्च ताभिः शून्यस्य दूषणमित्यतोऽद्वितीयत्वसद्वितीयत्वयोर्निर्विशेषत्वसविशेषत्वयोश्च स्वाभाविकत्वौपाधिकत्वाभ्यामविरोधं गौणमुख्यभेदेन संवृतिनानात्वं तादृशसंवृतिस्वरूपं तद्दूषणं च शृङ्गिग्राहिकया दर्शयन्नेव नानासंवृतिदूषितस्य शून्यस्य संसारत्वं व्यवस्थापयितुमाह **एतदुक्तं भवतीति** ॥ **परमसूक्ष्मस्येति** । यद्यपि परमते शून्यस्यापरिच्छिन्नत्वान्न परमसूक्ष्मत्वं किञ्चित्स्थूलत्वादिकं वाऽस्तीति न तदुक्तिर्युज्यते । तथाऽपि स्वभावतो वस्त्वन्तरोपमर्दराहित्याभिप्रायेण इयं परमसूक्ष्मत्वोक्तिरुपाधिवशात् किञ्चिद्वस्त्वन्तरोपमर्दस्तदधिकवस्त्वन्तरोपमर्दाद्यभिप्रायेण किञ्चित्स्थूलत्वाद्युक्तिश्चेत्यविरोध इति द्रष्टव्यम् । अहङ्कारादिभिरित्यत्रादिपदेन देहेन्द्रियादिपरिग्रहः ॥ **भावनाप्रकर्षादिनेति** । चतुर्विधभावनाप्रकर्षेण शून्यपरिज्ञानेन चेत्यर्थः ॥ **तत्कार्येति** । अहङ्कारादिरूपतत्कार्येत्यर्थः । पर्यायत्वादिकमित्यत्रादिपदेन तत्प्रयुक्तसहप्रयोगानुपपत्तेर्वैयर्थ्यस्य च परिग्रहः । कथमनेन पर्यायत्वादिपरिहार इत्यत आह **उपलक्षणभेदादिति** । पाचकपाठकादाविवेति शेषः ।

**वा०र०— चतुर्विधभावनेति** । क्षणिकं क्षणिकमिति दुःखं दुःखमिति स्वलक्षणं स्वलक्षणमिति शून्यं शून्यमिति चतुर्विधेत्यर्थः । वक्ष्यति चैतदुत्तरत्र टीकाकारः । **पाचकपाठकादाविवेति शेष इति** । देवदत्तरूपोपलक्ष्यैक्येऽपि पाचकादिक्रियारूपोपलक्षणभेदेनार्थभेदवदित्यर्थः ।

**॥ इति एकात्मवादिनां संसारमोक्षस्वरूपनिरूपणम् ॥**

* * *

**॥ अथ अनेकात्मवादनिरूपणम् ॥**

३४ **सु०— एवमेकात्मवादमुपन्यस्यानेकात्मवादं दर्शयति केचिदिति ।**

## अनु०— केचित्तेष्वन्यथा प्राहुः

**तेषु** शून्यवादिषु । **अन्यथा** एकात्मवादिमतात् । कथमित्यत आह **संवृत्यैवेति** ।

संवृत्यैव त्वनेकधा ।
अवच्छिन्नं महाशून्यं नानापुद्गलशब्दितम् ।

तुशब्देनैकात्मवादं स्वाभाविकानेकात्मवादमुपाधिकृतानेकात्मवादं च व्यावर्तयति । **संवृत्या** नानाभूतया **संवृत्या** अवच्छिन्नमेव न तु स्वभावतः । संवृतेस्तत्कृतावच्छेदानां मिथ्यात्वान्नानापुद्गलशब्दितमित्युक्तं भवतीति शेषः ।

ततः किमित्यत आह **यस्येति** ।

यस्य शून्यैकरसताज्ञानात् सा त्वपगच्छति ।
स पुद्गलत्वनिर्मुक्तो महाशून्यत्वमेष्यति ।
संवृत्या यस्त्ववच्छिन्नो दुःखान्यनुभवत्यलम् ।
इति

तत्रानेकेष्वात्मसु यस्यात्मनस्तु **शून्यैकरसताज्ञानात्** शून्याद्वितीयताज्ञानात् **सा** संवृतिरपगच्छति मूलसंवृतिर्व्यावृत्ता भवति । अन्या नश्यति । स **पुद्गलत्वात्** कर्तृत्वादिरूपात् **निर्मुक्तो महाशून्यत्वम्** एष्यतीव । यस्तु **संवृत्या अवच्छिन्न** आत्मा स पुद्गलभावेन **दुःखानि अलं** परमार्थबुद्ध्यैव **अनुभवति** । **इति** प्राहुरिति सम्बन्धः ।

**परि०**— 'अनेकधे'ति श्रवणादुक्तं **नानाभूतयेति** । बहुविधया प्रातिस्विकरूपयेत्यर्थः । संवृत्यैवेत्येवकारान्वयमाह **अवच्छिन्नमेवेति** । शब्दितपदस्वारस्यमाह **संवृतेरिति** । शब्दितमित्यत्र शेषमाह **भवतीति शेष इति** ॥ **व्यावृत्ता भवतीति** । शैवालवदिति भावः ॥ **अन्येति** । अवच्छेदकत्वेन प्रातिस्विकं विद्यमानेत्यर्थः ।

**यादु०**— **नानाभूतयेति** । अन्यथैकस्य जीवस्य तत्त्वज्ञानेन मूलसंवृतिनाशे सर्वेषां मोक्षप्रसङ्ग इति भावः । न तु स्वभावतः । संवृतेः तत्कृतावच्छेदानां च मिथ्यात्वादिति भावः ॥ नानापुद्गलतां यातीत्यनुक्त्वा शब्दितामिति किमर्थमुक्तमित्यतोऽभिप्रायमाह **संवृतेरित्यादिना** ॥ **व्यावृत्तेति** । भीरुभटवदपसरतीत्यर्थः । अन्यथा सर्वमोक्षप्रसङ्ग इति भावः ॥ **अन्यथेति** । प्रातिस्विकेत्यर्थः । महाशून्यस्य स्वाभाविकत्वादाह **एष्यतीवेति** । अनाद्यनिर्वाच्यस्येत्यत्र प्रागभावादिव्यावृत्त्यर्थं भावत्वमपि विवक्षितमिति ज्ञातव्यम् ।

**वं०प०— एकात्मवादम्** एकजीववादम् । **स्वाभाविकात्मवादमिति** सिद्धान्तरीत्या । भास्करमतानुसारेणोक्त**मुपाधिकृतानेकात्मवादमिति** । तन्मते आत्मभेदस्यौपाधिकत्वात् । संवृत्याऽवच्छिन्नमेव नानापुद्गलशब्दितमिति सम्बन्धः । न तु स्वभावतः इत्यत्र हेतुः **संवृतेरिति** ॥ **तत्कृतावच्छेदानां** संवृतिकृतभेदानाम् । भास्करमत इव सत्योपाधिकृतभेदवादो नाभ्युपगत इति भावः । शब्दितमित्येतदनूद्य व्याख्याति **इत्युक्तमिति** । अध्याहार्यमाह **भवतीति शेष इति** ।

**कं०रा०— उपाधिकृतानेकात्मवादमिति** । सत्योपाधिकृतानेकात्मवादमित्यर्थः ॥ **संवृत्या नानाभूतयेति** । यद्यपि संवृत्यैव त्वनेकधावच्छिन्नमित्येव मूलेऽस्ति तथाऽप्यनेकधा संवृत्यावच्छिन्नमित्यत्रानेकधेत्यस्य पर्यवसितार्थमभिप्रेत्य नानाभूतयेत्युक्तम् । ननु संवृत्या नानाभूतयाऽवच्छिन्नमित्यनेनैकात्मवादव्यावृत्तिप्रतीतावपि संवृत्याऽवच्छिन्नमेव न तु स्वभाव इत्यनेन स्वाभाविकानेकात्मवादव्यावृत्तिप्रतीतावपि सत्योपाधिकृतानेकात्मवादव्यावृत्तिः न प्रतीयते तत्प्रत्यायकस्याभावादित्यत आह **संवृतेस्तत्कृतावच्छेदनं चेति** । संवृतेस्तत्कृतावच्छेदनं च मिथ्यात्वाभिप्रायेणैव 'नानापुद्गलशब्दितमि'त्युक्तम् । अन्यथा नानापुद्गलतामित्येवावक्ष्यत् । अतो नानापुद्गलशब्दं तत्त्वोक्तिमहिम्ना संवृतेस्तत्कृतावच्छेदानां च मिथ्यात्वप्रतीतेः सत्योपाधिकृतानेकात्मवादव्यावृत्तिरपि प्रतीयत एवेति भावः । नानापुद्गलशब्दितमित्यस्य शेषं पूरयति **भवतीति शेष इति** ॥ **अनादीति** । अनादित्वे सत्यनिर्वाच्यत्वरूपलक्षणस्यावरणविक्षेपादेः कार्यस्य शून्यवाद्यभ्युपगतसंवृतौ मायावाद्यभ्युपगतमायायां चैकत्वादित्यर्थः । **संवृतिकार्येति** व्याप्तिनिरासाय अनादित्वविशेषणम् । तावन्मात्रं च शून्ये अतिव्याप्तमिति तन्निरासार्थम् अनिर्वाच्यपदम् । नन्वेवमपि शून्यसंवृतिसम्बन्धे अतिव्याप्तिः । साक्षाज्ज्ञाननिवर्त्यत्वरूपविशेषणप्रक्षेपेण अनादिपदं व्यर्थमिति चेत् मैवम् । अनाद्युपादानत्वे सति ज्ञाननिवर्त्यत्वस्य लक्षणत्वेन विवक्षितत्वात् । अत्र च अनादिपदं घटाद्युपादाने मृदादावतिव्याप्तिनिरासाय । उपादानपदं च शून्यसंवृतिसम्बन्धे अतिव्याप्तिनिरासार्थम् । ज्ञाननिवर्त्यपदं तु स्वरूपकथनपरम् । निवर्त्यपदेनैव शून्यनिरासात् ।

**शे०चं०— नानाभूतयेति** । अन्यथैकस्य जीवस्य तत्त्वज्ञानेन मूलसंवृतिनाशे सर्वेषां मोक्षप्रसङ्गः । अनाशे च नैकस्यापि मोक्ष इत्यतिप्रसङ्गादिति भावः । संवृत्यैवेत्येवकारो भिन्नक्रम इति भावेनाह **अवच्छिन्नमेवेति** । तत्प्रयोजनमाह **न त्विति** । नानापुद्गलरूपमित्यनुक्त्वा नानापुद्गलशब्दितमित्युक्तौ निमित्तं दर्शयन् योजयति **संवृतेरिति** । साकाङ्क्षत्वान्मूलेऽपेक्षितं पूरयति **भवतीति शेष इति** । मूले सेति तच्छब्दः संवृतितदितरसाधारणः । अपगच्छतीत्येतदप्यपसरणनाशपरमित्यभिप्रेत्य योजयति **मूले संवृतिरित्यादि** ॥ **व्यावृत्ता भवतीति** । भीरुभटवदपसरतीत्यर्थः । अन्यथा सर्वमोक्षप्रसङ्गादिति भावः ॥ **अन्येति** । प्रातिस्विकीत्यर्थः । पुद्गलत्वादित्यस्य विवरणं **कर्तृत्वादिरूपादिति** । ननु महाशून्यत्वस्य स्वाभाविकत्वेन सर्वदा सत्त्वात् कथमेष्यतीत्युक्तिरित्यत आह **एष्यतीवेति** ।

**वा०र०— अपसरणनाशेति** । अपसरणं च नाशश्च तदुभयपरमित्यर्थः ।

**स०व्र०— एष्यतीवेति** । महाशून्यत्वरूपायाः सर्वदा सत्त्वादेष्यतीत्ययुक्तमित्यत इवशब्दप्रयोगः ।

**॥ इति अनेकात्मवादनिरूपणम् ॥**

॥ अथ संवृतिमाययोः साम्यात् शून्यवादमायावादयोः सादृश्यम् ॥

३५　**सु०**— शून्यवाद्यभिमतमोक्षनिरासेन मायावाद्यभिमतोऽपि निरस्तो भविष्यति इति आशयेन यदुक्तं मायिनो यथेति सिद्धान्तसाम्यं तदुपपादयति (इत्ये)**एवमिति** ।

**अनु०**—　एवं मायिनश्चाहुरेकजीवत्ववादिनः ।
बहुजीवमताश्चेति

**एकजीवत्ववादिनो बहुजीवमताश्चेति द्विविधमायिनश्च एवं** द्विविधशून्यवादिवदेव मोक्षस्वरूपमाहुः । एको जीवो यस्मिँल्लोके स तथोक्तः तस्य भावस्तत्त्वं तद्वदन्तीति एकजीवत्ववादिनः । बहवो जीवा यस्मिन् तत् तथोक्तं बहुजीवमतं येषां ते बहुजीवमताः ।

ननु शून्यवादिनः संवृतिनिबन्धनः संसारस्तन्निवृत्तिश्च इत्याचक्षते । मायावादिनस्तु मायाहेतुकोऽयं संसारस्तन्निवृत्तिश्च मोक्ष इति । अतो वैषम्यमित्यत आह **मायेति** ।

माया तेषां तु संवृतिः ।

या शून्यवाद्यभ्युपगता **संवृतिः सैव तेषां** मायिनां **माया** । अनाद्यनिर्वाच्यत्व-लक्षणस्य आवरणविक्षेपादेः कार्यस्य चैकत्वादिति भावः ।

**परि०**— **यदुक्तमिति** । एतन्मतोपन्यासोपक्रमभागे उक्तमित्यर्थः ।

**श्रो०चं०**— मूले एकजीववादिन इति वक्तव्ये एकजीवत्वेति त्वप्रत्ययो व्यर्थ इत्याशङ्क्य तत्सार्थक्य-माह **एको जीव इत्यादि** । मायासंवृत्योरैक्यलाभाय यत्तच्छब्दाध्याहारेण योजयति **या शून्यवाद्यभ्युप-गतेति** ॥ **अनाद्यनिर्वाच्यत्वलक्षणस्येति** । अत्र भावत्वमपि सङ्ग्राह्यम् । ततश्चानादिभावत्वे सति अनिर्वाच्य-त्वरूपलक्षणस्येत्यर्थः । अन्यथा प्रागभावस्याप्यनाद्यनिर्वाच्यतया अज्ञानत्वप्रसङ्गादिति ध्येयम् ॥ **आवरण-विक्षेपादेरिति** । स्वरूपाच्छादनमावरणम् । अतदाकारप्रतिभासो विक्षेपः । आदिपदेन (नानाविधतया भासक-त्वादिशक्तिः) ।

**वा०र०**— आवरणविक्षेप्यादेरित्यादिपदसङ्ग्राह्यं वक्तुमादिपदेनेत्येवोक्त्वा तदुत्तरं कुण्डलिकां कृत्वा गतमस्ति । तदादिपदसङ्ग्राह्यमत्र विचार्य लेख्यमस्ति । एवमावरणविक्षेपाद्यनेकशक्तिकेतिपूर्वत्रैतत्समानजातीय-पूर्वमूले तथा तत्त्वनिर्णयटीकायां शास्त्रयोनिसूत्रे चन्द्रिकायां तथा न्यायामृते च व्याख्येयम् ।

॥ इति संवृतिमाययोः साम्यात् शून्यवादमायावादयोः सादृश्यम् ॥

**॥ अथ निर्विशेषत्वाविशेषात् ब्रह्मशून्ययोः साम्यम् ॥**

३६ **सु०**— शून्यवादिनः शून्यं तत्त्वमाहुर्मायावादिनस्तु ब्रह्म । अतोऽस्ति वैषम्य-मित्यत आह **निर्विशेषत्वेति** ।

**अनु०— निर्विशेषत्ववाचैव शून्यं ब्रह्मेति नो भिदा ।**

**शून्यं ब्रह्मेति च** एतयोः **भिदा नो** विद्यते । कुतः **निर्विशेषत्वस्य वाचैव** द्वाभ्यां द्वयोर्निर्विशेषत्वेनोक्तत्वात् । वैधर्म्यं खलु वस्तुनो भेदकम् । तच्चात्र नास्तीति द्वयोरपि सम्मतम् । अतः शब्दभेदमात्रं न वस्तुभेद इति ।

**कं०रा०**— **वैधर्म्यमिति** । तदवृत्तिधर्मवत्त्वं ब्रह्मणि नास्ति ब्रह्मावृत्तिधर्मवत्त्वं शून्ये नास्तीति मायावादिशून्यवादिनोः सम्मतमित्यर्थः ॥ **अतः शब्दभेदमात्रमिति** । वैधर्म्याभावस्योभयसम्मतत्वाच्छून्यमिति ब्रह्मेति च शब्दभेदमात्रं न वस्तुभेद इत्यर्थः ।

**शे०चं०**— **द्वाभ्यां** शून्यवादिमायावादिभ्याम् । **द्वयोः** शून्यब्रह्मणोः । ननु निर्विशेषत्वोक्तिः न भेदा-भावसाधिकेति कथं तस्यास्तत्साधकतया भाष्यकारीयोक्तिरित्यतो न तस्यास्तत्साधकतया अत्रोपन्यासः किन्तु तत्साधकभेदकधर्माभावस्यासिद्धिपरिहारकतयैवेत्याशयेन तदुपपादकतया तदुपयोगमाह **वैधर्म्यमिति** ।

**स०व्र०**— **द्वाभ्यां** शून्यवादिमायावादिभ्याम् । **उभयोः** शून्यब्रह्मणोः ।

**॥ इति निर्विशेषत्वाविशेषात् ब्रह्मशून्ययोः साम्यम् ॥**

* * *

**॥ अथ ब्रह्मणः अखण्डत्वस्य अभ्युपगतत्वात् सत्यत्वादीनां न ब्रह्मलक्षणत्वम् ॥**

३७ **सु०**— अथ मतम् । 'सत्यं ज्ञानमनन्तं ब्रह्म', 'विज्ञानमानन्दं ब्रह्मैवे'ति श्रुत्यैव सत्यादिलक्षणं ब्रह्म सर्वतो व्यावर्तितं तत्कथं शून्यं ब्रह्मेति नो भिदेत्युच्यते इति । सत्यम् । सदादिलक्षणैर्ब्रह्म श्रुत्या सर्वतो व्यावर्तितमिति । तत्तु मायावादिमते नोपपद्यत इत्याशयवान् आह **सदिति** ।

**अनु०— सच्चित्सुखादिकं चैव किं कुतोऽखण्डवादिनः ।**

**सदादिकं च किं एव न किमपीत्यर्थः । तथा हि । सदादिकं किं ब्रह्मस्वरूपमुतान्यत् । आद्ये न लक्ष्यलक्षणभावः । अनेकपदवैयर्थ्यं च । न द्वितीयः । अखण्डवादित्वात् । यथा भवतां सत्यत्वादिकं ब्रह्मस्वरूपमपि तल्लक्षणं तथा ममापि किं न स्यादिति चेन्न । अस्माभिः विशेषशक्त्या तन्निर्वाहाङ्गीकारात् । परेण तु कुतो निर्वाह्यमेतत् । मयापि विशेषोऽङ्गीक्रियत इति चेत् न । अखण्डवादित्वात् ।**

**परि०—** सत्यत्वादिकं स्वरूपं सदेव व्यावर्तकमिति मनसि निधाय शङ्कते **अथ मतमिति** । एवकारान्वयेनानुवादः ॥ **किमेवमिति** मनोगतं शङ्कते **यथेति** ।

**यादु०—** गूढाशयः शङ्कते **अथेति** । अविदिताशय इव विकल्पयति **सदादिकं किमिति** । पूर्वपक्षी स्वाशयमुद्घाटयति **यथा भवतामिति** ॥ **तथा ममापीति** । तथा च मदीयं निर्विशेषत्ववचनं भिन्नधर्माभावाभिप्रायकमेवेति सदाशय इति ध्येयम् । एवं च तच्चात्र नास्तीति द्वयोरपि सम्मतमित्युक्तत्वादथ मतमिति शङ्कायाः कथमुत्थानमिति चोद्यानवकाश इति ज्ञातव्यम् ।

**शे०चं०—** निर्विशेषत्ववचनं सिद्धान्त इव स्वमतेऽपि भिन्नधर्माभावाभिप्रायमेव न तु सर्वथा धर्माभावाभिप्रायम्, अतो भेदकधर्मसद्भावाद्युक्तः शून्यब्रह्मणोर्भेद इति गूढाभिसन्धिः शङ्कते **अथ मतमिति** । लक्ष्यलक्षणभावनिर्वाहकविशेषसद्भावात्सिद्धान्ते तदुपपत्तावप्यखण्डवादित्वात्परस्य न तन्मते तदुपपत्तिरिति गूढाभिसन्धिरेव परिहरति **तथाहि सदादिकमित्यादिना** ॥ **न लक्ष्यलक्षणभाव इति** । तत्प्रयोजकस्य प्रसिद्धाप्रसिद्धविभागस्याभावादिति भावः । पूर्ववादी स्वाशयमुद्घाटयति **यथेति** । सिद्धान्त्यपि तमुद्घाटयति **अस्माभिरिति** ॥ **अखण्डेति** । अखण्डत्वस्य निर्विशेषरूपत्वादिति भावः ।

**॥ इति ब्रह्मणः अखण्डत्वस्य अभ्युपगतत्वात् सत्यत्वादीनां न ब्रह्मलक्षणत्वम् ॥**

* * *

**॥ अथ सत्यादिपदैः असत्यत्वादिव्यावृत्तिः उभयसाधारणा ॥**

३८ **सु०—** यद्यपि सत्यादिपदप्रतिपाद्यवस्तुनि न भेदः । तथाऽपि व्यावर्त्यानामसत्त्वादीनामस्त्येव । अतस्तद्व्यावृत्तिप्रयोजनानि तद्वाचीनि वाऽनेकानि पदानि ब्रह्मणि वर्तन्त इति अभ्युपगमात् कथमस्मन्मते श्रुत्यर्थानिर्वाह इत्यत आह **व्यावर्त्येति** ।

**अनु०—** व्यावर्त्यमात्रभेदस्तु विद्यते शून्यवादिनः ।

**व्यावर्त्यमात्रभेदस्तु** इत्येकदेशोत्कीर्तनेन सकलमप्युक्तमुपलक्षयति । एषा प्रक्रिया समस्ता **शून्यवादिनः** अपि मतेऽस्त्येवातो नैतयाऽपि ब्रह्मशून्ययोर्भेदो वक्तुं शक्यते । **शून्यवादिनः** अपि **विद्यत** इति किमापादनेनोच्यते । नेत्याह **अनृतादेरि**ति ।

## अनृतादेरपोहं तु स्वयमेव हि मन्यते ।

'सत्यादिपदार्थत्वेन शून्यविशेषणत्वेन चे'ति शेषः । **मन्यते** शून्यवादी । **अपोह**-पदार्थवादिनो बौद्धा इति प्रसिद्धमेवेति **हि**शब्देनाह । 'जाड्यसंवृतिदुःखान्तपूर्वदोषविरोधि यदि'ति प्रसिद्धं च ।

**परि०**— पुनः शङ्कते **यद्यपीति** ।। **अस्त्येवेति** । भेद इत्यनुकर्षः ।। **तद्वाचीनीति** । अपोहवादिमत इवासत्यादिव्यावृत्तिवाचीनि वेत्यर्थः ।। **सकलमपीति** । यद्यपीत्यादिनोक्तमित्यर्थः ।।

**यादु०**— **अपोहेति** । घटादिपदेष्वप्यघटादिव्यावृत्त एव वाच्य इति बौद्धैरङ्गीकारादिति भावः । इति प्रसिद्धं चेत्यस्य हिशब्देनाहेत्यनेनान्वयः ।

**वं०प०**— **एषा प्रक्रियेति** । तच्चित्सुखादिकमित्युक्ता यद्यपीत्यादिनोक्ता च प्रक्रियेत्यर्थः ।

**कं०रा०**— **तद्व्यावृत्तीति** । असत्यादिव्यावृत्तिवाचीनीत्यर्थः ।। **सकलमप्युक्तमिति** । सदादि-शब्दानामसत्यादिव्यावृत्तिप्रयोजनत्वं तद्वाचिनामनेकेषां पदानां शून्ये वृत्तिरित्येतत्सकलमप्युपलक्षयतीत्यर्थः ।

**शे०चं०**— 'न व्यावृत्त्या प्रयोजनमि'ति जन्माधिकरणे निरस्तपक्षाश्रयणेनाह **व्यावृत्तिप्रयोजनानीति** । यद्यसत्यविशेषणमित्यहिकुण्डलाधिकरणेऽपोहवादाश्रयणेनाशङ्क्य निरस्तपक्षाश्रयणेनाह **तद्वाचीनि वेति** ।। **सकलमिति** । यद्यपीत्यादिना शङ्कितं सकलमपीत्यर्थः । स्वयमेव हीति भाष्ये हिशब्दस्यानर्थक्य-माशङ्क्य सत्यादिपदार्थत्वेनानृतादेरपोहं स्वयमेव मन्यत इति शून्यविशेषणत्वेन च मन्यत इति प्रतिज्ञात-प्रमेयद्वयोपपादकप्रसिद्धिद्योतनार्थत्वान्नानर्थक्यमित्याशयेन प्रथमप्रतिज्ञातप्रमेयोपपादकप्रसिद्धिप्रदर्शनपूर्वकं तत्सूच-कतया हिशब्दं योजयति **अपोहेति** । अनन्तरप्रतिज्ञातप्रमेयोपपादकप्रसिद्धिपूर्वकं तत्सूचकतयाऽपि हिशब्दं योजयति **जाड्येति** । इति प्रसिद्धं चेत्यस्य हिशब्देनाहेत्यनुवृत्तेनान्वयः ।

**।। इति सत्यादिपदैः असत्यत्वादिव्यावृत्तिः उभयसाधारणा ।।**

* * *

**॥ अथ निर्विशेषत्ववादिनोः उभयोः ब्रह्मशून्ययोः विशेषसाधनं व्याहतम् ॥**

३९ सु०— आस्तां तावत् 'ब्रह्मशून्ययोर्विशेषप्रतिपादनं निर्विशेषयोः । विशेषोऽस्ती'ति प्रतिज्ञैव तावदेषा नाङ्गं धत्ते । व्याहतत्वादिति भावेनाह **निर्विशेषत्वत इति** ।

## अनु०— निर्विशेषत्वतो नैव विशेषो ब्रह्मशून्ययोः ।

'नैव प्रतिज्ञातुं शक्यत' इति शेषः ।

परि०— **अङ्गमिति** । स्वरूपं न धत्त इत्यर्थः ।

कं०रा०— **नाङ्गं धत्त इति** । अङ्गं शरीरं स्वरूपमिति यावत् । यथा च स्वरूपं न लभत इत्यर्थः ।

शे०चं०— 'निर्विशेषत्ववाचैव शून्यं ब्रह्मेति नो भिदे'ति पूर्वग्रन्थेन 'निर्विशेषत्वतो नैव विशेषो ब्रह्मशून्ययोरि'त्यस्य गतार्थतामाशङ्क्य परिहरति **आस्तामिति** । उक्तमर्थं मूलारूढं कर्तुमपेक्षितं पूरयति **नैवेत्यादि** ।

**॥ इति निर्विशेषत्ववादिनोः उभयोः ब्रह्मशून्ययोः विशेषसाधनं व्याहतम् ॥**

* * *

**॥ अथ मायावादिना अप्रामाण्यात्मकाऽतत्त्वावेदकत्वस्य वेदेऽङ्गीकारात्**
**वेदप्रामाण्यविषये उभयोः साम्यम् ॥**

४० सु०— ननु मायावादिना वेदस्य प्रामाण्यं स्वतःप्रामाण्यं नित्यत्वं चाङ्गीकृत्य वेद-वाक्यनिर्वाहोऽयं कृतः । शून्यवादी तु वेदप्रामाण्यमेव नाङ्गीकुरुते । तत्कथमुक्तं व्यावर्त्य-मात्रेति । तत्राह **प्रामाण्यादीति** ।

## अनु०— प्रामाण्यादि च वेदस्य फलतः सममेव हि ।

शब्दमात्रेण विषमम् । अर्थस्तु द्वयोरपि सम एव । तस्माद्वाक्यार्थनिर्वाहोऽपि **सम** इत्युक्तमुपपन्नम् । वेदवाक्यपुरस्कारस्तु मायावादिनां छद्ममात्रं प्रमेयं तु समानमेवेति भावः ।

कथं फलतः समानमित्यत आह **अतत्त्वावेदकमिति** ।

## अतत्त्वावेदकं यस्मात् प्रमाणं तेन कथ्यते ।

वेद इति वर्तते । **सर्वमपि प्रमाणम्** इति वा । **तेन मायावादिना** । **कथ्यते** अविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेत्यादाविति शेषः । अतत्त्वावेदकत्वेऽङ्गीकृतेऽपि कुतः सममित्यत आह **अतत्त्वावेदकत्वमिति** ।

**अतत्त्वावेदकत्वं यदप्रामाण्यं सतां मतम् ।**

**यत्** यस्मात् **सतां** विदुषाम् । नानाविधानि लक्षणानि प्रणयन्तोऽपि परीक्षका अतत्त्वावेदकव्यावृत्तये प्रयतन्त एव । अनुभूतिः प्रमाणमिति वदताऽप्यतत्त्वावेदकाभावाभिमानेनैव न प्रयत्नः कृतः । न पुनरतत्त्वावेदकस्यापि प्रामाण्याभिप्रायेण । अतो मायावादिनाऽभ्युपगतं वेदप्रामाण्यं नाम अप्रामाण्यमेव प्रामाण्याभावे च तत्स्वतस्त्वं दूरोत्सारितम् । नित्यत्वव्युत्पादनं च व्यर्थमेवेति ।

**परि०**— 'आदि'पदार्थः **तस्मादित्यादि** । 'निर्भेदत्वमि'त्यादिना वक्ष्यमाणतत्त्वमस्यादिवाक्यार्थनिर्वाहोऽपीत्यर्थः ॥ **वेद इति वर्तत इति** । विभक्तिविपरिणामेनानुवर्तत इत्यर्थः । कथ्यत इत्युक्तं तत्कुत्रेत्यतस्तद्वाक्यं पठति **अविद्यावदिति** । नन्वनुभूतिः प्रमाणमिति मते शुक्तिरूप्यज्ञानस्याप्यनुभवत्वात् तत्सङ्ग्रहः कृत इति भातीत्यत आह **अतत्त्वावेदकाभावाभिमानेनेति** ॥ **अनुभूतिरिति** । नन्वनुभूतिः प्रमाणमिति प्रमाणलक्षणं प्रणयता अतत्त्वावेदकस्यापि प्रामाण्यमङ्गीकृतम्, अन्यथा अयथार्थज्ञानव्यावृत्त्यर्थविशेषणमुपाददेत् । न चैवम् । तस्मात् कथमतत्त्वावेदकव्यावृत्तये प्रयतत एवेत्युक्तमित्यत आह **अतत्त्वावेदकव्यावृत्तय इति** ॥ **प्रयतन्त एवेति** । ज्ञानमात्रस्य प्रमात्वाभ्युपगमादिति भावः । तदेव व्यनक्ति **अनुभूतिरित्यादिना** ॥ **व्यर्थमेवेति** । प्रामाण्यार्थं निर्दोषताव्युत्पादनाय **नित्यत्व**कथनम् । प्रामाण्यस्यैवाभावे तद्व्युत्पादनं व्यर्थमेवेत्यर्थः ।

**यादु०**— **वेद इति वर्तत इति** । विभक्तिपरिणामेनेति शेषः ॥ **अविद्यावद्विषयाणीति** । अत्राविद्याशब्देनात्मानात्मनोरितरेतराध्यासो ग्राह्यः । 'तत एतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्त' इति पूर्वमुक्तत्वात् । तथा च कूटस्थे चैतन्ये बुद्ध्यादितादात्म्याध्यासं विना प्रमातृत्वस्याभावेन प्रमाणप्रवृत्तेरसम्भवात् प्रमाणान्यध्यासवत्पुरुषविषयाणि तदाश्रितानि तत्प्रयोज्यानीति यावत् । करणानां कर्तृप्रयोज्यत्वनियमात् । एवं च अत्र प्रमातृप्रवृत्तेरात्मन्यनाध्यासपूर्वकताया उक्तत्वेन अध्यस्तपदार्थविषयकत्वमप्यर्थादुक्तमेवेत्यतत्त्वावेदकताऽपि प्रमाणानामभिप्रेतैवेति भावः । न च तत्त्वावेदकं यत्तदप्रमाणमिति नैयायिकादीनामपि मतम् । न हि ते सन्तोऽत आह **विदुषामिति** । परीक्षकाणामित्यर्थः ॥ **व्यर्थमेवेति** । प्रामाण्यप्रयोजकनिर्दोषताव्युत्पादनाय हि नित्यत्वं व्युत्पादनीयम् । प्रामाण्यस्यैवाभावे तद्व्युत्पादनं व्यर्थमित्यर्थः ।

**वं०प०— तत्कथमिति** । तथा चैषा प्रक्रिया समानेत्युक्तमयुक्तमिति भावः । ननु प्राभाकरेणा-तत्त्वावेदकस्य प्रामाण्यमङ्गीकृतमेव । अनुभूतिः प्रमाणमिति प्रमाणलक्षणे तद्व्यावर्तकविशेषणादानादित्यत आह **अनुभूतिः प्रमेति** ॥ **अतत्त्वावेदकाभावाभिमानेनेति** । अयथार्थज्ञानमेव नास्तीत्यभिमानेनेत्यर्थः ।

**कं०रा०— अविद्यावद्विषयाणीति** । यद्यपि शाङ्करभाष्ये 'देहेन्द्रियादिष्वहम्ममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणं प्रवृत्त्यनुपपत्तेरि'त्यादिना 'ब्राह्मणो यजेते'त्यादीनि शास्त्राण्याश्रमवयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्त' इत्यन्तेन ग्रन्थेन, भामत्यां च 'तस्मादनाद्यविद्यालब्धकर्तृत्वभोक्तृत्वब्राह्मणत्वाद्यभिमानिनं नरमधिकृत्य विधिनिषेधशास्त्रं प्रवर्तते । एवं 'वेदान्ता अप्यविद्यावत्पुरुषविषया एव न हि प्रमात्रादिविभागादृतेऽर्थाधिगम' इत्यादिना 'राजा राजसूयेन यजेते'त्याद्याश्रमाध्यासः । 'गृहस्थसदृशीं भार्यां विन्देते'ति वयोऽध्यासः । 'कृष्णकेशोऽग्नीनादधीते'त्यादिरवस्थाऽध्यासः । अप्रतिसमाधेयव्याधिनां जलाधिपातेन प्राणत्यागः । अधिग्रहणं पातकोपपातकसङ्कलीकरणपात्रीकरणमलिनीकरणाद्यध्यासोऽपि सङ्ग्रहार्थमि'त्यन्तेन प्रत्यक्षादिप्रमाणानां शास्त्राणां वा विद्यावत्पुरुषविषयत्वमेवोक्तम् । तथाऽप्यविद्यावत्पुरुषविषयत्वस्य अतत्त्वावेदकत्वं विनाऽनुपपत्तेः अर्थात्तदप्युक्तमेवेति भावः ॥ **नित्यत्वव्युत्पादनं चेति** । वेदनित्यत्वव्युत्पादनं तत्प्रामाण्यसिद्ध्यर्थत्वात् उक्तरीत्या च अतत्त्वावेदकत्वेन मायावादिनाऽभ्युपगतस्य वेदस्य प्रामाण्याभावात् तत्सिद्ध्यर्थं वेदनित्यत्वव्युत्पादनं तु व्यर्थमेवेत्यर्थः ।

**शे०चं०—** मूले प्रामाण्यादीत्यादिपदसङ्ग्राह्यप्रदर्शनं **स्वतःप्रामाण्यमित्यादि** ॥ **नित्यत्वं चेति** । यद्यपि ध्वंसाप्रतियोगित्वरूपं नित्यत्वं न तेनाङ्गीकृतं शास्त्रयोनित्वाधिकरणे पौरुषेयत्वाभिधानात् । तथाऽप्याकाशादिसाधारणबहुकालावस्थायित्वरूपनित्यत्वविवक्षया अयं ग्रन्थ इत्यवधेयम् ॥ **अयमिति** । व्यावृत्तिप्रयोजनकत्वतद्वाचकत्वरूप इत्यर्थः । **द्वयोः** मायावादिशून्यवादिनोः । सम इत्यत्र द्वयोरित्यनुवर्तते । **उक्तं** व्यावर्त्यमात्रभेद इत्याद्युक्तम् । पूर्ववाक्याद्वेदस्येत्यनुवृत्तिमर्थवशाद्विभक्तिविपरिणामं चाभिप्रेत्याह **वेद इति वर्तत इति** । तेन मायावादिना वेदो यस्मादतत्त्वावेदकं प्रमाणं कथ्यत इति योजनायां वेदपदानुवृत्तिविभक्तिविपरिणामौ उपाश्रयणीयौ भवतः । प्रत्यक्षादिप्रमाणानामतत्त्वावेदकत्वलाभश्च न भवतीत्यपरितोषाद्वस्तुस्थितिकथनाय पक्षान्तरमाह **सर्वमपीति** । अनेन सर्वमपीत्यध्याहृतेन सर्वमपि प्रमाणं यस्मादतत्त्वावेदकं कथ्यत इति योजना सूचिता भवति । अत्र पक्षे प्रमाणत्वरूपसामान्यधर्मपुरस्कारेण वेदस्यातत्त्वावेदकत्वलाभः न तु वेदत्वेन रूपेण। पूर्वयोजनायां तु तत्त्वेनैव तल्लाभ इति द्रष्टव्यम् ॥ **अविद्यावद्विषयिणीति** । अत्राविद्याशब्देनात्मानात्मनोरितरेतराध्यासपरिग्रहः । 'तमेतमेव लक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते, इति पूर्वग्रन्थानुरोधात् । ततश्च कूटस्थे चैतन्ये बुध्यादितादात्म्याध्यासं विना प्रमातृत्वस्याभावेन प्रमाणप्रवृत्तेरसम्भवात् प्रमाणान्यध्यासवत्पुरुषविषयाणि तदाश्रितानि तत्प्रयोज्यानीति यावत् । करणानां कर्तृप्रयोज्यत्वनियमात् । एवं च अत्र प्रमाणप्रवृत्तेरात्मन्यनात्माध्यासपूर्वकताया उक्तत्वादविद्यावदाश्रितानां प्रमाणानां 'यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एव असमीचीनः प्रत्ययो नान्य' इति *पञ्चपादिकारी*त्या 'भाष्यकारेण दोषमात्रमेव विषयतोऽपि ज्ञानमिथ्यात्वे हेतु-

वेद इति वर्तते । **सर्वमपि प्रमाणम्** इति वा । **तेन मायावादिना** । **कथ्यते** अविद्या-वद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेत्यादाविति शेषः । अतत्त्वावेदकत्वेऽङ्गी-कृतेऽपि कुतः सममित्यत आह **अतत्त्वावेदकत्वमिति** ।

**अतत्त्वावेदकत्वं यदप्रामाण्यं सतां मतम् ।**

**यत्** यस्मात् **सतां** विदुषाम् । नानाविधानि लक्षणानि प्रणयन्तोऽपि परीक्षका अतत्त्वावेदकव्यावृत्तये प्रयतन्त एव । अनुभूतिः प्रमाणमिति वदताऽप्यतत्त्वावेदकाभावा-भिमानेनैव न प्रयत्नः कृतः । न पुनरतत्त्वावेदकस्यापि प्रामाण्याभिप्रायेण । अतो माया-वादिनाऽभ्युपगतं वेदप्रामाण्यं नाम अप्रामाण्यमेव प्रामाण्याभावे च तत्स्वतस्त्वं दूरो-त्सारितम् । नित्यत्वव्युत्पादनं च व्यर्थमेवेति ।

**परि०**— 'आदि'पदार्थः **तस्मादित्यादि** । 'निर्भेदत्वमि'त्यादिना वक्ष्यमाणतत्त्वमस्यादि-वाक्यार्थनिर्वाहोऽपीत्यर्थः ॥ **वेद इति वर्तत इति** । विभक्तिविपरिणामेनानुवर्तत इत्यर्थः । कथ्यत इत्युक्तं तत्कुत्रेत्यतस्तद्वाक्यं पठति **अविद्यावदिति** । नन्वनुभूतिः प्रमाणमिति मते शुक्तिरूप्य-ज्ञानस्याप्यनुभवत्वात् तत्सङ्ग्रहः कृत इति भातीत्यत आह **अतत्त्वावेदकाभावाभिमानेनेति** ॥ **अनुभूतिरिति** । नन्वनुभूतिः प्रमाणमिति प्रमाणलक्षणं प्रणयता अतत्त्वावेदकस्यापि प्रामाण्यमङ्गी-कृतम्, अन्यथा अयथार्थज्ञानव्यावृत्त्यर्थविशेषणमुपाददेत् । न चैवम् । तस्मात् कथमतत्त्वावेदक-व्यावृत्तये प्रयतत एवेत्युक्तमित्यत आह **अतत्त्वावेदकव्यावृत्तय इति** ॥ **प्रयतन्त एवेति** । ज्ञानमात्रस्य प्रमात्वाभ्युपगमादिति भावः । तदेव व्यनक्ति **अनुभूतिरित्यादिना** ॥ **व्यर्थमेवेति** । प्रामाण्यार्थं निर्दोषताव्युत्पादनाय **नित्यत्व**कथनम् । प्रामाण्यस्यैवाभावे तद्व्युत्पादनं व्यर्थमेवेत्यर्थः ।

**यादु०**— **वेद इति वर्तत इति** । विभक्तिपरिणामेनेति शेषः ॥ **अविद्यावद्विषयाणीति** । अत्रा-विद्याशब्देनात्मानात्मनोरितरेतराध्यासो ग्राह्यः । 'तत एतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्त' इति पूर्वमुक्तत्वात् । तथा च कूटस्थे चैतन्ये बुद्ध्यादितादात्म्याध्यासं विना प्रमातृत्वस्याभावेन प्रमाणप्रवृत्तेरसम्भवात् प्रमाणान्यध्यासवत्पुरुषविषयाणि तदाश्रितानि तत्प्रयोज्यानीति यावत् । करणानां कर्तृप्रयोज्यत्वनियमात् । एवं च अत्र प्रमातृप्रवृत्तेरात्मन्यनाध्यासपूर्वकताया उक्तत्वेन अध्यस्तपदार्थविषयकत्वमप्यर्थादुक्तमेवेत्यतत्त्वा-वेदकताऽपि प्रमाणानामभिप्रेतैवेति भावः । न च तत्त्वावेदकं यत्तदप्रमाणमिति नैयायिकादीनामपि मतम् । न हि ते सन्तोऽत आह **विदुषामिति** । परीक्षकाणामित्यर्थः ॥ **व्यर्थमेवेति** । प्रामाण्यप्रयोजकनिर्दोषताव्युत्पादनाय हि नित्यत्वं व्युत्पादनीयम् । प्रामाण्यस्यैवाभावे तद्व्युत्पादनं व्यर्थमित्यर्थः ।

**वं०प०— तत्कथमिति** । तथा चैषा प्रक्रिया समानेत्युक्तमयुक्तमिति भावः । ननु प्राभाकरेणातत्त्वावेदकस्य प्रामाण्यमङ्गीकृतमेव । अनुभूतिः प्रमाणमिति प्रमाणलक्षणे तद्व्यावर्तकविशेषणादानादित्यत आह **अनुभूतिः प्रमेति** ॥ **अतत्त्वावेदकाभावाभिमानेनेति** । अयथार्थज्ञानमेव नास्तीत्यभिमानेनेत्यर्थः ।

**कं०रा०— अविद्यावद्विषयाणीति** । यद्यपि शाङ्करभाष्ये 'देहेन्द्रियादिष्वहम्ममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणं प्रवृत्त्यनुपपत्तेरि'त्यादिना 'ब्राह्मणो यजेते'त्यादीनि शास्त्राण्याश्रमवयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्त' इत्यन्तेन ग्रन्थेन, भामत्यां च 'तस्मादनाद्यविद्यालब्धकर्तृत्वभोक्तृत्वब्राह्मणत्वाद्यभिमानिनं नरमधिकृत्य विधिनिषेधशास्त्रं प्रवर्तते । एवं 'वेदान्ता अप्यविद्यावत्पुरुषविषया एव न हि प्रमात्रादिविभागादृतेऽर्थाधिगम' इत्यादिना 'राजा राजसूयेन यजेते'त्याद्याश्रमाध्यासः । 'गृहस्थसदृशीं भार्यां विन्देते'ति वयोऽध्यासः । 'कृष्णकेशोऽग्नीनादधीते'त्यादिरवस्थाऽध्यासः । अप्रतिसमाधेयव्याधिनां जलाधिपातेन प्राणत्यागः । अधिग्रहणं पातकोपपातकसङ्कलीकरणपात्रीकरणमलिनीकरणाद्यध्यासोऽपि सङ्ग्रहार्थमि'त्यन्तेन प्रत्यक्षादिप्रमाणानां शास्त्राणां वा विद्यावत्पुरुषविषयत्वमेवोक्तम् । तथाऽप्यविद्यावत्पुरुषविषयत्वस्य अतत्त्वावेदकत्वं विनाऽनुपपत्तेः अर्थात्तदप्युक्तमेवेति भावः ॥ **नित्यत्वव्युत्पादनं चेति** । वेदनित्यत्वव्युत्पादनं तत्प्रामाण्यसिद्ध्यर्थत्वात् उक्तरीत्या च अतत्त्वावेदकत्वेन मायावादिनाऽभ्युपगतस्य वेदस्य प्रामाण्याभावात् तत्सिद्ध्यर्थं वेदनित्यत्वव्युत्पादनं तु व्यर्थमेवेत्यर्थः ।

**शे०चं०**— मूले प्रामाण्यादीत्यादिपदसङ्ग्राह्यप्रदर्शनं **स्वतःप्रामाण्यमित्यादि** ॥ **नित्यत्वं चेति** । यद्यपि ध्वंसाप्रतियोगित्वरूपं नित्यत्वं न तेनाङ्गीकृतं शास्त्रयोनित्वाधिकरणे पौरुषेयत्वाभिधानात् । तथाऽप्याकाशादिसाधारणबहुकालावस्थायित्वरूपनित्यत्वविवक्षया अयं ग्रन्थ इत्यवधेयम् ॥ **अयमिति** । व्यावृत्तिप्रयोजनकत्वतद्वाचकत्वरूप इत्यर्थः । **द्वयोः** मायावादिशून्यवादिनोः । सम इत्यत्र द्वयोरित्यनुवर्तते । **उक्तं** व्यावर्त्यमात्रभेद इत्याद्युक्तम् । पूर्ववाक्याद्वेदस्येत्यनुवृत्तिमर्थवशाद्विभक्तिविपरिणामं चाभिप्रेत्याह **वेद इति वर्तत इति** । तेन मायावादिना वेदो यस्मादतत्त्वावेदकं प्रमाणं कथ्यत इति योजनायां वेदपदानुवृत्तिविभक्तिविपरिणामौ उपाश्रयणीयौ भवतः । प्रत्यक्षादिप्रमाणानामतत्त्वावेदकत्वलाभश्च न भवतीत्यपरितोषाद्वस्तुस्थितिकथनाय पक्षान्तरमाह **सर्वमपीति** । अनेन सर्वमपीत्यध्याहृतेन सर्वमपि प्रमाणं यस्मादतत्त्वावेदकं कथ्यत इति योजना सूचिता भवति । अत्र पक्षे प्रमाणत्वरूपसामान्यधर्मपुरस्कारेण वेदस्यातत्त्वावेदकत्वलाभः न तु वेदत्वेन रूपेण। पूर्वयोजनायां तु तत्त्वेनैव तल्लाभ इति द्रष्टव्यम् ॥ **अविद्यावद्विषयिणीति** । अत्राविद्याशब्देनात्मानात्मनोरितरेतराध्यासपरिग्रहः । 'तमेतमेव लक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते, इति पूर्वग्रन्थानुरोधात् । ततश्च कूटस्थे चैतन्ये बुध्यादितादात्म्याध्यासं विना प्रमातृत्वस्याभावेन प्रमाणप्रवृत्तेरसम्भवात् प्रमाणान्यध्यासवत्पुरुषविषयाणि तदाश्रितानि तत्प्रयोज्यानीति यावत् । करणानां कर्तृप्रयोज्यत्वनियमात् । एवं च अत्र प्रमाणप्रवृत्तेरात्मन्यनात्माध्यासपूर्वकताया उक्तत्वादविद्यावदाश्रितानां प्रमाणानां 'यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एव असमीचीनः प्रत्ययो नान्य' इति *पञ्चपादिकारीत्या* 'भाष्यकारेण दोषमात्रमेव विषयतोऽपि ज्ञानमिथ्यात्वे हेतु-

रुक्त इति विवरणग्रन्थानुरोधाच्च अयथार्थज्ञानजनकत्वलाभेन प्रमाणानामतत्त्वावेदकत्वसिद्धिरुक्तग्रन्थादिति युक्त एवास्य वाक्यस्य संवादितयोपन्यास इति ध्येयम् । यादृशतादृशसत्त्वस्य प्रकृतानुपयोगित्वात् प्रकृतोपयोगितया सच्छब्दं व्याचष्टे **विदुषामिति** । तदुपपादयति **नानाविधानीति** ॥ **प्रयतन्त एवेति** । सम्यगित्यादि तद्व्याव-र्तकविशेषणोपादानादिति भावः । प्रामाण्यस्वतस्त्वनित्यत्वयोरदूषणाद्भाष्ये न्यूनत्वमाशङ्क्य स्पष्टत्वात् तदनुक्ति-रित्याह **प्रामाण्याभावे चेति** ॥ **व्यर्थमिति** । प्रामाण्यप्रयोजकनिर्दोषत्वव्युत्पादनार्थस्य नित्यत्वव्युत्पादनस्य वेदप्रामाण्यपक्षेऽर्थवत्त्वेऽपि त्वन्मते तस्यातत्त्वावेदकत्वेनाप्रामाण्यात् न प्रामाण्यप्रयोजकनिर्दोषव्युत्पादनार्थस्य नित्यत्वव्युत्पादनस्य किञ्चित्प्रयोजनमिति भावः । **इति** इत्यतःपरं 'स्पष्टमेवेत्यतो न भाष्ये तदुक्तिरि'ति शेषः।

**वा०र०— बहुकालावस्थायित्वेति** । कल्पपर्यन्तमवस्थायित्वेत्यर्थः । **सम इत्यत्रेति** । सम इत्युक्तमित्यत्रेत्यर्थः । मायावादिनो वेदरूपं प्रमाणं यस्मादतत्त्वावेदकत्वं कथ्यन्त इति पाठः । वेदः प्रमाणमिति पाठे वेदरूपं प्रमाणमित्यर्थः । अतत्त्वावेदकं प्रमाणमिति पाठे तु वेदपदेन प्रामाण्यसम्बन्धमाश्रित्य योज्यम् । सर्वमपि प्रमाणमित्युत्तरानुसारात् । उद्देश्यविधेयभावस्य तथात्व एव लाभाच्चेति ज्ञेयम् । **पूर्वयोजनायां त्विति**। परं तु प्रत्यक्षादीनीत्यादि मायावादिवाक्यानुसारेण द्वितीययोजनेति शेषः । मूले **इत्यादाविवेति** । शाङ्कर-भाष्यादाविति शेषः । मूलेऽविद्यावद्विषयाणीत्यादिना शाङ्करभाष्यवाक्यं संवादायोपन्यस्तम् । तस्य प्रत्यक्षादि-प्रमाणानामतत्त्वावेदकत्वमित्येतदर्थप्रतिपादकत्वाप्रतीतेस्तस्य तत्परत्वं कथमित्यतः कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनीत्यादिशङ्कापरिहाराय प्रवृत्तदेहेन्द्रियादिष्वहं ममेत्यादि पूर्वभाष्यं तद्व्याख्यानरूपमित्यर्थं प्रमातृत्वं हीत्यादिग्रन्थं मनसि कृत्वोपयुक्तमधिकं वदन्नेतद्वाक्यस्थप्रत्यक्षाद्यतत्त्वपरत्वमुपपादयति **अत्र विद्याशब्देने-त्यादिना** । एवं भामत्यनुसारेणाविद्याविषयतामुपपाद्य तद्बलेन अतत्त्वावेदकत्वप्राप्तेः स्पष्टप्रतिभासात्तस्मादविद्या-विषयाण्येवेत्युपसंहारभाष्यव्याख्यानरूपेऽनैसर्गिकत्वं च दोषमभिप्रेत्योक्तम् । यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः । स एवासमीचीनः प्रत्ययो नान्य इति *पञ्चपादिकाग्रन्थतद्विवरणे* च स्पष्टमतत्त्वावेदक-प्रतिपादनात् तदुभयमुदाहरन् प्रकृतोपयोगं दर्शयति **अविद्यावदाश्रितानां प्रमाणानामिति** । अत्र ब्राह्मणलक्षण-वेदो विद्यावद्विषयक इति । तत्त्वनिर्णयटीकायामप्येवमर्थो बोध्यः । प्रामाण्यस्य स्वतस्त्वेति पाठः ।

**स०व्र०— नित्यत्वव्युत्पादनमिति** । वेदस्य नित्यत्वव्युत्पादनं प्रामाण्योपपादनार्थं वाच्यं पौरुषेयत्वे पुरुषदोषनिबन्धनदोषवत्त्वापत्त्या अप्रामाण्यकारणदोषशून्यत्वाभावेन प्रामाण्यानुपपत्तेः । त्वन्मते च तस्यातत्त्वा-वेदकत्वेन प्रामाण्यस्यैवाभावेन कस्योपपत्त्यर्थं नित्यत्वव्युत्पादनमिति भावः ।

**॥ इति मायावादिना अप्रामाण्यात्मकाऽतत्त्वावेदकत्वस्य वेदेऽङ्गीकारात्**
**वेदप्रामाण्यविषये उभयोः साम्यम् ॥**

* * *

॥ अथ ब्रह्मज्ञानैकबाध्यविषयप्रतिपादकत्वस्य अतत्त्वावेदकत्वे सुदीर्घभ्रमजनकत्वात् वेदानां अप्रामाण्यम् ॥

४१ **सु०**— नन्वतत्त्वावेदकत्वेऽपि यस्य विषयो ब्रह्मज्ञानात् प्रागेव बाध्यते तदप्रमाणम् । यस्य तु विषयो ब्रह्मज्ञानेनैव बाध्यः तदतत्त्वावेदकं प्रमाणमिति विभागः । वेदविषयस्तु ब्रह्मज्ञानेनैव बाध्यते । अतः तस्य प्रामाण्यमित्याशयेनाशङ्कते **दीर्घेति** ।

**अनु०— दीर्घभ्रान्तिकरी चेत्स्यादतत्त्वावेदकप्रमा ।**

या **दीर्घभ्रान्तिकरी** सा **अतत्त्वावेदकप्रमे**ति यदि मतं स्यादित्यर्थः । किमिदं लोकवृत्तमनुसृत्योच्यते । किं वा स्वसङ्केतमात्रेण । आद्ये दोषमाह **रज्ज्विति** ।

**रज्जुसर्पादिविज्ञानादप्याधिक्यादमानता ।**
**स्यादागमस्यानिवर्त्यमाहामोहप्रदत्वतः ।**

**आगमस्य** वेदस्य । कुतः । अल्पेन कालेनानिवर्त्यत्वाद्यो महान्मोहस्तत्प्रदत्वतः । अप्रामाण्ये विशेषाभावेऽपि तद्धेतुकानर्थातिशयाभिप्रायेणाधिक्यादित्युक्तमिति भावः ।

**परि०— यस्येति** । ज्ञानस्येत्यर्थः ॥ **विशेषाभावेऽपीति** । बाध्यत्वाविशेषेणेति भावः ॥ **तद्धेतुकेति** । दीर्घभ्रान्तिकरणत्वहेतुकेत्यर्थः । ब्रह्मज्ञानबाध्यवेदाप्रामाण्यहेतुकेति वार्थः ।

**यादु०— तद्धेतुकानर्थे**त्यत्र तच्छब्देनाप्रमारूपज्ञानपरामर्शः ।

**वं०प०— भ्रान्तिहेतुः** वेदस्य । **तेषामपि** आकाशे नैल्यादिज्ञानानामपि । **अविशेषात्** अल्पकालानिवर्त्यभ्रान्तिहेतुत्वाविशेषात् ।

**कं०रा०— दीर्घभ्रान्तिकरीति** । 'कृञो हेतुताच्छील्यानुलोम्येष्वि'ति कर्मण्युपपदे करोतेष्टप्रत्यये टित्वात् ङीप् । **किमिदमिति** । दीर्घभ्रान्तिहेतोः अतत्त्वावेदकप्रमाणत्वं किं लोकवृत्तमनुसृत्योच्यते किं वा स्वसङ्केतमात्रेणेत्यर्थः । नन्वल्पकालानुवृत्तभ्रान्तिहेतोर्दीर्घभ्रान्तिहेतोश्च अप्रामाण्यविशेषाभावात् कथं रज्जुसर्पविज्ञानादप्याधिक्येन अमानत्वमल्पकालानिवर्त्यभ्रान्तिहेतोरागमस्यापाद्यत इत्यत आह **अप्रामाण्य इति** । उभयोरप्रामाण्ये विशेषाभावेऽपि दीर्घभ्रान्तिहेतोर्दीर्घभ्रान्तिप्रयुक्तार्थातिशयसम्पादकत्वेन कार्यातिशयविवक्षया

दीर्घभ्रान्तिहेतोर्वेदस्य रज्जुसर्पादिविज्ञानादप्याधिक्येन मानता स्यादित्युक्तमित्यर्थः । मूले रज्जुसर्पादिविज्ञानपदं करणव्युत्पत्त्या रज्जुसर्पादिभ्रान्तिहेतुपरम् । एवं तलनैल्यादिविज्ञानमित्यादावपि विज्ञानपदं तद्धेतुपरमिति ध्येयम् ।

**शे०चं०**— अतस्तस्य प्रामाण्यमित्यतःपरं नैवमतत्त्वावेदकस्य प्रामाण्यं शून्यवादी मन्यते इत्यतोऽस्त्येव मतयोर्वैलक्षण्यमिति शेषः । उक्तमर्थं मूलारूढं कर्तुं यत्तच्छब्दाध्याहारेण योजयति **या दीर्घेति** ॥ **अतत्त्वावेदकप्रमेति** । अतत्त्वावेदकत्वेऽपि प्रमाणमित्यर्थः । **तद्धेतुकानर्थे**त्यत्र तच्छब्देनाप्रमारूपज्ञानपरामर्शः ।

**वा०र०**— अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताध्यस्यन्तीति भाष्यव्याख्यावसरे तलमिन्द्रनीलं तत्सदृशमिति व्याख्यातं पञ्चपादिकायाम् । तद्विवरणे चेन्द्रनीलमिव नीलमित्यर्थ इत्युक्तम् । तन्मनसि कृत्वा तस्य नैल्यमिवेति व्याख्यानं मूले । तत्र निमित्तमाह **अन्यत्र सत एवेति** । दीर्घभ्रान्तिहेतुरतत्त्वावेदकं प्रमाणमितीति पाठः । **भामत्यामुक्तमिति** । .......धिकरण इति शेषः । संशोध्य किञ्चिद्व्याख्येयमस्ति ।

**॥ इति ब्रह्मज्ञानैकबाध्यविषयप्रतिपादकत्वस्य अतत्त्वावेदकत्वे सुदीर्घभ्रमजनकत्वात् वेदानां अप्रामाण्यम् ॥**

* * *

**॥ अथ एतादृशाऽतत्त्वावेदकत्वस्य स्वसमयसङ्केतत्वे नभोनैल्यज्ञानस्य प्रामाण्यापत्तिः ॥**

४२ **सु०— द्वितीये अतिप्रसङ्गमाह तलेति ।**

## अनु०— तलनैल्यादिविज्ञानमाकाशे मानतां व्रजेत् ।

**तलमिन्द्रनीलं तस्य नैल्यमिव नैल्यं तलनैल्यम् । आदिपदार्थं स्वयमेव भाष्यकृद्विवृणोति छत्रेति ।**

## छत्राकारत्वविज्ञानं चन्द्रप्रादेशतामतिः ।

'आकाश' इति वर्तते । 'मानतां व्रजेदि'ति सर्वत्र सम्बध्यते । अल्पकालानिवर्त्यभ्रान्तिहेतोः प्रामाण्यसङ्केतं कुर्वता एतेषामपि प्रामाण्यसङ्केतः करणीयोऽविशेषात् । ब्रह्मज्ञाननिवर्त्यविषयत्वमाश्रित्यायं सङ्केतः क्रियते न त्वल्पकालानिवर्त्यभ्रान्तिहेतुत्वमिति चेत् । (न) ब्रह्मज्ञाननिवर्त्यविषयत्वोक्त्याऽप्यस्यैवार्थस्य मायावादिना विवक्षितत्वात् । अन्यथा 'न खलु नाग इति नग इति वा पदात् कुञ्जरं गिरिं वा प्रतिपद्यमाना भवन्ति भ्रान्ता' इति वर्णदैर्घ्यादिज्ञानं कथमुदाहरेत् ।

**परि०— वर्णदैर्घ्यादिज्ञानमिति** । तन्मते तस्य भ्रान्तित्वात् तस्य च लौकिकत्वेन ब्रह्मधीबाध्यत्वाभावात् अल्पकालानिवर्त्यभ्रान्तिहेतुत्वस्याविवक्षितत्वे वर्णदैर्घ्यादिभ्रान्तिरूपज्ञानं कथमुदाहरेदित्यर्थः ।

**गु०दी०— न खलु नग** इति वाक्यं परकीयम् । अविद्यमानं वर्णदैर्घ्यं भ्रान्त्याऽङ्गीकृत्याऽर्थभेदं प्रतिपद्यमाना अपि भ्रान्ता न भवन्ति खलु । अतो व्यावहारिकभ्रान्तिर्लोकमर्यादया भ्रान्तिरिति नोच्यत इति भावः ।

**यादु०— अन्यथा न खल्विति** । अल्पकालानिवर्त्यभ्रान्तिहेतुत्वस्याविवक्षितत्व इत्यर्थः । न खलु नाग इति वा नग इति वा पदात्कुञ्जरं वा गिरिं वा प्रतिपद्यमान इत्येव भामतीवाक्यपाठः । अन्यस्तु प्रामादिक इति ज्ञातव्यम् ।

**वं०प०— ब्रह्मज्ञानेति** । वेदस्य ब्रह्मज्ञाननिवर्त्यविषयकत्वादाकाशनैल्यादिज्ञानस्य तदभावादित्यर्थः ॥ **न त्वल्पकालेनेति** । येन तेषामपि प्रामाण्यसङ्केतः कार्यः स्यादिति भावः ॥ **अस्यैवार्थस्येति** । अल्पकालानिवर्त्यभ्रान्तिहेतुत्वरूपार्थस्यैवेत्यर्थः ॥ **अन्यथेति** । अल्पकालानिवर्त्यभ्रान्तिहेतोः प्रामाण्यानङ्गीकार इत्यर्थः । नागशब्दात्कुञ्जरम्, नगशब्दाद्गिरिम्, भ्रान्ता न भवन्ति खल्वित्यन्वयः । **वर्णदैर्घ्यादिकं** आकाशनैल्यादिवदारोपितम् । **उदाहरेत्** अर्थप्रमापकत्वेन स्वग्रन्थे पर इति शेषः । तथा च नाग इत्यादिशब्दादर्थभेदं प्रतिपाद्यमाना भ्रान्ता न भवन्तीत्युक्त्या वर्णदैर्घ्यादिर्ब्रह्मज्ञानात्प्रागबाध्यतया अल्पकालानिवर्त्यभ्रान्तिहेतोः वर्णदैर्घ्यादिज्ञानस्य अतत्त्वावेदकत्वलक्षणं प्रामाण्यमङ्गीकृतमिति ज्ञायते । भ्रान्ता न भवन्तीत्येतदेव प्रकृतप्रामाण्यसाधकम् । तथा च तलनैल्यादिज्ञानस्यापि प्रामाण्यसङ्केतः कार्य इति भावः ।

**कं०रा०— तेषामपीति** । तलनैल्यादिज्ञानहेतूनामपि प्रामाण्यसङ्केतः करणीयोऽल्पकालानिवर्त्यभ्रान्तिहेतुत्वाविशेषादित्यर्थः । शङ्कते **ब्रह्मज्ञानेति** । आकाशे तलनैल्यज्ञानस्य छत्राकारत्वविज्ञानस्य चन्द्रप्रादेशिकत्वज्ञानस्य च ब्रह्मज्ञाननिवर्त्यविषयकत्वाभावान्न तेषां प्रामाण्यसङ्केतकरणप्रसक्तिरिति भावः ॥ **अस्यैवेति** । अल्पकालानिवर्त्यभ्रान्तिहेतुत्वस्यैवेत्यर्थः ॥ **अन्यथेति** । ब्रह्मज्ञाननिवर्त्यविषयत्वोक्त्याऽल्पकालानिवर्त्यभ्रान्तिहेतुत्वस्यैवेत्यर्थः ॥ **अन्यथेति** । ब्रह्मज्ञाननिवर्त्यविषयत्वोक्त्या अल्पकालानिवर्त्यभ्रान्तिहेतुत्वस्य प्रामाण्यसङ्केतकरणहेतुत्वेनाविवक्षितत्वे नाग इति शब्दाद्वर्णदैर्घ्यादिकं ज्ञात्वा गिरिं वा कुञ्जरं वा प्रतिपद्यमाना भ्रान्ता न खलु भवन्तीति वर्णदैर्घ्यादिज्ञानं प्रमाणत्वेन परः कथमुदाहरेत् । वर्णदैर्घ्यादिर्वर्णतत्त्वज्ञाननिवर्त्यत्वेन ज्ञानस्य ब्रह्मज्ञाननिवर्त्यविषयत्वाभावादित्यर्थः ।

**शे०चं०—** अन्यत्र सत एव नैल्यस्यारोपभ्रान्तिं निवारयति **तस्य नैल्यमिव नैल्यमिति** । मूले आपादकानुक्तेस्तत्प्रदर्शनपूर्वकमतिप्रसङ्गमुपदर्शयति **अल्पकालेति** । प्रसङ्गमूलभूतविशेषव्याप्तेर्दृष्टान्ताभावेनासम्भवेऽपि अविशेषलक्षणसामान्यव्याप्तेरविकलत्वान्न प्रसङ्गमूलशैथिल्यमित्याशयेन तामाह **अविशेषादिति** ॥

**अयमिति** । दीर्घभ्रान्तिहेतुः अतत्त्वावेदकं प्रमाणमिति सङ्केत इत्यर्थः ॥ **अस्यैवेति** । अल्पकालनिवर्त्यभ्रान्तिहेतुत्वस्यैवेत्यर्थः । परस्य तथा विवक्षायां ज्ञापकं बाधप्रदर्शनमुखेनाह **अन्यथेति** । सत्त्वाविशेषेऽपि चक्षुषा रूपज्ञानमेव न तु रसज्ञानमितिवत् । अतात्त्विकप्रमाणभावधूमबाष्पादिज्ञानात् तत्त्वप्रतिपत्तेरभावेऽपि सांव्यावहारिकेभ्योऽतात्त्विकप्रमाणभावेभ्यस्तत्त्वप्रतिपत्तिरविरुद्धा । तथा च वर्णे ह्रस्वत्वदीर्घत्वादयोऽन्यधर्मा अपि समारोपितास्तत्त्वप्रतिपत्तिहेतव इत्युक्त्वा तदुपपादनाय न खल्वित्यादि *भामत्यां* उक्तम् । तत्र वर्णदैर्घ्यादिज्ञानं तावदतत्त्वावेदकप्रमाणत्वेनाभिमतम् । तच्च न ब्रह्मज्ञाननिवर्त्यविषयकत्वाभिप्रायेण । तद्विषयस्य दैर्घ्यादेर्ब्रह्मज्ञानेतरनिवर्त्यत्वात् । नापि दैर्घ्यादिज्ञानजन्यभ्रान्तेस्तद्विषयस्य वा ब्रह्मज्ञाननिवर्त्यत्वाभिप्रायेण । तथा सति क्षणिकत्वादिभ्रान्तेस्तद्विषयक्षणिकत्वादेश्च ब्रह्मज्ञाननिवर्त्यत्वेन क्षणिकत्वज्ञानसाधनस्यापि अतत्त्वावेदकप्रमाणत्वापातात् । तस्मादल्पकालानिवर्त्यभ्रान्तिहेतुत्वेनैव तस्यातत्त्वावेदकप्रमाणत्वं ब्रह्मज्ञानस्य च प्रायशः कालान्तरभावित्वात् तदुपादानमित्येव वाच्यम् । अन्यथा तदुदाहरणमसङ्गतं स्यात् । ततश्चास्मदभिहितातिप्रसङ्गसिद्धिरिति भावः । अत्र टीकायां नग इति वा नाग इति वा शब्दात्कुञ्जरं गिरिं वा प्रतिपद्यमाना इति प्रायिकः पाठः। अत्र नाग इति वा शब्दात्कुञ्जरं नग इति शब्दाद्गिरिं वेति यथायोग्यमन्वयः । क्वचित्तु नाग इति वा नग इति वा शब्दात्कुञ्जरं गिरिं वेति भामतीपाठानुसार्यपि पाठः । तत्र यथाश्रुत एव सम्बन्धः ।

**स०व्र०— अस्यैवार्थस्येति** । अल्पकालनिवर्त्यमप्रमाणं बहुकालनिवर्त्यं प्रमाणमित्यस्यैवार्थस्येत्यर्थः । परस्य तथा विवक्षायां ज्ञापकं बाधकोपदर्शनमुखेन **अन्यथेति** । अत्र योग्यतया अन्वयः, न यथाक्रमम् । अयं भावः । यदि ब्रह्मज्ञाननिवर्त्यत्वमेव प्रामाण्यहेतुः, तदितरनिवर्त्यत्वं चाप्रामाण्यहेतुरिति परस्य विवक्षितत्वं स्यात् तदा परोक्तं वर्णदैर्घ्यादिज्ञानस्य प्रामाण्यं न स्यात् । तस्य ब्रह्मज्ञानेतरबाध्यत्वेन ब्रह्मज्ञानबाध्यत्वाभावात् । न च, तस्य प्रामाण्यं परस्य सम्मतमिति कथमवगतमिति वाच्यम् । तद्वाक्यादेव तदवगतम्। तदेतदाह **न खल्वित्यादि** । तथा च बहुकालनिवर्त्यत्वमेव प्रामाण्यहेतुरिति उक्तापादनमसङ्गतमिति भावः ।

* * *

**४३ सु०— किञ्चैवंविधं वेदप्रामाण्यं शून्यवादिनाऽप्यङ्गीकृतमेवेति कुतोऽयं विशेषः ।**

**परि०— एवंविधमिति** । अल्पकालानिवर्त्यभ्रान्तिहेतुकत्वरूपं वा शून्यज्ञानबाध्यविषयकत्वरूपं वेत्यर्थः ।

**कं०रा०— किञ्चैवंविधमिति** । ब्रह्मज्ञाननिवर्त्यविषयकत्वरूपं वेदप्रामाण्यं शून्यवादिनाऽप्यङ्गीकृतमेव । 'निर्विशेषत्वतो नैव विशेषो ब्रह्मशून्ययोरि'त्युक्तन्यायेन शून्यस्यैव ब्रह्मतया शून्यतत्त्वज्ञाननिवर्त्यस्य सर्वस्य वेदार्थस्य ब्रह्मज्ञाननिवर्त्यतायाः शून्यवादिमतेऽपि सत्त्वात् अतः कथमयं शून्यवादिनः सकाशान्मायावादिनो विशेष इत्यर्थः ।

**शे०चं०**— भाष्यकारीयमल्पकालानिवर्त्यभ्रान्तिहेतुत्वस्य प्रामाण्यप्रयोजकत्वेऽतिप्रसङ्गाभिधानं तस्य मतवैषम्यानापादकत्वाभिप्रायं चेत्यभिप्रेत्य स्वयं तस्य मतवैषम्यानापादकतामुपपादयति **किञ्चेति** ॥ **एवंविधमिति** । दीर्घभ्रान्तिहेतुत्वलक्षणमित्यर्थः ॥ **अङ्गीकृतमेवेति** । वेदविषयस्य शून्यभावनासाध्यशून्यसाक्षात्कारनिवर्त्यताया उक्तत्वादिति भावः ।

**॥ इति एतादृशाऽतत्त्वावेदकत्वस्य स्वसमयसङ्केतत्वे नभोनैल्यज्ञानस्य प्रामाण्यापत्तिः ॥**

* * *

**॥ अथ 'तत्त्वमस्या'दिमहावाक्यार्थभूतं निर्भेदत्वं शून्यस्यापि अङ्गीकृतम् ॥**

**४४ सु०— न सर्वस्यापि वेदस्य मायावादिनाऽतत्त्वावेदकत्वमुच्यते किं नाम विधिप्रतिषेधविषयस्य । अद्वितीयं तत्त्वं प्रतिपादयतस्तत्त्वमसीत्यादेर्महावाक्यस्य निर्विशेषं सच्चिदानन्दात्मकं तत्पदार्थं प्रतिपादयतो 'यत्तदद्रेश्यमग्राह्यं' 'सत्यं ज्ञानमि'त्यादेरवान्तरवाक्यस्य च तत्त्वावेदकत्वमङ्गीक्रियत एव, न चैवं शून्यवादिना; इत्यतः कथं साम्यमित्यतः शून्यवादिनाऽप्येवमेवाङ्गीक्रियते । तत्त्वावेदकत्वं हि न विषयविसंवादाभावातिरिक्तं किञ्चिदस्ति । वाक्यद्वयार्थस्य चाविसंवादः शून्यवादिनाऽप्यङ्गी(कृत)क्रियत एवेत्याशयवान् महावाक्यार्थाङ्गीकारं तावद्दर्शयति निर्भेदत्वं त्विति ।**

## अनु०— निर्भेदत्वं तु शून्यस्य तेनाप्यङ्गीकृतं सदा ।

**तेन शून्यवादिना अपि, सदा इत्यनेन स्वयमेव नास्मदापादनेनेति सूचयति ।**

**परि०**— शङ्कते **न सर्वस्यापीति** ॥ **विधीति** । यजेत स्वर्गकामः, ब्राह्मणो न हन्तव्यः, इत्यादिविधिप्रतिषेधविषयस्येत्यर्थः ।

**कं०रा०**— **अद्वितीयं तत्त्वं प्रतिपादयतस्तत्त्वमसीत्यादेरिति** । यद्यपि पूर्वतन्त्रे 'रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोती'त्यत्र इतरेतरयोगद्वन्द्वे पदद्वयमपि श्रुतिवृत्तं स्यात् तदा तु रथघोषाभ्यामिति द्विवचनं स्यात् । समाहाराश्रयणे तु द्वेऽपि पदे समाहारलक्षणार्थे स्याताम् । ततो वरं पूर्वपदमात्रं लक्षणावृत्तिमङ्गीकृत्य षष्ठीसमासाश्रयणमिति पदद्वयलक्षणाश्रयणस्य जघन्यत्वोक्तेः । तत्त्वम्पदयोर्लक्षणाश्रयणेन तत्त्वमसीत्यादेर्मायावाद्युक्तं शोधितचैतन्यैक्यपरत्वं न सम्भवति । किन्त्वेकपदामुख्यवृत्त्याश्रयणेन त्वं तन्नियम्योऽसीत्याद्यर्थपरत्वमेव न्याय्यम् । उक्तं चैतदेवाभिप्रेत्य आचार्यचरणैर्विष्णुतत्त्वनिर्णये । 'न च जीवब्रह्मणोरभेदे कश्चिदागम' इति ।

**अयमिति** । दीर्घभ्रान्तिहेतुः अतत्त्वावेदकं प्रमाणमिति सङ्केत इत्यर्थः ॥ **अस्यैवेति** । अल्पकालानिवर्त्यभ्रान्तिहेतुत्वस्यैवेत्यर्थः । परस्य तथा विवक्षायां ज्ञापकं बाधप्रदर्शनमुखेनाह **अन्यथेति** । सत्त्वाविशेषेऽपि चक्षुषा रूपज्ञानमेव न तु रसज्ञानमितिवत् । अतात्त्विकप्रमाणभावधूमबाष्पादिज्ञानात् तत्त्वप्रतिपत्तेरभावेऽपि सांव्यावहारिकेभ्योऽतात्त्विकप्रमाणभावेभ्यस्तत्त्वप्रतिपत्तिरविरुद्धा । तथा च वर्णे ह्रस्वत्वदीर्घत्वादयोऽन्यधर्मा अपि समारोपितास्तत्त्वप्रतिपत्तिहेतव इत्युक्त्वा तदुपपादनाय न खल्वित्यादि *भामत्यां* उक्तम् । तत्र वर्णदैर्घ्यादिज्ञानं तावदतत्त्वावेदकप्रमाणत्वेनाभिमतम् । तच्च न ब्रह्मज्ञाननिवर्त्यविषयकत्वाभिप्रायेण । तद्विषयस्य दैर्घ्यादेर्ब्रह्मज्ञानेतरनिवर्त्यत्वात् । नापि दैर्घ्यादिज्ञानजन्यभ्रान्तेस्तद्विषयस्य वा ब्रह्मज्ञाननिवर्त्यत्वाभिप्रायेण । तथा सति क्षणिकत्वादिभ्रान्तेस्तद्विषयक्षणिकत्वादेश्च ब्रह्मज्ञाननिवर्त्यत्वेन क्षणिकत्वज्ञानसाधनस्यापि अतत्त्वावेदकप्रमाणत्वापातात् । तस्मादल्पकालानिवर्त्यभ्रान्तिहेतुत्वेनैव तस्यातत्त्वावेदकप्रमाणत्वं ब्रह्मज्ञानस्य च प्रायशः कालान्तरभावित्वात् तदुपादानमित्येव वाच्यम् । अन्यथा तदुदाहरणमसङ्गतं स्यात् । ततश्चास्मदभिहितातिप्रसङ्गसिद्धिरिति भावः । अत्र टीकायां नग इति वा नाग इति वा शब्दात्कुञ्जरं गिरिं वा प्रतिपद्यमाना इति प्रायिकः पाठः। अत्र नाग इति वा शब्दात्कुञ्जरं नग इति शब्दाद्गिरिं वेति यथायोग्यमन्वयः । क्वचित्तु नाग इति वा नग इति वा शब्दात्कुञ्जरं गिरिं वेति भामतीपाठानुसार्यपि पाठः । तत्र यथाश्रुत एव सम्बन्धः ।

**स०व्र०— अस्यैवार्थस्येति** । अल्पकालनिवर्त्यमप्रमाणं बहुकालनिवर्त्यं प्रमाणमित्यस्यैवार्थस्येत्यर्थः । परस्य तथा विवक्षायां ज्ञापकं बाधकोपदर्शनमुखेन **अन्यथेति** । अत्र योग्यतया अन्वयः, न यथाक्रमम् । अयं भावः । यदि ब्रह्मज्ञाननिवर्त्यत्वमेव प्रामाण्यहेतुः, तदितरनिवर्त्यत्वं चाप्रामाण्यहेतुरिति परस्य विवक्षितत्वं स्यात् तदा परोक्तं वर्णदैर्घ्यादिज्ञानस्य प्रामाण्यं न स्यात् । तस्य ब्रह्मज्ञानेतरबाध्यत्वेन ब्रह्मज्ञानबाध्यत्वाभावात् । न च, तस्य प्रामाण्यं परस्य सम्मतमिति कथमवगतमिति वाच्यम् । तद्वाक्यादेव तदवगतम्। तदेतदाह **न खल्वित्यादि** । तथा च बहुकालनिवर्त्यत्वमेव प्रामाण्यहेतुरिति उक्तापादनमसङ्गतमिति भावः ।

* * *

**४३ सु०— किञ्चैवंविधं वेदप्रामाण्यं शून्यवादिनाऽप्यङ्गीकृतमेवेति कुतोऽयं विशेषः ।**

**परि०— एवंविधमिति** । अल्पकालानिवर्त्यभ्रान्तिहेतुकत्वरूपं वा शून्यज्ञानबाध्यविषयकत्वरूपं वेत्यर्थः ।

**कं०रा०— किञ्चैवंविधमिति** । ब्रह्मज्ञाननिवर्त्यविषयकत्वरूपं वेदप्रामाण्यं शून्यवादिनाऽप्यङ्गीकृतमेव । 'निर्विशेषत्वतो नैव विशेषो ब्रह्मशून्ययोरि'त्युक्तन्यायेन शून्यस्यैव ब्रह्मतया शून्यतत्त्वज्ञाननिवर्त्यस्य सर्वस्य वेदार्थस्य ब्रह्मज्ञाननिवर्त्यतायाः शून्यवादिमतेऽपि सत्त्वात् अतः कथमयं शून्यवादिनः सकाशान्मायावादिनो विशेष इत्यर्थः ।

**शे०चं०**— भाष्यकारीयमल्पकालानिवर्त्यभ्रान्तिहेतुत्वस्य प्रामाण्यप्रयोजकत्वेऽतिप्रसङ्गाभिधानं तस्य मतवैषम्यानापादकत्वाभिप्रायं चेत्यभिप्रेत्य स्वयं तस्य मतवैषम्यानापादकतामुपपादयति **किञ्चेति** ॥ **एवंविधमिति** । दीर्घभ्रान्तिहेतुत्वलक्षणमित्यर्थः ॥ **अङ्गीकृतमेवेति** । वेदविषयस्य शून्यभावनासाध्यशून्यसाक्षात्कारनिवर्त्यताया उक्तत्वादिति भावः ।

**॥ इति एतादृशाऽतत्त्वावेदकत्वस्य स्वसमयसङ्केतत्वे नभोनैल्यज्ञानस्य प्रामाण्यापत्तिः ॥**

* * *

**॥ अथ 'तत्त्वमस्या'दिमहावाक्यार्थभूतं निर्भेदत्वं शून्यस्यापि अङ्गीकृतम् ॥**

**४४ सु०— न सर्वस्यापि वेदस्य मायावादिनाऽतत्त्वावेदकत्वमुच्यते किं नाम विधिप्रतिषेधविषयस्य । अद्वितीयं तत्त्वं प्रतिपादयतस्तत्त्वमसीत्यादेर्महावाक्यस्य निर्विशेषं सच्चिदानन्दात्मकं तत्पदार्थं प्रतिपादयतो 'यत्तदद्रेश्यमग्राह्यं' 'सत्यं ज्ञानमि'त्यादेरवान्तरवाक्यस्य च तत्त्वावेदकत्वमङ्गीक्रियत एव, न चैवं शून्यवादिना; इत्यतः कथं साम्यमित्यतः शून्यवादिनाऽप्येवमेवाङ्गीक्रियते । तत्त्वावेदकत्वं हि न विषयविसंवादाभावातिरिक्तं किञ्चिदस्ति । वाक्यद्वयार्थस्य चाविसंवादः शून्यवादिनाऽप्यङ्गी(कृत)क्रियत एवेत्याशयवान् महावाक्यार्थाङ्गीकारं तावद्दर्शयति निर्भेदत्वं त्विति ।**

## अनु०— निर्भेदत्वं तु शून्यस्य तेनाप्यङ्गीकृतं सदा ।

**तेन शून्यवादिना अपि, सदा इत्यनेन स्वयमेव नास्मदापादनेनेति सूचयति ।**

**परि०**— शङ्कते **न सर्वस्यापीति** ॥ **विधीति** । यजेत स्वर्गकामः, ब्राह्मणो न हन्तव्यः, इत्यादिविधिप्रतिषेधविषयस्येत्यर्थः ।

**कं०रा०— अद्वितीयं तत्त्वं प्रतिपादयतस्तत्त्वमसीत्यादेरिति** । यद्यपि पूर्वतन्त्रे 'रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोती'त्यत्र इतरेतरयोगद्वन्द्वे पदद्वयमपि श्रुतिवृत्तं स्यात् तदा तु रथघोषाभ्यामिति द्विवचनं स्यात् । समाहाराश्रयणे तु द्वेऽपि पदे समाहारलक्षणार्थे स्याताम् । ततो वरं पूर्वपदमात्रं लक्षणावृत्तिमङ्गीकृत्य षष्ठीसमासाश्रयणमिति पदद्वयलक्षणाश्रयणस्य जघन्यत्वोक्तेः । तत्त्वम्पदयोर्लक्षणाश्रयणेन तत्त्वमसीत्यादेर्मायावाद्युक्तं शोधितचैतन्यैक्यपरत्वं न सम्भवति । किन्त्वेकपदामुख्यवृत्त्याश्रयणेन त्वं तन्नियम्योऽसीत्याद्यर्थपरत्वमेव न्याय्यम् । उक्तं चैतदेवाभिप्रेत्य आचार्यचरणैर्विष्णुतत्त्वनिर्णये । 'न च जीवब्रह्मणोरभेदे कश्चिदागम' इति ।

तथाऽपि तत्त्वमसीत्यादेः पूर्वतन्त्रन्यायविरुद्धमपि पदद्वयलक्षणैक्यपरत्वं मायावादिना अङ्गीकृतमिति तथाऽनूदितम् । न च वाच्यमुपक्रमादिना निर्विशेषे तात्पर्यस्य निश्चितत्वात् तत्त्वमसीत्यादौ पदद्वयलक्षणाकल्पनं युक्तमिति । सदेवेत्याद्युपक्रमस्थसदादिशब्दैः सत्त्वादिविशिष्टस्यैव प्रतीतेरुपक्रमादिना सविशेष एव तात्पर्यस्य निश्चितत्वात् । न च उपक्रमादिविशेषे तात्पर्यग्राहकमुपक्रमाद्यन्तरमस्ति । न च वाच्यं विनिगमकाभावात् पदद्वयलक्षणेति । असिपदान्वयार्थं तत्पद एव लक्षणायाः कल्प्यत्वात् ।

**वं०प०— अविसंवादः** शून्यवादिनाऽपीति । अविसंवादिविज्ञानं प्रमाणमिति सौगता इति वचनादिति भावः ॥ **सत्त्वेतीति** । तथा च तत्त्वस्य सत्त्वादिधर्माणां विशेषाणामभाव उभयोः सम्मत इत्यनेन निर्विशेषत्वाङ्गीकारः प्रदर्शित इति द्रष्टव्यम् ।

**शे०चं०—** पुनर्वैषम्यं शङ्कते **न सर्वस्यापीति** ।

**स०व्र०—** शून्यवादिना निर्विशेषत्वाभिप्रायेणैव शून्यमित्युच्यते न त्वसत्त्वाभिप्रायेणेत्येतत् कुत इत्यत आह **तत्त्वमिति** ।

**॥ इति 'तत्त्वमस्या'दिमहावाक्यार्थभूतं निर्भेदत्वं शून्यस्यापि अङ्गीकृतम् ॥**

* * *

**॥ अथ अवान्तरवाक्यार्थभूतस्य 'निर्विशेषत्व'स्यापि अङ्गीकारः ॥**

**४५ सु०— अवान्तरवाक्यार्थाङ्गीकारोऽपि द्वयोः समान इति दर्शयन् निर्विशेषत्वं तावत् उभयसम्मतमित्याह सत्त्वेति ।**

## अनु०— सत्त्वासत्त्वादिधर्माणामभाव उभयोर्मतः ।

**'तत्त्वस्ये'ति शेषः । उभयोर्मायावादिशून्यवादिनोर्मतः सम्मतः । सत्यत्वमपि शून्यवादिना अङ्गीक्रियत इत्याशयेन शून्यं नाम असत्तस्य सत्त्वं कथमित्यत आह न हीति ।**

## न हि सत्प्रतियोगित्वं शून्यत्वं तेन चेष्यते ।

**सत्प्रतियोगित्वं सद्विरोधित्वमसत्त्वम् । तेन च शून्यवादिनाऽपि । निर्विशेषत्वाभिप्रायेण शून्यमित्युच्यते नासत्त्वाभिप्रायेण । तत्त्वमित्यङ्गीकारादिति भावः । आनन्द-**

ताऽपि शून्यवादिना अभ्युपगम्यत इति वक्तुं मायावाद्यभ्युपगतानन्दतां तावदनुवदति **न चेति** ।

**न च दुःखविरोधित्वादन्या ह्यानन्दतेष्यते ।**
**मायिना**

दुःखविरोधित्वमेवानन्दत्वं न तु धर्मरूपं किमपीत्यर्थः । **हि**शब्देनानृतजडविरोधीत्यादितत्प्रसिद्धिं सूचयति । ततः किमित्यत आह **शून्येति** ।

**शून्यपक्षेऽपि**

'तत्समानमि'ति शेषः । 'जाड्यसंवृतिदुःखान्तपूर्वदोषविरोधि यदि'त्यादितद्वचनात् । ज्ञानत्वाङ्गीकारं दर्शयति **ज्ञानमिति** ।

**ज्ञानं जाड्यविरोधि च ।**

**ज्ञानं च जाड्यविरोधि**स्वरूपमेवोच्यते मायिना । तच्छून्यवादिनोऽपि समानमित्यर्थः ।

**परि०— निर्विशेषत्वमिति** । निर्विशेषमवान्तरवाक्यार्थ इत्युक्तेरिति भावः । मूले असत्त्वपदेनाभावप्रतियोगित्वग्रह इति भावः ॥ **इत्यादितत्प्रसिद्धिमिति** । 'अनृतजडविरोधिरूपमन्तत्रयमलबन्धनदुःखताविरुद्धम् । अतिनिकटमविक्रियं मुरारेः परमपदं प्रणयादभीष्टवीमी'ति भाष्यकारीयमुरारिशतकगतश्लोकोऽयम् । शून्यपक्षेऽपि कुतस्तत्सममित्यतः स्वयं हेतुमाह **जाड्येति** ।

**वं०प०— सत्यत्वमपीति** । निर्विशेषत्वाङ्गीकारवत् सत्वानन्दत्वज्ञानत्वाङ्गीकारोऽप्युभयोः सम्मत इति वक्तुमादौ तत्त्वस्य सत्त्वं शून्यवादिनाऽङ्गीक्रियत इत्याशयेन शून्यं नामासत्तस्य कथं सत्त्वं शून्यवादिनाऽङ्गीक्रियत इत्याशङ्कां परिहर्तुमाहेत्यर्थः । सद्विरोधित्वमत्यन्तासत्त्वम् ।

**कं०रा०—** ननु सत्यादिवाक्यार्थस्य सद्रूपस्य ब्रह्मणि मायावादिनाऽङ्गीकृतत्वात् । शून्यवादिना तु शून्ये तस्यानङ्गीकृतत्वे वैषम्यात् कथं साम्योक्तिरित्यत आह **सत्यत्वमपीति** । सद्रूपत्वमपि शून्यवादिना

शून्यस्याङ्गीक्रियत इत्याशयेन साम्योक्तिरित्यर्थः । उक्तवाक्यं शङ्कोत्तरत्वेनावतारयन् शङ्कामुत्थापयति **शून्यं नामेति** । सद्विरोधित्वं सदन्यत्वमसत्त्वाभिप्रायेण शून्यमिति कुतो नोच्यत इत्यत आह **तत्त्वमिति** । शून्यं तत्त्वमित्यङ्गीकारादित्यर्थः । 'अनृतजडविरोधिरूपमन्तत्रयमलबन्धनदुःखताविरुद्धमि'ति मायावादिवचनप्रसिद्ध-मित्यर्थः ।

**शे०चं०**— नासत्त्वाभिप्रायेणेति प्रतिज्ञाया हेतुमाह **तत्त्वमितीति** ।

* * *

**४६ सु०— स्यादेतत् । मायावादिना ब्रह्मणो निर्विशेषत्वादिकमङ्गीक्रियते शून्यवादिना तु शून्यस्य । तत्कथं साम्यमित्यतो मैवम् । ब्रह्मशून्ययोर्भेदाभावस्योक्तत्वादित्याह धर्मा इति ।**

**अनु०— धर्माः केऽपि न सन्त्येव को विशेषस्ततस्तयोः ।**

**ततः** व्यावर्तकाभावात् **तयोः** ब्रह्मशून्ययोः **को विशेषः** किंकृतो भेदः स्यात् ।

**परि०— तत** इत्यनुवादः । **व्यावर्तकाभावादिति** व्याख्या ।

**शे०चं०**— निर्विशेषत्वप्रतिपादनपरपूर्वग्रन्थेन धर्माः केऽपीत्याद्युत्तरग्रन्थस्य पौनरुक्त्यमाशङ्क्य परिहरति **स्यादेतदिति** ।

**॥ इति अवान्तरवाक्यार्थभूतस्य 'निर्विशेषत्व'स्यापि अङ्गीकारः ॥**

* * *

**॥ अथ अद्वैततत्त्वं न सूत्रकारस्य अभिमतम् ॥**

**४६अ सु०— ननूक्तविधमद्वैततत्त्वं सूत्रकारस्य सिद्धान्त एव । तत्कथं दूषणाय तदनु-वादः क्रियत इत्यत आह एतादृशानामिति ।**

**अनु०— एतादृशानां पक्षाणां दूषणं प्रभुणा कृतम् ।**
**स्वपक्षसाधनेनैव**

शून्यपक्षसदृशपक्षाणाम् । कथम् । तद्विरुद्धस्य स्वपक्षस्य साधनेनैवार्थात् । एतदुक्तं भवति । नाद्वैतं सूत्रकारस्य सिद्धान्तः । तेन तस्य दूषितत्वात् । पृथगुपदेशादित्यादिना तद्विरुद्धार्थस्य साधितत्वात् । न हि तस्य दुष्टतामननुसन्दधत्तद्विरुद्धं साधयतीति सम्भवतीति ।

न केवलमर्थाद्दूषणं कृतं किन्तु 'नाभाव उपलब्धेरि'त्याद्युक्तितोऽपीत्याह **नाभाव इति** ।

**नाभाव इति चोक्तितः ।**

**परि०**— कः स्वपक्षः कुत्र तत्साधनं तावता कथं दूषणमित्यत आह **एतदुक्तं भवतीति** ॥ **पृथगुपदेशादित्यादिनेति** । 'अत एव चोपमे'त्यादिः **आदिपदार्थः** ॥ **तस्येति** । अद्वैतस्येत्यर्थः ॥ **नाभाव इतीति** । प्रपञ्चोऽभावो न, अध्यस्तो न, सत्त्वेन प्रतीयमानत्वादिति समयपादीयसूत्रार्थः ।

**शे०चं०**— **सिद्धान्त एवेति** । प्रामाणिकत्वादनिराकृतत्वाच्चेति भावः ।

**॥ इति अद्वैततत्त्वं न सूत्रकारस्य अभिमतम् ॥**

* * *

**॥ अथ आत्मविनाशस्य मोक्षत्वस्वीकारे मोक्षस्य अपुमर्थत्वप्रसङ्गः ॥**

४७ **सु०**— एवं सप्रभेदं शून्यवाद्यभिमतं मोक्षमनूद्य साधारणदोषेण तावद् दूषयन् यः शून्यवादिना 'प्रदीपस्येव निर्वाणं विमोक्षस्तस्य तायिन (भाविन)' इत्यात्मविनाशो मोक्ष उक्तः, तं दूषयति **आत्मेति** ।

**अनु०— आत्माऽभावे पुमर्थः कः**

मोक्ष इति वक्ष्यमाणं सिंहावलोकनन्यायेनेहा(नेनेहा)पि सम्बध्यते । **आत्मनोऽभावे** विनाशे सति मोक्षः **कः** किंसम्बन्धी **पुमर्थः** । एतदुक्तं भवति । आत्मविनाशलक्षणो मोक्षः किमात्मनः फलम्, उत अनात्मनः । नाद्यः । तस्याभावात् । न हि फलिनोऽभावे

**फलमुपपद्यते । धर्मादिषु तथा दर्शनात् । न द्वितीयः । आत्मनाशेऽनात्मनोऽप्यभावात् । भावेऽप्यपुरुषार्थत्वप्रसङ्गात् । अनात्मनस्तेनोपकाराभावाच्चेति ।**

**नन्वात्मन एवायम् । धर्मादिवदभ्युदयत्वाभावादसमानकालताऽप्युपपद्यत इत्यत आह आत्मेति । मोक्षः कः पुमर्थः पुमर्थो न भवेदित्यर्थः ।**

**तत्र हेतुमाह इष्टस्येति ।**

**इष्टस्यात्माऽवधिर्यतः ।**

**इष्टोत्कर्षपरम्परायाः पर्यन्तो यतः सर्वमात्मार्थतयेष्टम् । आत्मा त्वनन्यार्थतया । इष्टमात्रस्य वित्तादेर्विनाशं पुरुषो नार्थयते, किमुतेष्टतमस्यात्मनः ।**

**परि०— सप्रभेदमिति** । एकजीवबहुजीवप्रभेदसहितम् ॥ **साधारणदोषेणेति** । एकजीव-(वाद)बहुजीव(वाद)साधारणेत्यर्थः ॥ **प्रदीपस्येवेति** । प्रदीपस्य यथा निर्वाणशब्दितो निःशेष-विनाशः तथा भाविनः शून्यमहमस्मीति ध्यायतः सविलाससंवृतिनाशरूपनिःशेषनाशे तदवच्छिन्न-पुद्गलशब्दिताहमर्थरूपजीवस्यापि विनाश इत्यर्थः । अनात्मसम्बन्धित्वेनापि सम्भवात् कथमाक्षेप इत्यत आह **एतदुक्तमिति** । फलिनः फलभोक्तुरित्यर्थः ॥ **अनात्मनोऽपीति** । तदीयशून्यभावना-तिशयेन मूलकारणसंवृतेः स्वकार्येण सह विनाशादिति भावः ॥ **अपुरुषार्थत्वेति** । पुंसम्बन्धिन एव पुरुषार्थत्वादपुरुषसम्बन्धी कथं पुरुषार्थः स्यादित्यर्थः ॥ **अयमिति** । मोक्ष इत्यर्थः । अवधिपद-स्यार्थः **पर्यन्त** इति ।

**गु०दी०— नन्वात्मन एवायमित्यत्र** अयं आत्मविनाशलक्षणो मोक्षः आत्मन एव पुरुषार्थः । आत्मनः नाशेऽनिष्टस्यापि नाशादिति भावः । धर्मः धर्मसाध्यस्वर्गश्चात्मसमानकालीन एव दृष्टः । अयं त्वात्मा समानकालीनः कथमात्मनः पुरुषार्थ इत्यत आह **धर्मादिवदिति** । अभ्युदयत्वं नाम तेनैवानुभूयमानफलत्वम् ।

**यादु०— प्रदीपस्येवेति** । यथा प्रदीपस्य तैलाद्यपगमे स्वयमेव **निर्वाणं** विनाशः तथा **भाविनो** वस्तुतः शून्यमहमस्मीति ध्यायिनः तस्याधिकारिणः शून्यसाक्षात्कारेण मूलसंवृत्यपगमे कर्तृत्वभोक्तृत्वशक्ति-महदहङ्काररूपोपाधिनिर्वाणं मोक्ष इत्यर्थः । अहङ्कारोपाधिनाश एवात्मविनाशशब्देन तदभिप्रेतः । अत एव प्रागुप-लक्षणनिवृत्तये भावनाद्युपयोग इत्युक्तम् । अत्र विमोक्षस्तस्य तायिन इति पाठश्चिन्त्यः । समयपादे भाविन इति पठितत्वात् । तत्र तायिन इति पाठस्यासङ्गतत्वात् । भाविन इति पाठस्य तु नित्योपासापरोक्षितमित्यनु-

व्याख्यानोक्तेः सम्मतित्वसम्भवेन सङ्गतत्वादिति ध्येयम् । एतेन पूर्वमनुवादसमये आत्मविनाशस्य मोक्षताया अनुक्तत्वात् कथमिदानीं निराकरणमिति शङ्काऽपि निरस्ता । नानासंवृतिवर्जितमित्यत्र संवृतिकार्यत्वात् संवृतिसंज्ञकैरहङ्कारादिभिर्वर्जितमित्यहङ्काराप्रविलयस्योक्तत्वात् । **फलिन इति** । फलभोक्तुरित्यर्थः ॥ **अनात्मनोऽपीति** । भावनाप्रकर्षादिना मूलसंवृतौ ध्वस्तायामहङ्काररूपस्यात्मनो विलये तत्कार्यप्रवाहरूपस्यानात्मनोऽपि विलीनत्वादिति भावः । अभ्युपेत्याह **भावेऽपीति** । पुरुषैरर्थ्यत्वमेव पुरुषार्थत्वम् । तदभावश्च द्वेधा कर्तुः पुरुषत्वाभावेन च कर्मणोऽर्थ्यत्वाभावेन चेति । तत्राद्यं प्रकारमभिप्रेत्याह **अपुरुषार्थत्वेति** । कर्तृत्वेनाभिमतस्यानात्मनः पुरुषत्वाभावादित्याशयः । द्वितीयं प्रकारमुपपादयति **अनात्मनस्तेनेति** । आत्मनाशेनेत्यर्थः । तथा च कर्मताभिमतस्यात्मनाशस्यार्थत्वं न सम्भवतीति भावः ॥ **अभ्युदयत्वाभावादिति** । कर्मसाध्यफलत्वमभ्युदयत्वं तदभावादित्यर्थः । तथा च आत्मविनाशो न आत्मनः फलं आत्मासमानकालीनत्वात् व्यतिरेकेण धर्मादिवदिति पूर्वमभिप्रेतेऽनुमाने अभ्युदयत्वमुपाधिः हेतोरन्यथासिद्धिश्चेति भावः ।

**कं०रा०— तस्य भाविन इति** । तायिन इति पाठे च अर्थवर्णनं समयपादेऽस्माभिः कृतमनुसन्धेयम् ॥ **धर्मादिष्विति** । धर्मार्थकामेष्वित्यर्थः ॥ **न त्वात्मन एवायमिति** । फलमिति वर्तते । नन्वात्मसमानकालस्यात्मविनाशलक्षणमोक्षस्यात्मीयफलत्वं कथमित्यत आह **धर्मादिवदिति** । अभ्युदयरूपाणां धर्मार्थकामानां फलसमानकालत्वावश्यम्भावेऽपि मोक्षस्याभ्युदयरूपत्वाभावादात्मसमानकालतोपपद्यत इत्यर्थः ।

**शे०चं०—** 'प्रदीपस्येव निर्वाणं विमोक्षस्तस्य तायिन' इत्येव मूलपाठः । तायिनो विस्तारिणो बोधसन्तानस्य निर्वाणं निवृत्तिः स एव मोक्ष इत्यर्थः । नन्वनेन कथमात्मनाशस्य मोक्षत्वप्राप्तिरिति चेत् । परमते ज्ञानस्यैवात्मत्वेन तन्नाशस्यैवात्मनाशत्वात् । अत्र च 'न किञ्चिन्मुक्त्यवस्थायामात्मात्मीयमथाऽपि वे'त्यत्रत्यमात्मेति ज्ञानमुच्यत इति व्याख्यानम् । तथा समयपादस्थ 'अरूपज्ञानसन्ततिमि'त्यनुव्याख्यानस्य 'सन्तन्यमानं ज्ञानमेव चात्मे'ति व्याख्यानं च ज्ञापकम् । बद्धस्यात्मनो बन्धेन सह नाश एव मोक्ष इति *मकरन्दो*क्तमोक्षलक्षणसंवादितयैतद्वाक्योदाहरणेनोक्तप्रकारस्यैव निर्णीतत्वाच्चेति ध्येयम् । नन्वात्मविनाशलक्षणो मोक्षोऽनात्मन एव फलं भविष्यतीति कथमयमाक्षेप इत्यत आह **एतदुक्तं भवतीति** ॥ **तस्याभावादिति** । अनेनात्मनाशो नात्मनः फलं आत्मासमानकालीनत्वात् व्यतिरेकेण धर्मादिवदित्यनुमानमुक्तं भवति । अप्रयोजकत्वमाशङ्क्य परिहरति **नहीति** । फलभोक्तुरित्यर्थः । कथमस्य गमकत्वमित्यतः तथा व्याप्तेरित्याह **धर्मादिष्विति** ॥ **आत्मनाश इति** । कार्यमात्रं प्रत्यदृष्टस्य कारणत्वेन तस्य च आत्मधर्मत्वेन धर्मिभूतात्मनाशे तद्धर्मभूतादृष्टस्यापि नाशावश्यम्भावेनासत्यदृष्टे तज्जन्यानात्मन उत्पत्तेरेवासम्भवेन अनात्मनोऽप्यभावादित्यर्थः । अनादिनित्यानात्मनोऽपि सत्त्वात् स एव फली स्यादित्यत आह **भावेऽपीति** । अनात्मन इति शेषः । पुरुषैरर्थ्यत्वमेव पुरुषार्थत्वम् । तदभावश्च द्वेधा सम्भवति । कर्तुः पुरुषत्वाभावेन कर्मणोऽर्थ्यत्वाभावेन चेति । तत्राद्यं प्रकारमभिप्रेत्याह **अपुरुषार्थत्वेति** । कर्तृत्वेनाभिमतस्यानात्मनः पुरुषत्वाभावादित्याशयः । द्वितीयं प्रकारमभिप्रेत्याह **अनात्मन इति** ॥ **तेन** आत्मनाशेनेत्यर्थः । तथा च कर्मतयाऽभिमतस्यात्मनाशस्यार्थ्यत्वं न सम्भवतीति भावः । ननु

फलिनोऽभावे कथं फलं, धर्मादिषु तथाऽदर्शनादित्यत आह **धर्मादिवदिति** ॥ **अभ्युदयत्वेति** । कर्मसाध्यफलत्वमभ्युदयत्वं तदभावादित्यर्थः । ततश्चानेन पूर्वमभिप्रेते आत्मनाशपक्षकेऽनुमाने व्यतिरेकेऽभ्युदयत्वमुपाधिः हेतोरन्यथासिद्धिश्चेत्युक्तं भवति । नन्विष्टोत्कर्षपरम्परापर्यन्तत्वे आत्मनः सिद्धे भवेदात्मनाशस्यापुमर्थत्वं तस्येष्टोत्कर्षपरम्परापर्यन्तत्वमेव कुतः सिद्धमित्यत आह **सर्वमिति** । नन्वात्मन इष्टत्वमात्रकथनेन तथा तन्नाशस्यापुमर्थत्वसिद्धिसम्भवाद् भाष्यकारीयमिष्टोत्कर्षपरम्परापर्यन्तत्वधावनमनर्थकमित्यतो नेदं तन्नाशस्यापुमर्थत्वव्युत्पादनार्थं येनेष्टत्वमात्रोक्त्याऽपि तत्सिद्धेस्तदानर्थक्यं स्यात् । किं नाम कैमुत्यद्योतनार्थमेवेति भावेन तदुपदर्शयति **इष्टमात्रस्येति** ।

**वा०र०**— मोक्षवादीयन्यायमकरन्दे उदाहृतस्य वाक्यव्याख्यानं चित्सुखेन कृतं तदनुसारेण व्याचष्टे **तायिनो विस्तारिण इत्यादि** । एतत्पाठमुपादायैव परग्रन्थेषु व्याख्यानसद्भावे समयपादीयैतन्मतोपन्यासस्थले लेखकागतभाविन इत्येतत्पाठावलम्बनेन इति पाठकल्पितत्वाभिधानमन्यथाख्यातिकारीयमपरामर्शमूलकमित्यादि *वाक्यार्थविनोदे* द्रष्टव्यमित्याशयेन अत्र तन्निराकरणाभावः । एवं पूर्वत्र नग इति वा नाग इति वा पदात्कुञ्जरं गिरिं वेति पाठस्य कल्पितत्वं तत्रोक्तमपि विनोदे तत्रैव निराकृतमिति नात्र निराकृतम् । एवं तत्र तत्रेत्यादि प्रागेवोक्तम् । एवमेतद्ग्रन्थस्थं ज्ञापकमभिधायोत्तराधारभावेन निरन्तरोत्पादक्लेशादिदूषितबोधसन्ततिविच्छेदलक्षण इति मोक्षस्वरूपं *न्यायमकरन्दे* माध्यमिकापरनामकशून्यवाद्यभिमतमुक्तम् । चित्सुखेन च तद्व्याख्याय पश्चाद्बद्धस्यात्मनो वधेन सह नाश एव मोक्ष इति तात्पर्यार्थो वर्णितस्तदपि ज्ञापकतयाह **बद्धस्यात्मन इति** । **धर्मादिषु तथादर्शनादिति** । फलिनोऽभावे फलत्वंस्य दर्शनादित्यर्थः । **व्यतिरेक इति** । यदात्मकत्वं तदात्मसमानकालमिति व्यतिरेकप्राप्तौ अभ्युदयत्वमुपाधिः तस्य यत्रात्मसमानकालता तत्राभ्युदयत्वमिति व्याप्तेः धर्मादौ सत्त्वेन व्यापकव्याप्यत्वात् । यत्र च आत्मफलता तत्र अभ्युदयत्वमिति पुनर्व्याप्तिः । आत्मनाशे सत्यप्यात्मफलत्वे कर्मसाध्यत्वरूपाभ्युदयत्वाभावेन व्याप्यव्यापकत्वादित्यर्थः । **अन्यथासिद्धिश्चेति** । आत्मासमानकालीनत्वेनाभ्युदयत्वानुपपत्तावपि फलत्वमात्रमुपपद्यत एवेति भावः । **परम्परापर्यन्तत्व इति** । परम्पराया आत्मपर्यन्त इति सिद्ध्यर्थ इत्यर्थः ।

**स०व्र०**— 'प्रदीपस्येव निर्वाणं विमोक्षस्तस्य तायिन' इत्येव कारिकामूलपाठः । अस्यार्थः । तायिनः तत्ताध्यवसायसंरक्षणक्षमसम्प्रदायप्रवर्तकस्येत्यर्थः । 'नमामि धर्मविज्ञानवैराग्यैश्वर्यशालिने । निधये वाग्विशुद्धीनामक्षयादायतायिने' इति न्यायवाचस्पतिग्रन्थस्थकारिकागततायिन इतिपदं तात्पर्यपरिशुद्धावुदयनेनैवमेव व्याख्यातम् । तनोतीति तायी विस्तारी । तनुविस्तार इति धातोः । तस्य तायिनः विस्तारिणः, तस्यावबोधसन्तानस्य प्रदीपस्येव निवृत्तिर्मोक्ष इति । नन्वनेनात्मनाशस्य कथं मोक्षत्वावगमः । ज्ञाननाशस्यैव तथात्वावगमात् । तत्कथमात्मनाशस्य मोक्षत्वे एतद्वाक्योदाहरणमिति चेत्, न । परेणात्मशब्देन ज्ञानस्यैव विवक्षितत्वात् । तथा च आत्मनाशो नाम ज्ञाननाश एवेति युक्तं तस्य मोक्षत्वे एतद्वाक्योदाहरणम् । अत्र 'न किञ्चिन्मुक्त्यवस्थाया-

मात्मात्मीयमथापि वे'त्यत्र आत्मा ज्ञानमिति व्याख्यानम् । तथा समयपादस्थस्य 'अरूपज्ञानसन्ततिमि'त्यनुव्याख्यानस्य सन्तन्यमानं ज्ञानमेवात्मेति व्याख्यानं च ज्ञापकं द्रष्टव्यमिति गुरुचरणाः ॥ **तस्याभावादिति** । अनेनात्मनाशो नात्मफलं फलीभूतात्मशून्यत्वादिति अनुमानमुक्तं भवति । फलिनोऽभावेऽपि फलं किं न स्यात्। तथा च अप्रयोजको हेतुरित्यत आह **न हीति** । कथमस्य गमकत्वमित्यतः तथा व्याप्तेरित्याह **धर्मादिष्विति** ॥ **आत्मनाश इति** । कार्यमात्रं प्रत्यदृष्टस्य कारणत्वेन तस्य च स्वात्मधर्मत्वेन धर्मिभूतात्मनाशेन तद्धर्मभूतादृष्टस्यापि नाशे अनात्मन उत्पत्तेरेवासम्भवादित्यर्थः । अनादिनित्य एवानात्मा फली किं न स्यादित्यत आह **भावेऽपीति** । अनात्मभावेऽपीत्यर्थः । पुरुषकृत्युत्पाद्यस्यैव पुरुषार्थत्वात् अनात्मनश्च कृत्यसम्भवादिति भावः ॥ **अनात्मन इति** । तस्याचेतनत्वेन सुखानुभवरूपोपकारासम्भवादिति भावः । ननु फलिनोऽभावे कथं फलं धर्मादिषु तथा दर्शनादित्यत आह **धर्मादिवदिति** । अभ्युदयस्यैव समानकालीनत्वनियम इति भावः ।

* * *

**४८ सु०— यद्वाऽऽत्माभावे सति मोक्षः कः पुमर्थः किमिष्टावाप्तिरूपोऽथानिष्टनिवृत्तिरूप इत्यर्थः । नाद्यः । तत्र हेतुः इष्टस्येति । सर्वस्याप्यात्मेतरस्येष्टस्यात्माऽवधिराश्रयो यतः । आत्मार्थं हि सर्वमिष्टम् । स चेन्न स्यात् तदा कस्यायं पुरुषार्थः स्यादित्यर्थः । न द्वितीयः । तत्र हेतुः इष्टस्येति । अनिष्टनिवृत्तिरपि पुरुषार्थो भवन्ती तदा स्याद्यदीष्टं न विहन्यात् । तद्विघातेऽपि वा यदि महतोऽनिष्टस्य विघातिनी स्यात् । तथा लोके दर्शनात् । न हि कश्चिन्महदिष्टं विनाश्य अल्पानिष्टनिवृत्तिं कुर्वाणः प्रेक्षावानुपलभ्यते । आत्मा च सर्वतोऽपीष्टतमः । तद्विघातेन भवन्त्यनिष्टनिवृत्तिः कथं पुरुषार्थो भवेत् । रोगादिपीडिता उद्बन्धनादिना आत्मविनाशं कुर्वन्तो दृश्यन्त इति चेन्न । रोगाद्यायतनदेहपरित्यागेनात्मानं निर्दुःखीकर्तुमेव तेषां प्रवृत्तेः । निर्दुःखो भूयासमिति हि सर्वस्याशीः । न तु न भूयासमिति । देहात्मविवेकज्ञानविधुरास्त्वात्मनाशायैव प्रयतन्त इति चेन्न । तेषामप्रेक्षावत्त्वेनात्रानुदाहार्यत्वात् । उपपादितं चैतत् । यत्पशवोऽपि देहात्मविवेकज्ञानवन्त इति ।**

**परि०— आश्रय इति** । उपकार्य इत्यर्थः । ननु 'त्यजेदेकं कुलस्यार्थे' इत्यादेः महानिष्टनिवृत्तयेऽल्पत्यागो दृष्ट इत्यत आह **तद्विघातेऽपि वेति** । शङ्कते **रोगादीति** । देहात्मभेदज्ञानहीना एव न सन्त्यतोऽपि ते नात्रोदाहरणमित्याह **उपपादितं चेति** । 'जातमात्रा मृगा गावो हस्तिनः पक्षिणो झषाः' इत्यादिना भक्तिपादे उपपादितमित्यर्थः ।

**यादु०— आश्रय इति** । भोक्तेत्यर्थः ॥ **आत्मार्थमिति** । आत्मभोगार्थमित्यर्थः ॥ **उद्बन्धनेति** । ऊर्ध्वं गलं बद्ध्वेत्यर्थः । आदिपदेन विषपानादिसङ्ग्रहः ॥ **उपपादितमिति** । 'जातमात्रा मृगा गावः पक्षिणो हस्तिनो झषा' इत्यादाविति शेषः ।

**कं०रा०— उपपादितं चैतदिति** । पशवोऽपि देहात्मविवेकज्ञानवन्त इति यत्तदेतत् 'कथं च भेदो देहादेरात्मनो न प्रतीयते । जातमात्रा मृगा गावो हस्तिनः पक्षिणो झषाः । भयाभयस्वभावादौ कारणानि विजानते', 'अस्मृतौ पूर्वदेहस्य विज्ञानं तत्कथं भवेत् । अन्वयव्यतिरेकादेरनुसन्धानविस्मृतौ', 'परदेहान्तरं ज्ञानं देहैक्यावसतिः कुत' इत्यादिनोपपादितं च । अतो देहात्मविवेकज्ञानविधुरा इत्येतदयुक्तमिति भावः ।

**शे०चं०—** आत्मनाशस्य पुरुषार्थत्वसामान्याक्षेपपरतया वाक्यं व्याख्याय तद्विशेषाक्षेपपरतयाऽपि वाक्यं व्याचष्टे **यद्वेति** ॥ **आश्रयेति** । भोक्तेत्यर्थः ॥ **आत्मार्थं हीति** । आत्मनो भोगार्थमित्यर्थः । ननु मोक्षस्यानिष्टनिवृत्तिरूपपुरुषार्थत्वाभावे इष्टस्य आत्मावधिः यत इत्यस्य कथं हेतुत्वमित्यतः अनेन आत्मनः सर्वतोऽपीष्टतमत्वोक्त्या मोक्षस्येष्टतमात्मविघातकत्वसूचनेनानिष्टनिवृत्तेः पुरुषार्थतायां प्रयोजकस्य इष्टविघातकत्वस्य तद्विघाते वा महतोऽनिष्टस्य विघातकत्वस्य वा भावप्रतिपादनाद्युक्तमस्य तत्र हेतुत्वमित्यभिप्रेत्य तस्य तत्र प्रयोजकत्वं विपक्षे बाधकोपदर्शनेनोपपादयन्नाह **अनिष्टनिवृत्तिरपीति** ॥ **उद्बन्धनादिनेति** । ऊर्ध्वं गलबन्धनमुद्बन्धनम् । आदिपदेन विषपानादिपरिग्रहः । नन्वात्मानं निर्दुःखीकर्तुमेव तेषां प्रवृत्तेर्नात्मनाशायेत्येतत्कुतो, वैपरीत्यस्यापि वक्तुं शक्यत्वादित्यत आह **निर्दुःखो भूयासमिति हीति** । अन्यथा न भूयासमित्येव आशा स्यादिति भावः । अभ्युपेत्य चेदमुदितम् । वस्तुतस्तु देहात्मविवेकज्ञानविधुरा एव न सन्ति येषामात्मनाशायैव प्रवृत्तिरुद्भाव्येतेत्याह **उपपादितं चेति** । तृतीयस्य द्वितीये 'जातमात्रा मृगा गाव' इत्यादिनेति शेषः ।

**वा०र०—** अनिष्टस्य विघातकस्येति व्यधिकरणषष्ठ्यौ । **शब्दार्थ ऊर्ध्वमिति** ।

**स०व्र०— उपपादितं चैतदिति** । तृतीयस्य द्वितीये 'जातमात्रा मृगा गावः' इत्यादिनेति शेषः ।

**॥ इति आत्मविनाशस्य मोक्षत्वस्वीकारे मोक्षस्य अपुमर्थत्वप्रसङ्गः ॥**

* * *

**॥ अथ मोक्षस्य आत्मावधित्वाभावे घटशून्यत्वस्यापि मोक्षत्वप्रसङ्गः ॥**

४९ **सु०— ननु दुःखात्यन्तनिवृत्तिस्तावदवश्यमेष्टव्या । सा च कारणनिवृत्त्यैव भवति नान्यथा । कारणं च दुःखस्यात्मैव । अधर्मार्जनादाधारत्वाच्च । तत्कथमात्मनाशेन शून्यभावापत्तिर्नेष्यत इति चेत् । मैवम् । न ह्यात्मैव दुःखकारणम् । किन्तु जागर एव**

भावात्सुप्तावभावादन्वयव्यतिरेकाभ्यां शरीरेन्द्रियविषयवेदनादिकमपि । ततो ज्ञानभोगाभ्यां कर्मणि क्षीणे निर्बीजस्य देहादेरनुत्पादे सामग्रीवैकल्येन दुःखानुत्पादस्य सम्भवात् किमात्मनाशकल्पनया । कुतो विनिगमनमिति चेत् । सर्वस्याप्यात्मार्थत्वात् । आत्मनश्चात्यन्ताभ्यर्हितत्वादिति ब्रूमः । विप्रकृष्टव्ययेन हि साध्यासिद्धौ सन्निकृष्टव्ययं प्रेक्षावन्तः कुर्वन्ति । तस्मात् 'आत्मार्थे पृथिवीं त्यजेदि'ति न्यायेन दुःखं जिहासताऽऽत्मावधिकस्यैव कारणस्य मोक्ष एष्टव्यो न त्वात्मनोऽपीति युक्तमुत्पश्यामः । तदेतत्सूचयन्विपक्षे बाधकमाह **यदीति** ।

### अनु०— यदि नात्मावधिर्मोक्षो मोक्षः स्याद्घटशून्यता ।

यद्यस्मदभिमतप्रकारेण **आत्मावधिर्मोक्षो** न भवेत् । आत्मव्यतिरिक्तानां दुःखकारणानां देहादीनामेव निवृत्तिः आत्मनस्तु स्वरूपेणावस्थानमिति पक्षो यदि **न** स्यादित्यर्थः । आत्मनोऽपि **शून्यतापत्तिर्यदि** स्यादिति यावत् । तदा **घटशून्यताऽपि** देवदत्तस्य मोक्षः स्यात् । तथा च साधनानुष्ठानवैयर्थ्यम् । घटशून्यतायाः पारिव्राज्यादिकारणानपेक्षत्वात् ।

**परि०— वेदनादिकमिति** । वेदनं ज्ञानं, **आदि**पदेन शरीराद्यभिमानः कण्टकवेधादिश्च ग्राह्यः ॥ **कर्मणीति** । अप्रारब्धप्रारब्धरूपे । **कुतो विनिगमनमिति** । मदुक्तभवदुक्तयोः आत्मानात्मनाशयोरिति योज्यम् । नियामकान्तरमाह **विप्रकृष्टेति** । एवं च देहादिव्ययेन दुःखनिवृत्तिरूपसाध्यासिद्धौ सत्यां खल्वात्मव्यय एष्टव्यः । देहादिव्ययेन दुःखनिवृत्त्यसिद्धिर्नेत्युपपादितमित्यात्मव्ययः तदर्थं नेष्टव्य इति भावः ॥ **आत्मार्थ इति** । 'त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे' इति पूर्वशेषो **भारते** ॥ **आत्मावधिकस्यैव कारणस्येति** । आत्मपर्यन्तविद्यमानं यद्दुःखकारणमनात्मरूपं तस्य मोक्षो विनाश इत्यर्थः । अस्मदभिमतेत्युक्तं व्यनक्ति **आत्मव्यतिरिक्तानामिति** ॥ **शून्यतेति** । देहेन्द्रियाहङ्काराद्यपगमे शून्यतापत्तेरेव प्राप्तेरेवं पर्यवसानमिति भावः ॥ **घटशून्यतेति** । घटनाशे घटस्य शून्यभावोऽस्तीति घटरूपशून्यतेत्यर्थः ।

**गु०दी०— घटशून्यताऽपि देवदत्तस्य मोक्षः** स्यादित्यत्र देवदत्तहितत्वाभावस्योभयत्रापि साम्यादिति भावः । किञ्चानिष्टनिवृत्तिरप्यनुभूयमानैव पुरुषार्थः स्यात् । न तूर्ष्णीं सुप्तपादपङ्कप्रक्षालनस्य पुरुषार्थत्वादर्शनात् । अननुभूयाप्यात्मशून्यता पुरुषार्थश्चेत् घटशून्यताऽपि पुरुषार्थः स्यादिति भावः ।

**यादु०— कारणस्येति** । दुःखकारणस्येत्यर्थः ॥ **आत्मनोऽपि शून्यतापत्तिरिति** । देवदत्तस्याहमिति प्रतीयमानरूपापगमे शून्यभावापत्तिरित्यर्थः । एवं घटशून्यतेत्यत्रापि घटशून्यभावापत्तिरित्यर्थः ।

**वं०प०— आधारत्वात्** अधर्माधिकरणत्वादित्यर्थः ॥ **न ह्यात्मैवेति** । येन कारणीभूतस्यात्मनो नाशोऽपेक्षितः स्यादिति भावः । जागरे शरीराद्यभिमानसद्भावदशायामित्यर्थः । सुप्तौ शरीराद्यभिमानाभावदशायामिति यावदित्यर्थः ॥ **विनिगमनमिति** । देहेन्द्रियादिरूपसामग्रीवैकल्येनैव दुःखानुत्पादो नात्मनाशेनेत्यर्थः ॥ **अत्यन्तेति** । तथा च न तन्नाशेन दुःखहानिरेष्टव्येत्यर्थः । **विप्रकृष्टं** बहिष्ठं धनादि । **सन्निकृष्टं** अन्तर्निक्षिप्तं धनादि । एवमत्रापि विप्रकृष्टं देहादिकम् । साध्यं दुःखहानिः । सन्निकृष्टः आत्मा ।

**कं०रा०— कारणं च दुःखस्यात्मैवेति** । तथा च दुःखात्यन्तनिवृत्तिमिच्छता दुःखकारणस्यात्मनो निवृत्तिरन्वेष्टव्येति भावः । न केवलं दुःखकारणत्वादात्मनस्तन्नाशस्येष्टव्यत्वं किन्तु दुःखहेत्वधर्मार्जनाधारत्वाच्च आत्मनस्तन्निवृत्तेरेष्टव्यत्वमित्याह **जागर एव भावात्सुप्तावभावादिति** । दुःखस्येति शेषः । **विषयवेदना** विषयानुभवः ॥ **आत्मावधिकस्यैवेति** । आत्माश्रयस्य देहादिरूपकारणस्यैव नाश एष्टव्यो न त्वात्मनोऽपीत्यर्थः । यद्वा इष्टोत्कर्षपरम्परायामात्मनोऽवधित्वाद्देहादेरात्मावधिकत्वमुक्तमिति द्रष्टव्यम् ॥ **पारिव्राज्यादीति** । संन्यासादिरूपकारणानपेक्षत्वादित्यर्थः ।

**शे०चं०— दुःखात्यन्तनिवृत्तिरिति** । अन्यथा संसारसमानधर्मत्वेन मुक्तेरपुमर्थत्वापातादिति भावः । अस्तु तर्हि मुक्तौ दुःखस्यात्यन्तिकी निवृत्तिरपि किं तावतेत्यत आह **सा चेति** । तर्हि भवतु मुक्तौ कारणनिवृत्तिरपि किं तावताऽपीत्यत आह **कारणं चेति** । कथमात्मन एव दुःखकारणत्वमित्यतो दुःखासाधारणकारणाधर्मसम्पादकत्वात् तत्स्वामित्वाच्चेत्याह **अधर्मेति** ॥ **कुत इति** । शरीरादिनाशेनेवात्मनाशेनापि दुःखानुत्पादसम्भवेऽपि नात्मनाशेन दुःखानुत्पादः किन्तु देहादिनाशेनैवेत्यवधारणे, न देहादिनाशेन दुःखानुत्पादः किन्तु आत्मनाशेनैवेति विपरीतावधारणमपि स्याद्विनिगमकाभावादिति भावः ॥ **आत्मावधिकस्यैवेति** । आत्मव्यतिरिक्तस्येत्यर्थः । **कारणस्येति** । दुःखकारणस्य देहादेरित्यर्थः ॥ **आत्मनोऽपीति** । अहमिति प्रतीयमानस्वरूपनाश इत्यर्थः । इष्टापत्तिमाशङ्क्याह **तथा चेति** । वैयर्थ्यमुपपादयति **घटशून्यताया इति** ।

* * *

५० **सु०— ननु कुतोऽयं प्रसङ्गोऽविशेषादिति चेन्न । आत्मशून्यता घटशून्यतेति भवद्भिरेव विशेषस्योक्तत्वादित्यत आह कल्पितत्वादिति ।**

## अनु०— कल्पितत्वाद्विशेषाणां

**न खलु अत्र शून्यताशब्देन अभावोऽभिधीयते । 'भावार्थप्रतियोगित्वं भावत्वं वा न तत्त्वतः । यस्ये'त्यभिधानात् किन्तु (वि)नष्ट आत्मा घटश्च । तौ च अप्रामाणिकौ ।**

न च तथाविधयोर्विशेषाः प्रामाणिकाः सम्भवन्ति । न हि तुरगशृङ्गं शशशृङ्गं च व्यावर्तकधर्मवती इति सम्भवतः । तस्मादात्मशून्यता घटशून्यतेति व्यवहर्तृभिः केवलं व्यवहारार्थं विशेषाः कल्पिता इत्यङ्गीकार्यम् । तथा च नाविशेषोऽसिद्ध इति ।

दूषणातिदेशार्थं प्राक् तत्साम्यमुपपादितम् । अतः शून्यवादिनां दूषणं मायावादिनामतिदिशति **मायिनोऽपीति** ।

**मायिनोऽपि समं हि तत् ।**

**तदित्यात्मभाव इत्यादिनोक्तं समस्तं परामृशति ।**

**परि०— भावार्थेति** । 'विश्वाकारं च संवृत्या यस्य तत्पदमक्षयमि'ति चतुर्थपादस्थयस्येत्यस्यान्वयेन अनुवादो न तत्त्वतो यस्येति ॥ **घटश्चेति** । नष्ट इत्यन्वयः ॥ **ताविति** । आत्मघटौ ।

**यादु०— अविशेषादिति** । परस्परव्यावर्तकधर्मरूपविशेषवत्त्वाभावादित्यर्थः ॥ **अभावोऽभिधीयत इति** । येनात्मघटप्रतियोगिकत्वादयो धर्माः तत्र कल्पिता न स्युरिति शेषः ॥ **विनष्ट इति** । विनाशोपलक्षित इत्यर्थः । विनाशकालीनमात्मस्वरूपं घटस्वरूपं चेति यावत् । ततश्चायमभिप्रायः । नात्र शून्यशब्देन विनाशरूपोऽभावो गृहीतुं शक्यः । तस्याभावत्त्वादिधर्मार्पितस्य निर्विशेषशून्यरूपत्वासम्भवात् । किं त्वहमिति परमप्रेमास्पदतया प्रतीयमानात्मविनाशोपलक्षितं यन्निर्विशेषात्मस्वरूपं तदेव ग्राह्यम् । नानासंवृतिवर्जितत्वाद्युपलक्षितं निर्विशेषं शून्यमेव मोक्ष इति प्रागुक्तत्वात् । अन्यथाऽनुक्तोपालम्भप्रसङ्गात् । ततश्च यदि देवदत्तस्यात्मविनाशोपलक्षिता निर्विशेषात्मरूपशून्यता मोक्षः तर्हि घटविनाशकालीननिर्विशेषघटरूपशून्यताऽपि मोक्षः स्यात् । न घटविनाशकालीनं निर्विशेषघटरूपं शून्यमप्रामाणिकम् अहमिति प्रतीयमानात्मनाशकालीननिर्विशेषमात्मस्वरूपमस्तीत्यत्रापि प्रमाणाभावात् । अप्रामाणिकयोः अत एव व्यावर्तकधर्मशून्ययोः तयोः समानत्वादिति । एवमग्रेऽप्यात्मशून्यताघटशून्यताशब्दानां विनाशकालीनात्मघटरूपतापरत्वमेवाभिप्रेतमिति मन्तव्यम् ।

**वं०प०—** कुत इत्यत आह **भावार्थेति** । भावार्थः प्रतियोगी यस्य तस्य भावः तत्त्वम् । तथा च भावार्थप्रतियोगित्वमभावत्वमित्यर्थः ॥ **नष्ट आत्मा घटश्चेति** । नाशसमानकालीन आत्मा नाशसमानकालीनो घटश्चेत्यर्थः ॥ **अप्रामाणिकाविति** । ध्वंससमानकालीनप्रतियोगिनोऽप्रामाणिकत्वादित्यर्थः ।

**कं०रा०— भावार्थेति** । भावार्थप्रतियोगिकत्वरूपमभावत्वं भावत्वं यस्य शून्यस्य तत्त्वतो नेति शून्यवादिवचनादित्यर्थः ॥ **तदित्यात्मभाव इत्यादिनेति** । 'आत्माभावे पुमर्थः क इष्टस्यात्मावधिर्यतः । यदि नात्मावधिर्मोक्षो मोक्षस्याद्भुतशून्यता', 'कल्पितत्वाद्विशेषाणामि'त्युक्तं समस्तं तदित्यनेन परामृशतीत्यर्थः । नापि शून्यतापत्तिरिति मायावादिनोच्यत इति सम्बन्धः ।

**शे०चं०— कुतोऽयमिति** । यद्यात्मनाशो मोक्षः स्यात् तर्हि घटनाशोऽपि मोक्षः स्यादित्यतिप्रसङ्ग-मूलभूतायामापाद्यापादकव्याप्तौ दृष्टान्ताभावेन मूलशैथिल्यात् प्रसङ्गाभासोऽयमिति भावः । विशेषव्याप्त्यसम्भवेऽप्यविशेषलक्षणसामान्यव्याप्तेरविकलत्वान्न प्रसङ्गाभासत्वमिति शङ्कते **अविशेषादिति** ॥ **विशेषस्योक्तत्वादिति** । अन्यथा धर्मार्थकतल्प्रत्ययवैयर्थ्यादिति भावः ॥ **नष्ट आत्मेत्यादि** । नाशविशिष्ट आत्मा नाशविशिष्टो घटश्चेत्यर्थः ॥ **तौ चेति** । विशेष्याश्रितद्रव्यान्तरस्यैव विशिष्टतया नष्टशब्दार्थत्वात् । प्रकृते च आत्मघटयोर्नाशदशायां तयोरसत्त्वेन तदाश्रितविशिष्टयोरप्यसत्त्वाद्विशिष्टद्वयस्याप्रामाणिकत्वमिति भावः ।

**वा०र०—** तल्प्रत्ययोऽपि हि व्यवहारार्थमेवोपादीयत इत्युत्तरमूलं मनसि निधायाऽऽह **अन्यथा धर्मार्थकतल्प्रत्ययेति** ।

**॥ इति मोक्षस्य आत्मावधित्वाभावे घटशून्यत्वस्यापि मोक्षत्वप्रसङ्गः ॥**

* * *

**॥ अथ मायिनां मोक्षोऽपि आत्मविनाशरूप एव ॥**

५१ **सु०—** स्यादेतत् । नात्मनाशो मायावादिनोच्यते । येनेष्टनाशादपुरुषार्थत्वं मोक्षस्य स्यात् । नापि शून्यताऽऽपत्तिः । यतो घटशून्यताऽपि मुक्तिर्भवेत् । किं नाम जीवभावापगमेन ब्रह्मभावाविर्भावः । ब्रह्म च परमानन्दात्मकमिति भवत्येव तद्भावः पुरुषार्थ इति ।

मैवम् । कोऽयं जीवभावो नाम कश्च ब्रह्मभावः । यद्यविद्याकामकर्मादिबद्धत्वं जीवत्वं परमानन्दभोक्तृत्वं च ब्रह्मत्वमित्यभिधीयते तदाऽनुज्ञया वर्तामहे । न चैवं परस्य पन्थाः । यदेतत्कर्तृत्वभोक्तृत्वशक्त्युपेतं साकारं देहादिव्यतिरिक्तं रूपमहमिति साक्षिसिद्धं तदपगमस्य परेणेष्टत्वात् । इदमेव च रूपं परमेष्टमनुभूयत इति कथं नोक्तदोषः । आनन्दरूपतोपपादनाय परेणाप्यस्यैव रूपस्य परमप्रेमास्पदतया उपपादितत्वात् । न ह्येतस्माद्रूपाद्विविक्तं किमपि निराकारं रूपमनुसन्धाय मा न भूयं भूयासमिति लोक आशास्ते । चक्षुषी निमील्य तथेति वदतस्तु कः प्रतिमल्लः । संवलितरूपे तदप्यस्तीत्यत इयमाशीरिति चासत् । तस्य सर्वथाऽप्यबुद्धिस्थत्वात् । आशासनं च साकारमेव । निराकारस्य तदनुपपत्तेः । न चान्यस्यान्यस्मिन्निरुपाधिकः प्रेमा सम्भवतीतीदमेवेष्टतमम् । एवं तर्हि देहादिसहितत्वस्यापीष्टत्वात् तन्नाशेन भवतामपि मोक्षस्य अपुरुषार्थत्वं स्यादिति चेन्न । परमेष्टलाभहेतोरल्पेष्टनाशस्यापि पुरुषार्थत्वेन लोके दृष्टत्वात् ।

ब्रह्मभावश्च न शून्यभावाद्भिद्यत इत्युपपादितम् । आनन्दरूपता च वाङ्मात्रमित्युक्तमेव ।

किञ्च आनन्दत्वमपि न पुरुषार्थः । न हि कश्चिदानन्दो भूयासमित्याशास्ते । किन्तु तमनुभूयासमिति । न च अनुभाव्यत्वं परेणेष्यते । अनुभवितुरन्यस्याभावात् । स्वस्मिन्कर्मकर्तृभावानभ्युपगमात् ।

अपि चानन्दत्वं प्राक् सिद्धमिति न पुरुषेणार्थनीयम् । प्रागविद्यावृतं न प्रकाशते पश्चादविद्यावरणापगमे प्रकाशतेऽतो नैवमिति चेन्न । प्रागपि स्वरूपस्य स्वयंप्रकाशमानताऽभ्युपगमात् । तन्मात्रस्य च आनन्दस्याप्रकाशानुपपत्तेः । प्रकाशमानोऽप्यानन्दो न विशदः प्रकाशत इति चेन्न । निर्विशेषत्वात् । वैशद्यावैशद्ययोश्च विशेषनिबन्धनत्वात् । यद्धि सह विशेषैः प्रकाशते तद्विशदमुच्यते । यत्तु साधारणधर्मैः सह तदविशदमिति । अविद्यावरणापगमे प्रकाशत इति च कोऽर्थः । किं प्रतीयत इति उत प्रत्येतीति । नोभावपि । अनङ्गीकारात् । प्रदीपः प्रकाश इति कोऽर्थ इति चेत् । भास्वररूपवान् वर्तत इति न किञ्चिदेतत् । तदिदं सूचितं हिशब्देन ।

परि०— **अस्यैव रूपस्येति** । अहमित्येवंरूपस्येत्यर्थः ॥ **उपपादितत्वादिति** ॥ 'मा न भूयं भूयासमि'त्यादिना अहं मा भूयं सत्ताहीनवान् न भवामीति व्यतिरेकनिरासः । भूयासं सर्वदा सत्तावान् स्यामिति अहमर्थस्य लौकिकानामसत्त्वनिवृत्तिपूर्वं सत्त्वाशंसनोपदर्शनेन उपपादितत्वात् परेणेत्यर्थः । **तदप्यस्तीति** । निर्विकारं वस्त्वित्यर्थः । अहमर्थस्यैवेष्टत्वं व्यनक्ति **आशासनं चेति**। आशासनकर्तृ चेत्यर्थः । नन्वाशंसनकर्ताऽहमर्थः प्रेमास्पदनिराकारार्थमेवाशास्त इत्यस्त्वित्यत आह **न चान्यस्येति** ॥ **लोक इति** । तृणधान्यरूपमहाफलहेतोरल्पवित्तव्ययस्येष्टत्वरूपदर्शनादिति भावः। नापि शून्यताऽऽपत्तिरित्यादिना यत्स्वमते पुमर्थत्वोपपादनं पूर्वत्र कृतं तन्निराह **ब्रह्मभावश्चेति** ॥ **उपपादितमिति** । 'निर्विशेषत्ववाचैव शून्यं ब्रह्मेति नो भिदे'त्यादिग्रन्थेन ब्रह्मशून्ययोर्भेदाभावोपपादनेति भावः ॥ **उक्तमेवेति** । 'सच्चित्सुखादिकं चे'त्यादिग्रन्थेन । तथा 'न च दुःखविरोधित्वादन्या ह्यानन्दते'त्यादिना चेति भावः । **तमनुभूयासं** आनन्दानुभववान् स्यामित्यर्थः । निर्विशेषत्वे कुतो वैशद्याद्ययोग इत्यत आह **यद्धीति** । कर्मत्वं वा कर्तृत्वं वाऽभिप्रेतमिति भावेन विकल्प्य निराह **अविद्यावरणेति** ॥ **नोभावपीति** । अनुभवितुरन्यस्येत्युक्तदिशा कर्मत्वस्य स्वस्मिन्नित्यादिनोक्त-

रीत्या कर्तृत्वस्यायोगेन सकलकारकशक्तिविधुरताऽयोगेन वाऽनङ्गीकारादित्यर्थः । शङ्कते **प्रदीप इति** । तत्रैकस्यैव कर्तृत्वकर्मत्वविरोधात् परप्रकाश्यत्वाभावमात्रेण प्रकाशत इत्युक्तिः तथा अत्रापीति भावः ॥ **भास्वररूपेति** । परप्रकाशं रूपं भास्वररूपं तद्वानित्यर्थः ॥ **तदिदमिति** । किञ्चानन्दत्वमपीत्यादिना एतत्पर्यन्तमुक्तं प्रमेयमित्यर्थः ।

**गु०दी०— अस्यैव रूपस्य परमप्रेमास्पदताया उपपादित्वादि**त्यत्र कर्तृत्वभोक्तृत्वाधारतया अहंतया च प्रतीयमानरूपस्य परमप्रेमास्पदतया निरुपाधिप्रेमास्पदताया इति यावत् । **उपपादितत्वात्** निरुपाधिप्रेमास्पदं हि सुखमित्युच्यते । अहमात्मा च तादृशः । अतस्तस्यैव सुखरूपतेति भावेनोपपादितत्वादित्यर्थः । **मा नाम भूवं भूयास**मित्यत्र पूर्वं निराकारतादशायां अनेन साकाररूपेण मा भूवं नामेति प्रसिद्धिः । उपरि मोक्षकाले मा नाम भूयासम् । अतः मध्ये भवदिदं रूपं नश्यत्विति लोकः न खलु आशास्त इति योजना । **संवलितात्मरूप** इत्यत्र संवलिते निर्गुणसंवलनात्मके रूपे तन्निर्गुणरूपमप्यस्तीति कृत्वा **इयमाशी**ः भूयासमित्याशीः न तु मा नाम भूयासमित्याशीर्विरह इत्यर्थः ।

**यादु०— तदाऽनुज्ञयेति** । अस्मन्मतेऽपि जीवस्याविद्याद्यपगमे परमानन्दभोक्तृत्वाङ्गीकारादिति भावः । **उपपादितत्वादिति** । स्वग्रन्थेऽहं मा न भूवं अपि तु भूयासमित्यनुभवेनेति शेषः । ननु न विशिष्टाकारस्याहमर्थस्य परमप्रेमास्पदत्वं मयाऽनेनानुभवेनोपपादितं किन्तु तदतिरिक्तं निराकारं यद्रूपं तस्यैवेत्यत आह **न ह्येतस्मादिति** ॥ **तदप्यस्तीति** । निराकारं रूपमप्यस्तीत्यर्थः । साकारमेवात्राशास्यं न तु निराकारमित्येतत्प्रकारान्तरेणोपपादयति **आशासनं चेत्यादिना** । **आशासनं** आशासनकर्तृ । अन्यस्याशासनकर्तुः साकारस्यान्यस्मिन्निराकारे । **इदमेव** आशासनकर्त्रेवेत्यर्थः । ननु मन्मतेऽपि परमेष्टपरमानन्दरूपब्रह्मभावलाभेनाल्पेष्टरूपात्मनाशः पुरुषार्थः स्यादेवेत्यत आह **ब्रह्मभावश्चेति** । शून्यभावश्च न पुरुषार्थ इति भावः । एतेन परोक्तमोक्षस्वरूपे ब्रह्मभावाविर्भाव इत्यंशो दूषित इति ज्ञातव्यम् । ननु ब्रह्मण आनन्दरूपत्वाद्भवति तद्भावः पुरुषार्थ इत्यत आह **आनन्दरूपता चेति** ॥ **न चानुभाव्यत्वमिति** । आनन्दस्येति शेषः ॥ **अनङ्गीकारादिति** । अनभ्युपगमात् । कर्तृत्वकर्मत्वयोर्निर्विकारे निर्विशेषे चानङ्गीकारादित्यर्थः ॥ **प्रदीप इति** । तत्र यथा पराप्रकाश्यत्वं प्रकाशत इत्यस्यार्थः । तथा प्रकृतेऽपीति शङ्कितुराशयः ॥ **भास्वररूपवानिति** । अन्यथा शशविषाणादावपि पराप्रकाश्यत्वसद्भावेन प्रकाशत इति प्रतीतिप्रसङ्ग इति भावः ।

**वं०प०— अनुज्ञयेति** । जीवस्य ब्रह्मत्वं नाम अविद्याकामकर्मादिबद्धस्य परमानन्दभोक्तृत्वमित्युक्तं स्यात् । तच्चास्माकमिष्टमेव । अविद्यापगमानन्तरं जीवस्य तथाभावाङ्गीकारादिति भावः ॥ **मा न भूवमिति** । अहं निराकाररूपं मा भूवमिति न । मम निराकाररूपत्वं मास्त्विति नेति यावत् । किन्तु भूयासं निराकाररूपमेव भूयासमिति लोको न ह्याशास्त इत्यर्थः । **चक्षुषी निमील्येत्यादि** । तूष्णीं तथा वदत इत्यर्थः । **प्रतिमल्लः** प्रतिवादी । यद्वा इदानीमहमिति परमप्रेमास्पदतयाऽनूभूयमानं यद्रूपं तन्मा भुवं एतद्रूपं त्यक्ष्ये इति न । किन्तु

भूयासमित्थमेव सर्वदा भूयासमित्येवाशास्त इति प्रसिद्धम् । निराकाररूपमनुसन्धायेत्थमाशास्त इति न हीत्यर्थः । **संवलितरूप इति** । परमप्रेमास्पदतया आशास्यमानेऽहमिति चिदचित्संवलिते रूपे निराकारं रूपमप्यस्त्येवेत्यर्थः । अतो निराकाररूपं भूयासमित्याशीर्युक्तेति भावः । **तस्य** निराकाररूपस्य ॥ **अन्यस्येति** । यदा मा न भूवं भूयासमित्याशासनकर्तृ साकारं तस्य निराकाररूपभवने कथमाशासा स्यात् । कुत इति चेत् । अन्यस्यान्यस्मिन्निरुपाधिकप्रेमोत्पत्तेरसम्भवादित्यर्थः ॥ **स हि तस्यापीति** । आत्मन इत्यर्थः । **तन्नाशेन** देहेन्द्रियादिनाशेन । **परमेष्टं** अप्राकृतस्वरूपानन्दाविर्भावः । **अल्पेष्टं** प्राकृतदेहादि ॥ **उक्तमेवेति** । 'न च दुःखविरोधित्वादन्या ह्यानन्दतेष्यत' इत्युक्तमित्यर्थः ॥ **अनुभूयासमिति** । आनन्दानुभववान् भूयासमित्यर्थः । द्रविणवत्त्वे हि पारिव्रढ्यं न तु द्रविणत्व इतिवदिति भावः । नन्वानन्दानुभव एव पुरुषार्थ इत्येवोच्यत इति चेत् तत्राह **न चेति** । आनन्दस्यानुभवविषयत्वमित्यर्थः । **प्रतीयते** प्रतीतिविषयो भवति । **प्रत्येति** प्रतीतिमान् भवति ।

**कं०रा०— अनुज्ञयैव वर्तामह इति** । अस्मन्मते मुक्तावविद्याकामकर्मादिबद्धत्वापगमेन जीवस्य स्वयोग्यपरमानन्दभोक्तृत्वाविर्भावस्य सत्त्वादिति भावः ॥ **आनन्दरूपतेति** । जीव आनन्दरूपः परमप्रेमास्पदत्वात् सुखवदिति परेणाप्यस्यैवाहम्प्रत्ययविषयसाकाररूपस्यानन्दरूपत्वसाधनाय परमप्रेमास्पदत्वस्य 'मा न भूवं भूयासमि'ति इच्छानुभवबलेनोपपादितत्वात् तदेव रूपं परमेष्टमनुभूयत इत्यर्थः । अनुभवसिद्धं मा न भुवं भूयासमित्याशासनमहम्प्रत्ययविषयसाकाररूपाद्विविक्तं किमपि निराकाररूपमनुसन्धायाहं मा भूवमिति न किन्तु भूयासमिवेति लोके आशास्ते येन निराकाररूपस्यैव परमप्रेमास्पदत्वं स्यादित्यर्थः ॥ **कः प्रतिमल्ल इति** । कः प्रतिवादीत्यर्थः ॥ **संवलितरूप इति** । अहमित्यत्र भासमाने चिदचित्संवलने निराकारं रूपमस्तीत्यतो मा न भूवं भूयासमित्याशीरिति च अयुक्तं निराकाररूपस्य सर्वथाऽप्यबुद्धिस्थत्वेनोक्ताशासनस्य तद्विषयत्वायोगादित्यर्थः ॥ **आशासनं चेति** ॥ मा न भूवं भूयासमिति इच्छा च साकारस्येव निराकारस्य तदनुपपत्तेः । न च अन्यस्य साकारस्य अहम्प्रत्ययविषयस्य अस्मिन्निराकारे निरुपाधिकः प्रेमा सम्भवतीति साकारूपस्यैव तादृशप्रेमविषयत्वात् तदेवेष्टतममित्यङ्गीकार्यम् । तस्य च मोक्षे मायावादिना नाशस्य च अङ्गीकृतत्वात् मोक्षस्य अपुरुषार्थत्वं कथं न स्यादिति भावः । आशासनं च साकारमेवेति पाठे आशासनं च साकारसम्बन्ध्येवेति संसारित्वेन मूलप्रत्ययं बहुलग्रहणात् कर्तरि ल्युट्प्रत्ययं वाऽऽश्रित्य आशासनकर्तृ च साकारमेवेति वाऽर्थोऽनुसन्धेयः । रामानुजभाष्ये 'विज्ञानं यज्ञं तनुत' इत्यत्र विज्ञानशब्दस्य ज्ञातृवाचित्वसिद्ध्यर्थं 'कृत्यल्युटो बहुलमि'ति वा कर्तरि ल्युडाश्रिते संसारित्वं वाऽऽश्रित्य नन्दिग्रहीत्यादिना कर्तरि ल्युडित्युक्तत्वात् अत्रापि तदाश्रयणं युक्तम् ॥ **ब्रह्मभावश्चेति** । 'निर्विशेषत्ववाचैव शून्यं ब्रह्मेति नोऽभिदे'ति ब्रह्मणः शून्याभिन्नत्वस्योपपादितत्वात् ब्रह्मभावश्च शून्यभावान्न भिद्यत इत्युपपादितप्रायम् । तथा च मुक्तौ ब्रह्मभावाविर्भावं वदता मायावादिना शून्यतापत्तेरुक्तत्वात् । नापि शून्यतापत्तिर्मायावादिनोच्यत इत्येतदयुक्तमिति भावः । ब्रह्म च परमानन्दात्मकमिति भवत्येव तद्भावः पुरुषार्थ इति यदुक्तं तदप्ययुक्तमित्याशयेनाह **आनन्दरूपता चेति** । ब्रह्मण इति शेषः ।

आनन्दस्य प्राक् सिद्धत्वेऽपि प्रकाशमानत्वविशिष्टानन्दस्य वा आनन्दप्रकाशस्य वा प्रागसिद्धत्वेन पुरुषेणार्थनीयतया पुरुषार्थत्वं युक्तमित्याशयेन शङ्कते **प्रागविद्ययेति** । प्रकाशाभिन्नस्यानन्दस्य प्रतीयत इत्यनेनोक्तस्य प्रकाशकर्मत्वस्य प्रत्येतीत्यनेनोक्तस्य प्रकाशकर्तृत्वस्य चानङ्गीकारादित्यर्थः ।

**शे०चं०— अनुज्ञयेति** । अस्माभिरप्यविद्याकामकर्मादिबद्धत्वरूपजीवभावापगमेन परमानन्दभोक्तृत्वरूपब्रह्मभावाभ्युपगमादिति भावः ॥ **इदमेव चेति** । कर्तृत्वभोक्तृत्वशक्त्युपेतमेवेत्यर्थः ॥ **उक्तदोष इति** । इष्टनाशादपुरुषार्थत्वप्रसङ्गलक्षण इत्यर्थः । न केवलमस्य रूपस्य परमेष्टत्वमनुभूयत इत्येव किं नाम परेणाप्युपपादितमित्याह **आनन्दरूपतोपपादनायेति** । ब्रह्मण इति शेषः । 'परमप्रेमास्पदतया मा न भूवमहं सदा । भूयासमिति यो द्रष्टा सोऽहमित्यवधारये'ति *शाङ्करीयायां वाक्यवृत्तौ* इति शेषः । ननु न विशिष्टाकारस्याहमर्थस्य परमप्रेमास्पदत्वमनेनानुभवेन मयोपपादितं किं त्वेतद्व्यतिरिक्तनिराकारस्यैवेति नेष्टनाशप्रसङ्गः । परमप्रेमास्पदतयेष्टस्य निराकारस्यानाशात् । नष्टस्य च विशिष्टाकारस्याप्रेमास्पदत्वादित्यत आह **न हीति** । मा न भूवं भूयासमित्येव मूलपाठः । 'परप्रेमास्पदतया मा न भूवमहं सदा । भूयासमिति यो द्रष्टा सोऽहमित्यवधारये'ति शाङ्करीयवाक्यवृत्त्यनुसारात् । मा भूवमिति न भूयासं = मदभाववान्न भूयासमित्यर्थः ॥ **लोक इति** । कृमिकीटादिसाधारण्येन प्राणभृन्मात्रमित्यर्थः ॥ **तदप्यस्तीति** । निराकारं रूपमस्तीत्यर्थः । तथा च तस्य तत्र सत्त्वादेव विशिष्टाकारस्याशास्यत्वं न तु विशिष्टाकारत्वप्रयुक्तमिति प्राप्ताप्राप्तविवेकेन निराकारमेवाशास्यतया पर्यवस्यतीति भावः । भवेदेतदेवम् । यदि तस्याशास्यता सम्भाविता स्यात् । न च सकलप्रमाणातीतत्वेनाबुद्धिस्थस्य तस्याशास्यता सम्भवतीत्याशयेनाह **तस्येति** । आशास्यमानं साकारमेव न निराकारमित्येतद्युक्त्याऽपि समर्थयते **आशासनं चेति** । आशासनकर्त्रित्यर्थः । निराकारमेव किं न स्यादित्यत आह **निराकारस्येति** । **तदनुपपत्तेः** आशासनकर्तृत्वानुपपत्तेः । अस्त्वेवमाशासनकर्तृ साकारं, आशास्यमानं तु निराकारमेव किं न स्यादित्यत आह **न चेति** । अतिप्रसङ्गादिति भावः । जातेष्ट्यधिकारिणं पितरं प्रति पुत्रगतस्यापि पूतत्वादेराशास्यमानत्वादन्यस्यान्यस्मिन् तत्सद्भावनिश्चयात् कथं प्रेमा न सम्भवतीत्यत उक्तम् **निरुपाधिक इति** । पुत्रस्य स्वार्थत्वेन सोपाधिकप्रियत्वान्न निरुपाधिकप्रियत्वमिति युक्तस्तन्निषेधः । निराकारस्य तु न तादर्थ्यमस्तीति न सोपाधिकमपि प्रियत्वम् । निरुपाधिकप्रियत्वं तु दूरनिरस्तमिति भावः । **एवं तर्हीति** । देहादिरहितस्याशासनकर्तृत्वानुपपत्त्या तत्सहितस्यैवाशासनकर्तृत्वेनोक्तयुक्त्याऽऽशास्यमानत्वसिद्धेरिति भावः ।

नन्वेवं मन्मतेऽपि नापुरुषार्थत्वप्रसङ्गः । परमेष्टपरमानन्दरूपब्रह्मभावलाभेनाल्पेष्टरूपात्मनाशस्य पुरुषार्थत्वसम्भवादित्यत आह **ब्रह्मभावश्चेति** ॥ **उपपादितमिति** । 'निर्विशेषत्ववाचैव शून्यं ब्रह्मेति नो भिदे'त्यादिना शून्यब्रह्मणोरविशेषोपपादनेन तद्भावयोरप्यविशेष इति उपपादितमित्यर्थः । ननु मायावादिना ब्रह्मण आनन्दरूपत्वाभ्युपगमाच्छून्यवादिना च तस्य तदनभ्युपगमात् भवेदेव ब्रह्मशून्ययोर्विशेष इत्यत आह **आनन्दरूपता चेति** ॥ **उक्तमेवेति** । न च 'दुःखविरोधित्वादन्या ह्यानन्दतेष्यते । मायिने'त्यनेन ग्रन्थेनेति शेषः ।

आनन्दरूपता किं स्वरूपेण पुरुषार्थः, अनुभूयमानतया वेति विकल्पद्वयं मनसि निधायाद्यं दूषयति **किञ्चेति** । आनन्दत्वं आनन्दरूपत्वमित्यर्थः । स्वरूपेण पुरुषार्थतायामानन्दो भूयासमित्येवाशीः स्यान्न तु तमनुभूयासमित्यतिप्रसङ्गं मनसि निधाय उभयत्रापीष्टापत्तिं परिहरति **न हीति** । अस्तु तर्हि अनुभूयमानतयैव पुरुषार्थत्वमित्यतः परानभ्युपगमेन तद्दूषयति **न च अनुभाव्यत्वमिति** । अनुभाव्यत्वं वदन् प्रष्टव्यः । किं अनुभाव्यानुभवित्रोर्भेदमभ्युपगम्य तस्यानुभूयमानत्वमभिप्रेतं किंवा तदभेदमिति विकल्पद्वयं मनसि निधाय क्रमेण पक्षद्वयं दूषयति **अनुभवितुरित्यादिना** । सिद्धे इच्छाविरहात् पुरुषेच्छाविषयस्यैव पुरुषार्थत्वादिति भावः ।

किञ्चानन्दरूपत्वं पुरुषार्थ इत्यभिमतं आवरणनिवृत्तिद्वारा तत्प्रकाशो वेति विकल्पद्वयं मनसि निधायाद्यं दूषयति **अपि चेति** । द्वितीयमाशङ्कते **प्रागिति** । ततश्च तत्प्रकाशस्य प्रागसिद्धतया पुरुषेच्छाविषयत्वसम्भवान्न पुरुषार्थत्वानुपपत्तिरिति भावः । अत्रापि तत्प्रकाशमात्रं पुरुषार्थ इत्यभिमतं विशदस्तत्प्रकाशो वा । आद्येऽपि किं प्रागावरणनिवृत्तेश्चैतन्यस्वरूपमेव नावभासत इति मतं किंवा तज्ज्ञानेऽप्यानन्दरूपत्वमेव नावभासत इति विकल्पान्मनसि निधायाद्यं दूषयति **प्रागपीति** । द्वितीयं दूषयति **तन्मात्रस्य चेति** । चैतन्येन निर्विशेषाभिन्नस्येत्यर्थः । अन्यथा चैतन्यस्यापि प्रकाशो न स्यात् । ततश्च सिद्धत्वान्नेच्छाविषयत्वं तस्येति न पुरुषार्थत्वमिति भावः । द्वितीये (आद्यद्वितीये । आद्य) द्वितीयमाशङ्कते **प्रकाशमानोऽपीति** ।

यावद्विशेषबाधात् सामान्यस्यापि बाध इत्यभिप्रेत्य यावद्विशेषबाधमुपदर्शयितुं विकल्पयति **अविद्येति** ॥ **अनङ्गीकारादिति** । आद्ये कर्मत्वस्य द्वितीये कर्तृत्वस्य च प्रसङ्गेन सविशेषत्वापत्त्या निर्विशेषत्वव्याघातेन तदनङ्गीकारादित्यर्थः । ननु न प्रतीतिकर्मत्वं तत्कर्तृत्वं चेत्युभयमेव प्रकाशत इति व्यवहारनिदानं ब्रूमः । तथा सति प्रदीपः प्रकाशत इति व्यवहारानुपपत्तिप्रसङ्गात् । न हि तत्र प्रतीतिकर्मत्वं तन्निमित्तमिति शक्यं वक्तुम् । तस्य घटादिसाधारणत्वेन प्रदीप एव विशेषतः प्रकाशत इति व्यवहारं प्रत्यप्रयोजकत्वात् । नापि तत्कर्तृत्वम् । तस्य जडत्वेन तदयोगात् । किन्तु स्वप्रकाशत्वमपि । ततश्च प्रदीपः प्रकाशत इत्यस्य यथा प्रतीयत इति वा प्रत्येतीति वा नार्थः । किन्तु स्वप्रकाश इति । तथा आनन्दः प्रकाशत इत्यस्य न प्रत्येतीत्यर्थः । नापि प्रतीयत इति । किन्तु स्वप्रकाश इत्येवेति कथं तत्खण्डनमित्यभिप्रेत्य शङ्कते **प्रदीपः प्रकाशत इति कोऽर्थ इति चेदिति** । न प्रदीपस्य स्वप्रकाशत्वं वक्तुं युक्तम् । तद्धि स्वविषयप्रकाशत्वं वा पराप्रकाश्यत्वं वा । नाद्यः । तस्य भौतिकत्वेन जडतयोक्तरूपस्वप्रकाशताया व्याहतत्वात् । न द्वितीयः । नयनादिप्रकाशप्रकाश्यत्वेन तदयोगात् । पराप्रकाश्यत्वस्य शशविषाणादिसाधारणतया तत्रापि प्रकाशत इति व्यवहारप्रसङ्गाच्च । किं त्वन्यदेव किञ्चित् । अतस्तदादाय प्रदीपे तदुपपत्तावप्यानन्दे तदयोगान्न तेनोक्तव्यवहारनिर्वाह इत्यभिप्रेत्य तन्निमित्तमाह **भास्वरेति** । उद्भाव्यत्वशङ्कापरिहारायाह **तदिदं सूचितमिति** । स्यादेतदित्यादिनोक्तं समस्तमित्यर्थः ।

**वा०र०— शाङ्करीयायां वाक्यवृत्ताविति** । .......ग्रन्थ इत्यर्थः । ननु न विशिष्टेति पाठः । मा न भूवमिति पाठः । **वाक्यवृत्त्यनुसारादिति** । वाक्यानुसारादित्यर्थः । .......नुसारेण व्याचष्टे । **मा भूवमि-**

**तीति** । आशासानशब्दः कर्तरि बहुलग्रहणाल्ल्युडन्तः भावरूपशासनकर्तारमाहेत्याशयेनाह **आशासनकर्त्रिति** ॥ **उक्तयुक्त्येति** । अन्यस्यान्यस्मिन्निति युक्त्येत्यर्थः । **आद्यमिति** । द्वितीयविकल्पस्याद्यमित्यर्थः । **द्वितीयमिति** । तस्यैव द्वितीयमित्यर्थः । आद्यद्वितीयमाशङ्कत इत्येव पाठः । द्वितीय इत्यधिकं लेखकप्रमादात् ।

**स०ब्र०— इदमेव चेति** । कर्तृत्वादिशक्तियुक्तमेवेत्यर्थः ॥ **नोक्तदोषः** । दृष्टनाशाङ्गीकारेण शून्यमतसाम्यरूप इत्यर्थः । न केवलमस्य रूपस्य परमेष्टत्वमनुभवसिद्धमेवेत्येव किं नाम परेणाप्येवमुदितमित्याह **आनन्दरूपेति** । मा न भूवं भूयासमिति लोक आशास्त इत्येव पाठः । यद्यपि विरोधचिदानन्दभोगाशिनः प्राणभृद्भेदाः तथापि सर्वेषां जरामरणकृतं दुःखमनिष्टं सर्वस्य खलु क्रिमेरपि मरणत्रासे मा न भूवं भूयासमित्येवमाकारोऽस्ति । दुःखं च भयहेतुरिति मरणं दुःखमिति साङ्ख्यपरीक्षा । तत्र मा नेति निषेधद्वयम् । उत्तमपुरुषप्रयोगादहमिति लभ्यते । तत्र 'द्वौ नञौ प्रकृतमर्थं सातिशयं गमयत' इति यावत् । अहं मा भूवमिति न भूयासम् । अभाववान्न भूयासमिति तात्पर्यलब्धार्थबलात् स्वस्य परमप्रेमास्पदत्वमेवोक्तं भवतीति भावः ॥ **ब्रह्मभावश्चेति** । 'निर्विशेषत्ववाचैव शून्यं ब्रह्मेति नो भिदे'त्यादिनोपपादितमित्यर्थः ॥ **आनन्दरूपता चेति** । 'न च दुःखविरोधित्वादन्या ह्यानन्दतेष्यते । मायिने'त्यादिनेत्यर्थः ॥ **तन्मात्रस्येति** । तेन ब्रह्मणा निर्विशेषाभिन्नस्येत्यर्थः । अन्यथा स्वरूपप्रकाशोऽपि न स्यादिति भावः ॥ **नोभावपीति** । प्रकाशयत इत्यस्य प्रतीयत इत्यर्थाङ्गीकारे तस्य कर्मत्वं वाच्यम् । द्वितीये कर्तृत्वम् । न च तत्परेणाङ्गीकर्तुं शक्यते निर्विशेषत्वाभ्युपगमादिति भावः ।

**॥ इति मायिनां मोक्षोऽपि आत्मविनाशरूप एव ॥**

* * *

**॥ अथ 'आत्मशून्यतायाः अपि आत्मविशेषितत्वात् अमोक्षत्वप्रसङ्गः ॥**

**५२ सु०— ननु निर्विशेषां शून्यतां मोक्षमाचक्ष्महे । तल्प्रत्ययोऽपि हि व्यवहारार्थमेव उपादीयते न तु कमपि धर्मं प्रतिपादयति । घटशून्यता तु सविशेषा घटेन विशेषितत्वात् । तत्कथमतिप्रसङ्ग इति चेन्न । विवक्षिताया अपि शून्यताया एवमेवात्मशून्यतेत्यात्मना विशेषितत्वेन सविशेषत्वदर्शनात् अमोक्षत्वप्रसङ्गात् ।**

**परि०—** 'मोक्षः स्याद्घटशून्यते'त्युक्तातिप्रसङ्गपरिहारशङ्कानिरासकतया मूलमवतारयितुं शङ्कामाह **ननु निर्विशेषामित्यादिना** ॥ ननु तर्हि 'शून्यते'ति भावार्थे 'तस्य भावस्त्वतलावि'त्युक्ततल्प्रत्ययः कथमित्यत आह **तल्प्रत्यय इति** ॥ **अतिप्रसङ्ग इति** । घटशून्यता मोक्षः स्यादित्युक्तातिप्रसङ्ग इत्यर्थः । **विवक्षिताया अपीति** । आत्मशून्यताया अप्येवमेवेत्यर्थः । तद्व्यनक्ति **आत्मशून्यतेति** ।

**यादु०**— विनाशकालीनघटरूपशून्यभावोऽपि मोक्षः स्यादित्युक्तप्रतिबन्दीं मोचयितुं शङ्कते **ननु निर्विशेषामिति** । निर्विशेषशून्यभावमित्यर्थः ॥ **घटेन विशेषितत्वादिति** । निर्विशेषत्वाद्विनष्टघटोऽपि शून्यमिति प्रागुक्तम् । तथा च घटशून्यपदयोः कर्मधारयसमासे नीलघट इत्यत्र घटो नैल्येनेव घटशून्यमित्यत्रापि शून्यं घटेन विशेषितमिति भावः । एवमात्मशून्यमप्यात्मना कर्मधारयविवक्षयैव विशेषितमिति ज्ञातव्यम् ।

**कं०रा०**— ननु शून्यस्य भाव इत्यर्थे विहितेन शून्यतेति तल्प्रत्ययेन शून्यतायाः शून्यशब्दप्रवृत्तिनिमित्तत्वरूपविशेषलाभात् कथं निर्विशेषत्वमित्यत आह **तल्प्रत्ययोऽपि हीति** ।

**शे०चं०**— 'मोक्षः स्याद्घटशून्यते'त्यादिनोक्तप्रतिबन्दीं मोचयितुं शङ्कते **नन्विति** । ननु धर्मप्रतिपादकतल्प्रत्ययोपपादनेन मोक्षस्य सविशेषत्वलाभान्न निर्विशेषशून्यताया मोक्षत्वं युक्तमित्यत आह **तल्प्रत्यय इति** ।

**॥ इति 'आत्मशून्यतायाः अपि आत्मविशेषितत्वात् अमोक्षत्वप्रसङ्गः ॥**

* * *

**॥ अथ आत्मशून्यतायाः सविशेषत्वानङ्गीकारे घटशून्यत्वेऽपि तथात्वं सुकरमेव ॥**

५३ **सु०— अथैवमात्मशून्यताया विशेषे दृश्यमानेऽपि केनचिदभिसन्धिना निर्विशेषतोच्यते तत्राह दृश्यमान इति ।**

**अनु०— दृश्यमाने विशेषेऽपि यदि चेदविशेषता ।**
**घटाभावेऽविशेषः स्यात् पाश्चात्यश्चेदनागतः ।**

मोक्षत्वेनाभिमतस्य शून्यभावस्येति शेषः । चेच्छब्दः स्यादित्यर्थे । भावशब्दः कर्तृसाधनः । एवं तर्हि घटशून्यताऽपि तेनैवाभिसन्धिना निर्विशेषा स्यादित्यतिप्रसङ्गतादवस्थ्यमिति । पूर्वपक्षिणोऽभिसन्धिमुद्घाटयति **पाश्चात्यश्चेदिति** । आत्मशून्यभावः । पाश्चात्यो विशेषरहित इति चेदित्यर्थः । पाश्चात्यत्वं चात्र व्यवहारापेक्षया ।

ततश्चैतदुक्तं भवति । इदानीं निरूपणसमये व्यवहारार्थं कल्पितेनैव विशेषेणात्मशून्यभावः सविशेष इवाभाति । अक्रियमाणे तु निरूपणे स्वरूपेण निर्विशेष एवेति । सिद्धान्तिनोऽभिसन्धिमुद्घाटयति **अनागत इति** । एवं तर्हि घटशून्यभावोऽपि निरूपण

**एव सविशेषो दृश्यते । निरूपणमनागतोऽप्राप्तस्तु निर्विशेष एवेत्यस्माभिरपि शक्यते वक्तुमित्यर्थः ।**

**परि०— केनचिदभिसन्धिनेति** । व्यवहारमात्रेणैव विशेषितत्वं वस्तुतो निर्विशेषत्वमेवेत्यभिप्रायेणेत्यर्थः । यदीत्यस्यावैयर्थ्यायाह **स्यादित्यर्थ इति** । (घटाभावस्य सविशेषत्वात् अविशेषत्वो) घटशून्यताया अविशेषत्वमनभिधाय घटाभावस्य निर्विशेषत्वोक्तिरयुक्तेत्यत आह **भावशब्द इति** । भवतीति भवनकर्तृत्वे विवक्षिते 'भवतेश्चे'ति सूत्रेण णप्रत्यये वृद्ध्यावादेशयोः कृतयोर्भवितिरूपसिद्धेर्भावः सन्, अभावोऽसन्, घटरूपोऽसन्, नष्टे घटः घटशून्य(भावोऽपी)तापीत्यर्थः । तथा च सिद्धमर्थमाह **एवं तर्हीति** । अस्फुटत्वादाह **ततश्चैतदुक्तं भवतीति** ॥ **अप्राप्तस्त्विति** । निरूपणाभावदशायामित्यर्थः ।

**यादु०— केनचिदभिसन्धिनेति** । निरूपणसमये सविशेष इव दृश्यते । अक्रियमाणे तु निरूपणे निर्विशेष एवेत्यभिसन्धिनेत्यर्थः ॥ **स्यादित्यर्थ इति** । अन्यथा यदिशब्दवैयर्थ्यमिति भावः । अभावस्य सविशेषत्वान्निर्विशेषत्वोक्तिरयुक्ता अत आह **भावशब्द इति** । घटाभाव इत्यभावशब्दान्तर्गतो भावशब्दो भवतीति भाव इति कर्तृसाधन इत्यर्थः । तथा च न भवतीत्यभाव इति अभावशब्दस्यार्थे तस्य घटशब्देन कर्मधारयसमासे विनष्टो घट एवात्रोच्यते तस्य चोक्तरीत्या निर्विशेषत्वोक्तिर्युक्तैवेति भावः । घटशून्यतेत्यादिरग्रेतनव्यवहारोऽपि कर्मधारयाभिप्रायेणैवेति मन्तव्यम् । 'कल्पितत्वाद्विशेषाणामि'त्यत्र व्यवहारबलेन विशेषः कल्पनीय इति शङ्का निराकृता । अत्र तु दर्शनबलाद्विशेषो वक्तव्य इति शङ्का निराक्रियत इति महान् भेदः । अत एव तत्र शङ्कासमये विशेषस्योक्तत्वादित्युक्तम् । अत्र तु सविशेषत्वादर्शनादित्युच्यत इति ।

**वं०प०— भावशब्द इति** । अभावशब्दान्तर्गतो भावशब्द इत्यर्थः । तथा च भवतीति भावः सन्, न भवतीत्यभावोऽसन् शून्यमित्यर्थः । **निवृत्तिः** ध्वंसः ।

**कं०रा०—** ननु 'प्राङ्मोक्षः स्याद्घटशून्यते'त्यत्र शून्यताशब्देन नाभावोऽभिधीयते किन्तु नष्ट आत्मा घटश्चेति व्याख्यातत्वेन घटाभावो विशेषः स्यादिति घटाभावस्य ग्रहणमित्यत आह **भावशब्दः कर्तृसाधन इति** । भवतीति भाव इति भावशब्दस्य कर्तृसाधनत्वेन भावोऽभाव इत्यभावशब्दस्य निःस्वरूपापरपर्यायशून्यवाचित्वात् घटाभावशब्देन प्राक्प्रकृतघटशून्यता लभ्यत इति भावः । न च वाच्यं नष्ट आत्मा घटश्च शून्यताशब्देनाभिधेयेते । तौ च अप्रामाणिकाविति प्राचीनोक्तिरयुक्ता नष्टशब्दितध्वंसप्रतियोगिघटस्याप्रामाणिकत्वाभावादिति वाच्यम् । 'नश अदर्शने' इत्यस्मान्निष्पन्नेन नष्टशब्देन नष्टोऽदृष्टो निःस्वरूप इति यावदिति निःस्वरूपत्वस्य विवक्षितत्वात् । न चैवमपि प्राक् घटशून्यतेत्युक्तम्, इदानीं तु घटाभाव इत्येवोच्यत इति वैरूप्यमिति

वाच्यम् । आत्मशून्यतां मोक्षमाचक्षाणेन परेण शून्यतेति तल्प्रत्ययो व्यवहारार्थमेवोपादीयते न तु कमपि धर्मं प्रतिपादयतीति शून्यशब्दस्य स्वरूपमात्रप्रत्यायकत्वस्योक्तत्वात् प्रतिबन्दीं गृह्णता सिद्धान्तिनापि शून्यप्रत्यायक एवशब्दः प्रयोक्तव्य इत्यभिप्रायेणेदानीं घटाभाव इत्येव प्रयोगस्योपपत्तेः । नन्वेवमपि पूर्वं नष्टो घटो घटशून्यतेति निःस्वरूपवाचिनष्टपदं विशेषणत्वेन प्रयुक्तम्, इदानीं घटाभाव इति तद्वाच्यभावपदं विशेष्यत्वेन प्रयुज्यत इति वैरूप्यम् । न चात्राप्यभावपदं विशेषणमेवेति वाच्यम् । तथात्वे तस्य पूर्वनिपातापत्तेरिति चेन्मैवम् । अभावश्चासौ घटश्चेति कर्मधारये 'कडाराः कर्मधारय' इत्यभावशब्दस्य कडारादित्वेन परतः प्रयोगापत्तेः । वस्तुतस्तु विशेषणविशेष्यभावस्य कामचारित्वादेवं निर्देशः कृत इति द्रष्टव्यम् ।

शे०चं०— **केनचिदभिसन्धिनेति** । निरूपणसमये व्यवहारार्थं कल्पितेन विशेषेण शून्यभावस्य सविशेषत्वप्रतीतावपि अक्रियमाणे निरूपणे स्वरूपेण निर्विशेषत्वमेवेति केनचिदभिसन्धिनेत्यर्थः । **स्यादित्यर्थ इति** । अन्यथा यदिशब्दवैयर्थ्यापातादिति भावः । **भावशब्दः कर्तृसाधन इति** । घटाभाव इत्यभावशब्दान्तर्गतो भावशब्दो भवतीति भाव इति कर्तृसाधनः । तथा सत्येव न भवतीत्यभावः घटश्चासावभावश्चेति घटाभाव इति घटाभावशब्देन नष्टघटलाभान्नष्टस्यात्मनो मोक्षत्ववादिनं प्रति तत्प्रतिबन्दीत्वेन नष्टघटस्य मोक्षत्वापादनलाभेन प्रक्रमानुगुण्यसम्भवात् । न तु भवनं भाव इति भावसाधनः । तथा सति घटासत्त्वस्यैव घटाभावशब्दाल्लाभेन तन्मोक्षत्वापादनस्य आत्मासत्त्वस्य, मोक्षत्ववादिनं प्रत्येव सङ्गतत्वेन, नष्टस्यात्मनो मोक्षत्ववादिनं प्रति प्रक्रमविरुद्धतया प्रतिबन्दीत्वेन तस्य कर्तुमनुचितत्वादिति भावः ॥ **तेनैवेति** । अनिरूपणे स्वरूपेण निर्विशेषत्वमित्यनेनैवाभिसन्धिनेत्यर्थः ।

स०व्र०— **केनचिदभिसन्धिनेति** । निरूपणसमये व्यवहारार्थं कल्पितेनैव विशेषेणात्मशून्यभावस्य विशेषत्वप्रतीतावपि अक्रियमाणे निरूपणे निर्विशेषत्वमेवेति केनचिदभिसन्धिनेत्यर्थः ॥ **भावशब्दः कर्तृसाधन इति** । नष्टस्यात्मन एव मोक्षत्वे परेणोक्ते तत्प्रतिबन्दीत्वेन नष्टघटस्यैव मोक्षत्वापादनस्य कर्तव्यत्वात् घटाभाव इत्यत्र भावशब्दस्य भवनं भाव इति भावसाधनत्वे घटासत्त्वस्यैव मोक्षत्वमुक्तं स्यात् । तथा च प्रक्रमविरोधापत्त्या कर्तृसाधनत्वमाश्रितम् । तथा च भवतीति भावः । न भावोऽभावः । घटश्चासावभावश्चेति नष्टघट इत्युक्तं भवति । अत्र च न खलु शून्यताशब्देनाभावोऽभिधीयते । 'भावार्थप्रतियोगित्वं भावत्वं वा न तत्त्वतः । यस्ये'त्यभिधानात् । किन्तु 'नष्ट आत्मा घटश्चे'ति जयतीर्थपूज्यचरणस्य 'कल्पितत्वात् विशेषाणामि'त्येतद्वाक्यव्याख्यानमेव ज्ञापकं ज्ञेयम् ॥ **तेनैवाभिसन्धिनेति** । अनिरूपणे स्वरूपेणैव निर्विशेषत्वमित्युक्ताभिसन्धिनेत्यर्थः ।

**॥ इति आत्मशून्यतायाः सविशेषत्वानङ्गीकारे घटशून्यत्वेऽपि तथात्वं सुकरमेव ॥**

* * *

**॥ अथ आत्मविनाशस्य मोक्षत्वसाधकानुमाने सत्प्रतिपक्षता ॥**

**५४ सु०— किञ्चोक्तरूपे शून्यवादिमायावादिभ्यामुत्प्रेक्षिते मोक्षे न किञ्चित् प्रमाणमस्ति । तथा हि । न तावदत्र प्रत्यक्षं प्रमाणम् । प्रत्यक्षाविषयत्वादस्यार्थस्य । नाप्यागमः । वेदाद्यागमस्य शून्यवादिना प्रमाणत्वेनानभ्युपगमात् । तदीयागमस्यास्माभिरनङ्गीकृतत्वात् । मायावादिनं प्रति तु वक्ष्यामः । तस्मादात्मशून्यता पुरुषार्थो दुःखनिवृत्त्युपयोगित्वाच्छरीरादिशून्यतावदित्यनुमानमेव वक्तव्यम् । यथोक्तम् । 'न तैर्विना दुःखहेतुरात्मा चेत् तेऽपि तादृशाः । निर्दोषं द्वयमप्येवं वैराग्यं च द्वयोस्तत' इति । तदिदं सत्प्रतिपक्षतया नानुमानमित्याह न मोक्ष इति ।**

**अनु०— न मोक्षो विमतो यस्माददेहो घटशून्यता ।**
**यथेत्युक्ते वदेत्किं स योऽनुमामात्रमानकः ।**

**विमतः** शून्यभावो ब्रह्मभावो वा **न मोक्ष** इति प्रतिज्ञा । **यस्मात् अदेह** इति हेतुः अदेहत्वादिति । **घटशून्यता यथेति** दृष्टान्तः । **योऽनुमामात्रमानकः स** इत्युक्ते **किं वदेत्** इत्यनेनोक्तविधया प्रमाणान्तराभावं तत एव स्वानुमानस्याबाधितविषयत्वं च सूचयति ।

**परि०— उक्तरूप इति** । अहमर्थात्मकात्मविनाशरूप इत्यर्थः ॥ **उभयेति** । वादिनस्तव प्रतिवादिनो मम चेत्यर्थः ॥ **वक्ष्याम इति** । 'न च मायी वदेदत्रे'त्यादिनेति भावः ॥ **यथोक्तमिति** । शून्यवादिनोक्तमित्यर्थः । आत्मा तैर्देहेन्द्रियादिभिः विना केवलो दुःखहेतुर्न भवतीति तत्रैव वैराग्यं कार्यमिति चेत् तर्हि **तेऽपि** देहादयोऽपि । तादृशा आत्मना विना केवलाः दुःखहेतवो न भवन्ति । एवं प्रत्येकं द्वयमपि निर्दोषं दुःखहेतुर्न भवतीत्युभयत्रापि वैराग्यं न कार्यमित्यर्थः ॥ यद्यन्योन्यसहायेन द्वयमपि दुःखहेतुः तर्हि द्वयोरात्मनि देहेन्द्रियादौ चोभयत्र ततो दुखहेतुत्वाद्वैराग्यं कार्यमित्यात्मनाशः पुरुषार्थ एवेति भावः ॥ **विमत इति** मूलानुवादः ॥ **उक्तेति** । न तावदत्र इत्यादिनोक्तविधयेत्यर्थः ।

**गु०दी०— न तैर्विना दुःखहेतुरि**त्यस्य तैर्देहेन्द्रियादिभिर्विना आत्मा दुःखहेतुर्न भवतीति चेत् तर्हि **तेऽपि** देहादयोऽप्यात्मानं विना दुःखहेतवो न । एकाभावे एकस्य दुःखहेतुता नेत्येवमनेन प्रकारेण **निर्दोषद्वयं** निर्दोषं द्वयमपि । अतः कुत्रापि वैराग्यं न कर्तव्यम् । कथञ्चिद्दुःखहेतुतया देहे वैराग्यं चेत् **ततस्तेनैव** कारणेन द्वयोरपि वैराग्यं कार्यमित्यर्थः । दुःखहेतुत्वाद्द्वयोरपि विनाश आशास्यत इति भावः ।

**यादु०— उक्तरूप इति** । अहमिति प्रतीयमानात्मविनाशरूप इत्यर्थः ॥ **वक्ष्याम इति** । 'न च मायी वदेदत्रे'त्यनुपदमेवेति शेषः ॥ **न तैर्विनेति** । तदीये पूर्वग्रन्थे देहेन्द्रियादीनामिवात्मनोऽपि दुःखहेतुत्वेन त्याज्यत्वं प्रकृतम् । तदाक्षेपसमाधानपूर्वकमुपपादयति **न तैरिति** । केवल आत्मा तैर्देहेन्द्रियादिभिर्विना न दुःखहेतुः ततः तत्र वैराग्यं नापेक्षितमिति चेत् तर्हि तेऽपि देहादयोऽपि तादृशाः केवला दुःखहेतवो न भवन्ति । ततः किमित्यत आह **निर्दोषमिति** । एवं विशकलितमात्मा देहादिश्चेति द्वयं निर्दोषं स्याद्धेयं न भवेत् । केवले आत्मनीव केवले देहादावपि वैराग्यं न स्यादिति भावः । अथ केवलस्य देहादेर्दुःखाहेतुत्वेऽप्यात्मसहितस्य तस्य तथात्वात् तत्र वैराग्यमावश्यकं तर्हि केवलस्यात्मनो दुःखाहेतुत्वेऽपि देहादिसहितस्य तथात्वादात्मन्यपि वैराग्यमावश्यकमित्याह **वैराग्यमिति** ॥ **तत इति** । कथञ्चिद्दुःखहेतुत्वादित्यर्थः । तथाच अत्र देहादिवदात्मनोऽपि दुःखहेतुत्वाद्धेयत्वमित्युक्तयः देहादिनाशवदात्मनाशोऽपि दुःखनिवृत्त्युपयोगित्वात् पुरुषार्थ इत्यपि सूचितम्, अतो नासङ्गतिरिति ज्ञातव्यम् । **विमत इति** । आत्मदेहादिनाशकालीन इत्यर्थः । यद्यप्यात्मनाशो न मोक्ष इत्येव साधनीयम् । परेण तस्यैव पुरुषार्थतायाः साधितत्वात् । तथाऽपि तदभिप्रेतं समग्रमपि मोक्षं दूषयितुमित्थं प्रतिज्ञा व्याख्याता । विशिष्टनिषेधस्य च विशेषणनिषेधेऽपि पर्यवसानादुक्तानुमाने प्रतिपक्षत्वमपि सिद्ध्यतीति ध्येयम् ।

**वं०प०— यथोक्तमिति** । आत्मनो दुःखनिवृत्त्युपयोगित्वमुक्तमित्यर्थः । तैर्देहादिभिर्विना केवल आत्मा दुःखहेतुः न चेत् तर्हि ते देहादयोऽपि तादृशाः केवला न दुःखहेतवः । किन्त्वात्मसहिताः । एवमात्मनो दुःखहेतुत्वं देहादेश्च दुःखहेतुत्वमिति पक्षद्वयमपि निर्दोषम् । ततः कारणात् द्वयोर्देहविषये आत्मविषये च वैराग्यं सम्पाद्यं तन्नाशः सम्पाद्य इति यावदित्यर्थः । **अदेहत्वादिति** । देहशून्यत्वादित्यर्थः ।

**कं०रा०—** ननु शून्यवादिना वेदादिप्रामाण्यस्यानङ्गीकृततया तेन स्वाभिमतमोक्षे वेदादेः प्रमाणीकर्तुमशक्यत्वेऽपि मायावादिना वेदादिप्रामाण्यस्याङ्गीकृतत्वात् तेन स्वाभिमतमोक्षे वेदादिकं प्रमाणीकर्तुं शक्यमेवेत्यत आह **मायावादिनमिति** । **न तैर्विनेति** । तैः शरीरादिभिर्विना आत्मा दुःखहेतुः न चेत् तेऽपि शरीरादयोऽपि तादृशा आत्मानं विना दुःखहेतवो न भवन्त्येव । ततो निर्दोषं द्वयमपि द्वयशब्देन शरीरादिभिर्विना आत्मा दुःखहेतुर्नेति दुःखाभावहेतुत्वेनोक्तं शरीरादिशून्यत्वं ते शरीरादयोऽप्यात्मानं विना दुःखहेतवो न भवन्तीति दुःखाभावहेतुत्वेनोक्तमात्मशून्यत्वं च गृह्यते । निर्गतो दुःखरूपदोषो यस्मात्तं निर्दोषं दुःखाभावोपयोगिद्वयमप्येवं दुःखाभावोपयोगित्वाकारेण पुरुषार्थ इति शेषः । शरीराद्यात्मनः प्रेमास्पदत्वात् तच्छून्यं कथं पुरुषार्थ इत्यत आह **वैराग्यं च द्वयोस्तत इति** । तच्छब्देन शरीरात्मनोरन्यतरस्यान्यतरसाहित्याभावे दुःखाहेतुत्वोक्त्याऽर्थात् परस्परसाहित्ये यद्दुःखहेतुत्वं लब्धं तत्परामृश्यते । तथा च द्वयोः शरीराद्यात्मनोर्दुःखहेतुत्वात् तत्र वैराग्यं च रागाभाव एव भवति । शरीराद्यात्मनोर्महादुःखहेतुत्वात् तत्र वैराग्यं च रागाभाव एव भवति । शरीराद्यात्मनोर्महादुःखसाधनत्वमविदुषां खद्योतसदृशात्यल्पसुखहेतुत्वं पश्यतां पामराणाम्, तत्र प्रेमापरपर्यायरागस्य सत्त्वेऽपि विवेकिनां तदभावेन शरीरादिशून्यत्वात्मशून्यत्वयोः पुरुषार्थत्वसम्भवात् शरीरादिशून्यतादृष्टान्तेन

आत्मशून्यतायाः पुरुषार्थत्वसाधनं युक्तमिति भावः ॥ **यस्माददेह इति हेतुरिति** । यथा पर्वतो वह्निमानित्युक्त्वा यस्माद्धूमवानित्युक्ते तेन धूमवत्त्वादिहेतुरुक्तो भवति तथाऽत्रापि यस्माददेह इत्यनेन अदेहत्वादिति हेतुरुक्त इत्यर्थः ।

**वा०र०—** सङ्गत्यन्तरेति पाठः । विदेहावस्थामोक्षत्वं मयोच्यते तदनुसारेणाह **विदेहावस्थाया अपीति** । .....नुसारेणाह **तदीयेति** । तदनुसारेणैवार्थमाह **तस्यायमर्थ इत्यादिना** । द्वितीयसूत्रसम्बन्धिना-ऽऽत्मेति वार्तिकसम्बन्धिवाचस्पतिनिबन्धोदाहृतवचनैर्विनेति श्लोकस्य वर्धमाने तु शरीरादिकं विनेत्यर्थः । तादृशा इत्यात्मन विना न दुःखहेतव इत्यादिकमुक्तम् । अत्राह मायावादीत्यादिग्रन्थे विदेहावस्थाया मोक्षत्वस्य श्रुतिसिद्धवचनस्यासङ्गततानिरासादाह **उपलक्षणं विदेहावस्थापीति** ।

**शे०चं०—** ननु 'न मोक्षः' इत्युत्तरग्रन्थस्योक्तार्थानुपपादकतया पूर्वग्रन्थेनासङ्गतेः सङ्गत्यन्तराप्रतिभासाच्चानर्थक्यम् । न च स्वाभिमतमोक्षसाधकतया परोपन्यस्तानुमानस्य सत्प्रतिपक्षतया दूषणेन तत्सङ्गतत्वात् सार्थक्यमिति वाच्यम् । निमित्ताभावेन स्वाभिमतमोक्षे परेण प्रमाणस्यैवावक्तव्यत्वात् । वक्तव्यत्वेऽप्यनुमानस्यैव वक्तव्यतायां नियामकाभावात् । तद्भावेऽपि वा तदभिमतानुमानविशेषनिर्धारणोपायाभावेन तस्य सत्प्रतिपक्षतया तद्दूषणार्थत्वायोगादित्यतोऽत्र भाष्ये अप्रामाणिकत्वेन पराभिमतमोक्षदूषणस्याप्यभिप्रेतत्वेन तत्परिजिहीर्षया परस्य तत्प्रमाणोक्तेरावश्यकत्वात् प्रमाणान्तरासम्भवेन अनुमानस्यैव वक्तव्यत्वाच्च तदनुमानविशेषनिर्धारणोपायसद्भावेन तन्निर्धारणस्याप्युपपन्नत्वेन सत्प्रतिपक्षतयोपपन्नतन्निरासकभावस्य 'न मोक्ष' इत्यादेर्वाक्यस्य भाष्यकृदभिमतपूर्ववाद्यभिप्रेतमोक्षाप्रामाणिकत्वसमर्थनार्थतया तत्सङ्गतत्वान्न तस्यानर्थक्यमिति भावेन तत्परतयोत्तरग्रन्थं सङ्गमयितुं भाष्यकृदभिमतां पूर्ववाद्युक्तमोक्षस्याप्रामाणिकत्वरूपदोषान्तरप्रतिज्ञां दर्शयन्नेव प्रमाणान्तरासम्भवव्युत्पादनेनानुमानस्य वक्तव्यतामनुमानविशेषनिर्धारणोपायं च दर्शयति **किञ्चेत्यादिना** ॥ **उक्तरूपेति** । अहमिति प्रतीयमानात्मविनाशरूप इत्यर्थः ॥ **वक्ष्याम इति** । 'न च मायी वदेदत्र पूर्वोक्तेनैव वर्त्मने'त्यादिना अनुपदमेवेति भावः ॥ **दुःखनिवृत्त्युपयोगित्वादिति** । विदेहावस्थाया अपि पुरुषार्थत्वान्न तत्र व्यभिचार इति भावः। उक्तार्थे माध्यमिकसम्मतिमाह **यथोक्तमिति** । तदीयपूर्वग्रन्थे देहेन्द्रियादीनामिवात्मनोऽपि दुःखहेतुत्वेन त्याज्यत्वमुपवर्णितं तदाक्षेपसमाधानपूर्वकमुपपादयितुं 'न तैर्विने'ति वाक्यम् । तस्यायमर्थः । केवल आत्मा तैर्देहेन्द्रियादिभिर्विना दुःखहेतुः न भवति । अतस्तत्र वैराग्यं नापेक्षितमिति चेत् । तर्हि तेऽपि देहादयोऽपि तादृशा आत्मना विना केवला दुःखादिहेतवो न भवन्ति । ततः किमित्यत उक्तं **निर्दोषमिति** । एवं विशकलितमात्मा देहादिश्चेति द्वयं निर्दोषं स्याद्द्वेयं न भवेत् । केवले आत्मनि केवले देहादावपि वैराग्यं न स्यादिति भावः । अथ केवलस्य देहादेर्दुःखाहेतुत्वेऽप्यात्मसहितस्य तथात्वात् तत्र वैराग्यमावश्यकं तर्हि केवलस्यात्मनो दुःखाहेतुत्वेऽपि देहादिसहितस्य तद्धेतुत्वादात्मन्यपि वैराग्यमावश्यकमित्याह **वैराग्यमिति** ॥ **तत इति** । कथञ्चिद्दुःखहेतुत्वादित्यर्थः । तथा चात्र देहादितुल्यतयाऽऽत्मनो दुःखहेतुत्वेन हेयत्वोक्त्या देहादिनाशतुल्यतयाऽऽत्मविनाशस्यापि दुःखनिवृत्त्युपयोगित्वेन पुरुषार्थत्वसिद्धेरिति युक्तोऽस्य प्रकृतोपयोग इति । न मोक्ष इत्यादेर्यथाश्रुतस्यैव प्रति-

पक्षप्रयोगप्रकारत्वभ्रान्तिनिरासायाह **विमत इत्यादि** ॥ **न मोक्ष इतीति** । प्रतिज्ञेत्युपलक्षणम् । विदेहावस्थाऽपि न मोक्ष इत्यपि द्रष्टव्यम् ॥ **प्रमाणान्तराभावमिति** । प्रत्यक्षागमरूपप्रमाणान्तराभावमित्यर्थः । तत्कथमित्यत उक्तम् **उक्तविधयेति** । 'न तावदत्र प्रत्यक्षं प्रमाणम् । तदविषयत्वादस्यार्थस्ये'त्यादिपूर्वोक्तविधयेत्यर्थः ।

**स०व्र०— वक्ष्याम इति** । 'न च मायी वदेदत्र पूर्वोक्तेनैव वर्त्मने'त्यादिनेति शेषः ॥ **यथोक्तमिति**। तैः शरीरादिभिर्विनात्मा दुःखहेतुः न भवति । अतः शरीरादिसम्बन्धाभावे दुःखाहेतुत्वात् । नात्मा दुःखहेतुरिति चेत्, तर्हि शरीरादयोऽप्यात्मसम्बन्धेनैव दुःखहेतवः न त्वात्मसम्बन्धाभावे दुःखाहेतुत्वेन शरीरादेरपि निर्दोषत्वं स्यात् । आत्मसम्बन्धेनापि दुःखहेतुत्वात् शरीरादौ वैराग्यं चेत् तर्हि शरीरसम्बन्धेनापि दुःखहेतुत्वात् आत्मन्यपि वैराग्यं स्यादिति ।

**॥ इति आत्मविनाशस्य मोक्षत्वसाधकानुमाने सत्प्रतिपक्षता ॥**

* * *

**॥ अथ मायावादे श्रुतेरप्रामाण्यात् श्रुत्या न प्रत्यनुमानबाधः ॥**

५५ **सु०—** अत्राह मायावादी । नेदं प्रत्यनुमानं मानम् । विदेहावस्थैव मोक्ष इति श्रुतिसद्भावेन कालातीतत्वात् । किञ्च श्रुत्यैव ब्रह्मभावाविर्भावो मोक्ष इत्युक्तत्वात् किमनुमानेनेति । तत्राह **न चेति** ।

## अनु०— न च मायी वदेदत्र

**अत्र** अनुमानविषये श्रुतिमालम्ब्य दूषणं **न वदेत्** । तथाऽत्र स्वाभिमते मोक्षे श्रुतिं प्रमाणं नैव **वदेत्** इत्यर्थः । कुत इत्यत आह **पूर्वेति** ।

## पूर्वोक्तेनैव वर्त्मना ।

## अमानत्वात् श्रुतेस्तस्य

**तस्य** मायावादिनो मते श्रुतेरमानत्वात् । कथम् । 'प्रामाण्यादि च वेदस्ये'त्यादिना **पूर्वोक्तेनैव वर्त्मना** । ननु न सर्वो वेदोऽतत्त्वावेदकः किन्तु विधिनिषेधात्मक एव । अतथाभूतास्तु वेदान्तास्तत्त्वावेदका इति चेन्न । सर्वधर्मोज्झितस्यास्य किं शास्त्रेणाधिगम्यत इत्यादिना पूर्वोक्तेनैव वर्त्मना अत्र तत्त्वे श्रुतेरमानत्वात् ।

**परि०— श्रुतिसद्भावेनेति** । 'अशरीरं वाव सन्तमि'त्यादिश्रुतीत्यर्थः ॥ **श्रुत्यैवेति** । 'स्वरूपेणाभिनिष्पद्यते', 'ब्रह्म वेद ब्रह्मैव भवती'त्यादिश्रुत्यैवेत्यर्थः ॥ **सर्वधर्मेति** । भक्तिपादे ।

**यादु०— विदेहावस्थैवेति** । अत्र विमत इत्यत्र देहनाशकालीनत्वस्यापि विशेषतया विवक्षितत्वात् तदंशे नोक्तनिषेधपर्यवसानं कालातीतत्वादित्यर्थः । तेन कालातीततोपपादनाय ब्रह्मभावश्च मोक्ष इति श्रुतिसद्भावेनेत्येव वक्तव्यम् । देहावस्थैव मोक्ष इत्यत्र श्रुतिसद्भावकथनमसङ्गतमिति शङ्काऽनवकाशः । ब्रह्मभावाविर्भाव इत्यत्र आविर्भावग्रहणेनोक्तविनाशकालीनत्वमप्युक्तप्रायम् । देहादिविनाशाभावे ब्रह्मभावाविर्भावासम्भवादिति ध्येयम् ।

**कं०रा०— प्रामाण्यादि चेति** । 'प्रामाण्यादि च वेदस्य फलतः सममेव हि । अतत्त्वावेदकं यस्मात् प्रमाणं तेन कथ्यत' इत्यादिना पूर्वोक्तेनैव वर्त्मनेत्यर्थः ॥ अत्रेति पदसहितं 'पूर्वोक्तेनैव वर्त्मने'त्यादिवाक्यमुक्तप्रमेये शङ्कातत्परिहारपरत्वेन व्याख्यातुं शङ्कामुत्थापयति **ननु सर्व इति** ॥ **अत्र तत्त्व इति** । यद्यपि तत्त्वस्य प्रागप्रकृतत्वात् अत्रेत्यनेन परामर्शायोगः तथाऽपि पूर्वयोजनायां 'पूर्वोक्तेनैव वर्त्मने'त्यस्य 'तत्त्वावेदकं यस्मात्प्रमाणं तेन कथ्यत' इत्यादिपूर्वोक्तमार्गपरत्वात् तत्र तत्त्वस्यापि यथाकथञ्चिद्बुद्धिस्थत्वादत्रेत्यनेन परामर्शो युक्त इति ध्येयम् ।

**शे०चं०—** विदेहावस्थानं मोक्ष इति प्रतिपक्षं दूषयति **विदेहावस्थैवेति** । **दूषणं** बाधलक्षणम् ॥ **स्वाभिमते मोक्ष इति** । ब्रह्मभावाविर्भावलक्षण इत्यर्थः ।

**वा०र०— स्वाभिमते मोक्ष इतीति** प्रतीकोपादानम् । अर्थपदं लेखकागतम् ।

**स०व्र०— दूषणं** बाधलक्षणम् ।

* * *

५६ **सु०— अस्तु वा कथञ्चित् श्रुतिः प्रमाणम् । तथाऽपि नास्मदनुमानस्य तद्बाध इत्याह न चेति ।**

**अनु०— न चादेहत्ववादिनी ।**

**श्रुतिः काचित्**

**'मुक्तावि'ति शेषः । तथा तदभिमतमोक्षवादिनीत्यपि ग्राह्यम् ।**

परि०— **तदभिमतेति** । ब्रह्मभावापत्तिरूपमोक्षवादिनी काचिन्नेत्यपि ग्राह्यमित्यर्थः ।

स०व्र०— **तदभिमतेति** । ब्रह्मभावाऽऽविर्भावलक्षणेत्यर्थः ।

**॥ इति मायावादे श्रुतेरप्रामाण्यात् श्रुत्या न प्रत्यनुमानबाधः ॥**

* * *

**॥ अथ 'अशरीरं वाव सन्तं' इति श्रुतिः मोक्षे प्राकृतशरीरराहित्यमेव प्रतिपादयति ॥**

५७ **सु०— 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत' इत्यादिश्रुतिसद्भावात् कथमदेहत्ववादिना श्रुतिर्नास्तीत्युच्यत इत्यत आह अदेहत्वमिति ।**

**अनु०— अदेहत्वमप्राकृतशरीरता ।**

**यदस्यां श्रुतौ अदेहत्वं उच्यते तत्प्राकृतशरीरराहित्यमेव । न तु सर्वथाऽप्यदेहत्वम् । प्राकृतशब्देन जडमुपलक्ष्यते । तद्राहित्यं च चतुर्थपादोदितप्रकारेण ज्ञातव्यम् । एवं 'ब्रह्म वेद ब्रह्मैव भवती'त्यादिश्रुतिराशङ्क्य व्याख्यातव्या च ।**

अशरीरत्वश्रुतेः कुतोऽर्थसङ्कोचः क्रियत इत्यत आह **मोक्ष इति** ।

**मोक्षे भोगं यतो ब्रूते जक्षन् क्रीडन्निति श्रुतिः ।**

'स तत्र पर्येति **जक्षन्क्रीडन्रममाणः** स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वाऽज्ञातिभिर्वे'ति **श्रुतिर्मोक्षे** स्त्र्यादिभोगं ब्रूते । **न च अशरीरस्यासौ सम्भवतीत्यतः** सङ्कोच इत्यर्थः ।

परि०— ननु प्राकृतस्याभावे पाञ्चभौतिकमस्ति किमित्यतो नेति भावेनाह **प्राकृतशब्देनेति** । 'भावं जैमिनिर्विकल्पाम्नानादि'ति सूत्रे कदाचिन्मुक्तानां भोगार्थं चिन्मात्रदेहान्यशुद्धसत्त्वात्मकप्राकृतदेहभावं जैमिनिर्मन्यत इति मुक्तानां प्राकृतदेहसत्त्वस्याङ्गीकारात् कथमेवमुक्तिरित्यत आह **तद्राहित्यं चेति** । पाञ्चभौतिकस्य सर्वात्मनाऽभावेऽपि उक्तरूपप्राकृतदेहस्य कदाचिद्भोगार्थमिच्छयोपादानं तस्येच्छया परित्याग इत्येवमैच्छिकं कादाचित्कं तद्राहित्यं न तु सर्वथेति तत्रोक्तं ध्येयमित्यर्थः । ननु तदभिमतमोक्षवादिनी काचिच्छ्रुतिर्नेत्यपि ग्राह्यमिति प्रागुक्तिरयुक्ता 'ब्रह्मवेदे'-

त्यादिश्रुतेर्भावादित्यत आह **एवं ब्रह्मेति** । **ब्रह्म भवति** स्वरूपज्ञानानन्दादिना बृंहितो भवतीत्यादिरूपेण व्याख्येयेत्यर्थः ।

**यादु०**— नन्वेवं मुक्तानां प्राकृतशरीराभावेऽपि अस्मदादीनामिव भौतिकशरीरप्राप्त्या दुःखाद्यनुभवप्रसङ्ग इत्यत आह **प्राकृतशब्देनेति** । नन्वेवमपसिद्धान्तः प्राप्नोति 'भावं जैमिनिर्विकल्पाम्नानादि'त्यादिना मुक्तानां जडशरीरस्योक्तत्वात्, अत आह **तद्राहित्यं चेति** । चतुर्थपादे हि 'प्रदीपवदावेशस्तथा हि दर्शयती'त्यादौ मुक्ताः स्वेच्छया जडशरीरमनुप्रविश्य पुण्यानेव भोगाननुभवन्ति न तु दुःखादीन् कदाचनेति कर्मारब्धदुःखापादक एव जडदेहो मुक्तानां नास्तीत्युक्तम् । अतोऽत्रापि तेनैव प्रकारेण कर्मारब्धदुःखापादकजडराहित्यमेव श्रुत्यर्थतया वर्णनीयं न सर्वथाऽतो नोक्तदोष इति भावः ॥ **आशङ्क्येत्यादि** । तदभिमतमोक्षवादिनी काचिच्छ्रुतिर्नेत्युक्तार्थोपपादनायेति शेषः ।

**वं०प०**— ननु 'ब्रह्म वेद ब्रह्म भवती'त्यादि श्रुतिरेव मदभिमतमोक्षवादिनी भविष्यति । अतस्तदभिमतमोक्षवादिनी श्रुतिर्नास्तीत्यपि ग्राह्यमिति यदुक्तं तदसदित्यत आह **एवं ब्रह्म वेदेति** ॥ **व्याख्यातव्येति** । ब्रह्म पूर्णं वेद चेत् स्वयमपि योग्यतानुसारेण पूर्णो भवतीति व्याख्यातव्येत्यर्थः । **न चाशरीरस्येति** । इन्द्रियाणां शरीरसंयुक्तत्वेन तदभावे तेषामप्यभावेन भोगासम्भवादिति भावः ।

**कं०रा०**— अप्राकृतशरीरेत्यनेन प्रकृत्यात्मशरीराभाव एव प्रतीयते न तु भौतिकदेहाभाव इत्यत आह **प्राकृतशब्देन जडमुपलक्ष्यत इति** । ननु 'स्वेच्छया वा शरीराणि तेजोरूपाणि कानिचित् । स्वीकृत्य जागरितवद्भुक्त्वा त्यागः कदाचने'ति मुक्तस्य स्वेच्छया जडशरीरस्वीकारोक्तेर्जडशरीरराहित्यमयुक्तमित्यत आह **तद्राहित्यञ्चेति** । 'प्रदीपवत् आवेशस्तथा हि दर्शयती'ति चतुर्थपादसूत्रे शरीरमनुप्रविश्यापि तत्प्रकाशयन्तः पुण्यानेव भोगाननुभवन्ति न तु दुःखादीन्यथा प्रदीपे दीपिकादिषु प्रविष्टस्तत्रस्थं तैलाद्येव भुङ्क्ते न तु तत्कार्ष्ण्यादि 'तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवती'ति हि दर्शयतीति हि मुक्तानां जडशरीरस्वीकारेऽपि तत्कृतलेपाभावोक्तेः । मुक्तस्य जडशरीरराहित्यं च चतुर्थपादोदितप्रकारेण तत्कृतलेपाभावरूपं ज्ञातव्यमित्यर्थः ॥ **एवमिति** । 'अशरीरं वाव सन्तं प्रियाप्रिये स्पृशत' इत्यादिश्रुतिर्मुक्तस्यादेहत्वे प्रमाणमित्याशङ्क्यार्थान्तरपरत्वेन व्याख्याता । तथा 'ब्रह्म वेद ब्रह्मैव भवती'त्यादिश्रुतिः पराभिमतमोक्षे प्रमाणमित्याशङ्क्य यो ब्रह्म वेद सः स्वयोग्यगुणपूर्णत्वरूपब्रह्मत्वाक्रान्तो भवतीत्याद्यर्थान्तरपरत्वेन व्याख्यातव्येत्यर्थः । उक्तं च श्रुतेरुक्तार्थान्तरपरत्वं 'सम्पूज्य ब्राह्मणं भक्त्या शूद्रोऽपि ब्राह्मणो भवेदि'त्यत्र तादृशार्थपरत्वस्य दर्शनात् । न हि शूद्रः सम्पूज्य ब्राह्मणव्यक्तिरेव भवति । किन्तु ब्राह्मणत्वजात्याक्रान्तः । उदाहृतश्रुतेरैक्यपरत्वे पूर्वत्र 'यथा नद्यः स्यन्दमानाः समुद्रेऽन्तं गच्छन्ति नामरूपे विहाये'ति भिन्ननदीसमुद्रदृष्टान्तोक्तिः । 'तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमि'ति ब्रह्मप्राप्तिश्च अयुक्ता स्यात् । तत्पक्षे नित्यं ब्रह्मभूतस्य जीवस्य अपूर्वब्रह्मभावोक्तिरयुक्ता । भेदारोपनिवृत्तेः साध्यत्वेऽप्यशाब्दत्वादित्यादिकं न्यायामृतोक्तमनुसन्धेयम् ।

**शे०चं०**— मुक्तानां प्राकृतशरीराभावेऽपि अस्मदादीनामिव भौतिकशरीरप्राप्त्या दुःखादिप्रसङ्ग इत्यतोऽत्र प्राकृतशब्दस्याजहत्स्वार्थलक्षणया भौतिकपरत्वस्याप्यभिमतत्वेन प्राकृतमात्रपरत्वाभावाद्भौतिकदेहराहित्यस्यापि प्राप्तेः न दुःखादिप्रसङ्ग इत्याशयेनाह **प्राकृतशब्देनेति** । ननु न जडशरीरराहित्यं श्रुत्यर्थतया वक्तुं शक्यम् । तथा सत्यपसिद्धान्तापातात् । 'भावं जैमिनिर्विकल्पाम्नानात् । द्वादशाहवदुभयं बादरायण' इत्यादौ मुक्तानां जडशरीरसद्भावस्य समर्थितत्वात् इत्यत आह **तद्राहित्यं चेति** । 'प्रदीपवदावेशस्तथा हि दर्शयती'त्यादिना मुक्ताः स्वेच्छया जडशरीरमनुप्रविश्य पुण्यानेव भोगाननुभवन्ति, न दुःखादीन् कदाचनेति कर्मारब्धदुःखापादक एव जडदेहो मुक्तानां नास्ती'ति चतुर्थपादोदितप्रकारेण कर्मारब्धदुःखापादकजडशरीरराहित्यस्यैव श्रुत्यर्थतयाऽभ्युपगमान्नापसिद्धान्त इति भावः । ननु मायावादिना श्रुतिप्रामाण्यावलम्बनेनास्मदनुमानदूषणस्य स्वाभिमतमोक्षसमर्थनस्य च शङ्कितत्वाद्भाष्यकृता अदेहत्वश्रुतिमाशङ्क्य तस्या अर्थान्तरपरत्ववर्णनात् मायावादिनोक्तास्मदनुमानदूषणनिराससिद्धावपि तदभिमतब्रह्माविर्भावरूपमोक्षसाधकश्रुतिमाशङ्क्य भाष्यकृता अव्याख्यानात् कथं तन्निराससिद्धिरित्यत आह **एवमिति** । अतस्तन्निरासोऽपि सिद्ध्यतीति भावः ।

**वा०र०**— भौतिकपरत्वस्यापीति पाठः ।

**स०व्र०**— ननु कथं मोक्षे प्राकृतशरीराभावः । तथा सति भवतामपसिद्धान्तः स्यादित्यत आह **तद्राहित्यं चेति** । 'स्वेच्छया वा शरीराणि तेजोरूपाणि कानिचिदि'त्यादि चतुर्थपादोदितप्रकारेण प्राकृतशरीरराहित्यं ज्ञेयमित्यर्थः ।

**॥ इति 'अशरीरं वाव सन्तं' इति श्रुतिः मोक्षे प्राकृतशरीरराहित्यमेव प्रतिपादयति ॥**

* * *

**॥ अथ परोक्तानुमानस्य दूषणान्तरं, शून्य-मायावादयोः तिरस्कार्यत्वञ्च ॥**

५८　**सु०**— परकीयानुमानस्य प्रतिपक्षान्तरमाह **निर्दुःखत्वादिति** ।

**अनु०**— निर्दुःखत्वान्न तन्मोक्षः प्रतिपन्नं यथेति च ।
अनुमा दूषणं किं स्याद्वादिनोः शून्यमायिनोः ॥

तच्छून्यत्वं ब्रह्मत्वं वा **मोक्षो न** भवति **निर्दुःखत्वात् प्रतिपन्नं** घटशून्यत्वं **यथेति चानुमायाः किं दूषणं स्यात्** न किमपि । शून्यशब्देन तदङ्गीकारवान् लक्ष्यते । शू(न्यं च मा)न्यश्च मायी चेति द्वन्द्वः । यद्वा शून्यं च माया चेति द्वन्द्वः । ते विद्येते ययोरिति व्रीह्यादिलक्षण इनिः । तत्र च तदन्तविधिरिष्यते ।

**परि०— परकीयेति** । आत्मशून्यता पुरुषार्थ इति प्रागुक्तानुमानस्य, 'न मोक्षो विमत' इति प्रागुक्तप्रतिपक्षापेक्षया प्रतिपक्षान्तरमित्यर्थः । 'शून्यमायिनोरि'त्यत्र शून्यपदेन शून्यवादी ग्राह्य इति भावेनाह **शून्यशब्देनेति** । एतत्पक्षे विग्रहं दर्शयति **शून्यश्चेति** । 'अस्मायामेधास्रजोविनिरि'ति मायावीति भाव्यं, मायीति कथमित्यत आह **व्रीह्यादिलक्षण इति** । पञ्चमस्य द्वितीयपादे 'अत इनिठनावि'ति प्रकरणे 'व्रीह्यादिभ्यश्च' व्रीह्यादिगणस्थशब्दानामकारान्तत्वाभावेऽपि मत्वर्थ 'इनि'-प्रत्ययो भवतीत्युक्तेः व्रीह्यादिनिमित्तक इनिप्रत्यय इत्यर्थः । ननु व्रीह्यादिगणस्थ-केवलमायाशब्दाद्विहितः शून्यमायाशब्दात् कथं भवतीत्यत आह **तत्र चेति** । वनमालीत्यादिप्रयोगात् तदन्तविधि-रेष्टव्यः । वृत्त्यादावनुक्तत्वेऽपि प्रयोगवशात् तदन्तविधिरिति ग्रन्थकारैरेवोच्यत इति ज्ञेयम् ।

**गु०दी०— निर्दुःखत्वादिति** हेतुकुर्वता शून्यमायिनोर्निदुःखं तम एव मोक्ष इति भाव इति सूचितम्। **तत्र च तदन्तर्विधिरि**त्यत्र द्वन्द्वान्ते श्रूयमाणः प्रत्येकमभिसम्पद्यते इति वचनात्तदन्तविधिरिष्यत इत्यर्थः ।

**यादु०—** ननु 'अस्मायामेधास्रजो विनिरि'ति मेधाशब्दाद्विनिप्रत्ययस्य विहितत्वेन मायाविनोरिति वक्तव्यं, मायिनोरिति तु कथमुक्तमित्यत आह **व्रीह्यादीति** । व्रीह्यादिभ्यश्चेति सूत्रप्रतीकग्रहणम् । लक्षणशब्दः सूत्रपरः । ततश्च व्रीह्यादिभ्यश्चेति सूत्रं यस्येति बहुव्रीह्याश्रयणेनैतत्सूत्रविहित इत्यर्थो द्रष्टव्यः । एवं च माया-शब्दस्य व्रीह्यादिगणे पठितत्वात् तस्मादिनिप्रत्यये यस्येति चेत्यनेनाकारलोपे मायिन्प्रातिपदिकसिद्धिरिति भावः। ननु केवलो मायाशब्द एव व्रीह्यादिगणे पठितो न शून्यमायेति समस्तोऽतः कथमयमिनः व्रीह्यादिलक्षण इत्यत आह **तत्र चेति** । अन्यथा केवलमालाशब्दस्यैव तद्गणपठितत्वे 'परिस्फुरत्कुण्डलमौलिमालिनाम्', 'वनमाली हलायुध,' इत्यादौ समस्तान्मालाशब्दादिनेः प्रयोगोऽनुपपन्नः स्यादिति भावः ।

**वं०प०— परकीयानुमानस्येति** । आत्मशून्यता पुरुषार्थः दुःखनिवृत्त्युपयोगित्वाच्छरीरादिशून्यता-वदित्यनुमानस्येत्यर्थः ।

**कं०रा०—** ननु 'व्रीह्यादिभ्यश्चे'त्यत्र केवलमायाशब्दस्य व्रीह्यादिषु पठितत्वेन तस्मादिनिप्रत्ययः स्यान्न तु मायाशब्दान्तात् द्वन्द्वसमासादित्यत आह **तत्र चेति** । व्रीह्यादिषु च तदन्तविधिरिष्यते अतो माया-शब्दान्तादिनिप्रत्ययो युक्त इति भावः ।

**शे०चं०—** ननु शून्यवादिमायिनोरिति वक्तव्यं शून्यमायिनोरिति तु कथं इत्यतः अत्र शून्यशब्दस्य लक्षणया शून्यवादिपरत्वेन शून्यपरत्वाभावेन शून्यमायिनोरित्युपपत्तेरित्यभिप्रेत्य शून्यपदं लक्षणया तद्वादिपरतया व्याचष्टे **शून्यशब्देनेति** । लक्षणाबीजसम्बन्धोपदर्शनं **तदङ्गीकारवानिति** । लक्षणया तद्वादिपरशून्यशब्द-स्यासकृत्साधुतया प्राग्व्युत्पादितमायिशब्देन द्वन्द्वमाह **शून्यश्च मायी चेति** ॥ **द्वन्द्व इति** । अत्र पक्षे शून्य-पदस्य तद्वादिपरत्वं लक्षणया कल्पनीयं भवतीत्यतः शून्यपदस्य शून्यपरतामेवाश्रित्य मायाशब्देन द्वन्द्वमाह

**यद्वेति** । कथं तर्हि वादिनोर्लभ इत्यतो मत्त्वर्थ इनिप्रत्ययादेवेति भावेन मत्त्वर्थसम्बन्धप्रदर्शनपूर्वकं तद्विधायकमाह **ते विद्येते इति** । व्रीह्यादिलक्षणो व्रीह्यादित्वं लक्षणं प्रापकं यस्येति तथोक्तः । तथा च मायाशब्दादस्मायामेधास्रजो विनिरिति विनिप्रत्ययस्य विशेषशास्त्रेण विधानेऽपि व्रीह्यादिगणे पठितत्वेन व्रीह्यादित्वात् व्रीह्यादिभ्यश्चेत्यनेन इनिप्रत्ययस्याप्यभ्यनुज्ञातत्वात् इनिप्रत्यये सति यस्येति चेति मायाशब्दान्त्याकारलोपे शून्यमायिन्निति प्रातिपदिकसिद्धिः । ननु मायाशब्दस्य व्रीह्यादिगणे पठितत्वात् केवलात् तस्मादिनिप्रत्ययोत्पत्तिसम्भवेऽपि शून्यमायेति समस्तस्य तत्रापठितत्वात् कथमस्मादिनिप्रत्ययो व्रीह्यादिलक्षणः स्यादित्यतो वनमालीत्याद्यभियुक्तप्रयोगसंरक्षणाय तत्र तदन्तविधेरवश्याश्रयणीयत्वान्मायाशब्दान्ततया शून्यमायाशब्दादपि इनिप्रत्ययसिद्ध्या युक्त एव तस्मादपि व्रीह्यादिलक्षण इनिरित्याह **तत्र च तदन्तविधिरिति** ।

**वा०र०**— शून्यपदस्य तद्वादिपरत्वस्वीकारेण मायिशब्दस्यापि साधुताया वर्णनीयत्वात् कुतस्तत् अवर्णनमित्यतो मायाशब्दस्य व्रीह्यादित्वात् मायीति साधुरिति तत्साधुताव्युत्पादनस्य पूर्वं बहुधा कृतत्वेन तदव्युत्पादनं न दोषाय इत्याशयेन विविच्य आह **असकृत्साधुतयेति** ॥ **प्रागिति** । ....... इत्यादौ तत्र तत्रेत्यर्थः । **स्रजोविनिरितीति** । इति विशेषशास्त्रेति सम्बन्धः । इत्यनेनेति प्रत्ययस्यापीति पाठः ।

**स०व्र०**— ननु शून्यं च मायी चेति द्वन्द्वे इन्प्रत्ययानुपपत्तिः । व्रीह्यादौ मायाशब्दमात्रस्यापठितत्वेन तन्मात्रादिन्प्रत्ययसम्भवेऽपि शून्यमायाशब्दात्तदनुपपत्तेरित्यत आह **तत्र तदेवेति** ॥ तथा च शून्यमायाशब्दस्य मायाशब्दान्तत्वान्नोक्तदोष इति भावः ।

* * *

५९ **सु०— प्रतिपक्षान्तरमाह दुःखमिति ।**

## अनु०— दुःखं दुःखादभिन्नत्वान्मोक्षोऽपि स्यादसंशयम् ।

**मोक्ष** इति शून्यं ब्रह्म चोच्यते । प्रतिवादिभ्यां तथाऽभ्युपगतत्वात् । स मोक्षो दुःखात्मा स्यात् **दुःखादभिन्नत्वात्** । दुःखप्रतियोगिकभेद(रहितत्वा)शून्यत्वात् प्रसिद्धदुःखवत् इत्यर्थः । शून्यब्रह्मणोर्दुःखत्वे तद्भावापत्तिः न पुरुषार्थ इति सिद्ध्यति । **अपि**-शब्दः प्रतिपक्षान्तरसमुच्चयार्थः । असंशयमिति व्याप्तेर्निश्चितत्वमाचष्टे ।

दुःखप्रतियोगिकभेदाभावः कुत इत्यत आह **भेद इति** ।

## भेदे सद्वैततैव स्यात्

**दुःखात्** 'शून्यब्रह्मणोरि'ति शेषः । तथा चापसिद्धान्त इति भावः ।

**परि०— प्रतिपक्षान्तरसमुच्चयार्थ इति** । पूर्वोक्तप्रतिपक्षाभ्यां अस्य समुच्चयार्थ इत्यर्थः ।

**कं०रा०— प्रतिवादिभ्यामिति** । शून्यवादिमायावादिभ्यां शून्यब्रह्मणोर्मोक्षत्वेनाभ्युपगतत्वादित्यर्थः । दुःखादिभिन्नत्वादित्यनेन दुःखतादात्म्यं हेतुतयोच्यत इति प्रतीयते । तच्चायुक्तम् । शून्यब्रह्मणोः प्रतिवादिभ्यां दुःखात्मकत्वस्यानङ्गीकृतत्वेनासिद्धेः साध्याविशेषाच्चेत्यत आह **दुःखप्रतियोगिकभेदरहितत्वादिति** ॥ **असंशयमितीति** । असंशयमित्यनेन यद्दुःखप्रतियोगिकभेदरहितं तद्दुःखात्मकमिति व्याप्तेर्निश्चितत्वमाहेत्यर्थः ।

**शे०चं०—** साध्यावैशिष्ट्यं परिहरति **दुःखप्रतियोगिकेति** ॥ **प्रतिपक्षान्तरेति** । 'न मोक्षो विमतो यस्मादि'त्यादिनोक्तप्रतिपक्षान्तरसमुच्चय इत्यर्थः । अस्तु सद्वैतत्वमित्यत आह **तथा चेति** ।

**स०व्र०— प्रतिपक्षान्तरेति** । निर्दुःखत्वान्न तन्मोक्ष इत्यादिनोक्तप्रतिपक्षान्तरसमुच्चयार्थ इत्यर्थः ।

* * *

**६० सु०— किञ्च दुःखापायस्यात्मनाशेन विना देहादिनाशेनापि सम्भवादन्यथासिद्धिश्च अनुमानस्य । शरीरादिशून्यताऽपि न दुःखध्वंसोपयोगित्वात् पुरुषार्थः । किं नाम आत्मनो निर्दुःखतां प्रति हेतुत्वात् । न हि दुःखं नश्यत्विति कश्चिदाशास्ते । अपि तर्हि निर्दुःखः स्याम् इति ।**

**ननु शून्यभावो ब्रह्मभावो वा भवतां सिद्धश्चेदपसिद्धान्तः, न चेदाश्रयासिद्धिरिति चेन्न । परानुमानेऽप्यात्मशून्यताया असिद्धत्वेन आश्रयासिद्धेः । इयांस्तु विशेषः । यत्पर-प्रसिद्धिमात्रेण प्रतिपक्षः सम्भवतीति ।**

**ननु भोगश्रुतिः सगुणमुक्तिविषयास्त्विति चेन्न । 'परं ज्योतिरुपसम्पद्य स्वेन रूपे-णाभिनिष्पद्यत' इत्युक्तिविरोधात् । निर्दुःखत्वान्मोक्षो न भवतीति विरुद्धमिति चेत् । परमेष्टस्य आत्मनो नाशः पुरुषार्थ इति कथं न विरुद्धम् ।**

**अथ सतो दुःखाद्भेदे सद्वैतता स्यात् । दुःखं तु मिथ्येति चेन्न । अनुभवविरोधादे-रुक्तत्वात् ।**

**बहुजीववादिनं प्रति नान्तिमानुमानमिति न कुचोद्यावकाशः ।**

तदेतत्सर्वमभिसन्धायोपसंहरति **इत्यादीति** ।

**अनु०—** **इत्याद्यमितदोषतः ।**
**हेयं मायामतेनैव सह शून्यमतं बुधैः ॥**

**'सहैवे'ति सम्बन्धः ।**

**परि०—** **अन्यथासिद्धिश्चानुमानस्येति** । आत्मशून्यता पुरुषार्थः दुःखनिवृत्त्युपयोगित्वादिति प्रागुक्तानुमानस्य, अन्यथा देहादिनाशरूपप्रकारान्तरेणापि, दुःखनिवृत्तेरात्मशून्यताया दुःखनिवृत्त्युपयोगित्वस्यासिद्धिरित्यर्थः । तेन साध्येन विना हेतोरन्यथोपपत्तेरनुक्तेः कथमन्यथासिद्ध्युक्तिरिति शङ्काऽनवकाशः । यद्वा पुरुषार्थपदेन दुःखाभावत्वग्रहः । तथा च दुःखाभावत्वस्यात्मशून्यताया दुःखनिवृत्त्युपयोगित्वादिभावेऽप्युपपत्त्या साध्यस्य हेतुना विनाऽपि योगात् अन्यथासिद्धिरित्येवं योज्यम् ॥ **निर्दुःखतामिति** । दुःखानुत्पत्तिं प्रतीत्यर्थः । तथाच दृष्टान्तः साधनविकल इति भावः। **असिद्धत्वेनेति** । मानाभावादिति भावः ॥ **भोगश्रुतिरिति** । 'जक्षन्नि'त्यादिप्रागुक्तश्रुतिरित्यर्थः ॥ **इत्युक्तेति** । पूर्ववाक्योक्तेत्यर्थः । प्रागुक्तप्रतिपक्षानुमानेऽपि दोषमाशङ्क्य प्रतिबन्द्योत्तरमाह **निर्दुःखत्वादिति** ॥ **उक्तत्वादिति** । 'न दुःखानुभवः क्वापि मिथ्यानुभवतां व्रजेदि'त्यादिना पृथगधिकरणे उक्तत्वादित्यर्थः । श्रुत्यादिविरोध **आदिपदार्थः** । ननु बहुजीववादे एकस्य मुक्तावप्यन्यस्य दुःखवतः सत्त्वेन दुःखाद्भेदराहित्यमसिद्धमित्यत आह **बहुजीवेति** ॥ **तदेतदिति** । किञ्चिद्दुःखाभावस्येत्यादिनोक्तं सर्वमित्यर्थः । *शून्यवादिमायावादिभिरभिमतमोक्षनिरासः ॥*

**गु०दी०—** सति दुःखे खलु दुःखात्मत्वं स्यात् । एकजीवमते तु मोक्षदशायां दुःखमेव नास्ति । किमात्मता साध्यत इत्यत उक्तं **बहुजीववादिनमिति** । **हेयमेव** ।

**यादु०—** 'इत्याद्यमितदोषत' इत्युपसंहारगतादिशब्दार्थं वक्तुमाह **किञ्चेत्यादि** ॥ **अन्यथासिद्धिश्चेति**। नन्वात्मशून्यता पुरुषार्थः दुःखनिवृत्त्युपयोगित्वादित्युक्तानुमानस्य कथमन्यथासिद्धिः । साध्येन विना हेतोरन्यथाऽप्युपपत्तौ ह्यन्यथासिद्धिर्लोके दृष्टा न चात्र तथोच्यते । अतः कथमेतदिति चेदुच्यते **अन्यथासिद्धिश्चेति** । चशब्दोऽनुक्तासिद्धिसमुच्चयार्थः । दूषणान्तरसमुच्चयस्य किञ्चेत्यनेनैव लाभात् । ततश्चान्यथासिद्धिर्यतोऽतोऽनन्यथासिद्धिगर्भोपायत्वरूपानुमानस्यासिद्धिरिति योज्यम् । अतो न कोऽपि दोष इति । सोपाधिकत्वमप्याह **शरीरादिशून्यताऽपीति** । आत्मविशेषितस्य दुःखध्वंसमात्रस्य यदि मुख्यतः पुरुषैरर्थ्यत्वरूपं पुरुषार्थत्वं स्यात्

तदा शरीरादिशून्यतायास्तदुपयोगित्वेन पुरुषार्थत्वं स्यात् । न चैवं किं त्वात्मविशेषितस्यैव दुःखध्वंसस्य मुख्यतः पुरुषैरर्थ्यत्वेन तदुपयोगितयैव । पक्षीभूते त्वात्मनाशे नात्मविशेषितदुःखध्वंसोपयोगित्वं सम्भवति । अतः साधनाव्यापकत्वात् साध्याव्यापकत्वाच्च आत्मविशेषितदुःखध्वंसोपयोगित्वमुपाधिरित्यर्थः । न च आत्माविशेषितस्य दुःखध्वंसमात्रस्य नोक्तरूपं पुरुषार्थत्वमित्येतत् कुत इत्यपेक्षायां तथा अनुभवादित्याह **न हि दुःखमिति** । आत्मविशेषितस्यैव दुःखध्वंसस्य तदित्येतत् कुत इत्यतः अननुभवबलादाह **अपि तर्हीति** ॥ **असिद्धेनेति** । अस्माकमिति शेषः ॥ **उक्तत्वादिति** । 'न दुःखानुभवः क्वापि मिथ्यानुभवतां व्रजेदि'त्यादिनेति शेषः । ननु बहुजीववादिनां मते एकस्य मुक्तिदशायामन्येषां दुःखसद्भावात् तत्प्रतियोगिकभेदवत्त्वेनान्तिममनुमानं बाधितविषयम्। न च भेदे सद्वैततताप्रसङ्ग उक्त इति वाच्यम्। पारमार्थिकभेदाङ्गीकारे हि तथा स्यात्। न चैवम्। व्यावहारिक एवासावङ्गीक्रियते । व्यावहारिकस्यापि तस्य स्वप्रतियोगिकतादात्म्यविरोधित्वस्य लोके दर्शनादित्यत आह **बहुजीववादिनं प्रतीति** । अभ्युपेत्य चैवमुदितम् । वस्तुतस्तु पारमार्थिकभेदवादित्वेन पारमार्थिकमेव दुःखात्मकत्वं साध्यतया अस्मदभिप्रेतम् । न च व्यावहारिको दुःखभेदस्तद्विरोधी । **अतो न** बाधशङ्कावकाश इत्याशयेनोक्तं **कुचोद्येति** ।

**वं०प०—** परकीयानुमाने आत्मनो निर्दुःखतां प्रति हेतुत्वमुपाधिरित्याह **शरीरादिशून्यतामपीति** । दृष्टान्तीकृतेत्यर्थः ॥ **दुःखध्वंसेति** । आत्माविशेषितकेवलदुःखध्वंसमात्रोपयोगित्वादित्यर्थः । तदुभयमुपपादयति **न हि दुःखमिति। निर्दुःखः स्यामिति** । शरीरहानेनेत्यर्थः । अत्र स्यामित्युत्तमपुरुषेणात्मनो भानादिति भावः। तथा च शरीरादिशून्यतायां पुरुषार्थस्यात्मनो निर्दुःखतां प्रति हेतुत्वस्य च विद्यमानत्वात् साध्यव्यापकत्वं सिद्धमिति भावः । पक्षीभूत आत्मशून्यतायां हेतौ सत्यपि उपाधिर्नास्ति आत्मनो नष्टत्वेन अभावादेव आत्मनो निर्दुःखतां प्रति हेतुत्वाभावादिति साधनाव्यापकत्वं द्रष्टव्यमिति स्पष्टत्वान्नोक्तम् । अस्मदुक्तप्रतिपक्षत्रये दूषणमाशङ्कते **ननु शून्यभाव इति** । शून्यभावो ब्रह्मभावो वा न मोक्षः । अदेहत्वादित्याद्यनुमाने पक्षीभूत इत्यर्थः। सममेतत्तवापीत्याह **परानुमान इति** । शून्यभावो ब्रह्मभावो वा पुरुषार्थ इत्यनुमानेऽपीत्यर्थः ॥ **असिद्धत्वेनेति**। पक्षीभूतायाः आत्मशून्यतायाः ब्रह्मभावस्य वा अस्मान्प्रत्यसिद्धत्वेनेत्यर्थः ॥ स्थापनानुमाने आश्रयस्योभयसिद्धत्वमपेक्षितम् । प्रतिपक्षानुमाने तु परप्रसिद्धिरेवातस्तवैवाश्रयासिद्ध्यादिः न तु प्रतिपक्षकर्तॄणामस्माकमित्याशयेनाह **इयांस्त्विति** ॥ **परञ्ज्योतिरिति** । परञ्ज्योतिःशब्दवाच्यनिर्गुणब्रह्मसम्पत्तिरूपपरममुक्तिमत एव स्वरूपाविर्भविनैव जक्षन्नित्यादिना भोगोक्तेः । सगुणमुक्तिविषयत्वाङ्गीकारे तद्विरोधादित्यर्थः ॥ **विरुद्धमिति** । निर्दुःखत्वस्य मोक्षत्वेनैव व्याप्तत्वादिति भावः ॥ **कथं न विरुद्धमिति** ॥ इति प्रतिज्ञापि कथं न प्रमाणविरुद्धेत्यर्थः । आत्मस्वरूपस्य परमेष्टत्वेन तन्नाशस्य पुरुषेणार्थ्यत्वाभावादिति भावः । 'भेदे सद्वैततैव स्यादि'त्येतदयुक्तमित्याशङ्कते **अथेति** । **सतः** सत्यभूताद्दुःखादित्यर्थः । ननु बहुजीववादिमते एकस्य मुक्तिदशायामन्येषां दुःखसद्भावेन दुःखप्रतियोगिकभेदसद्भावात् तं प्रति मोक्षः दुःखात्मा दुःखप्रतियोगिकभेदरहितत्वादित्यन्तिमानुमाने स्वरूपासिद्धिरित्यत आह **बहुजीववादिनं प्रतीति** ।

**कं०रा०— किञ्च दुःखापायस्येति** । आत्मनाशाभावेऽपि देहादिनाशेनैव दुःखापायस्य सम्भवादन्यथासिद्धेरात्मनाशस्य दुःखनिवृत्तिहेतुत्वाभावादात्मशून्यता पुरुषार्थः दुःखनिवृत्तिहेतुत्वादित्यनुमानस्यासिद्धिश्चेत्यर्थः । चशब्दः पूर्वोक्तप्रतिपक्षरूपदूषणसमुच्चयार्थः । अन्यथासिद्धिश्च अनुमानस्येति पाठे उक्तरीत्याऽन्यथासिद्धिः अतः परोक्तहेतोरसिद्धिश्चेत्यध्याहारेण योजनीयम् ॥ **शरीरादिशून्यताऽपीति** । अग्नीषोमीयहिंसा पापसाधनं हिंसात्वात् व्यर्थहिंसावदित्यत्र व्यर्थहिंसाऽपि न हिंसात्वात् पापसाधनं किन्तु निषिद्धत्वादित्युक्ते पापसाधनत्वे निषिद्धत्वस्यैव प्रयोजकत्वात् यथा निषिद्धत्वमुपाधिरित्युक्तं भवति तथाऽत्रापि शरीरादिशून्यताऽपीत्यादिना पुरुषार्थत्वे आत्मनिष्ठनिर्दुःखताहेतुत्वस्यैव प्रयोजकत्वात् परोक्तानुमाने तदुपाधिरित्युक्तं भवति । पुरुषार्थत्वरूपसाध्यवत् सुखदुःखसाधनकण्टकाद्यभावेऽपि आत्मनिष्ठनिर्दुःखताहेतुत्वस्य सत्त्वेन साध्याव्यापकत्वात् । दुःखध्वंसोपयोगित्वरूपसाधनवत्त्वेन पराभिमतायामात्मशून्यतायाम् आत्मनिष्ठनिर्दुःखताहेतुत्वस्य अभावेन साधनाव्यापकत्वाच्च । यद्यप्यस्य शुद्धसाध्याव्यापकत्वं तथाऽपि साधनावच्छिन्नसाध्यव्यापकत्वं बोद्धव्यम् । यद्यपि प्रवृत्तेऽनुमाने उपाधेः प्रतिपक्षोत्थापकत्वेन सिद्धान्तिमते दूषणत्वात् प्रतिपक्षे प्रतिपक्षान्तरवदुपाध्युद्भावनं व्यर्थमिवाभाति । तथाऽपि परमते तस्य व्यभिचारोन्नायकत्वेनापि दूषकत्वात् परीत्या परो दूषणीय इत्याशयेन तदुद्भावनं कृतमिति ध्येयम् । पुरुषार्थत्वे दुःखध्वंसोपयोगित्वमात्रं न प्रयोजकं किं तु आत्मनिष्ठनिर्दुःखताहेतुत्वमेवेत्येतदुपपादयति **न हीति** । शरीरादिशून्यताऽपीत्यादिग्रन्थः परोक्तहेतोरप्रयोजकत्वव्युत्पादनतया व्याख्येयः ॥ **ननु शून्यभाव इति** । शून्यत्वं ब्रह्मत्वं वा मोक्षो न भवति निर्दुःखत्वात् इत्यत्र पक्षीकृतः शून्यभावो ब्रह्मभावो वा भवतां सिद्धश्चेत् अपसिद्धान्तो न चेत् आश्रयासिद्धिरित्यर्थः ॥ **परानुमानेऽपीति** । आत्मशून्यता पुरुषार्थः दुःखनिवृत्त्युपयोगित्वादिति परकीयानुमानेऽपीत्यर्थः ॥ **ननु भोगश्रुतिरिति** । 'स तत्र पर्येति जक्षन् क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वे'त्यादिभोगश्रुतिः सगुणमुक्तिविषयाऽस्तु । तथा च भोगान्यथाऽनुपपत्त्या सगुणमुक्तानां शरीरसद्भावेऽपि परममुक्तानां तदभावेन 'अशरीरं वाव सन्तमि'त्यादिश्रुतेः प्राकृतशरीरराहित्यपरत्वेन सङ्कोचायोगाददेहावस्थाया एव मोक्षसिद्धेः । विमतो ब्रह्मभावो न मोक्षः अदेहत्वादिति सिद्धान्त्युक्तप्रतिपक्षानुमानं श्रुतिबाधितमिति भावः ॥ **इत्युक्तिविरोधादिति** । सगुणमुक्तौ स्वरूपेणाभिनिष्पद्यत इत्युक्तस्य स्वरूपाविर्भावस्यायोगान्न भोगश्रुतेः सगुणविषयत्वम् । तथाच तस्याः परममुक्तिविषयत्वात् तत्र च भोगान्यथाऽनुपपत्त्या शरीरसद्भावसिद्धेः 'अशरीरं वाव सन्तमि'त्यादिश्रुतेः प्राकृतशरीरराहित्यपरत्वावश्यम्भावेन अदेहत्वावस्थाया एव मोक्षत्ववादिन्याः श्रुतेरभावान्न तद्बाधः सिद्धान्त्युक्तप्रतिपक्षानुमानस्येति भावः । शून्यत्वं ब्रह्मत्वं वा मोक्षो न भवति निर्दुःखत्वादिति सिद्धान्त्युक्तप्रतिपक्षानुमाने विरोधं शङ्कते **निर्दुःखत्वादिति** । मोक्षो दुःखात्मा स्यात् दुःखप्रतियोगिकभेदरहितत्वादित्यत्र मोक्षत्वेनाभिमतयोः शून्यब्रह्मणोर्दुःखाद्भेदे च तदा स्यादिति यदुक्तं तत्र शङ्कते **अथ सत इति** । सतो दुःखाच्छून्यब्रह्मणोर्भेदे सद्वैतता स्यात् । प्रतियोगिनः सत्त्वे तद्भेदस्यापि सत्त्वावश्यम्भावात् प्रतियोगिभूतं दुःखं तु मिथ्या । ततस्तत्प्रतियोगिकभेदस्यापि मिथ्यात्वात् तादृशभेदेऽङ्गीक्रियमाणे सद्वैततापत्तिर्नेति भावः । यद्वा सतो दुःखाच्छून्यब्रह्मणोर्भेदेऽङ्गीक्रियमाणे खलु दुःखमादाय सद्वैतत्वापादनं युज्यते । प्रतियोगिभूतं दुःखं तु मिथ्या । अतः कथं तत्प्रतियोगिकभेदेऽङ्गीक्रियमाणे प्रतियोगि-

सत्त्वमादाय सद्वैततापादनमित्याशयः । अथवा, सतो दुःखाच्छून्यब्रह्मणोर्भेदाङ्गीक्रियमाणे हि प्रतियोगिदुःखसत्त्वं तद्भेदसत्त्वं चादाय सद्वैततापादनं युक्तं प्रतियोगिभूतं दुःखं तु मिथ्या । ततस्तत्प्रतियोगिकभेदस्यापि तादृशत्वान्नोभयसत्त्वमादाय सद्वैततापादनं युक्तमित्यभिप्रायः ॥ **अनुभवेति** । 'मिथ्यात्वमपि बन्धस्य न प्रत्यक्षविरोधत' इत्यादिना दुःखमिथ्यात्वेऽनुभवविरोधादेरुक्तत्वेन प्रतियोगिभूतदुःखस्य सत्त्वावश्यम्भावात् तत्प्रतियोगिकभेदे शून्यब्रह्मणोरङ्गीक्रियमाणे उभयसत्त्वमादाय सद्वैततापादानं वज्रलेपायितम्, अतः शून्यब्रह्मणोर्दुःखप्रतियोगिकभेदो नेत्येवाङ्गीकार्यमिति दुःखप्रतियोगिकभेदरहितत्वं नासिद्धमिति भावः । नन्वेकजीववादिमते एकमुक्तिकालेऽन्यो दुःखादिकमनुभवतीत्यन्याभावेन मोक्षदशायां दुःखस्यैवाभावात् । मोक्षो दुःखात्मा स्यात् दुःखप्रतियोगिकभेदरहितत्वादिति दुःखात्मत्वानुमानमयुक्तमित्यत आह **बहुजीववादिनमिति** । बहुजीववादिमते चैकमुक्तिकालेऽन्यदीयदुःखस्य विद्यमानत्वाद्दुःखप्रतियोगिकभेदरहितत्वेन पराभिमतमोक्षस्य दुःखात्मत्वानुमानं प्रत्युक्तमिति नोक्तकुचोद्यावकाश इत्यर्थः ।

**शे०चं०**— इत्याद्यभिमतदोषत इत्युपसंहारभाष्ये आदिपदवैयर्थ्यमाशङ्क्य दोषान्तरपरिग्रहार्थत्वान्न तदिति भावेनादिपदसङ्ग्राह्यं दोषान्तरं स्वयमुपदर्शयति **किञ्चेति** ॥ **अन्यथासिद्धिश्चेति** । अत्र चशब्दोऽसिद्धिपरिग्रहार्थः न तु दूषणान्तरसमुच्चयार्थः । तस्य किञ्चेत्यनेनैव लब्धतया तदर्थत्वे चशब्दवैयर्थ्यात् । एवं च अन्यथासिद्धिर्यतोऽतोऽनन्यथासिद्धिपरिगर्भोपायत्वरूपानुमानस्यासिद्धिरिति पदद्वयाध्याहारेण योजना । अन्यथासिद्धिविवरणं '**दुःखापायस्ये**'त्यादि '**सम्भवादि**'त्यन्तम् । सोपाधिकत्वमप्याह **शरीरादिशून्यताऽपीति** । आत्माविशेषितस्य दुःखध्वंसमात्रस्य यदि मुख्यतः पुरुषैरर्थ्यत्वरूपं पुरुषार्थत्वं स्यात् तदा शरीरादिशून्यतायास्तदुपयोगित्वेन पुरुषार्थत्वं स्यात् । न चैवम् । किं त्वात्मविशेषितस्य दुःखध्वंसस्य मुख्यतः पुरुषार्थत्वात् तदुपयोगित्वेनैव तस्य पुरुषार्थत्वम् । पक्षीभूते त्वात्मनाशे नात्मविशेषितदुःखध्वंसोपयोगित्वं सम्भवति । अतः साधनाव्यापकत्वात् साध्यव्यापकत्वाच्च आत्मविशेषितदुःखध्वंसोपयोगित्वमुपाधिरिति भावः । आत्माविशेषितदुःखध्वंसमात्रस्य नोक्तरूपं पुरुषार्थत्वमिति कुत इत्यतः तथा अननुभवादित्याह **न हीति** । आत्मविशेषितदुःखध्वंसमात्रस्य तदित्येतत् कुत इत्यतः अनुभवबलादित्याह **अपि तर्हीति** । ननु प्रतिपक्षतयोपन्यस्तानुमानेष्वाभासानुद्धारात् 'इत्याद्यभिमतदोषत' इत्युपसंहारानुपपत्तिमाशङ्क्य भाष्यकारीयस्य 'भेदे सद्वैततैव स्यादि'त्यनुमानविशेषे असिद्धिपरिहारस्य सर्वत्राभासोद्धारसूचकत्वाद्युक्त एवोपसंहार इत्यभिप्रेत्य तत्सूचितं तदुद्धारं दर्शयितुं तत्र तत्र सम्भावितान् दोषानाशङ्क्य परिहरति **नन्वित्यादिना** । ततश्चासमानबलत्वान्न प्रतिपक्षत्वमिति भावः ॥ **असिद्धत्वेनेति** । अस्माकमिति शेषः । **आश्रयासिद्धेरिति** । ततश्च समानबलत्वात् प्रतिपक्षत्वमविकलमिति भावः । अङ्गीकृत्यैव च प्रतिपक्षेऽप्याश्रयासिद्धेर्दूषणत्वं प्रतिबन्द्येदं समाधानं कृतम् । वस्तुतस्तु प्रतिपक्षे न तस्याः दूषणत्वमित्याह **इयांस्त्विति** ॥ **परप्रसिद्धिमात्रेणेति** । आश्रयस्येति शेषः ।

**सगुणमुक्तिविषया इति** । तथा च देहत्वानुमानस्य कालात्ययापदिष्टत्वेनासमानबलत्वान्न प्रतिपक्षत्वमिति भावः ॥ **उक्तविरोधादिति** । ततश्च कालात्ययापदिष्टत्वाभावेन समबलत्वात् प्रतिपक्षत्वमेवेति भावः ।

निर्दुःखत्वानुमानस्य विरुद्धत्वेनासमानबलत्वान्न प्रतिपक्षत्वमित्याशङ्कते **निर्दुःखत्वादिति** ॥ **विरुद्धमिति** । निर्दुःखत्वस्य मोक्षत्वव्याप्तत्वादिति भावः । **परमेष्टस्येति** । ततश्च परमेष्टनाशस्यापुरुषार्थत्वव्याप्तत्वेन स्थापनानुमानस्यापि विरुद्धत्वेन समानबलत्वात् प्रतिपक्षत्वमविकलमिति भावः ।

दुःखप्रतियोग्गिकभेदरहितत्वानुमानस्यासिद्धत्वेन असमानबलत्वान्न प्रतिपक्षत्वमित्याशङ्कते **अथेति** ॥ **उक्तत्वादिति** । 'न दुःखानुभवः क्वापि मिथ्यानुभवतां व्रजेदि'त्यादिनेति शेषः । ततश्चासिद्धेरभावेन समानबलत्वात् प्रतिपक्षत्वमेवेति भावः ।

ननु विमतो मोक्षो दुःखात्मा दुःखप्रतियोगिकभेदरहितत्वात् प्रसिद्धदुःखवदित्यनुमानं न बहुजीववादिनः प्रति सम्भवति । तेन दुःखप्रतियोगिकभेदरहितत्वस्यानभ्युपगमेन हेतोरसिद्धत्वात् । तथा हि । लोकेऽनेकेषु मायामयान् गजतुरगादीन् पश्यत्सु यस्य कारणविशेषेण मायाऽपगच्छति स एव तान्न पश्यति । अन्ये तु पश्यन्त्येव । तथा द्वैतदर्शनकारणमज्ञानं यस्यापगतं स एव तं न पश्यति । अन्येषां तु दुःखादिप्रपञ्चदर्शनमनुवर्तत एवेति खलु बहुजीववादिनो मन्यन्ते । तत्कथं तान्प्रत्ययं प्रसङ्ग इत्यतो न च तान्प्रतीदमनुमानं विरोधितया अस्माभिरुपन्यस्यते येन हेतोरसिद्धिः स्यात् किं त्वेकजीववादिनः प्रत्येवेत्याशयवानाह **बहुजीववादिनं प्रति नान्तिममनुमानमितीति** । केचित्तु भास्करादिमते दुःखप्रतियोगिकभेदस्य सत्त्वेन तद्राहित्यमसिद्धम् । न च 'भेदे सद्वैततैव स्यादि'त्युक्तरीत्या 'दुःखस्य सत्यत्वं स्यादि'त्यादिना हेत्वसिद्धिः परिहृतेति वाच्यम् । तन्मिथ्यात्वमङ्गीकुर्वाणान्प्रति तस्य सम्भवेऽपि तत्सत्यत्वमङ्गीकुर्वाणं भास्करं प्रति दुःखादेः सत्त्वाङ्गीकारे बाधकाभावेन असिद्धितादवस्थ्यादित्यत आह **बहुजीववादिनं प्रतीति** व्याचक्षते ।

**तदेतत्सर्वमिति** । किञ्चेत्यादिनोक्तं सर्वमित्यर्थः । मूले यथाश्रुतैवकारसम्बन्धवैयर्थ्यमाशङ्क्य भिन्नक्रमतया सम्बन्धमाह **सहैवेति सम्बन्ध इति** ।

**वा०र०— न तु दूषणान्तरेति** । आत्माभावे पुमर्थः क इत्यादिना प्रागुक्तदूषणान्तरेत्यर्थः । **किञ्चेत्यनेनेति** । निपातसमुदायेनेत्यर्थः । कथमसिद्धिरित्यत आह **एवं चेति** ॥ **गर्भोपायत्वरूपेति** । अन्यथासिद्धिसाधनादिप्रयोगस्याप्यनुमानत्वप्रसङ्गादिति भावः । यतोत इति पदद्वयेति पाठः । **अतः साधनाव्यापकत्वादिति** । आत्मनाशे सत्यपि दुःखनिवृत्त्युपयोगित्वे आत्मविशेषितदुःखध्वंसोपयोगित्वाभावात्तदव्यापकत्वमित्यर्थः । उपसंहारानुपपत्तिरित्याशङ्क्येति स्वरसः पाठः । निर्दुःखस्य मोक्षत्वेति पाठः । **अनुमानस्यासिद्धत्वेनेति** । भेदस्यैव सत्त्वान्न तद्ग्राहित्वमित्यसिद्धिरित्यादौ वाच्यम् । तर्हि सद्वैततेत्युक्ते दुःखस्य मिथ्यात्वान्न सद्वैतताप्रसङ्ग इत्युत्तरमेव सिद्धत्वेनेत्यर्थः । एवं जीवत्वपक्षे त्वित्युत्तरानुभाष्यमूलानुसारेणाऽऽह **ननु विमतो मोक्ष इत्यादि** । तैर्दुःखप्रतियोगिकेति पाठः । तेनेति पाठेऽपि मूलानुसारेणैकवचनमित्यप्याहुः । **सत्यमेवं बहुजीववादिन इति** । बहुजीववादिन एवम्भूता इत्येतत्सत्यमित्यर्थः । मूले एकवचनप्रयोगेऽपि नैक एव

बहुजीववादा किन्त्वनेका इति सूचनाय बहुजीववादिनः प्रतीति बहुवचनम् । अत एवैकजीववादिनः प्रतीति तत्रापि बहुवचनमुक्तम् । प्रति चान्तिममनुमानमित्यादिर्नञ्रहितः पाठोऽपि दृश्यते स पाठो न मन्तव्य इत्याशयेन नान्तिममनुमानमित्यधिकं प्रतीकतयोपात्तम् । **केचित्त्विति** । मायाशून्यवादिनोरेव वक्ष्यमाणरीत्या द्वित्वेन बहुजीववादिपदेन मायिशून्यवादिप्रभेदस्यैव ग्राह्यतया भास्करादिग्रहणेनास्वरसोऽत्र बोध्यः ।

**स०व्र०— अन्यथासिद्धिश्चानुमानस्येति** । दुःखनिवृत्त्युपयोगित्वं नाम दुःखनिवृत्तिकारणत्वम् । तच्च अनन्यथासिद्धनियतपूर्ववर्तित्वम् । प्रकृते तु शरीरनाशेन अन्यथासिद्धिरित्यर्थः । दृष्टान्तदोषमप्याह **शरीरादि-शून्यतापीति** ॥ **परानुमानेऽपीति** । आत्मशून्यता पुरुषार्थो दुःखनिवृत्त्युपयोगित्वात् इति परानुमानेऽपीत्यर्थः। **उक्तत्वात्** 'न दुःखानुभवः क्वापि मिथ्यानुभवतां व्रजेदि'त्यादिनेति भावः । विमतो मोक्षो दुःखात्मा दुःख-प्रतियोगिकभेदरहितत्वात् प्रसिद्धदुःखवदित्यनुमानमयुक्तम् । तद्धि एकजीववादिनः प्रति सम्भवति न तु बहुजीव-वादिनः । तेन दुःखप्रतियोगिकभेदरहितत्वस्य अनभ्युपगमेन हेतोरसिद्धत्वात् । यथा हि लोके अनेकेषु माया-मयान् गजतुरगादीन् पश्यत्सु यस्य कारणविशेषेण मायाऽपगच्छति स एव तान्न पश्यति अन्ये तु पश्यन्त्येव। तथा द्वैतदर्शनकारणमज्ञानं यस्यापगतं स एव तन्न पश्यति । अन्येषां तु दुःखादिप्रपञ्चदर्शनमनुवर्तत एवेति खलु बहुजीववादिनो मन्यन्ते । तत् कथं तान्प्रति अयं प्रसङ्ग इत्यतः सत्यमेवं बहुजीववादिनो मायावादिनः । न च तान्प्रतीदमनुमानं विरोधितया अस्माभिरुपन्यस्यते । येन हेतोरसिद्धिः स्यादित्याह **बहुजीववादिनं प्रतीति** । अत्र नान्तिममनुमानमित्येव पाठः । **कुचोद्यावकाश इति** । दुःखप्रतियोगिकभेदरहितत्वरूपस्य असिद्धिलक्षण-कुचोद्यावकाश इत्यर्थः । यद्वा ननु भास्करादिमते दुःखप्रतियोगिकभेदस्य सत्त्वेन तद्राहित्यमसिद्धं न च 'भेदे सद्वैततैव स्यादि'त्युक्तरीत्या 'दुःखस्य सत्त्वं स्यादि'त्यादिना हेत्वसिद्धिः परिहृतेति वाच्यम् । तन्मिथ्यात्वमङ्गी-कुर्वाणान्प्रति तस्य सम्भवेऽपि तत्सत्यत्वमङ्गीकुर्वाणं भास्करं प्रति दुःखादेः सत्त्वाङ्गीकारे बाधकाभावादसिद्धि-तादवस्थ्यादित्यत आह **बहुजीववादिनं प्रतीति** ।

**॥ इति परोक्तानुमानस्य दूषणान्तरं शून्य-मायावादयोः तिरस्कार्यत्वञ्च ॥**
**॥ इति मोक्षविषये बौद्ध-मायामतयोः निराकरणम् ॥**

* * *

**॥ अथ विज्ञानवादिनां मतनिरासः ॥**
**॥ अथ 'अद्वितीयविज्ञानत्वप्राप्ति'रूपमोक्षे दूषणातिदेशसमर्थनम् ॥**

६१ **सु०— विज्ञानवाद्यभिमतं मोक्षस्वरूपमप्युक्तदोषेणातिदिशति एवमिति ।**

## अनु०— एवं विज्ञानवादोऽपि

शून्यवादिमायावाद्यभिमतमोक्षवत् **विज्ञानवाद्यभिप्रेतोऽपि** मोक्षो हेय इत्यर्थः । ननु विज्ञानवादिनो विज्ञानं तत्त्वमाहुः तस्यापि क्षणिकत्वं स्वकर्मकप्रकाशकत्वलक्षणं स्वप्रकाशत्वं च । न चैवं पूर्वकावित्यतो वैषम्यात् कथमतिदेश इत्यत आह **ज्ञानेति** ।

**ज्ञानमात्रविशेषतः ।**
**तस्यापि भङ्गुरत्वादिविशेषमपहाय हि ।**
**अद्वैततामतं साक्षादुक्तदोषस्ततो भवेत् ॥**

ज्ञानमात्रं चासौ विशेषश्च **ज्ञानमात्रविशेषः** । तं इति द्वितीयार्थे तसिः । यस्मात् ज्ञानमात्रविशेषं तस्य ज्ञानस्य **भङ्गुरत्वादिविशेषमप्यपहाय** विज्ञानवादोऽपि **अद्वैततामतं** ज्ञातव्यम् । न विद्यते द्वैतं यस्य तत्त्वस्य तदद्वैतं तस्य भावः अद्वैतता । तस्या मतम् **अद्वैततामतम्** । **ततः** कारणात् **उक्तदोषः** अपि समो **भवेत्** ।

इदमुक्तं भवति । अस्तु विज्ञानवादस्य पूर्वस्मात् कश्चिद्विशेषः । तथाऽपि स प्रकृतानुपयोगित्वान्नादरणीयः । मोक्षस्वरूपं तु प्रकृतं समानम् । प्रतिपन्नं जीवभावं विहाय अद्वितीयविज्ञानत्वापत्तिर्मुक्तिरिति विज्ञानवादिनाऽप्यङ्गीकृतत्वात् । अतो युक्त एवातिदेश इति । यद्वा ज्ञानमात्रविशेषं तस्य भङ्गुरत्वादिविशेषं चापहाय विज्ञानवादोऽपि साक्षादद्वैततामतं ज्ञातव्य इत्यनेनेदमभिप्रैति । न कश्चिद्विज्ञानवादस्य पूर्वाभ्यां विशेषः । ज्ञानमिति विशेषस्य शब्दमात्रत्वेन हेयत्वात् । न हि ज्ञानत्वं नाम धर्मोऽभ्युपगम्यते परेण । भङ्गुरत्वादिकं तु तेनैव कल्पितमित्युक्तत्वाद्धेयमेव । न तु वस्तुतो मतभेदहेतुः । **यथोक्तं** 'तत्र सन्ततिभेदश्चे'त्यादि अतो युक्तोऽतिदेश इति । अतिदेशप्रकारस्तु स्पष्ट एव ।

**परि०—** **पूर्वकौ** पूर्वोक्तावित्यर्थः ॥ **तसिरिति** । 'आद्यादिभ्य उपसङ्ख्यानं' इत्युक्तेः आद्यादेराकृतिगणत्वादिति भावः । ननु वैषम्यात् कथमतिदेश इत्यस्य नानेनोत्तरमित्यतो व्यनक्ति **इदमुक्तमिति** ॥ **यथोक्तमिति** । समयपादीयानुव्याख्याने 'तत्र सन्ततिभेदश्च स्वभेदोऽभेद एव च। कल्पिता' इत्यादिना एतन्मतानुवादप्रस्तावे उक्तमित्यर्थः ॥ **स्पष्ट इति** । 'एतादृशानां पक्षाणां दूषणं प्रभुणा कृतमि'त्यादिनोक्तदोषाणामत्रापि योजयितुं शक्यत्वादित्यर्थः ।

**गु०दी०— न तु वस्तुतो मतभेदहेतु**रित्यनेनापहाय हापयित्वेत्यन्तर्णीतणिजन्तः प्रयोगः सूचितः ।

**वं०प०— पूर्वकौ** शून्यवादिमायावादिनौ । कश्चिद्विशेषो भङ्गुरत्वादिरूपः । **पूर्वाभ्यां** शून्यवादिमायावादिभ्याम् ॥ **स्पष्ट एवेति** । अहमिति परमप्रेमास्पदतया साक्षिणाऽनुभूयमानाकारापगमस्य तेनाऽप्यङ्गीकारेण तन्नाशस्यापुरुषार्थत्वमेवेत्यादिदूषणप्रकारातिदेशः । तथोक्तरूपे मोक्षेऽनुमानविरोधातिदेशश्च स्पष्ट इत्यर्थः ।

**कं०रा०— न चैवम्पूर्वकाविति** । पूर्वकौ शून्यवादिमायावादिनौ तु नैवमाहतुरित्यर्थः ॥ **द्वितीयार्थ इति** ॥ 'सार्वविभक्तिकस्तसिरि'ति द्वितीयार्थे तसिरिति भावः ॥ **विज्ञानवादोऽपीति** । विज्ञानवादोऽप्यद्वैतता-मतत्वेन ज्ञातव्य इत्यर्थः ॥ **तत्र सन्ततिभेदश्चेति** ॥ 'तत्र सन्ततिभेदश्च स्वभेदो भेद एव च । कल्पिताः प्रतिभासन्ते नानासंवृतिभूमिषु' । तत्र ज्ञानज्ञेययोर्भेदज्ञानसन्ततीनां परस्परभेदः स्वभेद एकैकस्यामपि सन्ततौ पूर्वोत्तरज्ञानभेदश्च नानासंवृतिभूमिषु नानासंवृतिकारणकासु तासु तासु निमित्तभूतासु सतीषु कल्पिता एव प्रतिभासन्त इति विज्ञानवादिनोक्तत्वात् । ज्ञानस्य क्षणभङ्गुरत्वादिकं कल्पितमिति तेनैवोक्तमिति भावः । न च वाच्यमनुश्लोक आचार्यकृतो न तु विज्ञानवादिना तथोक्तमिति । भेदस्तु भ्रान्तिबुद्ध्यैव दृश्यते अंशविवादद्वयं प्रति विज्ञानवाद्युक्तस्यैव प्रमेयस्याचार्यैः समयपादेऽनेन श्लोकेनानूदितत्वात् ।

**शे०चं०—** कर्मप्रवचनीयेन प्रतिना योगे या पञ्चमी विहिता तदन्तादेव प्रतियोगे पञ्चम्यास्तसिरिति तसिविधानात् । प्रकृते च कर्मप्रवचनीयप्रतियोगाभावेन पञ्चम्या एवासम्भवेन तदन्तात्तसेरयोगात् पञ्चम्यन्त-स्यापहायेत्यनेनान्वयानुपपत्तेश्च द्वितीयार्थात् तसिरित्याह **द्वितीयार्थे तसिरिति** । तस्यादित उदात्तमर्धह्रस्वमिति सूत्रज्ञापितादाद्यादिभ्य उपसङ्ख्यानमिति वार्तिकादिति भावः । मूले तत इति श्रवणात् तदपेक्षितयस्मादित्यर्थतया हिशब्दं योजयति **यस्मादिति** ॥ **भङ्गुरत्वादिविशेषमपीति** । अनेन मूले तस्यापीत्यपिशब्दो भिन्नक्रम इत्युक्तं भवति । आदिपदेन स्वप्रकाशत्वपरिग्रहः । अद्वैतमतमित्येतावता पूर्तेस्तल्प्रत्ययवैयर्थ्यमित्याशङ्क्य परिहरति **न विद्यत इति** । ननु वैषम्योपदर्शनेनातिदेशप्रयोजकस्य मतसाम्यस्याभावात् प्राप्ताया अतिदेशानुपपत्तिशङ्काया नानेन वाक्येन परिहारः । अत्र भङ्गुरत्वादिविशेषमपहाय हीत्यादिना मतवैषम्यस्योपपादितत्वादित्यत आह **इदमुक्तं भवतीति** । सर्वांशे साम्यस्यातिदेशेऽप्रयोजकत्वान्निराकार्यांशसाम्यस्यैव च तत्प्रयोजकत्वात् तस्य च प्रकृतेऽपि सद्भावान्नातिदेशानुपपत्तिरित्येवंपरतया समाधानमभिहितम् । इदानीं सर्वांशसाम्यस्यैव तत्र प्रयोजक-त्वेऽपि प्रकृते तस्यापि सद्भावान्नानुपपत्तिरित्याशयेन वैषम्योपदर्शनपरभाष्यतात्पर्यकथनेन मतसाम्योपदर्शनपूर्वक-मतिदेशमुपपादयति **यद्वेति** । ज्ञानमिति विशेषस्य शब्दमात्रत्वमेव कथं येन हेयत्वमित्यत आह **न हि ज्ञानत्वं नामेति** । तथा सति तेनैव सद्वितीयत्वापत्त्या अपसिद्धान्तापातादिति भावः । भङ्गुरत्वादेः कल्पितत्वे ज्ञापकमाह **यथोक्तमिति** । 'न भावोऽनुपलब्धेरि'त्यधिकरणनिवर्त्यपूर्वपक्षप्रदर्शनावसर इति (भावः) । तत्र त्रिविधभेदस्य कल्पितत्वप्रतिपादनमुखेन ज्ञानव्यतिरिक्तस्य सर्वस्यापि कल्पितत्वसमर्थनात् तत्सिद्धिरिति भावः । अस्त्वेवं मतसाम्यं तथाऽप्येवमित्युक्तोऽतिदेशस्तु कथमित्यत आह **अतिदेशेति** । 'आत्माभावे पुमर्थः क' इत्यादिनोक्त-समस्तदूषणातिदेशप्रकारः स्पष्ट इत्यर्थः ।

**वा०र०—** प्रतियोगे पञ्चम्यास्तसिरिति सूत्राप्रवृत्तिवर्णनपूर्वकं तत्सूत्रीयवार्तिकेन तसिमुपपादयति **कर्मप्रवचनीयेनेत्यादिना** ।। **साम्यस्याभावादिति** । साम्याभावमुपपाद्येति ल्यब्लोपनिमित्ता पञ्चमी । वैषम्यबलेन प्राप्तशङ्कापरिहाराय वैषम्यस्यैवाभिधानायोग इति भावः । तदर्थं मतवैषम्यस्योपपादितत्वादित्येतद्वैषम्यस्यैवोपपादितत्वादिति योज्यम् । **पूर्वपक्षप्रदर्शनावसर इतीति** । अनुव्याख्यान इति शेषः ।

**।। इति 'अद्वितीयविज्ञानत्वप्राप्ति'रूपमोक्षे दूषणातिदेशसमर्थनम् ।।**

* * *

**।। अथ कालत्वहेतुकानुमानेन तदभिमतमोक्षनिरासः ।।**

६२ **सु०—** अनुमानान्तरमपि तन्निरासार्थमाह **काल इति** ।

**अनु०— कालो न केवलज्ञानी कालत्वात् प्रतिपन्नवत् ।**
**एतयानुमया रोधान्न तादृङ्मोक्षरूपता ।।**

**मोक्षकालोऽद्वितीयज्ञानवान्न भवतीत्यर्थः । प्रतिपन्नवत्** वर्तमानकालवत् । **रोधात्** विरोधात् । तादृक् मोक्षरूपं यस्यात्मनोऽसौ **तादृङ्मोक्षरूपः** तस्य भावः तत्ता । ज्ञानातिरिक्तस्य कल्पितत्वात् वर्तमानकालोऽपि केवलज्ञानीति चेन्न । मुक्तिसंसारयोरविशेषापत्तेः । यस्तु विशेषोऽङ्गीक्रियते तदभाव एवानेन साध्यते ।

**परि०—** 'तादृङ्मोक्षरूपते'ति बहुव्रीहिरित्याह **तादृङ्मोक्षरूपमिति** । अद्वितीयज्ञानतादात्म्यरूपमित्यर्थः । शङ्कते **ज्ञानेति** ।। **यस्तु विशेष इति** । कल्पितद्वितायाभावरूपः संसाराद्विशेषो य इत्यर्थः ।

**यादु०— यस्तु विशेष इति** । मुक्तौ व्यावहारिकद्वितीयाभावरूपौ यः संसाराद्विशेष इत्यर्थः ।

**वं०प०—** वर्तमानकालस्यापि केवलज्ञानित्वोपपादनार्थमुक्तम् । **ज्ञानातिरिक्तस्य कल्पितत्वादिति** । तथा च साध्यवैकल्यमिति भावः । **विशेषः** संसारान्मुक्तेर्व्यावहारिकद्वितीयाभावरूपः ।। **तदभाव इति** । तथा कालो व्यावहारिकद्वितीयाभाववान्नेति साध्यत इत्यर्थः ।

**कं०रा०— यस्तु विशेष इति** । मुक्तेः संसारापेक्षया यो विशेषः परेणाङ्गीक्रियते तदभाव एव कालो 'न केवलज्ञानी'त्यनेन साध्यत इत्यर्थः । तथा च तादृशविशेषाभावस्य दृष्टान्तीकृतवर्तमानकाले सत्त्वान्न साध्यवैकल्यं व्यभिचारो वेति भावः ।

शे०चं०— दूषणाधिक्यप्रसङ्गवारणायाह **विरोधादिति** । दृष्टान्तस्य साध्यवैकल्यं शङ्कते **ज्ञानातिरिक्तस्येति** । **यस्त्विति** । मुक्तौ व्यावहारिकद्वितीयाभावरूपो यः संसाराद्विशेष इत्यर्थः ।

**वा०र०— दूषणाधिक्येति** । रोधलक्षणं दूषणान्तरमिति प्रसङ्गेनेत्यर्थः ।

**॥ इति कालत्वहेतुकानुमानेन तदभिमतमोक्षनिरासः ॥**

* * *

**॥ अथ कालस्य अङ्गीकार्यत्वात् अनुमाने नाश्रयासिद्धिः ॥**

६३ **सु०— ज्ञानव्यतिरिक्तं किमपि नास्तीति मते कालोऽपि नास्त्येव । अतः किमाश्रया अनुमानप्रवृत्तिरित्यत आह यदीति ।**

अनु०— यदि कालोऽपि नेत्याह कदेति प्रश्न उत्तरम् ।
किं वक्ष्यति

**आह विज्ञानवादी । तदा कदा कालो नेति प्रश्ने परेण कृते सति किमुत्तरमसौ वक्ष्यति । निरधिकरणस्याभावस्य निरूपयितुमशक्यत्वात् कालो नेत्येतदपि दुर्निरूपमापद्येतेत्यर्थः । मोक्षावस्थायां कालो नेत्युत्तरं वक्ष्यामीत्याशङ्क्याह यदेति ।**

यदावस्थां वदेत् सा पक्षतां व्रजेत् ।

**वदेत्** कालाभावाधिकरणत्वेनेति शेषः । **तर्हि सा मोक्षावस्था पूर्वानुमाने पक्षतां व्रजेत् । पक्षशब्देन तदेकदेशो धर्मी लक्ष्यते । मोक्षावस्था न केवलज्ञानवतीति प्रतिज्ञास्यत इत्यर्थः ।**

**परि०— परेणेति** । प्रतिवादिनेत्यर्थः । 'साध्यधर्मविशिष्टः पक्षः' इत्याचार्योक्तेः साध्यविशिष्टस्य साध्यवैशिष्ट्यसाधने आत्माश्रयापत्तेराह **पक्षशब्देनेति** ।

**वं०प०—** शङ्कते **ज्ञानव्यतिरिक्तमिति** । साध्यधर्मस्याश्रयासिद्धौ च उदितायां अवस्था आश्रयतां व्रजेदिति वक्तव्यं न तु पक्षतामिति । साध्यधर्मविशिष्टधर्मिण एव पक्षत्वादित्यत आह **पक्षशब्देनेति** ।

कं०रा०— पक्षशब्देनेति । साध्यविशिष्टधर्मिवाचिना पक्षशब्देन तदेकदेशो धर्मी लक्ष्यत इत्यर्थः ।

शे०चं०— किमनेनोक्तं भवतीत्यतः तात्पर्यमाह **निरधिकरणस्येति** । पक्षशब्दस्यात्र साध्यधर्मविशिष्टधर्मिवाचकत्वानुपपत्तेर्लक्षणया धर्मिमात्रपरतामाह **पक्षशब्देनेति** । तदेकदेश इति लक्षणाबीजशक्यसम्बन्धकीर्तनम् ।

**॥ इति कालस्य अङ्गीकार्यत्वात् अनुमाने नाश्रयासिद्धिः ॥**

* * *

**॥ अथ अवस्थात्वहेतुना मोक्षस्वरूपनिराकरणम् ॥**

६४ **सु०— एवं तर्हि कालत्वादिति हेतुः स्वरूपासिद्धः स्यादित्यत आह अवस्थात्वादिति ।**

## अनु०— अवस्थात्वादिति ह्येव हेतुः

यदाऽवस्था पक्षीक्रियते तदा **अवस्थात्वादित्येव हि हेतुः** उच्यते न कालत्वादित्यतो नोक्तदोषः ।

शे०चं०— उक्तदोषः स्वरूपासिद्धिलक्षणः ।

* * *

६५ **सु०— एवं संसारावस्थैव दृष्टान्तीक्रियत इति न दृष्टान्तदोषोऽपीति वाच्यम् । प्रथमोक्तपक्षहेतुदृष्टान्तानां त्यागे प्रतिज्ञाहानिः स्यादिति चेत् । मैवम् । कालाभावस्यावस्थामधिकरणं वदता न किञ्चिदात्महितमाचरितम् । अनुमानान्तरविरोधस्यापरिहार्यत्वात् । न हि प्रतिवादिनिग्रहमात्रेण विरुद्धं तत्त्वं व्यवतिष्ठते ।**

परि०— **प्रतिज्ञाहानिरिति** । येन यद्यथा प्रतिज्ञातं तत्र दूषणे प्राप्ते तेनैव तस्य तथा परित्यागः प्रतिज्ञाहानिरिति तल्लक्षणादिति भावः ॥ **निग्रहेति** । निग्रहस्थानेन प्राप्तपराजयमात्रेणेत्यर्थः ।

वं०प०— तर्हि वर्तमानकालरूपे दृष्टान्ते साधनवैकल्यमित्यत आह **संसारावस्थैवेति** ॥ **अनुमानान्तरेति** । अवस्थापक्षकेत्यर्थः । ननु प्रतिज्ञाहान्या भवतां निग्रहस्तावत्प्राप्तः तन्मात्रेण मदीयं मोक्षतत्त्वं व्यवतिष्ठत इति चेत् तत्राह **न हीति** ।

शे०चं०— दूषणाधिक्यप्रसङ्गवारणायाह **विरोधादिति** । दृष्टान्तस्य साध्यवैकल्यं शङ्कते **ज्ञानातिरिक्तस्येति** । **यस्त्विति** । मुक्तौ व्यावहारिकद्वितीयाभावरूपो यः संसाराद्विशेष इत्यर्थः ।

वा०र०— **दूषणाधिक्येति** । रोधलक्षणं दूषणान्तरमिति प्रसङ्गेनेत्यर्थः ।

**॥ इति कालत्वहेतुकानुमानेन तदभिमतमोक्षनिरासः ॥**

* * *

**॥ अथ कालस्य अङ्गीकार्यत्वात् अनुमाने नाश्रयासिद्धिः ॥**

६३ **सु०— ज्ञानव्यतिरिक्तं किमपि नास्तीति मते कालोऽपि नास्त्येव । अतः किमाश्रया अनुमानप्रवृत्तिरित्यत आह यदीति ।**

**अनु०— यदि कालोऽपि नेत्याह कदेति प्रश्न उत्तरम् ।**
**किं वक्ष्यति**

**आह** विज्ञानवादी । तदा **कदा कालो नेति प्रश्ने** परेण कृते सति **किमुत्तरमसौ वक्ष्यति** । निरधिकरणस्याभावस्य निरूपयितुमशक्यत्वात् कालो नेत्येतदपि दुर्निरूपमापद्येतेत्यर्थः । मोक्षावस्थायां कालो नेत्युत्तरं वक्ष्यामीत्याशङ्क्याह **यदेति** ।

**यदावस्थां वदेत् सा पक्षतां व्रजेत् ।**

**वदेत्** कालाभावाधिकरणत्वेनेति शेषः । तर्हि सा मोक्षावस्था पूर्वानुमाने **पक्षतां व्रजेत्** । पक्षशब्देन तदेकदेशो धर्मी लक्ष्यते । मोक्षावस्था न केवलज्ञानवतीति प्रतिज्ञास्यत इत्यर्थः ।

परि०— **परेणेति** । प्रतिवादिनेत्यर्थः । 'साध्यधर्मविशिष्टः पक्षः' इत्याचार्योक्तेः साध्यविशिष्टस्य साध्यवैशिष्ट्यसाधने आत्माश्रयापत्तेराह **पक्षशब्देनेति** ।

वं०प०— शङ्कते **ज्ञानव्यतिरिक्तमिति** । साध्यधर्मस्याश्रयासिद्धौ च उदितायां अवस्था आश्रयतां व्रजेदिति वक्तव्यं न तु पक्षतामिति । साध्यधर्मविशिष्टधर्मिण एव पक्षत्वादित्यत आह **पक्षशब्देनेति** ।

**कं०रा०**— **पक्षशब्देनेति**। साध्यविशिष्टधर्मिवाचिना पक्षशब्देन तदेकदेशो धर्मी लक्ष्यत इत्यर्थः।

**शे०चं०**— किमनेनोक्तं भवतीत्यतः तात्पर्यमाह **निरधिकरणस्येति**। पक्षशब्दस्यात्र साध्यधर्मविशिष्टधर्मिवाचकत्वानुपपत्तेर्लक्षणया धर्मिमात्रपरतामाह **पक्षशब्देनेति**। तदेकदेश इति लक्षणाबीजशक्यसम्बन्धकीर्तनम्।

**॥ इति कालस्य अङ्गीकार्यत्वात् अनुमाने नाश्रयासिद्धिः ॥**

* * *

**॥ अथ अवस्थात्वहेतुना मोक्षस्वरूपनिराकरणम् ॥**

६४ **सु०— एवं तर्हि कालत्वादिति हेतुः स्वरूपासिद्धः स्यादित्यत आह अवस्थात्वादिति।**

## अनु०— अवस्थात्वादिति ह्येव हेतुः

यदाऽवस्था पक्षीक्रियते तदा **अवस्थात्वादित्येव हि हेतुः** उच्यते न कालत्वादित्यतो नोक्तदोषः।

**शे०चं०**— उक्तदोषः स्वरूपासिद्धिलक्षणः।

* * *

६५ **सु०— एवं संसारावस्थैव दृष्टान्तीक्रियत इति न दृष्टान्तदोषोऽपीति वाच्यम्। प्रथमोक्तपक्षहेतुदृष्टान्तानां त्यागे प्रतिज्ञाहानिः स्यादिति चेत्। मैवम्। कालाभावस्यावस्थामधिकरणं वदता न किञ्चिदात्महितमाचरितम्। अनुमानान्तरविरोधस्यापरिहार्यत्वात्। न हि प्रतिवादिनिग्रहमात्रेण विरुद्धं तत्त्वं व्यवतिष्ठते।**

**परि०**— **प्रतिज्ञाहानिरिति**। येन यद्यथा प्रतिज्ञातं तत्र दूषणे प्राप्ते तेनैव तस्य तथा परित्यागः प्रतिज्ञाहानिरिति तल्लक्षणादिति भावः॥ **निग्रहेति**। निग्रहस्थानेन प्राप्तपराजयमात्रेणेत्यर्थः।

**वं०प०**— तर्हि वर्तमानकालरूपे दृष्टान्ते साधनवैकल्यमित्यत आह **संसारावस्थैवेति**॥ **अनुमानान्तरेति**। अवस्थापक्षकेत्यर्थः। ननु प्रतिज्ञाहान्या भवतां निग्रहस्तावत्प्राप्तः तन्मात्रेण मदीयं मोक्षतत्त्वं व्यवतिष्ठत इति चेत् तत्राह **न हीति**।

**कं०रा०— प्रथमेति** । कालो न केवलज्ञानी कालत्वाद्वर्तमानकालवदिति प्रथमोक्तानां पक्षहेतुदृष्टान्तानां त्यागेन मोक्षावस्था न केवलज्ञानवती अवस्थात्वात्संसारावस्थावदित्यन्येषां पक्षहेतुदृष्टान्तानामुपादाने सिद्धान्तिनः प्रतिज्ञाहानिः स्यात् । येन यद्यथा निर्दिष्टं तेन तस्य तथा परित्यागः प्रतिज्ञाहानिरिति तल्लक्षणस्य सत्त्वादित्यर्थः । प्रथमोक्तपक्षादिन्यायेनानुमानान्तरं वदन्तं सिद्धान्तिनं प्रति प्रातिज्ञाहान्युद्भावनमात्रेण परस्य नेष्टसिद्धिः । कालाभावस्य मोक्षावस्थाधिकरणत्वोक्त्या स्वाभिमतप्रमेयकालपक्षकानुमानविरोधस्य परिहर्तुरप्यवस्थापक्षकानुमानविरोधस्य सत्त्वेन स्वाभिमतसत्त्वस्यासिद्धेरित्याशयेन परिहरति **मैवमिति** । ननु प्रतिज्ञाहान्या प्रतिवादिनि निगृहीते स्वाभिमततत्त्वसिद्धिः किं न स्यादित्यत आह **न हीति** ।

**शे०चं०—** ननु हेत्वसिद्धिपरिहारवद् दृष्टान्तदोषस्यापि अवश्यं परिहर्तव्यस्य अपरिहारात् भाष्ये न्यूनत्वमित्यतः अपेक्षितं पूरयति **एवमिति** ॥ **दृष्टान्तदोषोऽपीति** । साधनवैकल्यलक्षण इत्यर्थः । ननु पूर्वोक्तदोषस्य परिहारात् कथं न हितमाचरितमित्यत आह **अनुमानान्तरेति** । ननु प्रतिवादिनिग्रहमात्रेणैव मदभीप्सितसिद्धिः स्यादित्यत आह **न हीति** ।

**॥ इति अवस्थात्वहेतुना मोक्षस्वरूपनिराकरणम् ॥**

* * *

**॥ अथ कालाभावः वक्तुं अशक्य एव ॥**

**६६ सु०— मा हि भूत् कस्मिंश्चिदनुमाने सद्दूषणद्वयेन दूषितेऽधिकत्वेन च प्रतिवादिनि निगृहीते तस्य सदनुमानत्वमिति प्रदर्शनार्थमेवानुमानान्तरमुपन्यस्तम् । वस्तुतस्तु कालाभावमेव निराकुर्म इत्याशयवानाह साऽपीति ।**

**अनु०— साऽपि कदेति च ।**
**पृष्टे कालश्च वक्तव्यो नाकालत्वं ततो भवेत् ।**

**मोक्षावस्थां कालाभावस्याधिकरणत्वेन वदता सा मोक्षावस्थाऽपि कदेति केनचित् पृष्टे भावनापरिपाकोत्तरकाल इत्यवस्थाधिकरणत्वेन काल एव वक्तव्यः । न ह्येवं कदाऽपि न प्रष्टव्यमिति नियामकमस्ति । ततः कालस्य सर्वथाऽपरिहार्यत्वात् अकालत्वं कालाभावो न भवेत् । तथा च तदाश्रयेण प्रथमानुमानमपि प्रवर्त्स्यतीति ।**

**परि०**— विरुद्धमपि तत्त्वं व्यवतिष्ठतां को दोष इत्यत आह **मा हि भूदिति** । सदनुमानत्वमित्यन्वयः ॥ सदनुमानत्वं मा भूदित्येतदर्थं विरुद्धं तत्त्वं व्यवस्थितमिति नाभ्युपेयमित्यर्थः । अन्यथा तदपि सदनुमानं प्राप्नोतीति भावः ।

**वं०प०**— प्रतिवादिनिग्रहमात्रेण विरुद्धं तत्त्वं न व्यवतिष्ठत इत्येतावन्मात्रे दृष्टान्तमाह **मा हि भूदिति** । न हि भवतीत्यर्थः ॥ **कस्मिंश्चिदिति** । नित्यः शब्दः कृतकत्वादिति वादिना प्रयुक्ते विरुद्धत्वमनैकान्त्यं वेति दूषणद्वये प्रतिवादिनोक्ते, वादिना दूषणाधिक्यं नाम निग्रहस्थानमिति प्रतिवादिनि निगृहीते सति तन्मात्रेण नित्यत्वानुमानस्य समीचीनत्वप्राप्त्या तेन नित्यत्वरूपं प्रमेयं न सिद्ध्यति । आधिक्येनानैकान्तिकत्वपरित्यागेऽपि विरुद्धत्वेन दुष्टत्वात् । एवं वाद्युक्ते मोक्षे कालपक्षकानुमानेन प्रतिवादिना दूषिते तस्मिन्नाश्रयासिद्ध्या दूषिते तत्परित्यागेनावस्थापक्षकानुमानकरणे प्रतिज्ञाहानिरूपनिग्रहस्थानप्राप्तौ सत्यां प्रतिवादिभूतास्मन्निग्रहमात्रेण त्वदीयं मोक्षतत्त्वं न सिद्ध्यति । अवस्थापक्षकानुमानविरोधस्य अपरिहार्यत्वादित्यर्थः । दूषणद्वयस्यासमीचीनत्वे आधिक्येन प्रतिवादिनि निगृहीते प्रथमदूषितत्वेनानुमानस्यासमीचीनत्वं वक्तुं न शक्यते । तस्य दूषणस्यासमीचीनत्वात् । अतः सद्दूषणद्वयेनेत्युक्तम् ।

**कं०रा०**— प्रतिवादिनिगृहीतमात्रेण विरुद्धं तत्त्वं न व्यवतिष्ठत इत्यस्यानङ्गीकारे बाधकं सूचयति **मा हि भूदिति** । ह्रदो वह्निमान् प्रमेयत्वादित्यनुमाने वादिना प्रयुक्ते प्रतिवादिना प्रमाणबाधव्यभिचाराभ्यां दूषिते एतेनैव दूषणेनानुमानस्य दुष्टतया दूषणान्तरमुद्भावयतस्तवाधिकं नाम निग्रहस्थानमित्यधिकत्वेन प्रतिवादिनि निगृहीते च तस्यानुमानस्य सदनुमानत्वं मा भूद्धि । अनेन प्रतिवादिनिग्रहमात्रे विरुद्धतत्त्वव्यवस्थेत्यङ्गीकारे उदाहृतानुमानस्य सदनुमानत्वं स्यादिति बाधकं सूचितं भवतीति प्रदर्शनार्थमित्ययमत्र समुदायार्थः । कालाभावस्य मोक्षावस्थामधिकरणं वदता परेण कालपक्षकानुमानविरोधपरिहारेऽप्यवस्थापक्षकानुमानविरोधस्य परिहर्तुमशक्यत्वात् प्रतिवादिनिग्रहमात्रेण च विरुद्धतत्त्वव्यवस्थित्यङ्गीकारे अतिप्रसङ्गात् प्रतिज्ञाहान्युद्भावनमात्रेण परस्य स्वाभिमतप्रमेयसिद्धिर्नास्तीति प्रदर्शनार्थमवस्थापक्षकमनुमानान्तरमुपन्यस्तमिति भावेनेत्यद्वितीयविज्ञानगोचरभावनापरिपाकोत्तरकाल इत्यर्थः ॥ **प्रवर्त्स्यतीति** । प्रवर्तिष्यत इत्यर्थः ।

**शे०चं०**— विपक्षे बाधकमाह **मा हि भूदिति** । न भवति हीत्यर्थः ॥ **तस्येति** । सद्दूषणद्वयेन दूषितानुमानस्येत्यर्थः ॥ **प्रथमानुमानमपीति** । कालो न केवलज्ञानीत्यनुमानमपीत्यर्थः । ततश्च प्रथमोक्तपक्षे हेतुदृष्टान्तानामत्यागान्न प्रतिज्ञाहानिरपीति भावः ।

**वा०र०**— माङ्योगे लुङः सर्वलकारापवादकतया लडर्थेऽयं लुङित्याशयेन व्याचष्टे **न भवति हीत्यर्थ इति** ।

**॥ इति कालाभावः वक्तुं अशक्य एव ॥**

॥ अथ कालस्वरूपनिषेधे साक्षिविरोधः ॥

६७ **सु०—** ननु कालाभावादाश्रयासिद्धमाद्यानुमानम् । यदत्रोक्तं कदेति तदसत् । प्रतियोग्यधिकरणमेव ह्यभावस्याधिकरणम् । न च कालस्य कालोऽधिकरणम् । येन तदभावः कालाधिकरणः स्यात् । अतः कदेति प्रश्न एवानुपपन्नः । किमुत्तरेणेति चेत् । एवं तर्हि कालविशेषमधिकरणत्वेनानुपादाय कालं निषेधता सामान्यनिषेध एव कृतः स्यात् । ततः किमित्यत आह **नेति** ।

**अनु०— न काल इति सामान्यनिषेधे कालगप्रमा ।**
**निरुणद्धि**

**कालो नेति सामान्यतो निषेधे** क्रियमाणे हि कालस्य स्वरूपमेव निषिद्धं स्यात् । तथा च कालं गच्छति विषयीकरोतीति **कालगा प्रमा** साक्षी **(निरु)विरुणद्धि** । स हि पूर्वोत्तरकोटिरहिततया कालसद्भावं गृह्णातीति ।

**परि०— प्रतियोग्यधिकरणमेव ह्यभावस्याधिकरणमिति** । पूर्वोत्तरकालभेदेनेति भावः । **न चेति** । आत्माश्रयापत्तेरिति भावः । ननु साक्षी मुक्तौ कालसत्त्वं कथं गृह्णाति येन तद्विरोध इत्यत आह **स हीति** ।

**यादु०— प्रतियोग्यधिकरणमेवेति** । प्रतियोगिप्रसक्तिमदित्यर्थः । एवं कालप्रसक्तेरित्यर्थः । आत्माश्रयादिति भावः । ननु कालो नेति सामान्यतस्त्रैकालिकनिषिद्धवचनस्य कथं वर्तमानमात्रविषयकप्रत्यक्षविशेषसाक्षिविरोध इत्यत आह **स हि पूर्वोत्तरेति** । तथा च न प्रत्यक्षमात्रस्य वर्तमानमात्रग्राहित्वनियम इति भावः ।

**वं०प०— एवं तर्हीति** । कालाधिकरणत्वेन कालनिषेधस्य कर्तुमशक्यत्वे सतीत्यर्थः ॥ **सामान्येति** । कालो नास्तीति सामान्यनिषेध एवेत्यर्थः ॥ **पूर्वोत्तरकोटीति** । कोटिरवधिः । एतदारभ्यैतावत्पर्यन्तमस्तीत्येवं पूर्वोत्तरावधिरहिततयेत्यर्थः ।

**कं०रा०— पूर्वोत्तरकोटिरहिततयेति** । पूर्वोत्तरावधिरहितत्वेनेत्यर्थः ।

**शे०चं०— प्रतियोग्यधिकरणमेवेति** । प्रतियोगिप्रसक्तिमदेवेत्यर्थः ॥ **न च कालस्येति** । आत्माश्रयप्रसक्तेरिति भावः । ननु कालो नेति सामान्यतस्त्रैकालिकनिषेधवचनस्य न वर्तमानमात्रग्राहिप्रत्यक्षविशेष-

साक्षिविरोध इत्यतः तृतीयस्य द्वितीये प्रत्यक्षस्य चाक्षुषमानससाधारण्येन वर्तमानमात्रग्राहित्वनिराकरणात् साक्षिणश्च तन्नियमस्यासकृन्निराकरणाद्युक्त एव साक्षिणा विरोध इत्याशयेनाह **स हीति** ।

**वा०र०— द्योतकत्वमात्रमिति** । एतच्च द्योतकत्वमिति सिद्धान्तेऽभिप्रेतम् । न भावोऽनुपलब्धेरित्यत्र भावशब्दस्यानुभवार्थतया व्याख्यानात् । तत्रत्यटीकायामुपपादनाच्च । तर्कताण्डवाविरोधोऽपि तत्रैवोपपादितः । समिति ह्युपसर्गेण परममुख्यार्थतोच्यतेति क्रमं वदन्तमुपशब्द इत्यनुसारेण तु वाचकत्वमेवेति लभ्यते । अपि तु तदपीति पक्षाश्रयणेनोक्तम् । वाचकत्वमेवेति पक्षेऽस्यानुपपत्तेरिति बोध्यम् ।

**॥ इति कालस्वरूपनिषेधे साक्षिविरोधः ॥**

* * *

**॥ अथ साक्षिविरोधः मुख्यतः एकजीववादिमते ॥**

६८ **सु०— न केवलमयं साक्षिविरोधो विज्ञानवादिनः किं नाम पूर्वाभ्यां सह त्रयाणां चेत्याह समश्चेति ।**

## अनु०— समश्चायं त्रयाणामुक्तवादिनाम् ।

**उक्ताः प्रत्युक्ताः** ।

**परि०—** उक्तवादिनामित्यत्रोक्तपदार्थमाह **उक्ताः प्रत्युक्ता इति** । निरस्तवादिनामित्यर्थः ।

**वं०प०— पूर्वाभ्यां सहेति** । शून्यवादिमायावादिभ्यां सह विद्यमानस्य अस्य विज्ञानवादिनश्चेति त्रयाणामित्यर्थः ।

**कं०रा०— पूर्वाभ्यामिति** । शून्यवादिमायावादिभ्यामित्यर्थः ॥ **उक्ताः प्रत्युक्ता इति** । निराकृतापरपर्यायप्रत्युक्तवाचिन उक्तशब्दस्य वादिशब्देन कर्मधारय इति भावः ।

**शे०चं०— पूर्वाभ्यां** शून्यमायावादिभ्याम् ॥ **उक्ताः प्रत्युक्ता इति** । यद्यपि वादिनां प्रत्याख्यातत्वप्रदर्शनार्थं प्रत्युक्ता इति भाष्ये वक्तुमुचितम् । तथाऽप्युपसर्गस्य धातुगतशक्यतावच्छेदकत्वरूपोपसन्दानत्वापरपर्यायद्योतकत्वमात्रं धातोरेव तु प्रत्याख्यातत्वप्रतिपादकत्वमिति प्रदर्शनार्थमुक्ता इत्येवोक्तमित्यवधेयम् ।

* * *

६९ **सु०—** ननु कथं शून्यवादिमायावादिनोरयं साक्षिविरोधः । ताभ्यां कालाभावस्यानभ्युपगतत्वात् । यथा हि लोकेऽनेकेषु मायामयान् गजतुरगादीन् पश्यत्सु यस्य कारणविशेषेण माया अपगच्छति स एव तान्न पश्यति अन्ये तु पश्यन्त्येव । तथा द्वैतदर्शनकारणमज्ञानं यस्यापगतं स एव तन्न पश्यति । अन्येषां तु कालादिप्रपञ्चदर्शनमनुवर्तत एवेति खलु ताभ्यामभ्युपेतमित्यत आह **एकेति** ।

**अनु०—** एकजीवत्वपक्षे तु कालाभावादियं प्रमा ।
कुपिता

सत्यमेवं बहुजीववादिनः शून्यवादिनो मायावादिनश्च मतम् । न च तयोरस्माभिः साक्षिविरोधोऽभिहितः । किं तर्ह्येकमुक्तिरेव सर्वमुक्तिः एकस्मिन्मुक्ते न किञ्चिदवशिष्यत इत्येकजीववादपक्षे तु मुक्तौ कालाभावाभ्युपगमादियं प्रमा साक्षिरूपा **कुपिता** विरोधिनी भवत्येव ।

**वं०प०—** **शून्यमायावादिनोः** बहुजीववादिनोरित्यर्थः ।

**शे०चं०—** साक्षिप्रमाणे कोपलक्षणविरोधादिभिन्नदोषस्य सिद्धान्तेऽनङ्गीकारादाह **विरोधिनीति** ।

**वा०र०—** **साक्षिप्रमाणे कोपेति** । कोपलक्षणो यो विरोधादिभिन्नो दोषस्तस्येत्यर्थः ।

**॥ इति साक्षिविरोधः मुख्यतः एकजीववादिमते ॥**

* * *

**॥ अथ कालत्वहेतुना मोक्षकाले प्रपञ्चसिद्धिः ॥**

७० **सु०—** शून्यवादिमायावादिनौ प्रति साक्षिविरोधाभिधानमसङ्गतम् । कालाभावाभ्युपगमेऽपीदानीं तस्याप्रस्तुतत्वादित्यत आह **कालमिति** ।

**अनु०—** कालमाधाय द्वैतमेवोपपादयेत् ।

इयं प्रमेति वर्तते । **आधाय** उपपाद्य । **अयमभिसन्धिः । अद्वितीयस्य शून्यस्य ब्रह्मणो वाऽवस्थानं मुक्तिरिति तावदेकजीववादिभ्यां ताभ्यामभिधीयते । तत्र वयं ब्रूमः । कालसद्भावान्नाद्वैतत्वमुपपद्यत इति । तत्र परः कालोऽपि नास्तीति वदति तदा साक्षि-विरोधोऽभिधीयत इत्येतां सङ्गतिमाश्रित्यातिदेशः कृतो, न त्वाश्रयासिद्धिप्रसङ्गेनेति ।**

**परि०**— शङ्कते **शून्यवादिमायावादिनौ प्रतीति** ॥ **तस्येति** । विरोधाभिधानस्येत्यर्थः । ताभ्यां भवदुक्तानुमाने विज्ञानवादिनेवाश्रयासिद्धेरनाशङ्कितत्वादप्रस्तुतत्वादित्युक्तम् । अस्पष्टत्वाच्छङ्कोत्तरस्य स्वयमभिधेयं व्यनक्ति **अयमभिसन्धिरिति** ।

**यादु०**— **तस्याप्रस्तुतत्वादिति** । कालाभावादाश्रयासिद्धमाद्यमनुमानमिति विज्ञानवादिना आश्रयासिद्धौ चोदितायां तं प्रत्येव साक्षिविरोधाभिधानं सङ्गतम् । कालाभावस्याश्रयासिद्धिकथनाय तेनाशङ्कितया प्रस्तुतत्वात् । न शून्यमायावादिनौ प्रति । ताभ्यां कालाभावस्याश्रयासिद्धिकथनाय अनाशङ्कितत्वादित्यर्थः ॥ **न त्वाश्रयासिद्धीति** । गौरवादिति भावः ॥ **प्रयोजनं चेति** । मुक्तस्याद्वितीयत्वनिराकरणरूपमित्यर्थः ।

**वं०प०**— **एकजीववादिभ्यां** शून्यवादिमायावादिप्रभेदाभ्याम् ॥ **अतिदेशः कृत इति** । 'समश्रायमि'त्यनेनेत्यर्थः ।

**कं०रा०**— **इदानीं तस्याप्रसक्तत्वादिति** । मोक्षकालो न केवलज्ञानवान् कालत्वात् सम्प्रतिपन्नवदिति सिद्धान्त्युक्तानुमानस्याश्रयासिद्धिव्युत्पादनार्थं विज्ञानवादिना कालाभावस्योक्तत्वात् तं प्रत्येव कालसत्त्वग्राहिसाक्षिविरोधाभिधानं सङ्गतम् । शून्यवादिमायावादिभ्यां तु इदानीं कालाभावस्यानुक्तत्वात् तौ प्रति साक्षिविरोधाभिधानमसङ्गतमिति भावः । विमत इत्येतावता चरितार्थत्वात् कालग्रहणं व्यर्थमित्यत आह **तस्येति** ।

**शे०चं०**— **तस्येति** । कालाभावादाश्रयासिद्धमनुमानमिति विज्ञानवादिनाऽऽश्रयासिद्धौ चोदितायां तं प्रत्येव साक्षिविरोधाभिधानं सङ्गतम्, आश्रयासिद्धिकथनाय कालाभावस्य तेनाशङ्कितया प्रस्तुतत्वात् । नैकजीववादिनौ शून्यवादिमायावादिनौ प्रति । ताभ्यामाश्रयासिद्धिकथनाय कालाभावस्यानाशङ्कितयाऽप्रस्तुतत्वादित्यर्थः ।

नन्वेतावताऽपि शून्यवादिमायावादिनौ प्रति साक्षिविरोधाभिधानस्य नासङ्गतिपरिहार इत्यत आह **अयमभिसन्धिरिति** ॥ **अतिदेशः कृत इति** । समश्चायमित्येवंरूपोऽतिदेशः कृत इत्यर्थः ।

* * *

७१ **सु०— वादित्रयसाधारणमनुमानान्तरमाह विमत इति ।**

**अनु०— विमतः प्रपञ्चवान् कालः कालत्वात् प्रतिपन्नवत् ।**
**इति चान्याऽनुमैकत्वं जीवस्य विनिवारयेत् ॥**

**कालः प्रपञ्चवान्** इत्युक्ते सिद्धसाधनता स्यात् । अतो **विमत** इत्युक्तम् । मोक्ष-काल इत्यर्थः । तस्य स्पष्टीकरणाय **काल** इत्युक्तम् । कालाभावस्यानुपदमेव निरस्तत्वा-न्नाश्रयासिद्धिः । प्रपञ्चो वियदादिः **प्रतिपन्नः** वर्तमानकालः । पूर्वोक्तमेवेदं कुतः पुनरुच्यत इत्याशङ्कानिरासायोक्तम् **अन्याऽनुमा चेति** । यद्यपि द्वयोर्धर्म्यादिकं प्रयोजनं च समानम् । तथाऽपि पूर्वमद्वैतनिषेधमुखेन प्रवृत्तम् । इदं तु प्रपञ्चविधिमुखेनेति भेदः । **जीवस्य मुक्तस्य** ।

**परि०— पूर्वोक्तमेवेति** । विमतः कालो न केवलज्ञानवानित्युक्तमित्यर्थः । तस्याप्यद्विती-यार्थनिरास एव तात्पर्यादिति भावः ॥ **द्वयोरिति** । अनुमानयोरित्यर्थः ॥ **प्रयोजनं चेति** । मुक्तावद्वितीयनिरासरूपमित्यर्थः ।

**वं०प०— स्पष्टीकरणायेति** । विमतशब्देनैव मोक्षकालस्य प्राप्तत्वादित्यर्थः । **द्वयोः** पूर्वानुमानैत-दनुमानयोः ॥ **निषेधमुखेनेति** । कालः केवलज्ञानवान्नेति निषेधमुखेनेत्यर्थः ॥ **विधिमुखेनेति** । विमतः कालः प्रपञ्चवानिति विधिमुखेनेत्यर्थः ।

**कं०रा०— पूर्वोक्तमिति** । 'कालो न केवलज्ञानी कालत्वात् प्रतिपन्नवदि'ति पूर्वोक्तमित्यर्थः ॥ **द्वयोरिति** । अनुमानयोरिति शेषः ॥ **पूर्वमिति** । पूर्वोक्तं कालो न केवलज्ञानीत्यनुमानं कैवल्यशब्दिताद्वैत-निषेधमुखेन प्रवृत्तमिदं तु विमतः कालः प्रपञ्चवानित्यनुमानं तु प्रपञ्चविधिमुखेनेति भेद इत्यर्थः ।

**शे०चं०— पूर्वोक्तमेवेदमिति** । यद्यप्येतन्न प्रागुक्तं तथाऽपि धर्म्या(र्मा)द्यैक्यं प्रयोजनैक्यं चाभि-प्रेत्येयमुक्तिरिति ध्येयम् ॥ **प्रयोजनं चेति** । मुक्तस्याद्वितीयत्वनिराकरणमित्यर्थः ॥ **पूर्वमिति** । पूर्वमनुमान-मित्यर्थः ॥ **इदमिति** । इदमनुमानमित्यर्थः । मुक्तैकत्वनिराकरणस्य प्रस्तुतत्वाज्जीवशब्दो मुक्तपर इत्याह **जीवस्य मुक्तस्येति** ।

**॥ इति कालत्वहेतुना मोक्षकाले प्रपञ्चसिद्धिः ॥**

* * *

**॥ अथ सिद्धान्तसाम्यात् कालैकत्वादिमतानां निराकरणम् ॥**

७२ **सु०—** उक्तातिदेशेनाद्वैतमतान्तराणि दूषयति **कालेति** ।

**अनु०— कालशब्देश्वरैकत्वमतान्यप्येवमेव हि ।
निराकृतानि**

यद्यदनुविद्धं प्रतीयते तत्तत्रारोपितम् । यथेदमाकारे रजतम् । कालानुविद्धं च समस्तं प्रतिभाति । तस्मात्तत्रैवारोपितम् । स एव परमार्थः । अतस्तन्मात्रावस्थानं मुक्तिरिति कालैकत्ववादिनः । **एवमेव** शब्दैकत्ववादिनो वैयाकरणाः प्राहुः । यथा 'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यत' इति । शैवैकदेशिनः स्वागममाश्रित्येश्वरैकत्वमाहुः ।

कथं निराकृतानीत्यत आह **तेषां चेति** ।

**तेषां च समत्वात् पक्षदोषयोः ।**

**तेषां** शून्यवादिप्रभृतीनां एतेषां पक्षस्तावत् समान एव । शून्यादिशब्दभेदस्याप्रयोजकत्वात् । प्रतिपन्नस्वरूपजीवविनाशादेः सर्वैरभ्युपगतत्वात् । अतः परमेष्टनाशेनापुरुषार्थत्वमित्यादिदोषोऽपि समान एवेति । अनुमानं तु प्रत्यक्षविरोधादिना दुष्टमेव । तथा आगमोऽपीति स्फुटत्वान्नोक्तम् ।

**परि०— न स इति** । शब्दानुगमादृते यः प्रत्ययः स नास्ति सर्वं शब्देनानुविद्धमिव ज्ञानं गम्यतेऽनुभूयत इत्यर्थः ॥ **ईश्वरैकत्वमीश्वरेण** जीवानामेकत्वम् ॥ **इत्यादिदोषोऽपीति** । अनुमानविरोधानुभवविरोधादिः **आदिपदार्थः** ॥ **अनुमानं त्विति** । सर्वं काले शब्दे ईश्वरे वा आरोपितं तदनुविद्धतया प्रतीयमानत्वात् इदं रूप्यमितीदमाकारानुविद्धतया प्रतीयमानरजतवदिति प्रागभिमतानुमानं त्वित्यर्थः । **आगमोऽपि** शैवागमोऽपि । अद्वैतबोधकांशः प्रत्यक्षादिविरोधाद्दुष्ट इत्यर्थः ।

*शून्यवादिमायावादिविज्ञानवादिकालशब्देश्वरैकत्ववाद्यभिमतमोक्षनिरासः ॥*

**यादु०— शब्दैकत्ववादिन इति** । अत्र शब्दशब्देन तदभिव्यङ्ग्यः स्फोटो लक्ष्यते । एवं शब्दानुगमादृत इत्यत्रापि प्रकरणात्स्फोटः पदशब्दशब्देन ग्राह्यः । प्रसिद्धशैवानां भेदवादित्वादाह **शैवैकदेशिन इति** ॥ **आगममिति** । शैवाद्यागममित्यर्थः । शिवस्याप्रत्यक्षत्वेनात्र युक्तेरसम्भवादित्यर्थः ।

**वं०प०— पक्षस्तावदिति** । सिद्धान्त इत्यर्थः ॥ **अनुमानं त्विति** । यद्यदनुविद्धतया प्रतीयते तत्तत्रारोपितमित्येवं कालावयवारोपितत्वसाधकानुमानमित्यर्थः ॥ **प्रत्यक्षविरोधादिनेति** । सन्घट इत्यादिप्रत्यक्षेण प्रमाणदृष्टत्वानुमानेन विश्वं सत्यमित्यागमेन च विरुद्धत्वाद् दुष्टमित्यर्थः ॥ **आगमोऽपीति** । ईश्वरैकत्वसाधकशैवाद्यागमोऽपि द्वैतागमविरुद्धत्वाद् दुष्ट इत्यर्थः ।

**कं०रा०— एवमेव शब्दैकत्ववादिन इति** । सर्वं शब्दानुविद्धं प्रति तस्मात् तत्रैवारोपितं शब्द एव च परमार्थः । अतः शब्दमात्रावस्थानं मुक्तिरिति शब्दैकत्ववादिनो वैयाकरणाः प्राहुरित्यर्थः । सर्वं शब्दानुविद्धतया प्रतीयत इत्यत्र तेषां संवादमाह **यथेत्यादिना** । यः प्रत्ययः शब्दागमादृते स्वविषयवाचकशब्दानुवेधमन्तरेणोत्पद्यते स प्रत्ययो लोके नास्त्येव । कुतः । सर्वमपि ज्ञानं गृह्यमाणं घटस्य ज्ञानं पटस्य ज्ञानमिति शब्दोपरक्तविषयवाचकघटितत्वाकारेणैवानुव्यवसायस्य विषयो भवति । इवशब्दो वाक्यालङ्कारे । अतः सकलमपि शब्दानुविद्धमेवेति भावः । 'अन्यारादितरर्ते दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इत्यादिना ऋते शब्दयोगे शब्दानुगमादिति पञ्चमी । 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः । ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषत' इत्यादौ कर्मणि ल्युटमाश्रित्य ज्ञानशब्दस्य ज्ञेये प्रयुक्तत्वादिहापि ज्ञानशब्दो ज्ञेयवाची । तथा च सर्वं ज्ञेयं घटोऽयं घटोऽयमिति शब्देनानुविद्धं गम्यते ज्ञायत इत्येतद्गम्यतेऽनुभूयत इत्यावृत्त्यध्याहाराभ्यामुत्तरार्धस्यार्थान्तरं द्रष्टव्यम् । गृह्यत इति पाठः । **शैवैकदेशिनः स्वागममाश्रित्येति** । सर्वस्येश्वरानुवाकतया प्रतीत्यभावेन सर्वमीश्वरे कल्पितमीश्वरानुविद्धत्वेन प्रतीयमानत्वादीश्वरमानत्वादीश्वरमात्रावस्थानं मुक्तिरित्यनुमानाश्रयणेनेश्वरैकत्वस्य वक्तुमशक्यत्वात् स्वागममाश्रित्येत्युक्तम् । न च वाच्यं सन् घटः सन् पट इति सच्छब्दितब्रह्मानुवेधः सर्वस्यास्तीति । मायावादिरीत्या सच्छब्दितचिन्मात्रानुवेधेऽपि सर्वशक्तित्वादिविशिष्टेश्वरानुवेधस्याभावात् ॥ **अनुमानं त्विति** । सर्वं काले आरोपितं कालानुविद्धतया प्रतीयमानत्वात् । सर्वं शब्दकल्पितं शब्दानुविद्धतया प्रतीयमानत्वात् । यद्यदनुविद्धतया प्रतीयते तत्तत्रारोपितम् । इदमाकारानुविद्धत्वेन प्रतीयमानं रजतमिदमाकारे आरोपितमित्यनुमानं तु सन्घटः सन्पट इत्यादिरूपेण सत्त्वग्राहकप्रत्यक्षरूपेण विरोधात् । 'विश्वं सत्यं यच्चिकेत सत्यं याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्य' इत्यादिश्रुत्या च विरोधात् । असन्नृभृङ्गमसत्खपुष्पमित्यसदनुविद्धत्वेन प्रतीयमानस्य नृभृङ्गादेरसति कल्पितत्वाभावेन व्यभिचाराच्च । दुष्टमेव शैवैकदेशिनां स्वागमोऽपि प्रत्यक्षविरोधेन श्रुतिविरोधेन च दुष्टमेवेति स्फुटत्वादनुमानागमयोर्दोषो नोक्तः । न च वाच्यमपरोक्षतया प्रतीयमानत्वं विवक्षितम् । तस्य च नृभृङ्गादावभावान्न व्यभिचार इति । श्रुत्याऽतीन्द्रिये तदभावेन भागासिद्धिप्रसङ्गात् । खण्डो गौर्मुण्डो गौरिति गवाद्यनुविद्धत्वेनापरोक्षतया प्रतीयमाने खण्डमुण्डादावनैकान्त्यभावतादवस्थ्याच्च ।

शे०चं०— **उक्तातिदेशेनेति** । 'आत्माभावेऽपुमर्थ' इत्याद्युक्तदोषातिदेशेनेत्यर्थः ॥ **एवमेवेति** । यद्यदनुविद्धतया प्रतीयते तत् तत्रारोपितं, यथेदमाकारे रजतं, शब्दानुविद्धं च समस्तं प्रतिभाति तस्मात् तत्रैवारोपितं शब्द एव तु परमार्थ इति वैयाकरणाः प्राहुः । अत्र चशब्देन स्फोटाख्यं शब्दब्रह्मैवाभिमतम् । मायावादिना नित्यनिरतिशयचिदानन्दैकरसे ब्रह्मण्यसतोऽपि प्रपञ्चस्यानाद्यनिर्वाच्याविद्यायाः सत्त्वेनावभासस्येव वैयाकरणैरपि अनवयव नित्ये स्फोटाख्ये शब्दब्रह्मण्यसतोऽप्यशेषजगतो वर्णपदविभागस्य च अनाद्यविद्यायाः सत्त्वेनावभासस्याभ्युपगतत्वादिति द्रष्टव्यम् । शब्दानुविद्धतया प्रतीयमानत्वहेतोरसिद्धिमाशङ्क्य परिहरति **यथा न सोऽस्तीति** । यः प्रत्ययः स्वविषयवाचकशब्दानुवेधमन्तरेणोत्पद्यते स प्रत्ययो लोके नास्त्येव । कुतः । सर्वमपि ज्ञानं गृह्यमाणं घटस्य ज्ञानमिति शब्दविशिष्टविषयघटितत्वाकारेणैवानुव्यवसायस्य विषयो भवति । इवशब्दस्तु वाक्यालङ्कार इति सम्मतिग्रन्थार्थः । पाशुपतैकदेशिनां शैवानां भेदवादित्वेऽपि तच्छैवैकदेशिनां शैवानामैक्यवादित्वाच्छैवैकदेशिन इत्युक्तम् ॥ **आगममिति** । शैवाद्यागममित्यर्थः । मूले पक्षसाम्यं दोषसाम्य-हेतुतया विवक्षितमित्यभिप्रेत्य तदुभयमुपदर्शयति **तेषामित्यादिना** । जीवविनाशादेरित्यादिपदेन अप्रतिपन्नशून्य-ब्रह्मभावादेः परिग्रहः । ननु तदुपन्यस्तयोरनुमानागमयोरनिराकरणे तन्निरासासिद्धेर्भाष्यकृता तन्निरासस्यावश्यं कर्तव्यत्वात् तदकरणाद्भाष्यन्यूनत्वमित्यतः स्फुटत्वात् तन्निरासस्य शिष्यैरेव कर्तुं शक्यत्वात् तदनुक्त्युपपत्तेः न न्यूनत्वमित्याशयेन स्वयमनुमानागमनिरासप्रकारं दर्शयन्नेव भाष्यकृतस्तदनुक्तौ निमित्तमाह **अनुमानं त्विति** । सर्वं काले शब्दे वाऽऽरोपितं तदनुविद्धतया प्रतीयमानत्वात् इत्यनुमानं दुष्टम् । प्रपञ्चस्य प्रत्यक्षानुमानागमबलेन सत्यत्वनिश्चयेन तद्विरुद्धत्वात् । तथेश्वरे सर्वस्यारोपितत्वसाधनतया परस्याभिमत आगमोऽपि दुष्ट एव । प्रत्य-क्षादिप्रमाणात् तत्सत्यतानिश्चयेन तद्विरुद्धत्वादिति स्फुटत्वात् भाष्यकृता नोक्तमित्यर्थः ।

वा०र०— जिज्ञासाधिकरणीयवाक्यार्थचन्द्रिकाद्यनुसारेणाह **शब्दब्रह्मैवेति** । .......नुसारेण सम्मति-श्लोकार्थमाह **यः प्रत्यय इति** ।

स०व्र०— **अनुमानं त्विति** । सर्वं काले आरोपितं तदनुविद्धतया प्रतीयमानत्वादित्यनुमान-मित्यर्थः । **आगमोऽपीति** । अपिः प्रत्यक्षविरोधात् दुष्ट इत्यनुकर्षणार्थः ।

**॥ इति सिद्धान्तसाम्यात् कालैकत्वादिमतानां निराकरणम् ॥**

* * *

**॥ अथ वैभाषिक-सौत्रान्तिकाभिमतमोक्षस्वरूपनिरूपणम्, तन्निरसनञ्च ॥**

७३ **सु०— वैभाषिकसौत्रान्तिकाभिमतं मोक्षं निरूपयति ज्ञानमिति ।**

**अनु०— ज्ञानं स्वरसभङ्ग्येव नित्यसन्तानमिष्यते ।**

**बौद्धाभ्यामपराभ्यां तु**

**एवशब्देन विषयसम्बन्धं व्यावर्तयति । इष्यते मुक्तौ । अयमर्थः । ज्ञानमेवात्मा । तच्च ज्ञानं स्वभावेनैव भङ्गुरम् । अत एव क्षणिकम् । तत्सन्तानस्तु नित्यः । तस्य अनादिवासनावशाद्यो विषयोपरक्तस्योत्पादः स संसारः भावनाप्रकर्षवशेन वासनाया-मुत्सन्नायां यो विषयोपप्लवं विना शुद्धस्यैवोदयः स मोक्षः इत्युभयसमानम् । सौत्रा-न्तिकास्तु संसारे साकारत्वं मुक्तौ निराकारत्वं च विशेषमाहुरिति ।**

**परि०— तस्येति** । स्वतो निर्विषयकक्षणिकज्ञानाख्यात्मन इत्यर्थः ॥ **विषयोपरक्त-स्येति** । विषयसम्बन्धविशिष्टस्येत्यर्थः ।

**यादु०— निर्विषयैतज्ज्ञानेति** । परमते इदानीन्तनकालेऽपि कस्यचिद्देवदत्तस्य मुक्त्यङ्गीकारेण तदीय-निर्विषयज्ञानस्य सत्त्वेन साध्यवैकल्यशङ्का स्यात्, अत एतदित्युक्तम् । तथा च संसारीयो यज्ञदत्तस्य भावी यो मोक्षकालः स पक्षः वर्तमानकालस्तु दृष्टान्तः । तत्र च तदीयज्ञानसन्ततिः न निर्विषयेति न साध्यवैकल्यशङ्केति भावः ।

**वं०प०— भङ्गुरं** अनित्यम् । **क्षणिकं** क्षणमात्रावस्थायि । **शुद्धस्यैव** निर्विशेषस्यैव । एतदनुमानस्य पूर्वमनुक्तत्वादुक्तसरूपेत्युक्तम् । उक्तानुमानसदृशेत्यर्थः । मुक्तस्य अद्वितीयत्वनिराकरणपरत्वेनोक्तसादृश्यं द्रष्टव्यम् ।

**कं०रा०— तत्सन्तानस्तु नित्य इति** । अनेन नित्यसन्तानमित्यत्र नित्यः सन्तानो यस्येति बहु-व्रीहिरित्युक्तं भवति ॥ **विषयोपरक्तस्येति** । सविषयकस्येत्यर्थः ॥ **उभयसमानमिति** । वैशेषिकसौत्रान्तिकयोः समानमित्यर्थः ।

**शे०चं०—** मूले स्वरसभङ्गुरेवेत्येवशब्दवैयर्थ्येन यथाश्रुतसम्बन्धायोगात् ज्ञानमित्यनेन सम्बन्ध-मभिप्रेत्य तद्व्यावर्त्यमाह **एवशब्देनेति** । विषयसम्बन्धस्य ज्ञानस्य संसारत्वेन मोक्षत्वाभावादिति भावः । **तस्य** ज्ञानसन्तानस्य ॥ **अनादिवासनावशादिति** । रागादिरूपचतुर्विधवासनावशादित्यर्थः । **भावनाप्रकर्षवशेनेति** । क्षणिकदुःखशून्यस्वलक्षणरूपचतुर्विधभावनायाः यः प्रकर्षः परिपाकः तद्वशेनेत्यर्थः । क्षणिकं क्षणिकमिति भावना क्षणिकभावना । दुःखं दुःखमिति भावना दुःखभावना । शून्यं शून्यमिति भावना शून्यभावना । स्वलक्षणं स्वलक्षणमिति भावना स्वलक्षणभावना । तत्राद्यया स्थायित्वभ्रमनिवृत्तिः द्वितीयया रागादिनिवृत्तिः तृतीयया विषयाकारोपप्लवविच्छेदः चतुर्थया द्रव्यगुणादिवैलक्षण्यबुद्धिनिवृत्तिरिति ज्ञेयम् । **शुद्धस्यैव** विषयानुप-प्लुतज्ञानसन्तानस्येत्यर्थः । ततश्च भावनाप्रकर्षपरिलब्धविषयानुपप्लुतज्ञानसन्तानोत्पादो मोक्ष इति फलितं भवति ।

**वा०र०—** तृतीयाया विषयाकारेति पाठः । एतच्च भावनाचातुर्विध्यं तत्फलं चापरे पुनर्भावना प्रकर्षेति *न्यायमकरन्द*व्याख्यानरूपक्षणिकदुःखशून्येत्यादिचित्सुखग्रन्थक्षणिकं क्षणिकमिति भावेनेत्यादि· *नरेन्द्राचार्य*-विरचितटिप्पणग्रन्थं च मनसि निधायेति ज्ञेयम् ।

७४ **सु०**— निराकरोति **तत्रापीति** ।

**अनु०— तत्राप्युक्तानुमा रिपुः ।**

**विमतः कालो न निर्विषयैतज्ज्ञानसन्ततिमान् कालत्वादिदानीन्तनकालवदित्यादि-रुक्ता उक्तसरूपा अनुमा रिपुर्विरोधिनीत्यर्थः ।**

**परि०— इत्यादिरिति** । विमतः कालः प्रपञ्चवान् कालत्वादिदानीन्तनकालवदित्याद्युक्तानुमानमादिपदार्थः ।

**कं०रा०**— अस्या अनुमायाः प्रागुक्तत्वाभावात् कथमुक्तानुमेत्युक्तिरित्यत आह **उक्तसरूपेति** ।

**शे०चं०— विमत इति** । संसारिणो यज्ञदत्तस्य भावी मोक्षकाल इत्यर्थः ॥ **निर्विषयेति** । साध्ये एतत्पदत्यागे दृष्टान्ते साध्यवैकल्यम् । इदानीन्तनकालस्य यत्किञ्चित्पुरुषीयनिर्विषयज्ञानसन्ततिमत्त्वात् । गृहीते तु न । यज्ञदत्तीयनिर्विषयज्ञानसन्ततिमत्त्वाभावात् । नन्वियमनुमा न पूर्वमुक्तेति कथमुक्तानुमा रिपुरित्युक्तमित्यतः तात्पर्यमाह **उक्तोक्तसरूपेति** । चेतनधर्मत्वाद्रिपुत्वस्य कथमचेतनानुमानधर्मत्वोक्तिरित्यत आह **विरोधिनीति** ।

**वा०र०— साध्ये एतत्पदेति** । एतदिति पदेत्यर्थः । यत्किञ्चित्पुरुषीयेति पाठः । नेत्यन्तरं साध्य-वैकल्यमित्यनुवर्तते ।

* * *

७५ **सु०**— अनुमानान्तरमाह **मोक्ष इति** ।

**अनु०— मोक्षो न शुद्धविज्ञानसन्तानी कालगत्वतः ।**
**प्रतिपन्नो यथेत्येतदनुमानं तदुत्तरम् ॥**

**शुद्धविज्ञानसन्तानी(ति) निर्विषयचित्सन्तानसम्बन्धी । कालगत्वतः कालसम्बन्धित्वात् । प्रतिपन्नः संसारः । तदुत्तरं तत्पक्षस्य दूषणम् । अप्रामाणिकश्चायं मोक्षः । पूर्ववत् प्रत्यक्षागमयोरभावात् केवलानुमानानि वाच्यानि । तत्राह अनुमानानीति ।**

**अनुमानानि सर्वाणि प्रतिसाधनयोगतः ।**
**निषिद्धान्युक्तभङ्ग्यैव**

**उक्तभङ्ग्यैव प्रतिसाधनसम्बन्धेन । श्रुतिविरुद्धत्वेन कालात्ययापदिष्टानि चेति भावेन आह श्रुतयश्चेति ।**

श्रुतयश्चास्मदुक्तिगाः ।

**उच्यत इत्युक्तिः अस्मदुक्तिं गच्छन्ति प्रतिपादयन्तीति अस्मदुक्तिगाः । अस्मदभिमतमेव मोक्षस्वरूपं प्रतिपादयन्तीत्यर्थः । श्रुतिप्रामाण्यं तु प्रागेव समर्थितमिति ।**

**परि०— प्रागेव समर्थितमिति** । 'प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य ही'त्यत्र जिज्ञासाधिकरणे समर्थितमित्यर्थः । *वैशेषिकसौत्रान्तिकाभिमतमोक्षनिरासः ॥*

**यादु०— प्रागेवेति** । प्रथमाध्याय इत्यर्थः ।

**वं०प०— पूर्ववदिति** । कथमुक्तमोक्षस्वरूपमप्रामाणिकमिति चेत् । न तावदत्र प्रत्यक्षमस्ति । नाप्यागमः । तदीयागमस्यास्माभिः प्रामाण्यानङ्गीकारात् । वेदादेश्च प्रमाणतया परेणानङ्गीकृतत्वादित्येवं जिनाद्यभिमतमोक्ष इवात्र प्रत्यक्षागमयोरभावादित्यर्थः । **अस्मदुक्तं** अस्मदुक्तं प्रमेयम् ।

**कं०रा०—** 'श्रुतयश्चास्मदुक्तिगा' इत्यत्र उक्तिशब्दस्य भावार्थत्वे श्रुतयोऽस्मद्वचनप्रतिपादिका इत्युक्तं स्यात् । तच्चायुक्तम् । श्रुतीनां स्ववचनप्रतिपादकत्वाभावात् ते पराभिमतानुमानानां श्रुतिविरुद्धत्वस्यानुपपादनाच्चेत्यत्र उक्तशब्दः कर्मव्युत्पत्त्योक्तपर इत्याह **उच्यत इत्युक्तिरिति** । तथाच श्रुतीनामस्मदुक्तमोक्षप्रतिपादकतया पराभिमतमोक्षसाधकानुमानानां तद्विरुद्धत्वमुपपादितं भवतीति भावः । श्रुतीनामप्रमाणत्वात् कथं तद्विरुद्धत्वे पराभिमतानुमानानां कालात्ययापदिष्टत्वमित्यत आह **श्रुतिप्रामाण्यमिति** । श्रुतिप्रामाण्यं तु 'प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य ही'त्यत्र प्रागेव समर्थितमित्यर्थः ।

**शे०चं०— पूर्ववदिति** । प्रत्यक्षायोग्यत्वादस्यार्थस्य न तत्र प्रत्यक्षं प्रमाणम् । नाप्यागमः परकीयागमस्यास्मान्प्रति प्रामाण्यासम्मतेः । वेदादेश्च तं प्रति तदसम्मतेरिति पूर्ववदित्यर्थः । **अनुमानानीति** । मोक्षकालो विषयानुपप्लुतज्ञानसन्तानवान् विषयोपप्लवहेतुवासनानिवृत्तिमत्त्वात् । तथा विषयोपप्लवहेतुभूतवासनानिवृत्तिमांश्चतुर्विधभावनापरिपाकोत्तरकालत्वादिति वा । तत्कालीनं ज्ञानं विषयानुपप्लुतं निवृत्ततत्कारणत्वात् । तथा विप्रतिपन्नं निवृत्ततत्कारणकं चतुर्विधभावनापरिपाकोत्तरभावित्वात् इत्यनुमानानीत्यर्थः । उक्तिशब्दस्य भावसाधनत्वे स्वोक्तमोक्षस्य श्रुतिसिद्धत्वालाभेन परोक्तमोक्षस्य तद्विरुद्धत्वालाभप्रसङ्गात् तल्लाभाय कर्मणि क्तिनित्याशयेनाह **उच्यत इत्युक्तिरिति** ॥ **प्रागेवेति** । जिज्ञासासूत्रादावेवेत्यर्थः ।

**वा०र०**— हेत्वसिद्धिनिरासाय तत्साधकं प्रयोगान्तरमाह **तथेति** । एवं कालपक्षकं प्रयोगमभिधाय ज्ञानपक्षकप्रयोगमाह **तत्कालीनमिति** । अत एवेति व्यवच्छेदः कृतः । अत्रापि हेतुसाधनायाह **तथेति** । इति चानुमानानीत्यर्थ इति पाठः । प्राचीनेति वेत्यस्यास्य च मेलनेन बहुवचने कर्मणि क्तिन्निति पाठः । अनेनोक्त-मुक्तिरिति व्युत्पत्तिरित्युक्तं भवति । तत् कर्मणि क्तिन् इत्यादौ दृष्ट इति भावः ।

**॥ इति वैभाषिक-सौत्रान्तिकाभिमतमोक्षस्वरूपनिरूपणम्, तन्निरसनञ्च ॥**
**॥ इति विज्ञानवादिनां मतनिरासः ॥**

* * *

**॥ अथ साङ्ख्यवैशेषिकाभिमतमोक्षस्वरूपनिराकरणम् ॥**
**॥ अथ साङ्ख्याद्यभिमतमोक्षस्वरूपवर्णनम् ॥**

७६ **सु०**— साङ्ख्याद्यभिमतं मोक्षमनुवदति **साङ्ख्येति** ।

## अनु०— साङ्ख्यनैयायिकाद्याश्च प्राहुर्मोक्षं च निःसुखम् ।

आद्यग्रहणेन वैशेषिका उच्यन्ते । यथा पूर्वेऽनुपपन्नभाषिणस्तथैतेऽपीति ज्ञापनार्थ-श्चशब्दः । कुत एवं प्राहुरित्यत आह **इच्छेति** ।

## इच्छाद्वेषप्रयत्नादेरपि सर्वात्मना लयम् ।
## तत्राहुः

**तत्र मुक्तौ इच्छाद्वेषप्रयत्नादेरपि लयमाहुः** । सुप्तिप्रलयवैलक्षण्यं दर्शयितुं **सर्वात्मना** इत्युक्तम् । निवृत्तजातीयस्य तस्मिन्नेवात्मनि पुनरनुत्पादः सर्वात्मना लयः । **आदि-**पदेन बुद्धिदुःखधर्माधर्माणां शरीरेन्द्रियाणां च ग्रहणम् ।

**परि०**— **चशब्द इति** । अयुक्तवादिभिः समुच्चित्य निर्देशे सति त इवैतेऽपि तथेति लभ्यत इत्याह **यथा पूर्व इति** । तत्रेत्यनुवादः **मुक्ताविति** व्याख्या ॥ **सुप्तिप्रलयेति** । ननु सुप्त्यादावपि सूक्ष्मरूपेणाप्यनवस्थानात्सर्वात्मना लयोऽस्त्येवेत्यतः तस्यार्थमाह **निवृत्तेति** । निवृत्तं यदिच्छादि तज्जातीयस्येच्छाद्यन्तरस्यानुत्पाद इत्यर्थः । सुप्त्यादौ तु अस्त्युत्तरकालं तदुत्पाद इति भावः ।

**यादु०— चशब्द इति** । तथा च चशब्द उपमार्थः । पूर्वप्रकरणान्ते तस्मात् सर्व एतेऽनुपपन्नभाषिण इत्युपसंहारोऽध्याहार्य इति भावः । एवं च साङ्ख्यनैयायिकाद्याः पूर्व इव अनुपपन्नभाषिणो यतो मोक्षं निर्दुःखं प्राहुरिति योजना द्रष्टव्या ॥ **निवृत्तजातीयस्येति** । इच्छादिप्रागभावासमानाधिकरण इच्छादिलय इत्यर्थः ।

**कं०रा०— कुत एवमिति** । मोक्षस्य निःसुखत्वं कुतो हेतोः प्राहुरित्यर्थः ॥ **निवृत्तजातीयस्येति**। सुप्त्यनन्तरं प्रलयानन्तरं च निवृत्तेच्छाद्वेषादिसजातीयस्येच्छाद्वेषादेस्तस्मिन्नेवात्मनि पुनरुत्पादात् तदनुत्पादरूपेच्छाद्वेषादेः सर्वात्मना लयः सुप्तिप्रलययोर्नास्ति । मोक्षानन्तरं निवृत्तजातीयस्येच्छाद्वेषादेरनुत्पादात् तद्रूपः सर्वात्मना लयो मोक्षे त्वस्तीति सुप्तिप्रलयवैलक्षण्यं मोक्षस्य सर्वात्मना लय इत्यनेन दर्शितं भवतीति भावः । निवृत्तसजातीयस्येत्यादेः समानाधिकरणेच्छादिप्रागभावसमानकालीनत्वसहितेच्छादिः सर्वात्मना लय इत्यत्र तात्पर्यम् ।

**शे०चं०— चशब्द इति** । तथा च चशब्द उपमार्थः । पूर्वप्रकरणान्ते च तस्मात् सर्व एतेऽनुपपन्नभाषिण इत्युपसंहारेऽध्याहार्य इत्युक्तं भवति । साङ्ख्यनैयायिकाद्याः (सर्व)पूर्व इवानुपपन्नभाषिणो यतो मोक्षो निःसुखमाहुरिति योजना सूचिता भवति । **सुप्तीति** । इच्छाद्वेषप्रयत्नादिनिवृत्तेः सुप्तिप्रलययोरपि सद्भावात् तयोरप्यपवर्गत्वपरिहारार्थत्वमित्यर्थः । ननु सर्वात्मनेत्युक्तमिच्छादिनिवृत्तेरात्यन्तिकत्वं, न तावदिच्छाद्यसमानकालीनत्वम् । मौक्तेच्छादिनिवृत्तेरपि व्यधिकरणेच्छादिसमानकालीनत्वेनामुक्तित्वापातात् । नापि समानाधिकरणेच्छाद्यसमानकालीनत्वम् । सुप्तिप्रलययोरपि तन्निवृत्तेः समानाधिकरणेच्छाद्यसमानकालीनत्वेन मुक्तित्वप्रसङ्गात् । नापि प्रवृत्तिद्वेषेच्छाद्यजनकेच्छादुःखादिप्रतियोगित्वम् । योगिनोऽप्येवंभावेन मुक्तित्वप्रसङ्गात् परममुक्तेश्चात्र लक्ष्यमाणत्वादित्यतो *न्यायवाचस्पतिमिश्रैः* निरुक्तं *तात्पर्यपरिशुद्धि*कृता परिष्कृतं तन्निर्वचनमाह **निवृत्तजातीयस्येति** । निवृत्तस्येच्छादेः पुनरनुत्पादस्तस्मिन्नेवात्मनि संसारदशायामप्यस्तीत्यतिप्रसङ्गपरिहाराय तज्जातीयस्येत्युक्तम् । एकात्मनि निवृत्तजातीयस्यापीच्छादेः परात्मन्युत्पत्तेरपवर्गेऽपि सत्त्वेनासम्भवपरिहाराय तस्मिन्नेवात्मनीत्युक्तम् ।

**वा०र०—** साङ्ख्येति वाक्येऽपि तथा चेति योज्यम् । योजना चेति चशब्दबलादेव तल्लाभो वा । तत्त्वज्ञाननिःश्रेयसहेतुरिति *प्रशस्तपादभाष्यव्याख्यान*रूपनिःश्रेयसं पुनर्दुःखमित्यात्यन्तिकीति *किरणावली*व्याख्यानावसरे । ननु किमात्यन्तिकत्वमित्यादि *वर्धमान*कृतशङ्कां मनसि कृत्वा आह **ननु सर्वात्मनेत्युक्तमिति** ॥ **न्यायवाचस्पतिमिश्रैरिति** । प्रमाणतोऽर्थप्रतीताविति प्रथमभाष्यवाक्यसम्बन्धात्यन्तिकी पुनरेकविंशतिप्रभेदभिन्नदुःखहान्येति वार्तिकव्याख्यानावसरे निरुक्तमित्यर्थः । आत्यन्तिकत्वं तन्निवृत्तेर्निवृत्तस्य पुनरनुत्पाद इत्यनेनेति शेषः । यद्यपि *न्यायवाचस्पति*मिश्रकृन्निरुक्तात्यन्तिकत्वस्य निष्कर्षं कर्तुं *तात्पर्यपरिशुद्धावुदयनेन* अन्यथैवाभिहितम् । तथाहि । ननु यदि निवृत्तिः प्रागभावो दुःखस्य कथमात्यन्तिकः । उत्तरान्तानवच्छेदो ह्यात्यन्तिकत्वम् । प्रागभावस्य तथात्वे प्रागित्येव न स्यात् । अथ निवृत्तिप्रध्वंसः च सर्व एवात्यन्तिक इति कुतो निवृत्तेरात्यन्तिकत्वमुत्पादनमित्यत आहेति । तथा च दुःखपदस्थाने इच्छादिपदप्रक्षेपेण

तत्प्रागभावध्वंसयोरात्यन्तिकत्वानुपपत्तिशङ्कैव निर्वचननिमित्ततया वर्णनीया । तथापि सर्वात्मना लयमित्यनुभाष्यानुसारी द्वेषप्रयत्नादेरपि लयमाहुरिति मूले लयशब्देन ध्वंसस्यैव विशेष्योपादानेन प्रागभावप्रसक्तेरभावात्कुत आत्यन्तिकत्वव्युत्पादनमित्येवोदयनेनोक्तावपि प्रतियोग्यसमानकालीनत्वादिरूपात्यन्तिकत्वनिर्वचनस्य तेनानिराकृतत्वात्सुषुप्तिप्रलयवैलक्षण्यं दर्शयितुं सर्वात्मनेत्युक्तमिति मूले च उक्तप्रकारान्तरासम्भवस्यैव शङ्कार्हत्वान्निवृत्तिपदध्वंसे रूढतया प्रागभावपरतायाः क्लिष्टत्वाच्च तात्पर्यशुद्धिकृदुक्तनिमित्तपरित्यागेनोक्तकिरणावलीवर्धमानानुसारेण शङ्कान्तरमेव व्याख्याननिमित्तकतयोक्तमिति ज्ञातव्यम् । **तात्पर्यपरिशुद्धिकृतेति** । न्यायवाचस्पतिव्याख्यानरूपनिबन्धापरपर्यायतात्पर्यपरिशुद्धिकृतोदयनेनेत्यर्थः । निवृत्तस्य निवृत्तजातीयस्य पुनरनुत्पादः तत्रैवात्मनीति शेष इत्यनेनेति शेषः । निवृत्तस्य पुनरनुत्पादः संसारितादशायामप्यस्तीत्यादि निबन्धवर्धमानानुसारेण कृत्यमाह **निवृत्तस्येच्छादेरित्यादि** ॥ मूले **आदिपदेन बुद्धीति** । मुक्तौ विद्यमानसङ्ख्यादिपञ्चगुणातिरिक्तबुद्ध्यादिनवगुणानामपि नाशस्य वक्तव्यतया बुद्ध्यादिसमकक्षसंस्कारस्याप्यवशिष्टस्योपलक्षणमेतत् । अत एव वैशेषिकमतोपन्यासपरबोधादिनिखिलवैशेषिकगुणोच्छेदेन क्षेत्रज्ञस्य स्वरूपावस्थानमित्येत*न्न्यायमकरन्द*व्याख्यावसरे **चित्सुखेन** आदिशब्देन सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारविशेषगुणा गृह्यन्ते । सङ्ख्यादिसामान्यगुणानां मुक्त्यवस्थायामपि भावादित्युक्तम् । तद्व्याख्यावसरे नरेन्द्राचार्येणापि बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा नवात्मनो वैशेषिका गुणा असाधारणगुणा इत्याद्युक्तम् । नाप्यात्यन्तिकदुःखनिवृत्तिरिति । तत्त्वप्रदीपिकावतारे *नयनप्रसादिनीकृता* परमेश्वरप्रसादान्न वानात्मविशेषगुणानामात्यन्तिकी निवृत्तिरपवर्ग इति तद्दूषयतीत्युक्तत्वाच्च । परन्तु साङ्ख्यमते भावनाख्यसंस्कारस्याभावेन तन्मतसाधारणप्रक्रियानुवादावसरे बुद्ध्यादीनामष्टानामेव ग्रहणं मुखत उपवर्णितम् । अत एव भावाष्टकेति द्रष्टव्ये *द्रव्यवर्धमानपुरुषोत्तम्यादौ* उक्तम् । साङ्ख्यमते भावनाभावेनेति ज्ञेयम् ।

**स०व्र०**— तात्पर्यपरिशुद्धावुदयनोदीरितामात्यन्तिकतानिरुक्तिमाह **निवृत्तेति** । चेतनान्तरे तथाविधोत्पत्तिसम्भवेनासम्भवनिवृत्त्यर्थं तस्मिन्नात्मनीति विशेषणम् । निवृत्तस्यानुत्पादः संसारदशायामप्यस्तीति तज्जातीयस्येत्युक्तम् ।

* * *

**७७ सु०— ततश्चायमाशयः । न तावन्मुक्तस्य सुखमनादीत्युपपद्यते । संसारेऽपि तत्प्रतिभासप्रसङ्गात् प्रतिभासत एवेति चेन्न । प्रतिभासमानस्यानादितायां साधनोपादानवैयर्थ्यापत्तेः ।**

**अव्यक्तत्वात् संसारे न प्रतिभासते व्यक्तत्वात् तु मुक्तौ प्रतिभासत इति चेन्न । अव्यक्तिर्हि प्रतिभासाभावो व्यक्तिश्च प्रतिभासः । ततश्चाप्रतिभासान्न प्रतिभासते प्रतिभासनाच्च प्रतिभासत इत्युक्तं स्यात् । किञ्च प्रतीतिकारणान्तःकरणसद्भावे संसारे न प्रती-**

**यादु०— चशब्द इति** । तथा च चशब्द उपमार्थः । पूर्वप्रकरणान्ते तस्मात् सर्व एतेऽनुपपन्नभाषिण इत्युपसंहारोऽध्याहार्य इति भावः । एवं च साङ्ख्यनैयायिकाद्याः पूर्व इव अनुपपन्नभाषिणो यतो मोक्षं निर्दुःखं प्राहुरिति योजना द्रष्टव्या ॥ **निवृत्तजातीयस्येति** । इच्छादिप्रागभावासमानाधिकरण इच्छादिलय इत्यर्थः ।

**कं०रा०— कुत एवमिति** । मोक्षस्य निःसुखत्वं कुतो हेतोः प्राहुरित्यर्थः ॥ **निवृत्तजातीयस्येति।** सुप्त्यनन्तरं प्रलयानन्तरं च निवृत्तेच्छाद्वेषादिसजातीयस्येच्छाद्वेषादेस्तस्मिन्नेवात्मनि पुनरुत्पादात् तदनुत्पादरूपेच्छाद्वेषादेः सर्वात्मना लयः सुप्तिप्रलययोर्नास्ति । मोक्षानन्तरं निवृत्तजातीयस्येच्छाद्वेषादेरनुत्पादात् तद्रूपः सर्वात्मना लयो मोक्षे त्वस्तीति सुप्तिप्रलयवैलक्षण्यं मोक्षस्य सर्वात्मना लय इत्यनेन दर्शितं भवतीति भावः । निवृत्तसजातीयस्येत्यादेः समानाधिकरणेच्छादिप्रागभावसमानकालीनत्वसहितेच्छादिः सर्वात्मना लय इत्यत्र तात्पर्यम् ।

**शे०चं०— चशब्द इति** । तथा च चशब्द उपमार्थः । पूर्वप्रकरणान्ते च तस्मात् सर्व एतेऽनुपपन्नभाषिण इत्युपसंहारेऽध्याहार्य इत्युक्तं भवति । साङ्ख्यनैयायिकाद्याः (सर्व)पूर्व इवानुपपन्नभाषिणो यतो मोक्षो निःसुखमाहुरिति योजना सूचिता भवति । **सुप्तीति** । इच्छाद्वेषप्रयत्नादिनिवृत्तेः सुप्तिप्रलययोरपि सद्भावात् तयोरप्यपवर्गत्वपरिहारार्थत्वमित्यर्थः । ननु सर्वात्मनेत्युक्तमिच्छादिनिवृत्तेरात्यन्तिकत्वं, न तावदिच्छाद्यसमानकालीनत्वम् । मौक्तेच्छादिनिवृत्तेरपि व्यधिकरणेच्छादिसमानकालीनत्वेनामुक्तित्वापातात् । नापि समानाधिकरणेच्छाद्यसमानकालीनत्वम् । सुप्तिप्रलययोरपि तन्निवृत्तेः समानाधिकरणेच्छाद्यसमानकालीनत्वेन मुक्तित्वप्रसङ्गात् । नापि प्रवृत्तिद्वेषेच्छाद्यजनकेच्छादुःखादिप्रतियोगित्वम् । योगिनोऽप्येवंभावेन मुक्तित्वप्रसङ्गात् परममुक्तेश्चात्र लक्ष्यमाणत्वादित्यतो *न्यायवाचस्पतिमिश्रैः* निरुक्तं *तात्पर्यपरिशुद्धि*कृता परिष्कृतं तन्निर्वचनमाह **निवृत्तजातीयस्येति** । निवृत्तस्येच्छादेः पुनरनुत्पादस्तस्मिन्नेवात्मनि संसारदशायामप्यस्तीत्यतिप्रसङ्गपरिहाराय तज्जातीयस्येत्युक्तम् । एकात्मनि निवृत्तजातीयस्यापीच्छादेः परात्मन्युत्पत्तेरपवर्गेऽपि सत्त्वेनासम्भवपरिहाराय तस्मिन्नेवात्मनीत्युक्तम् ।

**वा०र०—** साङ्ख्येति वाक्येऽपि तथा चेति योज्यम् । योजना चेति चशब्दबलादेव तल्लाभो वा । तत्त्वज्ञाननिःश्रेयसहेतुरिति *प्रशस्तपादभाष्यव्याख्यानरूपनिःश्रेयसं* पुनर्दुःखमित्यात्यन्तिकीति *किरणावली*व्याख्यानावसरे । ननु किमात्यन्तिकत्वमित्यादि *वर्धमान*कृतशङ्कां मनसि कृत्वा आह **ननु सर्वात्मनेत्युक्तमिति ॥ न्यायवाचस्पतिमिश्रैरिति** । प्रमाणतोऽर्थप्रतीताविति प्रथमभाष्यवाक्यसम्बन्धात्यन्तिकी पुनरेकविंशतिप्रभेदभिन्नदुःखहान्येति वार्तिकव्याख्यानावसरे निरुक्तमित्यर्थः । आत्यन्तिकत्वं तन्निवृत्तेर्निवृत्तस्य पुनरनुत्पाद इत्यनेनेति शेषः । यद्यपि *न्यायवाचस्पति*मिश्रकृन्निरुक्तात्यन्तिकत्वस्य निष्कर्षं कर्तुं *तात्पर्यपरिशुद्धावुदयनेन* अन्यथैवाभिहितम् । तथाहि । ननु यदि निवृत्तिः प्रागभावो दुःखस्य कथमात्यन्तिकः । उत्तरान्तानवच्छेदो ह्यात्यन्तिकत्वम् । प्रागभावस्य तथात्वे प्रागित्येव न स्यात् । अथ निवृत्तिप्रध्वंसः च सर्व एवात्यन्तिक इति कुतो निवृत्तेरात्यन्तिकत्वमुत्पादनमित्यत आहेति । तथा च दुःखपदस्थाने इच्छादिपदप्रक्षेपेण

तत्प्रागभावध्वंसयोरात्यन्तिकत्वानुपपत्तिशङ्कैव निर्वचननिमित्ततया वर्णनीया । तथापि सर्वात्मना लयमित्यनु-भाष्यानुसारी द्वेषप्रयत्नादेरपि लयमाहुरिति मूले लयशब्देन ध्वंसस्यैव विशेष्योपादानेन प्रागभावप्रसक्तेरभावात्कुत आत्यन्तिकत्वव्युत्पादनमित्येवोदयनेनोक्तावपि प्रतियोग्यसमानकालीनत्वादिरूपात्यन्तिकत्वनिर्वचनस्य तेनानिरा-कृतत्वात्सुप्तिप्रलयवैलक्षण्यं दर्शयितुं सर्वात्मनेत्युक्तमिति मूले च उक्तप्रकारान्तरासम्भवस्यैव शङ्काहत्वान्निवृत्ति-पदध्वंसे रूढतया प्रागभावपरतायाः क्लिष्टत्वाच्च तात्पर्यशुद्धिकृदुक्तनिमित्तपरित्यागेनोक्तकिरणावलीवर्धमानानुसारेण शङ्कान्तरमेव व्याख्याननिमित्तकतयोक्तमिति ज्ञातव्यम् । **तात्पर्यपरिशुद्धिकृतेति** । न्यायवाचस्पतिव्याख्यानरूप-निबन्धापरपर्यायतात्पर्यपरिशुद्धिकृतोदयनेनेत्यर्थः । निवृत्तस्य निवृत्तजातीयस्य पुनरनुत्पादः तत्रैवात्मनीति शेष इत्यनेनेति शेषः । निवृत्तस्य पुनरनुत्पादः संसारितादशायामप्यस्तीत्यादि निबन्धवर्धमानानुसारेण कृत्यमाह **निवृत्तस्येच्छादेरित्यादि** ॥ मूले **आदिपदेन बुद्धीति** । मुक्तौ विद्यमानसङ्ख्यादिपञ्चगुणातिरिक्तबुद्ध्यादि-नवगुणानामपि नाशस्य वक्तव्यतया बुद्ध्यादिसमकक्षसंस्कारस्याप्यवशिष्टस्योपलक्षणमेतत् । अत एव वैशेषिक-मतोपन्यासपरबोधादिनिखिलवैशेषिकगुणोच्छेदेन क्षेत्रज्ञस्य स्वरूपावस्थानमित्येत*न्न्यायमकरन्द*व्याख्यावसरे **चित्सुखेन** आदिशब्देन सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारविशेषगुणा गृह्यन्ते । सङ्ख्यादिसामान्यगुणानां मुक्त्यवस्थायामपि भावादित्युक्तम् । तद्व्याख्यावसरे नरेन्द्राचार्येणापि बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा नवात्मनो वैशेषिका गुणा असाधारणगुणा इत्याद्युक्तम् । नाप्यात्यन्तिकदुःखनिवृत्तिरिति । तत्त्वप्रदीपिकावतारे *नयनप्रसादिनीकृता* परमेश्वरप्रसादान्न वानात्मविशेषगुणानामात्यन्तिकी निवृत्तिरपवर्ग इति तद्दूषयतीत्युक्तत्वाच्च । परन्तु साङ्ख्यमते भावनाख्यसंस्कारस्याभावेन तन्मतसाधारणप्रक्रियानुवादावसरे बुद्ध्यादीनामष्टानामेव ग्रहणं मुखत उपवर्णितम् । अत एव भावाष्टकेति द्रष्टव्ये *द्रव्यवर्धमानपुरुषोत्तम्यादौ* उक्तम् । साङ्ख्यमते भावनाभावेनेति ज्ञेयम् ।

**स०व्र०—** तात्पर्यपरिशुद्धावुदयनोदीरितामात्यन्तिकतानिरुक्तिमाह **निवृत्तेति** । चेतनान्तरे तथा-विधोत्पत्तिसम्भवेनासम्भवनिवृत्त्यर्थं तस्मिन्नात्मनीति विशेषणम् । निवृत्तस्यानुत्पादः संसारदशायामप्यस्तीति तज्जातीयस्येत्युक्तम् ।

* * *

**७७ सु०— ततश्चायमाशयः । न तावन्मुक्तस्य सुखमनादीत्युपपद्यते । संसारेऽपि तत्प्रतिभासप्रसङ्गात् प्रतिभासत एवेति चेन्न । प्रतिभासमानस्यानादितायां साधनोपादान-वैयर्थ्यापत्तेः ।**

**अव्यक्तत्वात् संसारे न प्रतिभासते व्यक्तत्वात् तु मुक्तौ प्रतिभासत इति चेन्न । अव्यक्तिर्हि प्रतिभासाभावो व्यक्तिश्च प्रतिभासः । ततश्चाप्रतिभासान्न प्रतिभासते प्रति-भासनाच्च प्रतिभासत इत्युक्तं स्यात् । किञ्च प्रतीतिकारणान्तःकरणसद्भावे संसारे न प्रती-**

**यते । मुक्तौ तु तदपगमे प्रतीयत इति सुभाषितम् । आवृतत्वान्न प्रतीयत इति चेन्न । मूर्तत्वाभावेनावरणानुपपत्तेः । तदनिरूपणाच्च । सुखमिव तत्प्रतीतिरप्यनादिश्चेत्किमावरण-कृत्यम् । विषयविषयिभावः प्रतिबध्यत इति चेन्न । निर्विषयायाः प्रतीतेरनुपपत्तेः । सुख-तत्प्रतीत्योरनादितायां प्रमितायामेव चैषा कल्पना युक्ता । न च तत्र प्रमाणं पश्यामः । ततः सुखस्य तत्प्रतीतेश्च मुक्तावुत्पत्तिरेव वक्तव्या । साऽपि न सम्भवति । कारणाभावात् । शरीरे सति तदाश्रयेन्द्रियसद्भावः, तैरर्थालोचनं, ततः पूर्वानुभूतसारूप्येणेष्टानिष्टसाधन-त्वानुमानं, तस्मादिच्छाद्वेषौ ताभ्यां प्रयत्नः, ततश्चेष्टसाधनोपादानं, अनिष्टसाधनहानं च, ततः सुखोत्पादः, तदनन्तरं तत्प्रतीतिरित्येष दृष्टकारणक्रमः । अदृष्टं च सर्वत्र विजयते । न चैष कारणप्रवाहो मुक्तावस्ति । तत्सद्भावे दुःखस्यापि प्रसङ्गेन मुक्तत्वव्याघातात् ।**

**तस्मात् सुखरहित एव मोक्षः ।**

**परि०—** ननु सुखाभावं प्रतीच्छादेरभावस्य कथं हेतुता सुखस्यानादित्वेनाप्युपपत्त्या तदुत्पत्तेरभावेन उत्पत्ताविच्छादेरनुपयोगादित्यत आह **अयमाशय इति** ॥ **मूर्तत्वाभावेनेति** । परिच्छिन्नपरिमाणयोगित्वाभावादित्यर्थः । तादृशस्यैव घटादेः पटादिना आवृतत्वदर्शनादिति भावः । रूपादेरन्धकारावृतत्ववत् किं न स्यादित्यत आह **तदनिरूपणाच्चेति** । ज्ञानाभावातिरेकेण आवरण-स्यानिरूपणाच्चेत्यर्थः । एवमनादित्वं सुखतत्प्रतीत्योर्निरस्योत्पत्तिमापाद्य मुक्तौ सुखाभावे इच्छा-द्यभावस्य हेतुतां व्यनक्ति **ततः सुखस्येति** । अनादित्वासम्भवादित्यर्थः ॥ **सर्वत्र विजयत इति**। शरीरेन्द्रियादिरूपोक्तकारणसमूहे प्रतिकारणं अदृष्टमपेक्ष्यत एवेत्यर्थः ।

**यादु०—** **अव्यक्तत्वादिति** । तथा च संसारे सुखवत् तत्प्रतीतिरपि न वक्तव्येति भावः । नन्व-मूर्तमपि रूपादिकं अन्धकारावृतमुपलब्धम्, अत आह **तदनिरूपणाच्चेति** ॥ **सर्वत्र विजयत इति** । शरीर-मारभ्योक्तकारणकलापे सर्वत्र कारणं भवतीत्यर्थः ।

**वं०प०—** **साधनोपादानेति** । स्रक्चन्दनादिरूपसुखसाधनेत्यर्थः ॥ **एषा कल्पनेति** । सुखस्या-नादित्वे प्रमितत्वेऽव्यक्तत्वान्न प्रतिभास इति कल्पना । तत्प्रतीतेरनादित्वे प्रमितत्वे विषयविषयिभावः प्रति-बद्ध्यत इति कल्पना च युक्तेत्यर्थः । **अर्थालोचनं** अर्थसन्निकर्षः ।

**कं०रा०—** नन्विच्छाद्यभावेन मोक्षे जन्यसुखासम्भवेऽपि नित्यसुखसम्भवात् कथं मोक्षस्य निःसुखत्वे इच्छाद्यभावः प्रयोजक इत्यतस्तात्पर्यमाह **ततश्चायमाशय इति** ॥ **प्रतिभासमानस्येति** । संसारेऽपि सुख-

स्यानादित्वेऽङ्गीक्रियमाणे श्रवणादिरूपसुखसाधनानुष्ठानस्य सुखोत्पादार्थत्वायोगात् साधनानुष्ठानस्य वैयर्थ्यापत्तिरिति भावः ॥ **प्रतीतिकारणेति** । सुखप्रतीतिकारणान्तःकरणसद्भावे संसारदशायां सुखं न प्रतीयते, मुक्तिदशायां तु सुखप्रतीतिकारणान्तःकरणापगमे सुखं प्रतीयत इति सुष्ठु भाषितमिति सोपहासोक्तिः । सुखितत्प्रतीत्योरनादित्वेऽपि तयोर्विषयविषयिभावप्रतिबन्ध आवरणकृत्यमिति शङ्कते **विषयेति** ॥ **एषा कल्पनेति** । विषयविषयिभावप्रतिबन्ध आवरणकृत्यमिति कल्पनेत्यर्थः । **अर्थालोचनम्** अर्थानुभवः ॥ **पूर्वानुभूतसारूप्येणेति** । पूर्वानुभूतरजतादिसारूप्येणेष्टसाधनत्वानुमानं पूर्वानुभूताहिकण्टकादिसारूप्येण त्वनिष्टसाधनत्वानुमानमित्यर्थः ।

**शे०चं०**— ननु पुरुषार्थत्वानुरोधेन सुखतत्प्रतीत्योर्मुक्ताववश्यमभ्युपगन्तव्यतया मुक्ताविच्छादिविशेषगुणध्वंसो सम्भावित एव । अन्यथाऽपुरुषार्थत्वप्रसङ्गादित्यतो मुक्तौ सुखतत्प्रतीत्योः सर्वथाऽप्यसम्भवोपपादनपूर्वकं तत्पुरुषार्थत्वं दर्शयितुमाह **ततश्चेति** ॥ **न तावदिति** । करिष्यमाणसादिसुखनिरासापेक्षया तावच्छब्दः ॥ **संसारेऽपीति** । सतो योग्यस्याप्यप्रतिभासे कारणाभावादिति भावः । अत्रेष्टापत्तिमाशङ्कते **प्रतिभासत एवेतीति** । अत्र तथा सति मुक्तसंसारिणोरविशेषप्रसङ्ग इति सत्येव दोषे दोषान्तरमाह **प्रतिभासमानस्येति** । सुखस्यानादित्वं वदता मोक्षसाधनोपादानस्य तदर्थताया वक्तुमशक्यत्वेन तदभिव्यक्त्यर्थताया एव वक्तव्यत्वात् संसारदशायां तत्प्रतिभासस्याप्यभ्युपगमे तादर्थ्यस्याप्यसम्भवात् मोक्षसाधनोपादानवैयर्थ्यं स्यादित्यर्थः ।

अस्तु तर्हि संसारे सतोऽपि सुखस्याव्यक्तया अप्रतिभास इत्याशङ्कते **अव्यक्तत्वादिति** । अव्यक्तत्वं किमप्रतिभासमानत्वं किंवा तत्प्रयोजकमावृतत्वमिति विकल्पद्वयं मनसि निधाय आद्यमनूद्य अभेदेन प्रयोज्यप्रयोजकभावानुपपत्त्या दूषयति **अव्यक्तिर्हीति** । विरोधेनापि पराचष्टे **किञ्चेति** । द्वितीयमाशङ्कते **आवृतत्वादिति** ॥ **मूर्तत्वाभावेनेति** । सुखस्य गुणत्वादमूर्तत्वेन आवृतत्वव्यापकमूर्तत्वाभावेन तद्व्याप्यस्यावृतत्वस्य अनुपपत्तेरित्यर्थः । अङ्गीकृत्यैव चावरकममूर्तत्वेनावरणानुपपत्तिरभिहिता । वस्तुतस्त्वावरकमेव तस्य दुर्निरूपमित्याह **तदनिरूपणाच्चेति** ।

अस्तु वा आवरकमपि । तथाऽपि न सुखस्य तदावृतत्वं सम्भवति । तत्कृत्याभावात् । तद्धि भवत्प्रकाशप्रतिबन्धो वा स्यात् विषयविषयिभावप्रतिबन्धो वेति विकल्पद्वयं मनसि निधाय आद्यं दूषयति **सुखमिवेति** । वक्ष्यमाणरीत्या तत्प्रतीतेः सादित्वानुपपत्त्या सुखादिवदनादित्वात् विषयविषयिभावदशायामपि (संसारदशायामपि) सत्त्वेन प्रकाशप्रतिबन्धस्य नावरणकृत्यत्वमित्यर्थः । द्वितीयमाशङ्कते **विषयेति** । किञ्च संसारावस्थायां सुखस्यावृतत्वं विषयविषयिभावप्रतिबन्धश्चावरणकृत्यमिति किं सुखतत्प्रतीत्योरनादितायाः प्रमितत्वात् कल्प्यते किंवा अप्रमितायामपि तस्यामिति विकल्पद्वयं मनसि निधाय द्वितीयमतिप्रसङ्गेन दूषयति **सुखतत्प्रतीत्योरिति** । प्रथममसिद्ध्या दूषयति **न च तत्रेति** । ननु नित्यं विज्ञानमानन्दं ब्रह्मेति श्रुतिरेव तत्र मानमिति कथं तदभाव इति चेन्न । विकल्पानुपपत्तेः । तथाहि । किं लोकसिद्धेन सुखेन ब्रह्माभेदः अनया श्रुत्या

बोध्यते किंवा सुखान्तरेण । नाद्यः । लोकसिद्धसुखस्य विनाशित्वेन ब्रह्माभेदे बाधात् । अन्त्येऽपि सुखान्तरं प्रमाणान्तरसिद्धं श्रुतिसिद्धमेव वा । नाद्यः । तथाविधसुखबोधकस्य प्रमाणान्तरस्याभावात् । नान्त्यः । श्रुतेर्नित्यसुखांशेऽसामर्थ्यात् । न च नित्यत्वविशेषणबलात् प्रथमतस्तावन्नित्यं सुखं श्रुत्या बोध्यते अनन्तरं तेन सह ब्रह्माभेद इति वाच्यम् । तथा सति वाक्यभेदप्रसङ्गात् । किञ्च सुखाभेदबोधनमपि ब्रह्मणोऽनुपपन्नमेव । तस्य सुखी अहमित्यनुभवेन तदाश्रयत्वेन विषयीक्रियमाणत्वात् । न च ब्रह्माभेदान्यथाऽनुपपत्त्या नित्यसुखसिद्धिरिति वाच्यम् । इतरेतराश्रयप्रसङ्गात् । सिद्धे हि तथाविधसुखेऽनेन ब्रह्माभेदप्रतिपत्तिः । ब्रह्माभेदप्रतिपत्तौ च तथाविधसुखसिद्धिरिति । तस्माद्बाधिताया ग्रावप्लवनश्रुतिवदुपचरितार्थत्वान्न तस्या नित्यसुखे प्रामाण्यमिति भावः ॥ **तत इति** । सुखतत्प्रतीत्योरनादित्वायोगादित्यर्थः ।

अस्तु तर्हि तयोर्मुक्तावुत्पत्तिरेव । तथाऽपि न मुक्ताविच्छादिगुणविलयसिद्धिरित्यतो भवेदेतदेवं यदि तयोस्तत्रोत्पत्तिरुपपन्ना स्यात् । न च तयोरुत्पत्तिः तत्र सम्भवतीत्यतो नोक्तविधमोक्षहानिरित्याशयेनाह **साऽपीति** । तत्र हेतुमाह **कारणेति** । कथं कारणाभाव इत्यतः तमुपपादयितुं क्लृप्तं कारणकलापमुपदर्शयति **शरीरे सतीत्यादिना** ॥ **सर्वत्रेति** । शरीरमारभ्योक्तकारणकलापे सर्वत्र कारणं भवतीत्यर्थः । अस्तु तर्ह्येतत्कारणचक्रबलादेव मुक्तावपि सुखतत्प्रतीत्योरुत्पत्तिरित्यतः तस्य असिद्धिमाह **न चेति** । तत्रापि तत्सद्भावे बाधकमाह **तत्सद्भाव इति** । शरीरादेर्दुःखाविनाभूतत्वात् तत्प्रसङ्ग इत्यर्थः । तत्रापीष्टापत्तौ बाधकान्तरमाह **मुक्तत्वेति** । 'दुःखेनात्यन्तं विमुक्तश्चरती'त्यादिश्रुतिबलान्मुक्तस्यात्यन्तदुःखविरहसिद्ध्या सदुःखत्वे मुक्तत्वव्याघातादित्यर्थः । **तस्मादिति** । तत एव तत्प्रतीतिरहितोऽपीति युक्त एव मुक्ताविच्छादिगुणविलय इति भावः।

**वा०र०— तत्पुरुषार्थत्वमिति** । इच्छादिविशेषगुणध्वंसस्य पुरुषार्थत्वमित्यर्थः । न तावन्मुक्तस्येत्यादिमूलग्रन्थो वाक्यक्रमेण कत्य इति न प्रतीतम् । अन्वीक्षातत्त्वबोधात्मतत्त्वविवेकादि पर्यालोच्यमस्ति तत्रत्यश्चेद्भविष्यति । अर्थतस्तु तदत्यन्तमोक्षोऽपवर्ग इति प्रमेयभूतापवर्गलक्षणकथनपरसूत्रीयभाष्ये नित्यं सुखमात्मनो महत्त्ववन्मोक्षेऽभिव्यज्यं तेनाभिव्यक्तेनात्यन्तविमुक्तः सुखी भवतीति केचिन्मन्यन्ते । तेषां प्रमाणाभावादनुपपत्तिरित्यादिना नित्यसुखनिराकरणं कृतम् । तद्भाष्यवार्तिकतद्वाचस्पति तत्तात्पर्यपरिशुद्धितद्वर्मतदनुसारेणायं ग्रन्थो भविष्यति । **इति सत्येव दोष इति** । उक्तं च द्रव्यकिरणावलीवर्धमाने तौ तावित्यभिमतमोक्षनिरासप्रसङ्गे वस्तुतोऽभिव्यक्तिर्न नित्या । उक्तसंसारिणोरविशेषापातादिति । नित्यं तदभिव्यक्तेर्मुक्तसंसारिणोरविशेषापातादिति वैशेषिकसूत्रवृत्तौ चोक्तमिति भावः ।

**स०व्र०— मूर्तत्वाभावेनेति** । गुणत्वेनामूर्तत्वादिति भावः ॥ **तदिति** । आवरणनिरूपणाच्चेत्यर्थः ॥ **अदृष्टं चेति** । सर्वत्र विजातीयसमस्तकार्येषु प्रभवतीत्यर्थः । (यदि मदीयानर्थो भवतीत्युच्यते तर्हि कथं तस्य पुरुषार्थत्वमित्यत आह **स्वरूपेणेति** ।)

**॥ इति साङ्ख्याद्यभिमतमोक्षस्वरूपवर्णनम् ॥**

॥ अथ मोक्षस्य सुखरहितत्वेऽपि दुःखनिवृत्तिरूपत्वात् पुरुषार्थत्वसमर्थनम् ॥

७८ **सु०— कथमयं पुरुषार्थ इति चेत् शरीरं षडिन्द्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं चेत्येकविंशतिभेददुःखात्यन्तनिवृत्तित्वादिति ब्रूमः । दुःखनिवृत्तिः पुरुषार्थ एव न भवति । तदीयपुरुषार्थत्वस्य सोपाधिकत्वात् । सुखं दुःखाभावे सत्येव भवतीति सुखार्थं दुःखाभावो मृग्यते न तु स एव पुरुषस्य समीहित इति चेत् (न) । विपर्ययस्यापि सद्भावात् । भोजनादिसुखे सत्येव बुभुक्षादिदुःखं निवर्तत इति दुःखनिवृत्त्यर्थमेव भोजनादिसुखं मृग्यते न पुनस्तदेव पुरुषस्य समीहितमिति कल्प्यते । क्वचिद् दुःखनिवृत्त्यभावेऽपि सुखस्येष्यमाणत्वादिति चेन्न । दुःखनिवृत्तेरपि क्वचित् सुखाभावेऽपीष्यमाणत्वात् । दुःखनिवृत्तौ सत्यां सुखमेव भविष्यतीत्यभिसन्धिस्तावदस्तीति चेत् । सुखावस्थायां नियतो दुःखविरहो भवतीत्यभिसन्धेस्तत्रापि सद्भावात् । तस्मात् यद्यपि दुःखाभावे सुखं सुखे च दुःखभावो नियतः, तथाऽपि परस्परं निरपेक्षमेव पुरुषार्थत्वमनयोः, इच्छाया असङ्कीर्णविषयत्वादिति ।**

**परि०—** हेत्वभावेन सुखाभावं मुक्तावुपपाद्येदानीं पुमर्थत्वं तस्य दूषणसौकर्याय व्यनक्ति **कथमयमिति** । सुखहीनो मोक्ष इत्यर्थः । **षडिन्द्रियाणि** घ्राणरसनचक्षुःश्रोत्रत्वक्मनांसि । गन्धरसरूपशब्दस्पर्शा आत्मा ज्ञानादिश्चेति **षड्विषयाः** । एतद्विषयकज्ञानानि **षड्बुद्धयः** । शङ्कते **दुःखनिवृत्तिरिति** ॥ **सोपाधिकत्वादिति** । सुखोपाधिकत्वादित्यर्थः । तदेव व्यनक्ति **सुखमिति** ॥ **भोजनादिसुखे इति** । तज्जन्यसुखे सत्येवेत्यर्थः । **बुभुक्षादिदुःखं** तज्जन्यदुःखमित्यर्थः ॥ **क्वचिदिति** । परवनितादौ ॥ **क्वचित्सुखाभावेऽपीति** । विष्टिगृहीतपुरुषप्रवृत्त्यादौ सुखाभावेऽपि तात्कालिकराजोपद्रवदुःखनिवृत्तेरिष्यमाणत्वदर्शनादिति भावः ।

**गु०दी०—** **क्वचिद्दुःखनिवृत्त्यभावेऽपीत्यत्र** तृड्रहितस्यापि गुडरसास्वादनजन्यसुखाय गुडोदकपानदर्शनादित्यर्थः । **दुःखनिवृत्तेरपीत्यत्र** तिक्तौषधपानेनापि व्याधिनिवृत्तेर्दर्शनादिति हि परस्याशयः । वस्तुतस्तु तदैव शरीरलाघवादिना ईषत्सुखमप्यस्त्येवेति नेदमुदाहरणमिति ज्ञेयम् । **सुखावस्थायां नियतो दुःखविरहोऽपि भवतीत्येतदपि** तृड्रहितगुडोदकपानोदाहरणेन निरस्तम् । प्रत्युत अग्निमान्द्यादिदुःखं स्यादिति जानन्नेव पिबतीति ज्ञेयम् । **परस्परनिरपेक्षपुरुषार्थत्वमनयोरित्येतदपि** चिन्त्यम् । तर्हि भक्ष्यरहितभोजनवत् पुरुषापेक्षितैकपुरुषार्थाभावेन मोक्षस्य महाफलत्वं न स्यादिति ।

**यादु०—** **सोपाधिकत्वादिति** । स्रक्चन्दनादिवदन्यार्थमर्थ्यत्वादिति भावः । एतदेव दर्शयति **सुखमित्यादिना** ॥ **क्वचिदिति** । परदाराभिगमनादावित्यर्थः । तत्र बहुतरदुःखसम्भावनायामपि सुखमात्रमुद्दिश्य

शिरो मदीयं यदि यास्यति तर्हि यातु हस्तप्राप्तमिदं सुखं सर्वथा न हातव्यमित्यभिसन्धिना प्रवर्तमाना दृश्यन्ते ॥ **क्वचित्सुखाभावेऽपीति** । गुरुतरभारपरिश्रान्ते पुरुष इत्यर्थः । स हि गुरुतरभारनिमित्तमिदं दुःखं तावदपगच्छतु । सुखं भवतु वेत्यभिसन्धिना गुरुतरं काष्ठादिभारं परित्यजन् दृश्यते ।

**वं०प०**— सिद्धान्ती शङ्कते **दुःखनिवृत्तिरिति** । स्वयमेवेति शेषः ॥ **सोपाधिकत्वादिति** । स्रक्चन्दनादिवत् सुखार्थमर्थ्यत्वादित्यर्थः । सुखार्थमेव दुःखाभावो मृग्यत इत्येतदुपपादयति **सुखमिति** ॥ **विपर्ययस्यापीति** । सुखमपि न पुरुषार्थः । तदीयपुरुषार्थत्वस्यापि सोपाधिकत्वाद्दुःखनिवृत्त्यर्थत्वादित्यर्थः । दुःखनिवृत्त्यर्थमेव सुखं मृग्यत इत्येतदुपपादयति **भोजनादिसुखे सत्येवेति** । यदुक्तं सुखं दुःखाभावार्थं मृग्यत इति तस्य पुरुषार्थत्वं सोपाधिकमिति पुनः सिद्धान्ती शङ्कते **क्वचिदिति** । परदाराभिगमनादावित्यर्थः । तर्हि सुखार्थमेव दुःखभावो मृग्यत इति दुःखनिवृत्तेरपि पुरुषार्थत्वं सोपाधिकमिति यदुक्तं तदप्ययुक्तमित्याह **दुःखनिवृत्तेरपीति** । शिरसि गुरुतरकाष्ठभारपरिश्रान्तस्तं परित्यजति यदा तदेत्यर्थः । पुनः सिद्धान्ती शङ्कते **दुःखनिवृत्तिरिति** ॥ **तावदिति** । काष्ठभारं परित्यजतः पुरुषस्येत्यर्थः । तथा च सुखाभावेऽपीष्यमाणत्वादित्ययुक्तमिति भावः ॥ **तत्रापीति** । परदाराभिगमनस्थलेऽपीत्यर्थः । तथा च दुःखनिवृत्त्यभावेऽपि सुखस्येष्यमाणत्वादित्युक्तमयुक्तमिति भावः । कथमनयोः परस्परनिरपेक्षपुरुषार्थत्वमित्यत आह **इच्छाया इति** । कदाचित् सुखमेव मे स्यादित्येवेच्छा भवति । कदाचिद् दुःखमेव मनागपि माभूदित्येवमिच्छयोरसङ्कीर्णसुखदुःखाभावविषयकत्वानुभवादित्यर्थः ।

**कं०रा०**— दुःखाभावस्य पुरुषैरिष्यमाणत्वरूपं पुरुषार्थत्वं सोपाधिकमित्येतदुपपादयति **सुखमिति** । **मन्यते** इष्यते ॥ **न त्विति** ॥ दुःखाभावो दुःखाभावत्वेनैव रूपेण पुरुषस्य समीहितो नैवेत्यर्थः । तथा च सुखार्थत्वेनेष्यमाणो दुःखाभावः स्रक्चन्दनादिवन्न स्वतः पुरुषार्थ इति भावः ॥ **क्वचिदिति** । यत्र स्रक्चन्दनाद्यनुभवप्रयुक्तसुखानन्तरमेवेष्यमाणं कमनीयकान्तावलोकनादिप्रयुक्तसुखं जायते तत्र प्राग्दुःखाभावेन तन्निवृत्त्यभावेऽपि सुखस्येष्यमाणत्वात् दुःखनिवृत्त्यर्थमेव सुखमिष्यत इत्येतदयुक्तमिति भावः ॥ **दुःखनिवृत्तेरपीति** । यत्र भारपीडितस्य भारनिवृत्तौ दुःखनिवृत्तिः तत्र विषयानुभावाभावेन सुखाभावेऽपि दुःखनिवृत्तेरिष्यमाणत्वात् सुखार्थत्वेन दुःखनिवृत्तेरिष्यमाणत्वमित्येतदयुक्तमिति भावः । दुःखाभावे सुखमिति भारपीडितस्य भारनिवृत्तिप्रयुक्तदुःखनिवृत्तिदशायामिष्टस्मरणादिप्रयुक्तसुखसम्भवात्, दुःखाभावे सति सुखं नियतमिति भावः । न चैवं दुःखनिवृत्तेरपि क्वचित्सुखाभावेऽपीष्यमाणत्वादिति प्राक्तनग्रन्थविरोध इति वाच्यम् । प्राक्तनग्रन्थस्य सुखस्थले दुःखाभावस्य च नियतत्वेऽपि परस्परनिरपेक्षमेव सुखदुःखाभावयोः पुरुषार्थत्वं दुःखाभावार्थत्वेन सुखेच्छाया अभावात्, सुखं मे भूयादिति सुखत्वेनैव रूपेण तदिच्छायाः सत्त्वात् तथा सुखार्थत्वेन दुःखाभावेच्छाया अभावात् दुःखं मे मा भूदिति दुःखाभावत्वेनैव रूपेण तदिच्छायाः सत्त्वादित्यर्थः ।

**शे०चं०**— कथमित्याक्षेपे न कथमपीत्यर्थः । सुखतत्प्रतीत्योरेवेष्यमाणत्वेन तद्राहित्ये मोक्षस्य पुरुषैरनिष्यमाणत्वप्रसक्त्या पुरुषार्थत्वव्यापकस्य पुरुषैरर्थ्यत्वस्याभावेन व्यापकव्यावृत्त्या व्याप्यस्य पुरुषार्थत्व-

स्यापि व्यावृत्त्यवश्यम्भावान्न तस्य पुरुषार्थत्वमित्याशयः । सुखवद्दुःखाभावस्यापि पुरुषार्थत्वदर्शनेन सुखदुःखाभावयोरन्यतरत्वस्यैव पुरुषार्थत्वव्यापकत्वसिद्ध्या सुखरूपत्वाभावेऽपि मोक्षस्य दुःखाभावरूपत्वात् तदन्यतरत्वोपपत्त्या व्यापकव्यावृत्त्यसिद्धेः न तद्व्याप्यपुरुषार्थत्वस्यापि व्यावृत्तिरित्याशयेन समाधत्ते **शरीरमिति** । तत्र शरीरावच्छिन्नात्मप्रदेशस्य सुखदुःखायतनत्वेनावच्छेदकशरीरस्यापि दुःखायतनत्वेनेन्द्रियाणां गन्धादिविषयबोधकत्वेन विषयाणां बोध्यत्वेन बुद्धीनां च साक्षाद्दुःखहेतुत्वेन सुखस्य दुःखानुषङ्गेण दुःखस्य च स्वरूपतो दुःखत्वमित्यवधातव्यम् । षष्ठमिन्द्रियं मनः तस्य विषया इच्छाद्वेषप्रयत्नाः ।

दुःखनिवृत्तेः न स्वतःपुरुषार्थत्वं किन्तु स्रक्चन्दनवनितादिवत् सुखशेषतयैवेत्याशङ्कते **दुःखनिवृत्तिरिति** ॥ **सोपाधिकत्वादिति** । जन्येच्छाऽजन्येच्छाविषयस्यैव स्वतः प्रयोजनत्वात् । दुःखाभावस्य च सुखेच्छाप्रयुक्तेच्छाविषयत्वान्न स्वतः प्रयोजनत्वमित्यर्थः । सोपाधिकत्वमेव दर्शयति **सुखमिति** ॥ **विपर्ययस्यापीति** । सुखं पुरुषार्थ एव न भवति । तदीयपुरुषार्थत्वस्यापि जन्येच्छानधीनेच्छाविषयत्वाभावेन सोपाधिकत्वादिति विपर्ययस्यापीत्यर्थः । विपर्ययमेवोपपादयति **भोजनादिसुख इति** ॥ **क्वचिदिति** । परदाराभिगमनादावित्यर्थः । बहुतरदुःखसम्भावनायामपि उपभुञ्महे तावदापातरमणीयां पराङ्गनाम् । को हि हस्तगतं पादगतं कुर्यात् इति तदङ्गनोपभोगसुखस्य दुःखाभावेच्छाधीनेच्छाविषयत्वाभावान्नान्यशेषत्वम्, अपि तु स्वतः पुरुषार्थत्वमिति भावः ॥ **क्वचिदिति** । गुरुतरभारपरिश्रान्ते पुरुष इत्यर्थः । तत्र गुरुतरभारनिमित्तं दुःखं तावदपगच्छतु । सुखं भवतु वा मा वेत्यभिसन्धिना परित्यज्यमानकाष्ठभारसम्बन्धिदुःखाभावस्य सुखेच्छाधीनेच्छाविषयत्वाभावान्न सुखशेषत्वं किन्तु स्वतःपुरुषार्थत्वमेवेति तुल्यमिति भावः ॥ **दुःखनिवृत्तौ सत्यामिति** । तथा च तत्र सुखेच्छाधीनेच्छाविषयत्वमेव दुःखाभावस्येति न तस्य स्वतःपुरुषार्थत्वमिति भावः ॥ **सुखावस्थायामिति** । तथा च तत्रापि दुःखाभावेच्छाजन्येच्छाविषयत्वमेव सुखस्येति न तस्यापि स्वतः पुरुषार्थत्वमिति भावः । तथाऽपि किं विनिगमकमित्यतः पुरुषार्थत्वावगमिकायाः कामनाया उभयत्राविशिष्टत्वात् तस्याश्च परस्परविषयकान्येच्छानधीनेच्छाविषयत्वात् तादृशकामनानुरोधेनोभयोरपि स्वतः प्रयोजनत्वसिद्ध्या सुखदुःखाभावान्यतरत्वस्य व्यापकत्वोपपत्तेर्युक्तं दुःखनिवृत्तेः पुरुषार्थत्वमिति भावः ।

**वा०२०—** किं लोकसिद्धेनेत्यादि प्रथमभाष्यवाक्यसम्बध्येकविंशतिप्रभेदभिन्नं पुनर्दुःखं शरीरं षडिन्द्रियाणीत्यादिवार्तिके एकविंशतिप्रकारं दुःखं निरूप्य शरीरादेरेकप्रकारेण दुःखता नास्ति । किन्तु मुख्योपचारभेदेनेत्याशयेन शरीरं दुःखायतनत्वात् दुःखमित्यादि वार्तिकं प्रवृत्तम् । तदुपपादनपरशरीरावच्छिन्नात्मप्रदेशो दुःखायतनमिति शरीरं दुःखायतनमित्युक्तमित्यादि वाचस्पत्यनुसारेण यथासम्भवमुपचारेण दुःखेतरेषां दुःखत्वमुपपादयन्दुःखस्य तु स्वरूपत एव दुःखत्वमित्याह **तत्र शरीरेति** ॥ **दुःखानुषङ्गेणेति** । सुखे तावत्साधनपारतन्त्र्यमस्ति कार्यत्वात् । तदपि दुःखहेतुः । इष्टवियोगो हि दुःखं जनयति । तथा कामोऽप्यस्ति । कामश्चेच्छा । सा च सुखतत्साधनयोर्व्यापिका । सुखतत्साधनेऽपि सुलभे दुर्लभे च । तत्र दुर्लभेच्छा दुःखैकरूपा । सुलभेच्छाऽपि निषिद्धसाधनगोचरा स्वरूपतः कार्यतश्चाधर्मजननद्वारेणावश्यदुःखफलेत्यादिबहुविभाग-

प्रक्रमेण दुःखानुषङ्गः कामस्यापि *तात्पर्यपरिशुद्ध्युक्त*रीत्योपपाद्यः । तदेवं सुखे साधनपारतन्त्र्यादीनां त्रयाणां दुःखानुषङ्गिनां दुःखहेतूनां सत्त्वात् सुखस्यापि दुःखानुषङ्ग इत्यभिप्रायः । सुखे दुःखानुषङ्गसिद्ध्यर्थमेव द्वितीय-सूत्रवार्तिकतट्टीकयोर्दुःखानुषङ्गाभिधानाद्दुःखहेत्वनुषङ्गेन दुःखत्वोपचार इति तयोः प्रतिपादनेऽपि न विरोध इति ज्ञातव्यम् (ज्ञेयम्) ।

दुःखनिवृत्तिः पुरुषार्थ एव न भवतीत्यादि मूलग्रन्थः प्रथमभाष्यवाक्यसम्बन्धिवार्तिकसम्बन्धि-वाचस्पतिसम्बन्धितात्पर्यपरिशुद्धिस्थः । तत्र वाक्ये शङ्काज्ञापकाप्रतीतेः शङ्काप्रदर्शनपूर्वकमत्र केचिदाहुरित्युदय-नीयोक्त्यनुसारेण स्पष्टत्वार्थं शङ्कापरत्वेन योजयति **दुःखनिवृत्तेरिति** । स्वरूपत इत्यधिकमुदयनोक्तं मुख्यत इति वर्धमानेन विवृतं तन्मनसि कृत्वा उक्तम् **स्वत इति । पुरुषार्थत्वं** पुरुषेच्छाविषयत्वम् । पुरुषार्थ इच्छाविषय इति वर्धमानेन व्याख्यानात् । **सुखशेषतयैव** सुखरूपपरार्थतयैवेत्यर्थः । ततश्चोक्तान्यतरत्वस्य पुरुषार्थ-व्यापकत्वायोग इति शेषः । सोपाधिकत्वादित्येव तेनोक्तावपि स्पष्टत्वार्थं मूले तदीयपुरुषार्थत्वस्येत्यभिहितम् । एवमन्यत्रापि न्यूनाधिकोक्तिरुपयोगानुसारेणेति ज्ञेयम् । वर्धमानकृताऽन्येच्छानधीनेच्छाविषयस्यैव स्वतःप्रयोजन-त्वादित्यर्थ इत्युक्तावपि सर्वस्याः सुखविषयकेच्छाया ईशरूपान्येच्छाजन्यतयाऽन्येच्छाधीनेच्छाविषयत्वस्यैव सत्त्वेन स्वतःप्रयोजनत्वाभावापत्तेः । यदि च अन्येच्छाजन्यतया शिष्यते तथाऽपि तादृशेच्छाधीनायेशेच्छा-तद्विषयत्वस्य सर्वसाधारणतया स्वतःप्रयोजनत्वप्रयोजकत्वायोग इत्यतः पदार्थचन्द्रिकाकारीयनिरुक्तप्रयोगा-नुसारेण वर्धमानीयप्रयोजकपरिष्कारेण सोपाधिकत्वं स्वतःप्रयोजनत्वायोगमुपपादयति **जन्येच्छेति । न तु स एव पुरुषस्येति** मूलम् । तदुक्तम् । 'वरं वृन्दावने रम्ये सृगालत्वं स इच्छतु । गौतमाभिमतां मुक्तिं गौतमो गन्तुमर्हति' इति भावः । 'भवत्कृते खञ्जनमञ्जुलाक्षि शिरो मदीयं यदि याति यातु । नीतानि नाशं जनका-त्मजाते दशाननेनापि दशाननानि' इत्यभिसन्धानपूरणगुणेति सूत्रे शेष्यादावुदाहृतमेतत् । शिरो मदीयं यदि याति यात्वित्यभिसन्धायोत्कटरागान्धानां परदारेष्वपि प्रवृत्तिदर्शनादिति वर्धमानीयं व्याख्यानं मनसि निधाय स्पष्टत्वार्थं वक्ष्यमाणवाचस्पतिगतोपभुञ्ज्महे तावदापातरमणीयं सुखमित्यादिकमित्यनुसृत्याह **बहुतरदुःखेति** । कुर्यादितीत्यनन्तरमित्यभिसन्धायोत्कटरागान्धानां परदाराभिगमनादौ प्रवृत्तानामिति शेषः । उक्तवर्धमानानुसारात् । **परिश्रान्ते पुरुष इत्यर्थ इति** । गुरुतरभारपरिश्रान्तपुरुषो यत्र भारं परित्यजति तत्स्थल इत्यत्रास्य तात्पर्यम् । अत एव तत्र गुरुतरभारपरिश्रान्तपुरुषो यत्र भारं परित्यजति । तत्रेत्यादिकमुपपादनमिति ज्ञेयम् । उपलक्षणं चेदम् । शोकान्धानां शरीरहाने प्रवृत्तिस्थलकेवलदुःखहानार्थं प्रवृत्तिदर्शनादित्यर्थोऽपि वर्धमानानुसारेण ज्ञेयः । **तथापि किं विनिगमकमिति** । दुःखनिवृत्तेः स्वतःप्रयोजनत्व इति शेषः । उभयोरपि स्वतःप्रयोजनत्वेत्यादे-र्वक्ष्यमाणत्वात् ।

**पुरुषार्थत्वेति** । स्वतःपुरुषार्थत्वेत्यर्थः । **उभयत्रापीति** । सुखे दुःखाभावे चेत्यर्थः । अनेनेच्छाया इति मूलमुपादायात्र विद्यमानाया इच्छाया इति व्याख्यातं भवति । **तस्याश्चेति** । उभयत्र विद्यमानेच्छाया इत्यर्थः । असङ्कीर्णविषयत्वादित्येतद्व्याख्याति **परस्परेति** । अत्र परस्पराविषयकान्येच्छानधीनेच्छारूपत्वादिति

पाठः । सुखदुःखाभावयोर्या अन्येच्छाधीनेच्छा तस्याः परस्परविषयकत्वम् । सुखेच्छाया दुःखाभावविषयत्वाभावाद्दुःखाभावेच्छायाश्च सुखविषयत्वाभावात् । अनेनैवेच्छाया इत्येतन्मूलमन्येच्छानधीनेच्छाया इति व्याख्यातं भवति । इच्छाविषयत्वादिति पाठेऽपि तस्या इत्यस्येच्छाया.......शाका.......दित्यर्थः । सुखदुःखाभावयोरिति शेषः । यदा सुखे दुःखाभावे चोक्तविधेच्छा प्राप्ता तदा तयोस्तादृशेच्छाविषयत्वं प्राप्तम् । शिष्टं समानम्, अत एव वर्धमाने इच्छाया असङ्कीर्णविषयत्वादित्यस्य सुखदुःखाभावयोः परस्परानपेक्षपुरुषार्थस्य च व्यधिकरणत्वप्रसङ्गं परिहर्तुं सुखदुःखाभावगतधर्मपरतया परस्परविषयकान्येच्छाविषयत्वादित्यर्थ इति व्याख्यातमित्यप्याहुः । **व्यापकतोपपत्तेरिति** । पुरुषार्थत्वव्यापकत्वोपपत्तेरित्यर्थः । **युक्तं दुःखनिवृत्तेरिति** । तस्याः सुखरूपत्वाभावेऽपि दुःखाभावरूपत्वेनैव पुरुषार्थत्वमित्याशयः । अत्रेति भावेनाह **इच्छाया इतीति पाठ इति** । भाव इत्येव पाठस्तु लेखकागतः ।

* * *

**७९ सु०— भवति दुःखहानिः पुरुषार्थः किं त्वनुभूयमानतया । न हि विषादिजन्यमोहावस्थायां दुःखनिवृत्तिरिति तत्र प्रेक्षावन्तः प्रवर्तन्ते । तस्मान्मोक्षे दुःखहानेरननुभूयमानत्वान्न पुरुषार्थत्वमिति चेन्न । पुत्रादिवियोगजन्यदुःखहानिमिच्छतां केषाञ्चिद्विषशस्त्रोद्बन्धनादावपि प्रवृत्तिदर्शनात् । प्रेक्षावन्तो नैवं कुर्वन्तीति चेन्न । पुरुषार्थत्वाविरोधात् । न हि परदारेषु शास्त्रनिषेधाङ्कुशवारिताः प्रेक्षावन्तो नाभिवर्तन्त इति न तत्र कामः पुरुषार्थः । अपि त्वल्पीयः सुखं महीयाननर्थ इति निवृत्तिः । तथा विषादावपि प्रवृत्तस्य शास्त्रे गर्हितत्वादल्पीयाननर्थो निवर्तते महीयान् प्रवर्तत इति न ते प्रवर्तन्ते । इयमेव हि प्रेक्षा यत्पुरुषार्थेऽपि शास्त्रलोकविरोधपरामर्शः । स्वरूपेणेष्यमाणतामात्रनिबन्धनत्वात् पुरुषार्थतायाः । अत एव यत्र लोकशास्त्राविरोधस्तत्र व्याध्यादिपरिपीडिताः प्रयागवारिपातानशनादिनाऽपि देहं त्यजन्तः प्रेक्षावन्तोऽपि दृश्यन्ते ।**

**न क्वचिद् दुःखनिवृत्तिमनुभविष्यामीति तत्साधने प्रवर्तन्ते । अपि तु दुःखं हास्यामीति । अपि च दुःखनिवृत्तेरनुभूयमानतामात्रं विवक्षितं, दुःखनिवृत्तिसत्ताऽपि वा । आद्यश्चेत्तुष्यतु दुर्जनः चरमे जन्मन्यनुभूयत एव । समाधिभावा(वधिव)दात्यन्तिकी दुःखनिवृत्तिरप्यनागताऽवर्तमानाऽप्यचिरमनुभूयत एव । द्वितीये तु प्रसक्तकण्टकादिहेतुकदुःखनिवृत्तेरपुरुषार्थत्वप्रसङ्गः । सर्वदाऽननुभूयमानत्वात् । तथात्वे वा विषयान्तरसञ्चाराभावप्रसङ्गः । निवृत्तेः सर्वदा तादवस्थ्यात् ।**

**तस्मात् सुखरहितो मोक्षः पुरुषार्थ इति ।**

**परि०**— शङ्कते **भवति दुःखहानिरित्यादिना** । विषादिजन्यमोहावस्थायां दुःखनिवृत्तिरिति पररीत्या अनुवादः । सिद्धान्ते तत्राऽपि दुःखसत्त्वस्य 'मुग्धेऽर्धसम्पत्तिरि'त्यत्रोक्तत्वात् ॥ **पुरुषार्थत्वाविरोधादिति** । दुःखहानीच्छया लौकिकैः क्रियमाणस्य प्रेक्षावदननुष्ठानमात्रेण पुरुषार्थत्वं न विरुध्यत इत्यर्थः ॥ **न तत्र काम इति** । काम्यमानं सुखमित्यर्थः । पुमर्थत्वे कुतो निवृत्तिः प्रेक्षावतामित्यत आह **अपि त्विति** ॥ **महीयानिति** । अनर्थ इत्यनुषङ्गः ॥ **प्रवर्तत इति** । जायत इत्यर्थः ॥ **न त इति** । प्रेक्षावन्त इत्यर्थः । अल्पानर्थनिवृत्त्युद्देशेनापि कुतो न प्रवर्तन्ते प्रेक्षावन्त इत्यत आह **इयमेव हि प्रेक्षेति** । ननु प्रेक्षावदप्रवृत्तिमात्रेणापुमर्थत्वमेव कुतो नेत्यत आह **स्वरूपेणेति** । जनैरिति योज्यम् ॥ **आत्यन्तिकीति** । एकविंशतिदुःखनिवृत्तिरित्यर्थः । **अवर्तमानेति** पदच्छेदः । अतीतेत्यर्थः । **अचिरं** अल्पकालमित्यर्थः ॥ **तथात्व इति** । प्रसक्तकण्टकनिवृत्तेरनुभूयमानत्वेन पुमर्थत्वे सदा तन्निवृत्तेर्भाविन सदा तन्निवृत्तेरनुभवप्रसङ्गापत्त्या विषयान्तरज्ञानानवकाशः स्यादित्यर्थः । 'इति'पदस्यायमाशय इति पूर्वेणान्वयः । *साङ्ख्यादिमतानुवादः ॥*

**गु०दी०**— **पुत्रादिवियोगजन्मदुःखहानिमिच्छतामित्यपि** चिन्त्यम् । तत्रापि स्वदुःखहान्यै न प्रवर्तते ततोऽप्यतिशयितदुःखं भवतीति जानतैव प्रवर्तनात् । अतो दुःखमसहमानस्य भ्रान्त्या प्रवृत्तिः नात्रोदाहर्तुं योग्येति । **न तत्र कामः पुरुषार्थ** इत्यपि चिन्त्यम् । अनर्थाभावे सुखस्य च बहुत्वे सर्वेषामपि प्रवृत्तिः स्यादेव । मोक्षश्च तादृश इति नेदमप्युदाहरणमिति । **प्रयागपातानशनादिनापि देहं त्यजन्त** इत्येतदपि चिन्त्यम् । तत्रापि 'ये वै तन्वा विसृजन्ति धीराः । न तपोऽनशनात्परमि'त्यादिश्रुतिस्मृतिभिः देहान्तरे महासुखं भविष्यतीत्याशयैव प्राक्तनरोगिष्ठदेहत्यागात् नेदमप्यत्रोदाहरणमिति । **न क्वचिद्दुःखनिवृत्तिमनुभविष्यामीति तत्साधने प्रवर्तत** इत्येतदपि न शोभां बिभर्ति । दुःखनिवृत्त्यनुभवपर्यन्तं धावनाभावे विषादजन्यमोहावस्थायां दुःखनिवृत्तिरिति तत्र प्रेक्षावन्तो न प्रवर्तन्त इति टीकाकृतोक्तत्वात् । स्वीयतयाऽननुभूयमानाया अपि दुःखनिवृत्तेः दुःखनिवृत्तितयैव पुरुषार्थत्वे स्वोपेक्षकपुरुषदुःखनिवृत्त्यर्थं कुतो न प्रवर्तते । निद्रितपुरुषपादपङ्कप्रक्षालनाय तस्माद्धनार्थी कुतो न प्रवर्तते । **वर्तमानाप्यचिरमनुभूतय इत्यपि** चिन्त्यम् । देहे सति दुःखनिवृत्तिः तवापि । देहनिवृत्तौ कारणानामपि पूर्वमेव निवृत्तत्वात् केनानुभवः स्यादिति ।

**यादु०**— शङ्कते **भवति दुःखहानिरित्यादिना** ॥ **मोहावस्थायामिति** । यद्यपि सिद्धान्ते दुःखमात्रप्रतिस्मृतेरिति वचनान्न मोहावस्थायां दुःखनिवृत्तिः तथापि दुःखाभावोऽपि नावेद्यः पुरुषार्थतयेष्यते । न हि मूर्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीरि'ति परैरुक्तत्वात् तद्रीत्यैवेदमुक्तमिति द्रष्टव्यम् ॥ **पुरुषार्थत्वाविरोधादिति** । दुःखहानेरिति शेषः ॥ **काम इति** । काम्यत इति कामः । परदाराभिगमनजन्यसुखमित्यर्थः ॥ **महीयानिति** । नरकादिरूप इत्यर्थः । ननु पुरुषार्थे कथं प्रेक्षावतां निवृत्तिरित्याशङ्क्य प्रेक्षास्वरूपकथनेन परिहरति **इयमेव**

हीति । ननु तर्हि शास्त्रादिविरुद्धस्य प्रेक्षावद्भिरनिष्यमाणत्वान्न पुरुषार्थत्वमपीत्यत आह **स्वरूपेणेति** । येन केनापीति शेषः । न ज्ञाततयेत्यर्थः । मात्रशब्देन शास्त्राद्यविरोधस्य पुरुषार्थताशरीरनिवेशं वारयति । स्वरूपेष्यमाणत्वरूपं पुरुषार्थत्वं दुःखनिवृत्तावुपपादयति **न क्वचिदिति** ॥ **अनुभूयमानतामात्रमिति** । यदा कदाचिदनुभूयमानत्वमित्यर्थः ॥ **सत्ताऽपि वेति** । अपिशब्दोऽनुभूयमानतासमुच्चयार्थः । तथा च यावत्पर्यन्तं तस्याः सत्त्वं तावत्पर्यन्तमनुभूयमानत्वं वेति द्वितीयकल्पार्थः । तेन सर्वदाऽननुभूयमानत्वादिति वक्ष्यमाणं दूषणमुपपन्नमिति ज्ञातव्यम् ॥ **समाधिभावादिति** । समाधिः ध्यानविशेषः तत्प्रभावादित्यर्थः । समाधिर्योगजः साक्षात्कारस्तत्सद्भावादिति वाऽर्थः ॥ **आत्यन्तिकी दुःखनिवृत्तिरिति** । स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वं ध्वंसविशेषणम् । संसारिदुःखप्रागभावसमानकालतया मुक्त्यव्याप्तेराह **स्वसमानाधिकरणेति** प्रागभावविशेषणम् । संयोगादिप्रागभावसमानकालतया दोषतादवस्थ्यादाद्यं दुःखपदम् । तच्चैकविंशतिप्रभेददुःखपरम् । अतश्चरमभोगरूपदुःखप्रागभावसमानदेशकालतयोपान्त्यदुःखध्वंसे नातिव्याप्तिः । अत एव प्रागभावपदमर्थवत् । वक्ष्यमाणरीत्या यदा चरमदुःखध्वंसो वर्तमानोऽप्यचिरमनुभूयते तदा भोगरूपदुःखसमानदेशकालतया असम्भववारकत्वात् । रूपादेरपि विषयरूपदुःखत्वेन तद्ध्वंसेऽतिव्याप्तिवारणाय चरमं दुःखपदम् । तच्च मुख्यदुःखपरम्, अतो न तत्रातिव्याप्तिरिति ॥ **वर्तमानाऽप्यचिरमिति** । चरमदुःखानुभवे योगजधर्मबलादनागतदुःखनिवृत्तिरपि विषयः । तथा चाग्रिमक्षणे तन्निवृत्तिः । तद्विषयकश्च विनश्यदवस्थोऽनुभवस्तदाऽस्तीति वर्तमानाऽप्यचिरमनुभूयत इत्यर्थः । अनुभवरूपदुःखसमये उक्तमुक्तिलक्षणसत्त्वादनुभवरूपं दुःखं न मुक्तिविरोधि । अशेषविशेषगुणोच्छेदश्च न मुक्तितयाऽत्राभिप्रेत इति भावः । दुःखनिवृत्तेः पुरुषार्थत्वोपपादनाय प्रसक्तेति दुःखविशेषणम् । अप्रसक्तदुःखनिवृत्तेः केनाप्यनिष्यमाणत्वात् ॥ **ताश्चोदाहरिष्यन्त इति** । 'पुनरानन्दपूर्वकान् धर्मानाहाप्यनुच्छिन्नास्तार्किकैर्विनिवारितानि'त्यादिनेति शेषः ।

**वं०प०**— पुनः सिद्धान्ती शङ्कते **भवतीति** । स्वरूपसद्दुःखहानेः पुरुषार्थत्वे बाधकमाह **न हि विषयादिजन्येति** ॥ **दर्शनादिति** । तथा च तत्राननुभूयमानाया अपि दुःखहानेः पुरुषार्थत्वदर्शनान्मुक्तावप्येवमेवेत्यर्थः ॥ **अविरोधादिति** । दुःखनिवृत्तेरिति शेषः । पुत्रादिवियोगवद्भिः पुरुषैरर्थ्यत्वं तावदस्त्येवेत्यर्थः । एतद्दृष्टान्तेनोपपादयति **न हि परदारेष्विति** । **कामः** काम्यं सुखम् । पुरुषार्थो नेति न हीत्यन्वयः । पुरुषैरर्थ्यत्वं तावदस्त्येवैवं प्रकृतेऽपीत्यर्थः । ननु यथाकथञ्चित्सुखस्य पुरुषार्थत्वे परदाराभिगमनादौ कुतो न प्रवर्तन्त इति पृच्छति **अपि त्विति** । उत्तरमाह **अल्पीय इति** । **अनर्थः** ऐहिकः पारत्रिकश्च । प्रवृत्तस्याल्पीयाननर्थो निवर्तत इत्यादिरन्वयः । महीयाननर्थ इति वर्तते । कुत इत्यत उक्तं **शास्त्रे गर्हितत्वादिति** । विषपानादिना बुद्धिपूर्वकं देहपरित्यागस्य । 'नरकं चात्महत्यये'त्यादिना शास्त्रे निन्दितत्वादित्यर्थः । ननु भवत्वल्पीयः सुखं महाननर्थः तथाऽपि काममात्रस्य पुरुषैरर्थ्यत्वात् कुतस्तत्र न प्रेक्षावतां प्रवृत्तिरित्यत आह **इयमेव हीति** । तथात्वे प्रेक्षावत्त्वमेव व्याहन्येतेति भावः । उपसंहरति **स्वरूपेणेत्यादि** । नानुभूयमानत्वनिबन्धनत्वमिति मात्रशब्दार्थः । **पुरुषार्थताया** दुःखनिवृत्तेरिति शेषः ॥ **अत एवेति** । दुःखनिवृत्तेः पुरुषार्थताया

अनुभूयमानत्वं विहाय स्वरूपेणेष्यमाणतामात्रनिबन्धनत्वादेवेत्यर्थः । अनुभविष्यामीत्याशयेन । **तत्साधने** दुःखनिवृत्तिसाधने प्रयागवारिपातादिना देहत्यागे ॥ **अनुभूयमानतामात्रमिति** । अतीतायाः अनागतायाः वर्तमानताया वा दुःखनिवृत्तेः यदाकदाचिदनुभूयमानत्वमित्यर्थः ॥ **दुःखनिवृत्तिसत्ताऽपीति** । अपिशब्दोऽनुभूयमानत्वसमुच्चायकः । तथा च यावत्पर्यन्तं दुःखनिवृत्तिसत्ताऽस्ति तावत्पर्यन्तं सर्वदाऽनुभूयमानत्वं विवक्षितं वेत्यर्थः ॥ **अनागता** भविष्यन्ती अनागतदुःखनिवृत्त्यनुभवे निमित्तकथनं **समाधिभावादिति** । समाधिर्ध्यानं तज्जन्यसाक्षात्कारो वा तत्प्रभावादित्यर्थः ॥ **वर्तमानाऽपीति** । आत्यन्तिकी दुःखनिवृत्तिरिति वर्तते । **अचिरं** कदाचित् । सुखान्तमुक्त्यभिप्रायेणेदम् । सुखमनुभवन्नेव चरमदेहं विसृज्य मुक्तो यदा भवति सा सुखान्तमुक्तिः तत्र वर्तमानाऽप्यात्यन्तिकी दुःखनिवृत्तिः तदानीमनुभूयत एव । दुःखनिवृत्तेरात्यन्तिकत्वं नाम स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वरूपं द्रष्टव्यम् । ननु तदानीमात्यन्तिकदुःखनिवृत्तिरेव नास्ति । सुखानुभवकाले शरीरेन्द्रियबुद्धिरूपाणां दुःखानामेव सत्त्वादिति चेन्न । अत्र दुःखशब्देन यन्मुख्यं तदेव विवक्षितं न तु दुःखापादकतया दुःखशब्दवाच्यं शरीरादि । अतो नानुपपत्तिरित्यवधेयमित्याहुः । कुत इत्यत आह **सर्वदेति** । **तथात्वे** दुःखनिवृत्तेः सदाऽनुभूयमानत्वे । ननु सर्वकालीनानुभवविषयदुःखनिवृत्तेर्निवृत्तौ विषयान्तरसञ्चाररूपो व्यासङ्गो भविष्यतीत्यत आह **निवृत्तेरिति** । दुःखध्वंसरूपायाः दुःखनिवृत्तेः इत्यर्थः ॥ **तादवस्थ्यादिति** । ध्वंसस्य नित्यत्वेन निवृत्त्यसम्भवादित्यर्थः । तथाच विषयान्तरसञ्चाराभावस्तदवस्थ इति भावः ।

**कं०रा०**— शङ्कते **भवति दुःखहानिरिति** । स्वरूपसत्ताया एव दुःखहानेः पुरुषार्थत्वमस्त्वित्यत आह **न हि विषादिजन्येति** । यद्यपि 'यत एवं त्रयोऽवस्था मोहस्तु परिशेषतः । अर्थप्राप्तिरिति ज्ञेयो दुःखमात्रप्रतिस्मृतेरि'ति वाराहवचनात् सिद्धान्ते मोहावस्थायां दुःखमस्त्येव तथाऽपि परमतानुसारेणायं ग्रन्थ इति द्रष्टव्यम् । पुत्रादिवियोगजन्यदुःखहानिमिति विषशस्त्रोद्बन्धनादिना शरीरपाते सति अनुभूयमानायाः तादृशहानेः पुरुषार्थत्वं दृष्टमिति भावः । तादृशदुःखहान्युद्देशेन विषशस्त्रोद्बन्धनादौ प्रेक्षावतां प्रवृत्त्यभावान्न तस्याः पुरुषार्थत्वमिति शङ्कते **प्रेक्षावन्त इति** ॥ **न हीति** । शास्त्रनिषेधाङ्कुशवारिताः प्रेक्षावन्तः परदारेषु न प्रवर्तन्त इत्येतावता तत्र परदारेषु निमित्तेषु कामः । काम्यमानं सुखं परदारनिमित्तकसुखमिति यावत् ॥ **तत्पुरुषार्थो नेति** । न हीत्यर्थः । परदारनिमित्तकसुखस्यापि पुरुषार्थत्वे तदुद्देशेन प्रेक्षावतां प्रवृत्तिः कस्मान्न भवतीत्याशयेन पृच्छति **अपि त्विति** । उत्तरमाह **अल्पीय इति** । परदारनिमित्तकं सुखमल्पीयस्तत्प्रयुक्तोऽनर्थस्तु महीयानित्यालोचनात् प्रेक्षावतां परदारेभ्यो निवृत्तिरेव न तु तत्र प्रवृत्तिरिति भावः ॥ **तथा विषादावपीति** । यथा प्रेक्षावन्तः परदारेषु न प्रवर्तन्ते तथा विषोद्बन्धनादेः शास्त्रे निन्दितत्वात् विषादौ प्रवृत्तस्य पुंसः महीयाननर्थः प्रवर्तते । अल्पीयान्पुत्रादिवियोगजन्यदुःखरूपोऽनर्थो निवर्तत इत्यालोचनान्न ते तत्र तत्र प्रवर्तन्त इत्यर्थः ।

ननु शास्त्रलोकविरोधपरामर्शवतां पुत्रादिवियोगजन्यदुःखहान्युद्देशेन विषोद्बन्धनादौ प्रवृत्तिः न चेत् कथं तादृशदुःखहानेः पुरुषार्थत्वमित्यत आह **स्वरूपेणेति** । अनागताभ्यां तितीर्षुणा दुःखनिवृत्तिश्चरमे जन्मनि कथमनुभूयत इत्यत आह **उक्तं समाधिभावादिति** ॥ **अचिरमिति** । चरमदेहनाशानन्तरं ज्ञाननाशाच्चरम-

देहनाशदशायामात्यन्तिकी दुःखनिवृत्तिः क्षणमात्रमनुभूयत इति भावः ॥ **तथात्वे वेति** । प्रसक्तकण्टकादिहेतुकदुःखनिवृत्तेः सर्वदाऽनुभूयमानत्वे चेत्यर्थः ।

**शे०चं०**— ननु न दुःखनिवृत्तेः पुरुषार्थत्वं तद्व्यापकस्यानुभूयमानत्वस्य ततो व्यावृत्तत्वात् । अव्यावृत्तौ च नाशेषविशेषगुणोच्छेदो ज्ञानस्यानुच्छिन्नत्वात् । व्यापकव्यावृत्तौ च व्याप्यव्यावृत्तिरवश्यम्भाविनी । तत्कथं तस्याः पुरुषार्थत्वमिति तात्पर्यपरिशुद्धावुत्थापितं कस्यचित्पक्षमाशङ्कते **भवतीति** । पुत्रादिवियोगजन्यदुःखहानेः पुरुषार्थत्वव्यावृत्तिरित्युदयनोक्तदूषणेन दूषयति **पुत्रादीति** । प्रेक्षावत्पुरुषार्थत्वव्यापकत्वादनुभूयमानत्वस्य न पुत्रादिवियोगजन्यदुःखहानौ व्यभिचारः । तस्य प्रेक्षावत्पुरुषार्थत्वाभावात् इत्याशङ्कते **प्रेक्षावन्त इति** । तथा सत्यननुभूयमानत्वेन तद्व्याप्यभूतप्रेक्षावत्पुरुषार्थत्वस्य व्यावृत्तिसिद्धावपि न पुरुषार्थत्वव्यावृत्तिसिद्धिरिति नोक्तानुपपत्तिरित्याशयेनाह **पुरुषार्थत्वेति** । अननुभूयमानत्वेन साक्षात्पुरुषार्थत्वव्यावृत्त्यसिद्धावपि तेन प्रेक्षावत्पुरुषार्थत्वस्य व्यावृत्तिसिद्धौ प्रेक्षावत्पुरुषार्थत्वस्य पुरुषार्थत्वव्यापकया तद्व्यावृत्त्या पुरुषार्थत्वव्यावृत्तिरवर्जनीयैवेत्यतो भवेदेतदेवं यदि प्रेक्षावत्पुरुषार्थत्वस्यापि पुरुषार्थत्वव्यापकत्वं स्यात् । न च तदस्ति । परदारकामस्य पुरुषार्थत्वेऽपि प्रेक्षावत्पुरुषार्थत्वाभावेन व्यभिचारात् । अन्यथा व्यापकव्यावृत्त्या तत्रापि पुरुषार्थत्वाभावप्रसङ्गात् । ततश्च न प्रेक्षावत्पुरुषार्थत्वाभावेनापि दुःखनिवृत्तेः पुरुषार्थत्वाभावसिद्धिरित्याशयेनाह **न हि परदारेष्विति** । तर्हि प्रेक्षावतां परदारेषु कुतो निवृत्तिर्विषपानादौ च न प्रवृत्तिरिति पृच्छति **अपि त्विति** । आद्यस्य परिहारमाह **महीयानिति** ॥ द्वितीयस्य तमाह **तथेति** । तत्कथमित्यत उक्तमर्थं प्रेक्षास्वरूपकथनेनोपपादयति **इयमेव हीति** । ननु किमेवं कल्पनया प्रेक्षावद्भिरनिष्यमाणत्वाद्विषपानादिजन्यदुःखनिवृत्तेरपुरुषार्थत्वमेव किं न स्यादित्यत आह **स्वरूपेणेति** । मात्रशब्देन प्रेक्षावदिष्यमाणत्वं व्यावर्तयति । अत्रैवोपष्टम्भकमाह **अत एवेति** । पुरुषार्थतायाः स्वरूपेणेष्यमाणतामात्रनिबन्धनत्वादेवेत्यर्थः ।

दुःखनिवृत्तेः स्वरूपेणैव पुरुषार्थत्वं न त्वनुभूयमानतयेत्युक्तमर्थं युक्त्याऽप्युपपादयति **न क्वचिदिति** ॥ **अनुभूयमानतामात्रमिति** । यदा कदाचिदनुभूयमानत्वमित्यर्थः ॥ **सत्ताऽपि वेति** । यावति काले दुःखनिवृत्तिस्तिष्ठति तावति कालेऽनुभूयमानत्वमित्यर्थः । आद्येऽप्यनुभवः किमनुमित्यादिसाधारणोऽभिमतः साक्षात्कार एव वा । आद्ये तु सम्भव एवानुमानागमाभ्यां मुक्तेरनुभूयमानत्वादित्यभिप्रेत्य द्वितीयं दूषयति **चरमे जन्मनीति** । समाधिर्योगः तत्प्रभावादित्यर्थः । योगप्रभावात् सर्वविषयकज्ञानवद्भिर्योगिभिरनागताया दुःखनिवृत्तेः साक्षात्कारादित्यर्थः । ततोऽपि दुर्जनतरो यदि वर्तमानदुःखाभावविषयकसाक्षात्कारविषयतयैव दुःखाभावस्य पुरुषार्थत्वं मन्यते तत्राह **वर्तमानाऽपीति** । योगिनः सार्वज्ञ्याद्भाविमुक्तिविषयकेन चरमदुःखसाक्षात्कारेण दुःखे विनाशिते वर्तमानदुःखाभावविषयकः साक्षात्कारो भोगनाश्यादृष्टनाशान्नश्यतीत्यचिरमनुभवस्तस्यापीत्यर्थः । यद्वा, ननु कथं वर्तमानायाः सकलदुःखनिवृत्तेरनुभवसम्भवो, येन हि चरमज्ञानेन दुःखनिवृत्तिरनुभूते तदपि तावदेकं दुःखम् । न च तत्समये तस्य निवृत्तिरस्ति । नापि तन्निवृत्तिसमये तदनुभवान्तरमस्ति, चरमत्वभङ्गादिति । तत्राह **वर्तमानाऽपीति** । अयमाशयः । योगिनश्चरमज्ञानेन सकलविषयेण दुःखतदभावौ युगपत्साक्षात्कृतौ । तेनैव

विरोधिगुणप्रादुर्भावेन निवृत्ते दुःखे विनश्यदवस्थज्ञाने च वर्तमानाऽपि दुःखनिवृत्तिरनुभूयत इति । केचित्तु आत्मविशेषगुणपदेन मुख्यदुःखमात्रविवक्षया अयं ग्रन्थः । अत एव *द्रव्यवर्धमानप्रकाशकृता* प्रौढिवादेनैवायं निबन्धो ग्रन्थो न तु सिद्धान्त इति ग्रन्थतात्पर्यमुक्त्वा वस्तुतस्त्वित्यादिना मुख्यदुःखविवक्षयैवानुभवः समर्थ्यत इत्याहुः ॥ **द्वितीये त्विति** । यावद्दुःखनिवृत्तेः सत्त्वं तावन्तं कालमनुभूयमानत्वमिति द्वितीय इत्यर्थः ॥ **प्रसक्तेति** । यद्यपि कण्टकादिनिवृत्तिस्तदानीमनुभूयते । तथाऽपि न यावत्सत्त्वं तदनुभवः । तथा च सर्वदाऽननुभूयमानाया अपि यथा पुरुषार्थत्वं तथा सर्वथाऽननुभूयमानाया अपि तदस्त्विति भावः । कण्टकादिनिवृत्तेरपि सर्वदाऽनुभूयमानत्वादेव पुरुषार्थत्वम् । तत्राह **तथात्वे वेति** । स्वसत्ताकालेऽनुभूयमानत्वं विवक्षितम् । कण्टकादिनिवृत्तेश्च स्वसत्ताकालेऽनुभूयमानत्वादेव पुरुषार्थत्वम् । न च विषयान्तरसञ्चाराभावप्रसङ्गो दोषः । तस्याः कादाचित्कत्वेन तदुत्तरक्षणे विषयान्तरसञ्चारोपपत्तेरित्यत आह **निवृत्तेरिति** । ततश्च प्रशिथिलमूलत्वमिति भावः ।

**वा०र०— अव्यावृत्तौ चेति** । अनुभूयमानत्वस्य दुःखनिवृत्तेः सकाशादव्यावृत्तौ चेत्यर्थः । **ज्ञानस्येति** । ज्ञानरूपविशेषगुणस्योच्छेदाभावेन एकविंशतिदुःखान्तर्गतज्ञानस्य उर्वरितत्वेन अशेषदुःखोच्छेदरूपात्यन्तिकदुःखनिवृत्तिरूपमोक्षस्वरूपालाभ एवेत्याशयः । अत एव न अशेषेति पूर्ववाक्येऽपि नाशेषदुःखोच्छेद इति व्याख्यानं द्रष्टव्यम् । दुःखनिवृत्तिपुरस्कारं विनाऽशेषविशेषगुणोच्छेदत्वरूपेणैव मुक्तेरत्र प्रकृतत्वात् । यत्राप्यशेषगुणोच्छेदो मुक्तिरित्युद्योतकरवार्तिकीयोक्तिस्तत्रापि ज्ञानस्य दुःखशरीरान्तःपाठविवक्षयाऽशेषदुःखध्वंसो मोक्ष इत्यत्रैव तात्पर्यम् । अत एव अशेषविशेषपदेन सुखदुःखस्यैव विवक्षया ज्ञानस्य च अविवक्षया दुःखनिवृत्तेरनुभूयमानत्वमपि सम्भवतीति शङ्काकृदुदाहरिष्यमाणद्रव्यकिरणावलीवर्धमानपुरुषोत्तमभ्यामुक्तमिति ज्ञेयम् । **तद्व्यापकस्येति** । सूत्रोपस्कारे ननु पुरुषार्थो यः स्वयं ज्ञायमान एवेति स्पष्टमुक्तेरेतत्स्पष्टाभिधानं **कस्यचित्पक्षमिति** । अन्यस्त्वाह भवत्येव दुःखनिवृत्तिरित्यादेरेव तात्पर्यपरिशुद्धावुक्तेरेवमुक्तमिति ज्ञेयम् । **किन्त्वनुभूयमानतयेत्यादि** मूलम् । अत एवोक्तम् । 'दुःखाभावोऽपि नावेद्यः पुरुषार्थतयेष्यते । न हि मूर्च्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीः' इतीति भावः । **उदयनोक्तदूषणेनेति** । यद्यप्युदयनेनापि पुत्रादिवियोगजन्यदुःखेत्यादिकमेव मूलस्थमुक्तम् । तथापि पुरुषार्थत्वव्यापकतयाऽनुभूयमानत्वोक्तेर्निरासस्य स्पष्टत्वार्थं विषयशास्त्रोद्बन्धनादिप्रवृत्तिसाध्यदुःखहानौ पुरुषार्थत्वे विद्यमानेऽप्यनुभूयमानत्वाभावाद्व्यभिचार इत्यर्थे तात्पर्यमुदयनवाक्यस्य वर्णनीयमेवेति तदनुसारेण तदनुवादरूपैतन्मूलेऽपि तात्पर्य वर्णनीयमिति भावेन नयनप्रसादिनीमनुसृत्येत्युदयनोक्तेत्युक्तमिति ज्ञातव्यम् । **साक्षात्पुरुषार्थत्वेति** । पुरुषार्थत्वव्यावृत्तेः साक्षादसिद्धावपीति योजना ।

**कामः पुरुषार्थ इति** मूलम् । कामः पुरुषार्थसाधनं नेति न हीत्यर्थः । कामनिमित्तकप्रवृत्तिसाध्यसुखं पुरुषार्थो नेति न हीति यावत् । एतदभिप्रायेणैव परदारकामस्येति हि टीकाऽपीति ज्ञेयम् । **न प्रवृत्तिरिति** । कुत इति वर्तते । **अपुरुषार्थत्वमेव किमिति** । अपुरुषार्थत्वमित्येव किं न स्यादित्यर्थः । **युक्त्याऽपीति** । अनुभवरूपविरोधयुक्त्येत्यर्थः । अत एव न कश्चिद्दुःखहानिमित्युदयनवाक्यमनुभवविरोधमाहेति वर्धमानकृता-

ऽवतारितम् । **अनुभविष्यामीतीति** मूलम् । इत्यभिसन्धायेति शेषः । हास्यामीत्यतःपरमप्यभिसन्धायेति शेषः। **अनुमित्यादीति** । आदिपदेनागमजज्ञानपरिग्रहः । **सम्भव एवेति** । पुरुषार्थत्वव्यापकानुभूयमानत्वस्य दुःखनिवृत्तावपि सत्त्वमेवेत्यर्थः । **अनुमानागमाभ्यामिति** दुःखसन्ततिरित्यन्तमुच्छिद्यते । सन्ततित्वात् प्रदीपसन्ततिवदित्यनुमानम् । दुःखेनात्यन्तं विमुक्तश्चरति । तमेव विदित्वाऽतिमृत्युमेवेतीति चागमो ज्ञेयः । सूत्रोपस्कारेऽप्येवमुक्तेः । वर्धमानानुसारेणाह **योगप्रभावादिति** ॥ **अनागताया इति** । अनागताया अपीत्यर्थः । एवमुदयनोक्तानुवादरूपयोगप्रभावादनागताया अपीति तत्त्वप्रदीपिकानुसारात् वर्तमानापीत्येतद्व्याख्यानरूपवर्धमानानुसारेणाह **ततोऽपि दुर्जनतर इत्यादिना तस्यापीत्यर्थ इत्यन्तेन** । वर्तमानो यो दुःखाभाव इति वर्तमानत्वं दुःखाभावविशेषणम् । अनेन यत्र पुरुषार्थत्वं तत्र समानकालीनसमानाधिकरणसाक्षात्कारविषयत्वेति व्याप्तेः सुखदुःखाभावयोर्गृहीतत्वादात्यन्तिकदुःखाभावरूपमोक्षस्य भिन्नकालीनयोगिसाक्षात्कारविषयत्वेऽपि समानकालीनतत्साक्षात्कारविषयत्वाभावात् व्यापकाभावे तद्व्याप्यपुरुषार्थस्याप्यभाव इत्युक्तं भवति । न चात्यन्तिकदुःखाभावसमानकालीनस्तत्साक्षात्कारोऽङ्गीकर्तुं शक्यः । साक्षात्कारस्यैव दुःखतयाऽत्यन्तिकतन्निवृत्तित्वायोगादिति भावः । **योगिनः सार्वज्ञ्यादिति** । योगिनश्चरमदुःखाननुभाविनी सर्वदुःखनिवृत्तिं विषयीकरोति। तथा च प्रथमक्षणे भाविसर्वदुःखनिवृत्तिं चरमदुःखं च विषयीकरोति यः साक्षात्कारः स एव द्वितीयक्षणे विरोधिगुणप्रादुर्भावाच्चरमं दुःखं नाशयति । ततस्तृतीयक्षणे सकलदुःखनिवृत्तिरूपमुक्तेर्वर्तमानतालाभात् तत्क्षणावच्छिन्नश्चचरमदुःखसाक्षात्कारो वर्तमानदुःखाभावं विषयीकरोतीति युज्यते । न च साक्षात्कारनाशकाभाव इति वाच्यम् । भोगनाश्यादृष्टनाशे तन्नाशस्य सुलभत्वात् । तथा च वर्तमानोऽपि सकलदुःखाभावश्चरमदुःखसाक्षात्कारेण विनश्यदवस्थेन तृतीयक्षणे विषयीकृतो भवति । चतुर्थक्षणे च तत्साक्षात्काराभावेऽपि लभ्यत इत्येवं वर्तमानायाः सर्वदुःखनिवृत्तेरनुभूयमानत्वं किञ्चित्कालमस्तीत्यर्थः । अत्र च उक्तप्रकारेण वर्तमानदुःखाभावस्यानुभूयमानतालाभादनागता सर्वदुःखनिवृत्तिरनुभूयत इत्येतदुपरि प्राप्तायाः शङ्कायाः पुरुषार्थत्वव्यापकं समानकालीनसमानाधिकरणसाक्षात्कारविषयत्वमिति तदभावान्न दुःखनिवृत्तेः पुरुषार्थत्वं युक्तमित्येवं रूपाया निराससिद्धिः ।

नन्वत्र वर्तमानत्वं दुःखस्यापि विशेषणमित्याश्रित्य वर्तमानं यद्दुःखं तस्य यो वर्तमानोऽभावस्तद्विषयक इत्यर्थः । सकलदुःखाभावस्य वर्तमानतया वक्तव्याया अनुक्तिप्रसङ्गात् । भाविमुक्तीत्युक्तिरपि चरमदुःखसाक्षात्कारस्य चरमदुःखातिरिक्तसकलदुःखाभावविषयत्वमात्रोक्तौ प्रागविषयीकृतचरमदुःखाभावविषयकत्वं कल्पनीयम् । न च तद्युक्तम् । सर्वविषयकत्वव्याघातात् । सर्वविषयकत्वं ह्यतीतादिविषयांस्तथा तथाऽवस्थितान्विषयीकुर्वदेव वर्तमानस्यातीततया वा भाविनो वर्तमानतया वा प्राप्तौ तदुभयमतीतवर्तमानत्वरूपेणापि विषयीकरोतीत्येव सर्वसम्मतेः । तृतीयक्षणे विषयीकृतो भावो वर्तमानः सम्पन्न इत्यङ्गीकारे तु न कल्पनाश्रयमित्याशयेन । उक्तं च *चिन्तामणौ* । किञ्च चरमदुःखानुभावेऽनागतदुःखध्वंसोऽपि विषयः । तथाच अन्तिमक्षणे तद्ध्वंसस्तद्विषयकं च विनश्यदवस्थं ज्ञानमस्तीति वर्तमानोऽप्यचिरमनुभूयत इति वार्तिकमप्यनुकूलितं भवति । अन्यथा विशेषगुणपदस्य मुख्यदुःखमात्रपरत्वाश्रयणेन व्याख्यातव्यापत्त्या भोगदशायां मुक्तत्वापत्तिः स्यात् । चरमदुःख-

ध्वंसस्य दुःखसाक्षात्कारेण क्षणमात्रं विषयीकरणादिति सूत्रोपस्कारग्रन्थस्याप्ययमेवाभिप्राय इति द्रष्टव्यम् । उक्तरीत्या योजनाश्रयणे चरमदुःखध्वंसस्य वर्तमानतालाभेन चरमसाक्षात्कारातिरिक्तदुःखध्वंसस्य वर्तमानतालाभोपपत्तावपि चरमसाक्षात्काररूपदुःखध्वंसस्य वर्तमानता लभ्यत इति न सकलदुःखनिवृत्तेरनुभूयमानत्वनिर्वाहो वार्तिकसङ्कोचश्च निवार्य इत्यपरितोषं सूचयंस्तत्त्वप्रदीपिकाव्याख्यानोक्तप्रकारान्तरेण वर्तमानतापीत्येतदवतारयति **यद्वा ननु कथमिति** । अत्र यद्वेत्युक्तिः प्रागुक्तार्थपरित्यागाभिप्राया न, अपि तु तदर्थेऽपि प्राप्तानुपपत्तिपरिहाराभिप्रायेण । अत एव तत्राहेत्यस्य तत्राप्याहेत्यर्थ इति ज्ञेयम् । पूर्वत्र चरमदुःखसाक्षात्कारस्यैव स्वेनैव नष्टदुःखस्य यो ध्वंसस्तत्सहकृताशेषदुःखध्वंसविषयकत्वमुक्तम् । न च तावन्मात्रमुक्ताक्षेपपरिहारायालम्। तदुक्त्यनन्तरमपि तदाक्षेपप्रवृत्तेरतोऽत्र चरमदुःखसाक्षात्कारस्य चरमं यद्दुःखं तदभावविषयकत्वमप्यस्त्येव । चरमज्ञानेन प्रथमक्षणे भावी स्वभावो विषयीकृतः । यदा द्वितीयक्षणे विरोधिगुणप्रादुर्भावेन दुःखनाशो भवति । दुःखेन च सुन्दोपसुन्दन्यायेन साक्षात्कारो नाशितः । तदा तृतीक्षणे विनश्यदवस्थज्ञाने सकलदुःखाभावस्य स्वाभावसहकृतस्य विषयीकरणोपपत्तिरिति वर्तमानापीति वाक्यतात्पर्यं मनसि निधायाऽऽह **अयमाशय इत्यादिनाऽनुभूयत इतीत्यन्तेन** । इदं च तत्त्वप्रदीपिकोक्तं मण्युक्तं च ज्ञेयम् ।

नित्यद्रव्ये आश्रयविनाशाभावात् पूर्वगुणनाशहेतुरुक्तो **विरोधिगुणप्रादुर्भावेनेति** । अशेषविनश्यदवस्थेति स्वयं पूरितम् । न तु तन्मूलेऽस्तीत्यतस्तस्याभिप्रेतत्वान्नानुक्तिदोष इत्याशयेन नयनप्रसादिन्युक्तरीत्याऽऽह **विनश्यदवस्थेत्यत्र हृदयमिति** । एवं पक्षद्वयाश्रयणेऽपि न मनः समाधिरस्ति । अशेषगुणोच्छेदो मोक्ष इति वार्तिकानुसारेण सिद्धेर्युक्तिसहत्वाभावात् । प्रथमपादीयास्वरसस्तु द्वितीयपक्षप्रवृत्तिनिर्णयेनैव सिद्धिः । द्वितीयेऽपि चरमदुःखस्य द्वितीयक्षणे नाशेन तत्साक्षात्कारो तृतीयक्षणे चरमदुःखाभावस्य विषयतोपपत्तावपि न चरमस्य साक्षात्कारस्याभाव उक्तसाक्षात्कारं प्रति विषय इति सम्भवति । तत्साक्षात्कारस्य द्वितीयक्षणे लब्धसत्ताकत्वेन तदानीमेव नाशाभावात् । तदानीमेव नाशे च तस्य तृतीयक्षणे विनश्यदवस्थसम्भवापत्त्या तत्क्षणे तदभावानुभवायोगप्रसङ्ग इत्येवमुभयत्राप्यरुचिं मनसि कृत्वा शेषविशेषेणोच्छेदो मोक्ष इति वार्तिकमेव सङ्कोचेन व्याख्येयमिति ये मन्यन्ते तत्पक्षे न सर्वदुःखनिवृत्तेरनुभूयमानत्वानुपपत्तिः । मुख्यदुःखविवक्षयैवाशेषगुणध्वंसाङ्गीकारेऽपि ज्ञानसद्भावाङ्गीकारोपपत्तेः । अत एव मणिकृताऽपि वर्तमानोप्यचिरमनुभूयत इत्युक्त्यनन्तरं ज्ञानसमये मुक्तिलक्षणसत्त्वान्न ज्ञानं मुक्तिविरोधीत्युक्तम् । अत एव चैतन्निराकरणावसरे तत्त्वप्रदीपिकायां योगप्रभावनियमनिराकरणादनागतदुःखध्वंसस्य साक्षात्कर्तुमशक्यत्वात् चरमदुःखध्वंसदशायां विज्ञानस्यापि विशेषगुणोच्छेदाङ्गीकारादित्युक्तम् । चरमेति वाक्यटीकायां ततः साक्षात्कारविषयो दुःखध्वंस इत्यंशो न सम्भवतीत्यर्थ इत्युक्ते च तथा वर्तमानापीति निबन्धग्रन्थोऽपि ज्ञानातिरिक्ताशेषदुःखाभावस्यानुभूयमानत्वात् परस्तावन्मात्रेण ज्ञानस्य दुःखान्तःपातानङ्गीकारलाभेन चरमज्ञानसमये तन्निवृत्तिर्नास्तीत्यादि दूषणपरिहारोपपत्तेः । एवं च नोक्तपक्षद्वयमपि सम्भवतीति पक्षद्वयेऽनुपपत्तिं सूचयन् प्रकारान्तरेण वर्तमानापीत्येतत्तात्पर्यमाह **केचित्त्वात्मविशेषेति** ॥ **प्रकाशकृतेति** । ज्ञानस्यापि दुःखतया वर्तमानाप्यचिरमनुभूयत इति ग्रन्थविरोधादिति *वर्धमानप्रकाशकृता पुरुषोत्तमभट्टेन* इति शेषः । न च दुःखान्तमुक्तौ मुक्तदशायामिति व्याप्तिः । तदापि मुख्याशेषदुःखध्वंस-

सद्भावादिति वाच्यम् । तादृशमुक्तौ प्रमाणाभावात् । ते नराः सुखमृत्यव इत्यादेस्तथाविधदुःखं न सम्भवतीत्यर्थतात्पर्येण तस्य प्रमाणत्वायोगाच्छिष्टमूह्यं मण्यादावित्याशयः । अत्र केचित्त्वाहुरिति पदाभ्यामुक्तवार्तिकसङ्कोचाश्रयणादिरूपापरितोषमभिप्रैति ।

वस्तुतस्तु युक्तियुक्तत्वादुक्त एव द्वितीयः पक्षो ग्राह्यः । तथात्व एवेच्छादेः सर्वात्मना लयप्रतिपादकानुव्याख्यानेनैकविंशतिभेददुःखात्यन्तनिवृत्तित्वादिति ब्रूम इत्यादि प्राचीनमूलविरोधाभावात् । वार्तिकानुरोधात् । भोगदशायामपि मुक्तत्वापत्तेरप्रसरात् । सुन्दोपसुन्दन्यायेन नाशादिकल्पनायाश्चाल्पत्वात् । विनश्यदवस्थेन वर्तमानस्वविनश्यदवस्थाविषयीकरणमात्रेण वर्तमानस्याभावविषयकत्वस्यापि कल्पयितुं युक्तत्वात् । एवं च यत्राल्पीयांसो दोषाः स पक्ष इति न्यायमनुसृत्य प्राचीनमूलविरुद्धमप्यनुसार्यन्यथाख्यातिपक्षमनादृत्य प्रागुक्तद्वितीयपक्ष एव न्याय्य इति हृदयम् । एवं वर्तमानेति पाठ एव परग्रन्थेषु नानायत्नेन व्याख्यातः तं पाठं परित्यज्य यो दुरहङ्कारमात्रेण अवर्तमानापीति नञ्श्लिष्टपाठ एवेति समर्थयितुं प्रवृत्तस्य धैर्यमुन्मत्तधैर्यवदिति स्पष्टमेव । तथापि कौतकिनां मुदे तदीयार्थानुवादपूर्वकं तद्दूषणप्रकार उच्यते । अत्र तावत् कथा— *वेदनिधितीर्थश्रीपादस्वामिना-माचार्यचरणानां* च समावेशकालेऽवर्तमानापीति पदच्छेदेन व्याख्यानं कुर्वतः श्रीपादान्प्रति परकीयग्रन्थमर्यादानुसारेणोक्तरीत्याऽर्थानुगुण्यश्च वर्तमानेत्येव पाठ इति गुरुभिः प्रतिपादिते तदुपदर्शितपरकीयग्रन्थानवलोक्य समाहितेष्वपि श्रीपादचरणेषु कालान्तरे तच्छिष्यः *कश्चिन्नागाचार्यपुत्रो माधवाचार्य* इति नामको यस्तेन काशीवासिना सन्मार्गेष्ववर्तमानेनावर्तमानापीति पाठ एव युक्तः । वर्तमानेति पाठस्य परकीयग्रन्थगतत्वेऽप्ययुक्तत्वेनानाश्रयणीयत्वादित्यादिकमाचार्यस्वामिषु कटाक्षाभिप्रायेण प्रतिपादितमिति । तथा हि तल्लेखः— पूर्णबोधगुरुं नत्वा जयतीर्थगुरूनपि । गुरोर्वेदनिधेर्दास्यात् सुधावाक्यं विचार्यते ॥ 'साङ्ख्यनैयायिकाद्याश्च प्राहुर्मोक्षं तु निःसुखम् । इच्छाद्वेषप्रयत्नादेरपि सर्वात्मना लय' इति तदभिमतं मोक्षस्वरूपम् । तत्रेच्छादेरित्यादिपदाद्बुद्धिसुखदुःखधर्माधर्मशरीरेन्द्रियाणां परिग्रहः । सुप्तिप्रलयव्यावृत्त्यर्थं सर्वात्मनेति विशेषणम् । तथा च निवृत्तजातीयस्य तस्मिन्नेवात्मनि पुनरनुत्पादः । सर्वात्मना लय इति तु टीकाकारनिष्कर्षः । तस्मिन्नात्मनीत्यत्र सप्तम्यर्थ आधारत्वमाधेयत्वं वा । निवृत्तजातीयस्य ध्वंसप्रतियोगिजातीयस्य । साजात्यं च तदीयध्वंसप्रतियोगित्वव्याप्यसामान्यगुणत्वाद्यसमानाधिकरणजात्या सामान्येन । प्रतियोगित्वं षष्ठ्यर्थः । अनुत्पाद उत्पत्त्यभावः । तत्रोत्पत्तिपदं त्याज्यम् । क्वचिदपि यदीयसम्बन्धे यत्समयवृत्तिध्वंसप्रतियोगित्वं नास्ति, तत्त्वरूपाद्यत्वघटितत्वेनातिगौरवात् । तद्वृत्तिध्वंसप्रतियोगित्वविशिष्टं दुःखत्वव्यापकस्वसमयावृत्तित्वं कथमिति तु फलितोऽर्थः । अत एवोदयनाचार्याः निःश्रेयसं पुनरात्यन्तिकी दुःखनिवृत्तिरिति प्राहुः । समानाधिकरणदुःखासमानकालीनदुःखध्वंसतदीयदुःखासमानकालीनतदीयदुःखध्वंस इति वा तदीयज्ञानासमानकालीनज्ञानध्वंस इति वा । एवं तदीयादृष्टेत्यादि प्रत्येकमेवोत्तरलाघवादात्यन्तिकत्वं पुनः स्वीचक्रुः । न तु प्रागभावघटितमस्ति । गौरवात् । अत एव चिन्तामणिमूलं यथाश्रुतमनुपपन्नमित्याशङ्क्य तट्टीकाकृद्भिरुपटिप्पणीकारैस्तथैव व्याकृतम् । भवतु वा तादृशदुःखहानिर्मोक्षः । तथाऽप्यननुभूयमानत्वात् कथं पुरुषार्थ इति सुधावाक्यम् ।

तत्रायमाशयः । पुरुषार्थत्वं तदुद्देशत्वं इच्छाविषयत्वमिति यावत् । अत एव सुधावाक्यं तस्माद्यद्यपि दुःखाभावे सुखदुःखे च दुःखाभावो नियतः तथापि परस्परनिरपेक्षमेव पुरुषार्थत्वमनयोरिति इच्छाया असङ्कीर्णविषयत्वाय पूर्वमपि दुःखाभावो मृग्यत इति च । स्वरूपेणेष्यमाणतामात्रनिबन्धनत्वात् पुरुषार्थताया इति च अन्यत्रापि दधिगः स्ववृत्तितयेष्यते तस्यैव स्वतःपुरुषार्थत्वात् इति । अत्र च यत्र यत्र विलक्षणविषयतया सम्बन्धेन स्वसुखाद्युभयवैशिष्ट्यावगाहिसाध्यत्वप्रकारिकेच्छा तत्र तत्र तेनैव सम्बन्धेन तदवगाहितत्प्रकारकं ज्ञानमिति व्याप्तौ तात्पर्यम् । प्रकारकेच्छात्वं स्वसुखादिवैशिष्ट्यावगाहिसाध्यत्वप्रकारकज्ञानत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकम् । कार्यकारणतावच्छेदकसम्बन्धः समवायः । अप्रामाण्यशङ्काशून्यत्वं कारणतावच्छेदककोटौ निवेशनीयम् । एवमुपायनिष्ठानिष्टसाधनताज्ञानाकालीनत्वं देयम् । तदभावः स्वतन्त्रकारणमिति वा बोध्यम् ।

ननु स्वसाध्यत्वज्ञानं प्रतिबन्धकमस्तु । न तु कृत्यसाध्यताज्ञानं हेतुः । कृत्यसाध्यताज्ञानाभावापेक्षया कृतिसाध्यत्वप्रकारकनिश्चयस्य कृत्यसाध्यत्वाप्रकारकत्वस्य गुरुत्वात् तद्धेतोरेवेति न्यायाच्च । न च तत्प्रकारकेच्छायां तत्प्रकारकज्ञानजन्यत्वस्य नियमितत्वमिति वाच्यम् । अप्रयोजकत्वादिति चेन्न । जनकीभूतं ज्ञानं विघटयत एव ज्ञानस्य प्रतिबन्धकत्वमनुमितौ व्यभिचारज्ञानवत् तथा च कृत्यसाध्यताज्ञानस्य प्रतिबन्धकत्वे कृतिसाध्यताज्ञानस्य हेतुत्वमावश्यकमेव । न च बाधग्रहासाधुत्वनिश्चयादिषु व्यभिचारः । असाधुत्वनिश्चयस्याप्रतिबन्धकत्वात् बाधव्युदासस्तु ग्राह्याभावानवगाहित्वेनेति विशेषणात् ।

किञ्च सुखं न मत्कृतिसाध्यं सुखं मत्कृतिसाध्यभिन्नं मत्कृतिसाध्यत्वाभाववत् सुखं सुखे न मत्कृतिसाध्यत्वम् । सुखं न कृतिसाध्यं सुखे कृतिसाध्यभेदः सुखं न साध्यमित्यादिज्ञानाभावापेक्षया कृतिसाध्यताज्ञानस्यैव हेतुत्वं लाघवादवच्छेदकत्वकल्पनापेक्षया कारणकल्पने गौरवाच्च प्रतिबन्धकादिष्वप्रामाण्यनिश्चयानास्कन्दितत्वं प्रविष्टं कारणदिशि ज्ञानानास्कन्दितत्वं प्रविष्टमिति लाघवाच्च तस्मादवेद्यो दुःखाभावः पुरुषार्थः कथम् । यदाहुः 'दुःखाभावोऽपि न वेद्यः पुरुषार्थतयेष्यते । न हि मूलाद्यवस्थायां प्रवृत्तौ दृश्यते सुधीरि'ति वैशेषिकं प्रत्याक्षेपे तदीयं समाधानमपि चेत्यादि । दुःखनिवृत्तेरनुभूयमानतामात्रं विवक्षितम् । दुःखनिवृत्तिसत्ताऽपि वा मात्रपदं तु व्यवच्छेदार्थकमेव । प्रातिपदिकार्थमात्रे प्रथमेतिवत् । न तु यावदर्थकमसम्भवात् । अत एव सुधाऽपि विषयादिजन्यमोहावस्थायां दुःखनिवृत्तिरिति प्रेक्षावन्तः प्रवर्तन्त इति । यत्र च विषयतासम्बन्धेनेच्छा तत्र तेनैव सम्बन्धेन सत्ताविरहविशिष्टानुभव इत्याद्यपक्षनिष्कर्षः । द्वितीयेऽपि यत्र पूर्वोक्तं व्याप्यं तत्र तेनैव सत्ताविशिष्टानुभवनिष्कर्षः । तत्राद्ये उत्तरं च मे जन्मन्यनुभूयत एवेत्यादि । इच्छायामसिद्धत्वज्ञानं कारणं तत्कथमित्याकाङ्क्षायां तदुपपादयति **अनागतेति** । ननु सिद्धत्वज्ञानं प्रतिबन्धकं तदभावः कारणं तथा च तस्मिन्सति कथमसिद्धत्वज्ञानं कथं च इच्छेत्याकाङ्क्षायां तदभावमुपपादयति **आवर्तमानाप्यचिरमनुभूया एवेति** । वर्तमानत्वं च सिद्धत्वम् । तथा च नञ्व्यत्यासेन सिद्धत्वप्रकारकजन्यानुभवविषयत्वं नास्तीत्यर्थः । अत एव क्रियापदद्वयं व्यर्थमित्यपास्तम् । अत एवोक्तं दीधितिकृता सामान्यलक्षणं विनाऽप्ययं कालः सुखप्रागभाववान् सुखोत्पादकालध्वंसप्रतियोगी वा कालत्वादेतादृशकालत्वाद्वेत्यनुमानादसिद्धसुखस्यासिद्धत्वज्ञानं सुलभमेवेति

निपुणतरमुपपादयिष्यते चेदं शब्दमणिदीधिताविति कृतं पल्लवितेनेति । अतो जयतीर्थाचार्यैरुक्तं मायावादखण्डने आत्मस्वरूपं च शास्त्रवृत्तेः प्रागेव सिद्धमेवेति कथं तत्प्रयोजनं स्यात् । न हि कश्चित्सिद्धस्य साधनाय यतते। नापि तत्साधनार्हमिति। अत एव तत्रैवासिद्धत्वज्ञानार्थं ज्ञात आत्मैवाज्ञानहानिर्नात्ममात्रमिति कश्चिदिति शङ्केति। अत्र प्रयोजनपदार्थः पुरुषार्थमेवेति । तस्मादवर्तमानेत्येव पाठः सम्यगिति प्रतिभाति । न तु वर्तमानेति पाठः । प्रकृतानुपयोगात्प्रतिकूलत्वाच्च । तथा हि । वर्तमानत्वं सिद्धत्वमेव । तत्प्रतिपादने विरुद्धमेव प्रतिपादितं स्यात्। न हि कश्चित्सिद्धमिच्छतीत्युक्तमेव । ननु तदीयबहुग्रन्थे वर्तमानाऽप्यचिरमनुभूयत एवेति सामान्यतः पाठः प्रतीयत इति तत्कथमिति चेत् । सत्यम् । प्रतीयते । तथापि सामान्यदर्शनिनार्थनिर्णयात् । उक्तं हि । 'यो हि सामान्यदृष्टेन व्यवहारं निनीषति । तृष्णोच्छेदो भवेत्तस्य मृगतृष्णाजलैरपि' इति । तस्मान्मानान्तरेण पूर्वोत्तरेणाविरुद्धार्थो ग्राह्यः । प्रकृते च मुक्तेर्वर्तमानतादशायां सर्वथाऽननुभव एव । सामग्रीविरहादिति । उक्तमोक्षस्य शरीराद्यपेक्षेण ज्ञायमानत्वात् । तदुक्तं सुधायाम् । शरीरे सति तदाश्रयेन्द्रियसद्भावः तैरर्थालोचनम् । ततः पूर्वानुभूतसारूप्येणेष्टानिष्टसाधनत्वानुमानम् । तस्मादिच्छाद्वेषौ ताभ्यां प्रयत्नः । तत इष्टसाधनोपादानम् । अनिष्टसाधनहानिश्च । तथा सुखोत्पादः तदनन्तरं तत्प्रतीतिरित्येष कारणक्रमः । न चैष कारणप्रवाहो मुक्तावस्ति । तत्सद्भावे दुःखस्यापि प्रसङ्गेन मुक्तत्वव्याघातात् । न च वाच्यं संसारदशायामेवैष नियमः । लाघवाजन्यज्ञानत्वेन जन्यात्मविशेषगुणत्वेनेवाशरीरादित्वेन च कार्यकारणाभावात् । न तु तद्विशेषसांसारिकज्ञानत्वेन गौरवात् ।

ननु चरमदुःखानुभावेऽनागतदुःखध्वंसोऽपि विषयः । तथा च अग्रिमक्षणे तद्ध्वंसः विषयं च ज्ञानमस्तीति वर्तमानाप्यचिरमनुभूयते । ज्ञानसमये मुक्तिलक्षणस्य विवक्षितस्य सत्वान्न ज्ञानं मुक्तिविरोधीति चेन्न । मोच्चैर्वोचः परोऽपि श्रोष्यति । एतावतोपान्त्यदुःखनिवृत्तेरनुभवविषयत्वमानितं न मुक्तेः । यतः समानाधिकरणज्ञानासमानकालीनज्ञानध्वंस एव मुक्तिरिति तल्लक्षणमुक्तम् । लाघवात् । न तु अन्यत् । गौरवात् । किञ्च चरमदुःखस्य नाशकं तत्त्वज्ञानमेव । तथा च द्वितीयक्षणे ध्वंसस्यानुत्पन्नत्वात्तृतीयक्षणे पूर्वज्ञानस्य ध्वस्तत्वात् तस्य वर्तमानस्यानुभूयमानत्वमत्यन्तसम्भावितमेव । न च तत्साक्षात्कार एव तन्नाशकोऽस्तु यतो दुःखनाशत्वावच्छिन्ना जन्यता दुःखसाक्षात्कारत्वावच्छिन्नजनकतानिरूपतेति वाच्यम् । दुःखसाक्षात्कारत्वस्य तदनाशकालौकिकसाधारणस्य जनकतावच्छेदकत्वात् । न च लौकिकत्वं साक्षात्कारविशेषणमिति वाच्यम् । तस्यानुगतानतिप्रसक्तस्य दुर्वचत्वात् । तद्धि मनःसंयुक्तदुःखमद्वा यज्जन्यत्वं दुःखजन्यत्वं वा । तस्य दुःखजन्यत्वघटितत्वेन तज्जन्यतावच्छेदकस्यातिरिक्तस्याभावेन तस्यैव वाच्यत्वेनात्माश्रयाद्यापत्त्याऽननुगतत्वात् तत्त्वज्ञानासाध्यत्वे तद्बोधकागमस्याप्रामाण्यापत्त्या दुःखनाशविशेषं प्रति तद्धेतुत्वस्यावश्यकत्वाच्च । न च योग्यविभुविशेषगुणनाशकत्वेन स्वोत्तरोत्पन्नयोग्यविशेषगुणत्वेन नाश्यनाशकाभावाद्दुःखसाक्षात्कारस्य दुःखनाशकतेति वाच्यम् । सत्यस्याप्यवहितत्त्वस्य च तद्व्यक्तिघटितत्वेन तद्घटितस्यैतस्य बाधकाभावे सत्येव विशेषविश्रामात्। अत्र तु बाधकस्योक्तत्वात् । न च चरमदुःखात्पूर्वं तत्त्वज्ञानमुत्पन्नमिति वाच्यम् । तथा सति मिथ्याज्ञानध्वंसापत्त्या दुःखानुत्पत्तिप्रसङ्गात् । न च दुःखतत्त्वयोः समूहालम्बनरूपः साक्षात्कारो भविष्यतीति वाच्यम् । तयोर्यमनियमादिविलक्षणकारणजन्यत्वेन समूहालम्बनानुपपत्तेः । किञ्च विभुविशेषगुणानामव्याप्यवृत्तित्वं नियम-

तश्चावच्छेदकानवच्छिन्नवृत्तित्वम् । अवच्छेदकं च शरीरमेव ।अन्यूनवृत्तित्वमेव । तदभावे चरमदुःखानुभवो बाधित एव । कुत्र तद्ध्वंसो भासेत ।

किञ्च चरमध्वंसः विशेषणतया भासते विशेष्यतया वा । नाद्यः । पूर्वमभानात् । विशिष्टबुद्धिं प्रति विशिष्टानुभवं प्रत्येव वा विलक्षणविषयताशालिविशेषणज्ञानस्य हेतुत्वात् । नान्त्यः । विशेष्यसन्निकर्षस्य लौकिकस्यासत्त्वात् । अस्तु वा तत्त्वज्ञानं पूर्वप्रतियोगिविलम्बेन मोक्षविलम्बश्च । साक्षात्कर्तव्य इति विधि-विशेषेण दुःखेनात्यन्तविमुक्तश्चरति । न स पुनरावर्तत इत्यनेनापि चरमदुःखध्वंसस्यैवापवर्गता प्रतीयते । अत्यन्तपदार्थं विवृणोति **न स इति** । न स पुनर्दुःखभाग्भवतीत्यर्थः । तथा च तदीयदुःखासमानकालीन-त्वदीयदुःखध्वंसदुःखात्यन्तविमोक्ष इति च । तथापि वर्तमानस्याननुभव एव । अत एव तस्यावेद्यत्वेना-पुरुषार्थत्वमाशङ्क्यानवगतस्य तस्य पुरुषार्थत्वमाहुः । न हि लौकिकसाक्षात्कारविषय एव पुरुषार्थः । दुःखार्तानां सुषुप्तौ पापध्वंसे च कामनायाः प्रामाणिकत्वादित्यप्याहुः । नव्यास्तु स्वोत्तरभाविदुःखानवच्छिन्नत्वमेव चरम-त्वम् । तथा च चरमदुःखसाक्षात्कारस्य तन्नाशकत्वे तद्धानिः स्यात् । साक्षात्कारस्यापि दुःखत्वात् । तथा च चरमदुःखमेव तत्सहकृततत्त्वज्ञानमेव वा कतकरजोवदन्त्यशब्दवच्च स्वस्य नाशकमित्यप्याहुः । तस्मादवर्तमान-मित्येव पाठः साधुः । न तु वर्तमानेति कृतं पल्लवितेनेति ।

नागाचार्यतनूजेन माधवेन सुयुक्तिभिः ।
सुधायां वर्तमानेति पाठे बाधो निरूपितः ॥
यदेव बाध्यते बाधः सद्भिराग्रहवर्जितैः ।
तदेव तर्ज्यते धाष्टर्यं तत्सुधाष्टर्येन युज्यते ॥

तत्र तावत् सुधावाक्यं विचार्य इति प्रतिज्ञाय साङ्ख्यनैयायिकाश्चेति तदनुव्याख्यानसम्बन्धिसुधा-ग्रन्थस्य तत्रेच्छादेरित्यादिपदादित्यादिनाऽनुवादायोगः । तदभिमतमिति तच्छब्देन परामर्शायोगः । स्ववाक्ये प्राक्प्रकृतत्वात् । स्वरूपमित्यस्य साकाङ्क्षयोत्तययोगश्च । एवमुत्तरत्रापि वाक्यविन्यासे ग्रन्थरीत्यननुसारिता ज्ञेया। टीकाकारवाक्यान्येवानूद्य टीकाकारनिष्कर्ष इत्येकोक्तिर्व्यर्था । प्रथमभाष्यसम्बन्धिप्रथमवार्तिकग्रन्थसम्बन्धि-वाचस्पतिना आत्यन्तिकत्वं निवृत्तस्य पुनरनुत्पाद इत्युक्तम् । तद्व्याख्यानरूपतात्पर्यपरिशुद्धौ निवृत्तस्येत्यनूद्य निवृत्तजातीयस्येति व्याख्याय पुनरनुत्पादस्तत्रैवात्मनीति शेष इत्युक्तम् । तदनुवादश्च मेलनेन टीकाकृता कृत इति नायं टीकाकारनिष्कर्षः । तदनुवादत्वमात्रे तात्पर्ये तु स्फुटः स्वीयतन्न्यायविरोधः । सप्तम्यर्थ आधारत्व-माधेयत्वं वेति प्रतिपादनं च व्यर्थमेव । अधिकरणत्वस्य स्पष्टप्रतिभासतया आत्माधिकारको निवृत्तजातीया-नुत्पाद इत्यर्थस्य स्पष्टं प्रतीतेः । आधारत्वमाधेयत्वं वेति प्रतिपादयता पक्षद्वयानुसारेण विशिष्टार्थद्वयस्य नायकतया तत्कथनाभावयोगश्च । साजात्यनिरूपणं चासत् । तदीयेत्यादिना हि निवृत्तं यद्दुःखं तदीयं यद्ध्वंस-प्रतियोगित्वं तद्व्याप्यसामान्यगुणत्वं वा सामान्यगुणः सङ्ख्यादिस्तद्भावः सङ्ख्यात्वादिकं वा तदसमानाधिकरणा चैवंरूपा दुःखत्वजातिः तया साजात्यमेवं सुखादिपुरस्कारेणापीति प्रतिपादितं भवति । न च तन्मनोरमम् । दुःखत्वादेरिव संयोगत्वादेर्दुःखानिष्टध्वंसप्रतियोगित्वव्याप्यत्वाभावेन सामान्यगुणत्वाद्यसमानाधिकरणेति विशे-

षणस्य व्यर्थत्वात् । दुःखध्वंसे संयोगादेरभावस्य सत्त्वेनाभावे च अभावान्तरानङ्गीकारेण तस्य दुःखध्वंसात्मतया तादृशसंयोगात्यन्ताभावप्रतियोगित्वं संयोगादेरपीति भवति संयोगत्वादिकमुक्तप्रतियोगित्वव्याप्यमिति ।

तन्न । तथा सति तादृशाभावमादाय गगनादेरपि ध्वंसप्रतियोगित्वप्रागभावप्रतियोगित्वयोरापत्त्या नित्यानित्यव्यवस्थालौकिकव्यवहारोच्छेदप्रसङ्गात् । यत्र दुःखत्वं तत्र निवृत्तदुःखनिष्ठध्वंसप्रतियोगित्वमिति व्याप्तेरपि दुःखान्तरेऽन्यदुःखप्रतियोगिकध्वंसप्रतियोगित्वाभावेन भङ्गध्वंसप्रतियोगित्वव्याप्येत्यप्यसदेव । एवं यत्र सुखत्वमित्यादिकं तदीयध्वंसप्रतियोगितावच्छेदकजात्येत्यर्थाश्रयणे तु तावतैव पूर्तेरितरांशवैयर्थ्यमिति स्पष्टमेव । आत्मनिष्ठसामान्यगुणवृत्तेः सामान्यगुणत्वधर्मस्य वा सङ्ख्यात्वादेर्वोपपादने सति तदसमानाधिकरण्यमात्रोक्त्यैव दुःखादिविशेषगुणदुःखत्वादिजातेरेव प्राप्त्युपपत्त्या व्यावर्त्याभावेनादिपदानर्थक्याच्च । तदीयेत्यस्य तत्पुरुषगतेत्यर्थविवक्षायामपि पूर्वोक्तदोष एव । यदप्यनुत्पाद उत्पत्त्यभाव इत्यभिधाय तत्रोत्पत्तिपदं त्याज्यम् । क्वचिदपि यदीयसमयबन्ध इत्याद्युक्तम् । तदप्यसत् । परस्य ह्ययमाशयः । उत्पत्तिर्ह्याद्यसमयसम्बन्धरूपा । समयस्याद्यत्वं च यस्मिंस्तद्वत्त्वेऽवच्छेदकसमयान्तरसम्बन्धध्वंसो नास्तीति तत्त्वम् । द्वितीयसमयेषु तद्वत्त्ववच्छेदकप्रथमादिसमयबन्धध्वंसस्य विद्यमानतया तद्वत्त्ववच्छेदकसमयान्तरसम्बन्धध्वंसाधिकरणत्वेन तदनधिकरणतदवच्छेदकतत्समवायत्वाभावात् । आद्यत्वेनाभिमते प्रथमसमये च तद्वत्त्ववच्छेदकद्वितीयादिसमयान्तरसम्बन्धस्य ध्वंसाभावेन तदनधिकरणतया आद्यत्वोपपत्तिः । वत्त्ववच्छेदकेत्यनेनैव प्रागभावावच्छेदकसमयनिवृत्तिः । पदार्थचन्द्रिकाटीकोक्तरीत्या तत्कार्याधिकरणक्षणेत्यादिरूपं वा स्वत्वम् । एवं चोक्तरूपाद्यत्वघटितत्वेन गुरुत्वादाद्यसमयसम्बन्धरूपोत्पत्तिर्न प्रवेश्येति । तत्र ब्रूमः । कथं तर्हि तद्वृत्तिध्वंसप्रतियोगित्वविशिष्टदुःखत्वव्यापकस्वसमयावृत्तित्वकत्वमिति फलितार्थकथनं त्वदीयं सङ्गच्छते ।

अत्र हीदं विवक्षितम् । यत्र दुःखत्वं तत्र स्वसमयावृत्तित्वमिति व्याप्तेर्व्याघातहततया स्वपदस्याभावपरताया वाच्यत्वेऽपि यत्किञ्चित्पुरुषीयदुःखे पुरुषान्तरीयदुःखाभावसमानकालतासत्त्वेन तद्व्यावृत्तये सामानाधिकरण्यलाभाय तत्पुरुषवृत्तिर्यो ध्वंसस्तत्प्रतियोगित्वविशिष्टं यद्दुःखं तस्य भावस्तत्वं व्याप्यमिति विशेषणीये तत्र ध्वस्तस्य दुःखस्य ध्वंसकालेऽसत्त्वमिति । तथा च उत्पत्तिपदत्यागे निवृत्तदुःखजातीयस्य नञ्भावमात्रप्राप्तावपि दुःखध्वंसस्य स्वसमयावृत्तिदुःखकत्वस्यालाभेन विशिष्टार्थालाभात् । तथाहि । तद्वृत्तिध्वंसेत्यनेन हि दुःखस्य तत्पुरुषगतध्वंसप्रतियोगित्वस्य दुःखत्वावच्छिन्ने स्वसमयवृत्तिकत्वस्य चोक्त्या यत्र निवृत्तं दुःखं तत्समये दुःखान्तराभाव इति समानाधिकरणदुःखासमानकालो नोच्यते । स्वसमानाधिकरणेत्यादि त्वदीयोत्तरग्रन्थानुसारात् । न च सोत्पत्तिपदपरित्यागे लभ्यते । आद्यत्वपरित्यागेऽपि समयसम्बन्धित्वस्योत्पत्तिशरीरान्तर्गतस्य त्याज्यत्वायोगात् । अन्यथा ध्वंसप्रतियोगित्वविशिष्टदुःखस्य दुःखत्वव्यापकाभावप्रतियोगित्वमित्येव लाभापत्त्या दुःखत्वं यत्र तत्र निवृत्तदुःखसमयावृत्तित्वमित्येवं निवृत्तदुःखस्य दुःखत्वव्यापकं स्वसमयावृत्तित्वकत्वलाभायोगध्वंसप्रतियोगिजातीयस्येति पूर्वत्रोक्तेः तस्मिन् ध्वंसप्रतियोगित्वायोगश्च । दुःखसामान्यविवक्षायां पूर्वस्यानन्वयः । फलितोक्तित्वादेव तदनन्वयो न दोष इति चेत् तर्हि दुःखस्येत्यादि षष्ठ्यन्तवचनाभावायोग

तश्चावच्छेदकानवच्छिन्नवृत्तित्वम् । अवच्छेदकं च शरीरमेव ।अन्यूनवृत्तित्वमेव । तदभावे चरमदुःखानुभवो बाधित एव । कुत्र तद्ध्वंसो भासेत ।

किञ्च चरमध्वंसः विशेषणतया भासते विशेष्यतया वा । नाद्यः । पूर्वमभानात् । विशिष्टबुद्धिं प्रति विशिष्टानुभवं प्रत्येव वा विलक्षणविषयताशालिविशेषणज्ञानस्य हेतुत्वात् । नान्त्यः । विशेष्यसन्निकर्षस्य लौकिकस्यासत्त्वात् । अस्तु वा तत्त्वज्ञानं पूर्वप्रतियोगिविलम्बेन मोक्षविलम्बश्च । साक्षात्कर्तव्य इति विधिविशेषेण दुःखेनात्यन्तविमुक्तश्चरति । न स पुनरावर्तत इत्यनेनापि चरमदुःखध्वंसस्यैवापवर्गता प्रतीयते । अत्यन्तपदार्थं विवृणोति **न स इति** । न स पुनर्दुःखभाग्भवतीत्यर्थः । तथा च तदीयदुःखासमानकालीनत्वदीयदुःखध्वंसदुःखात्यन्तविमोक्ष इति च । तथापि वर्तमानस्याननुभव एव । अत एव तस्यावेद्यत्वेनापुरुषार्थत्वमाशङ्क्यानवगतस्य तस्य पुरुषार्थत्वमाहुः । न हि लौकिकसाक्षात्कारविषय एव पुरुषार्थः । दुःखार्तानां सुषुप्तौ पापध्वंसे च कामनायाः प्रामाणिकत्वादित्यप्याहुः । नव्यास्तु स्वोत्तरभाविदुःखानवच्छिन्नत्वमेव चरमत्वम् । तथा च चरमदुःखसाक्षात्कारस्य तन्नाशकत्वे तद्धानिः स्यात् । साक्षात्कारस्यापि दुःखत्वात् । तथा च चरमदुःखमेव तत्सहकृततत्त्वज्ञानमेव वा कतकरजोवदन्त्यशब्दवच्च स्वस्य नाशकमित्यप्याहुः । तस्मादवर्तमानमित्येव पाठः साधुः । न तु वर्तमानेति कृतं पल्लवितेनेति ।

नागाचार्यतनूजेन माधवेन सुयुक्तिभिः ।
सुधायां वर्तमानेति पाठे बाधो निरूपितः ॥
यदैव बाध्यते बाधः सद्भिराग्रहवर्जितैः ।
तदैव तर्ज्यते धाष्ट्यं तत्सुधाष्ट्येन युज्यते ॥

तत्र तावत् सुधावाक्यं विचार्य इति प्रतिज्ञाय साङ्ख्यनैयायिकाश्चेति तदनुव्याख्यानसम्बन्धिसुधाग्रन्थस्य तत्रेच्छादेरित्यादिपदादित्यादिनाऽनुवादायोगः । तदभिमतमिति तच्छब्देन परामर्शायोगः । स्ववाक्ये प्राक्प्रकृतत्वात् । स्वरूपमित्यस्य साकाङ्क्षयोत्तययोगश्च । एवमुत्तरत्रापि वाक्यविन्यासे ग्रन्थरीत्यननुसारिता ज्ञेया। टीकाकारवाक्यान्येवानूद्य टीकाकारनिष्कर्ष इत्येकोक्तिर्व्यर्था । प्रथमभाष्यसम्बन्धिप्रथमवार्तिकग्रन्थसम्बन्धिवाचस्पतिना आत्यन्तिकत्वं निवृत्तस्य पुनरनुत्पाद इत्युक्तम् । तद्व्याख्यानरूपतात्पर्यपरिशुद्धौ निवृत्तस्येत्यनूद्य निवृत्तजातीयस्येति व्याख्याय पुनरनुत्पादस्तत्रैवात्मनीति शेष इत्युक्तम् । तदनुवादश्च मेलनेन टीकाकृता कृत इति नायं टीकाकारनिष्कर्षः । तदनुवादत्वमात्रे तात्पर्ये तु स्फुटः स्वीयतन्न्यायविरोधः । सप्तम्यर्थ आधारत्वमाधेयत्वं वेति प्रतिपादनं च व्यर्थमेव । अधिकरणत्वस्य स्पष्टप्रतिभासतया आत्माधिकारको निवृत्तजातीयानुत्पाद इत्यर्थस्य स्पष्टं प्रतीतेः । आधारत्वमाधेयत्वं वेति प्रतिपादयता पक्षद्वयानुसारेण विशिष्टार्थद्वयस्य नायकतया तत्कथनाभावयोगश्च । साजात्यनिरूपणं चासत् । तदीयेत्यादिना हि निवृत्तं यद्दुःखं तदीयं यद्ध्वंसप्रतियोगित्वं तद्व्याप्यसामान्यगुणत्वं वा सामान्यगुणः सङ्ख्यादिस्तद्भावः सङ्ख्यात्वादिकं वा तदसमानाधिकरणा चैवंरूपा दुःखत्वजातिः तया साजात्यमेवं सुखादिपुरस्कारेणापीति प्रतिपादितं भवति । न च तन्मनोरमम् । दुःखत्वादेरिव संयोगत्वादेर्दुःखानिष्टध्वंसप्रतियोगित्वव्याप्यत्वाभावेन सामान्यगुणत्वाद्यसमानाधिकरणेति विशे-

षणस्य व्यर्थत्वात् । दुःखध्वंसे संयोगादेरभावस्य सत्त्वेनाभावे च अभावान्तरानङ्गीकारेण तस्य दुःखध्वंसात्मतया तादृशसंयोगात्यन्ताभावप्रतियोगित्वं संयोगादेरपीति भवति संयोगत्वादिकमुक्तप्रतियोगित्वव्याप्यमिति ।

तन्न । तथा सति तादृशाभावमादाय गगनादेरपि ध्वंसप्रतियोगित्वप्रागभावप्रतियोगित्वयोरापत्त्या नित्यानित्यव्यवस्थालौकव्यवहारोच्छेदप्रसङ्गात् । यत्र दुःखत्वं तत्र निवृत्तदुःखनिष्ठध्वंसप्रतियोगित्वमिति व्याप्तेरपि दुःखान्तरेऽन्यदुःखप्रतियोगिकध्वंसप्रतियोगित्वाभावेन भङ्गध्वंसप्रतियोगित्वव्याप्येत्यप्यसदेव । एवं यत्र सुखत्व-मित्यादिकं तदीयध्वंसप्रतियोगितावच्छेदकजात्येत्यर्थाश्रयणे तु तावतैव पूर्तेरितरांशवैयर्थ्यमिति स्पष्टमेव । आत्मनिष्ठसामान्यगुणवृत्तेः सामान्यगुणत्वधर्मस्य वा सङ्ख्यात्वादेर्वोपपादने सति तदसमानाधिकरण्यमात्रोक्त्यैव दुःखादिविशेषगुणदुःखत्वादिजातेरेव प्राप्त्युपपत्त्या व्यावर्त्याभावेनादिपदानर्थक्याच्च । तदीयेत्यस्य तत्पुरुषगते-त्यर्थविवक्षायामपि पूर्वोक्तदोष एव । यदप्यनुत्पाद उत्पत्त्यभाव इत्यभिधाय तत्रोत्पत्तिपदं त्याज्यम् । क्वचिदपि यदीयसमयबन्ध इत्याद्युक्तम् । तदप्यसत् । परस्य ह्ययमाशयः । उत्पत्तिर्ह्याद्यसमयसम्बन्धरूपा । समयस्याद्यत्वं च यस्मिंस्तद्वत्त्वेऽवच्छेदकसमयान्तरसम्बन्धध्वंसो नास्तीति तत्त्वम् । द्वितीयसमयेषु तद्वत्त्ववच्छेदकप्रथमादि-समयबन्धध्वंसस्य विद्यमानतया तद्वत्त्ववच्छेदकसमयान्तरसम्बन्धध्वंसाधिकरणत्वेन तदनधिकरणतदवच्छेदक-तत्समवायत्वाभावात् । आद्यत्वेनाभिमते प्रथमसमये च तद्वत्त्ववच्छेदकद्वितीयादिसमयान्तरसम्बन्धस्य ध्वंसा-भावेन तदनधिकरणतया आद्यत्वोपपत्तिः । वत्त्ववच्छेदकेत्यनेनैव प्रागभावावच्छेदकसमयनिवृत्तिः । पदार्थ-चन्द्रिकाटीकोक्तरीत्या तत्कार्याधिकरणक्षणेत्यादिरूपं वा स्वत्वम् । एवं चोक्तरूपाद्यत्वघटितत्वेन गुरुत्वादाद्य-समयसम्बन्धरूपोत्पत्तिर्न प्रवेश्येति । तत्र ब्रूमः । कथं तर्हि तद्वृत्तिध्वंसप्रतियोगित्वविशिष्टदुःखत्वव्यापक-स्वसमयावृत्तित्वकत्वमिति फलितार्थकथनं त्वदीयं सङ्गच्छते ।

अत्र हीदं विवक्षितम् । यत्र दुःखत्वं तत्र स्वसमयावृत्तित्वमिति व्याप्तेर्व्याघातहततया स्वपदस्याभाव-परताया वाच्यत्वेऽपि यत्किञ्चित्पुरुषीयदुःखे पुरुषान्तरीयदुःखाभावसमानकालतासत्त्वेन तद्व्यावृत्तये सामाना-धिकरण्यलाभाय तत्पुरुषवृत्तिर्यो ध्वंसस्तत्प्रतियोगित्वविशिष्टं यद्दुःखं तस्य भावस्तत्वं व्याप्यमिति विशेषणीये तत्र ध्वस्तस्य दुःखस्य ध्वंसकालेऽसत्त्वमिति । तथा च उत्पत्तिपदत्यागे निवृत्तदुःखजातीयस्य नञभावमात्र-प्राप्तावपि दुःखध्वंसस्य स्वसमयावृत्तिदुःखकत्वस्यालाभेन विशिष्टार्थालाभात् । तथाहि । तद्वृत्तिध्वंसेत्यनेन हि दुःखस्य तत्पुरुषगतध्वंसप्रतियोगित्वस्य दुःखत्वावच्छिन्ने स्वसमयवृत्तिकत्वस्य चोक्त्या यत्र निवृत्तं दुःखं तत्समये दुःखान्तराभाव इति समानाधिकरणदुःखासमानकालो नोच्यते । स्वसमानाधिकरणेत्यादि त्वदीयोत्तर-ग्रन्थानुसारात् । न च सोत्पत्तिपदपरित्यागे लभ्यते । आद्यत्वपरित्यागेऽपि समयसम्बन्धित्वस्योत्पत्तिशरीरा-न्तर्गतस्य त्याज्यत्वायोगात् । अन्यथा ध्वंसप्रतियोगित्वविशिष्टदुःखस्य दुःखत्वव्यापकाभावप्रतियोगित्वमित्येव लाभापत्त्या दुःखत्वं यत्र तत्र निवृत्तदुःखसमयावृत्तित्वमित्येवं निवृत्तदुःखस्य दुःखत्वव्यापकं स्वसमयावृत्तित्व-कत्वलाभायोगध्वंसप्रतियोगिजातीयस्येति पूर्वत्रोक्तेः तस्मिन् ध्वंसप्रतियोगित्वायोगश्च । दुःखसामान्यविवक्षायां पूर्वस्यानन्वयः । फलितोक्तित्वादेव तदनन्वयो न दोष इति चेत् तर्हि दुःखस्येत्यादि षष्ठ्यन्तवचनाभावायोग

इत्यादिरूपेण शोध्यस्वरूपविलयमात्रफलव्यापारेणालम् । अत एवाहुरुदयनाचार्या इति सम्मतिकथनं च अज्ञानमूलम् ।

उद्योतकरवार्तिके हि श्रेयोद्वैविध्यं सुखाहितनिवृत्तिभेदेन प्रतिपाद्याहितनिवृत्तिरप्यात्यन्तिकी अनात्यन्तिकी च । अनात्यन्तिकी कण्टकादेर्दुःखसाधनस्य परिहारेण । आत्यन्तिकी पुनरेकविंशतिप्रभेदभिन्नदुःखहान्येति प्रतिपादितम् । तद्वाचस्पतिकृता त्वात्यन्तिकत्वं तन्निवृत्तेर्निवृत्तस्य पुनरनुत्पाद इति व्याकृतम् । वाचस्पतिव्याख्यानरूपोदयनकृतितात्पर्यपरिशुद्धौ ननु यदि निवृत्तिः प्रागभावो दुःखस्य स कथमात्यन्तिक इत्याद्याशङ्कानिवर्तकतयाऽऽत्यन्तिकत्वमित्येतदवतार्य निवृत्तजातीयस्येत्यादि व्याकृतम् । सति चैवं निवृत्तजातीयस्य तस्मिन्नेवात्मनि पुनरनुत्पाद इत्येतदुदयनोक्तपरिष्कृतार्थस्य स्वयं व्याख्यानाय प्रवृत्तेन किरणावलीस्था परिष्कृतोदयनोक्तिः साधकतया कथनं ग्रन्थाज्ञानमूलमिति स्पष्टत्वात् । स्वसमानाधिकरणेत्यादि स्वीचक्रुरित्यन्तं चासत् । स्वसमानाधिकरणदुःखासमानकालीनत्वादेरेवात्यन्तिकत्वरूपतयेति वेत्यादेरात्यन्तिकत्वमित्यनेन सम्बन्धायोगात् । अत एव स च समानाधिकरणदुःखप्रागभावासति दुःखध्वंस इति मणिवाक्यव्याख्यावसरे तथा च तदसहवृत्तित्वमेव श्रुतावात्यन्तिकत्वमिति भाव इति तद्रुचिदत्तादिभिर्निरूपितम् । मण्यादौ दुःखप्रागभावेति प्रागभावपदानुसारेण स्वसमानाधिकरणदुःखप्रागभावसमानकालीनदुःखध्वंस इत्यादेरेव वक्तव्यतया प्रागभाववदपरित्यागायोगः । न च तद्ग्रन्थेऽपि तस्य व्यर्थत्वाभिप्रायेण तत्परित्याग इति । द्रव्यकिरणावलीवर्धमाने समानाधिकरणदुःखासमानकालीनत्वमात्यन्तिकत्वमित्येतत्पक्षमाशङ्क्य सुषुप्तस्यापि मुक्तत्वापत्तेरित्युक्तत्वात् । एवमन्यत्रापि ।

तथापि दुःखसमानकालीनत्वात्यन्ताभावे वा दुःखसमानकालीनभिन्नत्वे वा विवक्षिते सुषुप्त्युत्तरदुःखसमानकालीनसौषुप्त्यव्यावृत्तिः सम्भवतीति चेन्नोक्तार्थपरिहाराभावे तत्प्रसङ्गाभावात् । तत्परिष्कारोऽपि वा चरमदुःखध्वंसस्याप्युक्तविधभोगरूपदुःखसमानकालतया तदसमानकालत्वाभावेनासम्भववारणाय तस्य सार्थकत्वात् । उक्तं च मणिप्रकाशेषु । चरमदुःखध्वंसस्य वर्तमानाप्यचिरमनुभूयत इति सिद्धान्तभोगरूपदुःखसमानशेषकालतयाऽसम्भववारकत्वादित्यादि । एवमेव समानकालीनसमानाधिकरणदुःखप्रागभावासमानदेशत्वमेव दुःखध्वंसस्यात्यन्तिकत्वमिति द्रव्यवर्धमानीयव्याख्यानेषु पुरुषोत्तमादिभिः प्रागभावपदसार्थक्यं वर्णितम् ।

न च वक्ष्यमाणरीत्या दुःखध्वंसस्य वर्तमानस्यानुभवायोगाद्वर्तमानापीति पाठस्यैवासम्भवान्न तद्बलेन दुःखध्वंसस्य भोगसमानकालतास्वीकारोपपत्तिरिति वाच्यम् । मुक्तित्वाभिमतदुःखध्वंसप्रतियोगिदुःखस्य सुखदुःखस्वरूपतयैकविंशतिप्रभेदभिन्नदुःखस्वरूपत्वाभावेन मुख्यदुःखध्वंसानुभवाङ्गीकारेऽपि बाधकाभावात् । विवरिष्यते चेदमुक्तपाठसमर्थनाय परकीयाज्ञानमूलकदुर्युक्तिनिचयनिराकरणं यदा तदवसरे इति सन्तोष्टव्यम् । अत एव न तु प्रागभावघटितमित्यादिकमपि दुर्वासनामूलमेव । यदपि भवतु वा तादृशदुःखहानिर्मोक्षस्तथाप्यननुभूयमानत्वात् कथं पुरुषार्थ इति सुधावाक्यमित्यनूद्य आशयादिवर्णनम् । तत्र तावदन्यथानुवादता अर्थानुवादत्वमाश्रित्येति सुधावाक्यमित्युक्तमिति ब्रुवाणस्तु उन्मत्त इति स्पष्टमेव । मोक्षे दुःखहानेरननुभूयमानत्वादिति स्पष्टमुक्ते

सति मोक्षपदपरित्यागेनाननुभूयमानत्वमात्रपुरस्कारेण पाठान्तरकल्पनतत्समर्थनादिमहाप्रयासकर्तुर्मद्यपानातिरिक्त-निमित्ताभावाच्च । भवति दुःखहानिः पुरुषार्थ इति सुधापाठं त्यक्त्वा मोक्ष इत्यनूद्य पुरुषार्थत्वं पुरुषोद्देशत्व-मित्यादिकल्पनानुपपत्तिश्च । मोक्षे दुःखेत्याद्युत्तरवाक्यविरोधश्च । इच्छाविषयत्वं पुरुषार्थत्वमित्यादि स्वतः पुरुषार्थत्वादितीत्यन्तं त्वतिविरुद्धम् । प्रकारान्तरप्रसक्त्यभावेन व्यर्थं च । यदि पुरुषार्थत्वव्यापकीभूतानुभूयमान-त्वाभावेन पुरुषार्थत्वाभावानुमानं शङ्कित्रभिप्रेतमिति स्वीकृत्य व्याप्तिशरीरादिकं प्रतिपादितम् । अत्र च यत्र यत्र विलक्षणविषयतासम्बन्धेन स्वसुखाद्युभयवैशिष्ट्यावगाहिसाध्यत्वप्रकारिकेच्छा तत्र तत्र तेनैव सम्बन्धेन तदवगाहि तत्प्रकारकं ज्ञानमिति व्याप्तौ तात्पर्यमित्यादि तु तदत्यन्ताज्ञानमूलम् । दुःखाभावमात्रस्य प्रसक्तत्वेन स्वदुःखा-भावेत्येतावतैव पूर्तेः । एवमुत्तरत्रापि । ज्ञानेच्छयोः कार्यकारणभावानुसारेण सति ज्ञानेच्छेति न नियमः । इच्छाविषयताभिमतस्य तद्विषयत्वेच्छाकारणीभूतज्ञानविषयत्वातिरिक्तस्य स्वसत्ताकालीनानुभवविषयत्वस्यैव प्रयोजकत्वात् । विवरिष्यते चैतत् । सुखे कृतिसाध्यत्वादिवचनं च अज्ञानमूलमिति स्पष्टमेव । सुखमत्कृति-साध्यं कृतिसाध्यकृतिसाध्याभिन्नमित्यादिरूपेण कृतिसाध्यताज्ञानपक्षे तु गौरवापत्तेश्च ।

किञ्च दुःखनिवृत्तेः पुरुषार्थत्वं वदन्तं प्रति सकलदुःखनिवृत्तिसमये तदनुभवादनुभूयमानत्वस्य तु अपुरु-षार्थत्वव्यापकत्वात् तदभावे पुरुषार्थत्वायोग इति शङ्कमानेनेच्छाव्यापकीभूतं यत्पुरुषार्थत्वेनाभिमतस्य स्वसत्ता-कालीनं स्वाश्रिततयाऽनुभूयमानायाश्च तदभावमात्रेणैवाभावसाधनोपपत्तेः उक्तेच्छाव्यापकत्वेन साध्यत्वप्रकारक-ज्ञानोदाहरणायोगः । तज्ज्ञानाभावस्य वक्ष्यमाणरीत्या दुःखाभावेन तेन पुरुषार्थत्वाभावसाधनयोगाच्च । तस्मान्न चात्राप्रयोजकतेत्याद्युपपादनमपि तस्मादवेद्य इत्येतत्तात्पर्यान्तमरण्यरोदनापादकं परस्यायुक्तम् । त्वदुदाहरिष्य-माणशरीरे सन्निहिततदाश्रयेत्यादि सुधानुसारेण पामराणामपि प्रतीयते तदिच्छाकारणीभूतकृतिसाध्यताज्ञाना-तिरिक्तं स्वसत्ताकालीनस्ववृत्तितया ज्ञानमात्राभिमतमिति । सति चैवं पुरुषार्थत्वाभावे इष्टसाधनताज्ञानोपयोगीष्ट-ज्ञानाभावोक्तिः कथं युक्ता स्यात् । तृप्त्यादिसत्तादिकालीनानुभवाभावेऽपि पूर्वानुभूतसारूप्येणेति सुधोक्तप्रकारा-न्तरेण तज्ज्ञानमात्रमङ्गीकृत्येष्टसाधनताज्ञानादेः सर्वैरङ्गीकृतत्वात् । अन्यथाऽऽश्रयापत्तेः ।

अपि च उक्तव्याप्तिसिद्धावपि दुःखाभावे विलक्षणविषयतासम्बन्धेन अहं दुःखाभाववान् स्यामिति दुःखाभाववैशिष्ट्यावगाहिसाध्यत्वप्रकारेच्छावत्त्वस्येवोक्तविधसाध्यत्वप्रकारकज्ञानवत्त्वस्यापि सत्त्वेन व्यापका-भावेन पुरुषार्थत्वाभावसाधनायोगः । अत एव तस्मादवेद्यो दुःखाभावः पुरुषार्थः कथमित्युपसंहारोऽप्यनुपपन्नः । प्राग्व्याप्तिशरीरमात्राभिधानेऽपि दुःखाभावे व्यापकीभूतानुभूयमानत्वस्याभावानुपपादनेन तस्मादवेद्य इत्युपसंहारस्य प्रकृताविषयत्वं च । तस्मादित्यस्योक्तव्याप्तिवदित्यर्थकत्वमाश्रित्य तद्व्याप्तेः सत्त्वादेव प्रकृते च व्यापकाभाव एवावेद्य इत्यनेनोच्यत इति कुसृष्टिपक्षेऽपि प्रतिज्ञामात्रत्वापदोक्ताव्यापकसद्भावेन च अस्य व्यापकाभावप्रति-पादकत्वायोग एव । ततो नेदं व्यापकाभावाल्लिङ्गव्याप्याभावानुमानानुवादमात्ररूपमपि सम्भवति । व्याप्त्युप-पादनप्रकारशेषोऽपि तत्र तत्र स्खलनोपदर्शनेन निराकार्यः । त्वदुक्तरीत्या व्याप्तिशरीरादिकल्पने पुत्रादिवियोग-जन्मेत्यादि सुधाग्रन्थायोगप्रसङ्गाच्च । न हि तत्र साध्यत्वप्रकारिकेच्छां प्रति कारणं तादृशं ज्ञानं नास्तीति

तदीयाशङ्कायां तद्विरुद्धदुःखाभावस्य स्वसत्तादशायामनुभवाभावेऽपि पुरुषार्थत्वदर्शनं प्रमाणीकृतमिति युज्यते । दुःखाभावेऽपि नावेद्य इति सम्मतिग्रन्थस्यापि स्वसत्ताकालीनानुभवपरतया त्वदुक्तावेद्यत्वाभावादित्यलम् ।

यदपि वैशेषिकं प्रति आक्षेपे तदीयं समाधानमपि चेत्यादि निरूपितम् । तदप्यसत् । अयमाशय इत्यस्यानन्वयात् । पुत्रादिवियोगजन्मदुःखहानिमिच्छतामित्यादिना समाधानस्य पूर्वसुधायामुक्तत्वेनापि चेत्यादेः समाधानान्तरतयाऽस्यैव समाधानत्वोक्तेर्भटनमस्कृत्वप्रयुक्तत्वाच्चादुःखनिवृत्तिसत्तावधिर्वेति द्वितीयपक्षानुसारेण यदाकदाचिदनुभूयमानत्वस्यैवार्थतया वाच्यत्वेन मात्रपदेन सर्वदाऽनुभूयमानत्वव्यावृत्तेरेव प्रतीयमानतया न तु यावदर्थकमित्यादेरसङ्गतस्याभिधानायोगात् । एकस्यापि सर्वदाऽनुभूयमानत्वार्थकत्वाभाव एव तात्पर्ये च स्फुटं स्पष्टानुक्त्योन्मत्तत्वम् ।

सत्तापि वेति पाठस्य सुधापरग्रन्थाननुसारित्वेन तत्पाठाश्रयणायोगश्च । तत्कल्पनेऽपि मात्रपदे यावदर्थके यावती अनुभूयमानता वा सत्तापि वेत्येवं विकल्पप्रकारलाभेन तस्य चासङ्गतत्त्वेऽनुत्थापनीयत्वमित्येव वाच्यतया यावदर्थासम्भवमात्रव्यावृत्तेर्लाभेन सर्वदेत्येतद्व्यावृत्त्यलाभात्सत्ताविरहविशिष्टसार्वकालिकानुभवलाभापत्त्या तद्दूषणपरतया चरमे जन्मनीत्येतत्सुधावतारस्त्वया कृत इत्यापाताच्च । विषयतासम्बन्धेन साध्यत्वप्रकारिकेच्छां प्रति तत्प्रकारकज्ञानस्य व्यापकताकथनेन तदभावेनोक्तेच्छाभावे शङ्किते तादृशेच्छोपपादकतया चरमजन्माभिधानपर्यन्तं धावनायोगाच्च । उक्तसाध्यत्वप्रकारकज्ञानस्य चरमे जन्मनि तु असत्त्वाङ्गीकारे तज्ज्ञानसाध्यतदिच्छापूर्वकश्रवणात् अप्रवृत्त्यनुपपत्तिप्रसङ्गेन उक्तज्ञाने तयोः श्रवणात् इतःप्रागेव अङ्गीकारायोगश्च । तथा च उक्तविधसाध्यत्वप्रकारकज्ञानस्याभावाशङ्का अज्ञानमूलैव । परिहारेऽपि चरमे जन्मनीत्युक्तिरसङ्गतैव ।

किञ्चानुभूयमानतामात्रमित्यनेन सत्ताया व्यावृत्युक्तावनुभवकाले सत्ता नावश्यकीत्येतावन्मात्रलाभेऽपि सत्ताविरहोऽपि दुःखनिवृत्त्यनुभवे चकास्तीत्यस्यालाभेन सत्ताविरहविशिष्टानुभव इति प्रथमकल्पनिष्कर्षायोगः । तद्विशिष्टतया चरमे जन्मन्यनुभवोऽस्तीत्येतत्परतया चरमे जन्मनीत्येतत्प्रवृत्तिवर्णनानुपपत्तिश्च । सत्ताविरहविशिष्टत्वस्यानुभवविशेषणत्वेऽपि सत्ताया भिन्नकालीनानुभवस्यैव वाच्यविरहविशिष्टेति वक्रोक्तेर्व्यर्थतापाताच्च । इच्छायामसिद्धत्वज्ञानं कारणं तत्कथमित्याकाङ्क्षायां तदुपपादयतीत्येवमनागतेत्यस्यावतारोऽपि बालभाषणतुल्य एव । दुःखनिवृत्तेः सिद्धत्वप्रसक्त्या भावेऽनिच्छायां कथंतानुवादेन शङ्कामात्रस्य वृथाकरणं तत्परिहारस्यापि वृथात्वमिति स्पष्टत्वात् । पुरुषार्थत्वव्यापकस्वसम्बन्धविशिष्टतया स्वानुभवस्याभावे शङ्किते चरमे जन्मनि स्वसम्बन्धतया भाविदुःखनिवृत्तेरनुभवसत्त्वान्नाव्यापकाभाव इत्यादिरूपेण टीकोक्तरीत्या परग्रन्थकारीयव्युत्पादनानुसारेण च व्याख्यानसम्भवे दुरहङ्कारमात्रमूलकयत्किञ्चित्कल्पनायोगाच्च । असिद्धे साध्यत्वप्रकारकज्ञानार्थं योगप्रभावस्यानावश्यकतया सुधास्थयोगप्रभावोक्तेरसङ्गतत्वापाताच्च । त्वदुक्तसत्ताविरहविशिष्टानुभवसमर्थनपरत्वेनैव योजनापरित्यागेनेच्छायामसिद्धत्वेत्यादेस्त्वद्रीत्यैवायोगाच्च । सत्ताविरहे सति कथमनुभव इत्यतोऽनागताया समाधिभावात् अभावः सम्भवतीति त्वद्रीत्याऽनागतेत्येतत्प्रवृत्तिसम्भवात् । समाधिभावादित्यस्य 'सार्थक्यसम्भ-

वाच्च । यदपसिद्धत्वाज्ञानमित्याकाङ्क्षानिवृत्तयेऽनागतेत्यनेनासिद्धत्वज्ञानमस्तीति प्रतिपादिते सति पुनः सिद्धत्वज्ञानं प्रतिबन्धकमित्यादिरूपशङ्कायाः सर्वथाऽनुत्थानेनावतारायोगात् । अथ ब्रूषे । आनागतत्वादसिद्धत्वेन ज्ञानार्हतामात्रप्राप्तावपि नासिद्धत्वेन ज्ञातता सिद्धा । येन सिद्धत्वज्ञाने प्रतिबन्धके विद्यमाने कथमसिद्धत्वज्ञानमिति शङ्कानुपपत्तिरिति ।

तन्न । तथा सत्युत्तरवाक्येन सिद्धत्वज्ञानरूपप्रतिबन्धकस्याभावसिद्धावपि इच्छाकारणतया त्वयोक्तस्यासिद्धत्वज्ञानस्यालाभेनेच्छाया अनुपपादितत्वस्यैव प्राप्तेः । सर्वत्रेच्छोपपादकज्ञानार्हत्वस्योत्तरत्र प्रतिबन्धकाभावस्य चोक्तिलाभेऽप्यसिद्धत्वे ज्ञानसद्भावलाभेनाफलस्य वैयर्थ्यप्राप्तिश्च । मोक्षेऽननुभूयमानत्वादिति शङ्कायां प्राथमिकशास्त्रादिप्रवृत्त्युपयोगिज्ञानेच्छासमर्थनासङ्गतिरिति तूक्तमेव । तदनुसारे परस्पराप्यरोदप्रयास एव । भोजनादिप्रवृत्तावपि तृप्त्यादिसिद्धत्वज्ञानोपपादनादिना चर्चापाताच्च । अनागतत्वस्यास्मदुक्तरीत्याऽनुभवोपपादकत्वे तूत्तरवाक्यमर्थवत् । वर्तमानतयाऽनुभूयमानत्वस्य पुरुषार्थत्वव्यापकतया तदभावे कथं पुरुषार्थत्वमिति शङ्कान्तरे सति तत्प्रवृत्तेरुपपन्नतरत्वात् वर्तमानेतीत्युत्तरवाक्यपाठस्य परित्यागेनावर्तमानेति वृथा नञ्प्रक्षेपेण पाठकल्पनायोगाच्च । कल्पनेऽप्यनागतेति पूर्वानुसारेणाविद्यमानापीत्यपिशब्दस्वारस्यानुसारेण चावर्तमानाऽप्यनुभूयत एवेति सम्बन्धस्यैव स्वरसतया नानुभूयत इति नञ्व्यत्यासेनार्थाश्रयणायोगाच्च । सिद्धत्वप्रकारकज्ञानविषयत्वाभावोक्त्यर्थं वर्तमानाऽनुभूयत इत्येव वक्तव्यत्वापत्त्याऽपिपदस्याचिरपदस्य च वैयर्थ्यापाताच्च । अवर्तमानेत्यन्वितनञुत्तरसम्बन्धाश्रयणस्य परमक्लेशेनानुष्ठात्रा स्वारस्यान्तरस्य वक्तव्यत्वापाताच्च । अनुपमृद्य प्रादुर्भावादिति न्यायसूत्रे नानुमानमतच्छब्दादिति ब्रह्मसूत्रे चान्यत्र चोत्तरान्वयस्यार्थानुगुणतया तदाश्रयणोपपत्तावपि त्वदीयाभासार्थस्यानाभासासम्मततया तदर्थं वृथा क्लेशाश्रयणायोगाच्च । वर्तमानेति पाठे पराभिसंहितं बाधकं तूत्तरत्र निराकरिष्यते । वर्तमानाऽपि नानुभूयत इति पाठमेव प्रकल्प्य त्वदभिप्रेतवाक्यार्थसम्पादनसम्भवेऽवर्तमानापीति कुसृष्ट्यापादकपाठस्य कल्पनायोगाश्च । उक्तरीत्या पराभिप्रेतार्थानुपपत्त्यैव अत एव क्रियापदद्वयं व्यर्थमित्यपास्तमित्यप्ययुक्तम् । वर्तमानतयाऽननुभूतेति वक्तव्यत्वापाताच्च । मोक्षेऽनुभूयमानत्वादिति प्रागुक्तमोक्षपदाननुगुणतया सर्वस्यास्य चर्चस्य वृथात्वमिति तूक्तमेव । असिद्धसुखस्यासिद्धत्वज्ञानं सुलभमेवेतीत्यन्तं शिरोमणिवाक्यं च कमर्थं प्रतिपादयति । कथमस्योक्तार्थे प्रमाणीकरणीयमिति विवेकशून्यतया स्वोक्तेऽर्थे तत्प्रमाणीकरणमिति स्पष्टम् । सुखस्य हि सिद्धतायां प्रयोजनत्वानुपपत्तिः । असिद्धत्वे च ज्ञानस्यैवायोग इत्याशङ्कायां प्रयोजनत्वेनाभिमतं सुखं हि तत्साधने प्रवृत्तिमनोऽसिद्धमेव । न च तद्ज्ञानायोगः । असिद्धस्यापि प्रागभावपुरस्कारेण ज्ञानसम्भवादित्येतत्प्रतिपादकं हि शिरोमणिवाक्यम् । ननु सिद्धत्वज्ञानं प्रतिबन्धकमित्यादि त्वदीयकुसृष्टिविषयकम् । सुखोत्पादकालध्वंसप्रतियोगी वेत्यनेन त्वतीतसुखस्याप्यसिद्धस्यातीतत्वेन ज्ञानसम्भवप्रतिपादनमित्यप्यर्थमेतदुदाहरणम् ।

किञ्च प्रयोजनत्वव्यापके प्रयोजनतयाऽभिमतसत्ताकालीनतदनुभवविषयत्व इत्यभिप्रेत्य भाविदुःखाभावे चेदानीन्तनतदनुभवविषयत्वेऽपि तत्सत्ताकालीनतदनुभवविषयत्वाभावात्कथं प्रयोजनत्वमित्येतच्छङ्कापरिहारकतया

प्रतीयमानस्य वाक्यस्यार्थान्तरापत्तेः उक्तशङ्कापरिहारकान्तराभावेन तत्परिहारासिद्धिः । उक्तविधवर्तमानतया-ऽनुभवायोग इति शङ्का नोदेत्येवेति तत्परिहारो नावश्यक इति तु देवानां प्रिय एव वक्तुं समर्थः । त्वद्वक्ष्य-माणोक्तरीत्या प्रयोजनपदेन पुरुषेच्छाविषयत्वस्याभिप्रेतत्वेऽपि प्रयोजनसत्तादशायां तदनुभवाभावे प्रयोजनत्व-मेवायुक्तमिति शङ्कावारकतयैव वर्तमानाऽपीति पाठमाश्रित्यैव तात्पर्यपरिशुद्धिस्थैतद्वाक्यस्य तट्टीकाकृता व्याख्याततया तत्पदपरित्यागेन प्रयोजनसत्ताविरहकालीनतदीयभावित्वेन ज्ञानोपपादकतया व्याख्यानस्य परग्रन्थ-विरुद्धत्वाद्यर्थत्वेनानाश्रयणीयत्वाच्च । न हि भाविप्रयोजने भावित्वेनानुभवत्वायोगात् कथं पुरुषार्थत्वमिति शङ्का-परेयं भवति दुःखहानिः पुरुषार्थ इत्यादि सुधाग्रन्थः । तत्र पुरुषार्थतामाश्रित्य मोक्षे एतेन पुरुषार्थेनाहं पुरुषार्थीति निश्चितत्वरूपानुभूयमानत्वस्यैवायोगशङ्कनात् । चरम इति वाक्येन च अयोगप्रभावासाधितनिश्चयमुपपाद्य सत्ता-कालीननिश्चयोपपादनायैव च वर्तमानापीति ग्रन्थस्य प्रवृत्तया ग्रन्थस्वारस्यापरिहारवृथाकुसृष्ट्याश्रयणस्य ग्रन्थ-द्रोहमात्रफलकत्वात् । उपपादयिष्यते चेदमिति वचनमप्यज्ञानमूलमिति स्पष्टमेव । स्वस्य दीधितिकारित्वा-भावात् । एतेन मायावादखण्डनीयग्रन्थकारोक्तिसंवादीकरणमप्यनुपपन्नम् । यत्प्रयोजनार्थं तत्साधनत्वाभिमते यः वर्तते तस्य साधने प्रवृत्तिप्रयोजने सिद्धे सति न सम्भवतीति दूषणादिकं तत्र प्रवर्तितम् । तत्परेण स्वस्य कथं साधकतया ज्ञानमिति स एव जानातु । मायावादखण्डन इत्युक्तिरप्यज्ञानमूलैव । तस्मादवर्तमानेत्येव पाठः सम्यगिति प्रतिभातीति वचनमपि कथं वक्तुर्न लज्जाकरम् । पाठान्तरेऽनुपपत्तेरुत्तरत्र स्वयमुपपादनेऽपि प्रागनुप-पादिततया तस्मादित्यनुपसंहारायोगात् । एवं प्रकृतोपयोगादित्यर्थस्तस्मादित्यस्येति वदतस्तु तथैव वक्तव्यतया वृथा सामान्योक्त्ययोगप्रसङ्गः । वर्तमानेति पाठस्य सुधाग्रन्थतया टीकाकारम्मन्येन त्वत्पक्षस्यैव परकीयव्युत्पा-दनानुसारेण कर्तव्यतया पाठान्तरं परिकल्प्य नञो व्यत्यासमाश्रित्य अतीतवर्तमानसाधारणसिद्धत्वस्य वर्तमान-पदार्थतां चाश्रित्य वाक्ययोजनाया अस्वरसत्वाच्च ।

यच्च वर्तमानेति पाठे प्रकृतानुपयोगात् प्रतिज्ञाय प्रकृतानुपयोगं स्पष्टं मत्वा प्रतिकूलमुपपादितं वर्तमानत्वं सिद्धत्वमेवेत्यादिना । तदसत् । इच्छायां सिद्धत्वज्ञानप्रतिबन्धकमित्यादिशङ्कापरिहारायैतद्वाक्य-प्रवृत्तिरिति सिद्धवत्कृत्य किल प्रकृतानुपयोगः परस्याभिमतः । न चैतद्वाक्यं परिहाराय प्रवृत्तम् । अपि त्वना-गताया दुःखनिवृत्तेर्योगिप्रभावेनानुभवसम्भवेऽपि वर्तमानतादशायां ज्ञानरूपदुःखस्यापि स्वीकारायोगादनुभवायोग इति शङ्कापरिहाराय प्रवृत्तमित्यसकृदवोचाम । तदा च कथमस्य प्रकृतानुपयोगः । वर्तमानतादशायामप्यनुभवोप-पादकत्वम् । प्रतिकूलत्वप्रतिपादनं त्वत्यन्ताज्ञानमूलकम् । सिद्धस्येच्छायोगात्सिद्धप्रतिपादने विरुद्धमेव प्रति-पादितं स्यादिति वचनं तदा युज्यते ।

यद्यत्र मायिमते ऐक्यमिव सिद्धान्ते दुःखनिवृत्तिं प्रतिपादयितुं शास्त्रादिप्रवृत्तिरङ्गीकृता स्यात् । न चैवम् । युक्तिकालीना दुःखनिवृत्तिस्तदानीमप्यनुभूयमाना न भवति चेत्कथं पुरुषार्थ इत्युक्तेर्भवत्येव स्वसत्ताकालेऽनुभूय-मानेति प्रतिपादनस्यानुकूलतरत्वात् । मोक्षेऽनुभवशङ्कापरिहाराय प्रवृत्तेऽत्र ग्रन्थे संसारदशायामिच्छोपपत्तिप्रति-पादनमसङ्गतमिति न विस्मर्तव्यम् । त्वदीयदुर्योजनानुसारेऽपि पूर्ववाक्ये सिद्धत्वज्ञानोपपादने कृते सति सिद्धत्व-

ज्ञानरूपप्रतिबन्धकशङ्कायां वर्तमानापीति वाक्येन सिद्धमप्यचिरमनुभूयत इत्युक्ते किञ्चित्कालमेव सिद्धत्वज्ञानं प्रतिबन्धकीभूतमस्ति । न तु बहुकालम् । तथा च किञ्चित्कालीनप्रतिबन्धकापगमेऽसिद्धत्वज्ञानं सम्भवत्येव-मनुकूलत्वोपयोगयोः तदभावाभिधानायोगाच्च । दुःखनिवृत्तिः पुरुषार्थ एव भवतीत्यादि सुधाग्रन्थस्य तात्पर्य-परिशुद्ध्यनुवादरूपतया तत्र च वर्तमानेति पाठस्यैव सत्वात् । वर्धमानकृता च तद्व्याख्यानावसरे ततोऽपि दुर्जनतरो यदि वर्तमानेत्यादि प्रागुदाहृतटीकानुसारेणोक्तत्वाद्द्रव्यकिरणावलीवर्धमाने च समानाधिकरणविशेषगुण-ध्वंसो मुक्तिरिति शङ्कितात्यन्तिकत्वनिर्वचननिराकरणाय ज्ञानस्यापि दुःखतया वर्तमानाप्यनुभूयत इति ग्रन्थ-विरोधादित्युक्तेः । तद्व्याख्यानावसरे च अशेषगुणोच्छेदो मोक्ष इति वार्तिकोक्तलक्षणानुसारेण वर्तमानतादशाया-मनुभवमनङ्गीकृत्य प्रौढीवादेनायं ग्रन्थ इति । विशेषपदं वार्तिकस्थं मुख्यदुःखपरमित्याश्रित्य ज्ञानरूपदुःखाङ्गी-कारेऽपि नानुपपत्तिरिति च गतिद्वयस्य वर्धमानटीकासु वर्धमानेन्दुपुरुषोत्तमीयरुचिदत्तीयेषु कथनात् । अनुमान-पक्षधरीयमाधवमिश्रादिव्याख्याने मणिरुचिदत्ते च समानाधिकरणदुःखप्रागभावासहवृत्तिर्दुःखध्वंस इति मोक्ष-लक्षणीयप्रागभावपदकृत्यकथनावसरे चरमदुःखध्वंसस्य वर्तमानाप्यचिरमनुभूयत इति सिद्धान्ते भोगरूपदुःख-समानदेशकालतयाऽसम्भववारकत्वादित्यादेरुक्तत्वात् । मणावपि दुःखाभावस्यावेद्यत्वेन पुरुषार्थत्वानुपपत्तिशङ्का-वारणाय तात्पर्यपरिशुद्ध्यनुसारेण स्वसत्ताकालीनानुभवाभावेऽपि पुरुषार्थतायाः पुत्रादियोगजन्यदुःखनिवारणा-र्थकविषशस्त्रोद्बन्धनादिप्रवृत्तिसाध्यदुःखाभावे सत्त्वप्रतिपादनपरपूर्वग्रन्थानुसारेणोत्तरत्रापि वर्तमानाऽप्यचिरमनुभूयत इत्यस्य दुःखाभावसत्ताकालीनानुभवसमर्थनपरताया एव निश्चयेनावृतत्वाच्च ।

एतत्तात्पर्यपरिशुद्ध्यनुवादरूपतत्त्वप्रदीपिकायामपि किमनुभूयमानतामात्रं विवक्षितम् उत यावद्दुःख-निवृत्तिसत्त्वम् । नाद्यः । चरमे जन्मनि योगप्रभावादनागताया अपि दुःखनिवृत्तेरनुभूयमानत्वसम्भवात् । वर्त-मानाया अप्यचिरमनुभवोपपत्तिः तथाहीत्यादिना वर्तमानेति पाठमवलम्ब्यैवोपपादनात् । तन्नयनप्रसादिन्यामपि प्राग्व्याख्यातटीकोक्तरीत्या तथैव पाठमाश्रित्य व्याख्यानाच्च । तदेवं तार्किकग्रन्थे तदनुवादरूपेण तदीयटीकासु तत्त्वप्रदीपिकाद्यद्वैतग्रन्थे सुधायां च विद्यमानं वर्तमानेति पाठमनादृत्य अत्यन्तायुक्तमवर्तमानेति पाठं परिकल्पने च वर्तमानेति पाठे आभासदूषणोद्भावनमत्यन्तायुक्तम् ।

यच्च तदीयग्रन्थे वर्तमानाप्यचिरमनुभूयत एवेति सामान्यतः पाठः प्रतीयत इत्यादि तदप्ययुक्तम् । सामान्यत इत्युक्ते हि पाठस्य विशेषाकारेणाभाव इत्युक्तम् । तत्र किं पाठे सामान्यं कश्च विशेष इति प्राज्ञा एव तं पृच्छन्तु । सामान्यदर्शनेनार्थानिर्णयादित्युक्तमप्ययुक्तम् । तावताऽर्थनिर्णयाय विशेषोपस्थापकप्रमाणा-पेक्षासिद्धावपि प्रत्यक्षाया उक्तेरेवाभावप्रतिपादनायोगेनोक्त्यङ्गीकारे च प्राचीनतत्पाठाभावोक्तेर्व्याघातप्रसङ्गात् । न च यो हि सामान्यदृष्टेनेत्येतत्स्मृतिपादीयवार्तिकोक्त्यनुसारेण शुक्लत्वादिलक्षणभ्रान्तिदृष्टाकारेण दृष्टं यज्जलं तत् पाठाद्भ्रान्त्या दृष्ट इति विवक्षितमिति वाच्यम् । तत्रारोपसामग्र्यसत्त्वेन मरुमरीचिकादौ शुक्लत्वादिधर्मारोप-सम्भवेऽपि अवर्तमानेति पाठस्यारोपे निमित्ताभावेन तत्पाठारोपायोगात् । आरोपितत्वे वा तेनार्थसिद्धेरेव वक्तव्यतया तदनिर्णयोक्त्ययोगाच्च । एतेनैव तस्मादित्युपसंहारोऽप्यनुपपन्न एव । तावता तथा पाठमाश्रित्यार्थ-

निर्णयाभावस्यैवोक्तिः स्यात् । सा च पूर्वविरुद्धैवेति । एतेनानागतावर्तमानापीति वाक्येऽवर्तमानेति नञुपश्लेषेण छेत्तव्ये वर्तमानेति पदच्छेदो भ्रान्तिमूलक इत्यपि कल्पनं निरस्तम् । चरमदुःखध्वंसस्य वर्तमानापीत्यादि मणि-टीकापरग्रन्थेषु तथा नञा पदच्छेदस्यैव प्रसरात् । वर्तमानापीति पाठाङ्गीकारस्यापि प्रसक्तेश्च । तस्मान्माना-न्तरेणेत्येतदुपपादनाय प्रकृते च मुक्तेरित्युक्तमप्ययुक्तमेव । त्वदीयपाठे पूर्वग्रन्थे त्वदुक्तरीत्या प्रकृतो यस्तदनु-कूलत्वाभावस्तस्यैवात्र वक्तव्यतया पूर्वत्रास्मद्रीत्या प्रकृतं यन्मुक्तौ तदानीं तन्नानुभूयमानत्वं तदनुकूलत्वाभाव-वर्णनायोगात् । उक्तमोक्षस्य शरीराद्यपेक्षेण ज्ञायमानत्वादित्यपि स्वोक्ताननुसन्धानमूलकम् । सकलदुःखध्वंस-रूपमोक्षस्य शरीराद्यपेक्षेण ज्ञानाङ्गीकारे मुक्तिकाले शरीरादेस्त्वया स्वीकृतं स्यात्तच्चायुक्तं त्वदुक्तविरुद्धं च । तस्माच्छरीराद्यभावे उक्तमोक्षज्ञानं न सम्भवति । किन्तु तदपेक्षेणैव ज्ञानं सम्भवतीत्येवं जायमानत्वं शरीरा-द्यपेक्षमिति प्रकृते च शरीराद्यभावे ज्ञानायोग इत्यर्थस्त्वया वाच्यस्तर्हि तथैव वक्तव्यत्वापत्त्याऽन्यथोक्तययोगः । किञ्च एवं सति पूर्वोक्तेच्छाज्ञानयोः कार्यकारणभावादिप्रतिपादनं सर्वं त्यक्तं भवति । तदुक्तमित्यस्यान्वयार्थं मुक्तत्वव्याघातादित्यनन्तरं इतिशब्दस्य प्रयोगे कार्ये तदभावायोगाच्च । जन्यज्ञानत्वेनेत्याद्यप्यसत् । एवं सर्वत्र गौरवमनुसन्दधाना ज्ञानत्वेनैव कार्यता स्वीकार्या इति ईश्वरस्यापि ज्ञानं न सिद्ध्येत् ।

वर्तमानेति पाठमङ्गीकुर्वद्भिरपि मुक्तिदशायां ज्ञानस्य बहुकालमनङ्गीकारात् किञ्चित्कालमनुभवस्य च शरीराद्यपेक्षयैव जायमानतया तदनुपपत्त्युद्भावनायोगाच्च । शरीरादिसापेक्षानुद्भवस्य मुक्तिकाले उपपादनस्य दुर्घ-टत्वमाश्रित्यैव परेणानुभूयमानत्वानुपपत्तौ शङ्कितायामनुभूयमानत्वं किञ्चिदुपपादयितुं प्रवृत्तेरत्र वाक्ये कथञ्चित्-तट्टीकाकारोक्तरीत्या अनुभवमङ्गीकृत्यैव समाधिपरत्वेन व्याख्यानप्रवृत्तेरुपपन्नत्वेऽप्यनुपपत्तिपुरस्कारेण तदीय-वाक्यार्थस्य पूर्वपक्षावसर एव निराकरणायोगात् । तथा सति यत्र यत्र मौक्तसुखाद्यभावांशे सिद्धान्तोक्तरीत्या-ऽनुपपत्तिरीत्या तत्र तत्र ग्रन्थीयपाठान्तरकल्पनादिप्रमेयान्तरप्रतिपादनपरत्वेन तद्ग्रन्थयोजना स्यादिति साधु समर्थितं सुधाकारीयं तत्समयनिराकरणं स्यात् । एवं सर्वत्रापि शङ्कामात्रं निराकर्तुं शक्यमिति तत्र पाठान्तर-कल्पना स्यादिति बहुविप्लवापातः । अत एव न च मुक्तौ ज्ञानं सम्भवतीत्यादि मण्याद्युक्तरीत्या शङ्कामुत्थाप्य तन्निवर्तकतया विनश्यदवस्थाज्ञानस्यैव तृतीयक्षणे तद्विषयत्वोपपत्तिपरतत्त्वप्रदीपिकाग्रन्थस्थवर्तमानाया अपीति वाक्यावतरणं नयनप्रसादिन्यां कृतम् । तथा वर्धमानादौ च । एवं च परकीयोपपादनानुसारेण तदर्थमङ्गीकृत्यैव सुधाग्रन्थप्रवृत्तिरिति सिद्धे तदीयवाक्यार्थे विशेषविमर्शेन पाठान्तरकल्पना निर्मूला दुरहङ्कारमूला च । अत एव तत्त्वप्रदीपिकाकृता परोक्तरीत्या दुःखाभावस्यानुभूयमानत्वानुपपत्तिमाशङ्क्य तद्रीत्यैव तदनुभूयमानत्वोपपत्तिं च पूर्वपक्षे प्रदर्श्य सिद्धान्ते योगप्रभावनियमनिराकरणादनागतदुःखध्वंसस्य साक्षात्कर्तुमशक्यत्वात् चरमदुःख-ध्वंसदशायां विज्ञानस्यापि विशेषगुणस्योच्छेदाङ्गीकारादिति दूषणमुक्तम् । तट्टीकायां च ततः साक्षात्कारविषयो दुःखध्वंस इत्यंशोऽसम्भवीत्यर्थ इति चरमेति वाक्यं व्याख्यातं च टीकाकारम्मन्येन त्वयापि परोक्तं दुःखनिवृत्ते-रनुभूयमानत्वोपपादनं तत्त्वप्रदीपिकाद्यनुसारेण स्वातन्त्र्येणैव निराकार्यम् । न त्वबद्धपाठं कल्पयित्वा । सिद्धा-न्त्यभिमतदूषणेन पाठ एव निराकार्यः । सत्ताविशिष्टानुभव आपाद्यत इति त्वत्परिष्कृतद्वितीयपक्षोत्तरत्वेन द्वितीये

तु प्रसक्त्येति वाक्यप्रवृत्तिमुपवर्ण्य वर्तमानापीति वाक्यस्यैव तस्यापि व्याख्येयत्वापाताच्च । तत्र च त्वदभिप्रेत-योजनाया विरुद्धत्वेनानुत्थानात् तत्परित्यागे च त्वयैवोत्तरवाक्याननुसारित्वं त्वद्योजनाया अङ्गीकृतं भवति । सर्वदाऽनुभूयमानत्वादित्यादिग्रन्थानुसारेण कदाचिदनुभूयमानत्वस्यैवानुभूयमानतामात्रमिति प्राग्विकल्पितपक्ष-रूपतया तद्दूषणावसरे कदाचिदनुभूयमानत्वाङ्गीकारेणैव ग्रन्थप्रवृत्तेः सिद्धतया चरमे जन्मन्यनुभूयत एवानागतेति वाक्यस्येव वर्तमानापीति वाक्यस्यापि कदाचिदनुभूयमानत्वमात्रप्रतिपादकतायां सिद्धायां तट्टीकाकारोक्तरीत्या कथञ्चिद्वर्तमानाया दुःखनिवृत्तेरनुभूयमानत्वपरत्वेनैव योजनीयत्वाच्च । अत एवैतत्पक्षेऽनुभूयमानतानिर्वाहः कठिणो भवतीत्यपरितोषान्मणिकारादिभिर्दुःखध्वंसो मोक्ष इत्यत्र दुःखपदेनैकविंशतिप्रभेदभिन्नदुःखं न गृह्यते किन्तु मुख्यदुःखमेवेति स्वीकृत्य चरममुख्यदुःखध्वंसस्य वर्तमानस्यानुभवोऽङ्गीकृतः । तदुक्तं मणौ । ज्ञानसमये मुक्ति-लक्षणस्य सत्त्वान्न ज्ञानमुक्तिविरोधीति । एवमन्यत्रापि । व्याख्यातं च रुचिदत्तेन । मुक्तिलक्षणस्योक्तस्य अशेष-विशेषगुणोच्छेदस्तु मोक्षलक्षणं न भवतीति भाव इति । तथा च तत्पक्षे मुख्यचरमदुःखनिवृत्तेरनुभवाङ्गीकारे न कश्चित् त्वत्प्रलपितो दोषः ।

यदत्रोक्तं ननु चरमदुःखानुभाव इत्यादीति चेदित्यनेन मण्युक्तरीत्याऽनुभूयमानत्वमाशङ्क्यैतावतोपान्त्य-दुःखनिवृत्तेरनुभवविषयत्वमानीतं न मुक्तेः । यतः समानाधिकरणज्ञानेत्यादि । तदपि परग्रन्थदर्शनेऽपि तदर्था-परिज्ञानमूलकम् । यतो मणिकृता मुक्तिलक्षणं पृथगेव स्वीकृत्य तदनुसारेण ज्ञानं मुक्तिविरोधि न भवतीति स्वीकृतम् । रुचिदत्तोऽपि विशेषगुणोच्छेदो मोक्षो नेत्युक्तवान् । सति चैवं दुःखनिवृत्तेरनुभवविषयत्वे काऽनुप-पत्तिः । समानाधिकरणं ज्ञानासमानकालीनध्वंस एव मुक्तिरिति त्वत्कल्पितलक्षणस्य कैश्चित्स्वीकारेऽप्यशेष-विशेषगुणोच्छेद इति वार्तिकस्थविशेषगुणपदस्य मुख्यदुःखमात्रपरतावादिभिरनङ्गीकृतत्वेन तद्वादिनः प्रति त्वदीयलाघवोपन्यासायोगाच्च । अन्यथा लाघवेन सकलगुणोच्छेद एव मोक्ष इत्यनुसृत्य समानाधिकरणसंयोगा-समानकालीनयोगध्वंस इत्यादिरूपमुक्त्यङ्गीकारापातः । तस्मात्प्रतिक्षणे गौरवदोषोद्भावनं स्वपरमलघुत्वादित्यलम् । कृतिसाध्यत्वप्रकारकेच्छाहेतुतत्प्रकारकज्ञानस्यासम्भवशङ्कादेः प्राग्वर्णनेन तदनुसारेण तज्ज्ञानस्य शरीरादिसापेक्षस्य शरीरादिदशायामेवोपपत्त्या मुक्तौ शरीरादिपरम्पराप्राप्तकारणक्रमाभावेऽपि दोषाभाव इत्येवं पूर्वोक्तमसङ्गतत्वं न विस्मर्तव्यम् । किञ्च चरमदुःखस्य नाशकं ज्ञातत्वज्ञानमेवेत्यारभ्य न च चरमदुःखादित्येतावत्पर्यन्तो वाक्य-कलापो वृथा परस्य प्रयासमावेदयति । मण्यादावेव तत्त्वज्ञानस्य चरमदुःखध्वंसं प्रति कारणत्वस्योपपादितत्वेन तदुपपादनस्येह व्यर्थत्वात् । उक्तं च मण्यादौ प्रतियोगिवत्तत्त्वज्ञानस्यापि तद्धेतुत्वादित्यादि । तथा त्वदुदाहृत-मणिवाक्ये वार्धमानादौ च द्वितीयक्षणे चरमदुःखसाक्षात्कारेणैव तन्नाशप्रतिपादनेन तत्त्वप्रदीपिकायां च विरोधि-गुणप्रादुर्भावेन तन्नाश इत्युक्त्या च द्वितीयक्षणे तद्ध्वंसस्य परकीयोक्तिलभ्यत्वे त्वदीयचर्चस्य परकीयदूषणरूप-त्वेनोपर्येव प्रवर्तनीयतया वर्तमानेति परकीयपाठदूषणाय तत्प्रवर्तनायोगात् ।

यदप्युक्तं दुःखसाक्षात्कारत्वस्य तदशक्येत्यादि । तदप्यसत् । दुःखसाक्षात्कारत्वस्य लौकिकत्वा-ङ्गीकारात् । न च निर्वचनानुपपत्तिः । दुःखजन्यत्वादेरेव निर्वचनोपपत्तेः । न च जन्यतावच्छेदकस्यातिरिक्त-

स्याभावाद्दुःखजन्यत्वादिरूपस्यैव तदवच्छेदकत्वे आत्माश्रयाद्यापत्तिरिति वाच्यम् । दुःखसाक्षात्कारत्वस्याखण्डस्यैव जन्यतावच्छेदकत्वाङ्गीकारोपपत्तेः । द्रव्यत्वस्य गुणाश्रयत्वरूपत्वेऽपि लक्ष्यलक्षणविभागनिरूपणावसरेऽखण्डस्य द्रव्यत्वस्य लक्ष्यतावच्छेदकत्वेन स्वीकारवदनुमितित्वस्य व्याप्तिविशिष्टधर्मताज्ञानजन्यत्वरूपत्वेऽपि जन्यतावच्छेदकत्ववच्च ।

यद्वा विषयतासम्बन्धेन दुःखवत्त्वमेव दुःखसाक्षात्कारत्वम् । यथा चैतत्तथा अनुमानमणिदीधितौ तद्व्याख्यानमथुरानाथीयादौ च स्पष्टम् । दुःखध्वंसस्य तत्साक्षात्कारेणेव तत्त्वज्ञानेनापि साध्यत्वाङ्गीकारात् तत्त्वज्ञानस्य दुःखध्वंसं प्रति हेतुताबोधकागमविरोधप्रसङ्गः । अत एव प्रकृते बाधकाभावेन परेणाशङ्कितयोग्यविभुविशेषगुणत्वेनेत्यादिकमपि युक्तम् । अत एव विभुसमवेतयोग्यविशेषगुणनाशत्वावच्छिन्नहेतुत्वेनावश्यक्लृप्तत्वेन स्वोत्तरोत्पन्नविशेषगुणेनान्यथासिद्ध्या तत्त्वज्ञानस्य दुःखध्वंसत्वावच्छिन्नं प्रति हेतुत्वानुपपत्तिरित्यभिधाय तथा सति तयोः कार्यकारणभावावेदकश्रुतिविरोध इत्याशङ्कापरिहाराय बाधितमर्थं वेदोऽपि न बोधयतीति न्यायेन श्रुत्या तथाविधकारणाभावप्रतिपादनासम्भवादित्यादिकमुक्तं नूतनमुक्तिवादे । किञ्च चरमदुःखात्प्रागेव तत्त्वज्ञानम् । उक्तं च मणौ । तत्त्वज्ञानात्सवासनमिथ्यामानाभावे दोषानुत्पत्तौ प्रवृत्त्यभावेऽदृष्टानुपपत्तौ जन्माभावे तादृशदुःखध्वंसो भवतीत्यादि । एवं तदुपपादनं परग्रन्थावलोकनसाध्यम्, अतो नात्र विवरणकृत्यमित्युपरम्यते तद्दूषणाभासनिराकरणात् । विश्रामादित्यपप्रयोगायोगश्च । मण्युक्तरीत्या प्रयोग इति वदन्नुन्मत्त एव । मण्यादिस्थमपि पाठमनुपपन्नतया व्याकुर्वता च युक्तिमात्रेणानुवादायोगात् । उक्तं च कौमुद्याम् । विश्राम इत्यपशब्द इति काशिकायामिति । स्पष्टं चैतत् तट्टीकायाम् । सूर्यविश्रामभूमिरित्यादेः काव्यप्रयोगस्य परिहारश्च तत्रैव कृतः । किञ्च चरमध्वंस इत्याद्यप्यसत् । योगप्रभवादित्युक्त्या प्रागलौकिकसन्निकर्षमङ्गीकृत्यानुभवमुपपाद्य वर्तमानतादशायामनुभवमुपपादयता सन्निकर्षस्याङ्गीकृतत्वेन तदभावाभिधानायोगात् । न च तदनिरूपणम् । विद्युदादिवत्तात्कालिकत्वेऽपि सन्निकर्षोपपत्तेः । अस्तु वा तत्त्वज्ञानं पूर्वमित्यादिपरोक्तस्याङ्गीकारेऽपि न विरोधः ।

यदत्रोक्तं तथापि वर्तमानस्य मोक्षस्याननुभव एवेति । तदप्यसत् । उक्तरीत्या तृतीयक्षणे वर्तमानस्य मोक्षस्य विनश्यदवस्थज्ञानेन विषयीकरणोपपत्तेः । यद्वेति प्रागुक्तटीकाकारीयपक्षस्यास्मदुक्तव्याख्यानानुसारेण सुन्दोपसुन्दन्यायेन दुःखतत्साक्षात्कारयोः द्वितीयक्षणे विनाशे सति तृतीयक्षणे विनश्यदवस्थेन विषयीकरणोपपत्तेः । अन्यत्र दृष्टत्वेऽप्युक्तप्रकारस्य परैरङ्गीकारोपपत्तेश्च । अनादेर्भावस्य निवृत्तिमन्यत्रानङ्गीकुर्वद्भिरापरमाणुश्यामतया अनादिभूताया निवृत्तिस्वीकारात् । एवमौत्सर्गिकनियमस्थले सर्वत्रापि तदङ्गीकारो बोध्यः । ज्ञानमात्रस्य त्रिक्षणावस्थायित्वेऽप्युपेक्षाज्ञानस्य चतुःक्षणावस्थायित्वाङ्गीकारोऽपि तेषां स्पष्ट एव । त्वदुदाहरिष्यमाणे नव्यपक्षे साक्षात्कारस्य स्वनाशकताया अन्यत्रादृष्टायाः कतकरजादिदृष्टान्तेन स्वीकाराच्च । अत एव तस्यावेद्यत्वेनेत्युक्तमसत् । अनुभूयमानतामात्रमिति प्रथमपक्षे यदाकदाचिदनुभूयमानत्वोपपादनायानागतत्वोपजीवनेऽपि यदाकदाचिद्वर्तमानतयाऽनुभूयमानत्वाभावेन पुरुषार्थत्वभावमाक्षिपन्तं प्रति अनागतत्वमाश्रित्य परिहारस्य सर्वथायोगात् ।

न हि लौकिकेति पक्षान्तरमप्यसत् । तत्पक्षे पुत्रादिवियोगेत्यादिना सुधाकृतोक्तैव पश्चाद्दूषणान्तरकथनाय प्रवृत्तेन किञ्चानुभूयमानतामित्यादिनाऽनुभूयमानत्वस्यैव समर्थनीयत्वेन प्रागुक्ताननुभूयमानत्वस्यैव पुनरत्र प्रतिपादनायोगात् । स्वोत्तरभाविदुःखेत्यादिविवक्षापि न विरुद्धा । दुःखपदस्य मुख्यदुःखपरत्वे चरमदुःखोत्तरं तत्साक्षात्कारेऽपि बाधकाभावेन दुःखस्यैव स्वनाशकत्वादिकल्पनायोगात् । दुःखसाक्षात्कार एव वा चरमदुःखं तस्य च स्वप्रकाशतया योगप्रभावेन वा स्वविषयकत्वमपि । तथा च तत्साक्षात्कारेणैव तन्नाश इति पक्षेऽपि प्राप्त एवेति । किमनेन कृतं स्यात् । तथा च पक्षान्तरेऽपि नानुपपत्तिः । वर्धमानादिभिस्तु योगिनः सार्वज्ञ्याद्वाविमुक्तिविषयकेन चरमदुःखसाक्षात्कारेण दुःखे नाशिते वर्तमानदुःखध्वंसविषयकसाक्षात्कारो भोगनाश्यादृष्टनाशान्नश्यतीति तस्याप्यचिरमनुभव इत्यादेरुक्तेः । तस्मात्तात्पर्यपरिशुद्धिस्थवर्तमानेति पाठस्य तदीयग्रन्थमर्यादया प्राप्तस्य युक्ततरत्वेन तद्दूषणानां च विद्वदाभासेन प्रोक्तानामलग्नकत्वेन कथञ्चित्संलग्नानां तु तत्त्वप्रदीपिकाद्यनुसारेण स्वतन्त्रतयोपर्यैव टीकाकारम्मन्येन तन्मतदूषणसुधाग्रन्थव्याख्यावसरे उदाहर्तुमुचितत्वेऽपि तद्दूषणबलेन ग्रन्थपाठस्यैवायोगप्रतिपादनायोगात् । तथात्वे परकीयप्रमेयनिराकरणपरसिद्धान्तानुसारेण सर्वत्र पाठान्तरकल्पनापाताच्च यत्तद्दोषोद्भावनेनैतत्पाठदूषणं तद्देशमात्रनिबन्धनमिति सिद्धावुक्तपाठायुक्तत्वबलेन यदवर्तमानेति पाठान्तरं परिकल्प्य तद्व्याख्याननुगुणमुत्तरविरुद्धं च केनचित्कृतम् । तदमङ्गलम् । तदेवं दुःखनिवृत्तेरनुभूयमानत्वाभावात् कथं पुरुषार्थत्वमित्यादिसुधाग्रन्थव्याख्यानाय प्रवृत्तेन मोक्षे दुःखाभावस्यानुभवाभावशङ्कोपपादनं विहाय सांसारिकदुःखनिवृत्त्यनुभवाभावेन तदिच्छायोग इत्यादि प्रतिपादनं तदपेक्षितप्रमेयप्रतिपादकतयैवानागतावर्तमानापीत्यादि वाक्ययोजनं पाठान्तरकल्पनं वर्तमानेति पाठपक्षे मोक्षीयानुभवायोगादिप्रतिपादनादिकं च कुर्वताऽसङ्गतिमतिरस्थलेखोऽज्ञानमूलक इति काशीस्थनागाचार्यपुत्रमाधवाचार्यचरित्रप्रकारदूषणगणं सुज्ञा एव जानन्त्वित्यलमिति गुरुसेवारूपं मङ्गलम् ॥

वर्तमानापीति पाठविचारो यत्नतः कृतः ।
तेन प्रीतोऽस्तु गुरुगः श्रीहरिः सर्वमङ्गलम् ॥ १ ॥

तथा च अपरश्लोकद्वयमेवं पठनीयम्—

नागाचार्यतनूजेन माधवेन कुयुक्तिभिः ।
सुधास्थवर्तमानेति पाठे बाधो निरूपितः ॥ १ ॥

उक्तरीत्या बाधबाधे निर्बाधः स सुसिद्ध्यति ।
विद्वन्मनोगतत्वेन धूर्तधैर्यं वृथेति च ॥ २ ॥

**स०व्र०**— ननु दुःखाभावस्य पुरुषार्थत्वं अननुभूयमानत्वात् अनुभवे च नाशेषविशेषगुणव्यवच्छेदः ज्ञानस्या(नष्ट)नुष्ठितत्वादित्याशङ्कते **भवति दुःखहानिरिति** । तत्र दुःखनिवृत्तेरनुभूयमानत्वमात्रं पुरुषार्थत्वोप-

योगि किंवा यावद्दुःखनिवृत्तेः सत्त्वं तावत्कालमनुभूयमानत्वमिति विकल्प्याद्ये आपादकासिद्धिमाह **चरमे जन्मनीति** ॥ **समाधिभावात्** भूतभविष्यद्वर्तमानवेदनादित्यर्थः । **वर्तमानाप्यचिरमनुभूयत एवेति** । अत्र वदन्ति। कथं वर्तमानायाः सकलदुःखनिवृत्तेरनुभवसम्भवः । न च सुप्तौ विद्यमानस्यापि देहेन्द्रियस्य मुक्तिनिष्ठश्रोत्रमनसोरिव दुःखाजनकत्वात् एकविंशतिदुःखाभावस्योत्तरकालपरामर्शादनुमितोऽनुभव इति वाच्यम् । ज्ञानस्यैवोपरमेणासम्भवात् । अन्यथा दुःखस्यापि तदोत्पत्तिप्रसङ्गात् । तस्मिन्नेवात्मनि तद्देहावच्छेदेन तैरिन्द्रियैरुत्तरकाले दुःखोत्पादने तन्निवृत्तेः दुःखप्रागभावासमानाधिकरणत्वरूपस्यात्यन्तिकत्वस्याभावाच्च । अथ चरमज्ञानेन सकलदुःखात्यन्तिकनिवृत्त्यनुभवः । चरमज्ञानस्य तत्करणदेहेन्द्रियादेश्च दुःखस्य सत्त्वेन तदनुभवसम्भवात् । नापि दुःखशब्दार्थमुख्यदुःखमात्रविषयत्वात् चरमज्ञानेन मुख्यदुःखनिवृत्त्यनुभव इति वाच्यम् । शरीरापरित्यागे दुःखोत्पत्तेरवर्जनीयत्वेनात्यन्तिकमुख्यनिवृत्तेरयोगात् । अनन्तरं च देहाद्यभावादेवाननुभवत्वात् । एकविंशतिदुःखात्यन्तिकनिवृत्तेरेव मोक्षत्वेनोक्तत्वाच्चेति । अत्र ब्रूमः । योगिनः सकलविषयकेण चरमज्ञानेन युगपद्दुःखाभावौ साक्षात्कृत्य आश्रयसत्त्वेन तन्नाशप्रयुक्तदुःखनाशासम्भवेऽपि सुखेनैव प्रादुर्भूतेन विरोधिना गुणेन दुःखे निवृत्ते च ज्ञाने च विनश्यदवस्थापन्ने सति वर्तमानाया वर्तमानसामीप्यादेव क्षणव्यवहिताया अप्यशेषदुःखनिवृत्तेर्योगसामर्थ्येनानुभवोपपत्तेरिति । यत्तूक्तं सुखान्तमुक्तिपक्षे एतत्सम्भवतीति । तन्न । तत्र मानाभावात् । अत एवोक्तं तत्त्वप्रदीपिकायाम् । वर्तमानाया अप्यचिरमनुभवोपपत्तिः । तथा हि योगिनश्चरमज्ञानेन सकलविषयकेण दुःखतदभावौ युगपत्साक्षात्कृतौ तेनैव विरोधिगुणप्रादुर्भावेन निवृत्ते दुःखेऽपि विनश्यदवस्थ्यज्ञाने च वर्तमानाऽपि दुःखनिवृत्तिरनुभूतेति । नयनप्रसादिन्यामपि । ननु कथं वर्तमानायाः सकलदुःखनिवृत्तेरनुभवसम्भवः । येन हि चरमज्ञानेन दुःखनिवृत्तिरनुभूयते तदपि तावदेकं दुःखम् । न च तत्समये तस्य निवृत्तिरस्ति । नापि तन्निवृत्तिसमये तदनुभवान्तरमस्ति चरमत्वभङ्गापातादिति ॥ **तत्र वर्तमानाया अपीति** । तस्यैवोपपादकं **तथा हीति** । विनश्यदवस्थेत्यत्र हृदयम् । नित्यद्रव्यत्वादाश्रयविनाशाभावेन विरोधिगुणप्रादुर्भावेन पूर्वगुणविनाशादुक्तं विरोधिगुणप्रादुर्भावेन नश्यतीति द्रष्टव्यम् ॥ **द्वितीये त्विति** । यावद्दुःखनिवृत्तेः सत्त्वं तावत्कालमनुभूयमानत्वमिति द्वितीय इत्यर्थः ॥ **प्रसक्तेति** । यद्यपि कण्टकादिनिवृत्तिस्तदानीमनुभूयते तथापि न यावत्सत्त्वं तदनुभवः । तथा च सर्वदाननुभूयमानाया अपि यथा सर्वथाऽप्यननुभूयमानाया अपि तदस्त्विति भावः । कण्टकादिनिवृत्तेरपि सर्वदाऽननुभूयमानत्वादेव पुरुषार्थत्वं तत्राह **तथात्वे चेति** । स्वसत्ताकाले अनुभूयमानत्वं विवक्षितं कण्टकादिनिवृत्तेश्च स्वसत्ताकालेऽनुभूयमानत्वात् पुरुषार्थत्वम् । न च विषयान्तरसञ्चाराभावप्रसङ्गः । तस्याः कादाचित्कत्वेन तदुत्तरक्षणे विषयान्तरसञ्चारोपपत्तेरित्यत आह **निवृत्तेरिति** ।

**॥ इति मोक्षस्य सुखरहितत्वेऽपि दुःखनिवृत्तिरूपत्वात् पुरुषार्थत्वसमर्थनम् ॥**

* * *

॥ अथ मोक्षे सुखराहित्यवादः श्रुतिविरुद्धः ॥

८० **सु०— निराकरोति नैतदिति ।**

## अनु०— नैतदप्यत्र शोभनं

**अत्र मुक्तौ । एतत् सुखराहित्यमतम् अपि न शोभनम् ।** कुत इत्यत आह **श्रुतय इति ।**

## श्रुतयो यतः ।
## महानन्दं च भोगं च नियमेन वदन्ति हि ।

अत्रेति वर्तते । **भोगं** तदनुभवम् । **नियमेन** अविगानेन । **हीति** श्रुतीनां प्रसिद्धतामाचष्टे । ताश्चोदाहरिष्यन्ते ।

**परि०— उदाहरिष्यन्त इति** । 'पुनरानन्दपूर्वकान् । धर्मानाहाप्यनुच्छिन्नानि'त्यादाविति भावः ।

**कं०रा०—** 'तद्वै त्वं प्राणोऽभवः महाभोग' इत्यादौ भोगशब्दस्यानन्दे प्रयुक्तत्वात् प्रकृतेऽप्यानन्दपरत्वं भोगशब्दस्य प्रतीयते । तच्चायुक्तम् । पुनरुक्तिप्रसङ्गादित्यतो व्याचष्टे **भोगं तदनुभवमिति ।**

**शे०चं०— अत्रेति** । मुक्तेरेव प्रकृतत्वाद्योग्यत्वाच्च अत्रेत्यनेन तस्या एव परामर्श इति भावेनाह **मुक्ताविति** । मुक्तावानन्दराहित्यमतस्य श्रुतिविरुद्धतया श्रुतीनां मुक्तानन्दादिप्रतिपादकत्व एव सम्भवात् तल्लाभाय अत्रेत्यस्यानुवृत्तिमाह **अत्रेति वर्तत इति** । भुज्यत इति भोग इति भोगशब्दस्य कर्मसाधनत्वे सुखरूपत्वात् महानन्दशब्देन पौनरुक्त्यम् । श्रुतीनां मुक्तौ ज्ञानप्रतिपादकत्वालाभेन मुक्तौ तत्प्रतीतिराहित्यमतस्य श्रुतिविरोधालाभाच्चेत्यतो भोगशब्दस्य भावसाधनतया भोजनार्थतामाश्रित्य तत्राप्यभ्यवहारादिरूपभोगस्यानन्दविषयस्यायोगात् 'भोगोऽनुभव' इति *गीताभाष्यं* मनसि निधाय तत्तात्पर्यमाह **तदनुभवमिति** । स्वीयतया तत्साक्षात्कारमित्यर्थः । देवदत्तादीनां यज्ञदत्तादिगतसुखविषयकपरोक्षानुभवस्य भोगत्ववारणाय साक्षात्कारग्रहणम् । ईश्वरस्य देवदत्तादिगतसुखसाक्षात्कारस्य भोगत्ववारणाय स्वीयतयेत्युक्तम् । शब्दजन्यस्वकीयसुखपरोक्षानुभवस्य तद्वारणाय साक्षात्कारोपादानमित्यवधेयम् । तत्तात्पर्यमाह **तदनुभवमिति** ॥ **उदाहरिष्यन्त इति** । 'सोऽनानन्दाद्विमुक्तः सन्नानन्दीभवति स्फुटमि'त्यादिनेति शेषः ।

**वा०र०— गीताभाष्यमिति** । त्रयोदशाध्यायस्थ-'पुरुषः सुखदुःखानां भोक्तृत्व' इत्येतद्गीतास्थ-भोगपदव्याख्यानरूपमित्यर्थः । **साक्षात्कारोपादानमिति** । तत्पदोपादानमित्यर्थः ।

**स०व्र०— ताश्चोदाहरिष्यन्त इति** । 'सोऽनानन्दाद्विमुक्तः सन्नि'त्यादिनेति शेषः ।

**॥ इति मोक्षे सुखराहित्यवादः श्रुतिविरुद्धः ॥**
**॥ इति साङ्ख्यवैशेषिकाभिमतमोक्षस्वरूपनिराकरणम् ॥**

* * *

**॥ अथ 'प्रियास्पृष्टि'श्रुतिविचारः ॥**
**॥ अथ 'प्रियास्पृष्टि'श्रुतेः प्राकृतसुखाभावे तात्पर्यम् ॥**

८१ **सु०— ननु 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत' इति मुक्तस्य दुःखवत् सुखस्यापि हानिः श्रूयते । तथा 'न प्रेत्य संज्ञाऽस्ती'ति ज्ञानाभावश्च । तत्कथमेतदित्यतः सुखास्पृष्टिश्रुतिं तावद्व्याचष्टे प्राकृतेति ।**

## अनु०— प्राकृतप्रियहानिस्तु प्रियास्पृष्टिरितीर्यते ॥

**अस्यां श्रुतौ प्राकृतं यदन्तःकरणपरिणतिरूपं प्रियं तद्धानिरेव प्रियास्पृष्टिरितिशब्देन प्रतिपाद्यते । न तु सर्वथा सुखाभावः ।**

**कं०रा०—** प्राकृतप्रियेत्यत्र प्रियशब्दितसुखस्य प्राकृतशब्देन प्रकृतिविकारत्वं प्रतीयते । तच्चायुक्तम् । सुखस्य प्रकृतिपरिणामत्वाभावादित्यतो व्याचष्टे **प्राकृतं यदन्तःकरणपरिणतिरूपमिति** ।

**शे०चं०—** अपेक्षितं पूरयन् मूले प्राकृतत्वस्य प्रियहानिविशेषणत्वभ्रान्तिं परिहरंस्तुशब्दस्यावधारणार्थतया सार्थक्यं तद्व्यावर्त्यकथनेनोपदर्शयन्नेव व्याचष्टे **अस्यामिति** ।

**॥ इति 'प्रियास्पृष्टि'श्रुतेः प्राकृतसुखाभावे तात्पर्यम् ॥**

* * *

॥ अथ 'अप्रियास्पृष्टिः' न विभागेन व्याख्यातव्या ॥

८२ सु०— एवं तर्ह्यप्रियास्पृष्टिरप्येवं विभागेन व्याख्यातव्या । विशेषाभावात् । तथा च मोक्षे दुःखसद्भाव(प्राप्तिरि)प्रसक्तिरित्यत आह अप्रियमिति ।

अनु०— अप्रियं प्रतिकूलं तदविशेषेण शब्दितम् ।

यस्मात् सकलमप्यप्रियं (दुःखं) प्रतिकूलं मुमुक्षोरनपेक्षितम् । तत् तस्मात् अप्रियम् अत्र अविशेषेण शब्दितम् ।

एतदुक्तं भवति । सर्वात्मनाऽनिष्टनिवृत्तिर्मोक्ष इति तावदविवादं सर्ववादिनाम् । दुःखं तु यादृशतादृशमप्यनिष्टमेव । अतो न तद्विभागेन व्याख्यातुं युक्तमिति ।

यद्वा । येन न्यायेन प्रिये विभागः क्रियते तदविशेषश्चेदप्रिये स्यात् तदा तदपि विभागेन व्याख्यातव्यं भवेत् । न चैवम् । सामस्त्येन प्रियहानिरनिष्टा । अनिष्टप्राप्तौ च मोक्षस्यापुरुषार्थत्वं स्यादित्यतो हि प्रिये विभागः कल्प्यते । तथा च वक्ष्यामः । न च सामस्त्येन दुःखहानिरनिष्टा । सर्वस्यापि दुःखस्यानिष्टत्वेन तद्धानेरिष्टत्वात् । तर्हि सर्वस्यापि सुखस्येष्टत्वात् प्राकृतसुखहानिरपि नाङ्गीकरणीया इति चेन्न । तस्य दुःखानुषक्तत्वेन विषसंपृक्तमधुवदनिष्टपक्षनिक्षेपादिति भावः ।

परि०— विभागेनेति । प्राकृतदुःखं नास्त्यप्राकृतं त्वस्तीति विभागेनेत्यर्थः ॥ विशेषेति । वैषम्येण पदद्वयव्याख्याने विशेषहेत्वभावादित्यर्थः । 'विशेषाभावात् विभागेन व्याख्यातव्ये'त्यस्य किमनेनोत्तरमुक्तमित्यत आह एतदुक्तमिति । अविभागेन व्याख्याने मुक्तेः पुमर्थत्वयुक्तिरयुक्ता भवति । ननु सुखदुःखयोरविनाभावाद् दुःखाभावार्थं सामस्त्येन सुखहानिः कथमनिष्टेवेत्यत आह तथा च वक्ष्याम इति । 'आत्मप्रियहानाय को यतेत च बुद्धिमानि'त्यत्रेति भावः ।

यादु०— विशेषाभावादिति । प्रियाप्रिये इति सामान्यतः समानपदोपात्तयोः प्रियाप्रियास्पृष्ट्योः प्रियास्पृष्टिरेव विभागेन व्याख्यातव्येत्यत्र विशेषकारणाभावादित्यर्थः । ननु प्रियस्याप्रियसम्पृक्ततया विषयसम्पृक्तमधुवदनिष्टत्वेन सामस्त्येन हानिरनिष्टैवेत्यत आह तथा वक्ष्याम इति । 'आत्मप्रियहानाय को यतेत च बुद्धिमानि'त्यत्रेति शेषः ।

**वा०र०**— **गीताभाष्यमिति** । त्रयोदशाध्यायस्थ-'पुरुषः सुखदुःखानां भोक्तृत्व' इत्येतद्गीतास्थ-भोगपदव्याख्यानरूपमित्यर्थः । **साक्षात्कारोपादानमिति** । तत्पदोपादानमित्यर्थः ।

**स०व्र०**— **ताश्चोदाहरिष्यन्त इति** । 'सोऽनानन्दाद्विमुक्तः सन्नि'त्यादिनेति शेषः ।

**॥ इति मोक्षे सुखराहित्यवादः श्रुतिविरुद्धः ॥**
**॥ इति साङ्ख्यवैशेषिकाभिमतमोक्षस्वरूपनिराकरणम् ॥**

* * *

**॥ अथ 'प्रियास्पृष्टि' श्रुतिविचारः ॥**
**॥ अथ 'प्रियास्पृष्टि' श्रुतेः प्राकृतसुखाभावे तात्पर्यम् ॥**

८१ **सु०**— ननु 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत' इति मुक्तस्य दुःखवत् सुखस्यापि हानिः श्रूयते । तथा 'न प्रेत्य संज्ञाऽस्ती'ति ज्ञानाभावश्च । तत्कथमेतदित्यतः सुखास्पृष्टिश्रुतिं तावद्व्याचष्टे **प्राकृतेति** ।

**अनु०**— प्राकृतप्रियहानिस्तु प्रियास्पृष्टिरितीर्यते ॥

**अस्यां श्रुतौ प्राकृतं यदन्तःकरणपरिणतिरूपं प्रियं तद्धानिरेव प्रियास्पृष्टिरितिशब्देन प्रतिपाद्यते । न तु सर्वथा सुखाभावः ।**

**कं०रा०**— प्राकृतप्रियेत्यत्र प्रियशब्दितसुखस्य प्राकृतशब्देन प्रकृतिविकारत्वं प्रतीयते । तच्चायुक्तम् । सुखस्य प्रकृतिपरिणामत्वाभावादित्यतो व्याचष्टे **प्राकृतं यदन्तःकरणपरिणतिरूपमिति** ।

**शे०चं०**— अपेक्षितं पूरयन् मूले प्राकृतत्वस्य प्रियहानिविशेषणत्वभ्रान्तिं परिहरंस्तुशब्दस्यावधारणार्थतया सार्थक्यं तद्व्यावर्त्यकथनेनोपदर्शयन्नेव व्याचष्टे **अस्यामिति** ।

**॥ इति 'प्रियास्पृष्टि' श्रुतेः प्राकृतसुखाभावे तात्पर्यम् ॥**

* * *

॥ अथ 'अप्रियास्पृष्टिः' न विभागेन व्याख्यातव्या ॥

८२ **सु०—** एवं तर्ह्यप्रियास्पृष्टिरप्येवं विभागेन व्याख्यातव्या । **विशेषाभावात्** । तथा च मोक्षे दुःखसद्भाव(प्राप्तिरि)प्रसक्तिरित्यत आह **अप्रियमिति** ।

## अनु०— अप्रियं प्रतिकूलं तदविशेषेण शब्दितम् ।

यस्मात् सकलमप्यप्रियं (दुःखं) प्रतिकूलं मुमुक्षोरनपेक्षितम् । **तत्** तस्मात् **अप्रियम्** अत्र **अविशेषेण शब्दितम्** ।

एतदुक्तं भवति । सर्वात्मनाऽनिष्टनिवृत्तिर्मोक्ष इति तावदविवादं सर्ववादिनाम् । दुःखं तु यादृशतादृशमप्यनिष्टमेव । अतो न तद्विभागेन व्याख्यातुं युक्तमिति ।

यद्वा । येन न्यायेन प्रिये विभागः क्रियते तदविशेषश्चेदप्रिये स्यात् तदा तदपि विभागेन व्याख्यातव्यं भवेत् । न चैवम् । सामस्त्येन प्रियहानिरनिष्टा । अनिष्टप्राप्तौ च मोक्षस्यापुरुषार्थत्वं स्यादित्यतो हि प्रिये विभागः कल्प्यते । तथा च वक्ष्यामः । न च सामस्त्येन दुःखहानिरनिष्टा । सर्वस्यापि दुःखस्यानिष्टत्वेन तद्धानेरिष्टत्वात् । तर्हि सर्वस्यापि सुखस्येष्टत्वात् प्राकृतसुखहानिरपि नाङ्गीकरणीया इति चेन्न । तस्य दुःखानुषक्तत्वेन विषसंपृक्तमधुवदनिष्टपक्षनिक्षेपादिति भावः ।

**परि०—** **विभागेनेति** । प्राकृतदुःखं नास्त्यप्राकृतं त्वस्तीति विभागेनेत्यर्थः ॥ **विशेषेति** । वैषम्येण पदद्वयव्याख्याने विशेषहेत्वभावादित्यर्थः । 'विशेषाभावात् विभागेन व्याख्यातव्ये'त्यस्य किमनेनोत्तरमुक्तमित्यत आह **एतदुक्तमिति** । अविभागेन व्याख्याने मुक्तेः पुमर्थत्वयुक्तिरयुक्ता भवति । ननु सुखदुःखयोरविनाभावाद् दुःखाभावार्थं सामस्त्येन सुखहानिः कथमनिष्टैवेत्यत आह **तथा च वक्ष्याम इति** । 'आत्मप्रियहानाय को यतेत च बुद्धिमानि'त्यत्रेति भावः ।

**यादु०—** **विशेषाभावादिति** । प्रियाप्रिये इति सामान्यतः समानपदोपात्तयोः प्रियाप्रियास्पृष्ट्योः प्रियास्पृष्टिरेव विभागेन व्याख्यातव्येत्यत्र विशेषकारणाभावादित्यर्थः । ननु प्रियस्याप्रियसम्पृक्ततया विषयसम्पृक्तमधुवदनिष्टत्वेन सामस्त्येन हानिरनिष्टैवेत्यत आह **तथा वक्ष्याम इति** । 'आत्मप्रियहानाय को यतेत च बुद्धिमानि'त्यत्रेति शेषः ।

**वं०प०— विभागेनेति** । प्राकृतं दुःखं नास्त्यप्राकृतं दुःखमस्तीति विभागेनेत्यर्थः ।

**कं०रा०— न चैवमिति** । प्रिये विभागकरणे यो न्यायस्तदविशेष्यो प्रिये नैवेत्यर्थः । तदेवोपपादयति **सामस्त्येनेत्यादिना** । **तद्धानेरिति** । सर्वदुःखहानेरित्यर्थः । शङ्कते **तर्हि सर्वस्यापीति** ।

**शे०चं०—** प्राप्तिरित्यतःपरं ततश्च मोक्षत्वव्याघात इति शेषः । मूले तदिति श्रवणाद्यदित्यस्य लाभं, उक्ताक्षेपपरिहाराय सकलमित्यस्याध्याहारं, तदित्यस्यावृत्तिं चाभिप्रेत्य व्याचष्टे **यस्मादिति** । सकलस्यापि दुःखस्य मुमुक्षोरनपेक्षितत्वेऽप्यस्त्वप्रियास्पृष्टिश्रुतेर्विभागेन व्याख्यानमित्यप्रयोजकत्वशङ्कां सर्वात्मनाऽनिष्ट-निवृत्तिरूपमोक्षत्वानुपपत्तिलक्षणबाधककथनेन परिहरन्नेव मूलोक्तहेतुमद्भावमुपदर्शयति **एतदुक्तं भवतीति** । प्रियास्पृष्टिश्रुतिवदप्रियास्पृष्टिश्रुतिरपि विभागेन व्याख्यातव्येति शङ्कितुः प्रधानप्रमेयनिरासपरतया वाक्यतात्पर्य-मभिधाय तद्धेतुतया परोपन्यस्तविशेषाभावनिरासपरतयाऽपि तत्तात्पर्यमाह **यद्वेति** ॥ **वक्ष्याम इति** । 'आत्म-प्रियहानाय को यतेत च बुद्धिमानि'त्यादिना समस्तप्रियहानेरनिष्टत्वं वक्ष्याम इत्यर्थः ।

**वा०र०— सतो जीवस्येति** । सज्जीवस्येत्यर्थः । सतो मुक्तियोग्यस्य जीवस्येत्युत्तरमूलवाक्यात् । सज्जीवस्यापीति वक्ष्यमाणवाक्याच्च । **को यतेत चेति** । च शब्द इति पाठः ।

**स०व्र०— तथा चेति** । सामस्त्येन 'प्रियहानेरनिष्टतः' इत्यादिनेति शेषः ।

**॥ इति 'अप्रियास्पृष्टिः' न विभागेन व्याख्यातव्या ॥**

* * *

**॥ अथ मुक्तियोग्यजीवस्य अप्राकृतदुःखाङ्गीकारः अप्रामाणिकः ॥**

**८३ सु०— इतश्च नाप्रियं प्राकृतत्वेन विशेषणीयमित्याह नास्तीति ।**

## अनु०— नास्ति ह्यप्राकृतं दुःखं सतो जीवस्य कुत्रचित् ।

**अप्राकृते दुःखे सति तद्व्यावृत्तये प्राकृतमिति विशेषणीयं स्यात् । सतो मुक्ति-योग्यस्य । जीवस्य अप्राकृतं दुःखं नास्ति प्रमाणाभावात् । अतो व्यर्थं विशेषणमिति । कुत्रचित् श्रुतौ स्मृतौ चोक्तमिति शेषः ।**

**शे०चं०—** सतो जीवस्याप्राकृतदुःखाभावेऽप्यस्तु विभागेनाप्रियास्पृष्टिश्रुतेर्व्याख्येयत्वमित्यप्रयो-जकत्वशङ्कां बाधकोक्त्या परिहरन्नेव वाक्यं योजयति **अप्राकृत इति** । कुतो नास्तीत्यत उक्तं मूले कुत्रचिदितीति

योजनामभिप्रेत्य तत्तात्पर्यमाह **प्रमाणाभावादिति** । प्रमाणाभावस्य भाष्यारूढतामुपदर्शयितुमपेक्षितपूरणेन कुत्रचिदिति व्याचष्टे **कुत्रचिच्छ्रुतावित्यादि** ।

**।। इति मुक्तियोग्यजीवस्य अप्राकृतदुःखाङ्गीकारः अप्रामाणिकः ।।**

* * *

**।। अथ मोक्षसुखमप्राकृतमेव ।।**

८४ **सु०**— एवं तर्हि अप्राकृतस्य सुखस्यापि अप्रमितत्वात् तत्रापि विशेषणप्रक्षेपेण व्याख्यानमयुक्तमित्यत आह **प्रियमिति** ।

## अनु०— प्रियं स्वरूपमेवास्य बलानन्दादिवाक्यतः ।

'बलमानन्द ओजश्च सहो ज्ञानमनाकुलम् । स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्विभोः' इति श्रुतिवाक्यादस्य सतो जीवस्य **प्रियं स्वरूपमेव** इत्यवगम्यते । स्वरूपं च अप्राकृतम् । अतस्तद्व्यवच्छेदाय विशेषणप्रक्षेपेण व्याख्यानं युज्यते ।

(एतेन) अनेन सुखस्योत्पत्तिमत्त्वे यो दोषोऽभिहितः सोऽनङ्गीकारपरास्तो वेदितव्यः । स्वरूपत्वेनानादित्वस्योक्तत्वात् । यदत्रोक्तं तदप्यसत् । आवृताः सन्तो व्यज्यन्त इति श्रुतत्वात् । आवरणं च मायाऽविद्यादिसमाख्याता प्रकृतिरेव । न च विशदश्रुतिसिद्धेऽर्थे काचिदनुपपत्तिः । ज्ञानस्य स्वरूपत्वेनानादित्वेऽप्यविद्यया विषयविषयिभावः प्रतिबध्यते । न चोक्तदोषः । आत्मस्वरूपादौ तस्याप्रतिबद्धत्वात् ।

**परि०**— **यो दोष इति** । शरीरेन्द्रियादिरूपकारणाभावाख्यदोष इत्यर्थः ।। **यदत्रोक्तमिति** । न तावन्मुक्तस्य सुखमनादीत्युपपद्यते संसारेऽपि तत्प्रतिभासप्रसङ्गादित्यादीत्यर्थः । तदनिरूपणाच्चेत्युक्तदोषं निराह **आवरणं चेति** । मूर्तत्वाभावेनेत्युक्तदोषं निराह **न च विशदेति** । किमावरणकृत्यमित्युक्तं पराचष्टे **ज्ञानस्येति** ।। **न चोक्तदोष इति** । निर्विषयाया इत्युक्तदोष इत्यर्थः ।

**यादु०**— **यो दोष इति** । शरीरादिलक्षणकारणाभावरूप इत्यर्थः ।। **यदत्रोक्तमिति** । संसारेऽपि तत्प्रतीतिप्रसङ्ग इति यदुक्तमित्यर्थः । मूर्तत्वाभावेनावरणानुपपत्तेरित्युक्तानुपपत्तिं परिहरति **न च विशदेति** ।

किमावरणकृत्यमित्युक्तदोषं परिहरति **ज्ञानस्येति** । निर्विषयायाः प्रतीतेरनुपपत्तेरित्युक्तदोषमाशङ्क्य परिहरति **न चोक्तेति** ।

**वं०प०— यो दोषोऽभिहित इति** । शरीरे सति तदाश्रयेन्द्रियसद्भाव इत्यादिनेत्यर्थः । **अनङ्गी-कारेति** । सुखस्योत्पत्त्यनङ्गीकारेत्यर्थः ॥ **स्वरूपत्वेनेति** । सुखस्येति वर्तते ॥ **यदत्रोक्तमिति** । न ताव-न्मुक्तस्य सुखमनादीत्युपपद्यते, संसारेऽपि तत्प्रतिभासप्रसङ्गादिति यदुक्तमित्यर्थः । तदनिरूपणादित्युक्तदोषं परिहरति **आवरणं चेति** । मूर्तत्वाभावेन आवरणानुपपत्तिरित्युक्तमिति चेत् तत्राह **न च विशदश्रुतीति** । स्पष्टश्रुतिसिद्धेत्यर्थ **इत्यर्थः** । सुखमिव तत्प्रतीतिरप्यनादिश्चेत्किमावरणकृत्यमित्युक्तं दोषं परिहरति **ज्ञानस्येति** ॥ **उक्तदोष इति** । **निर्विषयाया**ः प्रतीतेरनुपपत्तिरित्युक्तदोष इत्यर्थः ॥ **आत्मस्वरूपादाविति** । सुखविषयी-करणस्य प्रतिबद्धत्वेऽपि आत्मस्वरूपविषये तस्य साक्षिरूपज्ञानस्याप्रतिबद्धत्वेन सविषयकत्वोपपत्त्या न निर्वि-षयत्वमिति भावः ।

**कं०रा०— एतेनेति** । मुक्तसुखस्योत्पत्तिमत्त्वे सुखोत्पादकानां शरीरादीनामभावात् तदुत्पत्तिः न सम्भवतीति यो दोषोऽभिहितः स सुखस्य स्वरूपत्वेनानादित्वस्य समर्थिततयोत्पत्तिमत्त्वानङ्गीकारेण परास्तो वेदितव्य इत्यर्थः ॥ **यदत्रोक्तमिति** । सुखस्य स्वरूपत्वेनानादित्वे संसारेऽपि तत्प्रतिभासप्रसङ्गः । तदा तत्प्रतिभासाङ्गीकारे च श्रवणादिसाधनानुष्ठानवैयर्थ्यमिति सुखस्यानादित्वे यद्दूषणमुक्तं तदस्य सद्बलानन्दादयः संसारदशायामावृताः सन्तो मुक्तिदशायां व्यज्यन्त इत्यस्थ-'बलमानन्द ओजश्चे'त्यादिश्रुतिसिद्धत्वादित्यर्थः । न च उक्तनिर्विषयायाः प्रतीतेरनुपपत्तिरिति दोषः । न च आत्मस्वरूपादौ विषयविषयिभावस्य अप्रतिबद्धत्वेन निर्विषयत्वस्यैव अभावादित्यर्थः । आदिशब्देन अव्याकृताकाशकालादिकं गृह्यते ।

**शे०चं०—** भाष्यस्यार्थतः श्रुत्यनुवादकतामाद्यादिभ्य उपसङ्ख्यानात् पञ्चम्यन्तात्तसिं च वाक्यस्य ज्ञापकहेतुतां चाभिप्रेत्य योजयति **बलमित्यादि** । उदाहृतश्रुत्यनुसारेण स्वरूपसुखस्य प्रमिततालाभेऽप्यप्राकृत-सुखस्य तदलाभान्नोक्तशङ्कापरिहार इत्यत आह **स्वरूपं चेति** । 'प्रियं स्वरूपमेवे'ति भाष्यं न केवलं प्रिया-स्पृष्टिश्रुतेर्विशेषेण व्याख्यानस्यैवोपपादकं किन्तु मुक्तौ सुखाङ्गीकारे परोपन्यस्तबाधकनिरासपरं चेत्यभिप्रेत्य तन्निरासेऽप्यतिदिशति **एतेनेति** ॥ **यो दोष इति** । शरीरादिराहित्यलक्षण इत्यर्थः ॥ **यदत्रोक्तमिति** । मुक्त-सुखस्यानादित्वे संसारेऽपि तत्प्रतिभासप्रसङ्गादिति यदुक्तमित्यर्थः । तदनिरूपणाच्चेत्युक्तं निराकरोति **आवरणं चेति** । मूर्तत्वाभावेनावरणानुपपत्तेरित्युक्तदोषमाशङ्क्य परिहरति **न चेति** । किमावरणकृत्यमित्युक्तामपि तां परिहरति **ज्ञानस्येति** । निर्विषयायाः प्रतीतेरनुपपत्तेरित्युक्तदोषमाशङ्क्य परिहरति **न चोक्तेति** ।

**स०व्र०— यदत्रोक्तमिति** । मुक्तानां सुखस्य अनादित्वे संसारित्वेऽपि तत्प्रतिभासप्रसङ्गादिति यदुक्तमित्यर्थः । **आवरणनिवृत्तेरनिरूपणाच्च** इत्युक्तं दूषयति **आवरणं चेति** । सुखवत्तत्प्रतीतेरप्यनादित्वे

किमावरणकृत्यं तत्राह **ज्ञानस्येति** । अविद्यावरणेन विषयविषयिभावः प्रतिबध्यत इत्यङ्गीकारे निर्विषयायाः प्रतीतेरनुपपत्तिरित्युक्तदोषो नेत्यर्थः ।

**।। इति मोक्षसुखमप्राकृतमेव ।।**

* * *

**।। अथ सकलविधदुःखाभाव एव श्रुत्यभिप्रेतः ।।**

८५ **सु०**— उक्तमर्थं सङ्क्षिप्याह **हेयत्वादिति** ।

**अनु०— हेयत्वादप्रियस्यैव प्रियहानेरनिष्टतः ।**
**न समस्तप्रियाभावो मोक्षे प्रोक्ते तु युज्यते ।।**

**अप्रियस्य दुःखस्य हेयत्वादेवेति एवशब्देन सर्वथेति सूचयति । 'अशरीरं वाव सन्तम्' इत्यस्यां श्रुतौ प्रोक्ते मोक्षे समस्तप्रियाभावो न व्याख्यातुं युज्यते । कुतः प्रियहानेरनिष्टत्वतः । किन्तु प्राकृतत्वविशेषणप्रक्षेपेणेति तुशब्दः । अप्रियहानं त्वविशेषेण व्याख्येयमित्युपस्कर्तव्यम् । तत्र हेतुरप्रियस्य सर्वथा हेयत्वादिति । उपलक्षणं चैतत् । सतो जीवस्य अप्राकृतदुःखाभावाच्चेत्यपि द्रष्टव्यम् ।**

**कं०रा०**— अनिष्टत इत्यनिष्टपदं भावप्रधानमित्याह **अनिष्टत्वत इति** ।

**शे०चं०**— **सङ्क्षिप्येति** । ततश्च न पौनरुक्त्यमिति भावः । अप्रियस्येव प्राकृतप्रियस्यापि हेयत्वादप्रियस्यैवेत्येवशब्दस्य वैयर्थ्यं समस्तदुःखस्याप्रियत्वालाभश्चेत्यतो भिन्नक्रमतां दुःखस्य सामस्त्यलाभार्थतया तत्सार्थक्यं चोपदर्शयन्नेव प्रोक्त इत्यत्र अपेक्षितं पूरयन् वाक्यं योजयति **अप्रियस्येति** ।। **तुशब्द इति** । अनेन तुशब्दो विशेषार्थ इत्युक्तं भवति । अप्रियस्य सर्वथा हेयतायाः, न प्रोक्ते मोक्षे विभागो व्याख्यातुं शक्यत इति प्रतिज्ञायां हेतुत्वानुपपत्तेरानर्थक्यमित्याशङ्क्य श्रुतप्रतिज्ञायां तत्त्वेनान्वयाभावेऽपि उपस्कृतप्रतिज्ञायामन्वयस्य सम्भवान्न वैयर्थ्यमित्याशयेन तदुपदर्शनपूर्वकं तत्र हेतुतयाऽन्वयमाह **अप्रियेति** । अप्रियस्य स्वरूपत्वमित्युत्तरग्रन्थं सङ्गमयितुं नास्तीत्यादिनोक्तं हेत्वन्तरमुपस्कृतप्रतिज्ञायां हेतुत्वेन द्रष्टव्यमित्याशयेनाह **उपलक्षणं चेति** ।

**।। इति सकलविधदुःखाभाव एव श्रुत्यभिप्रेतः ।।**

* * *

॥ अथ दुःखस्वरूपाणामसुराणां मोक्षाभावात् मोक्षे न दुःखप्रसक्तिः ॥

८६ **सु०**— ननु सज्जीवस्याप्यप्रियं स्वरूपभूतमप्राकृतमस्ति । तत्कथमेतदित्यत आह **अप्रियस्येति** ।

**अनु०— अप्रियस्य स्वरूपत्वमसुरेष्वेव हि श्रुतम् ।**

**असुराश्च न मोक्षयोग्या इति भावः । तां श्रुतिमर्थतः पठति असुरा इति ।**

**असुरा नैवमेवं च नैवं चाखिलमानुषाः ।**
**इति**

**अनेन 'नित्यानन्दो नित्यज्ञानो नित्यबलः परमात्मा । नैवमसुरा एवमनेवं च मनुष्या' इति श्रुतिमुपादत्ते । नित्यत्वोक्त्या स्वरूपत्वं सिद्धम् । वृत्तीनामनित्यत्वात् । परमात्मा परमेश्वरः । सज्जीव इति वा । नैवमिति । एतद्विरुद्धस्वभावा इत्यर्थः । एवमनेवं चेति । 'उभयस्वभाव' इत्यर्थः । असुरा नैवं, अखिलमानुषा एवं च नैवं चेति योजना । इति श्रुतमिति सम्बन्धः ।**

**परि०— इति श्रुतिमिति** । भाष्योक्ताम् ॥ **वृत्तीनामिति** । मनःपरिणतिरूपाणामित्यर्थः । श्रौतपदानामर्थमाह **परमात्मेति** । **सज्जीव इति वेति** । तस्य परमजीवत्वेन परमात्मपदेनोक्ति-सम्भवादिति भावः ॥ **उभयेति** । सुखदुःखाद्युभयस्वभावा इत्यर्थः । अत्र मनुष्यपदेन नित्यसंसारिणो ग्राह्या इति भावः । मूलयोजनामाह **असुरा नैवमित्यादिना** ।

**यादु०— अप्राकृतमस्तीति** । तदभावे प्रमाणाभावादिति भावः ॥ **वृत्तीनामिति** । अन्तःकरण-परिणतिरूपाणामानन्दादीनामित्यर्थः ॥ **परमेश्वर इति** । अत्र बिम्बभूतस्य परमेश्वरस्यानन्दादिस्वरूपत्वोक्त्या तत्प्रतिबिम्बानां सज्जीवानामपि तदर्थात्सिद्ध्यतीति प्रकृतसङ्गतिरिति द्रष्टव्यम् । अत एव अस्वरसादाह **सज्जीव इति वेति** । निःस्वभावतां वारयितुमाह **एतद्विरुद्धेति** । नन्वेवमनेवं चेत्यत्र केवलानन्दादिरूपत्वकेवलदुःखादि-रूपत्वयोः परामर्शे तयोरेकदैकत्रासमावेशात् तत्समावेशोक्तिर्विरुद्धेत्यत आह **उभयस्वभावा इति** । तथा च आनन्दादेरेव परामर्शो न केवलस्यापीति भावः ।

**वं०प०**— मूलं व्याख्याति **नैवमितीति** ।

कं०रा०— **नित्यत्वोक्त्येति** । 'नित्यानन्दो नित्यज्ञानो नित्यबल' इत्यानन्दादीनां नित्यत्वोक्त्या आत्मस्वरूपत्वं सिद्धम् । अन्तःकरणवृत्तिरूपाणां तेषामनित्यत्वादित्यर्थः । श्रुतिगतं परमात्मपदमीश्वरपरत्वेन व्याचष्टे **परमात्मेति** । जीवपरत्वेन व्याचष्टे **सज्जीव इति वेति** । न च वाच्यं परमात्मशब्दस्य कथं सज्जीवपरत्वमिति । पर उत्कृष्टश्चासौ आत्मा चेति योगस्य अन्यस्मादुत्कृष्टे सज्जीवे सम्भवात् । ननु नैवमसुरा इत्यनेन असुराणां नित्यानन्दादिभिन्नत्वमेव प्रतीयते न तु दुःखं तेषां स्वरूपभूतमित्यतः स्वाभिमतार्थे नेयं श्रुतिः प्रमाणमित्यतो नञो विरुद्धार्थत्वमाश्रित्य व्याख्याति **नैवमितीति** । न च वाच्यं 'नैवमसुरा' इत्यत्र नैवमित्यस्यानन्दादिविरुद्धदुःखादिस्वभावत्वार्थत्वेन 'एवमनेवं च मनुष्य' इत्यत्र एवमनेवं चेत्यस्योभयस्वभावार्थतया च व्याख्याने हेत्वभाव इति । 'नित्यानन्दज्ञानबला देवा नैव तु दानवाः । दुखोपलब्धिमात्रास्ते मानुषास्तूभयात्मका' इति समाख्यारूपस्मृतेः सत्त्वात् । नैवमसुरा इत्यादौ नैवमित्याद्युद्दिश्यासुरत्वादिकं विधीयत इति प्रतीयते । यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणमित्युक्तेः । तच्चायुक्तम् । अप्रसिद्धस्योद्देश्यत्वं प्रसिद्धस्य विधेयत्वमित्यापातादित्यतो योजनां दर्शयति **असुरा इति** । असुराद्युद्देशेन नैवमित्यादेर्विधानान्नोक्तदोष इति भावः । मनुष्याः केचिदेवं चेत्यर्थप्रतीतिं वारयति **अखिलमनुष्या इति** । अथवा 'असुरा नैवमेवं च नैवं चाखिलमानुषा' इति मूलवाक्यस्यासुरा नैवमेवं चाखिला मानुषा नैवं चेति योजनाप्रतीतिं वारयतीत्यवतारणीयोऽयं ग्रन्थः ।

शे०चं०— **अप्राकृतमस्तीति** । तदभावे प्रमाणाभावादिति भावः ॥ **तत्कथमिति** । प्रियास्पृष्टिश्रुतिरेव विभागेन व्याख्यातव्या अप्रियास्पृष्टिश्रुतिस्तु नेत्येतत् कथमित्यर्थः । नन्वसुरेष्वेवाप्रियस्य स्वरूपतायाः श्रुतत्वेऽपि तेषामपि सज्जीवत्वे कथमुक्तशङ्कापरिहार इत्यत आह **असुराश्चेति** । ननु 'नित्यानन्दो नित्यज्ञान' इत्यादिश्रुत्या ज्ञानादीनां नित्यत्वोक्तावपि स्वरूपत्वानुक्तेः कथं तत्र प्रमाणतया अस्या उपन्यास इत्यतः तस्या आगमतया तत्स्वरूपत्वानवगमकत्वेऽपि तद्धेतुभूतनित्यत्वप्रतिपादकतया स्वरूपत्वावगमकत्वाद्युक्तः तस्याः तत्र प्रमाणतयोपन्यास इत्याह **नित्यत्वोक्त्येति** । तर्हि सर्वेषामप्यानन्दादीनामन्ते तच्छ्रुतिसिद्धनित्यत्वबलेन स्वरूपत्वलाभान्न प्रियास्पृष्टिश्रुतेर्विभागेन व्याख्येयत्वमित्यतः स्यादेतदेवं यदि वृत्तीनां नित्यत्वं स्यान्न तदस्ति । तथा सत्यन्तःकरणपरिणतत्वरूपवृत्तित्वानुपपत्तेः । ततश्च नित्यत्वप्रतिपादकश्रुतिविषयताया बाधितत्वान्न सर्वेषां स्वरूपत्वप्राप्तिरिति युक्तमेव विभागेन व्याख्यानमित्याशयेनाह **वृत्तीनामिति** ॥ **परमेश्वर इति** । अत्र बिम्बभूतपरमेश्वरस्यानन्दादिरूपत्वोक्त्या तत्प्रतिबिम्बानामपि सज्जीवानामानन्दादिरूपत्वस्य अर्थतः सिद्धत्वात् प्रकृतसङ्गतिरिति द्रष्टव्यम् । साक्षात् तल्लाभायाह **सज्जीव इति वेति** । निःस्वभावतां वारयितुमाह **नैवमिति** । आनन्दादिविरुद्धदुःखादिस्वभावा इत्यर्थः । एवमनेवं चेत्यत्र पूर्वाभिमतकेवलानन्दादिरूपत्वदुःखादिरूपत्वयोः परामर्शो नोपपद्यते । तयोरेकत्रैकदा विरुद्धत्वेन समावेशायोगादित्यतोऽन्यथा व्याचष्टे **उभयेति** । आनन्दादिदुःखादिस्वभावा इत्यर्थः । असुरा नैवमनेवं चेति मानुषास्तु नैवमित्यन्यथाप्रतीतिनिरासाय असुरा नैवमित्यादिभाष्यस्य योजनामाह **असुरा इत्यादिना** ।

स०व्र०— **योजनेति** । 'असुरा नैवमेवं त्वि'ति अनुभाष्ययोजनेत्यर्थः ।

**॥ इति दुःखस्वरूपाणामसुराणां मोक्षाभावात् मोक्षे न दुःखप्रसक्तिः ॥**

॥ अथ अप्राकृतदुःखसद्भावे मोक्षस्यापुरुषार्थत्वप्रसङ्गः ॥

८७ **सु०**— अप्रियहानावपि सङ्कोचः क्रियतामित्यतिप्रसङ्गं निवारयतैव सामान्यतः श्रुता प्रियास्पृष्टिः कुतो विशेषेऽवस्थाप्यत इत्याशङ्काऽपि परिहृता । नियामकस्य सूचितत्वात् । तदेव नियामकं विस्पष्टमाचष्टे **आत्मेति** ।

## अनु०— आत्मप्रियहानाय को यतेत च बुद्धिमान् ।

आत्मा च तत्प्रियं चेति **आत्मप्रियम्** । आत्मनः प्रियमिति वा । तदिच्छति चेति **चशब्दः** ।

यदि प्रियास्पृष्टिरविशिष्टा स्यात् तदा न कश्चित् प्रेक्षावान् मोक्षमिच्छेत् । नापि तदर्थं प्रयतेत । यद्यपि द्वेषवशात् परकीयसुखहानादाविच्छादिकं सम्भवति । तथाऽपि न कश्चिद् बुद्धिमान् आत्मनः सुखहानमिच्छति । तदर्थं प्रयतते वा । वृत्तिरूपसुखस्यानिष्टभूयिष्ठत्वात् तत्त्या(गेच्छा)गायेच्छादिकं युज्यते । स्वरूपसुखं तु निष्कण्टकं कस्मात् त्याज्यम् । न च तन्नास्ति, श्रुतिसिद्धत्वात् । कारणैक्यनिमित्तो हि सुखस्य दुःखानुषङ्गः । न च आत्मसुखस्य कारणमस्ति । अशक्यं च आत्मसुखहानम् । न च अशक्यविषयेच्छाप्रयत्नौ बुद्धिमतः सम्भवतः । आत्महानं खलु विनाशलक्षणमनुत्पादलक्षणं च न सम्भवति, नित्यत्वात् । नापि वियोगलक्षणं, परेषां मते विभुत्वात् । अस्माकं स्वात्मनि क्रियाविरोधात् । नाप्यज्ञानलक्षणं स्वप्रकाशत्वात् ।

तदेवं बाधकसद्भावात् प्रियास्पृष्टिर्विशेषनिष्ठैव व्याख्येया । तथा च 'अशरीरं वाव सन्तम्' इति श्रुत्युक्तोपपत्तिः श्लिष्यत इति ।

**परि०**— 'प्रियास्पृष्टिरि'ति पदच्छेदः ॥ **सूचितत्वादिति** । 'प्रियं स्वरूपमेवास्य बलानन्दादि वाक्यत' इत्यत्र अप्राकृतस्वरूपत्वस्योत्त्या सङ्कोचे नियामकस्य सूचितत्वादिति भावः । यद्वा 'हेयत्वादप्रियस्यैव प्रियहानेरनिष्टत' इत्यत्र मुक्तेः पुमर्थत्वभङ्गरूपस्य नियामकस्य सूचितत्वादित्यर्थः ॥ **आत्मा चेति** । आत्मरूपं प्रियमित्यर्थे कर्मधारयोऽयम् । षष्ठ्यन्तविग्रहेण प्राप्तमर्थमुपपाद्य कर्मधारयविग्रहकृतौ तात्पर्यमाह **वृत्तिरूपेति** ॥ **इच्छादिकमिति** । प्रयत्न **आदिपदार्थः** ॥ **श्रुतीति** । 'बलमानन्द ओजश्चे'ति श्रुत्या 'नित्यानन्दो नित्यज्ञान' इत्यादिश्रुत्या च सिद्धत्वादित्यर्थः ॥ **कारणैक्येति** । प्राकृतदेहेन्द्रियाद्यैक्येत्यर्थः । 'अशक्यं च आत्मरूपप्रियहानमि'त्युक्तं,

तत्कथमित्यतः आत्महानेन विना तदभिन्नसुखहानमशक्यमिति भावेन आत्महानं पराकरोति **आत्महानं खल्विति** । यद्वा सुखस्येति योज्यम् । स्वरूपसुखस्यात्मपरित्याग इत्यर्थः ॥ **नित्यत्वादिति** । अनादित्वाच्चेत्यपि ग्राह्यम् ॥ **वियोगेति** । आत्मस्वरूपसुखस्य आत्मना वियोगलक्षणम् ॥ **स्वात्मनीति** । जीवाणुत्ववादिनामस्माकं मते स्वात्मनि क्रियोत्पत्तौ तदभिन्नसुखस्य वियोगो भवति। न च स्वस्मिन्नेव स्वरूपसुखवियोगजनकक्रिया युक्ता स्वस्मिन् स्वावधिकक्रियाया विरोधादित्यर्थः । केचित्त्वात्महान्यनुपपत्तिपरतयैव ग्रन्थार्थमुपेत्य वियोगपदस्यात्मनैवात्मनो वियोगेत्यर्थः । स्वात्मनीत्यस्य स्वावधिकक्रियायाः स्वस्मिन्विरोधादित्यर्थ इत्याहुः ॥ **श्रुत्युक्तोपपत्तिरिति** । अशरीरत्वयुक्तिरित्यर्थः । शरीरस्य वृत्तिरूपसुखं प्रति हेतुतया स्वरूपसुखे हेतुत्वाभावादशरीरत्वयुक्तिर्जन्यसुखाभावे युज्यते । न स्वरूपसुखाभावे स्वरसा । तस्मात् स्वारस्यानुरोधाद्विशेषनिष्ठैव व्याख्येयेत्यर्थः । अप्रियं तु सतामजन्यं नेत्यप्रियश्रुतिर्विशेषनिष्ठा न व्याख्यातुं शक्येति सा युक्तिरप्रिये सर्वात्मना निषेध एव श्लिष्यत इति भावः ॥ *अशरीरं वावेति श्रुत्यर्थः* ॥

**गु०दी०— स्वात्मनि क्रियाविरोधा**दित्यत्र स्वस्मात् स्वस्य वियोग इत्येतत् स्थाणोः श्येनवियोगवत् स्वस्यैव स्थितिक्रियया स्वस्यैवान्यत्र गमनक्रियया च विरुद्धमित्यर्थः । **अशरीरं वा व सन्तमिति श्रुत्युक्तोपपत्तिः श्लिष्यत** इत्युपलक्षणम् । 'प्रियाप्रिये न स्पृशत'इति उक्तसुखदुःखोभयहेतुभूतशरीराभावः प्राकृतशरीराभाव एव श्रुतावुदितः । तेन च अत्र प्राकृतप्रियस्पर्शाभाव एव लभ्यते । न त्वप्राकृतप्रियस्यापि स्पर्शाभाव इत्यपि द्रष्टव्यम् ।

**यादु०— नियामकस्येति** । सुखस्यात्मस्वरूपत्वकथनेन हातुमशक्यत्वादिरूपस्य नियामकस्येत्यर्थः । षष्ठीसमासेन लब्धमर्थं दर्शयति **यदि प्रियास्पृष्टिरित्यादिना** । ननु सुखमपि दुःखानुषङ्गात् त्याज्यमेवेत्याशङ्कां परिहारन् कर्मधारयलब्धमर्थमुपपादयति **वृत्तिरूपसुखस्येत्यादिना** । प्रियास्पृष्टिर्विशेषेणैव व्याख्येयेत्यत्र कर्मधारयसूचितं नियामकं दर्शयति **कारणैक्येत्यादिना** । शरीरादिरूपकारणैक्यनिमित्त इत्यर्थः । आत्मस्वरूपसुखहानं आत्महानमेवेत्यभिप्रेत्याह **आत्महानमिति** । नित्यत्वेन कालिकं स्वात्महानं न सम्भवतीत्युक्त्वा दैशिकमपि तन्न सम्भवतीत्याह **नापि वियोगेति** ॥ **स्वात्मनीति** । स्वात्मनि स्वावधिकनिर्गमनादिक्रियाया अभावादित्यर्थः । देवदत्तस्य ग्रामवियोगो हि ग्रामावधिकनिर्गमनरूपक्रियासाध्यो दृष्टः । न च अत्र स्वात्मनि स्वावधिकनिर्गमनरूपक्रिया सम्भवति । यया स्वस्मादेव स्वस्य वियोगो भवेदिति भावः । न च ईशकृतस्यांशातिरेकस्याङ्गीकारात् स्वावधिकं निर्गमनं देवादीनामस्तीति वाच्यम् । तस्य सर्वमुक्तसाधारण्याभावात् । प्रियास्पृष्टिश्च सर्वमुक्तसाधारणी प्रकृता । **तथा च अशरीरमिति** । प्राकृतप्रियास्पृष्टिपरतया श्रुतिव्याख्याने तत्र अशरीरमिति हेतुगर्भविशेषणेन समर्पिता अशरीरत्वयुक्तिः श्लिष्यते । शरीरस्य प्रकृतं प्रियं प्रति कारणत्वेन

कारणाभावे कार्याभावनियमात् । स्वरूपप्रियास्पृष्टिपरतया व्याख्याने तु तदंशोऽशरीरत्वयुक्तिरप्रयोजकतया न श्लिष्यत इति भावः ।

**वं०प०**— आत्मशब्दस्याभिप्रायमाह **यद्यपीति** । आत्महानं किं कालिकं हानं, दैशिकं वा । आद्येऽपि किं विनाशलक्षणं स्वस्योत्पत्त्यभावो यथा स्यात् तथा कारणरूपानुत्पादो वेति विकल्प्य दोषमाह **विनाशलक्षणमिति** ॥ **नित्यत्वादिति** । नित्यत्वेन विनाशलक्षणं हानमयुक्तम् । नित्यत्वोक्त्या अनादित्वं प्राप्तम् । तथा च अनादित्वेन उत्पादप्रसक्तेरेवाभावात् अनुत्पादकरणरूपं हानं न सम्भवतीत्यर्थः । दैशिक-हानरूपो द्वितीयपक्षोऽप्ययुक्त इत्याह **नापीति** । **परेषां मते** अस्माकं मते ॥ **स्वक्रियेति** । स्वकर्मकपरित्याग-रूपक्रियाविरुद्धत्वान्न सम्भवतीत्यर्थः ।

**कं०रा०**— **विशेष इति** । प्राकृतप्रियास्पृष्टिरूपविशेष इत्यर्थः ॥ **तदिच्छति चेति** । 'आत्मप्रिय-हानाय को यतेत चे'त्यत्र चशब्दः को वाऽऽत्मप्रियहानमिच्छति चेत्यर्थे वर्तत इत्यर्थः ॥ **कारणैक्येति** । येन कारणेन सुखं जायते तेनैव दुःखत्वादिकारणैक्यनिमित्तो हि सुखस्य दुःखानुषङ्ग इत्यर्थः ॥ **नित्यत्वादिति** । आत्मन उभयावधिरहितत्वादित्यर्थः । सदातनत्वादिति वाऽर्थः ॥ **परेषामिति** । आत्मनः परेषां मते विभुत्वा-द्वियोगलक्षणं हानं न सम्भवतीत्यर्थः ॥ **अस्माकमिति** । आत्मनोऽस्माकं मतेऽणुत्वेन द्रव्यान्तरेण वियोग-सम्भवेऽपि स्वेनैव स्वस्य वियोग इत्यस्य विरुद्धत्वादित्यर्थः ॥ **तथा चेति** । सामान्यतः श्रुतायाः प्रियास्पृष्टेः प्राकृतप्रियास्पृष्टिरूपविशेषनिष्ठत्वेन व्याख्याने अशरीरं वा व सन्तमिति व्याख्याने श्रुत्युक्ताशरीरत्वरूपयुक्तिः सङ्गच्छते । प्राकृतविषयस्य शरीरकार्यत्वेन अशरीरत्वस्य प्राकृतप्रियास्पृष्टावेव हेतुत्वादित्यर्थः ।

**शे०चं०**— **निवारयतैवेति** । 'अप्रियं प्रतिकूलं तदि'त्यादिना पूर्वग्रन्थेनेति शेषः ॥ **नियामकस्येति**। समस्तप्रियहानेरनिष्टत्वस्य अप्राकृतसुखसद्भावेन व्यावर्त्यसद्भावाद्विशेषणावैयर्थ्यरूपस्य चेत्यर्थः ॥ **स्पष्टमिति** । अतो नाप्रियं प्रतिकूलमिति पूर्वग्रन्थेन आत्मप्रियहानायेत्युत्तरग्रन्थस्यार्थिकं पौनरुक्त्यमिति भावः ॥ **आत्मा च तदित्यादि** । सम्भवसप्रयोजनत्वाभ्यां समासद्वयाश्रयणमिति ध्येयम् ॥ **तदिच्छति चेति चशब्द इति** । चशब्दः तदिच्छति चेति अनुक्तसमुच्चयार्थ इत्यर्थः ।

षष्ठीसमासाश्रयणेन सूचितं प्रयोजनमाह **यदीति** । आत्मनः सुखहानिरूपतया मोक्षस्येच्छाद्यविषयत्वा-दिति भावः । परसुखहानादेरिवात्मसुखहानादेरपीच्छादिविषयत्वं किं न स्यादित्यतो द्वेषभावाभावाभ्यां वैषम्या-न्नैवमित्याह **यद्यपीत्यादिना** । नन्वात्मनो वृत्तिरूपसुखहानस्येच्छादिविषयत्ववत् स्वरूपसुखहानरूपमोक्षस्यापि तत्किं न स्यादित्यतः अनिष्टभूयिष्ठत्वभावाभावाभ्यां वृत्तिसुखस्वरूपसुखयोर्वैषम्याद्युज्यते तत्त्यागयोरिच्छादि-विषयत्वतदभावाविति कर्मधारयसमासाश्रयणेन सूचितमर्थं दर्शयति **वृत्तीति** । अस्तु स्वरूपसुखं तथाऽपि तस्यानिष्टभूयिष्ठत्वमेव किं न स्यादित्यत आह **कारणैक्येति** । शरीरादिकारणैक्येत्यर्थः । अङ्गीकृत्यैव च हानसम्भवमनिष्टभूयिष्ठत्वभावाभावाभ्यां वैषम्यमुपदर्शितम् । वस्तुतस्त्वात्मस्वरूपसुखहानस्यात्महानरूपत्वात्

अशक्यत्वमेवेत्यभिप्रेत्य कर्मधारयाश्रयणेनैव सूचितमर्थमाह **अशक्यं चेति** । अस्त्वशक्यत्वं तावताऽपि हानं न स्यादित्यप्रयोजकत्वं परिहरन् मूलं योजयति **न चेति** । तादृशचन्द्रमण्डलाहरणादाविच्छाप्रयत्नयोरदर्शनादित्यर्थः । भवेदेवं यद्यात्महानस्याशक्यत्वं स्यात् तदेव कथमित्यतः तत्किं कालिकमभिमतं किं दैशिकमाहोस्विदज्ञानमाद्येऽपि किं विनाशलक्षणं प्रागभावलक्षणमिति विकल्पं मनसि निधायोभयमपि दूषयति **आत्महानं खल्विति** ॥ **नित्यत्वादिति** । सदातनत्वादित्यर्थः । द्वितीयेऽपि किं परीत्या तदभिमतं स्वरीत्या वेति विकल्पं मनसि निधायाद्यं दूषयति **परेषामिति** । द्वितीयं दूषयति **अस्माकमिति** । स्वस्य स्वावधिकनिर्गमनादिक्रियाया विरुद्धत्वादित्यर्थः । देवदत्तस्य ग्रामवियोगो हि तदवधिकनिर्गमनादिक्रियासाध्यो दृष्टः । न चात्र स्वात्मनि स्वावधिकनिर्गमनक्रिया सम्भवति । यया स्वस्मादेव स्वस्य वियोगो भवेदिति भावः । न च सिद्धान्ते ईशकृतस्यांशिनः सकाशादंशव्यतिरेकस्याङ्गीकारात् स्वावधिकं स्वस्य निर्गमनं स्यादिति वाच्यम् । तस्य सर्वमुक्तसाधारणत्वाभावात् । प्रकृतायाश्च प्रियास्पृष्टेः सर्वमुक्तसाधारणत्वादिति भावः । तृतीयं दूषयति **नापीति** ।

विशेषेण व्याख्येयत्वे आन्तरोपपत्तिमप्याह **तथा चेति** । प्रियास्पृष्टिश्रुतेर्विशेषेण व्याख्यान एवेत्यर्थः । उपपत्तिरशरीरत्वलक्षणा ॥ **श्लिष्यत इति** । अयमर्थः । श्रुतौ प्रियास्पृष्टिहेतुत्वेनोक्तमशरीरत्वं तावन्न सर्वथाऽशरीरत्वं किन्तु प्राकृतशरीरराहित्यरूपमेवेत्युक्तमधस्तात् । प्राकृतशरीराभावश्च प्राकृतसुखस्यैवाभावसाधको न स्वरूपसुखस्याप्रयोजकत्वापातात् । तथा च प्राकृतसुखाभावस्यैव तदर्थतया वाच्यत्वात् । श्रुत्युक्तोपपत्तेरप्रयोजकत्वाभावात् श्लिष्टत्वमिति ।

**वा०र०— तस्य सर्वमुक्तेति** । न च येषां देवानामंशातिरेकस्तेषामेवास्तु स्वरूपत्याग इति वाच्यम् । अस्य ग्रन्थस्य सर्वसाधारणप्रियासृष्टेर्नांशातिरेकमादाय क्वचित्पर्यवसानं कर्तुं शक्यमित्यत्रैव तात्पर्यम् । न तु तत्र स्वरूपत्यागसम्भवेऽपि । अन्यत्र तदसम्भवेऽपि अन्यत्र तदसम्भव इत्यत्र योनेरुक्तरीत्योपपत्तिराशङ्क्येति ज्ञेयम् । श्रुत्योपपत्तेरिति पाठः ।

**स०व्र०—** विभागो हि स्वपरित्यागेन स्वस्य गमनम् । न तत्परमते युक्तम् । तन्मते तस्य विभुत्वेन गमनानुपपत्तेरित्याह **परेषामिति** । अस्मन्मते त्वात्मनोऽणुत्वेन तस्य गमनसम्भवेऽपि स्वस्य स्वपरित्यागस्य विरुद्धत्वान्न वियोग इत्याह **अस्माकं त्विति** ॥ **तथा चेति** । प्रियास्पृष्टेर्विशेषेणैव व्याख्यान इत्यर्थः ॥ **श्रुत्युक्तेति** । अशरीरत्वलक्षणेत्यर्थः । अयमाशयः । श्रुतौ प्रियास्पृष्टिहेतुत्वेनोक्तमशरीरत्वं तावन्न सर्वथाऽशरीरत्वं किं नाम प्राकृतशरीरराहित्यमेवेति वक्ष्यते । प्राकृतशरीराभावश्च प्राकृतसुखाभावस्यैव साधकः । न तु स्वरूपभूतस्य अप्रयोजकत्वापातात् । तथा च प्राकृतसुखाभावहेतुत्वस्यैव वाच्यत्वात् तदुक्ताशरीररूपोपपत्तेः न अप्रयोजकमिति श्लिष्टत्वम्, अन्यथा तु नेति ।

**॥ इति अप्राकृतदुःखसद्भावे मोक्षस्यापुरुषार्थत्वप्रसङ्गः ॥**

**॥ इति 'प्रियास्पृष्टि'श्रुतिविचारः ॥**

॥ अथ 'नप्रेत्यसंज्ञाऽस्ति'श्रुतिविमर्शः ॥
॥ अथ मुक्तानां अमुक्ताज्ञेयत्वमेव श्रुत्यर्थः ॥

८८ सु०— एवं सुखास्पृष्टिश्रुतिं व्याख्याय ज्ञानाभावश्रुतिं च व्याख्याति **संज्ञेति** ।

## अनु०— संज्ञा नास्तीत्यपि ह्यस्य नामुक्तज्ञेयतेति हि ।

**श्रुतिर्वक्तीति वक्ष्यमाणमत्रापि सम्बध्यते । 'न प्रेत्य संज्ञाऽस्ती'त्यपि श्रुतिरस्य मुक्तस्यामुक्तज्ञेयता नास्तीत्येव वक्ति । न तु मुक्तो न जानातीति । एको हिशब्द एवार्थः। द्वितीयस्तु स्वोक्तार्थस्य शब्दशक्त्यनतिक्रमं सूचयति ।**

**तथा हि । प्रेत्य मरणानन्तरं संज्ञा ज्ञानं नास्तीति तावच्छ्रौतोऽर्थः । तत्र प्रकरण-वशात् प्रेत्येत्येतन्मरणविशेषमोक्षानन्तरमिति व्याख्येयम् । ज्ञानं तु मुक्तसम्बन्धि प्रति-षिध्यमानं तत्कर्तृकमेवेति कल्पने न नियामकं पश्यामः । अतः तत्कर्मकस्यैव ज्ञानस्य अयं प्रतिषेधो विज्ञायते । सर्वथाऽज्ञे(यतायां चा)यानां चासत्त्वं प्रसज्यत इत्यमुक्तज्ञेयतानिषेध इति कल्प्यते । अमुक्तानामप्यस्मदादीनामपरोक्षज्ञानस्य अयं प्रतिषेधः । नारदादिभिराप-रोक्ष्येणास्मदादिभिश्च शास्त्रेण तज्ज्ञानात् । अत एव संशब्दप्रयोग इति ।**

**परि०— श्रुतिर्वक्तीति** । काण्वश्रुतिर्द्वितीयेऽध्याये वक्तीत्यर्थः । 'इत्येव वक्ती'त्येवकारं न पश्यामो मूल इत्यत आह **एको हिशब्दः एवार्थ इति** । निपातानामनेकार्थत्वादिति भावः ॥ **प्रकरणवशादिति** । वक्ष्यमाणदिशा 'विज्ञानघन एवैतेभ्य' इत्यादिप्रकरणस्य मुक्तिपरत्वादिति भावः ॥ **अत एवेति** । अस्मदादेरपरोक्षज्ञानाभावादेव ज्ञानं नास्तीत्यनुक्त्वा संज्ञा नास्तीति संशब्द-प्रयोग इत्यर्थः ।

**यादु०— प्रकरणवशादिति** । 'विज्ञानघन एवैतेभ्य' इत्यादिप्रकरणस्य वक्ष्यमाणरीत्या मुक्तिपरत्वा-दिति भावः ।

**वं०प०— असत्त्वमिति** । वस्तुसत्त्वस्य प्रतीतिप्रमाणकत्वादिति भावः । अस्मदादीनामिति विशे-षणस्य कृत्यमाह **नारदादिभिरिति** । अमुक्तैरपीत्यर्थः । अपरोक्षज्ञानस्येति पदाभिप्रायमाह **अस्मदादिभिश्च शास्त्रेणेति** । तज्ज्ञानात् मुक्तानां ज्ञायमानत्वादित्यर्थः । **अत एव** परोक्षज्ञानसद्भावादेव ॥ **संशब्देति** । तस्या-परोक्षज्ञानाभिप्रायकत्वादिति द्रष्टव्यम् ।

कं०रा०— **प्रकरणवशादिति** । विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तानेवानुविनश्यतीति मरणविशेषरूपमोक्षस्य प्रकृतत्वात् प्रेत्येत्येतन्मरणविशेषरूपमोक्षानन्तरमिति व्याख्येयमित्यर्थः । अस्मदादिविशेषणस्यापरोक्षेतिविशेषणस्य च व्यावर्त्यमाह **नारदादिभिरिति** ॥ **अत एवेति** । यतोऽपरोक्षज्ञानस्यायं प्रतिषेधोऽत एव न प्रेत्य संज्ञाऽस्तीति श्रुतौ संशब्दप्रयोग इत्यर्थः ।

शे०चं०— **प्रकरणेति** । 'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाये'ति वक्ष्यमाणरीत्या अस्य मोक्षप्रकरणत्वादित्यर्थः । नन्वस्मदादिसाधारण्येन सर्वेषामप्यपरोक्षज्ञानस्यैवास्मदादीनामपि परोक्षापरोक्षसाधारण्येन ज्ञानमात्रस्यैव च निषेधसम्भवात् कुतोऽस्य वाक्यस्य अस्मदादीनामपरोक्षज्ञानप्रतिषेधकत्वमित्यत आह **नारदादिभिरिति** ॥ **अत एवेति** । अस्माभिरापरोक्ष्येणाज्ञायमानत्वादेवेत्यर्थः । अन्यथा ज्ञानमात्रस्यैव प्रतिषेध्यतया संशब्दवैयर्थ्यापातादिति भावः ।

स०व्र०— **अत एवेति** । अस्माभिरापरोक्ष्येणाज्ञायमानत्वादेवेत्यर्थः ।

* * *

८९ **सु०— ननु साधारणे वाक्ये मुक्तविषयस्य ज्ञानस्य अयं प्रतिषेधो न तु तत्कर्तृकस्येति कुतः कल्प्यत इत्यत आह धर्मेति ।**

## अनु०— धर्मानुच्छित्तिमेवास्य यतो वक्त्युत्तरश्रुतिः ।

**यतः** कारणात् 'अयमात्मानुच्छित्तिधर्मे'ति **उत्तरश्रुतिः अस्य** मुक्तात्मनो **धर्मानुच्छित्तिमेव वक्ति । न विद्यते उच्छित्तिर्येषां ते तथोक्ताः । अनुच्छित्तयो धर्मा यस्यासावनुच्छित्तिधर्मेति । तस्मादेवं व्याख्यात इति ।**

परि०— **अनुच्छित्तिधर्मेतीति** । नित्य इत्यर्थः ।

कं०रा०— अनुच्छित्तिधर्मेत्युत्तरश्रुतिः मुक्तात्मनो धर्मानुच्छित्तिं कथं वक्तीत्यतो विग्रहं दर्शयति **न विद्यत इति** । अनुबलात् पूर्वपदात् परो यो धर्मशब्दः तदन्तादनिच्प्रत्यय इति कौशिकोक्तेः । अत्रानिच्प्रत्ययो न प्राप्नोतीति समुदितात् परो यो धर्मशब्दः तदन्तादनिच्प्रत्ययस्य छान्दसत्वेन वा धर्मादनिजिति योगविभागेन चोपपत्तेः । वस्तुतस्तु उच्छित्तिशब्दः कर्मणि क्तिन्नन्तः । 'स्त्रियां क्तिन्नि'त्यत्र 'अकर्तरि च कारक' इत्यस्यानुवृत्तेः । तथाच उच्छित्तयो धर्मा यस्य स उच्छित्तिधर्मा न उच्छित्तिधर्मा अनुच्छित्तिधर्मेत्येव वक्तव्यम् ॥ **तदेवमिति** । यतः कारणादनुच्छित्तिधर्मेत्युत्तरश्रुतिः मुक्तात्मनो धर्मानुच्छित्तिमेव वक्ति तत्कारणात् एव 'न प्रेत्य संज्ञाऽस्ती'ति प्रतिषेधो मुक्तिविषयकज्ञानस्यैव न तु तत्कर्तृकज्ञानस्येति व्याख्यायत इत्यन्वयः ।

**शे०चं०— न विद्यत इत्यादि** । अत्र च न विद्यते उच्छित्तिर्येषां ते तथोक्ताः । अनुच्छित्तयो धर्मा यस्यासावनुच्छित्तिधर्मेति बहुव्रीहिपूर्वपदो बहुव्रीहिर्धर्माणामनुच्छित्तिलाभार्थमनिच्प्रत्ययनिर्वाहार्थं च समाश्रितः । एवं सत्येव हि 'धर्मादनिच्केवलादि'ति धर्मान्ताद्बहुव्रीहेः समासान्तोऽनिच्प्रत्यय उपपद्यते । तथाहि । बहुव्रीहिणा पूर्वपदमाक्षिप्यते तस्य केवलादिति विशेषणम् । तेन केवलादन्यनिरपेक्षात् परो यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच्प्रत्ययो भवतीति सूत्रार्थः सम्पद्यते । अत एव परमः स्वः धर्मो यस्येति परमस्वधर्म इति त्रिपदे बहुव्रीहौ नानिच्प्रत्ययः प्रसज्यते । तत्र स्वशब्दस्य मध्यत्वादन्यसापेक्षत्वेन केवलस्य तस्य पूर्वपदत्वाभावात् । यदा च स्वो धर्मः स्वधर्मः परमः स्वधर्मो यस्येति परमस्वधर्म इति बहुव्रीहिः तदा यद्यपि पूर्वपदमन्यानपेक्षरूपकेवलं भवति तथाऽपि स्वशब्देन व्यवधानान्न ततः परो धर्मशब्द इति न भवति समासान्तः । ततश्चात्र अनुच्छित्तिशब्दो बहुव्रीहेः पूर्वपदं भवन्नान्यमपेक्षत इति केवलात्परो धर्मशब्द इति भवत्येवात्र समासान्तोऽनिच्प्रत्ययः । अत एव निवृत्तिधर्मा स्थानी भवतीति प्राचां प्रयोगः सङ्गच्छते । एवमेव साध्यसमानधर्मा धर्मी सपक्ष इति टीकाकारीयोक्तिरपि निर्वाह्या । इयांस्तु विशेषः । यदत्र बहुव्रीहिपूर्वपदो बहुव्रीहिः तत्र साध्येन समानः साध्यसमानः स धर्मो यस्येति तृतीयान्ततत्पुरुषपूर्वपदो बहुव्रीहिरिति । एवं सन्दिग्धसाध्यधर्मा धर्मी पक्ष इत्याद्यपि निर्वाह्यम् । नन्वेवं बहुव्रीहिणा पूर्वपदमाक्षिप्यते । तच्च केवलादित्यनेन विशिष्यत इत्यङ्गीकारे केवलपदमनर्थकं स्यात् । पूर्वपदशब्दस्य समासप्रथमावयवे रूढत्वेनैव मध्यपदव्यावृत्तिसम्भवादिति चेन्न । पूर्वपदाक्षेपे तात्पर्यग्राहकत्वेन सार्थक्यसम्भवादिति । केचित्तु केवलं पदान्तरेणाविशिष्टं समासानात्मकमिति यावत् । यत्पूर्वपदं तस्मात्परो धर्मशब्द इत्येव सूत्रार्थः । ततश्चोच्छित्तिर्धर्मो यस्येत्युच्छित्तिधर्मा, नोच्छित्तिधर्मा इत्येव विग्रहोऽत्राभिमतः । न विद्यते उच्छित्तिर्येषां तेऽनुच्छित्तयः, अनुच्छित्तयो धर्मा यस्येति तु तात्पर्यकथनमात्रं टीकायां कृतं न तु विग्रहप्रदर्शनमेतत् । धर्माणामविनाशित्वसिद्धिस्तु आर्थिक्येव । सन्दिग्धसाध्यधर्माधर्मी पक्ष इत्यादावपि साध्यं धर्मो यस्येति साध्यधर्मेति व्युत्पाद्य सन्दिग्धश्चासौ साध्यधर्मा चेति कर्मधारयः । स च सन्देहः साध्यधर्मद्वारक एव पर्यवस्यतीति न कश्चिद्दोष इत्याहुः । तत्रोक्तरीत्या धर्माणामविनाशित्वस्य, साध्यस्य सन्दिग्धतायाश्च, साक्षाल्लाभसम्भवेन क्लिष्टकल्पनाऽनवकाशात् भवदुक्तार्थकल्पनाया आकरग्रन्थानारूढत्वान्निवृत्तिधर्मा स्थानीभवतीत्याद्यभियुक्तप्रयोगं प्रत्यननुकूलत्वाच्चास्मदुक्तार्थस्य च भ्वादिगणे धृञ् धारण इति धातौ *माधवग्रन्थे* स्पष्टत्वादिति दिक् ।

**वा०र०—** कुत एवं बहुव्रीह्याश्रयणं धर्मो येषामिति वा अनुच्छितिः धर्मो येषामिति त्रिपदो बहुव्रीहिरस्त्वित्यत आह **धर्माणामनुच्छित्तीत्यादि** । बहुव्रीहिपूर्वपदत्वस्यास्तु धर्मानुच्छित्तिलाभार्थत्वम् । अनिजर्थत्वं तु कथमित्यतस्तदुपपादयति **एवं सत्येव हीति** । बहुव्रीहिपूर्वपदबहुव्रीह्याश्रयण एवेत्यर्थः । ननु बहुव्रीहिपूर्वपदत्वेऽपि पूर्वस्य केवलत्वाभावादनिजनुपपत्तिरेवेत्यत आह **तथाहीति** ॥ **पूर्वपदमिति** । पूर्वपदरूपमित्यर्थः । पदत्वं चैकत्वसम्पादकमिति केवलत्वेऽपि विशेषितेऽप्यस्य पदस्यान्यनिरपेक्षत्वात् केवलत्वमिति भावः । ननु तथा सति परमधर्म इति प्रत्युदाहरणेऽपि विशिष्टपूर्वपदत्वाश्रयणमाश्रित्यानिजुत्पत्तिप्रसङ्ग इत्यतः किं

परमः स्वो धर्मो यस्येति त्रिपदो विग्रहः । अथवा स्वो धर्मः परमः स्वधर्मः परमः स्वधर्मो यस्येति द्विपदः। आहोस्वित्परमश्चासौ स्वश्च परमस्वः । परमस्वो धर्मो यस्येति द्विपदः । न तावत्तृतीयः । तथात्वेऽनिजङ्गी-कारेणेष्टापत्तेरित्याशयेन प्रथमद्वितीययोस्तदनुपपत्तिमुपपादयति **अत एवेत्यादिना** ॥ **परमः स्व इति** । ननु सर्वनामसङ्ख्ययोरुपसङ्ख्यानमिति स्वशब्दस्य सर्वनाम्नः पूर्वनिपातप्रसङ्गे स्वपरम इत्यापातादिति चेन्न । आहिता-ग्न्यादेराकृतिगणत्वेनास्य तत्त्वाङ्गीकारेण दोषाभावादित्याशयात् । स्वज्ञातिभूतो धर्म इत्यर्थाश्रयणे स्वशब्दो ज्ञातिवाचीति सर्वनामत्वाभावान्न पूर्वनिपातप्रसङ्ग इति पक्षान्तरं च शेष्यामुक्तम् । आहिताग्न्यादित्वाश्रयणं हरदत्तमाधवाभ्यां कृतमनेनापि कृतम् । अनुमानैकशरणमित्यत्र द्विपदत्वाश्रयणेन बहुव्रीहौ सर्वनामसङ्ख्ययो-रित्यस्याप्रवृत्तिरुपवर्णिता च प्राक् टीकाकृतेति ध्येयम् । निवृत्तिधर्मा हीति पाठः । **प्राचां ..... पक्ष इत्या-द्यपीति** । आदिपदेनाभियुक्तानां तथा तथा प्रयोगा ग्राह्याः । नन्वत एव केवलग्रहणं व्यर्थमित्यादि मनोरमा-नुसारेण आशङ्क्य समाधत्ते **नन्वेवमित्यादिना** । केवलपदस्य धर्मतत्प्राक्पदाविशेषणत्वं कौमुदीपाणिनीयमत-दर्पणयोः स्वीकृतं शेषीकृता च विवृत्तं मुरारिभट्ट्यां चाभिहितं तरङ्गिणीकारादिभिः क्वचित्क्वचिदाश्रितं पक्षं मनसि निधायात्रापि तत्परिष्कारं दर्शयन्नेवानुवदति **केचित्त्विति** । माधवग्रन्थे धातुवृत्तौ । इति **स्मरणादितीति** ।

**स०व्र०— नेति** । उच्छिद्यन्त इत्युच्छित्तयः । उच्छित्तयः धर्मा यस्यासावुच्छित्तिधर्मा, न उच्छि-त्तिधर्मा अनुच्छित्तिधर्मेत्येवात्र व्युत्पत्तिर्द्रष्टव्या । तात्पर्यकथनमात्रमेवैतदिति बोध्यम् ।

**॥ इति मुक्तानां अमुक्ताज्ञेयत्वमेव श्रुत्यर्थः ॥**

* * *

**॥ अथ 'अयमात्माऽनुच्छित्तिधर्मा' इति श्रुत्या मुक्ते न ज्ञानप्रतिषेधः ॥**

९० **सु०— स्यादेतत्** । अनुच्छित्तिधर्मेत्येतत् सङ्ख्यादिधर्माणामनुच्छित्तिं वक्तीत्यपि शक्यते वक्तुम् । यद्वा उच्छित्तेरभावोऽनुच्छित्तिः सा धर्मो यस्यासावनुच्छित्तिधर्मेति । तत्कथमेतन्नियामकमित्याशङ्कानिरासाय आदित एव वाक्यं व्याचष्टे **आशङ्क्येति** ।

अनु०— आशङ्क्यास्य ज्ञानहानिं मैत्रेय्या मोहमाह माम् ।
भवानित्युक्तवत्या हि नाहं मोहं वदामि ते ।
इत्युक्त्वा याज्ञवल्क्यो हि स्वरूपानाशमूचिवान् ॥

'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्ति' विज्ञानमूर्तिरयमात्माऽनादिरपि चरमे जन्मन्येतेभ्यो भूतेभ्यः समुत्थाय भूतात्मकशरीरो-

त्पत्तिनिमित्तमेवोत्पन्नव्यवहारविषयो भूत्वा पुनस्तानि भूतान्यन्वेव तन्नाशनिमित्तमेव नित्योऽपि विनश्यति । विनष्टव्यवहार(गोचरो भ)विषयो भवति । अपव्रज्यत इति यावत्। ततः प्रेत्य मोक्षानन्तरमस्य मुक्तस्य संज्ञा ज्ञानं नास्तीत्यविशदं याज्ञवल्क्यवाक्यं श्रुत्वा अस्य मुक्तस्य ज्ञानहानिमाशङ्क्य अनेन वाक्येन मुक्तो न जानातीत्युच्यत इति मत्त्वा मैत्रेय्या 'अत्रैव मा भवान् मोहान्तमापिपदि'ति वाक्येन भवान् मां प्रति यदाह मुक्तो न जानातीति तन्मोहकमेवेत्यर्थमुक्तवत्या चोदित इति शेषः ।

याज्ञवल्क्यो 'न वा अरेऽहं मोहं ब्रवीमी'त्यनेन ज्ञानोपदेशाय प्रवृत्तोऽहं परमप्रियायै ते मोहं न वदामीति प्रतिज्ञामुक्त्वा कथमित्याशङ्कायामविनाशी वा अरेऽयमात्मेत्यात्म-स्वरूपस्यानाशमूचिवान् ।

यद्वा आशङ्क्येति णिजन्ताल्ल्यप् । याज्ञवल्क्यः सम्मुग्धेन वचसाऽस्य(ा) मैत्रेय्या ज्ञानहानिमाशङ्क्योचिवानिति योजना ।

तस्यास्तथा शङ्का जातेत्यत्र किं मानमित्यत्रोक्तं मोहमाह मां भवानित्युक्तवत्या हीति वचनलिङ्गेनाशङ्का(व)गम्यत इत्यर्थः । अयमर्थः स्पष्ट एव श्रुताविति द्वितीयो हिशब्दः ।

**परि०**— इति शक्यते वक्तुमिति पूर्वेणान्वयः । तथा च धर्माणामनुच्छित्तिर्न लभ्यत इति भावः ॥ **कथमेतदिति** । उत्तरवाक्यमित्यर्थः । श्रुत्यर्थमाह **विज्ञानमूर्तिरिति** । मूलपदानि व्याचष्टे **अस्येत्यादिना** । 'आशङ्क्य ज्ञानहानिमि'त्यस्य व्यक्तमर्थमाह **अनेनेति** । संज्ञा नास्तीति वाक्ये-नेत्यर्थः । अत्रैव ज्ञानविषये मा मोहान्तं = मोहाख्यनाशमापिपत् = प्रापितवानिति श्रुतिवाक्यार्थं मनसि निधाय मूलपदानि योजयति **भवान्मां प्रतीत्यादिना** ॥ **इत्यनेनेति** । वाक्येनेत्यनुषङ्गः । नाहमित्यादिमूलार्थमाह **ज्ञानेति** । 'मोहं मां प्रापयामासे'ति बृहद्भाष्यानुरोधादाह **यद्वेति** । **णिजन्ता-ल्ल्यबिति** । 'शकि शङ्कायामि'ति धातोः 'हेतुमति चे'ति णिच्प्रत्यये 'समानकर्तृकयोरि'ति क्त्वा-प्रत्यये समासेऽनञ्पूर्वेति ल्यपि 'णेरनिटी'ति णिलोपे 'इदितो नुम्' धातोरिति नुमागमे सत्याशङ्क्येति रूपसिद्धेरिति भावः । 'अस्ये'त्यस्य लिङ्गव्यत्ययमुपेत्योक्तम् **अस्या इति** । **आशङ्क्य** शङ्कां जन-यित्वा । **श्रुताविति** । 'न प्रेत्य संज्ञास्ती'ति श्रुतावित्यर्थः ।

**गु०दी०**— **मोहान्तमापीपदित्यत्र मोहान्तं** मोहाख्यनाशम् ।

**यादु०**— चोदित इत्यध्याहारेऽतुष्यन् अस्येत्यस्य लिङ्गव्यत्ययेन स्त्रीलिङ्गत्वं मैत्रेय्या उक्तवत्या इत्यनयोः षष्ठ्यन्तत्वं चाभिप्रेत्य योजनान्तरमाह **यद्वेति** । **वाक्येन** इत्यर्थमुक्तवत्येति सम्बन्धः ।

**वं०प०**— **सङ्ख्यादिधर्माणामिति** । सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागरूपाणां सामान्यगुणानां मुक्तेष्वपि सद्भावादित्यर्थः ॥ **स धर्मो यस्येति** । तथा च विनाशाभावरूपधर्मवानित्यर्थः । **अपव्रज्यते** अपवर्गवान् भवति । **मुक्तस्य ज्ञानहानिमाशङ्क्येति** । मैत्रेयी स्वयमेवाशङ्क्येत्यर्थः । 'मोहं मां प्रापयामास भवानत्रेति चोदितः । याज्ञवल्क्यः प्रियामाहे'ति प्रमाणानुसारेणाह **चोदित इति शेष इति** । अस्य मैत्रेय्या ज्ञानहानिमाशङ्क्येति । अस्य मुक्तस्य विषये मैत्रेय्या ज्ञानहानिमाशङ्क्य तद्विषयकशङ्का तया कारिता । तस्यास्तादृशशङ्कामुत्पादयित्वेति यावदित्यर्थः ।

**कं०रा०**— **उच्छित्तेरभावोऽनुच्छित्तिरिति** । यद्यपि प्रसज्यप्रतिषेधार्थनञः प्रतिषेधार्थत्वान्नायं निर्देशो ज्ञापक इति । तथात्वे नञिवयुक्तन्यायेन अकर्तरीत्यनेनैव कर्तृव्यतिरिक्तस्य कारकस्य लब्धतया कारकग्रहणवैयर्थ्यापत्तेः । उच्छित्तेरभावोऽनुच्छित्तिरित्येतदुपलक्षणम्, अर्थाभावे अव्ययीभावसमासमाश्रित्य उच्छित्तेरभावः अनुच्छित्तिर्धर्मः यस्यासौ अनुच्छित्तिधर्म इति शक्यते वक्तुमित्यपि द्रष्टव्यम् ॥ **कथमेतन्नियामकमिति** । अनुच्छित्तिधर्मेति वाक्यस्य उक्तरीत्या अर्थान्तरपरत्वसम्भवात् कथमेतद्वाक्यं न प्रेत्य संज्ञास्तीत्यस्य मुक्तविषयकज्ञाननिषेधपरत्वमेव न तु तत्कर्तृकज्ञाननिषेधपरत्वमिति व्याख्याने नियामकमित्यर्थः ॥ **अपवृज्यत इति** । मुक्तो भवतीत्यर्थः ॥ **संज्ञानमिति** ॥ **आतश्चोपसर्ग इति** । समुपसर्गात् ज्ञाधातोभवि अच्प्रत्यये निष्पन्नस्य संज्ञाशब्दस्य ज्ञानमर्थ इति भावः । मोहान्तमापिपदित्यस्य मोहाख्यं नाशमापिपत् प्रापयामासेत्यर्थो बृहदारण्यकभाष्योक्तो द्रष्टव्यः । आप्लृ व्याप्तावित्यस्मात् णौ चङि ह्रस्वे द्वितीयस्यैकाचः पिशब्दस्य द्वित्वे आडागमे च आपिपदिति रूपम् ॥ **आशङ्क्येति** । णिजन्तात् ल्यप्प्रत्यय इति । 'णेरनिटी'ति ल्यपि परतो णिलोपे आशङ्क्येति रूपम् । तथाच शङ्कयित्वेत्यर्थः । न चैवं ण्यन्तादापेः क्त्वो ल्यपि प्राप्येत्येव रूपं स्यान्न तु प्रापय्येति रूपमिति वाच्यम् । विभाषाप इत्यापः परस्य णेः पाक्षिकायादेशस्य विहितत्वेन प्रापय्येति रूपस्याप्युपपत्तेः । प्रशमय्य परमय्य प्रणमय्य प्रभिदय्य प्रगणय्येत्यादौ ल्यपि लघुपूर्वादिति नित्यमयादेशः ह्रस्वलोपाल्लोपादीनामसिद्धत्वं न भवति । असमानाश्रयत्वादिति काशिकोक्तेः ॥ **अस्य मैत्रेय्येति** । मुक्तस्य ज्ञानहानिं मैत्रेय्या शङ्कयित्वोचिवानिति योजनेत्यर्थः ।

**शे०चं०**— अत्र पक्षे सामान्यस्य धर्मशब्दस्य विशेषपरत्वं कल्पनीयं भवतीत्यपरितोषादाह **यद्वेति** ॥ **नियामकमिति** । न प्रेत्येत्यस्य मुक्तविषयकज्ञानप्रतिषेधार्थत्व इति शेषः ॥ **विज्ञानमूर्तिरिति** । 'मूर्तौ घन' इति स्मरणादिति भावः । वाक्येनेत्यस्येत्यर्थमुक्तवत्येत्यनेन सम्बन्धः । नन्वाशङ्कां प्रति मैत्रेय्याः कर्तृत्वात् स्वरूपानाशवचनं प्रति च याज्ञवल्क्यस्य कर्तृत्वात् असमानकर्तृकत्वेन त्वाप्रत्ययाप्रसङ्गादाशङ्क्येति तदादेशस्य ल्यपोऽनुपपत्तिरित्यतोऽत्र चोदित इति शेषपूरणेनाशङ्काचोदनयोर्मैत्रेयीकर्तृकत्वेन समानकर्तृकतालाभान्नानुपपत्तिरिति भावेन शेषं पूरयति **चोदित इति शेष इति** ।

उक्तयोजनायां चोदित इति शेषः पूरणीयो भवतीत्यपरितोषात् तमनाश्रित्य प्रकारान्तरेण योजनामाह **यद्वेति** ॥ **णिजन्तादिति** । अन्तर्भूतण्यर्थादित्यर्थः । **अस्य** मुक्तस्य ज्ञानहानिमिति सम्बन्धः । **वचनलिङ्गेनेति** । शङ्काकार्यस्य वचनस्य तज्ज्ञापकत्वं सुप्रसिद्धमिति आद्यहिशब्दार्थ इति भावः ।

**स०व्र०**— नन्वाशङ्क्येति क्त्वाप्रत्ययः कथम् । आशङ्कां प्रति मैत्रेय्याः कर्तृत्वात् स्वरूपनाशवचनं प्रति च याज्ञवल्क्यस्य कर्तृत्वात् । ततो न समानकर्तृत्वमित्यत आह **चोदित इति शेष इति** । शेषपूरणेऽपि न दोष इत्याह **यद्वेति** ।

* * *

**९१ सु०— ज्ञानविनाशवचनं मोहकमित्याक्षेपे स्वरूपानाशोऽसङ्गतः कथमुक्त इत्यत आह ज्ञानरूपस्येति ।**

**अनु०— ज्ञानरूपस्य विज्ञाननाशस्तन्नाश एव यत् ।**
**इति**

**यत् यस्मात् ज्ञानरूपः तावदात्मा तस्य च विज्ञाननाशः नाम तन्नाश एव । न च आत्मनाशोऽस्ति । तथा सति मुक्तेरपुरुषार्थत्वप्रसङ्गात् । अतो न ज्ञाननाशोऽस्ति । अत एव न मद्वचनं तदर्थम् । किं त्वमुक्तानां मुक्तविषये संज्ञा नास्ति, मुक्तानामेव वा वृत्तिरूपा संज्ञा नास्तीत्यादिरेव मद्वचनार्थ इत्यभिप्रायवान् स्वरूपानाशमूचिवानिति सम्बन्धः ।**

**यादु०— संज्ञा नास्तीत्यादेरेवेति** आदिपदेन 'मुक्तानां संज्ञाप्यन्यैः न ज्ञायते शास्त्रं विने'ति बृहद्भाष्योक्तार्थस्य सङ्ग्रहः ।

**वं०प०— अत एव** ज्ञाननाशाभावादेव । **मद्वचनं** न मे प्रेत्य संज्ञाऽस्तीति वचनम् । **तदर्थकं** ज्ञाननाशार्थकम् ।

**कं०रा०— तदर्थमिति** । ज्ञाननाशार्थकमित्यर्थः ।

**शे०चं०— कथमुक्त इति** । अविनाशीत्यनेनेति शेषः । इत्यादिरेवेत्यादिपदेन 'मुक्तानां संज्ञाऽप्यन्यैः न ज्ञायते शास्त्रं विने'ति बृहद्भाष्योक्तार्थस्य सङ्ग्रहः ।

९२ **सु०**— अस्त्वेवं सङ्गतिः तथाऽपि ज्ञानं न नश्यतीति साक्षादनुक्त्वा एवं वचनं किमर्थमित्यत आह **शून्येति** ।

**अनु०— शून्यमतोच्छित्त्यै**

**न केवलमत्र प्रमेयनिरूपणमात्रार्थं प्रवृत्तो याज्ञवल्क्यः किन्तु परी(क्षायां)क्षया । अत एव न प्रेत्य ज्ञायत इति विशदमनुक्त्वा शङ्कोत्पादनाय न प्रेत्य संज्ञाऽस्तीति साधारणं वाक्यमाह । परीक्षा च स्वानभिमतनिरासरूपा । अत एवमुत्तरे दत्ते शून्यमतस्यात्मनाशलक्षणस्य निरासोऽपि कृतो भवतीति तदर्थं स्वरूपानाशमूचिवान् ।**

**परि०— परीक्षयेति** । प्रमेयनिर्णयार्थमित्यनुषङ्गः ॥ **अत एवेति** । परीक्षापूर्वं निरूपयितुं प्रवृत्तत्वादेव इत्यर्थः ।

**वं०प०— एवं वचनमिति** । 'अविनाशी वा अरेऽयमात्मे'त्येवमात्मनाशाभावद्वारा ज्ञानाविनाशवचनमित्यर्थः ।

**कं०रा०— अत एवेति** । परीक्षया प्रमेयनिरूपणार्थं प्रवृत्तत्वादेव याज्ञवल्क्यो न प्रेत्य ज्ञायत इति मुक्तकर्मकज्ञानाभावमेव विशदत्वेनानुक्त्वा शङ्कोत्पादनाय न प्रेत्य संज्ञाऽस्तीति साधारणं वाक्यमाहेत्यर्थः ॥ **शून्यमतस्येति** । वादिनोः शून्यमायिनोरित्येतद्व्याख्यानावसरे शून्यशब्देन तदङ्गीकारवान् लक्ष्यत इत्युक्तत्वात् शून्यशब्देन शून्यवादी लक्ष्यते । अर्श आदिभ्योऽजिति मत्वर्थीयाच्प्रत्ययान्तेन शून्यशब्देन तद्वादी अभिधीयते वा । पक्षद्वयेऽपि शून्यवाद्यभिमतस्येत्यर्थः ।

* * *

९३ **सु०**— यदर्थमादितो वाक्यं व्याख्यातं तदिदानीं अनुच्छित्तिधर्मेत्येतद्व्याचष्टे **पुनरिति** ।

**अनु०— पुनरानन्दपूर्वकान् ।**
**धर्मानाहाप्यनुच्छिन्नान्**

**स्वरूपानाशमुक्त्वा पुनः अपि मुक्तस्य आनन्दपूर्वकान् धर्माननुच्छिन्नान् आह याज्ञवल्क्यः । स्वरूपानाशोक्त्यैव धर्मानुच्छित्तिसिद्धौ पुनरुक्तिरियमित्यत उक्तम् आनन्द-**

**पूर्वकानिति** । वाक्योपक्रमे विज्ञानघन एवेति विज्ञानस्यात्मस्वरूपत्वमुक्तं न पुनरानन्दपूर्वकाणाम् । अतः स्वरूपानाशोक्त्या विज्ञानाविनाश एव सुज्ञानो नानन्दाद्यविनाशः । अतः तेऽपि विज्ञानवत् आत्मस्वरूपभूता एव नोच्छिद्यन्ते इत्यर्थप्रतिपत्त्यर्थमिदं वाक्यमिति ।

**परि०— यदर्थमिति** । अनुच्छित्तिधर्मेति वाक्यार्थनिर्णयार्थम् । **आदितः** 'विज्ञानघन एवैतेभ्य इत्यादिवाक्यमाशङ्क्ये'त्यादिना व्याख्यातमित्यर्थः ।

**वं०प०— धर्मानुच्छित्तिसिद्धाविति** । ज्ञानवदानन्दादिधर्माणामप्यात्मस्वरूपत्वेन तत्स्वरूपाविनाशसिद्धौ तत्स्वरूपभूतानां तेषामप्यविनाशः सिद्ध एवेत्यर्थः ।

* * *

९४ **सु०— तात्पर्यान्तरं सूचयति तार्किकैरिति** ।

**अनु०— तार्किकैर्विनिवारितान्** ।

उक्तमेतत्परीक्षायां प्रवृत्तो याज्ञवल्क्य इति । अतः स्वरूपाविनाशमङ्गीकृत्य ये तार्किका बुद्धिसुखादीन् धर्मान् मुक्तस्य विनिवारयन्ति तेऽप्यसमीचीनवादिन इति ज्ञानायेदं वाक्यमिति न पौनरुक्त्यदोषः ।

ननु स्वरूपाविनाशोक्त्या धर्माविनाशोऽपि सिद्ध एव । सत्यम् । स्वमतरीत्या तत् । तार्किकास्तु न ज्ञानसुखादीनामात्मस्वरूपत्वं मन्यन्ते । अतः किमिदानीं मोक्षप्रसङ्गे तेषामात्मस्वरूपत्वोपपादनेन । आत्मस्वरूपप्रक्रियायां तदपि वक्तव्यमित्याशयेन अनुच्छित्तिरेवोक्तेति ।

इदमत्राकूतम् । अनुच्छित्तिधर्मेति यदि सङ्ख्यादिधर्माणामनुच्छित्तिरुक्ता स्यात् तदा असङ्गतमिदं वाक्यम् आपद्येत । ज्ञानविनाशवचनं मोह इत्याक्षेपे सङ्ख्याद्यविनाशकथनस्य सङ्गत्यदर्शनात् । यदि च स्वरूपाविनाशोऽनेनोक्त इति स्यात् तदा तस्य पूर्ववाक्येनैवोक्तत्वात् पुनरुक्तिदोषः स्यात् । अस्मत्पक्षे त्वस्ति सर्वेषां वाक्यानामुक्तरीत्या साफल्यम् । तस्मात् ज्ञानानन्दादिगुणानामेवानुच्छित्तिमाह इदं वाक्यमिति गम्यते । तद्बलाच्च न प्रेत्य संज्ञाऽस्तीत्येतदपि उक्तार्थमेवेति ।

**परि०**— **तात्पर्यान्तरमिति** । नामुक्तज्ञेयतेत्युक्तेऽर्थे ज्ञापनरूपं तात्पर्यं 'धर्मानुच्छित्तिमेवास्ये'त्यनेनोक्तम् । तदपेक्षया तात्पर्यान्तरमित्यर्थः । (तार्किकैर्विनिवारितानिति किमर्थमुक्तं अनुच्छित्तिधर्मेत्युक्त्यैव मैत्रेय्या उत्तरितत्वादित्यत आह **तार्किकैरितीति**) ॥ **स्वमतरीत्येति** । सिद्ध एवेत्यन्वयः ॥ ननु 'सङ्ख्यादिधर्माणां अनुच्छित्तिं वक्तीत्यपि शक्यते वक्तुमि'त्यादिना कृतचोद्यस्य किमनेनोत्तरमुक्तमित्यत आह **इदमत्राकूतमिति** । अभिप्राय इत्यर्थः ॥ **पूर्ववाक्येनैवेति** । अविनाशीत्यनेनैवेत्यर्थः ॥ **उक्तरीत्येति** । ज्ञानरूपस्येत्यादिनोक्तरीत्येत्यर्थः ॥ **उक्तेति** । न मुक्तज्ञेयतेत्युक्तार्थमित्यर्थः ।

**यादु०**— **पूर्ववाक्येनेति** । 'अविनाशी वा अरे अयमात्मे'ति वाक्येनेत्यर्थः ।

**वं०प०**— नन्वानन्दादिधर्मा अपि विज्ञानवत् आत्मस्वरूपभूता एव नोच्छिद्यन्त इत्यर्थप्रतिपत्त्यर्थमिदं वाक्यमित्युक्तमप्ययुक्तम् । स्वरूपाविनाशोक्त्यैव तदभिन्नानन्दादिधर्माविनाशप्रतिपत्तिसम्भवेनानुच्छित्तिधर्मेति वाक्यं पुनरुक्तत्वाद्व्यर्थमेवेति पूर्वोक्तमाशङ्क्य पहिरति **ननु स्वरूपेति** ॥ **स्वमतेति** । अस्माभिस्तेषां धर्माणामात्मस्वरूपत्वाङ्गीकारादित्यर्थः । तर्हि तान्प्रत्यात्मस्वरूपत्वमुपपाद्यतामिति चेत् तत्राह **किमिदानीमिति** ॥ **आत्मस्वरूपक्रियायामिति** । धर्माणामात्मस्वरूपत्वप्रतिपादनप्रकरण इत्यर्थः । इदानीं तु मोक्षप्रसङ्ग एव प्रवृत्तोऽस्तीति भावः ।

**कं०रा०**— **स्वमतरीत्या तदिति** । स्वमते धर्माणामात्मस्वरूपत्वादिति भावः ॥ **यदि चेति** । अनुच्छित्तिधर्मेत्यनेनानुच्छित्तिर्धर्मो यस्येत्यात्मस्वरूपाविनाश एवोक्त इति स्यात् तदा स्वरूपाविनाशस्याविनाशी वा अरे अयमात्मेति पूर्ववाक्यैनैवोक्तत्वात् पुनरुक्तिदोषः स्यादित्यर्थः ॥ **एतदपीति** । अनुच्छितिधर्मेति वाक्यं यथाऽस्मदुक्तार्थपरमेव तथा प्रेत्य संज्ञाऽस्तीति वाक्यमप्यस्मदुक्तार्थपरमेवेत्यपिशब्देनाभिप्रैति ।

**शे०चं०**— **पूर्ववाक्येनेति** । अविनाशी वा अरेऽयमात्मेत्यनेनेत्यर्थः ॥ **उक्तरीत्येति** । शून्यमतोच्छित्या इत्याद्युक्तरीत्येत्यर्थः ।

**स०व्र०**— **उक्तरीत्या** शून्यमतोच्छित्या इत्युक्तरीत्या ।

**॥ इति 'अयमात्माऽनुच्छित्तिधर्मा' इति श्रुत्या मुक्ते न ज्ञानप्रतिषेधः ॥**

* * *

॥ अथ 'माध्यन्दिन'श्रुत्या मुक्तस्य विषयभोगसमर्थनम् ॥

९५ **सु०— इतश्चैतदुक्तार्थमेवेत्याह मात्रेति ।**

## अनु०— मात्रासंसर्गमप्याह तथा

**यथा धर्मानुच्छित्तिमाह तथा मीयन्त इति मात्रा रूपादयो विषयास्तेषां संसर्गम् उपभोगलक्षणं अपि अस्य आह 'मात्रासंसर्गस्त्वस्य भवती'ति वाक्येन । ततो न ज्ञान-विलोपो व्याख्यातुं शक्यते । नेदं वाक्यं श्रुतावुपलभ्यत इत्यत उक्तम् माध्यन्दिनश्रुतिरिति ।**

## माध्यन्दिनश्रुतिः ।

**मैत्रेयीयाज्ञवल्क्यसंवादरूपमिदं प्रकरणं काण्वमाध्यन्दिनश्रुत्योः समानम् । इदं तु वाक्यं यद्यपि काण्वश्रुतौ नास्ति तथाऽपि माध्यन्दिनश्रुतावस्त्येवेति ।**

**परि०— रूपादय इति** । रूपरसगन्धस्पर्शशब्दाः । प्रधानचक्षुर्विषयत्वात् रूपस्य आदितो ग्रहणम् ।

**यादु०— रूपादय इति** । यद्यपि मात्राणां मध्ये शब्दस्यैवादित्वाच्छब्दादय इत्येव वक्तव्यं तथा-ऽप्युत्तरवाक्य इतर इतरं पश्यतीति चाक्षुषज्ञानविषयस्य रूपस्यैवादौ वक्ष्यमाणत्वादत्रापि रूपस्यैवादित्वेन वचन-मित्यवगन्तव्यम् ।

**वं०प०— इतश्चैतदिति** । न प्रेत्य संज्ञाऽस्तीति वाक्यमित्यर्थः । विज्ञातारमिति वाक्यप्रतिपाद्यो जीव इत्युक्तम् ।

**कं०रा०— उपभोगलक्षणमिति** । अनुभवरूपमित्यर्थः ।

**शे०चं०— रूपादय इति** । यद्यपि मात्राणां मध्ये शब्दस्यैवादित्वाच्छब्दादय इत्येव वक्तुमुचितम् । तथाऽप्युत्तरवाक्ये 'इतर इतरं पश्यती'ति चाक्षुषज्ञानविषयस्य रूपस्यैवादौ वक्ष्यमाणत्वात् अत्रापि तस्यैवादित्वेन वचनमिति मन्तव्यम् ।

॥ इति 'माध्यन्दिन'श्रुत्या मुक्तस्य विषयभोगसमर्थनम् ॥

* * *

॥ अथ मोक्षे विषयोपभोगाभावमतस्य श्रुतिनिन्द्यत्वम् ॥

९६ सु०— इतोऽपि संज्ञा नास्तीति वाक्यं उक्तार्थमेवेत्याह **आचिक्षेपेति** ।

**अनु०— आचिक्षेप मतं तच्च यस्मिन्न विषयादनम् ।**

**श्रुतिरिति वक्ष्यति । यत्र हि 'द्वैतमिव भवती'त्यादिरुत्तरा श्रुतिः यस्मिन्मते मुक्तस्य न विषयादनं रूपादिविषयभोगो नास्तीत्यभ्युपगमः तन्मतं आचिक्षेप निन्दितवतीति । ततश्च न तद्वाक्यं मुक्तस्य ज्ञानाभावं प्रतिपादयति । न हि ज्ञानरहितस्य घटकल्पस्य विषयसंसर्गो वा तदभावनिन्दा वा उपपद्यते । कथमाचिक्षेपेति चेत् । उच्यते । यत्र यदि, द्वैतं भवति तत् तर्ह्येव, इतर इतरं पश्यतीत्यादिना व्याप्तिमभिधाय हिशब्देन तस्याः प्रमितत्वं चोक्त्वा यत्र यदि, तु, अस्यात्मनोऽपेक्षितं सर्वं आत्मैवाभूत् स्वव्यतिरिक्तं न स्यात् । तत् तर्हि केन साधनेन कम् अर्थं पश्येत् । न केनापि किञ्चिदित्यनिष्टप्रसङ्गोऽभिधीयते ।**

**परि०—** 'आचिक्षेपे'त्यत्र कर्त्राकाङ्क्षायामाह **श्रुतिरिति** । **वक्ष्यतीति** । उत्तरार्धे ॥ **तदभावेति** । विषयभोगाभावनिन्देत्यर्थः ॥ **हिशब्देनेति** । यत्र हीति हिशब्देनेत्यर्थः । 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदि'ति श्रुत्यर्थमाह **यत्र यदीत्यादिना** ।

**कं०रा०—** यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदित्युत्तरवाक्येन अनिष्टप्रसञ्जनं क्रियते । यद्यात्मव्यतिरिक्तं किमपि न स्यात् तर्हि केन कं पश्येन्न केनापि किञ्चिदिति तत्रात्मव्यतिरिक्तस्याभाव आपादको विषयानुभवाभावस्त्वापाद्यः । अनयोर्व्यतिरेकव्याप्तिर्यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीति पूर्ववाक्येन प्रतिपाद्यत इत्युक्तम् । 'व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परमि'ति न्यायेन आपाद्यव्यतिरेकरूपविषयानुभवस्य व्याप्यत्वेन प्रथमं वक्तव्यत्वादापादकव्यतिरेकरूपद्वैतसद्भावस्य वक्तव्यत्वेन पश्चाद्वक्तव्यत्वात् । प्रकृते च यत्र हि द्वैतमिव भवतीति द्वैतसद्भावस्य प्रथममुक्तत्वात् तदितर इतरं पश्यतीति विषयानुभवस्य च पश्चादुक्तत्वात् । एवं चाभिमतव्याप्तेरप्रतिभासनादित्यतः पूर्ववाक्यमेव शब्दाध्याहारेण योजयति **तत्र यदि द्वैतं भवति तत्तर्ह्येवेतर इतरं पश्यतीत्यादिनेति** । यथा यदि वह्निमत्त्वं भवति तर्ह्येव धूमवत्त्वमित्युक्ते धूमवत्त्वस्य व्याप्यत्वं वह्निमत्त्वस्य व्यापकत्वं च प्रतिभासते । तथाऽत्रापि यदि द्वैतं भवति तर्ह्येवेतर इतरं पश्यतीत्युक्ते आपाद्यव्यतिरेकरूपविषयानुभवस्य व्याप्यतापादनव्यतिरेकरूपद्वैतसद्भावस्य व्यापकता च प्रतिभासत एवेति यत्र हीत्यादिवाक्येन आपाद्यापादकयोर्व्यतिरेकव्याप्तिरभिधीयत इत्येतद्युक्तमेवेति भावः ॥ **हिशब्देनेति** । यत्र हि

द्वैतमिवेति वाक्यस्थेन हिशब्देन व्यतिरेकव्याप्तेः प्रमितत्वं चोक्तेत्यर्थः । सर्वमात्मैवाभूदित्यस्य पर्यवसितार्थमाह **स्वव्यतिरिक्तं न स्यादिति** ।

**शे०चं०— वक्ष्यतीति** । घ्राणादिभोगाभावस्येत्युत्तरवाक्य इति शेषः ॥ **व्याप्तिमिति** । वक्ष्यमाण-प्रसङ्गाङ्गभूतां व्यतिरेकव्याप्तिमित्यर्थः ।

**वा०र०—** मूले न विषयादनमित्यनूद्य आनन्दादिविषयभोगो नास्तीति व्याख्येयशेषं पूरयति **इत्य-भ्युपगम इति** । आचिक्षेपेत्यादिनोक्तार्थस्य प्रकृतोपयोगमितोऽपि संज्ञेत्यनेन प्राक्सूचितं दर्शयति मूलम् । मानाभावेऽपि भोगाभावनिन्दा कुतो न युक्तेत्यत आह **न हि ज्ञानेति मूलम्** । विषसंसर्गप्रसक्तौ हि तदभाव-निन्दा कार्या । यदा तु मुक्तस्य ज्ञानाभावेन घटादिकल्पना अङ्गीकृता तदा तस्य विषयसम्बन्धस्यैवाप्रसक्तेः तदभावनिन्दाऽपि न सम्भवतीत्यर्थः । एवं व्यतिरेकव्याप्तिमभिधायेत्येतच्छ्रुत्यर्थकथनस्थलीयतत्त्वनिर्णयटीकां मनसि कृत्वाऽऽह **व्यतिरेकव्याप्तिमिति** । यद्यपि भेदाभावदर्शनाभावरूपापादकापाद्ययोर्व्यतिरेकभूतभेददर्शनयो-र्व्याप्तिरापाद्यव्यतिरेकपूर्वैव वक्तव्या । तथापि वह्निमानेव धूमवानित्यादौ व्यभिचाराभावप्रदर्शनमुखेन धूमाग्न्योरेव व्याप्तिप्रदर्शनवत् प्रकृतेऽपि भेदसद्भाव एव दर्शनादिकमिति प्रतिपादनस्याभिप्रेतत्वाद्युक्तापाद्यव्यतिरेकपुरःसर-व्याप्तिरत्रापीत्याशयेनोक्तम् । मूले **तर्ह्येवेतर इति** । अधिकं तत्त्वनिर्णयटीकाव्याख्याप्रपञ्चे । यत्र त्वित्येतदनूद्य व्याख्यानपूर्वकमनुवदति **यत्र यदि त्विति** । सर्वमित्येतद्योग्यतया व्याचष्टे **अपेक्षितमिति** । तर्कानुसारेण अभूदित्येतल्लिङार्थकमित्याश्रित्य आत्मैवेत्येव लब्धमर्थं दर्शयति **स्वव्यतिरिक्तमिति** मूलं शङ्कते ।

* * *

**९७ सु०— एवं तर्हि यदि मुक्तौ द्वैतं न स्यात् तदा रूपदर्शनादिकं न भवेदिति तर्कितं भवति । तथा च द्वैताभावमतमनया आक्षिप्तं, न विषयभोगाभावमतमित्यत आह घ्राणादीति ।**

## अनु०— घ्राणादिभोगाभावस्य त्वनिष्टत्वहृदा श्रुतिः ।

**घ्राणादिना गन्धादेर्भोगो घ्राणादिभोगः । केन कमिति करणस्य कर्मणश्चोक्त-त्वात् । तुशब्दो विशेषार्थः । हृदा अभिप्रायेण । पूर्वेणैव सम्बन्धः ।**

**सत्यमेतत् शून्यमतं तार्किकमतं च निराकृत्य अद्वैतमतमनया श्रुत्या निराक्रियत इति । तच्च विषयभोगाभावप्रसञ्जनेन । प्रसञ्जनीयं तद्भवति यदनिष्टम् । अतोऽद्वैतमते**

**घ्राणादिभोगाभावं प्रसञ्जयन्ती श्रुतिः तस्यानिष्टत्वमभिप्रैतीति गम्यते । अनिष्टं च तदुच्यते यदप्रामाणिकं प्रमाणविरुद्धं च । अतो विषयभोगाभावनिन्दा श्रुत्यभिप्रायव्याप्ता भवत्येवेति ।**

**परि०— तुशब्दो विशेषार्थ इति** । भोगाभावेऽनिष्टत्वप्रसङ्गोऽयं न त्वद्वैतमताक्षेपपरमिति तर्कं विशेषयितुं तुशब्द इत्यर्थः । अद्वैतमेवानया श्रुत्याऽऽक्षिप्तं न विषयभोगाभावमतमिति शङ्कितस्य किमुत्तरं जातमित्यत आह **सत्यमेतदित्यादिना** ॥ **अनयेति** । यत्र हि द्वैतमिवेति श्रुत्येत्यर्थः ॥ **तच्चेति** । निराकरणं विषयभोगाभावापादनेन कर्तव्यमित्यर्थः ।

**कं०रा०— द्वैतमिति** । द्वयोर्भावो द्विता द्विताशब्दात् तस्येदमित्यणि 'तद्धितेष्वचामादेरि'त्यादिवृद्धौ यस्येति चेत्याकारलोपे च निष्पन्नस्य द्वैतशब्दस्य द्वित्वसङ्ख्यापूरणं द्वितीयमर्थः । **तर्कितं** प्रसञ्जितम् । घ्राणादिभोगेत्यत्र षष्ठीतत्पुरुषं वारयति **घ्राणादिनेति** । 'कर्तृकरणे कृता बहुलमि'ति तृतीयासमासे घ्राणादिना भोगो घ्राणादिभोगः । गन्धादेरिति तु योग्यतावशाल्लभ्यते । भोगशब्देनानुभव उच्यते । ननु घ्राणादिकरणगन्धादिविषयकानुभवाभावस्यानिष्टत्वाभिप्रायेण श्रुतिस्तन्मतमाचिक्षेपेति कथं ज्ञायत इत्यत आह **केनेति** । केन कं पश्येत् केन कं जिघ्रेदित्यादौ केनेत्यनेन करणस्य कमित्यनेन विषयस्य चोक्तत्वात् । घ्राणादिकरणगन्धादिविषयकानुभवाभावस्य निष्टत्वाभिप्रायेण श्रुतिः मुक्तस्य विषयभोगानभ्युपगन्तृमतमाचिक्षेपेति ज्ञायत इति भावः । एतेनैतन्निरस्तम् । घ्राणादिभोगेति मूले घ्राणादीनां भोग इति षष्ठीतत्पुरुषाश्रयणेऽपि षष्ठ्यर्थस्यान्यस्य सम्बन्धस्यानुपपत्तेर्घ्राणादिकरणत्वरूपसम्बन्ध एव सेत्स्यतीति श्रुतौ केन कं पश्येदित्यादिना घ्राणादिकरणकत्वस्य कण्ठत उक्तत्वेन मूलेऽपि तथैव वक्तव्यत्वात् ॥ **पूर्वेणैवेति** । 'आचिक्षेप मतं तस्ये'ति पूर्ववाक्येनैवान्वय इत्यर्थः ॥ **शून्यमतं तार्किकमतं च निराकृत्येति** । 'अविनाशी वा अरे अयमात्मे'त्यनेन शून्यमतं निराकृत्य 'अनुच्छित्तिधर्मे'त्यनेन तार्किकमतं च निराकृत्येत्यर्थः ।

**शे०चं०— पूर्वेणैव सम्बन्ध इति** । आचिक्षेपेति पूर्वेणैव सम्बन्ध इत्यर्थः ।

**वा०र०— एवं तर्हीति** मूलम् । घ्राणादीनां भोगहेतुत्वेऽपि तत्कर्मत्वाभावात् घ्राणादिभोग इत्यर्थायोग इत्यतो घ्राणादिभोग इत्येवं शाकपार्थिवादिसमासमाश्रित्य तथापि भोगकर्मानुक्तिप्रयुक्तन्यूनताशङ्कापरिहाराय कर्मप्रदर्शनं च कुर्वन्विवक्षितार्थं दर्शयति **घ्राणादिनेति** मूलम् । अर्थस्यान्यस्य प्रकृते विवक्षित्वे ज्ञापकमाह **केन कमितीति** ॥

**॥ इति मोक्षे विषयोपभोगाभावमतस्य श्रुतिनिन्द्यत्वम् ॥**

* * *

॥ अथ 'यत्र हि' श्रुतिरपि विषयभोगाभावमतं दूषयति ॥

९८ सु०— भवेदेवमर्थापत्त्या विषयभोगाभावनिन्दावगमो यद्यद्वैतमते विषयभोगाभावः प्रसञ्जनीयः स्यात् । न चैवम् । अपि तर्हि वस्तुस्थितिकथनमेतत् । तथा हि । अयमात्मा अविनाशी अत एव अनुच्छित्तिः तस्य धर्मः । मुक्तौ मात्राभिरसंसर्गः तस्य भवति । कुतः । यत्र हि संसारे द्वैतमिव भवति तत्तत्रेतर इतरं पश्यतीत्यादि । यत्र तु मुक्तावस्य सर्वमात्मैवाभूत् स्वव्यतिरिक्तं किमपि नास्ति तत्र केन कं पश्येन्न केनापि न किमपी-त्यद्वैतिनः । तत्राह **येनेति** ।

**अनु०— येनेदमखिलं वेद विज्ञातारं स्वमेव च ।**
**केन तं च विजानीयादित्यनिष्टं च (हि) सर्वथा ॥**

'येनेदमखिलं वेद तं च केन विजानीयात् विज्ञातारं च केन विजानीयादि'त्यनेन 'येनेदं सर्वं विजानाति तं च केन विजानीयात् विज्ञातारमरे केन विजानीयादि'ति वाक्य-द्वयमुपादत्ते । विज्ञातारमित्येतत् स्वमेवेति व्याचष्टे । प्रथमवाक्यविषयं तूत्तरत्र वक्ष्यति । इति वाक्यद्वयोक्तं विष्णुज्ञानराहित्यं स्वज्ञानराहित्यं च ।

एतदुक्तं भवति । अत्रान्ते येनेदमिति वाक्यद्वयं श्रूयते । तदर्थः परमेश्वरज्ञानाभावः स्वज्ञानाभावश्च तावदनिष्टः, न वास्तवः । ततस्तत्प्रसङ्गकथनमेवेति ज्ञायते । तत्साहचर्यात् केन कं पश्येदित्यादिकमपि प्रसञ्जनमेव, न वस्तुस्थितिकथनमिति ज्ञातव्यमिति ।

**परि०**— शङ्कते **भवेदेवमिति** ॥ **अर्थापत्त्येति** । विषयभोगाभावस्यापादनान्यथानुपपत्ति-रूपार्थापत्त्येत्यर्थः ॥ **इत्यद्वैतिन इति** । आहुरिति योज्यम् ॥ **उत्तरत्रेति** । उत्तरश्लोके । 'इत्यनिष्टं हि सर्वथे'त्यत्राकाङ्क्षां पूरयति **इति वाक्यद्वयोक्तमित्यादि** । (भवेदेवमितिकृ)प्रकृतचोद्यस्य येनेद-मिति मूलेनोत्तरस्यास्पष्टत्वादाह **एतदुक्तमिति** ।

**यादु०**— **उत्तरत्र वक्ष्यतीति** । उत्तरश्लोके वक्ष्यतीत्यर्थः ।

**वं०प०**— येनेदमिति वाक्यप्रतिपाद्यः क इत्यत आह **प्रथमेति** । 'नाखिलज्ञापको विष्णुरि'त्यत्रेत्यर्थः ।

**कं०रा०—** 'मात्रासंसर्गस्तस्य भवती'ति माध्यन्दिनश्रुतेरद्वैत्यभिमतमर्थमाह **मुक्तौ मात्राभिरिति** ॥ **प्रथमवाक्यविषयमिति** । विज्ञातारमरे केन विजानीयादिति द्वितीयवाक्यविषयविज्ञातारं स्वमेवेति स्वशब्दे-नोक्तिः । येनेदं सर्वं विजानाति तं च केन विजानीयादिति प्रथमवाक्यविषयं तु 'नाखिलज्ञापको विष्णुरज्ञेय' इत्युत्तरवाक्ये वक्ष्यतीत्यर्थः । नन्वित्यनिष्टं हि सर्वथेत्यत्र इतिशब्देनोदाहृतवाक्यद्वयं गृहीत्वा तस्यानिष्टत्व-मुच्यते । तच्चायुक्तम् । वाक्यद्वयस्यानिष्टरूपत्वाभावादित्यतो व्याचष्टे **इति वाक्येति** । इति वाक्यद्वयोक्तं च किमित्याकाङ्क्षायामाह **विष्णुज्ञानराहित्यं स्वज्ञानराहित्यं चेति** ॥ **तत इति** । परमेश्वरज्ञानाभावस्वज्ञाना-भावयोरनिष्टत्वात् तद्वाक्यद्वयं प्रसङ्गकथनमेवेति ज्ञायत इत्यर्थः ॥ **प्रसञ्जनमेवेति** । प्रसङ्गकथनमेवेत्यर्थः ।

**शे०चं०—** **प्रथमेति** । येनेदं सर्वं विजानातीति प्रथमवाक्यविषयं 'नाखिलज्ञापको विष्णुरि'त्यादिना उत्तरत्र वक्ष्यतीत्यर्थः । नन्वेवमप्यविनाशीत्यादिवाक्यं वस्तुस्थितिकथनपरमिति शङ्कायाः कथं परिहार इत्यत आह **इदमुक्तं भवतीति** ॥ **तत्साहचर्यादिति** । तत्प्रकरणादित्यर्थः ।

**वा०र०—** **अर्थपत्त्येति** मूलम् । विषयभोगभावप्रसञ्जनायान्यथानुपपत्त्येत्यर्थः । अयमात्मेति वाक्यस्य माध्यन्दिनश्रुतिस्थताया अपि प्रागुक्तत्वात् तत्रत्यं मात्रासंसर्गत्वस्य भवतीति वाक्यमपि योजयति **मुक्तौ मात्राभिरिति** । अनेन नञध्याहारो योजितो भवति । एतत्सङ्ख्यासाङ्ख्यादिभिः प्रवर्तयितुमशक्येति तन्निरासपरोत्तरयेनेदमित्यनुभाष्यानर्थक्यमित्यतो नेयं तत्प्रवर्तितेति ब्रूमोऽपि त्वद्वैतिभिः प्रवर्तितेति । ततश्च लब्धावसरै-रद्वैतिभिः प्रवर्तितेयमाशङ्कोत्तरानुभाष्येण निराक्रियत इत्यतो न तद्वैयर्थ्यमित्याशयेनोक्तम् **इत्यद्वैतिन इति** ॥ **स्वयमेवेति व्याचष्टे चेति** मूलम् । वाक्यद्वयोपादानसमुच्चयार्थश्च शब्दः । **येनेदमिति वाक्यद्वयमिति** मूलम् । इत्यादि-वाक्यद्वयमित्यर्थः । प्रसञ्जनमेव तत्कथनमेवेत्यर्थः ।

**स०व्र०—** **प्रथमेति** । 'येनेदं सर्वं विजानाती'ति प्रथमवाक्यविषयं 'नाखिलज्ञापको विष्णुरि'त्या-दिनेति शेषः ।

**॥ इति 'यत्र हि' श्रुतिरपि विषयभोगाभावमतं दूषयति ॥**

* * *

**॥ अथ जीवब्रह्मणोः ज्ञेयत्वसमर्थनम् ॥**

**९९ सु०— नन्वीश्वरस्तावत् सर्वथाऽप्यविज्ञेय एव । यतो वाच इत्यादिश्रुतेः । जीवात्मा च न स्वविज्ञानी । एकस्यां क्रियायामेकस्यैव कर्तृकर्मभावस्य विरुद्धत्वात् । अतः परमेश्वरज्ञानाभावः स्वज्ञानाभावश्च कथमनिष्ट इत्यतः परमेश्वरस्य सर्वथाऽप्यविज्ञे-यत्वं तावन्निराकरोति नेति ।**

**अनु०— नाखिलज्ञापको विष्णुरज्ञेयो नियमेन हि ।**

अत्र **अखिलज्ञापक** इत्यनेन येनेदमिति वाक्यार्थमनूद्य विष्णुरिति तस्य विषयो दर्शितः । प्रागव्याख्यातत्वात् । विष्णुं विनैतद्वाक्यार्थस्यासम्भवात् । हिशब्दस्तावदर्थे । विष्णुः **नियमेन** सर्वथाऽपि **अज्ञेय** इति तावन्न भवति । कुत इत्यत आह **तदिति** ।

**तज्ज्ञानार्थं हि वेदानामखिलानां प्रवर्तनम् ।**

'सर्वे वेदा इत्यादेरि'ति शेषः । विष्णोः सर्वथाऽप्यज्ञेयत्वेऽखिलवैयर्थ्यप्रसङ्गात् यतो वाच इत्यादिकमन्यथा व्याख्येयमिति भावः ।

**परि०—** कुत उक्तविषयप्रदर्शनमित्यत आह **प्रागव्याख्यातत्वादिति** । तावदर्थे **तावच्छब्दार्थ** इत्यर्थः ॥ **इत्यादेरिति** । 'सर्वे वेदा यत्पदमामनन्ति', 'सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण' इत्यादिश्रुतेः इति भावः । **अन्यथाव्याख्येयमिति** । 'अद्भुतत्वादनिर्वाच्यमतर्क्याज्ञेयमेव चे'ति भाष्योक्तदिशेति भावः । **प्रसङ्गादिति** । आत्मविज्ञान एव विरोधस्य परेण प्रसञ्जितत्वेन तस्यैव प्रकृतत्वादिति भावः ।

**यादु०— अन्यथाव्याख्येयमिति** । साकल्येनाविज्ञेयत्वपरतया व्याख्येयमित्यर्थः ।

**कं०रा०— अत्रेति** । 'नाखिलज्ञापको विष्णुरज्ञेय' इत्यत्र अखिलज्ञापक इत्यनेन येनेदं सर्वं विजानातीति वाक्यार्थमनूद्य विष्णुरित्यनेन तस्य वाक्यस्य विषये दर्शित इत्यर्थः । विषयप्रदर्शनं कस्मात्क्रियत इत्यत आह **प्रागव्याख्यातत्वादिति** । ननु येनेदं सर्वं विजानातीत्यखिलज्ञापकत्वप्रतिपादकवाक्यस्य कश्चिदखिलज्ञापको विषयो भवेन्न तु विष्णुरेव विषय इत्यत्र नियामकमस्ति । अतः कथं विष्णोस्तद्वाक्यविषयत्वनिश्चय इत्यत आह **विष्णुं विनेति** । येनेदं सर्वं विजानातीत्येतद्वाक्यार्थस्याखिलज्ञापकत्वस्य विष्णुं विनाऽन्यत्रायोगाद्विष्णोरेव तद्वाक्यविषयत्वं निश्चीयत इति । एतच्चोपलक्षणम् । येनेदं सर्वं विजानातीत्युक्तस्य परायत्तविज्ञातृत्वस्य विज्ञातारं 'अरे केन विजानीयादि'त्यत्र विज्ञातृपदेन प्रत्यभिज्ञानाद्विज्ञातारमित्यस्य प्रागुक्तं स्वविषयत्वं निश्चीयत इत्यपि द्रष्टव्यम् ॥ **हिशब्द इति** । हिशब्दस्तावच्छब्दार्थे वर्तत इत्यर्थः । अखिलवेदानां विष्णुज्ञानार्थं प्रवर्तनमित्येतत्कस्मात् सिद्धमित्यतः शेषं पूरयति **सर्वे वेदा इति** । 'सर्वे वेदा यत्पदमामनन्ति' 'वेदैश्च सर्वैरहमेव वेद्य' इत्यागमादित्यर्थः ।

**शे०चं०—** विष्णुरेव येनेदमिति वाक्यविषयः कस्मादित्यत आह **विष्णुं विनेति** ॥ **तावदर्थ इति** । अव्ययानामनेकार्थत्वादिति भावः ॥ **अन्यथाव्याख्येयमिति** । साकल्येनाविज्ञेयत्वपरत्वेन व्याख्येयमित्यर्थः ।

वा०र०— मूले **सर्वे वेदा** इत्यादेरिति शेष इति । इत्यादेः प्रमाणादित्यर्थः ।

स०व्र०— विष्णुरेवैतद्विषयः कुत इत्यत्राह **विष्णुं विनेति** ।

* * *

१०० **सु०— एवं परमात्मनो ज्ञेयत्वमुपपाद्य जीवात्मनः स्वज्ञानमुपपादयति प्रत्यक्षमिति ।**

**अनु०— प्रत्यक्षमात्मविज्ञानाविरोधानुभवादपि ।**
**न स्वविज्ञानितायां च विरोधः कश्चनेयते ॥**

**क्रियाविशेषणमेतत् । आत्मविज्ञानं च अविरोधश्चेति द्वन्द्वः । अविरोधश्च प्रसङ्गादात्मा विज्ञान एव । तयोरनुभवः । स च प्रत्यक्षरूपः तस्मात् । अपिपदेन श्रुत्यादिग्रहणम् । स्वविज्ञानितायां जीवस्य कश्चन विरोधो नेयते । न काऽप्यनुपपत्तिः प्रतीयते । आत्मविज्ञानानुभवस्तावत् मामहं जानामीति साक्षिरूपः प्रसिद्ध एव । यथा घटमहं जानामीत्यत्र न काचिदनुपपत्तिः प्रतीयते । किं त्वनुपलम्भसनाथेन साक्षिणाऽनुपपत्त्यभाव एव साक्षात्क्रियते । तथा तदविशिष्टे मामहं जानामीति ज्ञानेऽपि । श्रुतयोऽपि 'अहमित्येव यो वेद्य' इत्याद्याः । यदि च आत्मा न स्वात्मानं जानीयात् तदा ममेदमिष्टसाधनमित्यादिज्ञानाभावात् तथाविधेच्छाप्रयत्नयोरप्यभावात् सर्वप्रवृत्तिनिवृत्तिविलोपप्रसङ्गः । स्वप्रकाशत्वं ज्ञानाश्रयतया प्रकाशमानत्वं च न स्वज्ञानातिरेकेणोपपद्यत इति ।**

**परि०— अनुपलम्भेति** । यद्यत्रानुपपत्तिः स्यात् तर्ह्युपलभ्येत नोपलभ्यत इत्यनुपलम्भसनाथेनेत्यर्थः ॥ **अहमितीति** । 'अहमित्येव यो वेद्यः स जीव इति कीर्तितः । स दुःखी स सुखी चैव स पात्रं बन्धमोक्षयोः' इत्याद्या इत्यर्थः । **अपिपदेन** श्रुत्यादिग्रहणमित्युक्तम् । तत्रादिपदार्थस्तर्कोऽपीति भावेनाह **यदि चेति** ॥ **ममेदमिष्टेति** । स्वात्मज्ञानाभावे ममेत्यस्मदर्थोपरक्ततयेष्टानिष्टज्ञानाभावादित्यर्थः ॥ **तथाविधेति** । फलमिदमिच्छामि, ममेदमिष्टं, अहमत्र प्रयते, ममायं कृतिविषय, इतीच्छाप्रयत्नयोरित्यर्थः । स्वप्रकाशत्वाज्जीवस्य सर्वमुपपत्स्यत इत्यत आह **स्वप्रकाशत्वमिति** ।

**यादु०—** अविरोधानुभवमुपपादयितुमाह **यथा घटमित्यादिना** । श्रुत्यादिग्रहणमित्यत्रादिपदेनोपात्तं तर्कं दर्शयति **यदि चात्मेति** ॥ **ममेदमिति** । विशेषणाज्ञाने विशिष्टज्ञानासम्भवादिति भावः । नन्वात्मनः

स्वज्ञानकर्मत्वाभावेऽपि दीपवत् स्वप्रकाशतया प्राभाकररीत्या स्वप्रकाशज्ञानाश्रयतया वा प्रकाशमानत्वसम्भवान्नोक्तविशिष्टज्ञानानुपपत्तिरित्यत आह **स्वप्रकाशत्वमित्यादि** । अत्र पक्षद्वयेऽपि प्रकाशकर्मत्वातिरिक्तस्य प्रकाशमानत्वस्य वक्तुमशक्यत्वेन स्वज्ञानकर्मत्वमनिवार्यमित्यर्थः ।

**वं०प०—** अविरोधश्च घटपटयोरित्यन्यथाप्रतीतिपरिहारायाह **अविरोधश्चेति** ॥ **अनुपलम्भसनाथेनेति** । यद्यनुपपत्तिः स्यात् तर्ह्युपलभ्येत । नोपलभ्यते । तस्मान्नास्तीत्येवं योग्यानुपलम्भसहकृतेनेत्यर्थः ॥ **तदविशिष्ट इति** । घटमहं जानामीत्येतदनुभवसमान इत्यर्थः ।

**कं०रा०—** 'प्रत्यक्षमात्मविज्ञानाविरोधानुभवादि'त्यत्र प्रत्यक्षपदस्यानुभवसामानाधिकरण्येन तद्विशेषणत्वे प्रत्यक्षादिति पञ्चमी स्यादित्यतो व्याचष्टे **क्रियाविशेषणमेतदिति** ॥ **आत्मविज्ञानं चाविरोधश्चेति** । यद्यप्यात्मविज्ञानस्याविरोध इति तत्पुरुषाश्रयणेऽप्यात्मविज्ञानाविरोधानुभवादित्यनेन आत्मविज्ञानस्याप्यनुभवसिद्धत्वं अर्थाल्लभ्यते तथाऽपि साक्षादनुभवसिद्धत्वलाभे सम्भवत्यार्थिकतल्लाभो न युक्त इत्याशयेन द्वन्द्व आश्रितः ॥ **तथा तदविशिष्ट इति** । घटमहं जानामीति ज्ञानविशिष्टे मामहं जानामीति ज्ञानेऽपि न काचिदनुपपत्तिः प्रतीयते किं तु अनुपलम्भसनाथेन साक्षिणाऽनुपपत्त्यभाव एव साक्षात्क्रियत इत्यर्थः । प्रागपिपदेन श्रुत्यादिग्रहणमित्युक्तम् । ताः श्रुतीर्दर्शयति **श्रुतयोऽपीति** । 'अहमित्येव यो वेद्यः स जीव इति कीर्तितः', 'अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः', 'अविद्यायां बहुधा वर्तमाना वयं कृतार्था इत्यभिमन्यन्ति बालाः' इत्याद्याः श्रुतयोऽपि जीवस्य स्वाज्ञानितायां प्रमाणानि सन्तीति भावः । न च वाच्यं 'अहमित्येव यो वेद्य' इत्यत्र स्ववेद्यत्वं नोच्यत इति । अन्येनान्यस्याहमिति वेद्यत्वस्यासम्भवेन स्ववेद्यत्वस्यैव तत्र लाभात् । श्रुत्यादिशब्दगृहीतमात्मनः स्वज्ञानित्वाभावे ममेदमिष्टसाधनं ममेदमनिष्टसाधनमिति ज्ञानाभावेन तन्मूलकेच्छाप्रयत्नयोरभावात् सर्वप्रवृत्तिनिवृत्त्यनुपपत्तिरूपं प्रमाणमाह **यदि चात्मेति** । यद्वा जीवः स्वज्ञानवान् प्रवृत्तिनिवृत्तिमत्त्वादिति व्यतिरेक्यनुमानमादिशब्दगृहीतमित्यभिप्रेत्य तदनुग्राहकं तर्कमाहेत्यवतारणीयोऽयं ग्रन्थः । नन्वात्मनः स्वज्ञानित्वाभावेऽपि तस्य स्वप्रकाशत्वेन ज्ञानाश्रयतया स्वप्रकाशमानत्वेन वा ममेदमिष्टसाधनमित्यादिज्ञानसम्भवान्न प्रवृत्तिनिवृत्त्यनुपपत्तिरित्यत आह **स्वप्रकाशत्वमिति** । अदृष्टबाधनः प्रमाणविरोधाभाव इति यद्यपि भावार्थक्तप्रत्ययान्तदृष्टशब्दस्य प्रत्यक्षवाचित्वाद्दृष्टबाधनशब्देन दृष्टबाधनाभावरूपप्रत्यक्षविरोधाभाव एव लभ्यते । तथाऽपि दृष्टपदं प्रमाणान्तरोपलक्षकमित्याशयेन प्रमाणविरोधाभाव इति व्याख्यातम् ।

**शे०चं०—** **क्रियाविशेषणमिति** । प्रत्यक्षं यथा भवति तथेति क्रियाविशेषणमित्यर्थः । अन्यथा अनुभवविशेषणतया अनुभवादिति पञ्चम्यनुरोधेन प्रत्यक्षादिति पञ्चमी श्रूयेतेति भावः । श्रुत्यादीत्यादिपदेन तर्कपरिग्रहः । एवमात्मविज्ञानानुभवमुक्त्वा अविरोधानुभवमुपपादयति **यथेति** । श्रुत्यादीत्यादिपदसङ्गृहीतं तर्कमाह **यदि चेति** । विशेषणाज्ञाने ममेदमिति विशिष्टज्ञानासम्भवादिति भावः । ननु स्वप्रकाशतया स्वप्रकाशज्ञानाश्रयतया वा आत्मप्रकाशसम्भवेन तदधीनस्य ममेदमिष्टसाधनमिति विशिष्टज्ञानस्य सम्भवान्न प्रवृत्त्यादिविलोपप्रसङ्ग इत्यत आह **स्वप्रकाशत्वमिति** ॥ **स्वज्ञानातिरेकेणेति** । स्वविषयताऽतिरेकेणेत्यर्थः ।

**वा०र०—** **क्रियाविशेषणमित्यर्थ इति** । तथा च द्विक्रियाद्वारेण स्त्रीलिङ्गत्वे प्राप्तिक्रियाद्वयर्थविशेषणानां क्लीबत्वमेकवचनान्तत्वं च वाच्यमिति क्लीबत्वादौ नपुंसकता युक्तेति भावः । एतद्भाववर्णनमसकृत्कृतमिति नात्र कृतवांष्टीकाकारः । टीकोपपादनं त्वानन्दमयाधिकरणेऽस्मदीयं ज्ञेयम् ।

**स०व्र०—** आत्मविज्ञानानुभवमुक्त्वा इतराविरोधानुभवमप्याह **यथेति** । ननु स्वप्रकाशतया वा तादृशज्ञानाश्रयतया वा आत्मप्रकाशान्न प्रवृत्त्यादिविलय इत्यत्राह **स्वप्रकाशत्वमिति** ।

**॥ इति जीवब्रह्मणोः ज्ञेयत्वसमर्थनम् ॥**

* * *

**॥ अथ एकक्रियायां कर्तृकर्मभेदनियमः औत्सर्गिकः ॥**

१०१ **सु०—** छिदादिषु कर्तृकर्मणोर्भेददर्शनात् तदेकत्वाभ्युपगमो विरुद्ध इति यदुक्तं तन्निराकरोति **कर्तृकर्मेति** ।

**अनु०—** कर्तृकर्मविरोधश्च नित्यानुभवरोधतः ।
कथमेव पदं गच्छेद्विरोधोऽदृष्टबाधनम् ॥

एकस्यां क्रियायां कर्तृकर्मत्वयोर्विरोधः **कर्तृकर्मविरोधः** । **नित्यानुभवः** उक्तसाक्ष्यनुभवः । **पदम्** आस्पदम् । प्रकृत इति शेषः ।

अयमाशयः । उक्तमेतल्लिङ्गपादे । यत्कर्तृकर्मणोर्भेद इत्यौत्सर्गिकोऽयं न्यायः । अपवादे सत्यभेदोऽपि भवतीति । अत्र च मामहं जानामीति साक्ष्यनुभवविरोधान्नायमस्य न्यायस्य विषयः । किन्तु यत्रादृष्टबाधनं प्रमाणविरोधाभावस्तत्रैवायं विरोधः प्रवर्तते । यथा अङ्गुल्यग्रेण अङ्गुल्यग्रस्पर्शने । यथा वाऽसिधारयाऽसिधाराच्छेदन इति ।

**परि०—** ननु छिदिक्रियादौ कर्त्रादिर्भेददृष्टेरेकत्वाभ्युपगमो विरुद्ध इत्यस्य न समाधिः प्राप्त इत्यत आह **अयमाशय इति** ॥ **अस्येति** । एकस्यां क्रियायामित्युक्तन्यायस्येत्यर्थः ।

**गु०दी०—** **यत्रादृष्टबाधन**मित्यत्र दृष्टं प्रमाणं तेन बाधनं विरोधः । तदभावः अदृष्टबाधनमित्यर्थः । एतदेवाभिप्रेत्योक्तं **प्रमाणविरोधाभाव** इति ।

**वं०प०— अत्र चेति** । प्रकृते कर्तृकर्मणोर्भेदाङ्गीकार इत्यर्थः ॥ **साक्ष्यनुभवेति** । कर्तृकर्मणोरभेदावगाहिसाक्ष्यनुभवविरोधादित्यर्थः । अदृष्टबाधनमित्यस्य दृष्टबाधाभाव इत्यर्थः । दृष्टशब्दः प्रमाणपरः । तथा च प्रमाणविरोधरूपापवादाभाव इत्यर्थ इत्यभिप्रेत्याह **अदृष्टबाधनमित्यादि** । तथा च अदृष्टबाधनं यत्र कर्तृकर्मणोरभेदसाधकप्रमाणविरोधो नास्ति । अभेदसाधकं प्रमाणं यत्र नास्तीति यावत् । अपवादो नास्तीत्यत्र तात्पर्यम् । तत्रैव विरोधः कर्तृकर्मणोरेकत्वं विरुद्धम् । भेद एवाङ्गीकर्तव्य इत्यर्थः । यथा अङ्गुल्यग्रेण अङ्गुल्यग्रस्पर्शने असिधारया असिधाराच्छेदे वा कर्तृकर्मणोरभेदावगाहिप्रमाणाभावाद्भेद एवाङ्गीक्रियते । प्रकृते च कर्तृकर्मणोर्भेदाङ्गीकारे मामहं जानामीत्यभेदसाधकप्रमाणविरोधसद्भावात् भेदं परित्यज्य अभेदोऽङ्गीक्रियत इति भावः ।

**कं०रा०— अयं विरोध इति** । कर्तृकर्मत्वविरोध इत्यर्थः ॥ **अङ्गुल्यग्रेणेति** । तेनैवाङ्गुल्यग्रेण तस्यैवाङ्गुल्यग्रस्य स्पर्शन इत्यर्थः । एवमसिधारयेत्यत्रापि द्रष्टव्यम् । यद्यप्यस्मिन्नुदाहरणद्वये करणकर्मत्वविरोध एव न तु कर्तृकर्मत्वविरोध इति भाति । तथाऽपि यत्र कर्तृत्वविवक्षयाऽङ्गुल्यग्रमङ्गुल्यग्रं स्पृशति असिधाराऽसिधारां छिनत्तीति प्रयुक्तं तत्र कर्तृकर्मत्वविरोधः । प्रवर्तक इत्यत्र सुप्तस्य स्वज्ञानमीश्वरज्ञानं च नास्तीत्यभिधायेति । 'नात्मानं न परांश्चैव न सत्यं नापि चानृतम् । प्राज्ञः संवेदयेत्किञ्चिज्जीवकालतमो विना । सुप्त्यवस्थां सुखं वाऽपि विना नान्यत्प्रदर्शयेत् । सर्वं तु दर्शयेन्मुक्तौ तुरीयः परमेश्वर' इति प्रलयवचनानुसारेण 'स्वतन्त्रकर्तृशब्दः स्यात् प्राज्ञस्यावेदनं यथा । सर्वप्रदर्शकि चैव तुरीये सर्वदर्शनमि'ति ब्रह्मतर्कवचनानुसारेण च आचार्यैः प्रतीयमानार्थं विज्ञाय अर्थान्तरपरतया व्याख्यातत्वात् उदाहृतश्रुतौ सुप्तस्य स्वज्ञानं च नास्तीत्यभिधाय मुक्तस्य तु तदस्तीत्युच्यत इत्युक्तमिति द्रष्टव्यम् । न च वाच्यं उदाहृतश्रुतेः प्रतीतार्थपरत्वेऽनुपपत्त्यभावात् इत्थं व्याख्यानमयुक्तमिति । सर्वज्ञब्रह्मात्मकप्राज्ञस्य नात्मानमित्यादिनोक्ताज्ञानस्य तुरीयं तत्सर्वदृगिति विशिष्योक्तस्य तुरीयसर्वदृक्त्वस्य च अनुपपत्तेरेव व्याख्यानस्य युक्तत्वात् ।

**शे०चं०— उक्त इति** । मामहं जानामीत्युक्त इत्यर्थः । अविरुद्धन्यायविषयमेवोदाहरति **यथेति** ।

**॥ इति एकक्रियायां कर्तृकर्मभेदनियमः औत्सर्गिकः ॥**

* * *

**॥ अथ मुक्तानां स्वविषयकज्ञानानङ्गीकारे ईश्वरज्ञानानङ्गीकारे च प्रमाणविरोधः ॥**

**१०२ सु०— अस्त्वेवमीश्वरस्य ज्ञेयत्वं, जीवस्य च स्वज्ञानित्वम् । तथाऽपि मुक्तौ तज्ज्ञानाभावः कथमनिष्ट इति चेत् । उच्यते । 'नात्मानं न परांश्चैव न सत्यं नापि चानृतम् । प्राज्ञः किञ्चन संवेत्ति तुर्यं तत् सर्वदृक् सदे'ति श्रुतौ सुप्तस्य स्वज्ञानमीश्वरज्ञानं च**

**नास्तीत्यभिधाय मुक्तस्य तु तदस्तीत्युच्यते । अतस्तदभावः प्रमाणविरुद्ध इति कथं नानिष्टः ।**

**परि०— नात्मानमिति** । आत्मानं परमात्मानं जीवं च परान् जीवस्वरूपतमःकाल-सुखेभ्योऽन्यान् संवेत्ति । संवेदयतीत्यन्तर्णीतणिच्, सर्वदृक् = सर्वं दर्शयतीति सर्वदृक् । **इति श्रुताविति** माण्डूकश्रुतौ ।

**यादु०— नास्तीत्यभिधायेति** । नात्मन इत्यत्रात्मशब्देन जीवस्य, न परांश्चेत्यत्र परशब्देनेश्वरस्यापि अभिप्रेतत्वादिति भावः । अत्र संवेत्तीत्यस्य सर्वदृगित्यस्य च संवेदयति सर्वं दर्शयतीत्यर्थतया तद्भाष्ये व्याख्यातत्वेन प्रकृतसङ्गतिर्द्रष्टव्या तेनात्र प्राज्ञतुरीययोरेवाज्ञानज्ञाने कथ्येते न सुप्तजीवस्येति प्रकृतासङ्गतिरिति शङ्काऽनवकाशः । अत्र स्वज्ञानाभावोक्तिर्विशेषाकारेणैव स्वज्ञानाभिप्राया । सुप्तस्याप्यहमिति सामान्यतः स्वज्ञानवत्त्वात् । अत एवैतद्वाक्यव्याख्यानसमये माण्डूकभाष्ये 'तमो विना । सुप्त्यवस्थां सुखं चापि विना नान्यत् प्रदर्शयेदि'ति जीवज्ञानं सुप्त्यवस्थायामुक्तम् । अन्यथा तद्विरोधप्रसङ्ग इति ध्येयम् ।

**शे०चं०— नास्तीत्यभिधायेति** । नात्मानमित्यत्र आत्मशब्देन जीवस्य, न परांश्चेत्यत्र परशब्दे-नेश्वरस्याप्यभिप्रेतत्वादिति भावः । यद्यप्यत्र प्राज्ञतुर्ययोरेवाज्ञानज्ञाने कथ्येते न सुप्तस्य स्वज्ञानमीश्वरज्ञानं वेति न प्रकृतसङ्गतिरित्याभाति । तथाऽपि संवेत्तीत्यस्य सर्वदृगित्यस्य च संवेदयति सर्वं दर्शयतीत्यर्थतया तद्भाष्ये व्याख्यातत्वेन स्वज्ञानलाभात् प्रकृतसङ्गतिः । अत्र सुप्तौ जीवस्य स्वज्ञानाभावोक्तिर्विशेषाकारेण स्वज्ञाना-भावाभिप्रायेणैव न तु सर्वथा । तस्याप्यहमिति स्वज्ञानवत्त्वात् । अत एवैतद्वाक्यव्याख्यानावसरे माण्डूकभाष्ये 'जीवकालतमो विना । सुप्त्यवस्थां सुखं चापि विना नान्यत् प्रदर्शयेदि'ति जीवज्ञानं सुप्त्यवस्थायामुक्तम् । अन्यथा तद्विरोधप्रसङ्गादिति ध्येयम् ।

**वा०र०— आत्मशब्देन जीवस्येति** । परशब्दस्योत्तमार्थतया बहुत्वस्य च भगवति निर्णीतत्वात् परशब्देन ईश्वरग्रहणमेव न्याय्यमित्यवशिष्टात्मशब्देनैव जीवग्रहणं न्याय्यमिति भावो मूलकारस्येति हृदयम् । **तद्भाष्येति** । माण्डूकभाष्येत्यर्थः ।

**स०व्र०—** अङ्गीकृतं च मायावादिना भास्करेण च आत्मनो ज्ञानविषयत्वमित्याह **नात्मानमिति** । न च तुर्यस्यैव सर्वदृक्त्ववचनात् न जीवस्य तदिति वाच्यम् । तुरीयशब्देन तस्य तं प्राप्तस्य मुक्तस्य च ग्रहणेनादोषात् ।

**॥ इति मुक्तानां स्वविषयकज्ञानानङ्गीकारे ईश्वरज्ञानानङ्गीकारे च प्रमाणविरोधः ॥**

**॥ इति 'नप्रेत्यसंज्ञाऽस्ति'श्रुतिविमर्शः ॥**

* * *

**॥ अथ मुक्तेषु विषयभोगसमर्थनम् ॥**

**॥ अथ मुक्तस्य विषयभोगः श्रुतिसिद्धः ॥**

१०३ **सु०**— न केवलमेवमनिष्टप्रकरणाद्विषयभोगाभावस्यानिष्टत्वं गम्यते किन्तु विषयभोगस्यापि श्रुतिसिद्धत्वाच्चेत्याह **स इति** ।

**अनु०— सोऽश्नुते सर्वकामांश्च कामान्नी कामरूप्यथ ।**
**इत्यादिश्रुतयश्चोक्तमर्थमेव वदन्ति हि ॥**

**अथ मुक्तेरनन्तरमिति श्रुतिद्वयस्योपक्रमे सम्बध्यते । उक्तमेवार्थं मुक्तस्य विषयभोगसद्भावम् । अत एव मात्राभिरसंसर्ग इति व्याख्यानमसदेवेति ।**

**परि०— अनिष्टप्रकरणादिति** ।'येनेदमखिलं वेद तं च केन विजानीयात् विज्ञातारं च केन विजानीयादि'ति वाक्यद्वयोक्तापादनस्यानिष्टत्वसमर्थनेन तत्साहचर्यरूपप्रकरणादित्यर्थः ॥ **अत एवेति** । (भोगस्य श्रुति)विषयसंसर्गसद्भावस्य श्रुत्यन्तरसिद्धत्वादेव । 'मात्रासंसर्गस्त्वस्य भवती'ति माध्यन्दिनश्रुतिवाक्ये पूर्वोक्ते मात्राभिः = रूपादिविषयैः संसर्गो भोगलक्षण इति सिद्धान्तीयव्याख्यानम् । विना मात्राभिरसंसर्गो भोगाभाव इति परकीयव्याख्यानम् । 'येनेदमखिलं वेदे'त्येतदवतारिकायामुक्तमसत् श्रुतिविरोधप्राप्तेरिति भावः ।

**कं०रा०— अथेति** । 'सोऽश्नुते सर्वान्कामांश्च, कामान्नीकामरूप्यथे'त्यत्र मुक्तेरनन्तरमित्यर्थे वर्तमानयथेतिपदं श्रुतिद्वयस्योपक्रमे सम्बध्यते । तथाच 'सोऽश्नुते सर्वान्कामानि'ति श्रुतेः 'कामान्नीकामरूप्यनुसञ्चरन्नि'ति श्रुतेश्च मुक्त्यनन्तरं सर्वकामावाप्तिकामान्नित्यादिप्रतिपादकत्वात् श्रुतिद्वयस्यार्थतोऽनुवादः कृत इति भावः ॥ **अत एवेति** । यत उदाहृतश्रुतयो मुक्तस्य विषयभोगसद्भावं वदन्ति अत एव मात्रासंसर्गस्तस्य भवतीति श्रुतेर्मुक्तस्य मात्राभिरसंसर्गो भवतीति परकृतव्याख्यानमयुक्तमेवेत्यर्थः ।

**शे०चं०**— मुक्तौ विषयभोगस्य श्रुतिसिद्धताया भाष्यारूढतां दर्शयितुमथशब्दस्य श्रुत्यन्तर्गतत्वभ्रान्तिं च परिहर्तुं तदर्थकथनपूर्वकं तत्सम्बन्धं च दर्शयति **अथ मुक्तेरनन्तरमिति** ॥ **अत एवेति** । श्रुत्यन्तरे भोगस्योक्तत्वादेवेत्यर्थः ।

**स०व्र०**— **अत एव** श्रुत्यन्तरे भोगस्योक्तत्वादेव ।

**॥ इति मुक्तस्य विषयभोगः श्रुतिसिद्धः ॥**

॥ अथ 'यत्र हि' इति श्रुतिघटक 'इव'शब्दस्य अर्थकथनम् ॥

१०४ **सु०**— स्यादेतत् । यत्र हि द्वैतमिव भवतीति इवशब्देन द्वैताभावः प्रतिपाद्यते तत्कथं द्वैताभावे अनिष्टप्रसङ्गाभिधानमेतदित्यत आह **अस्वातन्त्र्यादिति** ।

**अनु०— अस्वातन्त्र्यादिवेत्युक्तं न द्वैताभावतः क्वचित् ।**

**द्वैतस्यास्वातन्त्र्यमभिप्रेत्य द्वैतमिवेत्युक्तम् । न तु द्वैताभावमभिप्रेत्य । कुतः । क्वचित्** अभिधानादाविवशब्दस्याभाववाचिताऽनुक्तेरित्यर्थः । अस्वातन्त्र्यं चात्र स्वरूपमात्रमुक्तम् ।

इवशब्दस्याभावार्थत्वे बाधकं चाह **आत्मैवेति** ।

**आत्मैवाभूदिति ह्यस्मादविशेषप्रसङ्गतः ।**

इवशब्दस्य अभावार्थत्वे द्वैतमिव भवतीत्यस्य द्वैतं नास्तीत्यर्थः स्यात् । 'यत्र त्वस्य सर्वमात्मैवाभूदि'त्यस्य तावद् द्वैताभावोऽर्थः स्फुट एव । ततस्तस्मादस्य विशेषो न भवेत् । तथा च द्वैताभावे इतर इतरं पश्येत् । द्वैताभावे केन कं पश्येदिति वाक्यद्वयार्थः प्रसज्येत । ततश्च उन्मत्तवाक्यता श्रुतेरापद्यत इति ।

**परि०**— क्वचिदित्यस्यार्थो **अभिधानादाविति** । तत्राकाङ्क्षां पूरयति **अभाववाचिताऽनुक्तेरिति** ॥ **स्वरूपमात्रमिति** । युक्तिर्नोक्तेत्यर्थः । यद्वा अस्वातन्त्र्यमेवार्थ इत्युपेत्य नोक्तमित्यर्थः । न तु व्याप्त्युपयोगितयोक्तमिति वार्थः । व्यभिचाराभावात् ।

**गु०दी०**— **अस्वातन्त्र्यं चात्र स्वरूपमात्रमुक्तमित्यत्र** अभिधानं तु उपरि वदिष्यत इत्यर्थः ।

**यादु०**— **अभाववाचिताऽनुक्तेरिति** । क्वचिदित्यनन्तरं एतावदध्याहार्यमिति भावः ।

**वं०प०**— **अस्वातन्त्र्यं चात्रेति** । द्वैतमिवेति श्रुतावित्यर्थः ॥ **स्वरूपमात्रमिति** । भेद ईश्वराधीन इति भेदस्येश्वराधीनत्वरूपं स्वरूपमात्रमेवोक्तमित्यर्थः ॥ **ततस्तस्मादिति** । ततः कारणात् । तस्मादात्मैवाभूदिति वाक्यादस्य यत्र हि द्वैतमिवेति वाक्यस्य विशेषो न भवेदेकार्थत्वादित्यर्थः । ततोऽपि किमित्यत

आह **तथा चेति** । यत्र हि द्वैतमिवेति वाक्यार्थमनुवदति । **तथा च द्वैताभाव इति** । यत्र त्वस्येति वाक्यार्थमनुवदति **द्वैताभाव इति** । तथाच यत्र त्वस्य सर्वमात्मैवाभूदित्यस्यार्थो **द्वैताभाव इति** ॥ **केन कं पश्येदितीति** । न केनापि किमपि पश्यति । **इतर इतरं** न पश्यतीति यावदित्यर्थः ।

**कं०रा०**— ननु 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यती'ति वाक्ये प्रसङ्गाङ्गव्यतिरेकव्याप्तिप्रतिपादकद्वैतस्येवशब्देन अस्वातन्त्र्यकथनं व्यर्थं व्याप्तिग्रहानुपयुक्तत्वादित्यतः स्वरूपमात्रकथनं तदित्याह **अस्वातन्त्र्यं चेति** । अतिप्रसङ्गाङ्गव्यतिरेकव्याप्तिप्रतिपादके यत्र हि द्वैतमिवेति वाक्ये द्वैतस्येवशब्देनास्वातन्त्र्यं च स्वरूपमात्रत्वेनोक्तं न तु व्यभिचारादिवारकतया व्याप्तिग्रहोपयुक्तत्वेनेत्यर्थः ।

**शे०चं०**— नन्वस्वातन्त्र्यार्थत्वेऽपि इवशब्दस्य न व्यप्तिकथने अस्वातन्त्र्यस्योपयोग इत्यत आह **अस्वातन्त्र्यं चेति** ॥ **ततश्चेति** । व्याघातादित्यर्थः ।

**स०व्र०**— नन्वस्वातन्त्र्यार्थत्वेऽपि इवशब्दस्य, प्रकृते अस्वातन्त्र्यकथनस्य, क्वोपयोग इत्यत आह **अस्वातन्त्र्यमिति** ॥ **ततश्चेति** । व्याघातादित्यर्थः ।

**॥ इति 'यत्र हि' इति श्रुतिघटक 'इव'शब्दस्य अर्थकथनम् ॥**

* * *

**॥ अथ 'इव'शब्दस्य 'अस्वातन्त्र्या'र्थकत्वं प्रमाणसिद्धम् ॥**

१०५ **सु०— नन्विवशब्दस्यास्वातन्त्र्यवाचित्वं कुत इत्यत आह अस्वातन्त्र्येति** ।

**अनु०— अस्वातन्त्र्योपमाभेदभेदेष्विव उदीरितः ।**
**शब्दतत्त्व इति प्रोक्तं**

अभेदभेदेति प्रतियोगिद्वयोपलक्षणम् । इवान्त एकस्मिन्नुक्ते तत्प्रतियोगी द्वितीयोऽपि लभ्यत इत्यर्थः ।

नन्वस्माकमुपमायामेवेवशब्दः । द्वैताभावस्त्वर्थसिद्धः । यथा गौरिव गवय इत्युक्ते गवयस्य गोत्वाभावोऽवगम्यत इति चेत् । तर्हि द्वैतसदृशं किं तदिति वाच्यम् । कल्पितं द्वैतमिति चेन्न । तस्य सत्ताभावेन भवतीत्यनुपपत्तेः । भवनमपि तस्य काल्पनिकमिति

**चेत् । एवं तर्हि यदि द्वैतदर्शनं स्यादिति स्यात् । तथा च इतर इतरं पश्यतीत्येतदपि तदेवेति न हेतुहेतुमद्भावोऽवकल्पत इति ।**

**परि०**— भेदाभेदमात्रपरत्वभ्रमनिरासाय विरोधिद्वयमात्रग्रहणायाह **प्रतियोगिद्वयोपलक्षणमिति** । ननु भेदाभेदादिरूपप्रतियोगिवाचित्वे द्वैतमिवेत्यत्रेवशब्देनैव भेदाभेदयोर्लाभात् पुनर्द्वैतमिति व्यर्थमित्यत आह **इवान्त इति** ॥ **अस्माकमिति** । द्वैताभाववादिनामित्यर्थः ।

**यादु०**— ननु भेदाभेदरूपविरोधिद्वयमात्रस्येवशब्दार्थत्वे अन्यत्र 'इवोभये च सादृश्य' इति सामान्यत एव प्रतियोगिद्वयस्येवशब्दार्थतावचनं, 'प्रविविक्ताहारतर इवैव भवत्यस्माच्छरीरादात्मन' इति हरेः सूक्ष्माशनप्रतिपादके वाक्ये अवतारेषु स्थूलमपि भुङ्क्ष इतीवशब्दव्याख्यानं चानुपपन्नमित्यत आह **प्रतियोगिद्वयोपलक्षणमिति** । विरोधिद्वयोपलक्षणमित्यर्थः । नन्विवशब्दस्यैव प्रतियोगिद्वयं यदि वाच्यं तर्हि नानेव पश्यतीत्यादाविवशब्देनैव भेदाभेदयोः प्राप्तत्वेन नानेत्यादीनां वैयर्थ्यमित्यत आह **इवान्त इति** । ततश्च यत्र द्वयोर्विरुद्धयोर्मध्ये यदेकमिवशब्दशिरस्कमुच्यते तत्र तद्विरुद्धमपरमिवशब्देनोच्यत इति विवक्षितत्वान्नोक्तदोष इति भावः ।

**वं०प०**— **गोत्वाभाव इति** । तथा च तत्सादृश्यमवगम्यत इत्यर्थः । सादृश्यस्य भेदगर्भत्वादेवमुक्तमिति ज्ञेयम् ॥ **किं तदिति** । द्वैतमिवेत्युक्ते द्वैतसदृशं किमित्यर्थः ॥ **कल्पितमिति** । वास्तवद्वैतसदृशं कल्पितं द्वैतमित्यर्थः । **तस्य** कल्पितद्वैतस्य । **काल्पनिकं** प्रातीतिकम् । **तदेव** द्वैतदर्शनमेव । तथाच पुनरुक्तिरिति भावः ।

**कं०रा०**— नन्विवशब्दस्य विरुद्धद्वयवाचित्वे 'मृत्योः स मृत्युमाप्नोति, य इह नानेव पश्यती'त्यत्र इवशब्देनैव भेदाभेदयोर्लब्धत्वान्नानाशब्दो व्यर्थः स्यादित्यत इवशब्दो विरुद्धद्वये वर्तत इत्यस्याभिप्रायार्थमाह **इवान्त इति** । एकस्मिन्नुक्ते सति तत्प्रतियोगी इवशब्दसमभिव्याहृतेन पूर्वपदेऽन्वय उक्तः तद्विरोधिद्वितीयोऽपि इवशब्देन लभ्यते । तथाच 'य इह नानेव पश्यती'त्यत्र नानाशब्दोक्तनानात्वविरोधिनो द्वितीयस्याभेदस्यैव इवशब्देनोपस्थापनान्नानाशब्दस्य न वैयर्थ्यमिति भावः ॥ **भवतीत्यनुपपत्तेरिति** । सत्तार्थकस्य भवतीत्यस्यानुपपत्तेरित्यर्थः ॥ **भवनमपीति** । कल्पितस्य द्वैतस्य भवनमपि काल्पनिकम्, अतः श्रुतिगतस्य भवतीत्यस्य यदि न द्वैतदर्शनं स्यादित्यर्थः स्यात् । काल्पनिकस्य कल्पनायामेव पर्यवसितत्वात् । तथा चेतर इतरं पश्यतीत्येतदपि द्वैतदर्शनार्थकमेवेत्यभेदान्न हेतुहेतुमद्भावो कल्प्यत इत्यर्थः ।

**शे०चं०**— ननु भेदाभेदरूपविरोधिद्वयमात्रस्यैव इवशब्दार्थत्वे अन्यत्र 'इवोभये च सादृश्य' इति सामान्यत एव प्रतियोगिद्वयस्य इवशब्दार्थतावचनं 'प्रविविक्ताहार इवैव भवत्यस्माच्छरीरादात्मन' इति हरेः सूक्ष्माशनप्रतिपादके वाक्येऽवतारेषु स्थूलमपि भुङ्क्ष इतीवशब्दव्याख्यानं च अनुपपन्नं प्रसज्यत इत्यत आह

**प्रतियोगिद्वयोपलक्षणमिति** । विरोधिद्वयोपलक्षणमित्यर्थः । नन्विवशब्दस्यैव यदि प्रतियोगिद्वयं वाच्यं तर्हि द्वैतमिव भवति नानेव पश्यतीत्यादाविवशब्देनैव द्वैताद्वैतयोर्भेदाभेदयोश्च प्राप्तत्वेन द्वैतमित्यादेर्वैयर्थ्यमित्यत आह **इवान्त इति** ॥ **लभ्यत इति** । इवशब्देनेति शेषः । यदुक्तं पूर्वपदेन तत्प्रतियोगिनि द्वितीये इवशब्दवृत्तेरिति भावः ॥ **उपमायामेवेति** । तदर्थत्वं च उक्ताभिधानसिद्धमेवेति द्वैताभाववाचित्वं व्यावर्तयति । ततश्च न क्वचि-दभिधानादाविवशब्दस्याभाववाचित्वानुक्तिरिति दोष इति भावः । तर्हि कथमस्य द्वैताभावसाधकतयोपन्यास इत्यतः अर्थतस्तत्सिद्ध्यभिप्रायेणेत्याह **द्वैताभाव इति** । शक्त्योपमार्थस्यापीवशब्दस्यार्थतो द्वैताभावसाधकत्वं कथमित्यतः तत्रानुरूपं दृष्टान्तमाह **यथेति** । सादृश्यसम्बन्धिनो द्वितीयस्यानिरूपणान्न सादृश्यार्थत्वमपि तस्ये-त्याह **तर्हीति** । कल्पितद्वैतस्यैव तत्प्रतिसम्बन्धित्वान्न तदर्थत्वानुपपत्तिरिति शङ्कते **कल्पितमिति** ॥ **एवं तर्हीति** । द्वैतवत् तद्भवनस्यापि कल्पितत्व इत्यर्थः । दृष्टापत्तिमाशङ्क्याह **तथा चेति** ।

**वा०र०— भेदाभेदरूपविरोधीति** । भेदाभेदाख्यविरोधिवस्तुद्वयविशेषस्यैवेत्यर्थः । **इवोभयेति** । नानेवेति वाक्यव्याख्यावसरे एतद्बलतो नानोक्ता प्रागिवशब्देन नानासङ्ग्रहस्य व्याख्यातत्वादिति भावः । इवशब्द-व्याख्यानं च पादीयव्याख्यानमवलोक्यैकवाक्यताऽनुसन्धेयाऽस्ति । उपमायामेवेतीत्येवशब्दव्यावृत्यमाह **एवे-तीति** ॥ **ततश्च नेति** । दोषो नेत्युत्तरेण सम्बन्धः ।

**स०व्र०—** प्रविविक्तभुगिवैष भवति । व्यतिषक्त इव वै पाप्मनेत्यत्रेवशब्देनावतारे स्थूलभोगस्य मुक्तौ पापाव्यतिषङ्गस्य चोक्तत्वात् तत्सङ्ग्रहाय व्याचष्टे **प्रतियोगिद्वयोपलक्षणमिति** । अभेदभेदेतिप्रतियोगिद्वयोप-लक्षणम् । **यथोक्तं** गीतातात्पर्य इति शेषः ।

**॥ इति 'इव'शब्दस्य 'अस्वातन्त्र्या'र्थकत्वं प्रमाणसिद्धम् ॥**

* * *

**॥ अथ 'अविनाशी' इत्यादिश्रुतेः अन्यथाव्याख्याने बाधकप्रदर्शनम् ॥**

**१०६ सु०— 'न प्रेत्य संज्ञाऽस्ती'ति वाक्यस्य मुक्तो न जानातीत्येवार्थमङ्गीकृत्य अवि-नाशीत्यादिवाक्यान्य(प्य)न्यथा व्याकुर्वतो बाधकमाह मैत्रेयीति ।**

**अनु०— मैत्रेय्युक्तोत्तरं च किम् ।**

**'न प्रेत्य संज्ञाऽस्ती'ति वाक्यं श्रुत्वा मैत्रैय्योक्तम् 'अत्रैव मा भवानि'त्यादि । तत्तावन्नाहृदयं निर्दलाक्षेपकरणेऽसुज्ञत्वप्रसङ्गात् । ततः 'प्रज्ञानघन' इत्यात्मनो ज्ञानस्वरू-**

**पत्वमभिधाय इदानीं ज्ञानाभावं वदतस्तव वाक्यं मोहकमित्यभिप्रायः कल्प्यः । अपुरुषार्थत्वप्रसङ्गो वा । यथोक्तं 'संज्ञानाशो यदि भवेत्किं मुक्त्या नः प्रयोजनम् । मोहं मां प्रापयामास भवानत्रेति चोदितः' इति । अन्यथाव्याख्याने मैत्रेय्युक्तं निरुत्तरं प्रसज्येत । न ह्येतैर्वाक्यैः स्ववचनव्याघातः परिहृतो नापि पुरुषार्थता समर्थितेति ।**

**परि०— अन्यथा व्याकुर्वत इति** । 'आशङ्क्यास्ये'त्येतदवतारिकायामुक्तदिशेति भावः । यद्वा 'येनेदमखिलं वेदे'त्येतदवतारिकायामुक्तदिशेति भावः ॥ **कल्प्य इति** । त्वयेति योज्यम् । सिद्धान्तदिशाऽऽह **अपुरुषार्थत्वेति** । तत्रैव सम्मतिमाह **(यथोक्त)तदुक्तमिति** । बृहद्भाष्ये ॥ *साङ्ख्याद्यभिमतमोक्षस्याप्रामाणिकत्वोक्तिः ॥*

**यादु०— अन्यथा व्याकुर्वत इति** । वस्तुकथनमेतत् तथाहीत्यादिना पूर्वोक्तप्रकारेण व्याकुर्वत इत्यर्थः । अभिप्रायः कल्पित इत्यत्र परीत्येति शेषः । विष्णुतत्त्वनिर्णयटीकायामस्याभिप्रायस्य आशङ्क्य दूषितत्वात् । स्वरीत्या वा आह **अपुरुषार्थताप्रसङ्गो वेति** ।

**वं०प०— अन्यथा व्याकुर्वत इति** । वस्तुस्थितिकथनपरत्वेनेत्यर्थः ॥ **नाहृदयमिति** । अभिप्रायशून्यं न भवतीत्यर्थः । **असुज्ञत्वं** सम्यग्ज्ञानित्वाभावः । अविवेकित्वमिति यावत् । अपुरुषार्थत्वप्रसङ्गो वाऽभिप्रायः कल्प्य इत्यत्र ज्ञापकमाह **यथोक्तमिति** ॥ **किं मुक्त्या नः प्रयोजनमिति** । 'मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेदि'ति भावः । इति चोदिते इत्यस्य याज्ञवल्क्यः प्रियामाहेत्युत्तरेण सम्बन्धो द्रष्टव्यः । नापीत्यनन्तरं ज्ञानाभावस्येति शेषः । समर्थितेत्यनन्तरं याज्ञवल्क्येनेत्यर्थः ।

**कं०रा०— नाहृदयमिति** । अभिप्रायरहितं न भवतीत्यर्थः ॥ **अपुरुषार्थत्वप्रसङ्गो वेति** । मुक्तौ सर्वात्मना ज्ञानाभावे मुक्तेरपुरुषार्थत्वप्रसङ्ग इत्यभिप्रायः कल्प्यत इत्यर्थः । अत्रैव मा भगवानित्यादेर्मैत्रेयीवाक्यस्योक्ताभिप्रायद्वये सम्मतिमाह **यथोक्तमिति** । संज्ञानाशे यदीत्यादिपूर्वार्धे मैत्रेयीवाक्यस्य मुक्तौ ज्ञानाभावे मोक्षस्यापुरुषार्थत्वप्रसङ्ग इत्यभिप्राय इत्यत्र सम्मतिः । 'मोहं मामि'त्याद्युत्तरार्धस्तु तद्वाक्यस्य 'विज्ञानघन' इत्यात्मनो ज्ञानस्वरूपत्वमभिधाय इदानीं 'न प्रेत्य संज्ञाऽस्ती'ति ज्ञानाभावं वदतस्तव वाक्यं परस्परं व्याहततया मोहकमित्यभिप्राय इत्यत्र सम्मतिः । मैत्रेय्युक्तोत्तरं च किमित्यत्र किंशब्दस्याक्षेपार्थत्वमभिप्रेत्य शेषं पूरयन् पर्यवसितार्थमाह **अन्यथाव्याख्यान इति** । 'अविनाशी वा अरे अयमात्मे'त्यादिवाक्यानामन्यथाव्याख्याने मैत्रेय्युक्तमत्रैव मा भगवानित्यादिकं निरुत्तरं प्रसज्येतेत्यर्थः । तदेवोपपादयति **न हीति** ॥ अन्यथाव्याख्यायमानैरविनाशीत्यादिवाक्यैर्मैत्रेय्युक्तं विज्ञानघन इति याज्ञवल्क्यवचनस्य न प्रेत्य संज्ञाऽस्तीति तद्वचनेन व्याघातो न हि परिहृतो नापि ज्ञानाभावेऽपि मोक्षस्य पुरुषार्थता समर्थिता येन मैत्रेय्युक्तस्योत्तरं स्यादिति भावः ।

**प्रतियोगिद्वयोपलक्षणमिति** । विरोधिद्वयोपलक्षणमित्यर्थः । नन्विवशब्दस्यैव यदि प्रतियोगिद्वयं वाच्यं तर्हि द्वैतमिव भवति नानेव पश्यतीत्यादाविवशब्देनैव द्वैताद्वैतयोर्भेदाभेदयोश्च प्राप्तत्वेन द्वैतमित्यादेर्वैयर्थ्यमित्यत आह **इवान्त इति** ॥ **लभ्यत इति** । इवशब्देनेति शेषः । यदुक्तं पूर्वपदेन तत्प्रतियोगिनि द्वितीये इवशब्दवृत्तेरिति भावः ॥ **उपमायामेवेति** । तदर्थत्वं च उक्ताभिधानसिद्धमेवेति द्वैताभाववाचित्वं व्यावर्तयति । ततश्च न कचिदभिधानादाविवशब्दस्याभाववाचित्वानुक्तिरिति दोष इति भावः । तर्हि कथमस्य द्वैताभावसाधकतयोपन्यास इत्यतः अर्थतस्तत्सिद्ध्यभिप्रायेणेत्याह **द्वैताभाव इति** । शक्त्योपमार्थस्यापीवशब्दस्यार्थतो द्वैताभावसाधकत्वं कथमित्यतः तत्रानुरूपं दृष्टान्तमाह **यथेति** । सादृश्यसम्बन्धिनो द्वितीयस्यानिरूपणान्न सादृश्यार्थत्वमपि तस्येत्याह **तर्हीति** । कल्पितद्वैतस्यैव तत्प्रतिसम्बन्धित्वान्न तदर्थत्वानुपपत्तिरिति शङ्कते **कल्पितमिति** ॥ **एवं तर्हीति** । द्वैतवत् तद्ववनस्यापि कल्पितत्व इत्यर्थः । दृष्टापत्तिमाशङ्क्याह **तथा चेति** ।

**वा०र०—** **भेदाभेदरूपविरोधीति** । भेदाभेदाख्यविरोधिवस्तुद्वयविशेषस्यैवेत्यर्थः । **इवोभयेति** । नानेवेति वाक्यव्याख्यावसरे एतद्बलतो नानोक्त्वा प्रागिवशब्देन नानासङ्ग्रहस्य व्याख्यातत्वादिति भावः । इवशब्दव्याख्यानं च पादीयव्याख्यानमवलोक्यैकवाक्यताऽनुसन्धेयाऽस्ति । उपमायामेवेतीत्येवशब्दव्यावृत्त्यमाह **एवेतीति** ॥ **ततश्च नेति** । दोषो नेत्युत्तरेण सम्बन्धः ।

**स०व्र०—** प्रविविक्तभुगिवैष भवति । व्यतिषक्त इव वै पाप्मनेत्यत्रेवशब्देनावतारे स्थूलभोगस्य मुक्तौ पापाव्यतिषङ्गस्य चोक्तत्वात् तत्सङ्ग्रहाय व्याचष्टे **प्रतियोगिद्वयोपलक्षणमिति** । अभेदभेदेतिप्रतियोगिद्वयोपलक्षणम् । **यथोक्तं** गीतातात्पर्य इति शेषः ।

**॥ इति 'इव'शब्दस्य 'अस्वातन्त्र्या'र्थकत्वं प्रमाणसिद्धम् ॥**

* * *

**॥ अथ 'अविनाशी' इत्यादिश्रुतेः अन्यथाव्याख्याने बाधकप्रदर्शनम् ॥**

१०६ **सु०—** 'न प्रेत्य संज्ञाऽस्ती'ति वाक्यस्य मुक्तो न जानातीत्येवार्थमङ्गीकृत्य अविनाशीत्यादिवाक्यान्य(प्य)न्यथा व्याकुर्वतो बाधकमाह **मैत्रेयीति** ।

**अनु०—** **मैत्रेय्युक्तोत्तरं च किम् ।**

'न प्रेत्य संज्ञाऽस्ती'ति वाक्यं श्रुत्वा **मैत्रेय्योक्तम्** 'अत्रैव मा भवानि'त्यादि । तत्तावन्नाहृदयं निर्दलाक्षेपकरणेऽसुज्ञत्वप्रसङ्गात् । ततः 'प्रज्ञानघन' इत्यात्मनो ज्ञानस्वरू-

**पत्वमभिधाय इदानीं ज्ञानाभावं वदतस्तव वाक्यं मोहकमित्यभिप्रायः कल्प्यः । अपुरुषार्थत्वप्रसङ्गो वा । यथोक्तं 'संज्ञानाशो यदि भवेत्किं मुक्त्या नः प्रयोजनम् । मोहं मां प्रापयामास भवानत्रेति चोदितः' इति । अन्यथाव्याख्याने मैत्रेय्युक्तं निरुत्तरं प्रसज्येत । न ह्येतैर्वाक्यैः स्ववचनव्याघातः परिहृतो नापि पुरुषार्थता समर्थितेति ।**

**परि०— अन्यथा व्याकुर्वत इति** । 'आशङ्क्यास्ये'त्येतदवतारिकायामुक्तदिशेति भावः । यद्वा 'येनेदमखिलं वेदे'त्येतदवतारिकायामुक्तदिशेति भावः ॥ **कल्प्य इति** । त्वयेति योज्यम् । सिद्धान्तदिशाऽऽह **अपुरुषार्थत्वेति** । तत्रैव सम्मतिमाह **(यथोक्त)तदुक्तमिति** । बृहद्भाष्ये ॥ *साङ्ख्याद्यभिमतमोक्षस्याप्रामाणिकत्वोक्तिः ॥*

**यादु०— अन्यथा व्याकुर्वत इति** । वस्तुकथनमेतत् तथाहीत्यादिना पूर्वोक्तप्रकारेण व्याकुर्वत इत्यर्थः । अभिप्रायः कल्पित इत्यत्र परीत्येति शेषः । विष्णुतत्त्वनिर्णयटीकायामस्याभिप्रायस्य आशङ्क्य दूषितत्वात् । स्वरीत्या वा आह **अपुरुषार्थताप्रसङ्गो वेति** ।

**वं०प०— अन्यथा व्याकुर्वत इति** । वस्तुस्थितिकथनपरत्वेनेत्यर्थः ॥ **नाहृदयमिति** । अभिप्रायशून्यं न भवतीत्यर्थः । **असुज्ञत्वं** सम्यग्ज्ञानित्वाभावः । अविवेकित्वमिति यावत् । अपुरुषार्थत्वप्रसङ्गो वाऽभिप्रायः कल्प्य इत्यत्र ज्ञापकमाह **यथोक्तमिति** ॥ **किं मुक्त्या नः प्रयोजनमिति** । 'मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेदि'ति भावः । इति चोदिते इत्यस्य याज्ञवल्क्यः प्रियामाहेत्युत्तरेण सम्बन्धो द्रष्टव्यः । नापीत्यनन्तरं ज्ञानाभावस्येति शेषः । समर्थितेत्यनन्तरं याज्ञवल्क्येनेत्यर्थः ।

**कं०रा०— नाहृदयमिति** । अभिप्रायरहितं न भवतीत्यर्थः ॥ **अपुरुषार्थत्वप्रसङ्गो वेति** । मुक्तौ सर्वात्मना ज्ञानाभावे मुक्तेरपुरुषार्थत्वप्रसङ्ग इत्यभिप्रायः कल्प्यत इत्यर्थः । अत्रैव मा भगवानित्यादेर्मैत्रेयीवाक्यस्योक्ताभिप्रायद्वये सम्मतिमाह **यथोक्तमिति** । संज्ञानाशे यदीत्यादिपूर्वार्धे मैत्रेयीवाक्यस्य मुक्तौ ज्ञानाभावे मोक्षस्यापुरुषार्थत्वप्रसङ्ग इत्यभिप्राय इत्यत्र सम्मतिः । 'मोहं मामि'त्याद्युत्तरार्धस्तु तद्वाक्यस्य 'विज्ञानघन' इत्यात्मनो ज्ञानस्वरूपत्वमभिधाय इदानीं 'न प्रेत्य संज्ञाऽस्ती'ति ज्ञानाभावं वदतस्तव वाक्यं परस्परं व्याहततया मोहकमित्यभिप्राय इत्यत्र सम्मतिः । मैत्रेय्युक्तोत्तरं च किमित्यत्र किंशब्दस्याक्षेपार्थत्वमभिप्रेत्य शेषं पूरयन् पर्यवसितार्थमाह **अन्यथाव्याख्यान इति** । 'अविनाशी वा अरे अयमात्मे'त्यादिवाक्यानामन्यथाव्याख्याने मैत्रेय्युक्तमत्रैव मा भगवानित्यादिकं निरुत्तरं प्रसज्येतेत्यर्थः । तदेवोपपादयति **न हीति** ॥ अन्यथाव्याख्यायमानैरविनाशीत्यादिवाक्यैर्मैत्रेय्युक्तं विज्ञानघन इति याज्ञवल्क्यवचनस्य न प्रेत्य संज्ञाऽस्तीति तद्वचनेन व्याघातो न हि परिहृतो नापि ज्ञानाभावेऽपि मोक्षस्य पुरुषार्थता समर्थिता येन मैत्रेय्युक्तस्योत्तरं स्यादिति भावः ।

**शे०चं०— अन्यथा व्याकुर्वत इति** । वस्तुस्थितिकथनमेतत् ॥ तथा हीत्यादिपूर्वोक्तप्रकारेण व्याकुर्वत इत्यर्थः ॥ **नाहृदयमिति** । न निरभिप्रायम् ॥ **मोहकमिति** । व्याहतार्थप्रतिपादकत्वान्मोहकमिति भावः । अभिप्रायः कल्प्य इत्यत्र त्वद्रीत्येति शेषः । तत्त्वनिर्णयटीकायामस्याप्यभिप्रायस्याशङ्क्य दूषितत्वात् । अपुरुषार्थत्वप्रसङ्गो वेत्यत्र कल्प्य इति वर्तते । मद्रीत्येति शेषः । अपुरुषार्थत्वप्रसङ्गस्य स्वसिद्धान्तत्वं गीता-तात्पर्यवाक्योदाहरणेन समर्थयते **यथोक्तमिति** ॥ **अन्यथेति** । यत्र हीत्यस्य वस्तुस्थितिकथनत्वे मैत्रेय्युक्तस्य स्वव्याघातादेर्निरुत्तरत्वप्रसङ्गमेवोपपादयति **न हीति** ।

**वा०र०—** अपुरुषार्थत्वासङ्कीर्णत्वार्थमाह **व्याहतार्थेति** । प्राग्विज्ञानघनत्वमभिधायेदानीं संज्ञाभावा-भिधाने व्याघातस्य स्वरीत्याऽप्राप्तेराह **त्वद्रीत्येति शेष इति** । नन्वयं व्याघातः स्वरीत्यापि शक्यते वक्तुम् । विज्ञानघन इत्यादित एवारभ्य व्याख्यानावसरे भवान्मां प्रति यदाह मुक्तो न जानातीति तन्मोहकमेवेत्यादिषु प्राक्सामान्यतो मोहकत्वाभिधानेन व्याघातस्यापि मैत्रेयीवाक्यतात्पर्यविषयतायाः स्वीकर्तुमुचितत्वादिति चेन्न । मैत्रेय्या यदि व्याघाताभिधानेऽपि तात्पर्यं तर्ह्यत्रैव मा भवान्मोहान्तमापद्विज्ञानघन इति न प्रेत्य संज्ञास्तीति वाक्यद्वयोपपादनप्रसङ्गाद्व्याघातस्योभयाश्रयत्वात् । एकस्यैव तु वाक्यस्योपादानात् तद्विषयमेव दोषोद्भावनमिति मुक्तेरपुरुषार्थत्वमेवाभिप्रायतया वचनमिति न व्याघातोऽप्यभिप्रेतः । तदेतद्वक्ष्यति **दूषितत्वादिति** । अत एव ज्ञानरूपस्येति वाक्यव्याख्यानावसरे तथा सति युक्तेरपुरुषार्थप्रसङ्गादित्यपुरुषार्थत्वमेवाभिप्रेततया दर्शितम् । एवं च प्राक्सामान्यतो मोहकमित्युक्तेऽपि व्याघातातिरिक्तापुरुषार्थत्वमेवाभिप्रेततया वाच्यमिति युक्तं परीतिलाश्रय-णम् । तत्त्वनिर्णयटीकाग्रन्थस्त्वतिनिरवकाशः । अत एवोक्ताभिप्रायमेवेदमित्यवधारणं तत्रेति द्रष्टव्यम् । ननु प्राग्व्याघातस्याप्रकृतत्वात् कथं तदनुवाद इत्यतोऽत्र अप्रकृतत्वेऽप्येतत्समानार्थतत्त्वनिर्णयटीकायामस्याभिप्राय-स्याशङ्कनेन अत्रापि तच्छङ्काभिप्रायस्य सिद्धतया अनुवादोपपत्तेरित्याशयेनाह **तत्त्वनिर्णयटीकायामिति** । अत्रापिपदमाशङ्काया वा दूषणस्य वा न समुच्चायकं किन्त्वभिप्रायस्योभयत्र समुच्चयार्थकमिति न दोषः । अभिप्रायः कल्प्य इति वर्तत इति पाठः । कल्प्य इत्येवोक्तेऽपि विशिष्ट एवार्थ इत्यप्याहुः । **गीतातात्पर्य एवेति** । द्वितीयाध्याये गीतातात्पर्ये उदाहृतश्रुतिरूपप्रमाणवाक्येत्यर्थः । न हीत्युत्तरग्रन्थस्योपपादकत्वान्न वैयर्थ्यमित्याशयेनाह **मैत्रेय्युक्तस्येति** ।

**॥ इति 'अविनाशी' इत्यादिश्रुतेः अन्यथाव्याख्याने बाधकप्रदर्शनम् ॥**

* * *

**॥ अथ मोक्षस्य सुखादिहानिरूपत्वे अपुरुषार्थत्वप्रसङ्गः ॥**

**१०७ सु०— एवं साङ्ख्यनैयायिकाद्यभिमतस्य मोक्षस्य अप्रामाणिकत्वमभिधाय; यदुक्तं मोक्षस्यापुरुषार्थत्वप्रसङ्ग इति तत्प्रपञ्चयति सुखादीति ।**

## अनु०— सुखादिधर्महानौ तु मुक्तेः किं च प्रयोजनम् ।

**सुखादिधर्महानौ** मुक्तित्वेनाङ्गीकृतायामिति शेषः । **तुशब्दः स्वपक्षाद्विशिनष्टि । परस्य आपाद्यमानो दोषः स्वमते नास्तीत्याशयः । मुक्तेरिति सम्बन्धमात्रे षष्ठी । किमाक्षेपे । चशब्दोऽप्रामाणिकत्वेन समुच्चयार्थः । प्रयुज्यते प्रवर्त्यते पुरुषोऽनेनेति प्रयोजनम् । मुक्तेः प्रयोजनं किमिति । मुक्त्यर्थे पुरुषं प्रवर्तयत्किमपि नास्तीत्यर्थः ।**

**परि०— यदुक्तमिति** । 'हेयत्वादप्रियस्ये'त्यत्रेति भावः ॥ मुक्तिजन्यप्रयोजनमितिधीनिरासायाह **सम्बन्धमात्रे षष्ठीति** । न केवलं प्रागुक्तदिशाऽप्रामाणिकाः अपि तु अपुमर्थश्चेति समुच्चये चशब्द इत्याह **चशब्द इति** । 'सम्बन्धमात्र' इत्युक्तस्य विवरणं **मुक्त्यर्थ इति** ।

**गु०दी०—** मुक्त्या किं प्रयोजनमिति तृतीयया भवितव्यम् । मुक्तेरिति षष्ठी कथमित्यत उक्तं **सम्बन्धमात्रे षष्ठीति** ।

**यादु०—** मुक्तिसाध्यं प्रयोजनमिति प्रतीतिनिरासायाह **सम्बन्धमात्र इति** । तमेव सम्बन्धं दर्शयति **मुक्त्यर्थ इति** । तथा च मुक्तिजनकप्रवृत्तिमत्पुरुषेष्यमाणत्वमेव सम्बन्ध इति भावः ।

**वं०प०—** यदि विषसम्पृक्तमधुवत् दुःखमिश्रितत्वात् सुखमनुपादेयं स्यात् तन्निवृत्तिः पुरुषार्थः स्यादिति यावत् । तर्हि सुखस्योपादेयत्वेन तन्मिश्रितत्वात् दुःखशब्दोदितं संसारस्याप्युपादेयत्वं स्यादित्याह **दुःखशबलेति** । दुःखामिश्रितेत्यर्थः ।

**शे०चं०— यदुक्तमिति** । 'आत्मप्रियहानाय को यतेते'त्यादिनेति शेषः । तुशब्दोक्तं विशेषमेव दर्शयति **परस्येति** ॥ **आपाद्यमानो दोष इति** । अर्थ्यत्वाभावलक्षण इत्यर्थः । स्वमते मुक्तेरिष्टप्राप्त्यादिरूपत्वेनार्थ्यत्वसम्भवादिति भावः । कर्तरि कर्मणि वा षष्ठीपरिग्रहेऽनन्वयादाह **मुक्तेरितीति** । यद्वा मुक्तिसाध्यं प्रयोजनमिति प्रतीतिनिरासायाह **मुक्तेरितीति** ॥ **समुच्चयार्थ इति** । अप्रामाणिकत्वेन सहार्थ्यत्वाभावस्य समुच्चयार्थ इत्यर्थः । यदीत्युत्तरग्रन्थेऽर्थ्यत्वप्रयोजकतया अनिष्टनिवृत्तिरूपताया आशङ्क्य निराकरणात् अत्र प्रयोजनशब्दः अर्थ्यत्वप्रयोजकपर इत्यभिप्रेत्य तत्परतया प्रयोजनशब्दं व्याचष्टे **प्रयुज्यत इति** । षष्ठ्यर्थसम्बन्धमुपदर्शयन् वाक्यार्थमाह **मुक्तेरित्यादिना** ॥ **मुक्त्यर्थ इति** । तथा च मुक्तिजनकप्रवृत्तिमत्पुरुषेष्यमाणत्वमेव सम्बन्ध इति भावः ॥ **किमपीति** । इष्टप्राप्तिरूपत्वमनिष्टनिवृत्तिरूपत्वं चेत्यर्थः । इष्टप्राप्तिरूपतायाः परेणैवानङ्गीकृतत्वात् अनिष्टनिवृत्तिरूपतायाश्च वक्ष्यमाणरीत्या असम्भवादिति भावः ।

**स०व्र०—** विशेषार्थत्वमाह **परस्येति** ॥ **मुक्तेरिति** । कर्तरि कर्मणि वा षष्ठीपरिग्रहेऽनन्वयादिति भावः ।

१०८ सु०— द्विविधं प्रयोजनम् । इष्टावाप्तिरनिष्टनिवृत्तिश्च । तत्र यद्यपि मुक्तिरिष्टप्राप्तिरूपा न भवति तथाऽप्यनिष्टनिवृत्तिरूपा भवत्येव । अतः पुरुषेणार्थ्यत इत्याशङ्कते **यदीति** ।

## अनु०— यद्यर्थो दुःखहानिः स्यात्

**दुःखहानि**रूपा मुक्तिः पुरुषस्य **अर्थः** अर्थनीयः **स्यात्** इति **यदि** ब्रूषे । अत्रोच्यते— भवति अनिष्टनिवृत्तिः पुरुषार्थः, मुक्तिश्च समस्तदुःखहानिः, तथाऽपि न पुरुषार्थः कथमित्यत आह **अनर्थ इति** ।

## अनर्थः सुखनाशनम् ।

**सुखनाश**रूपः **अनर्थः** अपि अस्ति यतः ।

इदमुक्तं भवति । केवलस्य दुःखस्यात्यन्तिकी निवृत्तिर्भवति पुरुषार्थः, इयं तु दुःखवत् सुखस्याप्यात्यन्तिकी निवृत्तिरिति कथं पुरुषार्थः । अनिष्टनिवृत्त्याशया प्रवृत्तौ इष्टनिवृत्तिभिया निवृत्त्यापत्तेः । दुःखशबलसुखहानौ सुखशबलदुःखोपादानप्राप्तेश्च ।

यादु०— **दुःखोपादानेति** । संसारस्यैवोपादानप्राप्तेरित्यर्थः ।

कं०रा०— **दुःखशबलसुखहानाविति** । स्वीक्रियमाणायामिति शेषः ॥ **सुखशबलेति** । अविशेषादिति भावः ।

शे०चं०— अनर्थ इत्याद्युत्तरग्रन्थे परिहारत्वज्ञापकाभावात् साक्षात्परिहारत्वानुपपत्तेश्चासङ्गतिमाशङ्क्य साक्षात्परिहारत्वाभावेऽपि तदुपपादकत्वान्नासङ्गतिरित्यभिप्रेत्य मध्ये परिहारमध्याहृत्य तदुपपादकतयोत्तरग्रन्थं सङ्गमयति **अत्रोच्यत इति** । एतद्वाक्यार्थस्योक्तार्थोपपादकतया मूलारूढतासिद्ध्यर्थमपेक्षितं पूरयति **अप्यस्ति यत इति** । ननु सुखनाशरूपत्वेऽप्यनिष्टदुःखनिवृत्तिरूपत्वान्मुक्तेः पुरुषार्थत्वं भविष्यत्येव । सुखस्य दुःखशबलत्वेन हेयत्वान्न तन्नाशेनेष्टनाशरूपत्वमपीत्यत आह **इदमुक्तं भवतीति** ॥ **दुःखोपादानेति** । ततश्च नानिष्टनिवृत्तिरूपत्वमपि मुक्तेरिति भावः ।

वा०र०— **उक्तार्थेति** । दुःखनिवृत्तेरपुरुषार्थत्वरूपेत्यर्थः । अनेनानर्थः सुखनाशनमित्यस्याध्याहृतेन परिहारेण सम्बन्धो भाष्याभिप्रेत इत्युक्तं भवति ।

१०९ सु०— यदत्रोक्तं 'यस्य दुःखमुपादेयं तस्य हेयं किमुच्यताम् । हेयहीनस्य का मुक्तिः केन चाप्युपदिश्यते' इति, तदिदमसङ्गतम् । न हि वयं दुःखस्योपादेयत्वमुपपादयामः । किन्तु समव्ययफलत्वेन विनिगमने कारणाभावात् न प्रवृत्त्युपपत्तिरिति ब्रूमः । यथोक्तम् 'असत्यानि दुरन्तानि समव्ययफलानि च । अशक्यानि च वस्तूनि नारभेत विचक्षणः' इति । अङ्गीकृत्यैव समव्ययफलत्वमुक्तम् । वस्तुतस्तु आयादपि व्ययो गरीयानित्याह **तयोश्चेति** ।

## अनु०— तयोश्च दुःखहानाद्धि सुखनाशोऽधिको भवेत् ।

सुखदुःखहानयोर्मध्ये । न हि राजादयो राज्याद्यपगमे दुःखहानेन सुखहानव्यथां समादधति । ततो निवृत्तिरेव मुक्तेरिति भावः ।

**परि०— यदत्रेति** । दुःखस्योपादानविषये मुक्तिर्नेत्युक्तमित्यर्थः । तद्वाक्यं पठति **यस्येति** । नीतिवाक्यं पठति **असत्यानीति** । **दुरन्तानि** उत्तरावधिशून्यानि ॥ **दुःखहानेनेति** । राज्यव्यापारविक्षेपनिमित्तदुःखहानेन भोगनिमित्तसुखहानेत्यर्थः । **मुक्तेः** इति पञ्चमी ।

**वं०प०— दुःखं** संसारः । **उपपादयामः** साधयामः ॥ **समव्ययफलत्वेनेति** । अनिष्टनिवृत्त्याशया प्रवृत्तस्येष्टनिवृत्त्यापत्त्या समव्ययफलत्वमित्यर्थः ॥ **विनिगमन इति** । दुःखमिश्रितत्वेन सुखस्यापुरुषार्थत्वे सुखमिश्रितत्वेन दुःखस्याप्युपादेयत्वप्राप्त्या विनिगमने कारणाभावादित्यर्थः । **ब्रूमः** आपादयामः । अत एवोक्तं 'इष्टनिवृत्तिभयान्निवृत्त्यापत्तेरि'ति । दुःखोपादानप्राप्तेश्चेति द्रष्टव्यम् ॥ **अङ्गीकृत्यैवेति** । दुःखहानिसुखहान्योः साम्यमिति शेषः । **आयादिति** । दुःखहानिरूपादायादपीत्यर्थः । **व्ययः** सुखहानिरूपः । **राजादय** इत्यादिपदेन धनिकानां ग्रहणम् । **राज्यादीत्यादिपदेन** धनग्रहणम् ॥ **दुःखहानेनेति** । राज्यपालनस्य धनसंरक्षणस्य च बहुदुःखरूपत्वादित्यर्थः ॥ **मुक्तेर्निवृत्तिरेवेति** । मुक्तेः सकाशान्निवृत्तिरेव स्यादित्यर्थः ।

**कं०रा०— समव्ययफलत्वेनेति** । सुखनिवृत्तिर्व्ययो दुःखनिवृत्तिः फलमिति भावः ॥ **तत इति** । दुःखहानापेक्षया सुखनाशस्याधिकत्वात् तार्किकाद्यभिमतमोक्षनिवृत्तिरेव स्यादित्यर्थः ।

**शे०चं०— यदत्रोक्तमिति** । निबन्धकृतेति शेषः ॥ **यस्य दुःखमिति** । यद्यप्यत्र यस्य सुखं हेयं तत्किमुपादेयमिति तुल्यम् । न च दुःखनिवृत्तिरेवोपादेया । तर्हि केवलं दुःखं हेयं सुखशबलं तूपादेयमित्यपि तुल्यम् । तथाऽपि सुखे सत्युत्तरकालसुखासम्भिन्नदुःखस्यावश्यकत्वेन केवलदुःखस्य हातुमशक्यतया केवलदुःखहानार्थं प्रवृत्तः शरीरादिदुःखहेतुनिवृत्त्या अर्थतः सुखनिवृत्तिमप्यासादयतीत्यत्र तात्पर्यमित्यवधेयम् ॥

**समव्ययफलत्वेनेति** । मुक्तेरात्यन्तिकदुःखनिवृत्तित्ववत् सुखनिवृत्तित्वस्याप्यङ्गीकृतत्वात् समव्ययफलत्वेन विनिगमने कारणाभावात् न पुरुषार्थत्वम् । ततश्च न प्रेक्षावत्प्रवृत्त्यङ्गत्वम् । अनिष्टनिवृत्त्याशया प्रवृत्तिवदिष्ट-निवृत्तिभयेन निवृत्तेरपि प्रसङ्गादित्येव ब्रूमो वयम् । न पुनर्दुःखस्याप्युपादेयतामिति नोक्तदोष इति भावः । उक्त-मर्थं नीतिशास्त्रसम्मत्या दर्शयति **यथोक्तमिति** । **दुरन्तानि** दुःखोत्तराणि, समे व्ययफले येषां तानि समव्यय-फलानि, अशक्यानि साधकप्रयत्नासाध्यानि 'व्यसनानि दुरन्तानीति', 'असत्यानि दुरन्तानि' च चिरन्तन-निबन्धादिग्रन्थेषु पाठद्वयस्यापि दर्शनादिह टीकायां पाठद्वयमपि नायुक्तम् । 'अनर्थः सुखनाशनमि'त्यादिना समव्ययफलत्वस्योक्तत्वात् तयोश्चेत्यादिना उत्तरत्र तदभावोक्तेर्विरुद्धत्वमाशङ्क्य परिहरति **अङ्गीकृत्यैवेति** ।

**वा०र०— निबन्धकृतेति शेष इति** । प्रथमभाष्यसम्बन्धिप्रागुदाहृतस्वनिबन्धकृतेत्यर्थः । दुःख-शबलसुखेति पूर्वमूलवाक्यार्थोऽप्यनेन स्फुट इति ज्ञेयम् । तद्वर्धमानानुसारेणाह **यद्यपीति** ॥ **विनिगमन इति** । समापव्ययत्वे सत्यादायरूपत्वेन पुरुषार्थत्वं व्ययरूपत्वेन तदभावस्तु नेत्यत्र विनिगमने कारणाभावादित्यर्थः । नैयायिकाभिमतमोक्षस्वरूपानुवादस्थलीयन्यायमकरन्दे उदाहृतैतद्वाक्यव्याख्यानरूपचित्सुखानुसारेणाह **उक्तमर्थ-मित्यादि** । व्ययरूपफलस्यैकस्यैवोक्तिरयुक्ता, आयस्यापि वक्तव्यत्वादित्यतो नात्र समव्ययरूपं फलं येषामिति विग्रहः अपि तु फलपदस्यैवायपरत्वात् समे व्ययफले येषामितीत्यतो नानुपपत्तिरित्याशयेन व्याख्याति **समे व्ययफले येषामिति** । अनेनैव नीतिशास्त्रानुसारेण समव्ययफलत्वेनेति पूर्वमूलोक्तिरपि व्याख्याता वेदितव्या । उत्तरमूलेऽपि समव्ययफलत्वमित्येवानुवादं कृत्वाऽप्यायादपीति व्याख्यानरूपेणाप्युक्तेश्चेति ज्ञातव्यम् । निबन्धा-दिष्वित्यादिपदेन न्यायमकरन्दादिग्रन्थान्तरपरिग्रहः ।

* * *

**११० सु०— यत्र निवर्तमानं दुःखमल्पीयः । सुखं तु महत्तत्रैवमेतत् । इह तु महद्दुःखं निवर्तते सुखं त्वल्पीयस्तत्कथं न पुरुषार्थत्वम् । यथोक्तम् । 'यस्तु घनतरदुःख(तिमिर)-निरन्तरात् संसारकान्तारात् सुखखद्योतिकासु द्योतमानास्वपि बिभेति, तं प्रत्ययं निरस्त-तस्करतया सुगमो मार्ग उप(दिश्यत)दर्शित' इति । तत्राह प्राप्यापीति ।**

**अनु०— प्राप्यापि दुःखं सुमहत्सुखलेशाप्तये जनः ।**
**यतते सुखहानौ हि को मोक्षाय यतेत् पुमान् ॥**

यतो जाङ्गिकादिर्जनः सुमहद्दुःखं प्राप्यापि सुखलेशाप्तये यतते तस्मादल्पस्यापि **सुखस्य हानौ** महतोऽपि दुःखस्य **मोक्षाय** कः **पुमान् यतेत** ? न कोऽपि । 'अभ्युपगम-

**वादश्चायम् । न हि सांसारिकसुखस्य दुःखापेक्षयाऽल्पत्वं प्रमितम् । कस्मिंश्चन जन्मनि अयं (दरिद्रो)(दुर्भगो) दुःखितो भवति कस्मिंश्चित् सार्वभौमः कदाचिन्नरकमनुभवति कदाचित् स्वर्गम् । या च मोक्षशास्त्रेषु सांसारिकसुखनिन्दा सा निरस्तसमस्तदुःखं मोक्षगतं परमानन्दमपेक्ष्य अल्पत्वाभिप्रायेणेति ।**

**परि०**— शङ्कते **यत्रेति** ॥ **एवमेतत्** निवृत्तिरित्येतदेवमेवेत्यर्थः । **निरन्तरात्** निबिडात् **कान्तारात्** दुर्गममार्गात् 'कान्तारं वर्त्म दुर्गममि'त्यभिधानात् ॥ **निरस्ततस्करतयेति** । दस्युनिबिडे कान्तारे गन्तुं बिभ्यतस्तस्करनिरासेन सुगमो मार्गो लोके दयालुनोपदिश्यते तथेत्यर्थः ॥ **जाङ्घिकादिर्जन इति** । जङ्घाभ्यां जीवति यो जनः स जाङ्घिकः । जङ्घापदात् जीवतीत्यर्थे चतुर्थाध्यायान्त्यपादस्थेन 'वेतनादिभ्यो जीवती'ति सूत्रेण ठकि सति तस्येकादेशादिवृद्धि 'यस्ये'ति लोपेषु रूपसिद्धेः । वैतनिक इत्यादिवत् । अन्यवार्ता राजानं प्रति वा राजवार्तामन्यं प्रति वा राजपत्रादिकं वा इतस्ततो नेतुं नित्यं बहुयोजनं सञ्चरन् पुरुष इत्यर्थः । **आदिपदेन** समुद्रे प्लवेन वाणिज्यं कुर्वन् वणिक् तस्करः सेवकश्चेत्येवमादिर्ग्राह्यः ॥ **या चेति** । 'धर्मार्थकामास्सर्वेऽपि न नित्या मोक्ष एव तु । नित्यस्तस्मात्तदर्थाय यतेत मतिमान्नर' इति । अनित्यत्वात्सदुःखत्वान्न धर्माद्याः परं सुखम् । मोक्ष एव परानन्दः संसारे परिवर्ततामि'त्यादौ च निन्देत्यर्थः ।

**गु०दी०**— **जाङ्घिकादिर्जन** इत्यत्र जाङ्घिको जङ्घासत्त्ववान् आन्दोलिकावाहकादिः अल्पतरलाभाय दूरधावनं शिबिकोद्वाहनादिना महान्तमायासं सहत इत्यर्थः ।

**यादु०**— **जाङ्घिकादिरिति** । जङ्घाभ्यां जीवति यः स जाङ्घिकः । एकस्मिन् दिवसे बहुयोजनपरिमितमार्गगमनशीलो नरस्तदादिर्जनेत्यर्थः ।

**वं०प०**— शङ्कते **यत्रेति** ॥ **एवमेतदिति** । इष्टनिवृत्तिभयान्निवृत्त्यापत्तेरिति भवद्भिरापादितं समन्वयफलत्वमस्त्वित्यर्थः । अल्पीयो निवर्तते ॥ **न पुरुषार्थत्वमिति** । दुःखनिवृत्तेरिति शेषः । उक्तार्थे स्वाचार्यवाक्यसम्मतिमाह **यथोक्तमिति** । अत्र धनतरेत्यनेन दुःखस्य महत्त्वमुक्तं, संसारसुखस्य खद्योतिकासमत्वोक्त्या अल्पीयस्त्वमुक्तं ज्ञातव्यम् ॥ **जाङ्घिकादिरिति** । 'जाङ्घिकः शीघ्रपादवानि'त्यमरः । कालारीत्यपभ्रष्टभाषा ॥ **अभ्युपगमवाद इति** । प्राप्तापीति मूलेन दुःखस्य महत्त्वं सुखस्य लेशशब्देनाल्पीयस्त्वकथनं चाभ्युपगमवाद इत्यर्थः । आमुष्मिकापेक्षयाऽऽह **कदाचिन्नरकमिति** । ननु सांसारिकसुखस्याल्पीयस्त्वाभावे 'अभिध्यायन् वर्णरतिप्रमोदानतिदीर्घे जीविते को रमेते'त्यादिना मोक्षशास्त्रे उपनिषदादौ तन्निन्दाकरणं न स्यादिति चेत् तत्राह **या चेति** ।

**कं०रा०— इह त्विति** । मुक्तौ तु महद्दुःखं निवर्तते सुखं त्वल्पीयो निवर्तते । तत्कथं मुक्तेः न पुरुषार्थत्वमित्यर्थः ॥ **जाङ्घिकादिरिति** । 'जाङ्घालोऽतिजवस्तुल्यो जङ्घाकरिकजाङ्घिकावि'त्यमरः । तट्टीकाकारेण जङ्घाकरिकद्वयं जङ्घाजीविनि धावकादावित्युक्त्वा जङ्घया जीवतीत्यर्थे जङ्घाशब्दात् ठकि जाङ्घिकशब्दो निष्पन्न इत्युक्तम् । यङ्लुगन्ताद्धन्तेः पचाद्यचि नासिकोदरौष्ठजङ्घेति निपातनाद्द्विलोपे जङ्घाशब्दो निष्पन्न इति धातुवृत्तावुक्तम् ॥ **कः पुमान् यतेतेति** । को मोक्षाय यतेत् पुमानिति परस्मैपदप्रयोगस्योपपत्तिः स्वनाशार्थे च को यतेदित्येतद्व्याख्यानावसरेऽभिहितेति भावः ॥ **सार्वभौम इति** । यद्यपि तस्येश्वर इत्यधिकृत्य सर्वभूमिपृथिवीभ्यामणञाविति विहिताणप्रत्ययान्तेन सार्वभौमशब्देन सर्वभूमेरीश्वरत्वमेवोच्यते तथाऽप्यैश्वर्यवाचिना तेन तत्प्रयुक्तं सुखं लभ्यते अतः प्रकृतसङ्गतिरिति ध्येयम् । ननु सांसारिकसुखस्य दुःखापेक्षयाऽल्पत्वाभावे मोक्षशास्त्रे तन्निन्दा कथमुपपद्यत इत्यत आह **या चेति** ।

**शे०चं०— शङ्कते यत्रेति** ॥ **एवमेतदिति** । आयादपि व्ययस्य गरीयस्त्वमित्यर्थः ॥ **तत्कथमिति** । अपुरुषार्थत्वहेतोः समव्ययफलत्वस्याभावान्निवृत्तिमात्रहेतोश्च सुखनाशाधिक्यस्यैवाभावात् कथं न पुरुषार्थत्वं कथं च न प्रवृत्त्यङ्गत्वमित्यर्थः । अत्रार्थे निबन्धनवाक्यं सम्मतित्वेन पठति **यथोक्तमिति** । इह टीकायां दुःखतिमिरनिरन्तरादित्येव मूलपाठः । क्वचिद्दुःखनिरन्तरादिति पाठः । तत्रापि दुःखतिमिरनिरन्तरादित्येवार्थो ध्येयः । निरस्ततमस्तयेति च श्लिष्टः पाठः ॥ **जाङ्घिकादिरिति** । 'जङ्घालो(ऽतिजवस्तुल्यौ) जङ्घाकरिकजाङ्घिकावि'त्यभिधानेन यो जङ्घामुपजीव्य शीघ्रं गच्छति, एतादृशः शीघ्रगामी नरो जाङ्घिकादिर्जन इत्यर्थः । मूले हिशब्दो यस्मादित्यर्थः । यच्छब्दश्रवणात् तस्मादित्यस्य लाभ इत्यभिप्रेत्य यत्तस्मादिति योजितमित्यवधेयम् । बहुलमेतन्निदर्शनमिति स्मरणाद्यतेदिति परस्मैपदमित्यादि समाधानं मनसि निधायाह **पुमान् यतेतेति** । सांसारिकदुःखापेक्षयाऽल्पत्वमुक्तं तद्वास्तवमिति भ्रमं परिहरति **अभ्युपगमेति** । ननु चैवं सांसारिकसुखस्य दुःखापेक्षया महत्त्वे कथं मोक्षशास्त्रे तस्याल्पत्वोक्तिरित्यत आह **या चेति** ।

**वा०र०— सुखनाशाधिक्यस्येति** । अधिकसुखनाशस्येत्यर्थः । **निबन्धवाक्यमिति** । उदाहृतस्थलीयमिति शेषः । **श्लिष्टः पाठ इति** । तिमिरनैरन्तर्यविरोधितयाऽस्यैव वाच्यत्वादिति भावः । अनेन निरस्ततस्करतयेति पाठस्यायोग उक्तो भवति । जङ्घाल इत्यभिधानपाठः शोध्यः । **शीघ्रमिति** । उपलक्षणं चैतत् । बहुयोजनानि गच्छतीत्यपि ग्राह्यम् । **इति स्मरणादिति** । उपलक्षणं चैतत् । व्यत्ययो बहुलमित्यत्र बहुलग्रहणादेरित्यपि द्रष्टव्यम् । एतच्च स्वनाशार्थे च को यतेदित्यादिषु बहुस्थलेषु प्राग्व्युत्पादितमिति भावः ।

**स०व्र०— जाङ्घिकादिरिति** । 'जङ्घालोतिजवस्तुल्यौ जङ्घाकारिकजाङ्घिकावि'त्यभिधानेन जङ्घाभ्यामुपजीव्य गच्छत्येतादृशशीघ्रगामी नरः जाङ्घिकादिर्जन इत्यर्थः ।

**॥ इति मोक्षस्य सुखादिहानिरूपत्वे अपुरुषार्थत्वप्रसङ्गः ॥**

* * *

॥ अथ सुखलेशप्राप्तये महादुःखानुभवः लोकसिद्धः ॥

१११ **सु०**— महादुःखहानादल्पं सुखं गरीय इत्येतत् प्रकारान्तरेणोपपादयति **अल्पाच्चेति**।

**अनु०— अल्पाच्च सुखनाशाद्धि बिभेत्यतितरां जनः ।**
**महच्च दुःखमाप्नोति सुखनाशनिवृत्तये ॥**

**(हानस्या)नाशस्यालपत्वं प्रतियोग्यल्पत्वनिमित्तम्। अल्पस्यापि सुखस्य (हानादि)-नाशादिति यावत्। सुखनाशनिवृत्तय इति। प्रसक्तस्य सुखनाशहेतोर्निवृत्तय इत्यर्थः। उदाहरणानि तु लोके स्पष्टान्येव, कथं तर्हि मधुविषसंपृक्तान्न(भोजन)परित्याग इति चेत्। बहुतरसुखहानिप्राप्तेरिति ब्रूमः। अन्यथा परेणापि व्यवस्थायाः कर्तव्यत्वात्।**

**परि०**— नाशस्य ध्वंसरूपस्य नित्यतया निवृत्त्ययोगादाह **प्रसक्तस्येति**॥ **स्पष्टान्येवेति**। जाङ्गिकास्तस्करसेवककृषीवलादीनीति भावः ॥ **परेणापीति** । दुःखहानिः पुमर्थ इति वदताऽपि तात्कालिकक्षुन्निमित्तदुःखहानेस्तत्रापि सत्त्वात् कथं त्याग इत्युक्ते दुःखहानिरल्पा दुःखावाप्तिरधिकेत्येवोक्त्या यत्र महादुःखहानिः तत्रैव प्रवृत्तिर्नान्यत्रेति व्यवस्थायाः कर्तव्यत्वादित्यर्थः । यद्वा जाङ्गिकादावल्पसुखं पुमर्थत्वं मधुविषसम्पृक्तान्ने सत्यप्यल्पसुखे पुमर्थत्वाभाव इत्यत्र महादुःखानवाप्त्यवाप्तिभ्यां व्यवस्थायाः कार्यत्वादित्यर्थः ।

**यादु०**— नाशस्यानिर्वर्त्यत्वादाह **प्रसक्तस्य सुखनाशहेतोरिति** ॥ **कथं तर्हीति** । यद्यल्पमपि सुखं पुरुषार्थ इत्यर्थः ॥ **अन्यथेति** । बहुतरसुखहानाननुबन्ध्यल्पसुखं पुरुषार्थोऽतो नोक्तव्यभिचार इत्युक्तसमाधानानादर इत्यर्थः ॥ **व्यवस्थाया इति** । जाङ्गिकादावल्पस्यापि सुखस्य पुरुषार्थत्वं मधुविषसम्पृक्तान्नभोजनादौ तस्यापुरुषार्थत्वमित्यत्र व्यवस्थापकस्य वाच्यत्वादित्यर्थः ।

**वं०प०**— नाशस्य निवृत्तेरभावादाह **नाशहेतोरिति** ॥ **कथं तर्हीति** । अल्पमपि सुखं यदिष्टं स्यादित्यर्थः ॥ **परित्याग इति** । तत्रापि भोजनजनिततात्कालिकाल्पसुखसद्भावादिति भावः ।

**कं०रा०**— अल्पाच्च सुखनाशात् बिभेतीत्यत्र नाशस्याल्पत्वायोगो महादुःखहानादल्पं सुखं गरीय इत्यस्य अनेनानुपपादनात् प्रकृतानुपयोगश्चेत्यतो व्याचष्टे **नाशस्याल्पत्वं प्रतियोगिनिमित्तमिति** । प्रतियोग्यल्पत्वनिमित्तकमित्यर्थः । ध्वंसस्य नित्यत्वात् सुखनाशनिवृत्तय इत्येतदयुक्तमित्यतो व्याचष्टे **प्रसक्तस्येति** ॥ **कथं तर्हीति** । महादुःखहानादल्पस्य गरीयस्त्वेन तदर्थं तद्भोजने प्रवृत्तेरेवापत्तेरिति भावः ॥ **बहुतरेति** ।

मधुविषयसम्पृक्तान्नप्रयुक्तबहुतरसुखहानिः स्यात् सा मा भूदित्येतदर्थं मधुविषसम्पृक्तान्नपरित्यागः क्रियते न दुःखहानार्थमिति ब्रूम इत्यर्थः ।

**शे०चं०**— नाशस्योत्कर्षापकर्षशून्यत्वादपकर्षरूपाल्पत्वोत्त्यनुपपत्तिमाशङ्क्याह **हानस्येति** । **प्रतियोगिनिमित्तमिति** । प्रतियोग्यल्पत्वनिमित्तमित्यर्थः । अनेन मूले नाशशब्दो नश्यत्यनेनेति नाश इति करणसाधन इत्युक्तं भवति । नाशस्य नित्यत्वेनानिवर्त्यत्वात् तन्निवृत्त्युक्त्यनुपपत्तिमाशङ्क्याह **प्रसक्तस्येति** ॥ **कथं तर्हीति** । अल्पस्य सुखस्य पुरुषार्थत्वात् तस्य च तत्रापि सत्त्वादित्यर्थः ॥ **अन्यथेति** । बहुतरसुखहान्यननुबन्ध्यल्पसुखस्य पुरुषार्थत्वान्नातिप्रसङ्ग इत्युक्तसमाधानानभ्युपगम इत्यर्थः ॥ **व्यवस्थाया इति** । जाङ्गिकादावल्पस्यापि सुखस्य पुरुषार्थत्वं मधुविषसम्पृक्तान्नभोजनादौ च तस्यापुरुषार्थत्वमित्यत्र व्यवस्थापकस्यावश्यं वक्तव्यत्वात् अस्मदुक्तव्यवस्थापकातिरिक्तव्यवस्थापकस्याभावात् अस्मदुक्तैव व्यवस्था आश्रयणीयेति भावः ।

**वा०र०**— प्रसक्तस्येति वाक्यप्रतीकोपादानानन्तरमनेन मूले इत्युक्तं भवतीत्यन्तं वाक्यम् । तस्यादितो लेखनं लेखकप्रमादात् ।

**स०व्र०**— **अन्यथेति** । मधुविषसम्पृक्तान्नस्य बहुतरसुखहानिसाधनत्वेन हेयत्वानभ्युपगमेऽनिष्टपक्षनिक्षेपमात्रेणैव हेयत्व इत्यर्थः ॥ **व्यवस्थाया इति** । अनिष्टपक्षनिक्षेपात् अत्र निवृत्तिश्चेद्विषसम्पृक्तौषधादावपि निवृत्तिः स्यात् । अनिष्टपक्षनिक्षेपस्य तत्रापि सत्त्वात् । ततोऽनिष्टपक्षनिक्षिप्तत्वाविशेषेऽपि बहुतरसुखहानिसाधनत्वबहुतरसुखसाधनत्वाभ्यां विशेषान्नातिप्रसङ्ग इत्येव वाच्यम् । तच्च ममापि समानमिति भावः ।

* * *

**११२ सु०— स्यादेतत् । द्विविधाः पुरुषाः रागिणो वीतरागाश्च । तत्र रागिणः सुखार्थं दुःखमप्यनुभवन्ति । ते हि मधुविषसंपृक्तमप्यन्नं मधुतया आपातरमणीयं विष(विषङ्गा)-संयोगात् तु मारयतु मा वा मीमरदुप(भुञ्ज्महे)युंक्ष्महे तावदापातसुखं को हि हस्तगतं पादगतं करोतीति विचिन्त्योपभुञ्जते । वीतरागास्तु आ(यति)पत्तिम् आलोचयन्तः स्वर्गमपि कुपितभोगिफणामण्डलच्छायाप्रतिममित्यपजहतीत्यत आह न चेति ।**

## अनु०— न च रागनिमित्तं तत्

**यदेतदुक्तं, प्राप्यापीत्यादि तत् रागनिमित्तम् । मुमुक्षवस्तु वीतरागाः तस्मात् सुखमनादृत्य दुःखध्वंसायैव यतन्त इति, तच्च नेत्यर्थः । कुत इत्यत आह वीतेति ।**

वीतरागा अपि स्फुटम् ।
नारदाद्याः सुखार्थाय सहन्ते दुःखमञ्जसा ॥

स्फुटमिति नारदादीनां वीतरागत्वं श्रुत्यादिप्रसिद्धमित्यर्थः । **अञ्जसा** इति श्रवणादल्पाय सुखरूपार्थायेति योज्यम् । यस्मादिति वक्ष्यमाणमिहापि सम्बध्यते ॥ एतत्कुत इत्यत आह **युद्धादीति** ।

युद्धादिदर्शनं यस्मात् सुदुःखेनापि कुर्वते ।

'सुखार्थाये'ति वर्तते । 'नारदाद्या' इति च । **आदि**पदेन दूरगमनादिसाध्यं स्वयंवरदर्शनं च गृह्यते । एतदपि कुत इत्यत आह **यदेति** ।

यदेन्द्रवैरोचनयोर्ब्रह्मास्त्राभ्यां सुतापिताः ।
अपि नैवाजहुर्युद्धरसात्ते नारदादयः ।
इति स्कान्दवचः

**नैवाजहुः** युद्धदर्शनं **युद्धरसात्** युद्धदर्शननिमित्तात् सुखात् कारणात् । **यदा**शब्दस्य पूर्वत्रोत्तरत्र वा सम्बन्धः । **यस्मादिति** अत्रापि सम्बध्यते ।

**परि०**— उत्तरवाक्यमवतारयितुं शङ्कामाह **स्यादेतदिति** । **विषविषङ्गात्** विषेण विशिष्य संसर्गादित्यर्थः ॥ **मीमरदिति** । 'मृङ् प्राणत्यागे' इत्यतो लुङि प्रत्यये तस्य 'णिश्रिद्रुस्रुभ्यः कर्तरि चङि'ति चङि 'चङि चे'ति द्विर्वचने 'सन्वल्लघुनि चङ्परेऽनग्लोप' इति सन्वद्भावे 'सन्यत' इत्यभ्यासस्येत्वे 'दीर्घ लघोरि'त्यभ्यासस्य दीर्घे 'न माङ्योगे' इत्यडभावे 'इतश्चे'ति तिप इकारलोपे मीमरदिति रूपम् । मा वा मारयतु इत्यर्थः । **उपयुञ्ज्महे** उपयुक्तं करिष्याम इत्यर्थः ॥ **आपत्तिमिति** । तादृशान्नाद्युपभोगेन जनिष्यमाणविपदमालोचयन्त इत्यर्थः ॥ **इहापि सम्बध्यत इति** । यस्माद्वीतरागा अप्येवमल्पसुखाय महद्दुःखं सहन्ते तस्माद्रागनिमित्तं तदिति न चेत्यर्थः । कर्माकाङ्क्षां पूरयति **युद्धदर्शनमिति** । इह श्लोके यदेत्यस्यानन्वयादाह **पूर्वत्रोत्तरत्र वेति** । स्कन्दपुराणवाक्य एव पूर्वत्र उत्तरत्रेवेत्यर्थः । तस्मादिति श्रवणादाह **यस्मादितीति** । इति स्कन्दवचो यस्मात्तस्मादित्यर्थः ।

**गु०दी०— द्विविधाः पुरुषाः रागिणो वीतरागिण इत्यादिना** यदाशङ्कितं तदपि न रमणीयम् । विरागा वा सरागा वा भवन्तु चेतनानामयं स्वभावः अल्पमपि सुखं आशासाना बहुतरमपि दुःखं सहन्त इति । एवं च सुखं यथा पुरुषैरर्थ्यमानत्वात् पुरुषार्थः न तथा दुःखनिवृत्तिरिति तावत्सिद्धम् । विरागा अपि नित्यसुखमोक्षमपेक्षमाणा एवानित्यं स्वर्गसुखमुपेक्षन्ते । सर्वथा सुखापेक्षाभावे कन्दमूलफलाद्याहारोऽपि नाद्रियेत् । अतः सुखलेशरहितो मोक्षः शतशो दुःखनिवृत्तावपि न पुरुषार्थ इति परमते मोक्षस्यैवापुरुषार्थत्वप्रसङ्गादिति ।

**यादु०— व्यवस्थापकमाशङ्कते स्यादेतदिति ॥ आयतिमिति** । यद्यपि 'उत्तरः काल आयतिरि'-त्यभिधानं तथाऽपि तदालोचनस्य प्रकृतानुपयोगाल्लक्षणया तत्कालीनफलमत्र आयतिशब्देन विवक्षितमिति द्रष्टव्यम् ॥ **पूर्वत्रोत्तरत्र वेति** । स्कान्दपुराण एव पूर्ववाक्ये उत्तरवाक्ये वा सम्बन्ध इत्यर्थः ।

**वं०प०— आपातसुखं** तात्कालिकसुखम् ॥ **आयतिमालोच्येति** । दीर्घकालं विचारं कृत्वेत्यर्थः । 'उत्तरः काल आयतिरि'त्यभिधानम् ॥ **दूरगमनादिसाध्यमिति** । दुःखव्यञ्जनार्थमुक्तमिति ज्ञातव्यम् ।

**कं०रा०— विषविषङ्गात्** विषसम्बन्धात् ॥ **मा वा मीमरदिति** । मा मारयतु वेत्यर्थः । मारयतेर्माङि लुङिति लुङि णिश्रीति च्लेश्चङि णौ चङ्युपधाया ह्रस्व इति ह्रस्वे चङि चेति द्वित्वे सन्वल्लघुनि चङ्परेऽनग्लोप इति सन्वद्भावादभ्यासाकारस्य इत्वे दीर्घो लघोरिति तस्य दीर्घे 'णेरनिटी'ति णिलोपे 'न माङ्योग' इत्यट्प्रतिषेधे चेदं रूपम् । न च वाच्यं मा मारयतु वेत्यत्र माङ्युपपदे लुङा भवितव्यत्वात् लोडनुपपत्तिरिति । तत्र माशब्द-स्यैवोपपदत्वेन लोडुपपत्तेः । अत एव मा भवत्वित्यादौ माशब्द एवेत्युक्तं काशिकायाम् ॥ **उपयुंक्ष्मह इति** । उपभुंज्मह इत्यर्थः । प्रोपाभ्यां युजेरयज्ञपात्रेष्वित्यात्मनेपदम् ॥ **अञ्जसेति श्रवणादिति** । नारदाद्याः सुखार्थाय सहन्ते दुःखमञ्जसेत्यत्र अञ्जसा दुःखं सहन्त इति दुःखस्याधिकस्य श्रवणात् सुखार्थायेत्येतदल्पाय सुखरूपा-र्थायेति योज्यमित्यर्थः ॥ **सुखार्थायेति वर्तत इति** । अत्रापि सुदुःखेनापि कुर्वत इति दुःखस्याधिकस्य श्रवणात् सुखार्थायेत्येतदल्पाय सुखरूपार्थायेति योज्यमिति भावः ॥ **आदिपदेनेति** । यद्यपि युद्धादिदर्शनमित्यत्र आदिपदेन स्वयंवरो गृह्यत इत्येव वक्तुमुचितम् । तथाऽपि आदिपदेन स्वयंवरे गृहीते तस्य च दर्शनान्वये सत्यादिपदमहिम्ना स्वयंवरदर्शनं लभ्यत इत्याशयेनैवमुक्तमिति ध्येयम् । नैवाजुहुरित्यत्र कर्माकाङ्क्षायामाह **युद्ध-दर्शनमिति** । 'ओहाक् त्याग' इत्यस्मात् लङि 'जुहोत्यादिभ्यः श्लुरि'ति शपः 'श्लौ श्लावि'ति द्विर्वचने 'ह्रस्व' इत्यभ्यासस्य ह्रस्वत्वे 'कुहोश्चुरि'ति चुत्वे 'अभ्यासे चर्चे'ति जश्त्वे 'सिजभ्यस्तविदिभ्यश्चे'ति झेर्जुसादेशे 'श्नाभ्यस्तयोरि'त्यालोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्त' इत्यडागमे चेदं रूपम् । युद्धरसादित्यत्र युद्धशब्देन तद्दर्शनं लक्ष्यते । रसशब्देन सुखमुच्यते । तथाच युद्धेन रसो युद्धरस इति युद्धदर्शननिमित्तकसुखं युद्धरसशब्दार्थ इत्यभिप्रेत्याह **युद्धदर्शनेति ॥ यदाशब्दस्येति** । यदेन्द्रवैरोचनयोरिति स्कान्दपुराणवाक्यगतयदाशब्दस्यास्मा-द्वाक्याद्यत्पूर्ववाक्यं तत्र वा सम्बन्ध इत्यर्थः ।

**शे०चं०—** अत्र न्यायवाचस्पतिमिश्रोक्तं व्यवस्थापकं निराकर्तुमाशङ्कते **स्यादेतदिति ॥ आयति-मिति** । यद्यप्यायतिशब्दस्योत्तरकालमात्रमर्थः । 'उत्तरः काल आयतिरि'त्यभिधानात् । तथाऽप्यत्र लक्षणया तत्कालीनानर्थफलपर एव सः । कालालोचनमात्रस्य परित्यागानुपपादकत्वादिति भावः । नन्वल्पाचेत्यस्यात्र कथं

लाभ इत्यत उक्तम् **अञ्जसेति** ॥ **श्रवणादिति** । अञ्जसेत्यनेन सह्यमानदुःखस्य बाहुल्याभिधानात् तस्य च प्राप्तसुखस्य दुःखापेक्षयाऽल्पत्व एव श्लिष्टत्वादाधिक्ये च अधिकसुखप्राप्तये तादृशदुःखसहानस्य न्याय्यत्वेनाश्लिष्टत्वात् । तद्बाहुल्यसूचकस्याञ्जसेतिपदश्रवणात्प्राप्तसुखस्याल्पत्वलाभ इति भावः ॥ **इहापि सम्बध्यत इति** । तेन विनैतद्वाक्यार्थस्य हेतुत्वालाभेन कुत एतदिति हेत्वाकाङ्क्षापरिपूरकत्वासम्भवेन तत्प्रापकस्य तस्यावश्यकत्वादिति भावः । अत्र कर्मानुक्तावपि युद्धरसादित्यनेनाक्षिप्तयुद्धदर्शनस्य कर्मतया सम्बन्धसम्भवान्न न्यूनत्वमित्याशयेनाह **युद्धदर्शनमिति** । शाकपार्थिवादित्वमभ्युपेत्याह **युद्धदर्शनमिति** । निमित्तादिति हेतौ पञ्चमीति भावेनाह **कारणादिति** ॥ **पूर्वत्रोत्तरत्र वेति** । तत्पुराणस्थपूर्वोत्तरवाक्ययोरन्यतरस्मिन्नित्यर्थः ॥ **अत्रापि सम्बध्यत इति** । अन्यथैतद्वाक्यार्थस्य हेतुत्वालाभेनोक्तशङ्कापरिहारकत्वायोगादिति भावः ।

**वा०र०— वाचस्पतिमिश्रोक्तमिति** । प्रमाणतोऽर्थप्रतिपत्ताविति प्रथमभाष्यवाक्यव्याख्यानरूपवार्तिकव्याख्यानावसर इत्यर्थः । **फलपर एव स इति** । आयतिशब्दस्येति षष्ठ्यन्तेनोक्तशब्दविभक्तिविपरिणामेन स इत्यनेन परामृश्यत इति ज्ञेयम् । **तस्य चेति** । तस्य चाल्पत्व एव श्लिष्टत्वादिति सम्बन्धः । दुःखबाहुल्यस्य च दुःखापेक्षया प्राप्तसुखस्याल्पत्व एव श्लिष्टत्वादित्यर्थः । **अधिक्ये चेति** । सुखस्येति वर्तते । **अश्लिष्टत्वादिति** । तस्य चेत्युक्तसह्यमानदुःखबाहुल्यस्याश्लिष्टत्वादित्यर्थः ।

**स०व्र०— यदाशब्दस्येति** । तत्पुराणस्थपूर्वोत्तरवाक्ययोरित्यर्थः । **पूर्वत्र** वीतरागा इत्यत्र, **उत्तरत्र** ते नारदादय इत्यत्रेत्यर्थ इत्यप्याहुः ।

* * *

११३ **सु०—** इदमत्र आकूतम् । अत्र रागशब्देन किं सुखेच्छाऽभिप्रेता । उत लक्षणया अविवेकः । आद्ये सत्यमेतत् । किन्तु मुमुक्षवोऽपि रागिण एव । रागिणां कथं मुक्तिरिति चेत् द्वेषिणामपि कथम् । दुःखद्वेषाद्धि ते दुःखं जहति । अस्थाने द्वेषो बन्धक इति चेत् । रागोऽपि तथेति समानम् । किञ्च दुःखोच्छेदे रागः परेणापि स्वीकार्यः । न दुःखद्वेषोऽसौ किन्तु निर्वेद एवेति चेत् । तर्हि न सुखरागोऽसौ अपि तु श्रद्धैवेति वदामः । द्वितीये तु नारदादयो निदर्शनम् । तेऽपि तदा अविवेकिन इति चेत् । कथमेतद्विज्ञातं लौकिकवैदि(कलो)कोत्तरप्रज्ञेनेति ।

न च रागेत्यादिनोक्तमुपसंहरति **तस्मादिति** ।

**अनु०—** तस्मात्सुखाभावाय को यतेत् ।

वीतरागोऽपीति शेषः ।

**परि०**— 'अविवेक' इति पदच्छेदः ॥ **कथमिति** । मुक्तिरित्यनुषङ्गः ॥ **अस्थान इति** । अयुक्तस्थल इत्यर्थः ॥ **नारदादयो निदर्शनमिति** । विवेकिनोऽपि ते सुखार्थं यतन्त इति निदर्शनमित्यर्थः ।

**वं०प०**— **रागिण एवेति** । सुखेच्छावन्त एवेत्यर्थः । **रागिणां** सुखरागवताम् । **द्वेषिणां** दुःखद्वेषवताम् । तेषां दुःखद्वेषोऽस्तीत्यत्र ज्ञापकमाह **दुःखद्वेषाद्धीति** ॥ **अस्थान इति** । अविषय इत्यर्थः, द्वेषाविषये, द्वेषायोग्य इति यावत्, यो द्वेषः स बन्धकः । द्वेषयोग्ये द्वेषस्तु न बन्धकः । दुःखं च द्वेषयोग्यम् । अतस्तत्र द्वेषस्य अबन्धकत्वाद् दुःखद्वेषिणामपि मुक्तिर्युक्तेत्यर्थः ॥ **रागोऽपीति** । अस्थाने दुर्विषय इव रागो बन्धको न तु स्थाने । सुखं च रागयोग्यम्, अतस्तत्र रागस्य अबन्धकत्वात् सुखरागिणामपि मुक्तिर्युक्तेत्यर्थः ॥ **स्वीकार्य इति** । तथा च दुःखद्वेषिणामपि रागसद्भावान्न मुक्तिः स्यादित्यर्थः । तथा च अस्थान एव रागो बन्धको न स्थाने । दुःखोच्छेदश्च रागयोग्य इति न तत्र रागो बन्धक इति त्वयाऽपि वाच्यं तदस्माकमपि समानमिति भावः । दुःखद्वेषिणां कथं मुक्तिः इत्यस्य उत्तरमाशङ्कते **ननु दुःखद्वेषोऽसाविति** । ये दुःखद्वेषाद्दुःखं त्यजन्ति तैस्त्यज्यमानदुःखनिमित्तभूतोऽसौ द्वेषः प्रसिद्धद्वेषो न भवति । येन द्वेषिणां कथं मुक्तिरिति परिचोदना स्यात् । किन्त्वसौ द्वेषो दुःखविषयो एव दुःखवैराग्यरूप एवेत्यर्थः ॥ **श्रद्धैवेति** । तर्हि नारदादिभिः क्रियमाणे युद्धादिदर्शने निमित्तभूतः सुखरागोऽपीच्छारूपो रागो न भवति । येन रागिणां कथं मुक्तिरिति प्रतिबन्दी स्यात् । किन्तु श्रद्धैव युद्धादिदर्शने नारदादीनामाग्रहविशेष एवेत्यर्थः ॥ **द्वितीय इति** । रागशब्देन लक्षणयाऽविवेक इति द्वितीयपक्ष इत्यर्थः ॥ **नारदादय इति** । तथा च वीतरागाः वीताविवेकिनोऽपि नारदाद्याः सुखार्थाय दुःखं सहन्ते अतो रागिण एव सुखार्थं दुःखमनुभवन्तीत्युक्तमसदिति भावः ॥ **तदेति** । ब्रह्मास्त्रतापजनितं महादुःखं सोढ्वा युद्धदर्शनसमय इत्यर्थः । एतत् नारदादीनामविवेकित्वम् ॥ **लौकिकेति** । लौकिकानां वैदिकानां च या प्रज्ञा तदतिक्रान्तप्रज्ञेनेत्यर्थः । परममूर्खेणेति यावत् ।

**कं०रा०**— **द्वेषिणामपीति** । द्वेषिणामपि कथं मुक्तिरित्यर्थः । मुमुक्षूणां द्वेषित्वमुपपादयति **दुःखद्वेषादिति ॥ अस्थान इति** । अनुचितविषये द्वेषो बन्धकः सुखद्वेषस्तु न तथेति तस्य बन्धकत्वाभावाद्द्वेषिणामपि मुक्तिर्युक्तेति भावः । रागोऽप्यनुचितविषय एव बन्धकः । तथाच मुमुक्षूणां मोक्षसुखरागस्यातथात्वेनाबन्धकत्वाद्रागिणामपि तेषां मुक्तिर्युक्तेति समानमित्यर्थः ॥ **किञ्च दुःखोच्छेद इति** । मुमुक्षूणामिति शेषः । तथाच रागिणां मुक्तिरिति चोद्यं स्वव्याहतमिति भावः ॥ **दुःखद्वेषाद्धि ते दुःखं जहतीति** । मुमुक्षूणां दुःखे द्वेष उक्तः तमाक्षिपति **न दुःखद्वेषोऽसाविति** । मुमुक्षूणां दुःखप्रहाणहेतुभूतो यो धर्मः स न दुःखद्वेषरूपः किन्तु दुःखानुबन्धिनि देहादौ वैराग्यरूप एवेत्यर्थः ॥ **न सुखरागोऽसाविति** । असौ मुमुक्षूणां सुखेच्छा न सुखरागरूपा अपि तु श्रद्धारूपैवेति वदाम इत्यर्थः । न च वाच्यं सुखेच्छायामप्रकृतत्वात् कथमसावित्यनेन परामर्श इति । रागशब्देन सुखेच्छाभिप्रेतेत्याद्यपक्षे मुमुक्षूणामपि सुखेच्छारूपरागवत्त्वात् मुमुक्षवस्तु वीतरागा इति

परोक्तं मुमुक्षूणां वीतरागत्वमयुक्तमित्याशयेन प्रवृत्ते किन्तु **मुमुक्षवोऽपि रागिण एवेति** प्राचीनग्रन्थे रागशब्देन सुखेच्छायाः प्रकृतत्वेन परामर्शोपपत्तेः । न चैवं न सुखरागोऽसावित्युक्तविरुद्धमिति वाच्यम् । शास्त्रचोदितफल-विषयाया मौक्तसुखेच्छायाः सुखेच्छारागशब्दार्थ इति परोक्तानुसारेण पूर्वं रागरूपत्वोक्तावपीदानीमचोदित-फलेच्छारूपत्वाभावाभिप्रायेण अरागरूपत्वोक्तिसम्भवात् । न च वाच्यं मुक्ताभिप्रायेणैव परकीयमुमुक्षूणां वीत-रागत्वोक्तिः सम्भवतीति । तथात्वे मुमुक्षवस्तु वीतरागाः तस्मात् सुखमावृत्य दुःखध्वंसायैव यतन्त इत्यनुप-पत्तेः । मौक्तसुखेच्छायाः शास्त्रचोदितफलविषयत्वाभिप्रायेणैव श्रद्धारूपत्वमुक्तमिति ध्येयम् ॥ **द्वितीये तु नारदादयो निदर्शनमिति** । रागशब्देनाविवेकोऽभिप्रेत इति द्वितीयपक्षे तु 'प्राप्यापि दुःखं सुमहत्सुखलेशाप्तये जन' इत्यादि यदुक्तं तद्रागनिमित्तकं न भवतीत्यत्र वीतरागा अपि स्फुटम् । 'नारदाद्याः सुखार्थाय सहन्ते दुःखमञ्जसे'त्युक्ता नारदादयो निदर्शनमित्यर्थः । तेऽपि यदा नारदादयः अल्पसुखाय महद्दुःखं सोढ्वा युद्धादि-दर्शनं कुर्वन्ति तदा तेऽप्यविवेकरूपरागवन्त इति चेति । न च रागनिमित्तं तदित्यत्र न तेषां निदर्शनत्वमिति भावः ।

**शे०चं०**— नारदादीनामपि सुखेच्छावत्त्वेन रागित्वादल्पसुखार्थं तेषां प्रवृत्तावपि वीतरागाणां तदर्थं तदप्राप्तेः न स्यादित्येतदुक्तनियमभङ्ग इत्यत आह **इदमत्राकूतमिति** ॥ **रागिण एवेति** । सुखरागिण एवे-त्यर्थः । ततश्च तेषां वीतरागत्वाभावान्न सुखमनादृत्य दुःखध्वंसाय प्रवृत्तिरुपपद्यत इति भावः ॥ **कथमिति** । सुखरागस्य बन्धकत्वादिति भावः ॥ **द्वेषिणामपीति** । दुःखद्वेषिणामपीत्यर्थः । सुखरागवद् द्वेषस्यापि बन्धकत्वादिति भावः । स एव तेषां कुतः सिद्ध इत्यत आह **दुःखेति** । न द्वेषमात्रं बन्धकं किं नाम अस्थाने द्वेष एव । दुःखद्वेषस्तु न अस्थानद्वेष इत्यतो न बन्धक इत्याशङ्कते **अस्थान इति** । तर्हि न रागमात्रं बन्धकं किं तु अस्थाने रागः । सुखरागस्तु न अस्थाने राग इति न बन्धक इति युक्त्यैव तद्रागिणामपि मुक्तिरित्याशयेन परिहरति **रागोऽपीति** । ननु च रागमात्रं बन्धकं न तु विशेषितमिति न रागिणां मुक्तिरित्याशय इत्यतः तर्हि द्वेषमात्रमेव बन्धकं न तु विशेषितमिति न दुःखद्वेषिणामपि मुक्तिः स्यादिति सत्येव दोषे तस्य प्रागुक्तरीत्या ज्ञातुं शक्यत्वात् तमनुक्त्वा रागमात्रस्य बन्धकत्वमेव युक्त्यन्तरेण निराचष्टे **किञ्चेति** । द्वेषिणामपि कथमिति प्रतिबन्दीं मोचयितुं शङ्कते **नेति** । तथा च युक्ता तेषां मुक्तिरिति भावः ॥ **तर्हीति** । तथा सुखरागिणामपि युक्ता मुक्तिरिति भावः ।

**स०व्र०**— **रागिणामिति** । रागस्य बन्धकत्वादिति भावः ॥ **द्वेषिणामपीति** । तस्यापि बन्धकत्वा-दिति भावः । न तेषां द्वेष इत्यत्राह **दुःखेति** । न द्वेषमात्रं बन्धकं किं नामास्थाने । स्थाने द्वेषस्तु युक्त इति शङ्कते **अस्थान इति** ॥ **रागोऽपि तथेति** । अस्थाने रागो बन्धको न रागमात्रम् इति समानमित्यर्थः ।

**॥ इति सुखलेशप्राप्तये महादुःखानुभवः लोकसिद्धः ॥**

* * *

॥ अथ मुक्तस्य सुखानङ्गीकारे दुःखाङ्गीकारप्रसङ्गः ॥

११४ **सु०**— एवं परनिरूपिते मोक्षे दुःखाभावमभ्युपेत्य तत्र प्रवृत्त्यभावप्रसङ्गोऽभिहितः । इदानीं तु दुःखाभावोऽपि नोपपद्यत इत्याह **विमत इति** ।

**अनु०**— **विमतो दुःखयुग् यस्माच्चेतनः सन्त्सुखोज्झितः ।**
**प्रतिपन्नो यथेत्येव चानुमा केन वार्यते ॥**

**मुक्तत्वेन पराभ्युपगतोऽत्र पक्षः । दुःखयुग् इत्यापाद्यम् । यस्माच्चेतनः सन्त्सुखोज्झित इत्यापादकम् । घटादौ व्यभिचारनिरासाय चेतनः सन्नित्युक्तम् । अत्र चेतन इत्यात्मत्वोपलक्षणमिति नापादकासिद्धिः । स्वर्गवासिष्वनैकान्त्यपरिहाराय सुखोज्झित इति । ईश्वरस्यापि सुखसाधनान्न तत्र व्यभिचारः । प्रतिपन्नो नारकी यथा । एवशब्दः प्रतिज्ञया सम्बध्यते । न चेयं साधनानुमा येन बाधादिकस्यावसरः किन्तु प्रसङ्गानुमैव । तदिदमाह इत्यनुमा केन वार्यत इति । यदि मुक्तः सुखी न स्यात् तदा अनात्मा वा दुःखी वा स्यात् सम्मतवदित्यादयोऽपि अतिप्रसङ्गा द्रष्टव्याः ।**

**परि०**— **पराभ्युपगत इति** । तेन यदि तादृशो मुक्तः सिद्धः दुःखयुगित्ययुक्तम् । यद्यसिद्धः तर्ह्याश्रयासिद्धिरिति दोषो निरस्तः । पराभ्युपगममात्रेणापादने पक्षतोपपत्तेरिति सूचितम् ॥ ननु चैतन्यवान् चेतनः । न च मुक्तस्य ज्ञानरूपं चैतन्यं तार्किकैरुपेयते अतो विशेषणाभावाद्विशिष्टापादकासिद्धिरित्यत आह **आत्मत्वोपलक्षणमिति** ॥ **सुखसाधनादिति** । सुखस्य समर्थनादित्यर्थः ॥ **प्रतिज्ञयेति** । दुःखयुगेव न तु तदभाववानित्युक्त्या पराभिमतदुःखाभाववान्न भवतीत्यर्थलाभ इति भावः । ननु मुक्तो दुःखयुगिति साधने बाधोऽपसिद्धान्तश्चेत्यत आह **न चेयमिति** । आपाद्यद्वयं अनात्मा वा, दुःखी वा, स्यादिति ॥ **सम्मतवदिति** । 'घटवदि'ति, 'संसार्यादिवदि'ति यथाक्रमं दृष्टान्तौ ज्ञेयौ । नारकिणोऽप्यस्ति किञ्चित्सुखं 'नारक्यां निर्वृतौ सत्यामि'त्यादेः । अतोऽत्र विवक्षितस्य सर्वात्मना सुखाभावरूपापादकस्य नारकिण्यभावात् न व्यभिचार इति चोद्यानवकाशः। यदि मोक्षः सुखानुभवहीनः तर्ह्यपुमर्थः स्यान्मोहवत् इत्यादिः **आदिपदार्थः** ।

**यादु०**— ननु मया मुक्ते ज्ञानाश्रयत्वरूपचेतनत्वस्यैवानङ्गीकृतत्वेन विशेषणाभावाद्विशिष्टस्यापादकस्यासिद्धिरित्यत आह **अत्र चेतन इतीति** ॥ **प्रतिज्ञयेति** । तथा च विमतो दुःखयुगेवेति प्रतिज्ञया एवकारस्य

सम्बन्धेन दुःखाभाववानित्यर्थलाभादिदानीं दुःखाभावोऽपि नोपपद्यत इत्याहेति पूर्वोक्ता सङ्गतिः श्लिष्यत इति भावः । मूले चशब्दोऽनुक्तप्रसङ्गान्तरसमुच्चायक इत्याशयेनाह **यदि मुक्त इत्यादिना** ॥ **अनात्मा वा दुःखी वा स्यादिति** । दुःख्यनात्मान्यतरः स्यादित्येकमेवापाद्यमत्र विवक्षितं नापाद्यद्वयम् । तेनाद्ये नारकिणि द्वितीये घटादौ व्यभिचार इति शङ्काऽनवकाश इति ध्येयम् ॥ आदिपदाद्यदि मुक्तः दुःखरहितत्वे सति सुखी न स्यात् । तदा आत्मा न स्यात् । यदि मुक्तिः सुखानुभववर्जिता स्यात् तदा पुरुषार्थो न स्यादित्यादयो ग्राह्याः ।

**वं०प०— इत्यनुमेति** । एवंप्रकाराऽनुमा दूषणानुमेत्यर्थः ।

**कं०रा०—** 'विमतो दुःखयुगि'त्यत्र दुःखयुङ् न वेति मुक्तधर्मिकविमतेरभावात् । वक्ष्यमाणरीत्या अस्य ग्रन्थस्य दूषणानुमानरूपतर्कपरतया साधनानुमानपरत्वाभावेन बाधादिनिरासरूपविमतिग्रहणप्रयोजनाभावाच्च विमतिपदं प्रकारान्तरेण व्याचष्टे **मुक्तत्वेन पराभ्युपगत इति** । न च वाच्यं मुक्ता इत्येव पक्षीक्रियतामिति । सिद्धान्त्यभिमताशेषानिष्टनिवृत्तिविशिष्टपरमानन्दावाप्तिरूपमुक्तत्वस्य परं प्रत्यसिद्ध्या पराभिमतस्याशेषगुणोच्छेदरूपमुक्तत्वस्य च सिद्धान्तिनं प्रत्यसिद्ध्या पराभिमतस्याशेषविशेषगुणच्छेदरूपमुक्तत्वस्य च सिद्धान्तिनं प्रत्यसिद्ध्या तथा पक्षीकरणायोगात् । ननु चेतनः सन् सुखोज्झित इत्यत्र चेतनपदस्य चिती संज्ञान इत्यस्माद्वा चित सञ्चेतन इत्यस्माद्वा कर्तरि बाहुलके ल्युटि निष्पन्नत्वात् चेतनपदेन चेतति चेतयत इति वा चेतन इति व्युत्पत्त्या ज्ञातृत्वमुच्यते । चिति सञ्चेतन इत्यस्य व्याख्यानावसरे सञ्चेतनं संज्ञानमिति धातुवृत्तावुक्तत्वात् मुक्तत्वेन पराभ्युपगते च ज्ञातृत्वरूपचेतनत्वाभावात् तद्विशिष्टापादकस्यासिद्धिरित्यत आह **अत्र चेतन इत्यात्मत्वोपलक्षणमिति** । तथाच चेतनविवक्षितात्मत्वज्ञाते मुक्तत्वेन पराभ्युपगते सत्त्वेन तद्विशिष्टापादकस्य सद्भावान्नासिद्धिरिति भावः ॥ **बाधादिकस्येति** । 'अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशत' इत्यादिश्रुतिबाधस्य विमतो दुःखरहितः तत्साधनशरीरादिविकलत्वात् सम्प्रतिपन्नवदिति प्रतिपक्षस्य चावसरः स्यादित्यर्थः । तदिदमाह **इत्यनुमा केन वार्यत इतीति** । इत्यनुमा केन वार्यत इत्युक्तेरयोगादिति भावः । नन्वत्र सुखोज्झितपदेन सुखप्रागभावविवक्षायां पक्षेऽसिद्ध्यभावेऽपि घटादौ व्यभिचारनिरासाय चेतनपदमित्यस्यायोगः स्वर्गवासिष्वनैकान्त्यतादवस्थ्यं च तेष्वप्यस्तीति तत्सुखध्वंसस्य सत्त्वात् । सुखात्यन्तविवक्षायां तु पक्षेऽसिद्धिः । नारकिरूपदृष्टान्तस्यापादनवैकल्यं च सुखान्यत्वविवक्षायामप्यन्योन्याभावस्य व्याप्यवृत्तित्वेनोक्तदोषद्वयानुवृत्तिरिति चेन्न । सुखोज्झितपदेन सुखसामान्यात्यन्ताभावस्य विवक्षितत्वात् तत्सद्भावस्य च सामयिकात्यन्ताभावपक्षाश्रयणेन पक्षदृष्टान्तयोरुपपादयितुं शक्यत्वात् । घटादौ व्यभिचारनिरासाय चेतनपदमित्यत्र घटादौ सुखोज्झितत्वस्य सदातनाभावमादायोपपादयितुं शक्यत्वाच्चेति ॥ **यदि मुक्तः सुखी स्यादिति** । सुखी न स्यादित्यस्य पूर्ववदेवार्थः । अत्रानात्मा वा दुःखी स्यादित्यनेन आत्मदुःख्यन्यतरत्वमापाद्यत्वेन विवक्षितं न त्वापाद्यद्वयं विवक्षितम् । तेन सुखरहिते नारकिण्यनात्मत्वस्याभावात् घटादौ च दुःखित्वस्याभावाद्व्यभिचार इति दूषणमनवकाशम् । तथाच यदि मुक्तः सुखी न स्यात् तदा अनात्मदुःखिनोरन्यतरः स्यादित्यापादनस्य आत्मत्वमादाय पर्यवसानायोगात् दुःखित्वमादाय पर्यवसानमिति भावः ॥ **इत्यादय इति** । आदिशब्देन यदि

मुक्तोऽष्टद्रव्यव्यतिरिक्तत्वे सति सुखरहितः स्यात् तदा सुखी स्यात् । यदि मुक्तोऽष्टाधारत्वसमानाधिकरणसुखाभाववान् स्यात् तदा दुःखी स्यात् । यदि मुक्तः सुखी न स्यात् तदा पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्यरहितो दुःख्यन्यतरः स्यादित्यतिप्रसङ्गा गृह्यन्ते ।

**शे०चं०—** मोक्षे दुःखाभावस्य पूर्वमुक्तत्वात् तत्र तदनुपपत्तिवर्णनस्य पूर्वविरुद्धतामाशङ्क्य परिहरति **एवं परनिरूपितमिति** । साधनानुमानत्वप्रतीतिमापादनत्वेऽपि निर्देशक्रमेणैव आपादकत्वापाद्यत्वप्रतीतिं च निराकर्तुमाह **दुःखयुगित्यापाद्यमित्यादि** । ननु चेतयत इति चेतनशब्दार्थभूतज्ञातृत्वस्य मुक्तत्वाभिमते परेणानङ्गीकारात् तद्घटितापादकासिद्धेः नायं प्रसङ्ग इत्यतोऽत्र चेतनशब्दस्यात्ममात्रपरत्वान्न तद्घटितस्यापादकस्यासिद्धिरित्याशयेनाह **अत्रेति** । ईश्वरे सत्यपि चेतनत्वे सति सुखोज्झितत्वे दुःखित्वाभावेन व्यभिचारात् तर्कमूलव्याप्त्यसिद्धेः मूलशैथिल्यात् तर्काभासोऽयमित्यत आह **ईश्वरस्यापीति** ॥ **साधनादिति** । 'न चामन्दसदानन्दस्यन्वनन्तगुणार्णवः । ईश्वरोऽष्टगुणत्वेन प्रमेयोऽप्रमितत्वतः' इत्यादिना वैशेषिकपरीक्षायामिति शेषः । **प्रतिज्ञयेति** । तथा च विमतो दुःखयुगेवेति प्रतिज्ञयैवकारसम्बन्धान्न दुःखाभाववानित्यर्थलाभादिदानीं दुःखाभावोऽपि नोपपद्यत इत्याहेति प्रागुक्ता सम्मतिः श्लिष्टा भवतीति भावः । मूले चशब्दोऽनुक्तप्रसङ्गसमुच्चायक इत्याशयेन तानाह **यदीति** । नन्वापादनद्वयमप्यनुपपन्नम् । आद्ये यत्र सुखित्वाभावस्तत्र अनात्मत्वमिति प्राचीनप्रसङ्गमूलभूतव्याप्तेस्तमोगेषु व्यभिचारात् । द्वितीये च यत्र सुखित्वाभावः तत्र दुःखित्वमिति तन्मूलव्याप्तेर्घटादौ व्यभिचारात् । न च उभयत्रापि चेतनत्वे सतीत्यापादकविशेषणमभिमतम् । तथाऽपि प्रथमस्योक्तव्यभिचारानिस्तारात् । द्वितीयस्य च 'विमतो दुःखयुक् यस्माच्चेतनः सन्त्सुखोज्झित' इति प्रसङ्गाभेदप्रसङ्गाच्चेति चेत् । उच्यते । नेदमापादनद्वयमभिमतम् । किं नाम मुक्तत्वेनाभिमतो यदि सुखी न स्यात् तदाऽनात्मदुःख्यन्यतरः स्यादित्येकमेव । ततश्च तमोगेषु दुःखित्वसत्त्वेन घटादौ च अनात्मत्वसत्त्वेन अनात्मदुःख्यन्यतरत्वस्योभयत्रापि सत्त्वान्न मूलशैथिल्यमिति ।

केचित्तु परीत्या परं प्रत्यापादनान्न तमोगेषु व्यभिचारः । द्वितीयापादने तु चेतनत्वेन विशेषणान्न घटादौ व्यभिचार इत्यापादनद्वयमेवेदमित्याहुः ॥ अन्ये तु प्रथमापादने दुःखरहितत्वरूपस्यापादकविशेषणस्य विवक्षितत्वात् । न च तमोगेषु व्यभिचारः । द्वितीये तु चेतनत्वेन विशेषणान्न घटादौ व्यभिचार इति प्रसङ्गद्वयमेतदित्याहुः ॥ अपरे तु सुखी न स्यादित्यस्य सुखध्वंसवानित्यर्थत्वान्न घटादौ व्यभिचारो दुःखरहितत्वेन विशेषणाच्च न तमोगेष्वपि सः । नापि पूर्वप्रसङ्गाभेद इत्याहुः ।

आदिपदेन 'मुक्तो यदि सुखी दुःखी च न स्यात् तदा अनात्मा स्यादि'त्यतिप्रसङ्गसङ्ग्रहः ।

**वा०र०— तत्र तदनुपपत्तीति** । मोक्षे दुःखाभावानुपपत्तीत्यर्थः । **वर्णनस्येति** । विमत इत्यादिनोत्तरानुभाष्ये क्रियमाणस्येति शेषः । विमतेरनेकविधत्वाद्विमतशब्दार्थमाह **मुक्तत्वेनेति** मूलम् ॥ **साधनानुमानत्वप्रतीतिमिति** । विमत इत्यादेरिति शेषः । निराकर्तुमित्युत्तरेण सम्बन्धः । **आपादकत्वेति** । दुःख-

वत्त्वादेः इति शेषः । **ईश्वरे सत्यपीति** चेतनत्वे सति सुखोज्झितत्वे सत्यपीति सम्बन्धः । **नोपपद्यत इत्याहेति** । प्रागुक्तेति पाठः । **न चोभयत्रेति** । इदं दोषद्वयस्यापि परिहार इति भ्रान्तस्य शङ्का । अत एव परिहारे प्रागुक्तदोषानिस्तारमेव वक्ष्यति । केचित्तु अन्ये त्विति पक्षद्वयेऽपि पूर्वप्रसङ्गाभेदरूपो दोषानुद्धाररूपोऽस्वरसः । अपरे त्विति तृतीयपक्षेऽपि मौक्तसुखाभावाङ्गीकारो नाम मुक्तिकालसम्बन्धिसुखानङ्गीकार इत्येवापादकस्य वक्तव्यतया सांसारिकसुखध्वंससत्त्वस्यापादकत्वस्यायोगेन तद्वचनायोग इत्यस्वरसो बोध्यः ।

**स०व्र०**— अत्र चेतनत्वेन आत्मशब्दार्थभूतज्ञानवत्त्वस्य मुक्तौ परेणाङ्गीकारात् आपादकासिद्धिः । अतः चेतनत्वात् आत्मत्वमेव वक्तव्यमित्यर्थः । यत्र चेतनत्वे सति सुखोज्झितत्वं तत्र दुःखित्वमिति प्रसङ्गमूलभूतव्याप्तेरीश्वरे व्यभिचार इत्यत आह **ईश्वरस्यापीति** ॥ **यदि मुक्त इत्यादि** । नन्वापादनद्वयमप्यनुपपन्नम् । आद्ये यत्र सुखित्वाभावः तत्रानात्मत्वमिति व्याप्तेः तमोगेषु व्यभिचारात् । द्वितीयेऽपि यत्र सुखित्वाभावः तत्र दुःखित्वमिति प्रसङ्गमूलव्याप्तेर्घटादौ व्यभिचारात् । न चोभयत्रापि चेतनत्वे सतीत्यापादकविशेषणान्नोक्तदोषः तथापि प्रथमस्योक्तव्यभिचारानिस्तारात् । द्वितीयस्य विमतो दुःखयुगित्युक्तप्रसङ्गाभेदापाताच्चेति । मैवम् । नेदमापादनद्वयं किं नाम मुक्तत्वेनाभिमतो यदि सुखी न स्यात् तर्ह्यनात्मदुःख्यन्यतरः स्यादित्यापादनस्यात्राभिप्रेतत्वात् । तमोगेष्वपि दुःखित्वस्य सत्त्वेन घटादौ च अनात्मत्वस्य सत्त्वेन अनात्मदुःख्यन्यतरत्वस्योभयत्रापि सत्त्वेन मूलव्याप्तेरप्रतिहतत्वादित्यस्मद्गुरवः । पररीत्या परं प्रत्यापादनान्न तमोगेषु व्यभिचारः । द्वितीयापादने च चेतनत्वविशेषणान्न घटादौ व्यभिचार इत्यापादनद्वयमप्युपपन्नमिति तु तातचरणाः । वयं तु ब्रूमः । प्रथमापादने दुःखरहितत्वरूपमापादनविशेषणं विवक्षितमिति न तमोगेषु व्यभिचारः । द्वितीयापादने च चेतनत्वविशेषणान्न घटादौ व्यभिचार इति सर्वं सुस्थम् ।

**॥ इति मुक्तस्य सुखानङ्गीकारे दुःखाङ्गीकारप्रसङ्गः ॥**

* * *

**॥ अथ मुक्तौ सुखसद्भावे प्रमाणप्रदर्शनम् ॥**

११५ **सु०**— यदुक्तं प्राक् 'श्रुतयो यत' इति तदिदानीं प्रपञ्चयति **सर्वेति** ।

**अनु०**— सर्वश्रुतिपुराणेषु सुखभावोक्तितस्तथा ।
मुक्तौ न ग्राह्यमेवैतत्सुखाभावमतं बुधैः ॥

**तथाशब्दः** समुच्चये । तानि श्रुत्यादीन्युदाहरति **स इति** ।

सोऽनानन्दाद्विमुक्तः सन्नानन्दी भवति स्फुटम् ।
निर्गुणे ब्रह्मणि मयि धारयन्विशदं मनः ।

परमानन्दमाप्नोति यत्र कामोऽवसीयते ।
न विष्णुसदृशं दैवं न मोक्षसदृशं सुखम् ।

न वेदसदृशं वाक्यं न वर्णोङ्कारसम्मितः ।
यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ।

कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधि ॥

अनेन 'सोऽनानन्दाद्विमुक्तः आनन्दी भवती'ति श्रुतिमुपादत्ते । आनन्दस्य स्वभावसिद्धत्वात् भवतीति कथमित्यतः **स्फुटमित्युक्तम्** । **अनानन्दात्** दुःखात् । **निर्गुण** इति भागवते भगवद्वाक्यम् । **यत्र** परमानन्दे प्राप्ते **का(मस्तृष्णाऽव)मः** स्पृहा **अवमीयते** अवसानं गच्छति ।

**न विष्णुसदृशं** इत्येतदपि पुराणवाक्यम् । **यत्र** लोके । **आनन्दादि**शब्दाः सुखविशेषाणां वाचकाः । **कामस्य कामाः** इच्छाया विषयाः । **आप्ताः** पर्याप्ताः । कृधि कुर्विति वायुं प्रति प्रार्थनम् । श्रुभृणुपृकृवृभ्यः छन्दसि ॥ श्रुत्योर्मध्ये पुराणपठनं तस्य श्रुतिकल्पत्वप्रदर्शनार्थम् ।

उदाहृतानां श्रुत्यादीनां फलमुपसंहरति **इति श्रुतीति** ।

इति श्रुतिपुराणानि तत्र तत्र वदन्ति हि ।
अतो मोक्षे सुखाभाव इति यत्किञ्चिदेव हि ॥

**तत्र तत्र** प्रदेशे **वदन्ति** मुक्तस्य सुखम् । आद्यो **हि**शब्दो यस्मादित्यर्थे । द्वितीयः प्रसिद्धौ । **यत्किञ्चिदेव** फल्गिवत्यर्थः ।

**परि०— समुच्चय इति** । प्रागुक्तसाधकबाधकाभ्यां सह समुच्चय इत्यर्थः ॥ **सुखविशेषाणामिति** । आनन्दः स्वरूपसुखं विषयोत्थं सुखं मुदित्युच्यते । प्रकृष्टविषयोत्थं प्रमुदिति भावः । कृधीत्यस्य साधुत्वार्थं हेर्धिरादेशविकरणलोपविधानपरं षष्ठान्त्यपादस्थं सूत्रं पठति **श्रुशृण्विति** । किं वदन्तीत्यपेक्षायामाह **मुक्तस्य सुखमिति** ।

**गु०दी०— श्रुशृणुपृकृवृभ्यः छन्दसीत्यत्र** उक्तधातुभ्यः श्रुधिकृधीत्यादिरूपनिष्पत्तिर्भवतीत्यर्थः । शिरःकराद्यभावेनेत्युपस्थापितमित्यत्र नञ्द्वयेन शिरःकराद्युपलक्षितशरीरमेव सिद्ध्यतीति भावः ।

**यादु०— श्रुशृणुपृकृवृभ्यः छन्दसीति** । एभ्यो धातुभ्यः परस्य हेर्धिः विकरणाभावश्चेति सूत्रार्थः। अन्यथा लोटि तसि तनादिकृञ्भ्य उरिति उप्रत्यये गुणे सिपः सेर्ह्यपिच्चेति हिभावे अत उत्सार्वधातुक इति कृञोकारस्योकारे उतश्च प्रत्ययादसंयोगपूर्वादिति हेर्लोपे कुर्विति रूपेण भाव्यमिति ज्ञातव्यम् ।

**वं०प०— यदुक्तं प्रागिति** । 'श्रुतयो यतः । महानन्दं च भोगं नियमेन वदन्ति ही'ति यत्प्रागुक्तमित्यर्थः ॥ **स्फुटमिति** । तथा च आनन्दीभवति आनन्दव्यक्तिमान् भवतीत्यर्थो द्रष्टव्यः । ननु कृञ् करणेऽस्मात् लोटि तस्य सिप् इत्यादेशे इप् इत्यस्य लोपे तनादिकृञ्भ्य उरिति सूत्रेण उप्रत्यये कृ उस् इति जाते गुणे तस्य रपरत्वे कर् उस् इति जाते 'सेर्ह्यपिच्चे'ति सिपः सकारस्य हिभावे कर् उहीति जाते अत उत्सार्वधातुक इति कृञ् धातोरकारस्य उकारे कुरु हीति जाते उतश्चेति सूत्रेण हेर्लोपे कुर्विति रूपं स्यादिति चेत् तत्राह **श्रुशृणुपृकृवृभ्यश्छन्दसीति** । एतेभ्यो धातुभ्यः परस्य हेर्धिः स्यात् उ विकरणाभावश्चेति सूत्रार्थः । तथा च कृ अस्माल्लोटि सिपि हिभावे तस्य धिभावे उविकरणाभावेन गुणाप्राप्तौ कृधीति छन्दसि रूपमित्यर्थः ।

**कं०रा०— यदुक्तं प्रागिति** । 'श्रुतयो यतो महानन्दं च भोगं च नियमेन वदन्ति ही'ति यत्प्रागुक्तं तदिदानीं प्रपञ्चयतीत्यर्थः । सोऽनानन्दाद्विमुक्त इत्यत्र अनानन्दपदस्यानन्दाभावपरत्वे प्रागप्यानन्दस्य सत्त्वादसम्भवः । अनानन्दाद्विमुक्त इत्यनेनैवानन्दित्वस्य लाभादानन्दीत्यस्य पुनरुक्तिश्च स्यादित्यतो व्याचष्टे **अनानन्दाद्दुःखादिति** । 'न वर्णोऽकारसम्मित' इत्यस्याकारसदृशो वर्णो नास्ति कामस्य काम इच्छाविषय इति प्रथमकामपदं भावार्थं द्वितीयकामपदं तु कार्यमिति भावः । कृधीत्यत्र हेर्धित्वं कथमित्यत आह **श्रुशृणुपृकृवृभ्यश्छन्दसीति** । अनेन सूत्रेण करोतेः परस्य हेर्धित्वे व्यत्ययो बहुलमिति शपि तस्य बहुलं छन्दसीति लुकि च कृधीति रूपं निष्पन्नमिति भावः । ननु 'सोऽनानन्दाद्विमुक्त आनन्दी भवती'ति श्रुतेः 'यत्रानन्दाश्च मोदाश्चे'ति श्रुतेश्च मध्ये 'निर्गुणे ब्रह्मणि मयी'त्यादिपुराणोदाहरणवाक्यं किमर्थमित्यत आह **श्रुत्योर्मध्य इति** ।

**शे०चं०— समुच्चय इति** । दुःखाभावानुपपत्त्या सह सुखाभावानुपपत्तेः समुच्चय इत्यर्थः । मूले मयीत्यस्यार्थप्रतिपत्त्यर्थं भगवद्वाक्यमित्युक्तम् । आनन्दादिशब्दा इत्यादिपदेन मोदादिशब्दानां परिग्रहः । **सुखविशेषाणामिति** । उपकारजं प्रियं, प्रकृष्टाप्रकृष्टविषयोत्थौ मोदप्रमोदौ, स्वरूपभूतानन्द इति । श्रवणोत्थं प्रियं,

दर्शनोत्थो मोदः भोगोत्थः प्रमोदः स्वरूपभूतानन्द इत्युक्तरीत्या सुखविशेषाणां वाचका इत्यर्थः । कामशब्दः षष्ठ्यन्तो भावसाधनः । प्रथमान्तस्तु कर्मसाधनः । भावे कर्मणि च घञः स्मरणादित्याशयेन पदद्वयं व्याख्याति **इच्छाया विषया इति** । ननु कृञो लोटि तस्य सिपि तनादिकृञ्भ्यः उरित्युप्रत्यये गुणे सिपः सेर्ह्यपिच्चेति हिभावे अत उत्सार्वधातुक इति कृञोऽकारस्योकारे उतश्च प्रत्ययादसंयोगपूर्वादिति हेर्लोपे कुर्विति मध्यमपुरुषैकवचनेन भवितव्यम् । तत्कथं श्रुतौ कृधीति प्रयोग इत्यतः श्रुशृणुपृकृवृभ्यश्छन्दसीति कृञः परस्य हेर्धिभावस्य विकरणाभावस्य छन्दसि विधानाद्युक्तः श्रुतौ कृधीति प्रयोग इत्याशयेनाह **श्रुशृणुपृकृवृभ्य इतीति** ॥ **यत्किञ्चिदेवेति** । अत्र यत्तत्किञ्चिदेव फल्विति योजना द्रष्टव्या ।

**वा०र०— तानि श्रुत्यादीनीति** । अनेन श्रुतय इत्युपलक्षणया पुराणस्यापि सङ्ग्राहकं भाष्य इत्येतत् साङ्ख्यादिमतनिराकरणोपक्रमभाष्येति तथा व्याख्यानं कर्तव्यमिति सूचयति । श्रुतय इति बहुवचनं च पुराणविवक्षयेत्यपि सूचितं भवति । **यत्र काम इत्यत्रेति** । निमित्तसप्तमीति भावेन व्याख्याति **यत्र परमानन्दे प्राप्त इति** । तदपि पुराणवाक्यमिति मूलम् । श्रुतिवाक्यत्वव्यवच्छेदायेयमुक्तिः । **इत्युक्तरीत्येति** । आनन्दमयाधिकरणीयतत्त्वप्रकाशिकोक्तरीत्येत्यर्थः । **भावसाधन इति** । भावः साध्यतेऽनेनेति भावसाधनः । एवं कर्मसाधन इत्यत्रापि । यत्किञ्चिदेवेत्येतावतो विशिष्टस्य फलमेव व्याख्यानमिति प्रतीतिनिरासायाह **अत्रेति** ।

**स०व्र०— श्रुशृणुपृकृवृभ्यः छन्दसीति** । एभ्यः परस्य हेर्धिरादेशो भवति छन्दसि विषये इति सूत्रार्थः ।

**॥ इति मुक्तौ सुखसद्भावे प्रमाणप्रदर्शनम् ॥**

* * *

**॥ अथ मुक्ते सुखाभावसाधनाय प्रयुक्तस्य शरीरादिराहित्यहेतोः असिद्धत्वनिरूपणम् ॥**

**११६ सु०— यच्च साङ्ख्यादिभिरुक्तं सुखाभावोपपादनाय शरीरादिराहित्यं मुक्तस्य, तत्स्वरूपसुखस्योक्तत्वात् वैयर्थ्येन अपास्तम् । असिद्धं च तदित्याशयेनाह शिर इति ।**

## अनु०— शिरःकराद्यभावश्च न मुक्तस्य भवेत् क्वचित् ।

**न केवलं सुखाद्यभाव इति चशब्दः । जीवन्मुक्तौ शिरःकरादिभावो न परममुक्तावित्यतः क्वचित् इत्युक्तम् । कुत इत्यत आह श्रुतयश्चेति ।**

## श्रुतयश्च पुराणानि मानमत्र बहूनि च ।

**शिरःकराद्यभावो नेत्युपस्थापितं शिरआदिभावं अत्र इति परामृशति । अन्यश्चो यस्मादित्यर्थे । सन्तीति शेषः । अशरीरत्वादेर्गतिश्चोक्तेति च चार्थः ।**

**परि०**— नन्वेवम् 'अशरीरं वा व सन्तमि'ति 'देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनामि'-त्यादेः का गतिरित्यत आह **अशरीरत्वादेर्गतिश्चेति** । 'प्राकृतप्रियहानिरस्त्वि'त्यादिना प्राकृतसुखा-भावोक्त्या अशरीरत्वस्यापि प्राकृतशरीराभावपरत्वमुक्तप्रायमिति **गतिश्चोक्तेत्युक्तम्** ।

**वं०प०**— **वैयर्थ्येनेति** । स्वरूपसुखसिद्धौ सत्यां सुखाभावोपपादनाय यच्छरीरादिराहित्यमुपपादितं तद्व्यर्थमित्यर्थः । **तत्** शरीरादिराहित्यम् । अत्र शिरःकराद्यभावे इत्यन्यथाप्रतीतिनिरासायाह **शरीरादि-भावमात्रेति** ॥ **परामृशतीति** । ननु शिरःकराद्यभावस्यैव प्रकृतत्वेन शरीरादिभावस्याप्रकृतत्वात् कथमत्रेति परामर्श इत्यत उक्तं **शिरःकराद्यभावो नेतीति** । तथा च प्रतियोगितया शिरःकराद्यात्मकं शरीरमप्युपस्थापितं बुद्धिसन्निहितमेवेत्यर्थः ।

**कं०रा०**— **वैयर्थ्येनापास्तमिति** । नित्यस्वरूपसुखं प्रति शरीरादेरनुपयोगित्वेन तद्राहित्यस्यास्म-दभिमतसुखाभावानुपपादकतया वैयर्थ्येन परोक्तं शरीरादिराहित्यमपास्तमित्यर्थः ॥ **असिद्धं च तदिति** । मुक्तस्य शरीरादिराहित्यमसिद्धं चेत्याशयेनाहेत्यर्थः । 'मानमत्र बहूनि चे'त्यत्र अत्रेतिपदेन शिरःकराद्यभावो नेत्यनेन शिरःकरादिसद्भाव उपपादितः । तं शिरःकरादिसद्भावम् अत्रेत्यनेन परामृशतीत्यर्थः । शरीरादिभावमिति पाठे शिरःकराद्यभावो नेत्यनेन शिरःकरादिसद्भाव उपस्थापिते अर्थाच्छरीरादिसद्भावस्योपस्थापितत्वात् तम् अत्रेत्यनेन परामृशतीत्यर्थः ।

**शे०चं०**— ननु शिरःकरादीत्युत्तरग्रन्थेन मुक्तस्य शरीरसद्भावप्रतिपादनं क्रियते तदसङ्गतम् । न च सुखाभावोपपादनाय परोपन्यस्ताशरीरत्वहेतुनिरासार्थत्वान्नासङ्गतमिति वाच्यम् । 'प्रियस्वरूपमेवास्य बलानन्दादि-वाक्यत' इत्यादिना सुखस्य स्वरूपत्वसमर्थनेन अप्रयोजकतया तस्य पूर्वमेव निरस्तत्वात् इत्यतः अप्रयोजक-तया निरस्तस्यापि तस्य वस्तुस्थितिकथनार्थमसिद्ध्या निरासार्थत्वान्न तदिति भावेन पूर्वोक्ताप्रयोजकत्वानु-वादपूर्वकमसिद्ध्युपपादकतया मूलं सङ्गमयति **यच्चेति** ॥ **वैयर्थ्यं नेति** । जन्यसुखस्यैव शरीरादिसापेक्षत्वेन तदभावेन तदभावस्योपपादयितुं शक्यत्वेऽपि स्वरूपसुखस्य तदनपेक्षत्वेन स्वरूपसुखाभावस्योपपादयितुमशक्य-त्वादित्यर्थः । ननु 'शिरःकराद्यभावश्च न मुक्तस्य भवेदि'त्येतावतैव पूर्तेर्भाष्ये क्वचिदित्यस्य वैयर्थ्यमित्यत-स्तद्व्यावर्त्यमतप्रदर्शनेन तत्सार्थक्यमाह **जीवन्मुक्ताविति** । नन्वत्रेति सर्वनाम्नः प्रकृतपरामर्शकाच्छरीरा-द्यभावाभावस्य पूर्वत्रोक्तत्वेन प्रकृतत्वेऽप्युदाहरिष्यमाणश्रुत्यादौ तस्याप्रतिपादनेन तत्परामर्शकत्वायोगात् । शरीरादिभावस्य च पूर्वत्रानुक्तत्वेन अप्रकृतत्वेन तत्परामर्शकत्वस्याप्ययोगात् । शरीरादिभावस्य श्रुत्यादिसिद्ध-त्वालाभान्न कुत इत्याशङ्कानिवर्तकत्वमस्य भाष्यस्येत्यतः तस्य पूर्वत्रानुक्तत्वेऽपि अभावाभावस्य भावत्वेन भावव्याप्तत्वेन वा शरीराद्यभावाभावोक्त्या उपस्थापितत्वेन प्रकृततया तत्परामर्शसम्भवेन शरीरादिभावस्य

श्रुत्यादिसिद्धत्वलाभाद्युक्तमुक्ताकाङ्क्षापूरकत्वमस्येत्याशयेनाह **उपस्थापितमिति** । नन्वाद्यस्य चशब्दस्य श्रुति-पुराणयोः परस्परसमुच्चयार्थतया सार्थक्येऽप्यन्त्यस्य वैयर्थ्यमित्यत एतद्वाक्यार्थस्य प्रतिज्ञा अर्थहेतुत्वलाभार्थ-त्वान्न तदिति भावेन तदर्थतया तं व्याचष्टे **अन्त्यश्च इति** ॥ **उक्तेतीति** । 'अदेहत्वमप्राकृतशरीरते'त्यादिनेति शेषः । अनेन साधकोक्तेर्बाधकाभावेन समुच्चयार्थश्चान्त्यश्चशब्द इत्युक्तं भवति ।

**वा०र०— पूर्वमेवेति** । अतः पुनस्तन्निराकरणायोग इति शेषः । **अत्रेति सर्वनाम्न इति** । एतस्मिन्नित्यत्रेत्येतच्छब्दरूपसर्वनाम्न इत्यर्थः । एतच्छब्दात्सप्तम्यास्त्रलिति त्रलि एतदोऽन्निति एतदोऽदादेशेऽत्रेति भवति । इदंशब्दस्य त्रलि प्राप्ते तदपवादेनेदमोह इति हप्रत्यये इदम इशित्यनेनेशादेशे इहेत्येवेतीति ज्ञेयम् ।

**॥ इति मुक्ते सुखाभावसाधनाय प्रयुक्तस्य शरीरादिराहित्यहेतोः असिद्धत्वनिरूपणम् ॥**

* * *

**॥ अथ मुक्तानां देहसद्भावे पुराणवाक्योपन्यासः ॥**

११७ **सु०—** तत्र तावत् स्फुटार्थत्वात् पुराणमादावुदाहरति **न वर्तत इति** ।

**अनु०—** न वर्तते यत्र रजस्तमस्तयोः
सत्त्वं च मिश्रं न च कालविक्रमः ।
न यत्र माया किमुतापरे हरे-
रनुव्रता यत्र सुरासुरार्चिताः ॥

श्यामावदाताः शतपत्रलोचनाः
पिशङ्गवस्त्राः सुरुचः सुपेशसः ।
सर्वे चतुर्बाहव उन्मिषन्मणि-
प्रवेकनिष्काभरणाः सुवर्चसः ॥

प्रवालवैडूर्यमृणालवर्चसां
परिस्फुरत्कुण्डलमौलिमालिनाम् ।

भ्राजिष्णुभिर्यः परितो विराजते
　　लसद्विमानावलिभिर्महात्मनाम् ॥
विद्योतमानप्रमदोत्तमाभिः
　　सविद्युदभ्रावलिभिर्यथा नभः ।
श्रीर्यत्र रूपिण्युरुगायपादयोः
　　करोति मानं बहुधा विभूतिभिः ॥
ऋचां त्वः पोषमास्ते पुपुष्वान्
　　गायत्रं त्वो गायति शक्करीषु ।
ब्रह्मा त्वो वदति जातविद्यां
　　यज्ञस्य मात्रां विमिमीत उ त्वः ॥

**यत्र** लोके । **सत्त्वशब्दो**ऽनेकार्थः । क्वचित् प्रकृतिपरिणामविशेषस्य वाचकः । क्वचित् साधुत्वस्य । तत्र सत्त्वं च न विद्यत इत्युक्ते न ज्ञायते कस्य प्रतिषेध इति । अतस्तयो रजस्तमसोर्मिश्रं सहचरितमित्युक्तम् । रज आदिप्रकरणात् ज्ञास्यत इति चेत् । श्रुत्यभावे प्रकरणाद्यन्वेषणात् । रजःप्रभृतीनामवृत्तिर्नाम बन्धकतया व्यापाराभावः । **कालविक्रमः** कालसामर्थ्यकृ(ता भावाविकाराः)तो भावविकारः । **माया** प्रकृतिः । अपरे महदादयो न वर्तन्त इति किमुत वक्तव्यम् । हरेरनुव्रता यत्र वर्तन्ते । **असुराः** साधवः सन्ति ॥ **अवदाता** निर्मलाः । **सुपेशसः** सुरूपाः । **उन्मिषन्मणिप्रवेकनिष्काभरणाः** रश्मिमद्रत्नप्रवरहाराभरणाः । **रुक्** प्रभा । **वर्चो** बलम् । **हरेरनुव्रता** इत्यनेन सम्बन्धः । यो लोक एवंविधानां महात्मनां **लसद्विमानावलिभिः** परितो **विराजते** । केचित् **प्रवालवर्चस** इत्यादि । परिस्फुरत्कुण्डलमौलयश्च ते मालिनश्चेति विग्रहः । यद्वा, परिस्फुरन्त्यश्च ताः कुण्डलमौलिमालाश्चेति कर्मधारयं विधाय पश्चादिनिरुत्पाद्यः । **विद्योतमानाः प्रमदोत्तमाः** यासु विमानावलिषु तास्तथोक्तास्ताभिः । यद्वा, विद्योतमानाभिः प्रमदोत्तमाभिः भ्राजिष्णु-

भिरिति व्यधिकरणत्वेन योजना । **प्रमदोत्तमाः** विद्युतः । **विमानावलयः** अभ्रावलयः । **रूपिणी** प्रत्यक्षा । **मानं** पूजा । **बहुधा** स्थिताभिः **विभूतिभिः** स्वमूर्तिभिः ॥ एवम्भूतं लोकं सन्दर्शयामासेति पूर्वेणान्वयः ।

कामान्नरूपी चरति

'कामान्नरूपी चरती'त्यनेन 'कामरूप्यनुसञ्चरन्नि'ति श्रुतिमुपादत्ते ।

उदाहृतवाक्यानां फलमाह **इति पूर्वेति** ।

इति पूर्व-
श्रुत्या पुराणोक्तिभिरप्यदोषः ।
देहः स्वरूपात्मक एव तेषां
मुक्तिं गतानामपि चेयते हि ॥

इत्येषा पूर्वा यस्याः सा तथोक्ता । देहित्वे दुःखादिप्रसक्त्या मुक्तत्वव्याघात इत्यत उक्तम् **अदोष इति** ॥ दोषाहेतुः कथमित्यत उक्तं **स्वरूपात्मक एवेति** । जीवस्वरूपमेवात्मा स्वरूपं यस्यासौ तथोक्तः । किं जीवन्मुक्तानामित्यत उक्तं **तेषामपि च मुक्तिं गतानामिति** । पुराणवाक्ये हि श्यामावदाता इत्यादिना देहः प्रतीयते । न वर्तते इत्यत्र च प्रकृत्याद्यभावोक्त्या परममुक्तित्वं, देहस्य च स्वरूपत्वं, तत एवादोषत्वम् । श्रुतावृगुच्चारणादिना देहित्वम् ।

**परि०— प्रकृतिविपरिणामविशेषस्येति** । 'सत्त्वात्सञ्जायते ज्ञानमि'त्यादौ ॥ **साधुत्वेति** । 'सद्भावे साधुभावे च सच्छब्दः पार्थ उच्यते' इत्यादौ । संवलनभ्रान्तिं निराह **सहचरितमिति** ॥ **श्रुत्यभाव इति** । मिश्रपदरूपश्रुत्यभाव इत्यर्थः । भावा इत्यस्य विवरणं **विकारा इति**। जरावलीपलितादयः ॥ **प्रकृतिरिति** । बाधकतया नेत्यर्थः ॥ **साधव इति** । प्रल्हादादय इत्यर्थः । 'सुरुचः सुवर्चस' इत्यनयोरपौनरुक्त्यायार्थभेदमाह **रुक्प्रभेति वर्चो बलमिति** । 'य' इत्यत्र लोक इति विशेष्योक्तिः । प्रकरणवशादाह **एवंविधानामिति** । प्रवालेत्यादिविशेषणोक्तार्थपरामर्शः । एकत्र बाधादाह **केचिदिति** । बहुव्रीहिगर्भः समास इत्याह **इति विग्रह इति** ॥ **इनिरुत्पाद्य इति** ।

'व्रीह्यादिभ्यश्चे'ति इनिरित्यर्थः । तत्र तदन्तविधिरिष्यत इत्युक्तं 'वादिनोः शून्यमायिनोरि'त्येतद्व्याख्यावसरे । दृष्टान्तदार्ष्टान्तिकभावं व्यनक्ति **प्रमदोत्तमा विद्युत इति** ॥ **पूर्वेणान्वय इति** । द्वितीयस्कन्धे नवमेऽध्याये 'तस्मै स्वलोकं भगवान् सभाजितः सन्दर्शयामास परं न यत्पदं' इति श्लोकेनान्वय इत्यर्थः । 'ऋचां त्व' इति श्रुतेः पृथगधिकरणे व्याख्यानादिह त्यागः ॥ **श्रुताविति** । 'ऋचां त्व' इति श्रुतावित्यर्थः ॥ **ऋगुच्चारणादिनेति** । सामगानादिरादिपदार्थः ।

**यादु०**— प्रकृतिपरिणामरूपसत्त्वस्य रजस्तमोमिश्रत्वादाह **सहचरितमिति** ॥ **ज्ञास्यत इति** । तथा चास्य विशेषणस्य नोक्तं प्रयोजनमन्यथासिद्धत्वादित्येव शङ्कितुरभिप्रायः । एतद्विशेषणमेव माऽस्त्विति चेन्न । तथात्वे अग्रिमसमाधानस्याश्लिष्टत्वप्राप्तेरित्यवधेयम् ॥ **श्रुत्यभाव इति** । अत्र श्रुतिशब्देन लिङ्गात्मकशब्दस्य विवक्षितत्वात् तयोर्मिश्रमित्यस्य लिङ्गत्वात् कथं श्रुतित्वमिति शङ्काऽनवकाशः । प्रकरणापेक्षस्य लिङ्गस्य शीघ्रोपस्थापकत्वाल्लिङ्गेनैवोक्तनिश्चय इति समाधानाभिप्रायः । ननु ब्रह्माण्डान्तःस्थत्वात् तत्र कथं तेषामवृत्तिरित्यत आह **अबन्धकतयेति** ॥ **भावविकारः** पदार्थविकृतिः । सर्वे चतुर्बाहव इति सारूप्यमुक्त्यधिकारिविवक्षयोक्तमिति ज्ञातव्यम् । बहुव्रीहित्वे इनो वैयर्थ्यप्रसङ्गादाह **परिस्फुरत्कुण्डलेति** ॥ **पूर्वेणेति** । भागवतपूर्ववाक्येनेत्यर्थः ॥ **दोषाहेतुरिति** । दुःखस्य दोषसाध्यत्वाद्दोषाहेतुत्वे दुःखाहेतुत्वमपि लब्धमेवेति भावः ।

**वं०प०**— ननु मिश्रं सत्त्वं नास्तीति सत्त्वस्य कथं मिश्रत्वमुच्यते । प्रकृतिपरिणामभूतस्य सत्त्वस्य रजस्तमोभ्यामविमिश्रत्वेन प्रमितत्वात् । यथोक्तं तृतीयतात्पर्ये । 'तत्र सत्त्वं केवलं स्यादि'ति । अतो मिश्रशब्दं व्याख्याति **सहचरितमिति** । तथा च तयोर्मिश्रं रजस्तमोभ्यां सहचरितं सहपठितमित्यर्थः । सत्त्वगुण इति यावदित्युक्तं भवतीत्यर्थः ॥ **ज्ञास्यत इति** । अनेकार्थस्यापि सत्त्वशब्दस्य सत्त्वगुणपरत्वमित्यर्थः । अतो मिश्रपदमनपेक्षितमिति भावः । **श्रुतिः** । तयोर्मिश्रमिति लिङ्गात्मकः शब्द इत्यर्थः । प्रकृते च शीघ्रोपस्थापकस्य तयोर्मिश्रमिति लिङ्गात्मकशब्दस्य विद्यमानत्वात् तदपेक्षया विलम्बेनोपस्थापकस्य अत एव तदपेक्षया दुर्बलस्य प्रकरणस्यान्वेषणं न कर्तव्यमिति भावः । विशेषणं विशेष्येण बहुलमिति बहुलग्रहणात् मौलयश्च ते मालिनश्चेति विशेषणयोरेव समास इति द्रष्टव्यम् । अत एव अस्वरसादाह **यद्वेति** ॥ **पश्चादिनिरिति** । मौलिमाला एषां सन्तीति मौलिमालिनः तेषामित्यर्थः । अनेन बहुव्रीहित्वे इनेर्वैयर्थ्यमिति शङ्काऽनवकाश इति ज्ञातव्यम् । अभ्रावलय इत्यनन्तरं वैकुण्ठलोको नभःस्थानीय इत्यपि द्रष्टव्यम् ॥ **दोषाहेतुरिति** दोषकार्यदुःखाहेतुरित्यर्थः । तेषामपि च मुक्तिगतानामिति जीवन्मुक्तानामपि परममुक्त्यनन्तरमित्यर्थः ॥ **देहस्य स्वरूपत्वमिति** । एतदपि प्रकृत्याद्यभावोक्त्यैव प्रतीयत इत्यर्थः । **तत एव** स्वरूपत्वादेव ।

**कं०रा०**— **रज आदीति** । रजस्तमःशब्दसन्निधानात् सत्त्वशब्देन प्रकृतिपरिणामविशेष एवोच्यत इति ज्ञायते अतस्तयोर्मिश्रमित्येतन्न वक्तव्यमिति भावः ॥ **श्रुत्यभाव इति** । असाधारणधर्मार्पकशब्दाभावे प्रकरणाद्यन्वेषणं प्रकृते च तयोः मिश्रमिति रजस्तमःसहचरितत्वरूपासाधारणधर्मार्पकशब्दे सति प्रकरणान्वेषणं न कर्तव्यमिति भावः । तेन 'श्रुतिर्नाम समुद्दिष्टं लिङ्गं तल्लक्षणं स्मृतमि'ति **तत्त्वप्रदीपो**दाहृतवचनानुसारेण वाचक-

शब्दस्यैव श्रुतित्वात् तयोर्मिश्रमित्यस्य च वाचकत्वाभावेन श्रुतित्वाभावात् श्रुत्यभाव इति तस्य श्रुतित्वाभिधानमयुक्तमिति चोद्यं निरवकाशम् । असाधारणधर्मार्पकशब्दस्य चन्द्रिकायां लिङ्गताया उक्तत्वात् तस्य प्रकरणादितः प्राबल्यं च युक्तम् । न चैवं लिङ्गाभावे प्रकरणाद्यन्वेषणादित्येव वक्तव्यमिति वाच्यम् । असाधारणधर्मस्येव तदर्पकशब्दस्यापि लिङ्गत्वमस्तीति सूचयितुं श्रुतिशब्देन तन्निर्देशस्य कर्तव्यतया श्रुत्यभावे प्रकरणाद्यन्वेषणादित्युक्त्युपपत्तेः । गुणत्रयादिसूक्ष्मरूपायाः प्रकृतेः सर्वत्र सत्त्वान्न वर्तते यत्र रजस्तम इत्यादिनोक्ता रजःप्रभृतीनामवृत्तिः कथमित्यत आह **रजःप्रभृतीनामिति** ॥ **भावविकारा इति** । उत्पत्तिमरणादिरूपा इति भावः । अनुव्रता भक्ताः । नन्वसुराणां मुक्तिस्थलेऽवस्थानायोगात् सुरासुरार्चिता इति तेषां तत्रावस्थानं कथमुच्यत इत्यत आह **असुराः साधव इति** । साधवोऽसुराः प्रल्हादादयस्तत्र सन्तीत्यर्थः । एकत्र श्यामत्वावदातत्वयोः समावेशो न घटत इत्यतोऽवदातशब्दं प्रकारान्तरेण व्याचष्टे **अवदाता निर्मला इति** । 'अवदातः सिते पीते शुद्धे' इत्यमरः । 'अवदातः सिते पीते प्रवरे शुद्धिमत्यपी'ति नानार्थरत्नमाला । 'सुपेशसः सुरूपा' इति वेदनिघण्टौ । रूपनामसु पेशःशब्दः पठित इति भावः ॥ **रश्मिमद्रत्नप्रवरहाराभरणा इति** । रश्मिमदित्युन्मिषच्छब्दार्थकथनं रत्नप्रवेकमिति मणिप्रवेकशब्दस्य हारेति निष्कशब्दस्येति द्रष्टव्यम् । विचिर् पृथग्भाव इत्यस्मात्प्रपूर्वात् घञि निष्पन्नः प्रवेकशब्दः साधारणमणिविविक्तश्रेष्ठवाची 'निष्करतु न स्त्रियाम् । हेम्न्युरोभूषण' इति नानार्थरत्नमालोक्तेर्निष्कशब्द उरोभूषणवाची । तथाच रश्मिमद्रत्नप्रचययुक्तपदकरूपाभरणवन्त इति पर्यवसितोऽर्थ इति ध्येयम् । सुरुचः सुवर्चस इति पदद्वयस्य पुनरुक्तिर्यथा न भवति तथा व्याचष्टे **रुक् प्रभा वर्चो बलमिति** । 'तेजःपुरीषयोर्वर्च' इत्यमरोक्तेर्वर्चःशब्दस्तेजःशब्दवाच्ये वर्तते । तेजःशब्दवाच्यं बलमपि भवति । 'तेजःप्रभावे दीप्तौ च बले शुक्रेऽपी'त्यमरोक्तेरित्यभिप्रेत्य वर्चःशब्दो बलार्थत्वेन व्याख्यात इति द्रष्टव्यम् । श्यामावदाता इत्यादीनां तु सुवर्चस इत्येतत्पर्यन्तानां विशेषणानां केन सम्बन्ध इत्याकाङ्क्षायामाह **हरेरनुव्रता इत्यनेन सम्बन्ध इति** । केनचित्प्रबलवर्चस इत्यादीति प्रवालवैडूर्यमृणालवर्चसामित्यस्य केचित्प्रवालवर्चसः केचिद्वैडूर्यवर्चसः केचिन्मृणालवर्चसस्तेषामित्यर्थ इति भावः ॥ **पश्चादिनिरुत्पाद्य इति** । 'परिस्फुरत्कुण्डलमौलिमाले'ति कर्मधारयसमासात् 'व्रीह्यादिभ्यश्चे'त्यत्र तदन्तविध्याश्रयणेन मत्वर्थीय इनिप्रत्यय उत्पाद्य इत्यर्थः। 'न वर्तते यत्र रजस्तम' इत्यादिषु श्रुतस्य यच्छब्दस्य केनान्वय इत्यत आह **एवम्भूतमिति** । 'तस्मै स्वलोकं भगवान् सभाजितः सन्दर्शयामास परं न यत्परमि'ति पूर्ववाक्यस्य सत्त्वात् यत्र लोके रजआदिकं न वर्तते । यत्र सुरासुरार्चिताः श्यामावदाता इत्यादिविशेषणविशिष्टहरेरनुव्रता वर्तन्ते, यो लोकः प्रवालवैडूर्यमृणालवर्चसामित्यादिविशेषणविशिष्टानां महात्मनां विमानावलिभिः परितो विराजते, यत्र च लोके रूपिणी श्रीर्बहुधा स्थिताभिर्विभूतिशब्दिताभिः स्वमूर्तिभिरनुगायशब्दितविष्णुपादयोर्मानशब्दितपूजां करोति, एवंविधं स्वलोकं भगवान् सन्दर्शयामासेति पूर्वेण बहुधाश्रुतस्य यच्छब्दस्य अन्वय इत्यर्थः ॥ **दोषाहेतुरिति** । न विद्यते दोषो यस्मात् सोऽदोष इत्यदोषशब्दस्य विग्रह इति भावः ॥ **प्रकृत्याद्यभावोक्त्येति** । प्रकृत्यादेर्बन्धकत्वेन व्यापारस्याभावोक्त्येत्यर्थः । परममुक्तित्वमित्यादिषु प्रतीयत इत्येतदनुवर्तते ॥ **श्रुताविति** । 'ऋचां त्वः पोषमास्ते पुपुष्वानि'ति श्रुतौ ऋगुच्चारणसामगानादिना देहवत्त्वं प्रतीयते । देहाभावे ऋगुच्चारणादेरयोगादिति भावः ।

**शे०चं०**— श्रुतयश्च पुराणानीति निर्देशक्रमभङ्गेन पुराणस्यैवादावुदाहरणे निमित्तमाह **स्फुटार्थत्वादिति** । प्रतिपिपादयिषितशरीरादिसद्भावस्य पुराणे स्फुटत्वादित्यर्थः ॥ **यत्र लोक इति** । 'तस्मै स्वलोकं भगवान् सभाजितः सन्दर्शयामासे'ति पूर्वग्रन्थे लोकस्य प्रकृतत्वात् तस्यैव यच्छब्देन परामर्श इति भावः । 'न वर्तते यत्र रजः' इत्यविशेषेण रज आदेरिव 'सत्त्वं यत्र ने'त्यविशेषेणैव सत्त्वनिषेधस्य कर्तव्यत्वात् तयोर्मिश्रमिति किं तद्विशेषणेन । न च सत्त्वविशेषस्यैवायं निषेधो, न सत्त्वसामान्यस्येति ज्ञापनार्थमेतदिति वाच्यम् । सत्त्वशब्दस्य रज आदिशब्दवद्विशेषनिष्ठत्वेन सामान्यपरत्वस्यैवासिद्ध्या व्यावर्त्याभावादित्यतोऽस्यानेकार्थतया सत्त्वं नेति सामान्यनिषेधस्य साधुत्वस्य तल्लोकेऽनुवृत्तत्वेनानुपपत्त्या विशेषनिषेधसिद्ध्यर्थत्वाद्विशेषणस्य नानर्थक्यमिति भावेन तस्यानेकार्थत्वोपपादनपूर्वकं व्यावर्त्यप्रदर्शनेन सार्थकतामाह **सत्त्वशब्द इति** । प्रकृतिपरिणामरूपसत्त्वस्य रजस्तमोमिश्रितत्वाभावादाह **सहचरितमिति** । उक्तप्रयोजनस्यान्यथासिद्धत्वान्नोक्तविशेषणप्रयोजनत्वमित्याशयेन शङ्कते **रज आदीति** । श्रुतिलिङ्गादौ समवाये परदौर्बल्यस्य निर्णीतत्वेन विलम्बेनार्थोपस्थापकस्य प्रकरणस्य शीघ्रोपस्थापकश्रुत्यपेक्षया दुर्बलत्वान्न प्रकरणेन श्रुतिकार्यसिद्धिरित्याशयेन समाधत्ते **श्रुत्यभाव इति** । यद्यपि तयोर्मिश्रमित्यस्य लिङ्गत्वान्न श्रुतित्वम् । तथाऽपि श्रुतिशब्देन लिङ्गात्मकशब्दस्यैव विवक्षितत्वाददोष इत्याहुः । वस्तुतोऽत्र श्रुतिशब्दः प्रकरणापेक्षया शीघ्रोपस्थापकप्रमाणपरः । ततश्च लिङ्गस्यापि तथात्वात् तदभाव एव प्रकरणस्यार्थनिर्णायकतया आश्रयणीयत्वात् सति तस्मिंस्तदाश्रयणमनुचितमिति भावः । ननु ब्रह्माण्डान्तः सर्वत्र प्रकृतिपरिणामभूतानां रजःप्रभृतिगुणानां व्याप्तत्वात् ब्रह्माण्डान्तःस्थत्वात् भगवल्लोकस्य कथं तेषामवृत्तिरित्यतः स्वरूपेण सतामपि तेषां केनचिद्विशेषेणावृत्त्युपपत्तेर्नानुपपत्तिरित्यभिप्रेत्य तथाऽवृत्तिमाह **रज आदीनामिति** । वर्तते इत्यस्यानुवृत्तिमर्थवशाद्वचनविपरिणामं चाश्रित्याह **वर्तत इति** । भावविकार इत्यत्र भावशब्दः पदार्थपरः । कथमसुराणां विष्णुलोकेऽवस्थानमित्यत आह **असुरा इति**। तथा च स्वरूपेण साधूनां निमित्तविशेषेणासुरकुलोत्पन्नानामेवासुरशब्देन ग्रहणान्नानुपपत्तिरिति भावः । बहुलग्रहणाद्विशेषणयोरेव समास इत्यभिप्रेत्य अवदातशब्दं व्याचष्टे **अवदाता निर्मला इति** । 'अवदातः सिते गौरे शुद्धे' इति यादवोक्तेरिति भावः ॥ **सुरूपा इति** । सुन्दरा इत्यर्थः । रत्नं मणिर्द्वयोरित्यभिधानं मनसि निधायाह **रत्नेति** । 'क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः' इत्यमरोक्तेः प्रवेकशब्द उत्तमार्थ इत्याह **प्रवरेति** । 'साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले । दीनारेऽपि च निष्कोऽस्त्री'त्यमरोक्तेर्निष्कशब्दो हारपर इत्यभिप्रेत्य व्याख्याति **हारेति** । रुक् प्रभेति । 'स्युः प्रभा रुग्रुचिस्त्विड्भाभाच्छविद्युतिदीप्तयः' इत्यमरोक्तेरिति भावः ॥ **वर्चो बलमिति** । 'तेजःपुरीषयोर्वर्च' इत्यमरोक्तेर्वर्चःशब्दस्य तेजःशब्दस्य च 'प्रभावे दीप्तौ च बले शुक्रे' इत्यमरोक्तेर्बलपर्यायत्वादिति भावः ॥ **सम्बन्ध इति** । अनेन यत्र हरेरनुव्रता वर्तन्ते ते कीदृशा इत्यतः सुरासुरार्चिता इत्येकं विशेषणमुक्तं, विशेषणान्तराण्याह **श्यामावदाता** इति योजना सूचिता भवति । सर्वेषां महात्मनां प्रवालादिवर्चस्त्वभ्रमनिरासायाह **केचिदिति** । आदिपदेन केचिद्वैडूर्यवर्चस इत्यादेः परिग्रहः ।

ननु परिस्फुरन्त्यः कुण्डलमौलिमाला येषामिति बहुव्रीहिणैव मत्वर्थस्य लाभादिनिप्रत्ययवैयर्थ्यमित्यतो न बहुव्रीहिमाश्रित्य मतुबर्थप्रयोगोऽत्राभिमतः किन्तु व्रीह्यादित्वान्मालाशब्दस्य तस्माद् व्रीह्यादिभ्यश्चेति इनि-

प्रत्ययोपपत्तौ निष्पन्नमालिन्शब्देन परिस्फुरत्कुण्डलमौलिशब्दस्य कर्मधारयः । यद्यपि विशेषणविशेष्ययोरेव स नियमितः । तथाऽपि बहुलग्रहणसामर्थ्यात् क्वचिद्विशेषणयोरपि परस्परसमासाभ्यनुज्ञानान्न कर्मधारयानुपपत्तिरित्यभिप्रेत्य तमुपदर्शयति **परिस्फुरत्कुण्डलमौलयश्च ते मालिनश्चेति विग्रह इति** ॥ **यद्वेति** । ततश्च, बहुव्रीहिमाश्रित्य मतुबर्थप्रत्ययप्रयोगे वैयर्थ्यदोषेऽपि कर्मधारयमाश्रित्य तत्प्रयोगे शब्दान्तरत्वान्न वैयर्थ्यमित्युक्तं भवति । न च तथाऽपि कर्मधारयमत्वर्थीयाद् बहुव्रीहिरेवेष्टो लघुत्वादिति न्यायात् । शब्दान्तरत्वाश्रयणेऽपि बहुव्रीहिविवक्षया अल्पेन शब्देन अभिमतार्थप्रतिपादनसम्भवे बहुयत्नाश्रयणं दोषः स्यादेवेति वाच्यम् । बहुव्रीह्यपेक्षया कर्मधारयमत्वर्थीये शब्दगौरवस्थले बहुयत्नाश्रयणस्य दोषत्वेऽपि शब्दसाम्ये तददोषत्वस्य टीकाकृदभिमतत्वात् । अत एव टीकायां यद्विकारीत्यत्र कर्मधारयमत्वर्थीयमभ्युपगम्य अनादिमदित्यत्र तदनङ्गीकारः । बहुव्रीहौ कर्मधारयमत्वर्थीये च अर्थगौरवाप्रसङ्गेन शब्दगौरवस्यैव लाघवन्यायविरुद्धत्वात् । प्रकृते च तदभावेनादोषत्वात् । लाघवन्यायानादरेण शब्दगौरवेऽपि न्यासादिगतकर्मधारयमत्वर्थीयप्रयोगाणां एकगोपूर्वाट्ठञ् नित्यमिति सूत्रे *दुर्घटवृत्तिकृता* दर्शितत्वाच्च सकलमकलङ्कमिति सम्प्रदायः । *गुरवस्तु* यदा कर्मधारयान्मत्वर्थीयः क्रियते तदा स्वपदार्थप्राधान्यमाश्रित्य कर्मधारयः कर्तव्यः । तेषामेव च पदार्थानामन्यत्र गुणभावमाश्रित्य मत्वर्थीय उत्पद्यत इति प्रतिपत्तिगौरवम् । यदा च पूर्वमेवान्यपदार्थप्राधान्यविवक्षा तदा वर्तिपदार्थानां गुणभावश्च आश्रीयत इति प्रतिपत्तिलाघवम् । कर्मधारयो मत्वर्थीयसहित एवान्यपदार्थस्य प्रतिपादक इति शब्दगौरवम् । बहुव्रीहिस्त्वन्यानपेक्ष एव तत्प्रतिपादक इति शब्दलाघवं च भवतीति न कर्मधारयमत्वर्थीयाश्रयणं युक्तम् । तथाऽप्यन्यपदार्थप्राधान्यविवक्षायां बहुव्रीहेरेव प्रसङ्गेन सर्वधनी सर्वबीजी सर्वकोशी नट इत्याद्यभियुक्तप्रयोगानुपपत्तिप्रसङ्गात् तदुपपादनार्थं प्रवृत्तात् 'ससर्वदिः कर्मधारयादिनिः' इति भाष्यवचनाल्लाघवानाश्रयणेन वार्त्तिक एव कर्मधारयादिनिरित्यत्र तात्पर्यमिति वर्णयाम्बभूवुः । एतच्च व्रीह्यादिभ्यश्चेत्यत्र तदन्तविध्याश्रयणेन द्रष्टव्यम् । अन्यथा मालाशब्दस्य व्रीह्यादित्वात् तत इनिप्रत्ययोत्पत्तावपि समस्तस्यातथात्वात् । ततो व्रीह्यादिलक्षणस्य इनेरनुत्पत्तिप्रसङ्गात् । अत एवेह टीकायां शून्यमायिनोरित्यत्र द्वन्द्वात् तदन्तविध्यभ्युपगमेन प्रागिनिः समर्थित इति द्रष्टव्यम् ।

'विद्योतमानप्रमदोत्तमाभिः' इत्यस्य विमानावलिविशेषणत्वाश्रयणे उक्तरीत्या जघन्यबहुव्रीह्याश्रयणं भवतीत्यरुच्या समासप्राबल्यात् कर्मधारयमाश्रित्य योजयति **यद्वेति** ॥ **व्यधिकरणत्वेनेति** । अनेन विद्योतमानप्रमदोत्तमाभिः कृत्वा भ्राजिष्णुभिरिति विमानावलिविशेषणमित्युक्तं भवति । अन्यथा भ्राजिष्णुभिरित्यस्य तद्विशेषणत्वोपपत्तावपि विद्योतमानप्रमदोत्तमाभिरित्यस्य कर्मधारयपक्षे विमानावलिविशेषणत्वानुपपत्तेरनन्वयप्रसङ्ग इति भावः ।

दृष्टान्तदार्ष्टान्तिकभावविवरणं प्रमदोत्तमा इत्यादि ॥ **पूर्वेणेति** । 'तस्मै स्वलोकं भगवान् सभाजितः सन्दर्शयामास' इति भागवते पूर्वेणान्वय इत्यर्थः ।

न विद्यते दोषो यस्मादिति बहुव्रीहिमभिप्रेत्याह **दोषाहेतुरिति** । यद्यपि दोषाहेतुत्वोक्तावपि दुःखाहेतुत्वानुक्तेर्नोक्तशङ्कापरिहारः सिद्ध्यति । तथाऽपि दुःखस्य दोषप्रयुक्तत्वात् दोषाहेतुत्वोक्तावर्थतः दुःखाहेतुत्व-

लाभात् तदभिप्रायेण शङ्कापरिहार इति भावः । उदाहृतवाक्यानामविशेषेण विवक्षिताशेषार्थसाधकत्वभ्रमं वारयति **पुराणवाक्ये हीत्यादिना** ।

**वा०२०— क्रमभङ्गेनेति** । क्रमविवक्षित्वेत्यर्थः । **सन्दर्शयामासेति पूर्वग्रन्थ इति** । वर्तते यत्रेत्यादि श्रीर्यत्र रूपिणीत्यन्तानि वाक्यानि द्वितीयस्य नवमे । तत्पूर्वं तस्मै स्वलोकमिति वाक्यमस्तीति भावः। सामान्यनिषेधस्यानुपपत्त्येति सम्बन्धः । **तथाऽवृत्तिमिति** । रूपविशेषेणावृत्तिमित्यर्थः । रजःप्रभृतीनामित्यर्थानुवादेन प्रतीकोपादानं कृतं **रज आदीनामिति** । क्वचिद्रजःप्रभृतीनामित्यपि पाठः । भावपदं धर्मपरमिति प्रतीतिनिराकरणायाह **भावविकार इत्यत्रेति** । विरुद्धधर्माध्यासो भावभेदहेतुमित्यादौ तथादर्शनादिति भावः । **वर्तत इत्यस्येति** । नेत्यस्यानुवृत्तिस्तु स्पष्टेति नोक्तः । **कथमसुराणामिति** । ततश्च न तदर्चितत्वं न सम्भवतीति भावः । **असुरशब्देनेति** । असुषु रता इति व्युत्पत्तिसम्भवेऽपि सुरासुरेति विप्रतिषिद्धग्रहणस्वारस्यानुसारेणेदमुपपादनम् । **बहुलग्रहणादिति** । विशेषणं विशेष्येण बहुलमितिसूत्रीयबहुलग्रहणादित्यर्थः । **विशेषणयोरेवेति** । श्यामा इति च विशेषणयोरेवेत्यर्थः ।

**हारपर इतीति** । तस्योरोभूषणत्वादिति भावः । **रुक्प्रभेतीति** । यद्यपि रुक्शब्दव्याख्यानानन्तरं सुपेशस इत्यादेर्व्याख्यानमुचितम् तथापि रुग्वर्चःशब्दयोरेकार्थत्वप्रयुक्तपौनरुक्त्यशङ्कानिरासस्सूचनाय पूर्वत्र वा उत्तरत्र वा पदद्वयव्याख्यानेनार्थभेदमात्रस्य वक्तव्यतयाऽविशेषादिह तदुभयस्य भेदेन व्याख्यानमिति मूलाशयः । अत एव सुपेशस इत्यत्र सुरूपा इति व्याख्यानेऽपि सुरुचः सुवर्चस इत्येतयोः तथा व्याख्यानमकृत्वा पदद्वयस्यार्थभेदमात्रकथनमिति सिद्धं कृत्वा अर्थद्वयेऽभिधानमात्रमाह **स्युः प्रभा रुग्रुचिरित्यादि** । वर्चःशब्दस्य साक्षाद्बलपर्यायत्वाभावात्परम्परया तदुपपादयति **तेजःपुरीषयोरित्यादि** । **येषामिति बहुव्रीहिणैवेति** । येषां ते परिस्फुरत्कुण्डलमौलिमालास्तेषां मौलिमालानामिति बहुव्रीहिणैवेत्यर्थः । **इनिप्रत्ययेति** । तदन्तविध्याश्रयणादिना वक्ष्यमाणरीत्या प्राप्तेनिप्रत्ययेत्यर्थः । **परिस्फुरत्कुण्डलमौलिशब्दस्येति** । परिस्फुरन्तौ कुण्डलमौली येषां ते परिस्फुरत्कुण्डलमौलय इति बहुव्रीहिगर्भतच्छब्दस्येत्यर्थः । एतत्प्रकरणम् 'ईशातज्ज्ञानवेदाक्षजानुमामातृपूर्विण' इत्येतद्भक्तिपादीयानुव्याख्यानमूलटीकाव्याख्यावसरे सम्यगुपपादितम् । तत एवोपपादनप्रकारोऽत्रावसेयः । दर्शितत्वाच्चेति सकलमकलङ्क इति पाठः ।

ननु लाघवाश्रयणेन वा तदनाश्रणेन वेनिप्रत्ययोऽस्तु । तथापि तत्प्रापकमत इनिठनावित्येतन्न सम्भवति । मातृपूर्विणामित्यादाविवादन्तत्वाभावात् । ततो व्रीह्यादिभ्यश्चेत्येतदेव प्रमापकं वाच्यम् । तत्र केवलादेव व्रीह्यादिशब्दादिनिविधानेन प्रकृते च मालाशब्दस्य केवलत्वाभावादित्यत आह **एतच्च व्रीह्यादिभ्यश्चेत्यत्रेति** । वनमालीत्यादाविनिसिद्ध्यर्थं तदन्तविधेस्तत्र सिद्धत्वादिति भावः । उक्तं चैतच्छून्यमायिनोरित्येतदुपपादनावसरे मूले प्राक् । **प्रमदोत्तमाभिः कृत्वेति** । एवं च विद्योतमानप्रमदोत्तमाभिर्भ्राजिष्णुभिरिति विशेषणं विमानावलीनाम् । तत्र च व्यधिकरणे तृतीये । तथा च प्रमदोत्तमाभिः प्रमदोत्तमरूपभ्राजनहेतुभिर्भ्राजिष्णुभिरित्यर्थ इत्युक्तं

भवति । **दृष्टान्तदार्ष्टान्तिकेति** । अनेन प्रमदोत्तमा विद्युत इत्यत्र विद्युतां प्रमदोत्तमा उपमेयाः । अभ्रावलीनां विमानावलय उपमेया इत्यर्थः सूचितो भवति ।

**स०व्र०— रजःप्रभृतीनामिति** । स्वरूपेण तेषां नित्यत्वादवृत्त्यनुपपत्तेरिति भावः । सुरुचः सुवर्चसः इत्येतयोः पौनरुक्त्यं परिहरति **रुक् प्रभेति** ॥ **यद्वेति** । न कर्मधारयान्मत्वर्थीय इति नञा निर्दिष्टत्वादनित्यमिति ध्येयम् । दृष्टान्तदार्ष्टान्तिकभावविवरणं प्रमदोत्तमा इति । **पूर्वेणेति** । भागवत एव पूर्वेणेत्यर्थः ।

**॥ इति मुक्तानां देहसद्भावे पुराणवाक्योपन्यासः ॥**

* * *

**॥ अथ अनुमानेनापि मुक्तानां देहवत्त्वसिद्धिः ॥**

११८ **सु०— अत्र अनुमानमप्याह शिर इति ।**

**अनु०— शिरःकराद्यैरपि मुक्तिभाजो**
**युक्ता यतस्ते पुरुषा इदानीम् ।**
**यथेति पूर्वा अनुमाश्च जीव-**
**स्वरूपमङ्गादिकमाव(प)यन्ति ॥**

यतस्ते पुरुषा इत्यात्मत्वादित्यर्थः ॥ **इदानीं यथेति** । अस्मदादिवदित्यर्थः । ईश्वरादीनां पक्षतुल्यत्वान्न दोषः । पूर्वग्रहणेन, मुक्तिर्देहिनिष्ठा जीवावस्थात्वात् संसारवदित्यस्य ग्रहणम् । **जीवस्वरूपं** मुक्तजीवस्वरूपम् । **अङ्गं** शरीरम् । आदिपदेनेन्द्रियाणि । **आवयन्तीति** करणे कर्तृत्वोपचारः । आपयन्तीति क्वचित् पाठः ।

**परि०—** पुरुषपदस्य देहविशिष्टपरत्वे परस्यासिद्धिः साध्याविशेषो वा स्त्रीषु भागासिद्धिर्वेत्यत आह **आत्मत्वादित्यर्थ इति** ॥ **आपयन्तीति** । प्रापयन्तीत्यर्थः ॥ *साङ्ख्याद्यभिमतमोक्षस्यापुमर्थत्वोक्तिः ॥*

**यादु०— आत्मत्वादित्यर्थ इति** । अन्यथा मुक्तस्त्रीषु भागासिद्धिरिति भावः । ईश्वरादीनामित्यत्र आदिपदेन तमोगतानां प्रलयकालीनानां च ग्रहणम् ।

**वं०प०—** नन्वीश्वरस्याशरीरत्वेन शिरःकरादिरहितत्वात् तत्र पुरुषत्वहेतोर्व्यभिचार इत्यत आह **ईश्वरादीनामिति** आदिपदेन प्रलयकालीनानां ग्रहणम् । तत्रापि पुरुषत्वेन शिरःकरादियुक्तत्वसाधनान्न व्यभि-

चाराख्यदोष इत्यर्थः । यथाहुः । न हि पक्षे पक्षतुल्ये वा व्यभिचार इति ॥ **आवयन्तीति** । ज्ञापयन्ति । **आपयन्ति** प्रापयन्ति साधयन्तीत्यर्थः ।

**कं०रा०—** मुक्तिभाजः शिरःकराद्यैर्युक्ता इति प्रतिज्ञार्थे यतस्तेषु पुरुषा इत्यनेन यदि स्त्रीव्यावृत्तं पुरुषत्वं हेतुत्वेन विवक्षितं तदा मुक्तिभाक्त्वरूपपक्षतावच्छेदकाक्रान्तासु स्त्रीषु हेतोरभावाद्भागासिद्धिः । स्त्रीव्यतिरिक्तानामेव पक्षीकरणं च मुक्ताः शिरःकरादियुक्ताः न वेति सामान्यविप्रतिपत्त्यननुगुणत्वादयुक्तत्वम् । 'द्वाविमौ पुरुषौ लोक' इत्यादाविव पुरुषशब्दस्य चेतनपरत्वेन चेतनत्वं यदि हेतुत्वेन विवक्षितं तदा ज्ञातृत्वरूपचेतनत्वस्य मुक्तेषु परं प्रत्यसिद्धिरित्यतः पुरुषशब्देन स्त्रीपुंससाधारणात्मत्वजातिर्विवक्षितेत्याह **यतस्ते पुरुषा इत्याद्यात्मत्वादित्यर्थः इति** । न च वाच्यं परमते विभूनां मुक्तात्मनां परकीयशिरःकरादियोग्यस्य सिद्धत्वात् सिद्धसाधनतेति । शिरःकरादिशब्देन स्वभोगोपकरणशिरःकरादेर्विवक्षितत्वात् । परकीयस्य च अतथात्वेन सिद्धसाधनानवकाशात् । वर्तमानशिरःकरादियोगस्य सिद्धसाधनतातादवस्थ्यम् ॥ **मुक्तिर्देहिनिष्ठेति** । मुक्तिः स्वसमानकालीनदेहवन्निष्ठेत्यर्थः । तेन अमुक्तस्य प्राग्देहित्वेन मुक्तेर्देहिनिष्ठतायाः सिद्धत्वात् सिद्धसाधनमिति चोद्यं निरस्तम् ॥ **अवस्थात्वादिति** । आत्मनिष्ठावस्थात्वादित्यर्थः । तेन घटस्य श्यामत्वावस्था रक्तत्वावस्थेति व्यवहृतायां घटगतावस्थायां न व्यभिचारः ॥ **इत्यस्य ग्रहणमिति** । उपलक्षणमेतत् । आत्मीयचरमविशेषगुणध्वंसः स्वोत्पत्त्यनन्तरकालस्थितिमद्देहवन्निष्ठः आत्मगुणध्वंसत्वादिदानीन्तनात्मगुणध्वंसवत् उक्तध्वंसाधिकरणता स्वसमानकालीनदेहित्वे समानाधिकरणात्मगुणध्वंसाधिकरणतात्वादिदानीन्तनात्मगुणध्वंसाधिकरणतावदित्यनयोरपि ग्रहणं द्रष्टव्यम् । तेनानुमाश्चेति बहुवचनं युक्तम् । नन्वनुमाश्च जीवस्वरूपमङ्गादिकमावयन्तीति कर्तरि लकारोऽनुपपन्नः । अनुमानानां करणत्वेन कर्तृत्वाभावादित्यत आह **आवयन्तीति करणे कर्तृत्वोपचार इति** ॥ **आपयन्तीति क्वचित्पाठ इति** । तस्मिन्पाठे प्रापयन्ति ज्ञापयन्तीति पर्यवसितार्थ इति भावः ।

**शे०चं०— आत्मत्वादित्यर्थ इति** । अन्यथा मुक्तस्त्रीषु भागासिद्धिप्रसङ्गादिति भावः । नन्वीश्वरादीनां सत्यप्यात्मत्वे शिरःकरादिमत्त्वाभावात् तत्र व्यभिचार इत्यत आह **ईश्वरादीनामिति** । आदिपदेन तमोगतपरिग्रहः । मुक्तिभाज इति धर्मिनिर्देशानुसारात् सामान्यशब्दोऽपि विशेषपर इत्याह **जीवस्वरूपमिति** । अनुमायाः करणत्वेन कर्तृत्वाभावादावयन्तीति कर्तृत्वनिर्देशानुपपत्तिरित्यत आह **करण इति** । अवान्तरव्यापारत्वतः कारकस्य करणत्वात् प्रधानक्रियायां करणत्वेऽप्यवान्तरव्यापारं प्रति कर्तृत्वात् तद्विवक्षया युक्तः कर्तृत्वनिर्देश इति भावः ॥ **पाठ इति** । तत्रापि चेयमेव गतिरनुसन्धेयेति भावः ।

**स०व्र०—** नन्वात्मत्ववत्यपीश्वरे शिरःकराद्यभावात् व्यभिचार इत्यत आह **ईश्वरादीनामिति** । आदिपदेन पराभ्युपगतशिरआदिरहितयोगिपरामर्शः ।

**॥ इति अनुमानेनापि मुक्तानां देहवत्त्वसिद्धिः ॥**

**॥ इति मुक्तेषु विषयभोगसमर्थनम् ॥**

॥ अथ अन्योक्तमोक्षस्वरूपनिराकरणम् ॥

॥ अथ भास्कराद्यभिमतजीवब्रह्मैक्यलक्षणे मोक्षे प्रमाणाभावः ॥

११९ **सु०**— एवं साङ्ख्यादिमतमपाकृत्येदानीं ये प्राग् भिन्नस्य भिन्नाभिन्नस्य वा जीवस्य मुक्तौ परब्रह्मणाऽत्यन्तैक्यं भवतीति मन्यन्ते तेषां मतमपाकरोति **नेति** ।

अनु०— न ब्रह्मरूपत्वममुष्यदेहिनो
मुक्तावपि स्यात् प्रमया कथञ्चित् ।

**कथञ्चित्प्रमयेति** केनापि प्रमाणेनेत्यर्थः । श्रुतीनां प्रागन्यथाव्याख्यातत्वात् । यद्वा **कथञ्चित्** केनापि साधनेन न स्यात् कुतः । **प्रमया** मुक्तावपि भेदे प्रमाणसद्भावादित्यर्थः । तत्प्रमाणं पठति **स** इति ।

स ब्रह्मणा सहितोऽशेषभोगान्
भुङ्क्ते तथोपेत्य सुखार्णवं तम् ॥
यत्तत्परं ज्योतिरुपेत्य जीवो
निजस्वरूपत्वमवाप्य कामान् ।
भुङ्क्ते स देवः पुरुषोत्तमोऽज
आत्मेति चोक्तो गुणपूर्तिहेतोः ॥
सेतुः स देवोऽखिलमुक्तिभाजा-
मुतामृतस्येष्ट इहेशिता यत् ॥

अनेन 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिते'ति श्रुतिमुपादत्ते । **तथा**शब्दः श्रुतिसमुच्चये । उपेत्य इत्यनेन 'एतमानन्दमयमात्मानमुपसंक्रम्ये'ति । उपेत्य तथाऽशेषभोगान् भुङ्क्ते इति वा । यत्तदित्यनेन 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः स तत्र पर्येति जक्षन्क्रीडन्रममाणः', 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मे'ति श्रुतिद्वयम् । यः परं ज्योतिरुपसम्पद्यते स एवोत्तमपुरुष

आत्मेति चान्यथाप्रतीतिरर्थतः श्रुती पठतैव निराकृता । पराक्रान्तं चात्र सूत्रकृतैव 'अन्यार्थश्च परामर्श' इति । **गुणपूर्तिहेतोः** इति आत्मशब्दव्याख्यानं पुरुषोत्तमत्वस्य चोपपादकम् । **सेतुरित्यनेन** 'अमृतस्यैष सेतुरि'ति । **उतेत्यनेन** 'उतामृतत्वस्येशानो यदन्नेनातिरोहती'ति ।

उदाहृतवाक्यफलं दर्शयति इत्यादीति ।

**इत्यादिवाक्यैर्भगवद्वशः सन्**
**भुङ्क्तेऽखिलान् मुक्तिगतोऽपि भोगान् ॥**

'इति ज्ञायत' इति शेषः । **भगवद्वश इत्युपलक्षणम् । तत्समीपं प्राप्त इत्यपि ग्राह्यम् । अद्वैतिनो भोगं मन्यन्त इत्यतः सोऽप्यत्र वर्णितः ।**

**परि०— श्रुतीनामिति** । मुक्तावैक्यबोधकश्रुतीनां वियत्पादे पृथगधिकरणे तथा भक्तिपादे 'अत एव चोपमे'त्यत्र च स्थानैक्यमत्यैक्यपरत्वेन 'स्थानैक्यमैकमत्यं च मुक्तस्य तु विशेषत' इत्यादिना व्याख्यानादित्यर्थः । **प्रमयेत्यनुवादः मुक्तावपीत्यादि** व्याख्या ॥ **उपेत्य तथेति** । नेदं श्रुतिप्रतीकग्रहणं किन्त्वर्थोक्तिपरमिति भावः ॥ **अन्यार्थ इति** । अन्यार्थः = भगवदर्थः स उत्तमः पुरुष इति परामर्श इति दहराधिकरणस्थसूत्रार्थः ॥ **अमृतत्वमिति** । मुक्तवर्गस्येत्यर्थः । **अन्नेनान्नं** मर्त्यसंसारिणम् । **अतिरोहति** अतिक्रम्य वर्तते । 'मर्त्यमन्नं यदत्यगात्' इति प्राग्व्याख्यानात् । 'परं ज्योतिरुपसम्पद्य'त्यादिश्रुत्युक्तानुरोधायाह **तत्समीपं प्राप्त इति** । प्रस्तुताद्वैतिनं प्रति मुक्तौ भेदस्यैव वाच्यत्वात् भोगोक्तिरसङ्गता । भोगस्य चतुर्थपाद एव वक्तव्यत्वादित्यत आह **अद्वैतिन इति** ।

**यादु०— तत्समीपं प्राप्त इत्यपीति** ॥ उपसम्पद्येति श्रुतेरपि पूर्वमुदाहृतत्वादिति भावः । **सोऽप्यत्र वर्णित इति** । वस्तुतस्तु मुक्तौ भेदप्रतिपादनमेव प्रकृतसङ्गतमिति भावः । यदैक्यमिति बुद्ध्या विवेकप्रदर्शिनैक्यशब्दस्य नित्यसापेक्षत्वात् समास इति सूचितम् ।

**वं०प०—** श्रुतीनां 'परेऽव्यये सर्व एकीभवन्ती'त्यादीनाम् । मूले सुखार्णवं तमित्येतत् आनन्दमयमात्मानमित्यस्यार्थकथनमिति ज्ञातव्यम् । तथाशब्दः श्रुतिसमुच्चयार्थतया व्याख्यातः । इदानीं भोगान् भुङ्क्त इत्यस्य परामर्शक इत्यभिप्रेत्याह **उपेत्य तथाऽशेष इति** । सुखार्णवं तमुपेत्येत्यर्थः । 'इमान् लोकान्

कामान्नी'त्यादिनोत्तरत्र भोगोक्तेरिति द्रष्टव्यम् ॥ **आत्मेति चेति** । स एवोत्तमः पुरुष आत्मा जीव इत्यर्थः ॥ **अन्यार्थश्चेति** । यं प्राप्य जीवः स्वेन रूपेणाभिनिष्पद्यते स एष आत्मेति परमात्माऽर्थश्च परामर्श इति सूत्रार्थः ।

**कं०रा०**— ननु मुक्तौ जीवस्य ब्रह्माभेदे श्रुतय एव प्रमाणमित्यत आह **श्रुतीनामिति** ॥ **यः परञ्ज्योतिरिति** । परञ्ज्योतिरुपसम्पद्यते स एव आत्मेति द्वितीयश्रुतेरन्यथाऽर्थानुवाद इति द्रष्टव्यम् ॥ **अर्थतः श्रुती पठतैवेति** । यत्तत्परञ्ज्योतिरुपेत्य जीवो निजस्वरूपमवाप्य कामान् । भुङ्क्ते स देवः पुरुषोत्तमोऽज आत्मेति चोक्त' इत्यर्थतः श्रुतिद्वयं पठतैवाचार्येण उपसम्पत्तिकर्मभूतः परञ्ज्योतिरिति शब्दितः परमात्मैव स उत्तमपुरुष इत्यत्र एष आत्मेत्यत्र च परामर्शविषयो न तूपसम्पत्तिकर्तृभूतो जीव इति प्रदर्शितत्वादन्यथाऽर्थप्रतीतिर्निराकृतेति भावः । नन्वर्थतः श्रुतिद्वयं पठता आचार्येण एष आत्मेत्यादौ परमात्मपरामर्श इति प्रदर्शितं न तूपपादितमित्यत आह **पराक्रान्तं चेति** ॥ **अन्यार्थश्च परामर्श इति** । दहराधिकरणे गुणसूत्रे एष आत्मेत्यादौ परमात्मन एव परामर्शो न तु जीवस्येति विषये सूत्रकृतैव पराक्रान्तम्, अत आचार्येण नोपपादितमिति भावः । न च वाच्य-मेष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परञ्ज्योतिरुपसम्पद्येति पूर्ववाक्ये प्रथमान्तेन पुल्लिङ्गेनैतच्छब्देन प्रस्तुतस्य जीवस्य एष आत्मेत्युत्तरवाक्य एतच्छब्दे परामर्शो युक्तो न तु द्वितीयान्तेन नपुंसकलिङ्गेन परञ्ज्योतिरिति शब्देन प्रस्तुतस्य ब्रह्मण इति एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेत्युत्तरवाक्ये निरवकाशात्मश्रुतेरमृतत्वादिलिङ्गाच्च एष इति शब्देन परब्रह्मग्रहणस्याङ्गीकर्तव्यतया चैत्र आगतस्त्वं भो जयेत्यादाविव सर्वनाम्ना परामर्शो समान-विभक्तिकेन प्रस्तावो न प्रयोजकः किन्तु प्रस्तावमात्रं प्रयोजकमिति कल्पनीयत्वात् । एष इति पुल्लिङ्गं तु विधेयमात्मापेक्षम् । 'शैत्यं हि यत्सा प्रकृतिर्जलस्ये'त्यत्र तच्छब्दे स्त्रीलिङ्गतावत् णेरणौ यत्कर्म णौ चेत्स कर्तेत्यत्र तच्छब्देन पुल्लिङ्गतावत् 'एतत्सत्यं ब्रह्मपुरमेष आत्मे'त्यत्र एष इत्यस्य पुल्लिङ्गतावत् अस्मिन्नेव वाक्ये 'एतदमृतमभयमेतद्ब्रह्मे'त्यत्र एतच्छब्दस्य नपुंसकतावच्चेति गुणपूर्णार्थकत्वेनात्मशब्दस्य व्याख्यानं किमर्थं क्रियत इत्यत आह **पुरुषोत्तमत्वस्येति** । स उत्तमपुरुष इत्युक्तस्य पुरुषोत्तमत्वस्योपपादनार्थं तथा व्याख्यानं क्रियत इति भावः । अथवा गुणपूर्तिहितोरित्येतन्न केवलमात्मशब्दप्रवृत्तिनिमित्तमात्ररूपं किन्तु पुरुषोत्तमत्वस्योपपादकं चेत्यर्थः ।

**शे०चं०**— **प्राग्भिन्नस्येति** । प्रागत्यन्तभिन्नस्येत्यर्थः । प्रतिज्ञातार्थे प्रमाणाभावकथनपरत्वात् कथञ्चित्प्रमयेत्यस्य न वैयर्थ्यमित्याशयेन तदनूद्य व्याख्याति **कथञ्चिदिति** । ननु 'परेऽव्यये सर्व एकी-भवन्ती'त्यादिश्रुतीनामेव तत्र प्रामाण्यात् कथं तत्र प्रामाण्याभाव इत्यत आह **श्रुतीनामिति** ॥ **प्रागिति** । पृथगुपदेशादित्यधिकरणे 'सादृश्याच्च प्रधानत्वात् स्वातन्त्र्यादपि चाभिधामि'त्यादिनेति शेषः । बाधक-सद्भावोपदर्शकत्वाच्च न प्रमयेत्यंशस्य वैयर्थ्यमित्यभिप्रेत्य तथा तद्व्याचिख्यासुः कथञ्चिदित्येतत्प्रतिज्ञाशेषतया योजयति **यद्वेति** । स इत्यादि भाष्ये तथाशब्दो न श्रुतेरर्थानुवादः किन्तु श्रुतिसमुच्चयार्थ इत्याह **तथाशब्द इति** । उपेत्येत्येतावन्मात्रस्य श्रुत्यन्तरोपदर्शकत्वमङ्गीकृत्य तथाशब्दः श्रुतिसमुच्चयार्थतया व्याख्यातः । इदानीं स इत्यादि सम्पूर्णस्य भाष्यस्य श्रुत्यर्थानुवादकत्वमभिप्रेत्य 'इमाँल्लोकान् कामान्नी कामरूप्यनुसञ्चरन्नि'ति

उपेत्येत्येतत्सङ्गृहीतश्रुतिशेषार्थानुवादरूपतामभिप्रेत्य अशेषभोगान् भुङ्क्ते इति पूर्वप्रकृतपरामर्शकतया तथाशब्दं व्याचष्टे **उपेत्य तथा अशेषान् भोगान् भुङ्क्ते इति वेति** । यत्तत्परमित्यादिभाष्यं न केवलमर्थतः श्रुतिमात्रपरिग्राहकं किन्तु परकीयतच्छ्रुत्यपव्याख्याननिराकरणपरं चेत्यभिप्रेत्य अपव्याख्यानप्रकारोपदर्शनपूर्वकं तन्निरासेऽपि तद्व्यापारयति **य इत्यादिना** । नन्वियमन्यथाप्रतीतिरेव कुतः । यथावत्प्रतीतिरेव किं न स्यादित्यतस्तत्सूत्रकृता अस्यार्थस्य निराकृतत्वादित्याशयेन तन्निरासकं सूत्रं पठति **पराक्रान्तं चेत्यादि** । इह टीकायां पुरुषोत्तमत्वस्य चोपपादकमिति प्रायिकपाठः । पुरुषोत्तमत्वस्योपपादकमिति क्वाचित्कश्च । तत्राद्ये भाष्ये गुणपूर्तिहितोरित्यस्य वैयर्थ्यमाशङ्क्य श्रौतात्मशब्दव्याख्यानार्थत्वात् पुरुषोत्तमत्वस्योपपादकत्वाच्च न वैयर्थ्यमित्याह **गुणपूर्तिहितोरिति** इत्यवतारः कर्तव्यः । द्वितीये यथास्थितश्रुतियोजनाप्रदर्शनेनैवान्यथाव्याख्याननिरासासिद्धेर्गुणपूर्तिहितोरिति भाष्यकारीयश्रौतात्मशब्दव्याख्यानस्य वैयर्थ्यमाशङ्क्य तत्प्रयोजनमाहेति द्रष्टव्यम् ॥ **पुरुषोत्तमत्वस्य चोपपादकमिति** । अनेन श्रुतौ स उत्तमः पुरुष इत्युक्तं पुरुषोत्तमत्वं कुत इत्याकाङ्क्षायामात्मेत्युक्तम् । तत्कथमस्य गमकत्वमित्यतो भाष्यकृता आत्मशब्दो व्याख्यातः । ततश्चात्मशब्देनास्य पुरुषस्य गुणपूर्त्यभिधानात् युक्तमस्य पुरुषोत्तमत्वमित्युपपाद्योपपादकभावेन पदद्वययोजना सूचिता भवति ।

ज्ञापकश्चायमर्थो न कारक इत्याशयेनानुरूपं शेषमाह **इति ज्ञायत इति शेष इति** । ननु 'सोऽश्नुते सर्वान्कामानि'त्यादिवाक्यैर्भगवद्वशत्वस्येव 'एतमानन्दमयमात्मानमुपसङ्क्रम्य' इत्यादिभिः तत्समीपप्राप्तेरप्यभिहितत्वात् भगवद्वशत्वमात्रकथनं भाष्यकारीयमनुपपन्नमित्यतः अस्य तत्समीपप्राप्त्युपलक्षकत्वान्नानुपपन्नोपपत्तिरित्याशयेनाह **भगवद्वश इत्युपलक्षणमिति** । ननु भगवद्वशत्वतत्समीपप्राप्त्युक्तिमात्रेणैव मुक्तस्येश्वरभेदसिद्धेः तावदेव भाष्यकृता वक्तव्यम् । भोगकथनस्य तु कोपयोग इत्यत आह **अद्वैतवादिन इति** ।

**वा०र०**— अमुष्य देहिनो न ब्रह्मरूपत्वमित्येतावता पूर्तेः कथञ्चित्प्रमेयेत्यस्य वैयर्थ्यमित्यतो नायं स्वरूपनिषेधः । किन्तु प्रामाणिकत्वेन । तथा च प्रमाणेन ब्रह्मरूपत्वं नास्तीति साधकप्रमाणाभावप्रतिपादके वाक्ये साधकप्रमाणाभावरूपार्थोक्त्युपयोगितया तदुपस्थापनार्थत्वान्न वैय्यर्थ्यमित्याशयेन योजयति **प्रतिज्ञातार्थ इति** । एतेन केनापि प्रमाणेनेति मूलकृता कथंशब्दोत्तरचिच्छब्देन कथंशब्दीयाक्षेपशक्तेः प्रतिबन्धाश्रयणेन केनापि प्रमाणेन न ब्रह्मरूपत्वमित्येवार्थस्य सूचनात् कथञ्चित् प्रमेयेत्येतावन्मात्रस्य साधकप्रमाणाभावकथनपरत्वायोग इति शङ्का निरस्तेति ज्ञेयम् । **एकीभवन्तीत्यादीति** । आदिना तत्त्वमसीत्यादेर्ग्रहणम् । एवं साधकप्रमाणाभावकथनार्थतया कथञ्चित्प्रमेयेत्येतद्विशिष्टं योजयित्वा इदानीं कथञ्चिदित्येतावन्मात्रस्यैव साधकप्रमाणाभावप्रतिपादकत्वमित्याशयेन योजना ।

मूले **यद्वाक्यं कथञ्चिदितीति** । तर्हि प्रमेयेत्यस्य वैयर्थ्यमित्यतोऽस्य बाधकोपदर्शनार्थत्वान्न वैयर्थ्यमित्याशयेन तथा योजयितुं तदुत्थापयति । कुत इत्यादीत्येवं मनसि कृत्वाह **बाधकसद्भावेति** । न केवलं पूर्वयोजनायां साधकप्रमाणाभावोपदर्शकसिद्ध्यर्थं प्रमेयेत्यस्य न वैयर्थ्यं किन्तु केनापि साधनेन

न ब्रह्मरूपत्वमिति प्रतिज्ञाते कुत इत्याकाङ्क्षायां बाधकोपदर्शकत्वाच्च न वैयर्थ्यमित्यर्थः । **न श्रुतेरर्थ इति** । इतरांशवदिति भावः । **उपेत्येतावन्मात्रस्येति** । न तु तथाशब्दसहितस्येत्यर्थः । **सम्पूर्णस्येति** । तथाशब्दस्यापि श्रुतिगतार्थविशेषप्रतिपादकत्वादिति भावः । **उपेत्येत्येतदिति** । उपेत्येत्यनेन सङ्गृहीतार्थतोऽनूदिताया एतमानन्दमयमात्मानमिति श्रुतिः तस्याः यः शेषः इमाँल्लोकानित्यादिरूपः तदर्थानुवाद इत्यादि योजना । **न केवलमर्थतः श्रुतीति** । अर्थतः श्रुतिपरिग्रहमात्रपरं न भवतीत्यर्थः । **आद्येति** । पाठ इति परिणामेन वर्तते । **व्याख्यानार्थत्वादिति** । 'यच्चाप्नोति यदादत्त' इत्यादि प्रमाणादिति भावः । **उपपादकत्वाच्चेति** । उत्तरपाठयोजनायामेतत्स्पष्टम् । **इत्यवतारः कर्तव्य इति** । इति व्याख्येयमित्यर्थः ।

**॥ इति भास्करायभिमतजीवब्रह्मैक्यलक्षणे मोक्षे प्रमाणाभावः ॥**

* * *

**॥ अथ 'कालत्व'हेतुना मोक्षे ऐक्यनिराकरणम् ॥**

१२० सु०— अत्रानुमानमप्याह **कालोऽपीति** ।

अनु०— कालोऽप्यसौ नैक्ययुतः परेण
जीवस्य कालो यत एष यद्वत् ।
इत्यादिका अप्यनुमाः प्रमाणं
मुक्तौ च जीवस्य परत्वरोधे ॥

**असौ** मोक्षसम्बन्ध्यपि, जीवस्य परेण यदैक्यं तद्युतो न भवतीत्यर्थः । **कालो यतः** कालत्वात् । **एष यद्वत्** संसारकालवत् । **अनुमा अपि** । मुक्तावपि जीवस्य परब्रह्मत्वनिवारणे प्रमाणमस्ति, किं तत् अनुमा इति योजना । ये प्रागत्यन्तभिन्नस्य मुक्तावैक्यं वदन्ति । तेषामैक्यमिति परत्वमिति च यथाश्रुतं व्याख्येयम् । ये तु प्राग्भेदाभेदावुपेत्य मुक्तावत्यन्ताभेदमाहुः तान्प्रत्यैक्यादिशब्दोऽत्यन्ताभेदपरो व्याख्येयः । तथा च न दृष्टान्तदोषः । जीवशब्दश्च निष्कृष्टव्यक्तिविषयो वर्णनीयः । अन्यथा पुनर्दृष्टान्तदोषापत्तेरिति ।

परि०— जीवस्य परेणेत्येतदैक्यपदेनान्वेतीत्याह **जीवस्येत्यादिना** । नित्यसापेक्षत्वादैक्यपदस्य समास इति भावः । अपिपदान्वयोक्तिः **अनुमा अपीति** । प्रमाणशब्दस्य करणे

ल्युडन्तस्य विशेष्यनिघ्नतया प्रामाण्यं इति भाव्यमित्यतः उद्देश्यविधेयव्यत्यासेन योजनामाह **मुक्तावपीत्यादिना** ॥ विवृतमेतद्युक्तिपादे स्मृतिनये 'पिपीलिकालिपिश्चापि प्रमाणमि'त्यत्र ॥ **ऐक्यादिशब्द इति** । परत्वशब्द **आदिपदार्थः** । मुक्तिसम्बन्धी कालः, जीवपरात्यन्ताभेदयुतो न, कालत्वात् इदानीन्तनकालवदित्यनुमा जीवस्य परत्वरोधे परेणात्यन्ताभेदनिवारणे इत्येवं व्याख्येय-मित्यर्थः ॥ **दृष्टान्तदोष इति** । अभेदयुतो नेत्येवोक्ते संसारकाले भेदाभेदयुक्तत्वाङ्गीकारादभेदो नेति साध्यस्यासत्त्वात् साध्यवैकल्यमिति दोषो नेत्यर्थः । अत्यन्ताभेदाभावस्य तदानीमपि सत्त्वादिति भावः ॥ **निष्कृष्टव्यक्तीति** । अहङ्काराद्युपाधिपरिच्छिन्नोऽहंधीविषय इत्यर्थः ॥ **अन्यथेति** । विशेष्यभूतचेतनपरत्वे तस्य परेणैक्यं संसारकालेऽप्यस्तीति साध्यवैकल्यदोषः स्यादित्यर्थः । न चैवं मुक्तौ तादृशस्यैक्यानङ्गीकारात्सिद्धसाधनतेति शङ्क्यम् । तस्यैव उपाधिहीनस्य मुक्तौ जीवशब्देन ग्रहणादिति भावः ।

**गु०दी०— अन्यथा पुनर्दृष्टान्तदोषापाता**दित्यत्र इदानीमपि मुक्तजीवैक्यस्य परमते सत्त्वात् । इदानीन्तनजीवव्यक्तिः परैक्ययुतो न भवतीति साध्यनिष्कर्षः कर्तव्यः । तच्च परस्यापि सिद्धमिति दृष्टान्तदोषो न भवतीत्यर्थः । तर्हि सिद्धसाधनतेति न शङ्कनीयम् । अस्यापि मुक्तावैक्यं परेणाङ्गीक्रियते । सामान्यतोऽस्य जीवैक्यनिषेधे मुक्तजीवैक्यनिषेध इति कथं नानिष्टम् । यद्वा अनादौ संसारे तदा तदा संसारिव्यक्तेरैक्यनिषेधे-ऽथदिकस्याप्यैक्यं न सिद्ध्यतीति कथं नानिष्टमिति भावः ॥ १-४ ॥

**यादु०— इति योजनेति** । अन्यथा ल्युडन्तस्येध्मव्रश्चनः कुठार इत्यादौ विशेष्यनिघ्नतादर्शनिन प्रामाण्य इति स्यादिति भावः । यथा चैतत्तथोक्तं 'पिपीलिकालिपिश्चापि प्रमाणमि'त्येतद्व्याख्यावसरे ॥ **परत्व-मिति चेति** । परत्वशब्दस्यापि परमात्मतादात्म्यपरत्वादिति भावः ॥ **निष्कृष्टव्यक्तिविषय इति** । देहेन्द्रिया-द्युपाधिपरिच्छिन्नचेतनांशरूपव्यक्तिविषय इत्यर्थः । न चैवं सिद्धसाध्यता उपाधिपरिच्छिन्नचेतनांशस्य मुक्तौ परेणात्यन्ताभेदानङ्गीकारादिति वाच्यम् । यः पूर्वमुपाधिपरिच्छिन्न आसीत् तस्यैव चेतनांशस्य जीवशब्देन ग्रहणमित्याशयात् ॥ **अन्यथेति** । जीवशब्दश्चेतनमात्रविषयो यदीत्यर्थः ॥ **पुनर्दृष्टान्तदोषेति** । जीवशब्दस्य चेतनमात्रपरत्वे परिच्छेदशून्यचेतनस्यापि चेतनत्वप्राप्त्या तत्र ब्रह्मात्यन्ताभेदस्य संसारकालेऽपि सत्त्वेन तन्निषे-धासम्भवात् । साध्यवैकल्यरूपदृष्टान्तदोषः पुनः स्यादित्यर्थः । यद्वा जीवशब्दो देवदत्तादिरूपैकजीवव्यक्तिपरतया वर्णनीयः । अन्यथा संसारकाले प्राचीनमुक्तजीवस्य ब्रह्मात्यन्ताभेदमादाय पुनः साध्यवैकल्यं स्यादित्यर्थः । अथवा निष्कृष्टशब्दः शरीराद्यविशिष्टशुद्धचैतन्यपरः । अवर्णनीय इति पदच्छेदः । तथा च जीवशब्देन शरीरा-द्यसंयुक्तशुद्धचैतन्यमात्रविवक्षायां चैतन्यमात्रस्य ब्रह्मात्यन्ताभिन्नत्वात् पुनः साध्यवैकल्यं स्यात् । अतस्तथा न व्याख्यातव्यमित्यर्थः ।

**वं०प०**— अनुमाऽपीति प्रतीकग्रहणम् । तद्योजयति **मुक्तावपीति** । अनुमा इत्युद्दिश्य प्रमाणत्वविधाने प्रामाण्य इति स्यादतो वेदाः प्रमाणमितिवत् प्रमाणमित्यनूद्य अनुमा इत्येतद्विधेयमिति भावेनाह **अनुमा इति योजनेति** ॥ **ये प्रागिति** । संसारे जीवेश्वरयोरत्यन्तभेदः मुक्तौ त्वभेद इत्येकं मतं, संसारे जीवेश्वरयोर्भेदाभेदौ मुक्तौ त्वत्यन्ताभेद इत्यपरं मतम् । जीवेश्वरयोः संसारे भेदाभेदौ मुक्तावपि भेदाभेदावेवेत्यन्यन्मतमिति भास्कराणां मतत्रयसद्भावादिति ज्ञेयम् । **परत्वं** परमात्माभेदः । ननु ये भास्करैकदेशिनः संसारे जीवेश्वरयोर्भेदाभेदावुपेत्य मुक्तावत्यन्ताभेदमाहुः तेषां मते दृष्टान्तभूते संसारकाले साध्यवैकल्यं स्यात् । जीवस्य यत्परेणैक्यं तद्युक्तत्वस्यैव सत्त्वादित्यत आह **ये प्राग्भेदाभेदावुपेत्येति** । तथा च जीवस्य यत्परेणैक्यं तद्युतो न भवतीति व्याख्येयम् । तथा च संसारकाले भेदाभेदसद्भावेनात्यन्तैक्ययुतत्वाभावरूपसाध्यसद्भावान्न साध्यवैकल्यरूपदृष्टान्तदोष इत्यर्थः । ननु जीवशब्दस्य चैतन्यमात्रपरत्वे भास्करमते जीवचैतन्यस्यापरिच्छिन्नत्वेनोपाध्यमवच्छिन्नजीवचैतन्यस्यापि जीवशब्देन प्राप्त्या जीवस्य परेण ब्रह्मणा यदत्यन्तैक्यं तद्युतत्वमेव संसारकालेऽप्यस्तीति साध्यवैकल्यं स्यादित्यत आह **जीवशब्दश्चेति** । **निकृष्टेति** । देहेन्द्रियाद्युपाधिपरिच्छिन्नचेतनांशो निष्कृष्टव्यक्तिशब्दार्थः । तथा च परिच्छिन्नचेतनांशरूपव्यक्तेर्ब्रह्मांशत्वेनांशिना परब्रह्मणा भेदाभेदसद्भावादृष्टान्तभूते संसारकालेऽपि जीवस्य यत्परैक्यं परिच्छिन्नचेतनांशरूपव्यक्तिविशेषस्य यत्परब्रह्मणाऽत्यन्तैक्यं तद्युतत्वाभावोऽस्तीति न दृष्टान्ते साध्यवैकल्यमित्यर्थः । न चैवं सिद्धसाधनता । उपाधिपरिच्छिन्नस्य चेतनांशस्य परेणात्यन्ताभेदानङ्गीकारेण यत्परेणात्यन्तैक्यं तद्युतत्वाभावस्य सिद्धत्वादिति वाच्यम् । यः पूर्वमुपाधिपरिच्छिन्न आसीत् तस्यैव चेतनांशस्य जीवशब्देन ग्रहणात् । तथा च मोक्षकामः यः पूर्वं उपाधिपरिच्छिन्न आसीत् तस्यैव चेतनांशस्योपाध्यपगमानन्तरं यत्परेणात्यन्तैक्यमुच्यते मुक्तौ भास्करेण तद्युतो न भवतीति । न चैतत्परस्य सिद्धमिति न सिद्धसाधनतेति द्रष्टव्यम् ।

**कं०रा०**— 'इत्यादिका अप्यनुमा' इत्यत्रापिशब्दस्य यथाश्रुतान्वयेऽनुमानान्तरसमुच्चयः प्रतीयते । स चायुक्तः । प्रागनुमानान्तरानुक्तेरित्यतोऽपिशब्दं भिन्नक्रमेण योजयति **अनुमा अपीति** । योजनयाऽपिशब्देन प्रागुदाहृतश्रुतिसमुच्चयः प्रतीयत इति भावः । अनुमा इति बहुवचनं प्रमाणमित्येकवचनम्, अतः कथं योजनेत्यत आह **मुक्तावपि जीवपरब्रह्मत्वनिवारणे प्रमाणमस्ति किं तत्प्रमाणमित्याकाङ्क्षायामनुमा इति योजनेति** । **ऐक्यमितीति** । 'कालोऽप्यसौ नैक्ययुत' इत्यत्र ऐक्यपदं मुक्तौ च जीवस्य परत्वबोध इत्यत्र परत्वपदं च यथाश्रुतं व्याख्येयम् । यथाश्रुतार्थपरतया व्याख्याने प्रागत्यन्तभिन्नस्य जीवस्य मुक्तावैक्यं वदतः प्रति दृष्टान्तदोषादेरभावादिति भावः ॥ **ऐक्यादिशब्द इति** । आदिपदेन परत्वं गृह्यते ॥ **तथाचेति** । कालोऽप्यसौ नैक्ययुत इत्यत्रैक्यशब्दस्यात्यन्ताभेदपरतया व्याख्याने प्राग्भेदाभेदावुपेत्य मुक्तावत्यन्ताभेदं वदतः प्रति संसारकालरूपदृष्टान्ते जीवब्रह्मात्यन्ताभेदयुतत्वाभावरूपसाध्यस्य सत्त्वात् दृष्टान्तस्य साध्यवैकल्यरूपदोषो नास्ति । ऐक्यशब्दस्य यथाश्रुतार्थपरत्वे तु प्राग्जीवस्य ब्रह्मणा भिन्नाभिन्नत्वमिति पक्षे संसारकालरूपदृष्टान्ते ऐक्ययुतत्वस्य सत्त्वेनैक्ययुतत्वाभावरूपसाध्याभावात् दृष्टान्तदोषः स्यादित्यर्थः । उपलक्षणमेतत् । परत्वशब्दस्य परब्रह्मात्यन्ताभेदपरतया व्याख्याने मुक्तौ च जीवस्य परत्वबोधे प्रमाणमस्तीति प्रतिज्ञाया मोक्षकाले जीवस्य

परेणात्यन्तैक्ययुतो न कालत्वात् संसारकालवदिति प्रमाणोपन्यासस्य च वैरूप्यलक्षणदोषो नास्ति । परत्वशब्दस्य यथाश्रुतार्थपरत्वे तु प्रतिज्ञाया मुक्तौ जीवस्य पराभेदनिवारणे प्रमाणमस्तीत्येवंपरत्वात् प्रमाणोपन्यासस्य च मोक्षकालो जीवब्रह्मात्यन्ताभेदयुतो न कालत्वात् संसारकालवदिति मुक्तौ जीवस्य परात्यन्ताभेदनिवारणे प्रमाणोपन्यासरूपत्वात् तयोर्वैरूप्यं स्यादित्यपि द्रष्टव्यम् ॥ **जीवशब्दश्चेति** । मुक्तिकालो जीवस्य परेणैक्ययुतो नेत्यत्र जीवशब्दो निष्कृष्टव्यक्तिविषयः । देवदत्तरूपव्यक्तिविशेषविषय इति वा यज्ञदत्तरूपविशेषविषय इति वा वर्णनीयम् । अन्यथा जीवशब्दस्य मुक्तिविशेषविषयत्वाभावे जीवसामान्यविषयत्वे बहुजीववादिपक्षे दृष्टान्तीकृतस्य संसारकालस्य मुक्तजीवेश्वरैक्यवत्त्वेन साध्यवैकल्यं स्यात् । जीवशब्दस्य व्यक्तिविशेषपरत्ववर्णने तु देवदत्तमुक्तिकालो देवदत्तस्य यत्परेणैक्यं तद्युतो न भवति कालत्वाद्यज्ञदत्तसंसारकालवदित्यादिरूपेणानुमानस्य पर्यवसितत्वाद्दृष्टान्तीकृतदेवदत्तसंसारकालादौ बहुजीववादिपक्षाश्रयणे मुक्तजीवान्तरस्य परेण यदैक्यं तद्युतत्वसत्त्वेऽपि देवदत्तपरब्रह्मैक्ययुतत्वाभावादेः सत्त्वान्न साध्यवैकल्यापत्तिरिति भावः ।

**शे०चं०**— कालोऽपीत्यपिशब्दस्य वैयर्थ्येन यथाश्रुतसम्बन्धाभावाद्भिन्नक्रमतया तं योजयति **असौ मोक्षसम्बन्ध्यपीति** । नित्यसापेक्षत्वात् देवदत्तस्य गुरुकुलमित्यादिवत् समास इत्यभिप्रेत्य प्रतिज्ञावाक्यार्थमाह **जीवस्येत्यादि** । अप्यनुमेत्यपिशब्दो भिन्नक्रम इत्याह **अनुमा अपीति** । ननु प्रमाणशब्दस्य भावसाधनस्य नित्यनपुंसकलिङ्गत्वेऽपि भावसाधनताया अनुमानानां लिङ्गांशे प्रमितिरूपत्वाभावेन सामानाधिकरण्यानुपपत्त्या असम्भवेन करणसाधनत्वावश्यंभावात् । करणसाधनस्य च तस्य विशेष्यनिघ्नत्वेन विशेष्यभूतानुमानलिङ्गवचनप्रसङ्गेन टिड्ढाणञित्यादिना ङीपि सति प्रामाण्य इति भाव्यत्वात् प्रमाणमिति नपुंसकैकवचनानुपपत्तिरित्यतो यदत्र प्रमाणमिष्टं ते वेदा इत्यादिवत् यदत्र प्रमाणमिष्टं ता अनुमा इति प्रमाणमुद्दिश्यानुमात्वस्यैवात्र विधानात् । उद्देश्यवाचकप्रमाणशब्दस्य नपुंसकत्वेऽप्यनियतलिङ्गस्यैव विधेयस्योद्देश्यसमानलिङ्गतानियमात् । प्रकृते च विधेयसमर्पकस्यानुमाशब्दस्य नित्यस्त्रीलिङ्गत्वेनोद्देश्यसमानलिङ्गत्वाप्राप्तेर्नानुपपत्तिरित्यभिप्रेत्य मौलपदानुवादपूर्वकमुद्देश्यविधेयभावेन योजनामुपदर्शयति **मुक्तावपीत्यादिना** । ननु संसारे भेदाभेदाङ्गीकारमते इदानीन्तनकालेऽप्यैक्यस्य सत्त्वाज्जीवस्य परेणैक्ययुतत्वाभावरूपसाध्यस्य तत्रासत्त्वाद् दृष्टान्ते साध्यवैकल्यमित्यत आह **ये प्रागिति** । भेद औपाधिकोऽभेदः स्वाभाविक इति भेदाभेदावुपेत्येत्यर्थः । ततश्च भेदाभेदवादिनं प्रत्यैक्याभावमात्रस्यासाधनात् । जीवस्तु परेणात्यन्ताभेदयुक्तो न भवतीत्येव साधनादिदानीन्तनकाले ऐक्यसद्भावेन तदभावाभावेऽपि अत्यन्ताभेदाभावरूपसाध्यसद्भावात् न दृष्टान्तस्य साध्यवैकल्यमित्याशयेनाह **तथा चेति** ॥ **निष्कृष्टेति** । देहेन्द्रियाद्युपाधिपरिच्छिन्नचेतनांशव्यक्तिवचन इत्यर्थः ॥ **अन्यथेति** । जीवशब्दस्य चेतनमात्रविषयत्व इत्यर्थः ॥ **पुनरिति** । जीवशब्दस्य चेतनमात्रपरत्वे परिच्छेदशून्यचैतन्यस्यापि तेन प्राप्त्या तस्य ब्रह्मात्यन्ताभेदस्य संसारकालेऽपि सत्त्वेन तन्निषेधाभावात् साध्यवैकल्यरूपो दृष्टान्तदोषः पुनरपि स्यादित्यर्थः ।

**वा०र०**— **भावसाधनताया इति** । असम्भव इत्युत्तरेण सम्बन्धः । **टिड्ढाण इतीति** । ल्युटष्टित्वादिति भावः । स्मृतिपादीयप्रमाणायां कृताविति भट्टवार्तिकप्रयोगोपपादनप्रकारो योज्योऽस्ति । **नपुंसक-**

**त्वेऽपीति** । नपुंसकत्वेऽपि नानुपपत्तिरिति सम्बन्धः । **न नपुंसकत्वापत्तिरित्यर्थः** । ननूद्देश्यसमानलिङ्गत्वापत्त्या विधेये कथं लिङ्गान्तरमित्यत उक्तं **अनियतलिङ्गस्यैवेत्यादि** । इत्यत आह **ये प्रागितीति** । इत्यतो यथाश्रुतमेतद्व्याख्यानं न सर्वविवक्षया किन्तु प्रागत्यन्तभेदवादिविवक्षयैव । प्राग्भेदाभेदमतविवक्षया तु सोपस्कारतया व्याख्यानान्तरमिति विवेकमाहेत्यर्थः । वक्ष्यमाणयादवप्रकाशोऽपि मुक्तेः प्राग्भेदाभेदसद्भावात्तन्मतसाङ्कर्यवारणाय मुक्तेः प्रागपि स्वाभाविकावेव भेदाभेदाविति यादवप्रकाशादिमतादेतन्मतं व्यावृत्त्यमाह **भेद औपाधिकोऽभेदः स्वाभाविक इति** । उलूखलेन कृतमितीति पाठः । टीकाकृता कृतमवधेयमिति पाठः । उक्तमिति पाठेऽप्ययमेवार्थः । **अवधारणविवक्षेति** । भवेत्स एवेत्यवधारणेत्यर्थः । **इत्युक्तानुमानेन चेति** । एतच्चानुमानं नान्यदन्यदित्येतद्व्याख्यावसरे उक्तं ज्ञेयम् । **पूर्वमतद्भूतस्येति** । पूर्वमित्येतददर्शनिनेत्यनेन सम्बध्यते । तेन दृष्टमिति भूतार्थानुवादो लभ्यत इति न दोषः । अत एवोत्तरत्रातद्भूतस्य तद्भावनिरासेत्येतावदेवोक्तम् । यद्वा पूर्वमित्यस्यावृत्तिस्वीकाराव्याप्तिकोटौ व्यभिचारस्थले च पूर्वत्वोक्तिरिति ज्ञेयम् । **किमिति तात्पर्यमिति** । सतेत्यस्य व्याप्तिकोटौ निक्षेपे तात्पर्यं किमितीत्यर्थः ।

**स०व्र०**— एकवचनान्तप्रमाणशब्दस्य तादृशानुमाशब्देन कथमन्वय इत्यत उद्देश्यविधेयभावेन तमाह **अनुमा अपीति** । ननु मुक्तिसम्बन्धी कालः, जीवस्य परैक्ययुतो न, कालत्वात्, इदानीन्तनकालवदित्यनुमाने दृष्टान्ते साध्यवैकल्यम् । संसारेऽपि भेदाभेदाङ्गीकारिमते तत्कालेऽप्यैक्यस्य सत्त्वात् जीवस्य परैक्ययुतत्वाभावरूपसाध्यस्याभावात् साध्यवैकल्यमित्यत आह **ये प्रागिति** । भेद औपाधिकः अभेदः स्वाभाविक इति भेदाभेदावुपेत्येत्यर्थः । तथा च भेदाभेदवादिनं प्रत्यैक्याभावमात्रस्यासाधनात् । जीवस्य परेणात्यन्ताभेदयुक्तो न भवतीत्येव साधनात् इदानीन्तनकाल ऐक्यमात्रसद्भावेऽपि अत्यन्तैक्याभावसद्भावान्न दृष्टान्तदोष इत्याह **तथा चेति** । नन्वेवमपि दृष्टान्तदोष एव । देवदत्तसंसारदशायामपि मुक्तयज्ञदत्तस्य परेण यदैक्यं तद्युतत्वस्यैव विद्यमानत्वेन तदभावरूपसाध्यस्य दृष्टान्ते अभावादित्यत आह **जीवशब्दश्च निष्कृष्टव्यक्तिविषय इति** । देवदत्तादिरूपनिष्कृष्टव्यक्तिविषय इत्यर्थः । तथाच देवदत्तसंसारदशायां देवदत्तस्य परेण यदैक्यं तद्युतत्वाभावो वर्तत एवेति न साध्यवैकल्यमिति भावः । जीवशब्दस्य चैतन्यमात्रपरत्वेन चैतन्यात्यन्ताभेदस्य संसारकाले सत्त्वात् । न च भेदाभेदवादिमतेऽपि कथं संसारेऽत्यन्ताभेद इति वाच्यम् । भेदाभेदवादिभिरपि संसारेऽभेदस्य स्वाभाविकताङ्गीकारेण चेतनात्यन्ताभेदस्य तत्रापि सद्भावेनात्यन्ताभेदाभावरूपसाध्यस्य तत्र अभावादित्यत आह **जीवशब्दश्चेति** । स्यादेतत् । यदि जीवशब्दश्चेतनमात्रपरः स्यात् । किं नाम उपाधिना निष्कृष्टा या ब्रह्मांशव्यक्तिः तत्पर एव । तथा च चेतनात्यन्ताभेदस्य संसारावस्थायां सद्भावेऽपि जीवस्य परेण साकं भेदाभेदयोरेव विद्यमानत्वेनात्यन्ताभेदस्याभावेन दृष्टान्तस्य साध्यविकलत्वासम्भवादिति भावः । अत्र च 'अत एव चोपमा' इत्येतदधिकरणीयं 'ईशाख्या समुदाये स्यादि'त्येतदनुव्याख्यानं जयतीर्थपूज्यचरणीयं ज्ञापकं बोध्यम् ।

**॥ इति 'कालत्व'हेतुना मोक्षे ऐक्यनिराकरणम् ॥१०५**

* * *

॥ अथ अनुमानान्तरेणापि 'जीवब्रह्मभेद'सिद्धिः ॥

१२१ सु०— स्वकीयमादिपदं व्याकुर्वन्ननुमानान्तरमाह **कथं चेति** ।

**कथं च यः पूर्वमसौ न पश्चात्**
**भवेत्स एवेत्यपि युक्तिमेति ।**

**यो** जीवः **पूर्वं** संसारे असौ परमात्मा न भवति, **असौ पश्चात्** मुक्तौ **स** परमात्मैव भवेदित्येतत् **कथं युक्तिमेति** । अनुपपन्नमित्यर्थः । अत्रापि पूर्ववन्मतभेदेन व्याख्यानं कर्तव्यम् । अत एव स एवेत्यवधारणम् । प्रयोगस्तु प्रागेव दर्शितः । अपिशब्दोऽनुमानसमुच्चये । अस्य व्याप्तिमुपपादयति **यत इति** ।

**यतो न दृष्टं यदभून्न पूर्वं**
**पश्चात्तदासेति कुतश्च किञ्चित् ॥**

**यतः** कारणात् **यत्किञ्चित्** घटादिकं वस्तु **पूर्वं** यत् घटादिकं **नाभूत्** । येन सता वस्त्वन्तरेणैकीभूतं न भवतीति यावत् । **तत् पश्चात् कुतश्चित्** कारणात् **तदास** तेनैक्यमापन्नमित्येतन्न **दृष्टम्** । न च दृश्यते नापि द्रक्ष्यते । तस्मादिति पूर्वेण सम्बन्धः । एतेन अदधिभूतस्य क्षीरस्य पश्चाद्दधिभावदर्शनात् व्यभिचार इत्यसङ्गतम् ।

परि०— असावित्यस्य आवृत्तिं परमात्मपरत्वं जीवपरत्वं चोपेत्य योजयति **जीव इति** । फलितमाह **अनुपपन्नमित्यर्थ इति** ॥ **मतभेदेनेति** । यो जीवः पूर्वं परेणाऽत्यन्तं भिन्नः असौ जीवः पश्चात्स परमात्मा भवेदिति कथं युक्तिमेतीत्यवधारणेन विना आद्यमते व्याख्यानम् । द्वितीयमते तु यः पूर्वं असावेव न, परमात्मैव न, परमात्मनात्यन्ताभिन्नो न, किन्तु भिन्नाभिन्नः । असौ जीवः पश्चान्मुक्तौ स एव परमात्मैव तेन परमात्मना अत्यन्ताभिन्न इति कथं युक्तिमेतीति व्याख्यानं कार्यमित्यर्थः ॥ **अत एवेति** । भेदाभेदमतस्याप्यत्र निराकार्यत्वादेवेत्यर्थः ॥ **प्रागेवेति** । युक्तिपादे भोक्त्रापत्त्यधिकरणे 'नान्यदन्यत्वमापन्नं क्वचिद्दृष्टं कथञ्चन । अतो जीवस्य न ब्रह्मभावः स्याद्धि कदाचने'त्येतद्व्याख्यावसरे जीवो न कालान्तरेण ब्रह्मणैक्यमापत्स्यते ततो भिन्नत्वादिति दर्शित

इत्यर्थः । यदित्यस्यावृत्तिमुपेत्य योजयति **यत्किञ्चिदित्यादिना** । तात्पर्यमाह **येन सतेति** । नासतेत्यर्थः । एवमर्थोक्तेः कृत्यमग्रे 'एतेने'त्यनेन स्वयमेव वक्ष्यति । यदिति श्रवणात् तदिति स्वयमेवाह **तत्पश्चादिति** ॥ **एतेनेति** । येन सतेत्यर्थकथनेनेत्यर्थः । क्षीरत्वसमये दध्नोऽसत्त्वान्नेदं व्यभिचारस्थलमिति भावः ॥ *भास्करादिमतनिरासः ॥*

**यादु०— मतभेदेनेति** । आद्यमतेऽवधारणं न विवक्षितम् । द्वितीयमते तु तदावश्यकमिति व्याख्येयमित्यर्थः ॥ **अत एवेति** । द्वितीयमतस्याप्यत्र निराकार्यतयाऽभिप्रेतत्वादेवेत्यर्थः ॥ **प्रागेवेति** । 'नान्यदन्यत्वमापन्नं क्वचिद्दृष्टमि'त्यनुव्याख्यावसरे जीवो न कालान्तरेऽपि ब्रह्मणैक्यमापत्स्यते ततो भिन्नत्वादिति दर्शित इत्यर्थः । अदधिभूतस्य क्षीरस्य पश्चाद्दधिभावदर्शनाद्व्यभिचार इत्यत आह **येन सतेति** । दध्नोऽपि कारणात्मना प्राक् सत्त्वादाह **वस्त्वन्तरेणेति** । तथा च सतोर्द्वयोर्मध्ये यत्पूर्वं यन्न भवति तत्पश्चादपि न भवतीति व्याप्तिरभिमतोऽतो न व्यभिचार इति भावः ॥ **एतेनेति** । येन सता वस्त्वन्तरेणेति विशेषणस्य विवक्षितत्वेनेत्यर्थः ।

**वं०प०— व्याख्यानं कर्तव्यमिति** । जीवो न कालान्तरेऽपि ब्रह्मणैक्यमापत्स्यते प्राक् ततो अत्यन्तभिन्नत्वात् इत्यनुमाने प्रागत्यन्तभिन्नस्य मुक्तावैक्यमिति मतानुसारेण स एव इत्यवधारणपरित्यागेन, स न भवेत्, अभिन्नो न भवेदित्येव व्याख्येयम् । ये तु संसारे भेदाभेदावुपेत्य मुक्तावत्यन्ताभेदमाहुः तान् प्रति स एवेत्यवधारणसाहित्येन व्याख्येयम् । अत्यन्ताभेदस्तु तदर्थ इति भेद इति भावः । ननु क्षीरत्वावस्थायां यत्क्षीरं येन वस्त्वन्तरेण दध्ना एकीभूतं न भवति तत्क्षीरं कुतश्चन आतञ्चनादेः कारणात् पश्चाद्दध्यासेति क्षीरे व्यभिचार इत्यत उक्तं **सतेति** । वस्त्वन्तरस्य दध्नः क्षीरतादशायामभावादित्यर्थः । दध्नोऽपि कारणात्मना क्षीरे सत्त्वात् पुनः क्षीरे व्यभिचार इत्यत उक्तम् **वस्त्वन्तरेणेति** । अनेन सतोर्द्वयोर्मध्य इति विशेषणं देयमिति सूचितं भवति । तथा च सतोर्मध्ये यत्पूर्वं यन्न भवति तत्पश्चादपि तन्न भवतीति व्याप्तिर्विवक्षिता अतो न क्षीरे व्यभिचार इति भावः । सता वस्त्वन्तरेणेति विशेषणदानेन क्षीरादौ व्याभिचारः परिहृत इति स्वयमेव दर्शयति **एतेनेति** ।

**कं०रा०— अत्रापीति** । कथं च यः पूर्वमसावित्यादिवाक्येऽपि ये प्रागत्यन्ताभिन्नस्य जीवस्य मुक्तावैक्यं वदन्ति तान्प्रति यो जीवः पूर्वं संसारेऽसौ परमात्मा न भवति असौ पश्चान्मुक्तौ स परमात्मा भवेदित्येतत्कथं युक्तिमेतीति व्याख्यानं कर्तव्यमित्यर्थः । कथं युक्तिमेतीति युक्तिविरोध उक्तः । तद्युक्तिप्रयोगप्रकारः कथमित्यत आह **प्रयोगस्त्विति** । 'भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवदि'त्यधिकरणे 'नान्यदन्यत्वमापन्नं क्वचिद्दृष्टं कथञ्चन । अतो जीवस्य न ब्रह्मभावः स्याद्धि कदाचने'त्येतद्ग्रन्थव्याख्यानावसरे जीवो न कालान्तरेऽपि ब्रह्मणैक्यमापत्स्यते प्राक् ततोऽत्यन्तभिन्नत्वात् । यःकश्चिद्यतोऽत्यन्तं भिद्यते नासौ कदाचित् तदैक्यमापद्यते यथा घटः पटेन जीवब्रह्मभेदः सतोर्भेदिनो न निवृत्तिमान् भेदत्वात् स्तम्भकुम्भादिभेदवदिति

प्रयोगप्रकारः प्रागेव दर्शित इति भावः ॥ **एतेनेति** । यद्येन सता वस्त्वन्तरेणैकीभूतं न भवतीत्यत्र सतीति विशेषणदानेनेत्यर्थः ।

**शे०चं०**— आसेत्यस्य प्रतिपदं **भवेदिति** । मौलस्यासेत्यस्य व्युत्पादनं तु 'यथा द्रौणेरुलूकेन कृतमप्यास बोधकमि'ति युक्तिपादीयानुव्याख्याव्याख्यानावसरे टीकाकृतोक्तमवधेयम् ।

**पूर्ववदिति** । ऐक्यवादिनं प्रति प्रतिज्ञायामवधारणाविवक्षया भेदाभेदवादिनं प्रति च तत्र तद्विवक्षयेति पूर्ववदित्यर्थः ॥ **प्रयोगस्त्विति** । जीवो न कालान्तरेऽपि ब्रह्मणैक्यमापत्स्यते प्राक्ततोऽत्यन्तभिन्नत्वात् । यः कदाचिद्यतोऽत्यन्तं भिद्यते नासौ कदाचिदपि तदैक्यमापद्यते । यथा घटः पटेनेति प्रयोगप्रकारो भोक्त्रापत्ते-रित्येतदधिकरणीय-'नान्यदन्यत्वमापन्नं क्वचिद्दृष्टं कथञ्चन । अतो जीवस्य न ब्रह्मभावः स्याद्धि कदाचने'त्येत-दनुव्याख्यानव्याख्यानावसरे, अयमत्र प्रयोग इत्यादिना दर्शित इत्यर्थः । **अनुमानसमुच्चय इति** । कथं च यः पूर्वमित्येतद्वाक्योक्तानुमानस्य 'कालोऽप्यसौ नैक्ययुतः परेणे'ति पूर्ववाक्योक्तानुमानेन, जीवब्रह्मणोर्भेदः सतो-र्भेदिनोः न निवृत्तिमान् भेदत्वात् स्तम्भकुम्भादिभेदवत् इति पूर्ववाक्योक्तानुमानेन च समुच्चय इत्यर्थः । पूर्वमत-द्भूतस्य तद्भावादर्शनिनोक्तनियमस्यातीते व्यभिचाराभावप्राप्तावपि वर्तमानानागतयोर्व्यभिचारः स्यादेवेत्यतोऽत्रातीते तन्निषेधस्य वर्तमानानागतयोरपि तन्निषेधोपलक्षणत्वान्न तत्राप्युक्तनियमस्य व्यभिचार इत्याशयेन व्याचष्टे **न च दृश्यत इत्यादि** । येन सता वस्त्वन्तरेणैकीभूतं न भवतीति किमिति तात्पर्यं वर्ण्यते । यद्घटादिकं वस्तु यत्पूर्वं वाऽभूदिति यथाश्रुतमेव किं न स्यादित्यत आह **एतेनेति** । येन सता वस्त्वन्तरेणेति विशेषणदानेनेत्यर्थः ।

**स०व्र०**— **प्रयोगस्त्विति** । द्वितीयस्य प्रथमे भोक्त्रापत्तेरित्यधिकरणे 'नान्यदन्यत्वमापन्नमि'त्यनु-व्याख्यानव्याख्यानावसरे 'अयमत्र प्रयोगः जीवो न कालान्तरेऽपि ब्रह्मणैक्यमापत्स्यते प्राक् ततो भिन्नत्वात् । यः कदाचिद्यतोऽत्यन्तं भिद्यते नासौ कदाचित्तदैक्यमापद्यते यथा घटः पटेन' इत्यादिना प्रयोगो दर्शित इत्यर्थः ॥ **एतेनेति** । येन सता वस्त्वन्तरेण एकीभूतं न भवतीति व्याख्यानेनेत्यर्थः ।

**॥ इति अनुमानान्तरेणापि 'जीवब्रह्मभेद'सिद्धिः ॥**

* * *

**॥ अथ यादवप्रकाशादिमतनिरासः ॥**

१२२ **सु०— एवं भास्करादिमतमपाकृत्य ये यादवप्रकाशादयः स्वभावत एव परमात्मना भिन्नाभिन्नो जीवः तस्य संसारे भेद एव व्यक्तः अभेदस्तु अविद्यादिना आवृतो वर्तते, मुक्तौ तु द्वावपि व्यक्तौ भवतः, इत्याचक्षते तेषां मतं अधुना निराकरोति न चेति ।**

**अनु०— न चैव मुक्तेन हरेः पृथत्त्व-**
**मैक्यं तथा स्यादिति युक्तिमेति ।**

**तथाशब्दः** समुच्चये । **इति च मतं युक्तिं नैवैतीति** सम्बन्धः । कुतः । उदाहृत-वचनानां भेदज्ञापकत्वेन अस्मन्मताविरोधित्वात् । अनुमानस्य च आद्यस्य अस्मान्प्रति असिद्धव्याप्तिकत्वात् । द्वितीयस्य च अतद्भूतस्य तद्भावनिरासहेतोः सिद्धसाधनत्वात् इत्यतः अनुमानान्तरमाह **यत इति** ।

**यतो न कुत्रापि भिदाभिदा च**
**दृष्टा चितश्चेतनया कुतश्चित् ।**

**यतः** कारणात् **चितश्चेतनया** चेतनस्य चेतनेन **भिदाभिदा च कुत्रापि** देशे **कुतश्चित्** प्रमाणात् **न दृष्टा** इत्यनेन जीवेश्वरौ न भिन्नाभिन्नौ चेतनत्वात् देवदत्तयज्ञदत्तवत् । ईश्वरो जीवेन भिन्नाभिन्नो न भवति चेतनत्वात् यज्ञदत्तवदित्याद्यनुमानं सूचितम् ।

**परि०—** मुक्तावपि भेदाभेदवादी शङ्कते **कुत इत्यादिना** । कुतोऽस्मन्मतमयुक्तम् । भवदुक्तवचनानां अनुमानयोश्च भेदाभेदवादिनो ममाविरोधादित्युपपादयति **उदाहृतेति** । 'न वर्तते यत्रे'त्यादिवचनानां भेदज्ञापकत्वात् । भेदस्य च मन्मते मुक्तावपि सत्त्वादिति भावः ॥ **आद्यस्येति** । 'कालोऽप्यसौ नैक्ययुतः परेण जीवस्ये'त्यत्रोक्तस्येत्यर्थः ॥ **असिद्धव्याप्तिकत्वादिति** । संसारकालेऽप्यभेदस्य सत्त्वादिति भावः ॥ **द्वितीयस्य चेति** । 'कथं च यः पूर्वमसौ न पश्चात्' इत्यत्राभिमतस्य भोक्त्रापत्तिनयोक्तस्येत्यर्थः ॥ **सिद्धसाधनत्वादिति** । पूर्वं भिन्नाभिन्नस्य पश्चादपि तथैवोपगमनेनातद्भूतस्य तद्भावानभ्युपगमादिति भावः ।

**यादु०—** शङ्कते **कुत इत्यादिना** ॥ **अनुमानस्य चेति** । मोक्षसम्बन्धी कालो जीवस्य परेण यदैक्यं तद्युतो न भवति कालत्वात् संसारकालवदित्याद्यनुमानस्येत्यर्थः । अत्र यथाश्रुतमेव साध्यं विवक्षितं नैक्य-शब्दोऽत्यन्ताभेदपरो व्याख्येयः । तथात्वे एतन्मते सिद्धसाध्यताप्रसङ्गात् । दृष्टान्ते साध्याभावेनासिद्धव्याप्ति-कत्वमुपपन्नमिति ध्येयम् ॥ **द्वितीयस्य चेति** । जीवो न कालान्तरेऽपि ब्रह्मणैक्यमापत्स्यते । प्राक् ततो भिन्न-त्वादिति द्वितीयानुमानस्येत्यर्थः ॥ **अतद्भूतस्येति** । पूर्वमत्यन्ताभेदशून्यस्येत्यर्थः ॥ **तद्भावनिरासहेतोरिति** ।

तदत्यन्ताभेदनिरासहेतोरित्यर्थः । ततश्च प्राक् ततो भिन्नत्वादित्यस्य प्राक् तदभेदशून्यत्वादित्येवार्थो वर्णनीयः । यः पूर्वमसौ नेति मूलस्वारस्यात् । भेदाभेदवादिमते भिन्नेऽप्यभेदाङ्गीकारेण अप्रयोजकत्वप्रसङ्गाच्च । न च असिद्धिः । तन्मते पूर्वमप्यभेदसद्भावात् । अतः पूर्वमत्यन्ताभेदशून्यत्वात् पश्चादत्यन्तमैक्यं नेत्येव साधनीयम् । तथा च सिद्धसाधनत्वमित्यर्थः ।

**वं०प०**— शङ्कते **कुत इत्यादिना** । कुत इत्यनन्तरं मुक्तिं नैतीति वर्तते । सोऽश्नुत इत्याद्युदाहृतवचनविरोधस्तावदस्मन्मते नास्तीत्युपपादयति **उदाहृतेति** ॥ **आद्यस्येति** । मोक्षकाले जीवस्य यत्परेणैक्यं तद्युतो न भवतीति साधने संसारकाले भेदाभेदाङ्गीकारेण दृष्टान्ते साध्यवैकल्यापत्त्या अस्मान्प्रत्यसिद्धव्याप्तिकत्वादित्यर्थः ॥ **अतद्भूतस्येति** । पूर्वमत्यन्ताभेदशून्यस्य तदत्यन्ताभेदानिरासहेतोः प्राक् ततोऽत्यन्तभिन्नत्वादित्यस्येत्यर्थः । जीवो न कालान्तरे ब्रह्मणाऽत्यन्तैक्यं आपत्स्यते । प्राक् ततोऽत्यन्तभिन्नत्वादित्यनुमानस्य सिद्धसाधनता । मुक्तौ भेदाभेदाङ्गीकारात् । संसारेऽपि भेदाभेदाङ्गीकारेण प्राक् ततोऽत्यन्तभिन्नत्वहेतोः स्वरूपासिद्धिश्च स्यादित्यपि द्रष्टव्यम् ।

**कं०रा०**— **कुत इति** । 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिते'त्यादिवचनानां मुक्तौ भेदज्ञापकत्वेन मुक्तावपि भेदाभेदाविति मन्त्रप्रत्ययविरोधित्वात् । कालोऽप्यसौ नैक्ययुत इत्याद्यस्यानुमानस्य संसारकालेऽपि जीवो ब्रह्मणा भिन्नाभिन्न इति वदतोऽस्मान्प्रत्यसिद्धव्याप्तिकत्वात् 'कथं च यः पूर्वमसौ न पश्चादि'त्युक्तस्य द्वितीयस्य अतद्भूतस्य अतद्भावनिरासहेतोर्जीवस्य संसारे मुक्तौ च ब्रह्मणा सह भेदाभेदाविति वदता प्रागतद्भूतस्य पश्चात् तद्भावो नास्तीत्यस्याङ्गीकृतत्वेन सिद्धसाधनत्वात् मुक्तेन हरेः पृथक्त्वमैक्यं च स्यादिति मतं च युक्तिं नैवेतीत्येतत् कुत इत्यतः तन्मतनिरासकमनुमानान्तरमाहेत्यर्थः ॥ **देवदत्तयज्ञदत्तवदिति** । न च वाच्यं देवदत्तयज्ञदत्तयोः स्वगतद्वित्वसङ्ख्यया सह भिन्नाभिन्नत्वात् दृष्टान्तस्य साध्यवैकल्यमिति । परस्परं भिन्नाभिन्नौ नेति साध्यस्य विवक्षितत्वात् । अत एव जीवेश्वरयोः स्वगतद्वित्वेन भिन्नाभिन्नत्वाद्बाध इत्येतदपि निरस्तम् । न च वाच्यं देवदत्तेन सह भिन्नाभिन्नं यद्ब्रह्म तेन सह भिन्नाभिन्नस्य यज्ञदत्तस्य देवदत्तेन सह भिन्नाभिन्नत्वमावश्यकमिति तद्दोषतादवस्थ्यमिति । घटेन सह भिन्नाभिन्ना या घटपटगतद्वित्वसङ्ख्या तया सह भिन्नस्य घटस्य पटेन सह भिन्नाभिन्नत्वाभावेन व्याप्त्यभावात् । उक्तं च समयपादे 'नैकत्वसङ्ख्याया आश्रयेण भिन्नाभिन्नत्वम् । सा च अपेक्षाबुद्धिजन्यत्वात् अयावद्द्रव्यभाविनी भिन्नाभिन्ने'ति । न च वाच्यमेकस्मिन् देवदत्ते चेतनत्वादिति हेतुरस्ति परस्परशब्दार्थविशेषितं साध्यं तु तत्र दुरुपपादमिति कथमस्य व्याप्तिग्रह इति । परस्परशब्दार्थस्य प्रतियोगिकोटिविशेषणपरतया परस्परभिन्नाभिन्नत्वेन प्रसिद्धं यत्खण्डितगुणादिकं तदन्यत्वस्यैकस्मिन्देवदत्ते स्वोपादानगोचरजन्यकृतिजन्यघटाद्यन्यत्वस्य क्षित्यादाविव सुग्रहत्वेन व्याप्तिग्रहणोपपत्तेः चेतनाचेतनसाधारणवस्तुत्वादेरेव हेतुकरणे घटतद्गतरूपादिषु व्यभिचारः स्यात् अतः चेतनत्वरूपविशेषस्य हेतूकरणम् । वस्तुतस्तु चेतनयोर्भावश्चेतनत्वमिति चेतनद्वयरूपत्वं हेत्वर्थत्वे विवक्षितम् । तेनैकस्मिन्देवदत्ते स्वगतेन खण्डितगुणेन सह भिन्नाभिन्नत्वस्य सत्त्वेन तदभावरूपसाध्याभावः । तथाश्रुतहेतोस्तु

सत्त्वाद्व्यभिचार इति दूषणमनवकाशम् । अत एव देवदत्तयज्ञदत्तवदिति द्वयोर्दृष्टान्तीकरणम् । उत्तरानुमाने देवदत्तयज्ञदत्तवदिति दृष्टान्तीकरणं तु देवदत्तयज्ञदत्तादिषु सर्वेषु चेतनेषु साध्यसाधने सहचरिते । अतो व्याप्तिरविकलेति सूचयितुं न त्वेकस्य दृष्टान्तीकरणानुपपत्त्या न च वाच्यमेकस्मिन्देवदत्तेन अभेदस्य जीवान्तरेण भेदस्य च सत्त्वेन जीवेन सह भिन्नाभिन्नो न भवतीति । साध्यस्य निरूपितौ यौ भेदाभेदौ तद्वत्त्वाभावस्य साध्यत्वेन विवक्षितत्वात् । तस्य चैकस्मिन्देवदत्तेऽपि सत्त्वात् । न चैवमीश्वरस्यैकजीवनिरूपितभेदाभेदाभावमात्रं सिद्ध्येन्न तु सर्वैर्जीवैर्भिन्नाभिन्नत्वाभाव इति वाच्यम् । एकैकजीवप्रतियोगिका यावन्तो भेदाभेदास्तद्वत्त्वाभावस्य साध्यतयेश्वरस्य सर्वैर्जीवैर्भिन्नाभिन्नत्वाभावस्य सिद्ध्युपपत्तेः ॥ **इत्याद्यनुमानमिति** । आदिशब्देन जीवा ईश्वरेण भिन्नाभिन्ना न भवन्ति चेतनत्वादीश्वरस्वरूपांशमत्स्यकूर्मादिवदित्यनुमानं गृह्यते ।

**शे०चं०— समुच्चय इति** । पूर्वं निरस्तभास्करादिमतेन सहास्य मतस्य समुच्चय इत्यर्थः । उक्तमर्थमाक्षिपति **कुत इति** । इति च मतं युक्तिं नैवैतीत्येतत् कुत इत्यर्थः । किं श्रुतिविरुद्धत्वादुत 'कालोऽप्यसौ नैक्ययुत' इति पूर्वानुमानविरुद्धत्वात् किं वा 'कथं च यः पूर्वमसावि'त्युक्तानुमानविरुद्धत्वादिति विकल्पान्मनसि निधाय आद्यं दूषयति **उदाहृतेति** । 'सोऽश्नुते सर्वान्कामान्सहे'त्यादीनामित्यर्थः । द्वितीयं प्रत्याह **अनुमानस्य चेति** । दृष्टान्तीकृतेनेदानीन्तनकालेऽपि जीवस्य परैक्यसद्भावेन तदभावरूपसाध्यासिद्ध्या दृष्टान्ते साध्यवैकल्येनाद्यानुमानस्याभासत्वादित्यर्थः । न च अत्यन्ताभेदाभावस्य साध्यत्वेनाभेदाभावमात्रस्यासाध्यत्वात् अभेदसद्भावेन तदभावाभावेऽपि भेदाभेदवादिना अत्यन्ताभेदानभ्युपगमेन तदभावरूपसाध्यस्य दृष्टान्ते सद्भावान्न साध्यवैकल्यमिति वाच्यम् । संसारे भेदाभेदावुपेत्य मुक्तावत्यन्ताभेदवादिनः प्रति तत्साधनावसरेऽपि संसार इव मुक्तावपि भेदाभेदावभ्युपगच्छतो *यादवप्रकाशादीन्* प्रति अत्यन्ताभेदाभावसाधने सिद्धसाधनत्वप्रसक्त्यैक्याभावमात्रस्यैव साध्यत्वावश्यम्भावेन दृष्टान्ते साध्यवैकल्यस्य वज्रलेपत्वादित्याशयात् । न तृतीय इत्याह **द्वितीयस्य चेति** । 'प्राक्ततोऽत्यन्तभिन्नत्वादि'ति तृतीयानुमानस्येत्यर्थः । सिद्धसाधनतामुपपादयति **अतद्भूतस्येति** । पूर्वमत्यन्ताभेदशून्यस्येत्यर्थः । **तद्भावनिरासहेतोरिति** । तदत्यन्ताभेदनिरासहेतोरित्यर्थः । सिद्धसाधनत्वादित्युपलक्षणम् । प्राक्ततोऽत्यन्तभिन्नत्वाभावेन हेत्वसिद्धिश्चेत्यपि द्रष्टव्यम् । यद्वा हेत्वसिद्धेरत्र वक्तुं शक्यत्वेऽपि प्रथमप्राप्तत्वात् प्रतिज्ञाश्रयदोषस्य सिद्धसाधनत्वमात्रोद्भावनमिह टीकायां कृतमिति द्रष्टव्यम् ।

**वा०र०—** प्रतिज्ञाश्रयदोषस्य प्रथमप्राप्तत्वादिति पूर्वेणान्वयः । **सिद्धसाधनत्वमात्रेति** । प्रतिज्ञाभूतेति शेषः ।

**स०व्र०— अनुमानस्य चेति** । मुक्तिसम्बन्धी कालः जीवस्य परैक्ययुतो न, कालत्वात् इदानीन्तनकालवदिति प्रथमानुमानं नास्माकं परिपन्थि । असिद्धव्याप्तिकत्वेनाभासत्वात् । दृष्टान्तीकृतेदानीन्तनकालेऽपि जीवस्य परैक्यसद्भावेन दृष्टान्ते साध्याभावात् । ननु च नाभेदाभावमात्रं साध्यं किं नाम अत्यन्ताभेदाभाव एव । स च दृष्टान्तीकृतेदानीन्तनकालेऽपि विद्यत एव । संसारे भेदाभेदावङ्गीकुर्वता अत्यन्ताभेदस्यानभ्युप-

गमादिति चेत् । **सत्यमेतदिति** । ये संसारे भेदाभेदावङ्गीकृत्य मुक्तावत्यन्ताभेदमङ्गीकुर्वन्ति तान्प्रत्येवात्यन्ताभेदाभावसाधनावसरः । न तु यादवप्रकाशादीन् प्रति तैः संसार इव मुक्तावपि भेदाभेदयोरभ्युपगतत्वेन अत्यन्ताभेदानभ्युपगमात् तदभावस्य साधयितुमशक्यत्वेनाभेदाभावमात्रस्यैव साध्यत्वात् दृष्टान्ते साध्यवैकल्यमेवेति भावः ॥ **द्वितीयस्येति** । जीवो न कालान्तरे ब्रह्मैक्यमापत्स्यते प्राक् ततो भिन्नत्वादिति द्वितीयानुमानस्येत्यर्थः ॥ **सिद्धसाधनत्वादिति** । संसारे मुक्तौ च भेदाभेदावङ्गीकुर्वतां संसारे भिन्नस्य मुक्तावभेदो भवतीत्यनभ्युपगमात् प्राक् भिन्नत्वेन मुक्तौ भिन्नत्वाभावसाधनस्य सिद्धसाधनत्वप्रसङ्गादित्यर्थः ।

**॥ इति यादवप्रकाशादिमतनिरासः ॥**

* * *

**॥ अथ मोक्षवादोपसंहारः ॥**

१२३ सु०— मोक्षवादार्थमुपसंहरति **इत्थमिति** ।

## अनु०— इत्थं मतानि भ्रमजानि

**इत्थं** उक्तप्रकारेण जैनादिमतानि **भ्रमजानि** । उपलक्षणमेतत् । कानिचिद्विप्रलम्भजानि इत्यपि ज्ञेयम् । तस्माद्धेयानीति शेषः । ननु वक्तृणां क्वचिद्भ्रमः सम्भवत्येव । को दोष इत्यत आह **यस्मादिति** ।

**यस्मा-**

**न्मोक्षं समुद्देश्यमपि भ्रमेण ।**

**विदुर्न सम्यक्**

'मतानां प्रणेतार' इति शेषः । अप्राकरणिकं प्रसक्तानुप्रसक्त्यागतमर्थं कथञ्चिदन्यथा जानन्तोऽपि नातीव निन्द्या भवन्ति । एते तु प्रधानेन **उद्देश्यमपि मोक्षं सम्यङ् न विदुः**। किन्तु **भ्रमेण** वैपरीत्येन विदुः । तस्मात् तत्प्रणीतानि मतानि भ्रमजानीति सम्बन्धः ।

न च अतिसूक्ष्मप्रमेये अज्ञानविपर्ययौ एतेषां, किन्तु गोपालाविपालप्रमुखैः पामरैरपि सुविदित इत्याशयेनाह **यदपीति** ।

**यदपीह लौकिकाः**
**सुखं मम स्याद्धि सदेति जानते ॥**

**यत्** यस्मात् इह प्राणिषु **लौकिका** वैदिकबुद्धिरहिता अपि, **मे सदा सुखं स्यात् इति** स्वोद्देश्यं **जानते हि** । न तु वयमेव न भूयास्मेत्यादि । अतस्तेभ्योऽप्येते मन्दा इति। तदनेन प्रबन्धेन पादप्रतिपाद्यं सङ्गतिकथनं च समर्थितम् ॥

**परि०**— भगवदवतारादिसर्वज्ञकृतानां बौद्धशैवादिमतानां भ्रमजत्वाभावादाह **कानिचिदिति** । सुविदित इति सप्तम्यन्तम् । प्रमेये इत्यनुषङ्गः ॥ **वयमेव न भूयास्मेति** । मम सत्त्वं मा भूदिति स्वात्माभावमेवोद्देश्यं न जानत इत्यर्थः । इत्यादीति **आदिपदेन** मम क्लेशनिवृत्तिरेवास्तु सुखं मा भूदिति न जानत इति ग्राह्यम् ॥ **तदनेन प्रबन्धेनेति** । 'तत्र मोक्षस्वरूपं त्वि'त्यतोऽधस्तनग्रन्थेन पादप्रतिपाद्यं पादानां सङ्गतिं चोक्त्वा तत्स्थैर्याय 'तत्र मोक्षे'त्यादिना परमतानां हेयत्वोपपादनेन समर्थितमित्यर्थः ॥ *पादप्रतिपाद्यसङ्गतिसमर्थनम् ॥*

**यादु०**— **कानिचिदिति** । बौद्धपाशुपतादीनीत्यर्थः ॥ **पादप्रतिपाद्यमिति** । एतत्प्रकरणोपक्रमे 'भवेदेवं पादार्थः सङ्गतिश्चे'त्याक्षिप्तत्वादिति भावः ॥

**वं०प०**— **कानिचित्** बौद्धमतानि । **प्रसक्त्यनुप्रसक्त्यागतं** प्रसङ्गानुप्रसङ्गाभ्यामागतमर्थम् । **सुविदिते** प्रमेयेऽज्ञानविपर्ययाविति सम्बन्धः ॥ **वयमेवेत्यादि** । शून्यवाद्याद्युक्तप्रकारेणेत्यर्थः ॥ **तेभ्यः** वैदिकबुद्धिरहितेभ्यः ॥

**कं०रा०**— **उपलक्षणमेतदिति** । 'इत्थं मतानि भ्रमजानी'त्यत्र भ्रमजानीत्येतत्कानिचिद्बौद्धादिमतानि विप्रलम्भजानीत्यस्योपलक्षणम् । सर्वज्ञबुद्धादिप्रणीतानां तेषां भ्रमजत्वायोगादिति भावः । न तु वयमेव न भूयास्मेत्यात्महानं वा मम सुखं न स्यादिति सुखहानं वा स्वोद्देश्यं नैव जानते लौकिकाः शून्यवादिप्रभृतयस्त्वात्महानं पुरुषार्थं मन्यन्ते साङ्ख्यनैयायिकाद्यास्तु सुखं हानं पुरुषार्थं मन्यन्ते अतः लौकिकप्रवेदनीयार्थेऽपि भ्रमवत्त्वात् । मतान्तरप्रणेतारः पामरेभ्योऽप्यतिमन्दा इति भावः ॥ **तदनेन प्रबन्धेनेति** । भवेदेवं पादार्थः सङ्गतिश्च यदि भगवज्ज्ञानभोगाभ्यां निवृत्तसमस्तानिष्टकर्माणः स्वोत्तमप्रवेशेन ब्रह्मनाड्योत्क्रमणेन वा परित्यक्तदेहाः स्वोचितेनार्चिरादिना पथा वैकुण्ठलोकवासिनं भगवन्तं हिरण्यगर्भेण सह प्राप्ता भिन्नलिङ्गदेहा विध्वस्तप्रकृतयोऽत्यन्तनिवृत्तानिष्टाः सम्यगाविर्भूतानन्दादिगुणा भगवत्समीप एव तमुपासीनाः स्वरूपेण वा लीलागृहीतविग्रहैर्वा सङ्कल्पमात्रसाध्यान् दिव्यभोगांस्तारतम्येन भुञ्जाना न कदाचित्पुनरावर्तन्त इत्येतन्मोक्षस्वरूपं 'कर्मक्षय-

स्तथोत्क्रान्तिर्मार्गो भोगश्चतुष्टयमि'त्यादिनोक्तं निश्चितं स्यात् । न चैतन्निश्चितम् । तैस्तैर्वादिभिरन्यथा मोक्षस्वरूपस्य वर्णितत्वात् । विप्रतिपत्तौ च संशयस्य ध्रुवत्वादित्याशङ्कानिरासार्थं प्रवृत्तेन 'तत्र मोक्षस्वरूपं तु वादिनः प्रतिभासाश्रयात् । नाना वदन्ति पुंसां हि मतयो गुणभेदत' इत्यादिना 'इत्थं मतानि भ्रमजानी'त्यन्तेन प्रबन्धेन मतान्तराणां भ्रममूलकत्वस्य व्युत्पादितत्वेन 'कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोगश्चतुष्टयम् । फलं मोक्ष इति प्रोक्तः क्रमात्पादेषु चोदित' इति यत्पादप्रतिपाद्यं गतिकथनं तत्समर्थितमित्यर्थः ।

**शे०चं०**— बौद्धमतस्य भ्रमजत्वासम्भवात् तत्सङ्ग्रहायाह **उपलक्षणमेतदिति** । शिष्टं स्पष्टम् । **समर्थितमिति** । तत्तद्वाद्युक्तमोक्षस्वरूपनिराकरणपूर्वकं 'कर्मक्षयस्तथोत्क्रान्तिरि'त्यादिना स्वोक्तमोक्षस्वरूपसमर्थनेनेति शेषः ।

**स०व्र०**— बौद्धमतसङ्ग्रहायाह **उपलक्षणमेतदिति** ।

**॥ इति मोक्षवादोपसंहारः ॥**

* * *

**॥ अथ न्यायमालास्थलानि ॥**

१२४ **सु०**— इदानीमेतत्पादाधिकरणेषु पूर्वपक्षसिद्धान्तयुक्तीर्विवक्षुः प्रसङ्गात् सिंहावलोकनेन पूर्वपादद्वययुक्तिकथनपूर्वकमस्मिन्पादे चाह **औदार्यमिति** ।

**अनु०**— **औदार्यमुच्चावचशक्तिरात्म-**
**स्वरूपदार्ढ्यं च निजस्वभावः ।**
**स्वातन्त्र्यमापूर्णविशेषयोग्यता**
**विरोधहानिश्च चतुर्थपादे ॥**

**चतुर्थपादे** तृतीयाध्यायस्य । पूर्वपक्षयुक्तय इति शेषः ।

**व्यवस्थितिस्त्वविशेषस्थितिश्च**
**निषेधसामान्यविधिक्रियाणाम् ।**

**विभक्तता चात्वरयैव सिद्धि-**
**र्विपक्षसम्प्राप्तिवि(नि)रोधहेतवः ॥**

**विपक्षसम्प्राप्तिकृतां निरोधाः** । पूर्वपक्षसम्प्राप्तिं कुर्वन्तीनां युक्तीनां निवारका हेतवः ।

**विपक्षसम्प्राप्तिविरुद्धहेतव इति क्वचित्पाठः । तत्र सम्प्राप्तिशब्दः करणसाधनः ।**

**परि०— पूर्वपादद्वयेति** । ज्ञानपादकर्मक्षयपादयुक्तीत्यर्थः । पुरुषार्थोऽतः । औदार्यं पूर्वपक्षयुक्तिः **व्यवस्थितिः** सिद्धान्तयुक्तिः । एवमग्रेऽपि ॥ असार्वत्रिकी । **औदार्यं व्यवस्थितिः** ॥ नाविशेषात् । **उच्चावचशक्तिः अविशेषः** ॥ स्तुतयेऽनुमतिर्वा । **आत्मस्वरूपदार्ढ्यं** स्थितिः ॥ सर्वथाऽपि तु त एवोभयलिङ्गात् । **आत्मस्वरूपदार्ढ्यं स्थितिः** ॥ न चाधिकारिकमपि । **निजस्वभावः निषेधसामान्यविधिक्रियाणां विभक्तता** ॥ स्वामिनः फलश्रुतेः । **स्वातन्त्र्यं अत्वरयैव सिद्धिः** ॥ कृत्स्नभावात्तु । **आपूर्णविशेषयोग्यता, अत्वरयैव सिद्धिः** ॥ अनाविष्कुर्वन् । **आपूर्णविशेषयोग्यता अत्वरयैव सिद्धिः** ॥ ऐहिकमप्रस्तुतप्रतिबन्धे । एवं मुक्तिफलानियमः । **विरोधहानिः, अत्वरयैव सिद्धिः** ॥ ३,४ ॥

**गु०दी०—** 'पुरुषार्थोऽतः शब्दादिति बादरायण' इत्यधिकरणे ज्ञानिनामौदार्यात्सांसारिकफलानामतिशयेन त्यागित्वात् मोक्षादन्यफलेच्छाया एवासम्भवात्तदुक्तिः प्रशंसामात्रमिति **औदर्यमेव** पूर्वपक्षप्रापकम् । प्रायशो न सम्भवत्येव । सौभरिर्यद्वत् तद्वत् कस्यचित्सम्भवेच्चेत् ज्ञानेनैवाशेषमभीप्सितं भवतीति व्यवस्थोपपत्तेर्व्यवस्थितिरेव सिद्धान्तस्थापिका । यद्यपि सौभरिः प्रारब्धकर्मभोगार्थमेव कायव्यूहं सम्पादितवान् । तथापि एकदैव बहुतरकायव्यूहसम्पादनशक्तिः ज्ञानशक्त्यैवेति भावः ॥ ३-४-१ ॥

**असार्वत्रिकीत्यधिकरणे** सर्वेषां ज्ञानाधिकारोऽस्तु । तर्हि मध्यमाधमजीवानां कुतो न ज्ञानमिति चेन्न । अधिकारसाम्येऽपि यस्य शक्तिरुच्चा तस्य ज्ञानं जायते यस्य तु शक्तिरवचा तस्य ज्ञानं न जायते **इत्युच्चावचशक्तिरेव** पूर्वपक्षप्रापिका । सर्वेषां ज्ञानाधिकारे समे एकस्य उच्चा शक्तिः अन्यस्यावचा शक्तिरित्यविशेषः विशेषो न घटते । अतो यस्य सर्वदा शक्तिरवचा सोऽनधिकारीत्येव कल्प्यते । कदाऽपि फलाभावे अधिकारकल्पनाया व्यर्थत्वात् **इत्यविशेष** एव सिद्धान्तस्थापकः । स्पष्टत्वाद्वा शिष्यस्यैवोहापोहशक्त्युद्बोधनाय वा न्यायविवरणे नास्योपपादनम् ॥ ३-४-२ ॥

**नाविशेषादित्यधिकरणे** अधिकारे समेऽपि तेषामेवोच्चावचशक्तियोगात् फलभेदोपपत्तेः अधिकारविशेषकथनं व्यर्थमिति पुनरपि **उच्चावचशक्तिरेव** पूर्वपक्षप्रापिका । भक्त्याद्यधिकारानुसारेण शास्त्रात्फलप्राप्तेः

सर्वेषामविशेषात् दृश्यमानत्वाच्च भक्त्याद्यधिकारतारतम्यस्योच्चावचशक्तेरपि तन्निबन्धनत्वादिति **पुनरप्यविशेष** एव सिद्धान्तस्थापकः । उच्चावचशक्तेरपि तन्निबन्धनत्वादिति वदता पूर्वाधिकरणन्यायोऽपि सूचितः ॥ ३-४-३ ॥

**स्तुतयोऽनुमतिर्वेत्यधिकरणे** ज्ञानिनामात्मस्वरूपदार्ढ्यात् सत्प्रवृत्तिविपरीतप्रवृत्त्योर**विशेष इति आत्मस्वरूपदार्ढ्यमेव** पूर्वपक्षप्रापकम् । 'एतावतोऽधिका नास्ति प्राप्तिरित्यन्ततः स्थिता । या स्थितिः तां समाप्नोति यथाशक्तिप्रयत्नतः । विपरीतप्रवृत्तेस्तु तस्याः ह्रासोऽधिकंभवेदि'ति स्वयोग्यतानुसारेण **स्थितिरेव सिद्धान्तस्थापिका** ॥ ३-४-४ ॥

**सर्वथाऽपि तु त एवोभयलिङ्गादित्यधिकरणे** सर्वजीवानामेकप्रकार एव निजस्वभावश्चैतन्यमिति फले ज्ञानाख्यफलेऽप्यविशेष इति **निजस्वभावः** पूर्वपक्षप्रापकः । निषेधसामान्यविधिक्रियाणां विभक्तत्वात् 'नादेवो देवमन्विच्छेत् अन्विच्छन् यात्यधस्तम' इति । 'न देवः स्वीयं पदमिच्छन् विदुष्यति । तदेव हि अस्य स्वमि'ति निषेधविभागः । 'स्थिरं ज्ञानं स्थिरो हरावभिषङ्गः स्थिरमोजो बलं विराग एतद्धि सामान्यं देवानाम् । अन्येषामस्थिराण्येवैतानि सर्वाण्यथापि यथायोगं विनेयानी'ति सामान्यविभागः । ज्ञानदानमेव देवानां विहितम् । तप एव ऋषीणामाचार एव मनुष्याणां तदविरोधेनान्यानि करणीयानीति विधिविभागः । 'चरन्ति देवाः विहितं समस्तमर्धमेव मुनये दशांशतो मनुष्या' इति क्रियाविभाग इति निषेधसामान्यविधिक्रियाणां **विभक्ततैव** सिद्धान्तस्थापिका । यद्यपि सूत्रमर्यादया महोत्साहे कृतेऽपि त एवाधिकारिण एव ज्ञानं प्राप्नुवन्ति नानधिकारिण उभयलिङ्गात् 'य आत्माऽपहतपाप्मे'ति एकप्रकारोपदेशेऽपि आत्मा परमात्मा अपहतपाप्मेति इन्द्रेण तत्त्वज्ञानं प्राप्तम् । विरोचनेन तु आत्मा जीव एवापहतपाप्मत्वादिविशिष्टो ब्रह्मेति मिथ्याज्ञानं प्राप्तमित्युभयविधलिङ्गादधिकारिण एव ज्ञानं नानधिकारिण इति प्रतीयते । पूर्वपक्षस्त्वधिकारिणामनधिकारिणां च सर्वेषां ज्ञानप्राप्तिरिति । एवं **चासार्वत्रिकी**त्यधिकरणेन गतार्थता स्यादिति चेत् तत्र श्रुत्यैव सिद्धान्तः । अत्र तु श्रौतलिङ्गेनेति युक्तिविशेषकथनाय पुनरारम्भात् इत्येकः परिहारः । सर्वजीवानामेकप्रकार एव निजस्वभावः चैतन्यमिति वदता नाधिकार्यनधिकारिमात्रविषयमिदमधिकरणम् । किन्तु अधिकारिणां देवर्षिमनुष्यादीनामपि चैतन्यस्य एकस्वभावात् तत्रापि न वैचित्र्यमित्यभ्यधिकाशङ्कया पुनरारम्भ इत्यपरः परिहारः सूचितः । अत एव निषेधसामान्यविधिक्रियाणां विभक्ततेति सर्वसाधारण्येनैव स कृतः । 'नादेवो देवमन्विच्छेदि'ति वदता उभयलिङ्गादिति सिद्धान्तोऽपि वर्णितः ॥ ३-४-५ ॥

**न चाधिकारिकमपि पतनानुमानात्तदयोगादित्यधिकरणे** एकप्रकार एव निजस्वभावश्चैतन्यमिति वदता चेतनत्वाविशेषाद्यत्ने कृते सति भगवदैश्वर्यमपि प्राप्तुं शक्यते ब्रह्मादिपदमपि प्राप्तुं शक्यत इति **निजस्वभाव एव** पूर्वपक्षयुक्तिः सूचिता । **निषेधसामान्यविधिक्रियाणां विभक्तते**त्यत्र 'नादेवो देवमन्विच्छेदन्विच्छन् यात्यधरं तमः । न देवः स्वीयपदमन्विच्छन् विदूष्यती'ति निषेधविभक्ततया देवातिरिक्तऋषिमनुष्यादेः दैत्यादेश्च देवपदाकाङ्क्षामात्रेण तमःप्राप्तिश्रवणात् नेश्वरैश्वर्यादिकमन्यैरभ्यर्थनीयमिति **विभक्ततेति** सिद्धान्तयुक्तिरपि सूचिता । *न्यायविवरणे* तु शिष्यैरेवोह्यतामिति न पृथग्विवृतम् ॥ ३-४-६ ॥

**स्वामिनः फलश्रुतेरित्यधिकरणे** स्वातन्त्र्याद्देवानामेव ज्ञानादिफलं न किञ्चिदन्येषामिति **स्वातन्त्र्यमेव** पूर्वपक्षप्रापकम् । 'त्वरयैव मनुष्याणां सिद्धिरत्वरयैव तु । देवानां तत्प्रसादेन मुक्त्या एव सता नृणामि'ति मनुष्यमुक्त्यर्थमेव देवानामत्वरया सिद्धिश्रुतेरत्वरयैव सिद्धिः सिद्धान्तस्थापिका । मनुष्याणां परान्तकाले ब्रह्मणोऽल्पदिनेनैव सिद्धिर्भवति । अत एव त्वरयैव मनुष्याणामित्युक्तम् । अतस्तान् प्रेरयितुं तावत्पर्यन्तं तिष्ठासया शनैःशनैः प्रारब्धकर्मभुञ्जानास्तिष्ठन्ति । अत एव 'अत्वरयैव तु देवानामि'त्युक्तमिति भावः ॥ ३-४-७ ॥

**कृत्स्नभावात्तु गृहिणोपसंहार इत्यधिकरणे** गृहस्थानामशेषकर्मविशेषयोग्यत्वात् यज्ञाध्ययनदानादिष्वधिकारात्तपोमात्राधिकारिभ्यो यतिभ्योऽपि गृहस्थानामेवाधिक्यं मुक्ताविति आपूर्ण**विशेषयोग्यतैव** पूर्वपक्षप्रापिका । 'त्वरयैव गृहिणः साधयन्ति मुक्तिमत्वरयैव यतयस्तेभ्यश्चात्वरया देवास्तेषु च ब्रह्मे'त्यादिश्रुतेः 'यो हि त्वरया साधयेत् स मन्दं सुखमाप्नुयात् । योऽत्वरया स महदि'ति श्रुतेश्च गृहिभ्यो यतीनां तेभ्यो देवानामत्वरया सिद्धेः । अत्वरया साधकानामेवाधिक्यश्रुतेश्च यतीनामेवाधिक्यमिति **अत्वरयैव सिद्धिः** सिद्धान्तस्थापिका ॥ ३-४-८ ॥

**अनाविष्कुर्वन्नन्वयादित्यधिकरणे** आविष्कारेण कथनात् अशेषतोऽपि योग्याः ज्ञानिनो भवन्तीति आस्थानचत्वरादिषु स्थित्वैव प्रकथनीयमिति **आपूर्णविशेषयोग्यतैव** पुनः पूर्वपक्षप्रापिका । न ह्येवं त्वरमाणे सिद्धिर्भवति । अयोग्यानामपि श्रवणप्रसङ्गात् । तस्माद्विचार्य योग्यानामेवात्वरयैव कथितत्वात्सिद्धिर्भवति । 'त्यक्त्वा त्वरां ब्रह्मविद्यां वदेत जनाय योग्याय सदैव विद्वानि'ति **श्रुतेरत्वरयैव सिद्धिः** सिद्धान्तस्थापिका ॥ ॥ ३-४-९ ॥

**ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनादित्यधिकरणे एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेरित्यधिकरणे च** विरोधाभावात् साधनानुष्ठानजन्मन्येव अपरोक्षज्ञानं भवतीति **विरोधहानिः** प्रथमाधिकरणे पूर्वपक्षप्रापिका । अपरोक्षज्ञाने सति तदैव मुक्तिर्भवति विरोधाभावात् कारणे सति कार्यानुत्पादयोगाच्चेति **विरोधहानिरेव** द्वितीयाधिकरणे च पूर्वपक्षप्रापिका । 'यद्यारब्धं कर्मनिबन्धकं स्यात् प्रेत्यैव पश्येत् योगमेवान्ववेक्ष्ये'ति श्रुतेः प्रतिबन्धे सति तन्निरासेनात्वरयैव सिद्ध्युपपत्तेः अपरोक्षज्ञानाख्यसिद्ध्युपपत्तेरिति **अत्वरयैव सिद्धिः** पूर्वाधिकरणे सिद्धान्तस्थापिका । अपरोक्षज्ञानानन्तरमपि 'अनेकजन्मसंसिद्धस्ततो याति परां गतिमि'ति भगवद्वचनात् प्रारब्धकर्माख्यप्रतिबन्धे सति तन्निरासेन भोगेन तत्क्षपयित्वा अत्वरयैव मुक्त्याख्यसिद्ध्युपपत्तेरिति **अत्वरयैव सिद्धिः** द्वितीयाधिकरणेऽपि सिद्धान्तस्थापिका ॥ ३-४-१०,११ ॥

**आवृत्तिरसकृदुपदेशादित्यधिकरणे** श्रवणाद्यनावृत्त्याऽपरोक्षज्ञानोदये सर्वेषां सुशक्यत्वमिति गुण इति **सुशक्यतैव** पूर्वपक्षप्रापिका । महाफलत्वात् सर्वेषामशक्यताया एव उपपन्नत्वात् । अन्यथा सर्वसुशक्यस्यैव साधनतया सर्वेषां मोक्षोपपत्तिरिति **महाफलत्वमेव** सिद्धान्तस्थापकम् ॥ ४-१-१ ॥

**आत्मेति तूपगच्छन्ति ग्राहयन्ति चेत्यधिकरणे** शश्वदतिप्रसिद्धत्वादात्मशब्दोदितं स्वामित्वं न नित्यशः उपास्यमिति **शश्वदतिप्रसिद्धिरेव** पूर्वपक्षप्रापिका । अन्येभ्योऽधिकफलत्वेन सविशेषत्वात् प्रकर्षेण विविक्तत्वादिति यावत् । आत्मत्वस्येति **प्रविविक्ततैव** सिद्धान्तस्थापिका ॥ ४-१-२ ॥

**न प्रतीके न हि स इत्यधिकरणे** तर्हि विशेषवत्त्वादेव प्रतीकमपीश्वर इत्युपास्यमित्युक्तविध**विचाराख्यविवेक** एव पूर्वपक्षप्रापकः । यत्र सन्धिरुपपत्तिः सन्धीयते प्रमेयमनेनेति व्युत्पत्त्या सन्धिरुपपत्तिर्विद्यते । तस्यैव ग्राह्यत्वात् अन्यस्य ईश्वरत्वग्रहस्य मिथ्याज्ञानत्वादेवानुपपत्तेरिति **सन्धिग्रह एव** सिद्धान्तस्थापकः ॥ ॥ ४-१-३ ॥

**ब्रह्मदृष्टिरुत्कर्षादित्यधिकरणे** प्रतिदिनं विविधगुणन्यासेन मनसि न्यासाख्यध्यानेन भगवत्प्रीत्युपपत्तेर्न ब्रह्मतादृष्टिनियम इति **विन्यास** एव पूर्वपक्षप्रापकः । अशेषगुणान्तर्भाविनाशेषगुणानां ब्रह्मशब्दार्थेऽन्तर्भाविन तस्यैवाधिकसाधनत्वादिति **साधनमेव** सिद्धान्तस्थापकम् ॥ ४-१-४ ॥

**आदित्यादिमतयश्चाङ्ग उपपत्तेरित्यधिकरणे** विविधस्थानेष्वनन्तजीवचक्षुरादिस्थानेषु आदित्यानां चरणात् सञ्चरणात् विष्ण्वङ्गेष्वादित्यादिमतिनियमो नास्तीति **विविधचाराख्यविचार** एव पूर्वपक्षप्रापकः । **तत्कृतावेव कृत्यस्याप्तत्वात् आदित्यादीनाम्** । **आदित्यादीनां** तत्कृतौ विष्णोश्चक्षुराद्यङ्गेषु वयं वर्ताम इति ध्यानस्य कृतावेव **कृत्यस्य** कर्तव्यस्याप्तत्वात् विष्ण्वङ्गेषु ध्यानं कर्तव्यमित्या**प्तकृत्यमेव** सिद्धान्तस्थापकम् ॥ ॥ ४-१-५ ॥

**आसीनः सम्भवादित्यधिकरणे** ज्ञानस्य सम्यक् तद्विषयत्वमात्रेण पूर्तेरासनादिना न कार्यमिति **भगवद्विषयसमीचीनज्ञानाख्यसंज्ञैव** पूर्वपक्षप्रापिका । आसनादिना निश्चलत्वादिविशेषकार्योपपत्तेरिति **विशेषकार्यमेव** सिद्धान्तस्थापकम् ॥ ४-१-६ ॥

**आप्रायणात्तत्रापि हि दृष्टमित्यधिकरणे** अन्यस्यापि साधनस्य कर्तुं शक्यत्वान्न यावन्मुक्तिं ध्यानं कार्यमिति **नानाप्रवृत्तिरेव** पूर्वपक्षप्रापिका । ध्यानं विना अपरोक्षज्ञानाख्यविशेषकार्यानुपपत्तेरपरोक्षज्ञानपर्यन्तं कर्तव्यमित्यविवादम् । तदुपर्यपि ज्ञानिनां शुकादीनां ध्यानस्य दृष्टत्वात् विहितत्वमनुमीयते । न च फलाभावः ध्यानाभावे मुक्तावानन्दवृद्ध्याख्यविशेषकार्यानुपपत्तेरिति **विशेषकार्यमेव** सिद्धान्तस्थापकम् ॥ ४-१-७ ॥

**तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशावित्यधिकरणे** ज्ञानोदयेऽशेषकर्मक्षये कृतकृत्यत्वात् तदैव मुक्तिः । न चेत् प्रारब्धकर्मादिप्रतिबन्धाङ्गीकारे तदाऽपि नित्यनैमित्तिककर्मकरणसद्भावान्न कदाऽपि कर्मक्षय इति **कृतकृत्यतैव** पूर्वपक्षप्रापिका । प्रारब्धस्यैव कृतस्य यावद्भोगं संस्थितेस्तदा क्रियमाणपुण्यकर्मणां मुक्तावानन्दवृद्धिहेतुत्वेन मुक्त्यप्रतिबन्धकत्वात् । प्रामादिकपापस्य च अलेपादिति **कृतसंस्थितिरेव** सिद्धान्तस्थापिका ॥ ॥ ४-१-८ ॥

**वाङ्मनसि दर्शनाच्छब्दाच्चेत्यधिकरणे** 'वाक् पूर्वरूपम् । मन उत्तररूपम् । मनः पूर्वरूपम् । वागुत्तररूपमि'त्युक्तेर्व्यामिश्रत्वादनिर्णीतिरेव । कस्य कुत्र लय इत्यनिर्णीतिरेवेति **व्यामिश्रतैव** पूर्वपक्षप्रापिका । 'वाक् पूर्वरूपम् । मन उत्तररूपमि'ति वाचः पूर्ववर्णदेवतात्वनिर्देशमात्रेण सन्ध्यक्षरेषु पूर्ववर्णदेवतात्वेनैव पूर्वरूपत्वोक्तिः । न तु मनसः सकाशादपि पूर्वरूपत्वेन । यथाकथञ्चित्पूर्वरूपत्वमात्रेण मनस्साम्यम् । 'मनसा वा अग्रे सङ्कल्पयति । अथ वाचा व्याहरती'ति युक्तितो विशेषो मनःपूर्वकत्वस्यैव श्रुत इति प्राधान्यं मनस एव हि ज्ञायत इति विशेषसाम्ययोर्**विशेषश्रुतिरेव** सिद्धान्तस्थापिका । साम्यश्रुतेस्सावकाशत्वाद्विशेषश्रुतिरेव निर्णायिकेति भावः ॥ ४-२-१ ॥

**तन्मनः प्राण उत्तरादित्यधिकरणे** मनःपूर्वकत्वादिनियमादशेषदृष्टादृष्टव्यापाराणां तस्य प्राणादनूनतेति **कार्यकरत्वमेव** पूर्वपक्षप्रापकम् । 'इन्द्रियस्थैः स्वरूपैस्तु ज्ञानानि जनयत्यसौ । मनस्येन विशेषेण कामैः कर्मकृदेव च ॥ पृथक् स्थितेन रूपेण वेदयत्यहमित्यपि । प्राण एको वशी नित्यं बाह्यान्तःकरणेश्वर' इत्यादि-श्रुतेः बहुतरकार्यकारित्वेन प्राणस्यैवाढ्यतावगमात् **आढ्यतैव** सिद्धान्तस्थापिका ॥ ४-२-२ ॥

**सोऽध्यक्ष इत्यधिकरणे सोऽध्यक्षे तदुपगमादिभ्य** इत्यत्रापि **एवमेव शङ्कापरिहारश्च** । **एवमेव** मनोवच्छङ्का बहुतरकार्यकारित्वेन परमात्मसाम्यमिति शङ्केति । तत्रापि **कार्यकरत्वमेव** पूर्वपक्षप्रापकमित्यर्थः । प्राणादपि स्वातन्त्र्येण जगज्जन्मादिबहुतरकार्यकारित्वेनाढ्यत्वात् स मुख्यप्राणः अध्यक्षे परमात्मनि लीयत इति तत्रापि **आढ्यतैव** सिद्धान्तस्थापिकेत्यर्थः ॥ ४-२-३ ॥

**भूतेषु तच्छ्रुतेरित्यधिकरणे** 'अग्नौ सर्वे देवा विलीयन्ते' इति श्रुत्यर्थपर्यालोचनया अग्नावेव सर्वेषां लय इति अर्थक्लृप्तिरेव पूर्वपक्षप्रापिका । 'भूतेषु देवा विलीयन्त' इति श्रुतेः नाग्नावेव सर्वदेवानां लयः । किन्तु सर्वेषु भूतेष्वपि यथायोग्यं देवानां लयः । धरायाः अप्सु । तत्समानदेवानामपि अबनुत्पन्नत्वेऽपि समानदेवता-स्थानत्वादप्सु । एवमेवाग्नौ तत्समानदेवानामपि स्वसमानदेवतालयस्थानत्वादग्नौ । एवमुत्तरत्रापीति **समानलोप एव** तत्रापि सिद्धान्तस्थापक इति शिष्यैरेवोह्यतामिति न्यायविवरणे न स्पष्टीकृतम् ॥ ४-२-४ ॥

**नैकस्मिन्दर्शयतो हीत्यधिकरणे** भूतानामुत्पत्तिक्रमवैपरीत्येन लयोक्तेर्मुक्तिलययोर्विशेषाभावाच्च एक-स्मिन्नेव भूते अग्नावेव सर्वदेवानां लयः । तस्य च वायौ । तस्य चाकाशे । एवं लयेऽपि सर्वदेवानां अग्न्यादि-भूतत्रये लयोऽर्थतः क्लृप्त इति **अर्थक्लृप्तिरेव** पूर्वपक्षप्रापिका । तत्तद्भूतोद्भवत्वात् तत्तद्देवानां तत्समानां च विशेषवचनाभावे स्वसमानलयस्थाने एव लयोपपत्तेरिति **समानलोप** एव सिद्धान्तस्थापकः । पूर्वोक्तमार्गेण केषाञ्चिद्देवानां धरायाः तत्समानदेवानां चाप्सु अपां तत्समानदेवानां चाग्नौ । एवमुत्तरत्रापीति समानलोपन्यायेन भूतानुत्पन्नसर्वदेवानामपि यथायोगं भूतेष्वेव लयो न त्वग्न्यादिभूतत्रय एवेति भावः ॥ ४-२-५ ॥

**समना चासृत्युपक्रमादमृतत्वं चानुपोष्येत्यधिकरणे** प्रकृतेः संसाराभावादिना ईशेनाऽप्यन्यथा-कर्तुमशक्यत्वेन सुदृढत्वात् सर्वसाम्यमेवेश्वरेण । न चेत्संसारित्वमिति युक्तमिति **सुदार्ढ्यमेव** पूर्वपक्षप्रापकम् ।

'सदा नित्यतया नित्यं नित्यं नित्यात्मना यतः । नित्ययैव स्वशक्त्येशो नियामयति नित्यदा । द्रव्यं कर्म च कालश्च स्वभावश्चेतना धृतिः । प्रकृतिः पुरुषश्चैव न सन्ति यदुपेक्षये'त्यादिश्रुतेरीश्वरस्यैव महामहिमत्वात् नित्यासंसारित्वस्य नित्यतदनुग्रहेणैवोपपत्तेरिति **महिमैव** सिद्धान्तस्थापकः ॥ ४-२-६ ॥

**तानि परे तथा ह्याहेत्यधिकरणे** अन्यदेवानां प्राणाधीनत्वात् तत्प्राप्तिनियमात् परप्राप्तिर्नास्त्येवेति प्राणाधीनत्वाख्य**परतन्त्रतैव** पूर्वपक्षप्रापिका । 'प्राणं प्राप्य परं देवाः तदन्ये चैव तद्गताः । प्राप्नुवन्ति परं देवं वसन्ति च यथासुखमि'ति विशेषश्रुतेः **श्रुतिविशेष** एव सिद्धान्तस्थापकः ॥ ४-२-७ ॥

**अविभागो वचनादित्यधिकरणे** सत्यसङ्कल्पत्वादेरीश्वरसङ्कल्पाद्यनुसारित्वनियमे संसारसमानधर्मत्वं मुक्तेरिति **समानधर्म** एव पूर्वपक्षप्रापकः । ईश्वरसङ्कल्पानुसारिसङ्कल्पत्वेनैव सत्यसङ्कल्पत्वेऽपि कृतार्थत्वेनैव संसाराद्विशेषोपपत्तेरिति **कृतार्थतैव** सिद्धान्तस्थापिका । संसारे ईश्वरसङ्कल्पानुसारिसङ्कल्पनियमाभावेन मुक्तौ तन्नियमसद्भावेन च संसाराद्विशेष इत्यप्यूह्यम् ॥ ४-२-८ ॥

**तदोकोग्रज्वलनमित्यधिकरणे** प्रारब्धकर्मशेषत्वादुत्क्रान्तावविशेषो ज्ञानिन इति प्रारब्धकर्मशेषत्वाख्य**कृतशेषतैव** पूर्वपक्षप्रापिका । ज्ञानोदयानन्तरं सर्वदा ज्ञानफलस्यानुवृत्तेः । 'प्रारब्धकर्मशेषस्तु विरजातरणावधिः । सोदयात्फलदं ज्ञानमादेहं कर्म वाऽऽरवेः । तथाऽपि प्रकृतेर्बन्धो ब्रह्मणा सह भिद्यत' इति श्रुतेः ज्ञानफलेनान्यनाडीप्रापकप्रारब्धकर्मनिवारणेन ब्रह्मनाड्यैवोत्क्रमणमिति ज्ञानफलस्य **शश्वदनुप्रवृत्तिरेव** सिद्धान्तस्थापिका ॥ ४-२-९ ॥

**योगिनः प्रतिस्मर्यते इत्यधिकरणे** कृष्यादिलौकिकसाधनस्य फलस्मरणानपेक्षत्वात् स्वर्गमोक्षयोरपि तथात्वमिति **लोकोपमैव** पूर्वपक्षप्रापिका । कृष्यादिषु यथाशक्ति कृषिक्रियामेवावर्तयन्ति । फलं तु वृष्टिभाग्यादिदैविकसाधने सति स्यादन्यथा न स्यादिति फलं न निश्चिन्वन्ति तथाऽत्रापीति भावः । 'यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोष' इति हि लौकिकाः । 'क्रियानुवृत्तिर्लौकिके साधने तु मनोऽनुवृत्तिर्वैदिके साधने स्यात् । भवेत् फलं सर्वथेत्येव तस्मात् स्मरेत् सदा निश्चितत्वेन विद्वानि'ति श्रुतेः तत्तदनुसार्यनुवृत्तेः लौकिकवैदिकयोः साम्यात् । अतोऽत्र फलानुस्मरणम् । लवनादिकृष्यनुवृत्तिवत् द्रष्टव्यमिति शश्वन्मनसा फलानुस्मरणाख्यानुवृत्तिरूपा **शश्वदनुप्रवृत्तिरेव** सिद्धान्तस्थापिका । अनुवृत्तिमात्रेण लोकोपमा । वृष्टिनिरपेक्षतात्कालिकफलरूपलवनादिकृषौ फले मनोऽनुवृत्तेरपि दर्शनेन तदुपमा चेति भावः ॥ ४-२-१० ॥

*इति श्रीमद्वादिराजपूज्यचरणविरचितायां गुर्वर्थदीपिकायां चतुर्थाध्यायस्य द्वितीयः पादः ॥*

**यादु०— करणसाधन इति** । विपक्षाः पूर्वपक्षाः सम्प्राप्यन्ते याभिर्युक्तिभिः ता विपक्षसम्प्राप्तयः । तासां विरुद्धहेतव इत्यर्थ इति भावः ।

**वं०प०— पूर्वपादद्वयेति** । तृतीयाध्यायस्य चतुर्थः पादः, चतुर्थाध्यायस्य यः प्रथमः पादः तद्वये पूर्वपक्षसिद्धान्तयुक्तिपूर्वकमित्यर्थः ॥ **करणसाधन इति** । विपक्षः पूर्वपक्षः सम्प्राप्यते एभिरिति विपक्षसम्प्राप्तयः विपक्षसम्पादका इत्यर्थः ।

**कं०रा०—** 'अकर्तरि च कारके संज्ञायामि'ति करणेऽपि घञो विहितत्वात् घञन्तो निरोधशब्दः करणसाधन इत्यभिप्रेत्याह **निवारका हेतव इति** । करणे कर्तृत्वोपचारान्निवारका इति ण्वुल्प्रयोगः । विपक्षसम्प्राप्तिविरुद्धहेतव इति पाठे पूर्वपक्षप्रापकयुक्तिविरुद्धहेतव इत्यर्थलाभाय सम्प्राप्तिशब्दं करणसाधनत्वेन व्याचष्टे **तत्र सम्प्राप्तिशब्दः करणसाधन इति** । स्त्रियां क्तिन्नित्यत्र काशिकायां स्त्रीलिङ्गे भावे अकर्तरि च कारके धातोः क्तिन्प्रत्ययो भवतीत्युक्तत्वात् सम्प्राप्तिशब्दस्य भावसाधनत्वेऽपि सिद्धान्तहेतूनां पूर्वपक्षसम्प्रापण-विरुद्धत्वेन विपक्षसम्प्राप्तिविरुद्धहेतव इत्यस्यार्थोपपत्तिः । तथाऽपि विपक्षसम्प्राप्तिकृतां विरोध इति पाठे योऽर्थ-स्तस्यैवार्थस्य लाभार्थमित्थं व्याख्यातम् । पूर्वमतानुसारा इत्यस्य पूर्वपक्षयुक्त्यर्थत्वमिति भावः । अत्राप्यकर्तरि चेति करणे घञ् । युक्त्यवष्टम्भेनैव पुरुषैः पूर्वमतानामनुस्त्रियमाणत्वेन तासां पूर्वमतानुसरणं प्रति करणत्वात् । तेन पूर्वमतान्यनुस्त्रियन्त एताभिः कर्त्रीभिरिति टीकाकारोक्ता कर्तृव्युत्पत्तिरयुक्ता कर्तरि घञोऽनुशासनाभावादिति चोद्यमनवकाशम् ।

**शे०चं०— विवक्षुरिति** । अन्यथा 'व्याख्यां करोमी'ति प्रतिज्ञाव्याघातप्रसङ्गादिति भावः । पूर्वपाद-द्वयपूर्वपक्षसिद्धान्तयुक्तिकथनस्यात्र असङ्गतिमाशङ्क्य परिहरति **प्रसङ्गादिति** । तत्रैवानुक्तौ निमित्तमाह **सिंहेति** । उक्तयुक्तीनां पूर्वपक्षयुक्तित्वस्य भाष्यारूढत्वसिद्ध्यर्थमपेक्षितं पूरयति **पूर्वपक्षेति** । ननु सिद्धान्तहेतूनां पूर्वपक्ष-प्रापकयुक्तिविरुद्धत्वेऽपि न विपक्षसम्प्राप्त्या विरुद्धत्वमिति न तद्विरुद्धत्वोक्तिर्युक्तेत्यतोऽत्र विपक्षः सम्प्राप्यते-ऽनयेति सम्प्राप्तिशब्दस्य करणसाधनतया पूर्वपक्षप्रापकयुक्तिपरत्वेन पूर्वपक्षकोटिपरत्वाभावात् सिद्धान्तहेतूनां च तद्विरुद्धार्थत्वान्नानुपपत्तिरित्याह **तत्रेति** ।

**वा०र०—** व्याख्यां करोमीतीति तत्तदधिकरणपूर्वपक्षसिद्धान्तयुक्तिकथनेन किञ्चिद्व्याख्यानसिद्ध्या प्रतिज्ञाव्याघाताभावे तद्व्याघातः स्यादेवेत्यर्थः । **युक्तिपूर्वकमिति** मूलम् । तत्कथनपूर्वकमित्यर्थः । **पादे चाहेति** मूलम् । युक्तीरिति वर्तते ।

* * *

१२५ **सु०—**

**अनु०— सुशक्यता शश्वदतिप्रसिद्धि-**
**र्विवेकविन्यासविचारसंज्ञाः ।**

नानाप्रवृत्तिः कृतकृत्यता च
विपक्षतर्काः समतीतपादे ॥

**समतीतपादे** निरन्तरातीतपादे ।

महाफलत्वं प्रविविक्तता च
सन्धिग्रहः साधनमाप्तकृत्यम् ।
विशेषकार्यं कृतिसंस्थितिश्च
सुयुक्तयो निर्णयगाः स्वपक्षे ॥

**स्वपक्षे** सिद्धान्तविषये । **निर्णयगाः** निर्णयहेतवः सुयुक्तयः ।

**परि०**— आवृत्तिरसकृदुपदेशात् । **सुशक्यता महाफलत्वम्** ॥ आत्मेति तु । **शश्वदतिप्रसिद्धिः प्रविविक्तता** ॥ न प्रतीके । विवेकः सन्धिग्रहः । ब्रह्मदृष्टिः । **विन्यासः साधनम्** ॥ आदित्यादिमतयश्च । **विचारः आप्तकृत्यम्** । आसीनः । **संज्ञा विशेषकार्यम्** ॥ आप्रायणात् । **नानाप्रवृत्तिः विशेषकार्यम्** ॥ तदधिगमे । **कृतकृत्यता संस्थितिः** ॥ ४-१ ॥

**यादु०**— पूर्वमतानुसारा इत्यत्र शेषमाह **युक्तयोऽस्मिन्पाद इति** ॥ करणसाधनतामुपेत्याह **अनुस्रियन्ते एताभिरितीति** । पूर्वमतानीति योज्यम् । पूर्वपक्षप्रापिका इत्यर्थः ॥

**वं०प०**— **निरन्तरातीतपादे** अव्यवधानेनातीतपादे । एतदध्यायस्य प्रथमपाद इत्यर्थः ।

**शे०चं०**— तृतीयाध्यायस्य चतुर्थपादस्यापि समतीतपादत्वात् तत्प्रतीतिनिरासायाह **निरन्तरेति** । अव्यवहितेत्यर्थः । पक्षशब्दार्थकथनपूर्वकं सप्तम्यर्थमाह **स्वसिद्धान्तेति** । युक्तीनाममूर्तत्वेन निर्णयगमनस्यासम्भवादाह **निर्णयहेतव इति** । अनेन निर्णयगत्वं निर्णयसम्बन्धित्वमात्रम् ।

१२६ सु०—

अनु०— व्यामिश्रता कार्यकरत्वमर्थ-
क्लृप्तिः सुदार्ढ्यं परतन्त्रता च ।

समानधर्मः कृतशेषता च
लोकोपमा पूर्वमतानुसाराः ॥

**पूर्वमतानुसाराः** युक्तयो अस्मिन्पादे अनुस्रियन्त एताभिरिति अनुसाराः ।

विशेषसाम्यश्रुतिराढ्यता च
समानलोपो महिमा विशेषः ।
कृतार्थता शश्वदनुप्रवृत्तिः
सिद्धान्तनिर्णीतिविशिष्टहेतवः ॥

सिद्धान्तनिर्णीतेः विशिष्टहेतवः ।

**परि०**— वाङ्मनसि दर्शनात् । **व्यामिश्रता विशेषसाम्यश्रुतिः** ॥ तन्मनः प्राणे । **कार्यकरत्वं आढ्यता च** ॥ सोऽध्यक्षे । **कार्यकरत्वं आढ्यता** ॥ भूतेषु तच्छ्रुतेः । **अर्थक्लृप्तिः समानलोपः** । नैकस्मिन्दर्शयतो हि । **अर्थक्लृप्तिः समानलोपः** ॥ समना च । **सुदार्ढ्यं (सर्वसाम्याभावः) महिमा** ॥ तदपीतेः । **सुदार्ढ्यं महिमा** ॥ तानि परे । तथा ह्याह । **परतन्त्रता विशेषः** ॥ अविभागो वचनात् । **समानधर्मः कृतार्थता** ॥ तदोकोग्रज्वलनम् । **कृतशेषता शश्वदनुप्रवृत्तिः** । योगिनः प्रतिस्मर्यते । **लोकोपमा शश्ववदनुप्रवृत्तिः** ॥ ४-२ ॥

**वं०प०**— **अनुस्रियन्त इति** । पूर्वपक्षानुसरणकरणीभूता युक्तय इत्यर्थः ॥ **विशिष्टहेतव इति** । पूर्वपक्षे हेत्वपेक्षया विलक्षणहेतव इत्यर्थः ।

**शे०चं०**— तच्च हेतुत्वेन युक्तीनामप्यस्तीति नानुपपत्तिरित्युक्तं भवति । युक्तीनां पूर्वमतानुसारताऽनुपपत्तिमाशङ्क्याऽऽह **अनुस्रियन्त इति** ।

***॥ इति न्यायमालास्थलानि ॥***

★ ★ ★

# ॥ अथ अनेकलयाधिकरणम् ॥

॥ अथ श्रुत्यनुरोधेन देवानां पञ्चस्वपि भूतेषु लयः ॥

## ब्र०सू०— ॐ नैकस्मिन्दर्शयतो हि ॐ ॥

१२७ सु०— अत्र 'अग्नौ सर्वे देवा विलीयन्ते', 'भूतेषु देवा विलीयन्ते' इति श्रुतिद्वय-विप्रतिपत्त्या 'किमग्नावेकस्मिन् सर्वे देवा विलीयन्ते, उत पञ्चस्वपि भूतेष्वि'ति संशये अग्नावेकस्मिन्नेव सर्वेषां देवानां लयः। अग्निश्रुतेर्निरवकाशत्वात्। भूतश्रुतेस्तु सावकाश-त्वात्। एकस्मिन्नग्नौ सर्वेषां च लये अग्नेश्च वायौ वायोराकाशे सति भूतेष्विति बहु-वचनोपपत्तेरिति प्राप्ते सिद्धान्तितम्। नैकस्मिन्नग्नौ सर्वेषां देवानां लयः। किन्तु पञ्चस्वपि भूतेषु। कुतः। 'पृथिव्यामृभवो विलीयन्ते, वरुणेऽश्विनौ, अग्नावग्नयो, वायाविन्द्रः, सोम आदित्यो बृहस्पतिरित्याकाश एव साध्या विलीयन्ते' (मृत्यवः) 'ऋभवः पृथिव्यां, वरुण आपः, अग्नयस्तेजसि, मरुतो मारुते, आकाशे विनायका विलीयन्त' इति श्रुती यथायोगं पञ्चस्वपि भूतेषु देवानां लयं दर्शयतो हीति।

**वं०प०—** श्रुती महोपनिषच्चतुर्वेदशिखे।

**कं०रा०—** भूतेष्विति। 'भूतेषु देवा विलीयन्त' इति श्रुतेस्तु सावकाशत्वादित्यर्थः। सावकाशत्वमेव दर्शयति **एकस्मिन्नग्नाविति**। 'एकस्मिन्नग्नौ सर्वेषां देवानां लये सत्यग्नेश्च वायौ लये सति वायोश्चाकाशे लये सति भूतेषु देवा विलीयन्त' इति श्रुतिगतस्य बहुवचनस्योपपत्तेरित्यर्थः॥ **अग्नय इति**। अग्निपुत्रा इत्यर्थः॥ **आकाशे विनायका विलीयन्त इति**। गणपतौ गणपतिपुत्रा विलीयन्त इत्यर्थः॥ **दर्शयति हीतीति**। अस्येति शब्दस्येति सिद्धान्तितमिति पूर्वेणान्वयः।

**शे०चं०—** **निरवकाशत्वादिति**। अग्नावित्येकवचनश्रुतियुक्ततयेति शेषः। ननु बहुवचनश्रुतियुक्त-त्वाद्भूतश्रुतेरपि निरवकाशत्वमेवेति कथं निर्णय इत्यतः तस्याः सावकाशतामुपपादयति **एकस्मिन्निति**॥

**वा०र०—** **वायावीन्द्र इत्यादि** मूलम्। इन्द्रादयश्चत्वारो वायौ विलीयन्त इत्यर्थः। **प्रकरणा-दीति**। आदिपदेन श्रुतेर्भूतेष्विति सूत्रेण गृहीतत्वपरिग्रहः। तदुभयेत्यत्रापि प्रकरणसूत्रपरिग्रहयोः परामर्शः। भूतेषु लयमिति प्रथमेनाद्यानुवादतायाः यद्वा भूतेष्वित्यनेन द्वितीये न तु द्वितीयानुवादतायाश्च प्रदर्शनमिति

विवेकः । यद्वेष वै ब्रह्मेति श्रुतिस्थयद्वेत्यस्य प्रतीकोपादानम् **यद्वेतीति** । वायाविन्द्र इत्यादावित्यादिपदेन तदुत्तरवाक्यस्येवाग्नयस्तेजसीति वाक्यान्तरस्यापि ग्रहणं तेन निर्दिष्टानां मध्ये केषाञ्चिदेवेति वचनं युक्तमिति ज्ञेयम् । **केषाञ्चित्** सोमादित्याग्नीनाम् ।

**॥ इति श्रुत्यनुरोधेन देवानां पञ्चस्वपि भूतेषु लयः ॥**

* * *

**॥ अथ भूतप्रकरणे विद्यमान'वायु'शब्दः मुख्यप्राणार्थकः ॥**

१२८ **सु०—** अत्र 'वायाविन्द्र' इति वायुशब्दो भूतवायोरप्रधानस्य वाचको विवक्षित इति प्रतीयते । पृथिव्यादिसङ्कीर्तनेन भूत(प्रकर)कारणात् । सूत्रकृता च सर्वेषु भूतेषु देवानां लय इत्यत्रार्थे गृहीतेऽयं श्रुतिः । भूतेषु तच्छ्रुतेरित्युपक्रमात् । ततोऽप्यप्रधानो वायुरिति प्रतीतिनिवारणाय आह **प्रधानेति** ।

अनु०— प्रधानवायुस्त्विह वायुनामा
भूतेष्विति प्रोक्तगतोऽपि युक्त्या ।

तुशब्दोऽवधारणे । इह श्रुतौ **भूतेष्विति प्रोक्तगतोऽपि** इति शङ्काबीजानुवादः । **भूतेषु** लयं वक्ष्यामीत्याशयेन श्रुत्या प्रोक्तं यत्पृथिव्यादिकं तद्गतोऽपीति । यद्वा, भूतेषु देवानां लय इत्यत्रार्थे प्रोक्तं सूत्रकृता गृहीतं श्रुतिवाक्यं तद्गतोऽपीति । कुतः । **युक्त्या** उत्तमानामिन्द्रादीनामधमे भूतवायौ लयानुपपत्तेरित्यर्थः । प्रधानवायावपि कथमिन्द्रादीनां लयोपपत्तिरित्यत आह **यस्मादिति** ।

यस्माच्छ्रुतौ पवते चेति भूरि
प्रोक्तो

**यस्मात्** कारणात् 'सा वा एषा देवता अनादिर्योऽयं पवत' इति श्रुतौ चशब्दादन्यास्वपि श्रुतिषु **प्रधानवायुः भूरि** भूरित्वेन सकलजीवोत्तमत्वेन **प्रोक्तः**, तस्मात् तस्मिन्निन्द्रादीनां प्रलयोपपत्तेः, प्रधानवायुस्त्विह वायुनामेति सम्बन्धः । यद्वा 'एष वै ब्रह्म योऽयं पवते तमेताः पञ्च देवताः परिम्रियन्ते विद्युद्वृष्टिश्चन्द्रमा आदित्योऽग्निरि'ति श्रुतिरत्र

विवक्षिता । तत्र **भूरि** स्पष्टं सूर्यादीनां संहर्ता **प्रोक्त** इति । एवं तर्हि भूतप्रकरणबाधः स्यादित्यत आह **यत** इति ।

**यतो भूतमानी च सोऽपि ।**

न केवलमप्रधानवायुः किन्तु स प्रधानवायुरपि **भूतमानित्वाद्** भूतनामा चेति **चार्थः** । अतः प्रकरणविरोधाभावात् प्रधानवायुरेवेह **वायुनामेति** ।

उक्तमेव प्रपञ्चयति **महामानीति** ।

**महामानी त्वल्पमानी च यस्मा-**
**त्तच्छब्देनाप्युच्यते तेन सोऽपि ॥**

**महांश्चासौ मानी चेति महामानी** सर्वाभिमानीति यावत् । यथा समस्तराष्ट्राधिपती राजा तदन्तर्गतस्य ग्राम(क)स्याधिपतिर्भवति एवं सर्वाभिमानी प्रधानवायुः अल्पस्य वायोर्भूतस्याभिमानी भवेदेव । **तच्छब्देन** भूतशब्देन । न केवलं वायुशब्देनेत्यपेरर्थः ॥

**परि०**— **इहेत्यनुवादः श्रुताविति** व्याख्या । 'पृथिव्यां ऋभव' इति श्रुतावित्यर्थः ॥ **शङ्काबीजेति** । भूतवायुरेवेति शङ्कायां यद्बीजं भूतप्रेरणरूपं तदनुवाद इत्यर्थः । 'भूतेष्वि'त्यस्य श्रुतावभावात् तथोक्तिं घटयति **भूतेष्विति** । **प्रोक्तमित्यनुवादः** । **'सूत्रकृता गृहीतमि'**ति व्याख्या । 'इत्यर्थ' इत्युत्तरवाक्यमत्र पूर्वत्र च आकृष्यते । **युक्त्येत्यनुवादः** ॥ **इति श्रुताविति** । बह्वृचब्राह्मणे ॥ **राष्ट्राधिपती राजेति** । 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घः ॥ ४-२-५ ॥

**वं०प०**— **अत एव** अस्वरसात् अशेषजीवाः समस्तजीवा इति कर्तृवाचकपदद्वयसार्थक्याय समस्तजीवा इत्यस्य हरौ लयं यान्तीति क्रियापदस्यैकस्य सद्भावादशेषजीवा इत्यस्यैकं क्रियापदमध्याहरति **यद्वेति** ॥ ४-२-५ ॥

**कं०रा०**— **इयं श्रुतिरिति** । 'पृथिव्यामृभवो विलीयन्ते वरुणेऽश्विनावग्नावग्नयो वायाविन्द्रः सोम आदित्यो बृहस्पतिरि'ति श्रुतिरित्यर्थः । ननु सूत्रकृता 'नैकस्मिन् भूते सर्वेषां देवानां लय' इति प्रतिज्ञातार्थायाः श्रुतेः प्रमाणत्वेन गृहीतत्वात् कथं सर्वेषां देवानां लय इत्यर्थे गृहीतेयं श्रुतिरित्युच्यत इत्यत आह **भूतेषु श्रुतेरिति** । पूर्वसूत्रानुसारेण नैकस्मिन्नग्नौ सर्वेषां देवानां लयः किन्तु पञ्चस्वपि भूतेष्वपि प्रतिज्ञावाक्यार्थस्य

लाभात् सर्वेषु भूतेषु देवानां लय इत्यर्थे सूत्रकृता गृहीतेयं श्रुतिरित्येतद्युक्तमिति भावः । ततः किमित्यत आह **ततोऽपीति** । सर्वेषु भूतेषु लय इत्यर्थेऽस्याः श्रुतेः सूत्रकृता गृहीतत्वादपि श्रुतिगतवायुशब्दोक्तोऽप्रधानो वायुरिति प्रतीयते । तत्प्रतीतिनिवारणायाहेत्यर्थः । भूतप्रकरणादित्युक्तहेतुसमुच्चयार्थोऽपिशब्दः । यद्वा भूतेष्वि-त्येकस्मिन्नग्नौ देवानां लयो न किन्तु सर्वेषु भूतेष्वित्यस्मिन्नर्थे प्रोक्तं सूत्रकृता गृहीतं 'पृथिव्यामृभवो विलीयन्ते वरुणेऽश्विनावग्नावग्नयो वायाविन्द्र' इति वाक्यगतोऽपीति शङ्कानुवाद इति सम्बन्धः । अत्राद्ययोजनायां भूतेष्विति प्रोक्तं गतोऽपीत्यनेन वायाविन्द्र इति श्रुतिगतवायुशब्दोक्तोऽप्रधानवायुरिति शङ्कायां पृथिव्यादिसङ्कीर्तनेन भूत-प्रकरणत्वादिति यद्बीजमुक्तं तदनुवादः कृतो भवति । यद्वेति द्वितीययोजनायां तु सूत्रकृता सर्वेषु भूतेषु देवानां लय इत्यङ्गीकृतेयं श्रुतिरिति यदुक्तशङ्कायां बीजमुक्तं तदनुवादः कृतो भवतीति द्रष्टव्यम् ॥ **कुत इति** । इह श्रुतौ प्रधानवायुरेव वायुनामेति कुत इत्यर्थः । एतच्छङ्कापरिहारत्वेन युक्त्येतिपदं व्याचष्टे **युक्त्येति** । **सा वा एषा देवतानादिरिति** । अत्र प्रधानवायोर्विशिष्यानादित्वोक्त्या वृत्तिज्ञानस्य नित्यत्वलाभात् सकलजीवोत्तमत्वं ज्ञायत इति भावः । उक्तं चैतत् । 'एतेन मातरिश्वा व्याख्यात' इत्यधिकरणे तत्त्वप्रकाशिकायां 'वायोर्मुख्यानुत्पत्त्य-भावेऽपि वियदादिभ्य उत्पत्त्यनुत्पत्तिमद्भ्यो विशेषेण वायुर्वाव नित्य इत्यादिनित्यत्वश्रुतिर्विरुणद्धी'त्याशङ्का-निरासार्थं भाष्योदाहृताया 'नित्यः परमनित्यश्च तथा नित्यः परस्तथा । चतुर्धैतज्जगत्सर्वं परनित्यं तु पार्थिवम् । अनित्यानि तु भूतानि नित्यो वायुरुदाहृत' इत्यादिस्मृतेर्व्याख्यानावसरे तत्र वायोः परात्परनित्यत्वं स्वातन्त्र्य-लक्षणं परनित्यत्वं देहादेरपि नित्यत्वं च नास्त्येव । तथाऽपि सम्यगनित्यताशून्येभ्यो नित्येभ्यो वियदादिभ्यः स्वरूपातिरिक्तज्ञाननित्यत्वाभिप्रायेणातिशयेन नित्यतोच्यत इति । उक्तं च अनुव्याख्याने 'एवं प्रलयकालेऽपि प्रतिभातपरावरः । मुख्यवायुर्नित्यसम' इति ॥ **अन्यास्वपि श्रुतिष्विति** । 'कुविदङ्ग नमसाये वृधासः पुरा देवा अनवद्यास आसन् । ते वायवे मनवे बाधितायावासयन्नुषसं सूर्येण । ता अहिंसन्ताहमुक्थमस्म्यहमुक्थमस्मीति ता अब्रुवन् । हन्तास्माच्छरीरादुत्क्रामाम तद्यस्मिन्नुत्क्रान्त इदं शरीरं पत्स्यति तदुक्थं भविष्यतीति वागुदक्राम-दवदन्नश्नन्पिबन्नास्तैव चक्षुरुदक्रामदपश्यन्नश्नन्पिबन्नास्तैव श्रोत्रमुदक्रामदशृण्वन्नश्नन्पिबन्नास्तैव मन उदक्राम-न्मीलित इवाश्नन्पिबन्नास्तैव प्राण उदक्रामत्तत्प्राण उदक्रान्तेऽपद्यत । ता अहिंसतैवाहमुक्थमस्म्यहमुक्थमस्मीति ता अब्रुवन् । हन्तेदं पुनः शरीरं प्रविशाम तद्यस्मिन्नः प्रपन्न इदं शरीरमुत्थास्यति तदुक्थं भविष्यतीति वाक् प्राविशदशयदेव चक्षुः प्राविशदशयदेव श्रोत्रं प्राविशदशयदेव मनः प्राविशदशयदेव प्राणः प्राविशत्तत्प्राणे प्रपन्न उतदतिष्ठत्तदुक्थमभवत्तान्वरिष्ठः प्राण उवाच । मा मोहमापद्यथाहमेवैतत्पञ्चधाऽऽत्मानं प्रविभज्यैतद्बाणमवष्टभ्या-वधारयामीति ते श्रद्दधाना बभूवुः । सोऽभिमानी ऊर्ध्वमुत्क्रामत इव । तस्मिन्नुत्क्रामत्यथेतरे सर्व एवोत्क्रमन्ते तस्मिंश्च प्रतिष्ठमाने सर्वा एव प्रतिष्ठन्ते एवं वाङ्मनश्चक्षुःश्रोत्रं च यथा सम्राडेवाधिकृतान्विनियुङ्क्ते एतान्ग्रामा-नधितिष्ठस्वैतान्ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान्प्राणान्पृथक् पृथगेव सन्निधत्त' इत्याद्यासु श्रुतिष्वपीत्यर्थः ॥ **संहर्ता प्रोक्त इति** । प्रधानवायुरिति शेषः । 'तमेताः पञ्चदेवताः पञ्च म्रियन्त' इति श्रुतौ तं परिम्रियन्त इत्यस्य तेन संह्रियन्त इत्यर्थ इति ऋग्भाष्यटीकायामुक्तत्वात् तदभिप्रायेणैवमुक्तमिति ध्येयम् ॥ **एवं तर्हीति** । 'वाया-विन्द्र' इति श्रुतौ वायुत इत्यस्य तेन संह्रियन्त इत्यर्थ इति ऋग्भाष्यशब्देन प्रधानवायुर्यदि गृह्येत तर्हि भूत-

प्रकरणबाधः स्यात् । प्रधानवायोर्भूतशब्दवाच्यत्वाभावादिति भावः । भूतप्रकरणबाध इत्युपलक्षणम् । सर्वेषु भूतेषु देवानां लय इत्यर्थे सूत्रकृता यदेतच्छ्रुतिग्रहणं कृतं तद्बाधः स्यादित्यपि द्रष्टव्यम् ॥ **प्रकरणविरोधाभावादिति** । एतच्चोपलक्षणम् । सर्वेषु भूतेषु देवानां लय इत्यर्थे सूत्रकृता यदेतच्छ्रुतिग्रहणं कृतं तद्विरोधाभावादिति द्रष्टव्यम् ॥ **महांश्चासौ मानी चेतीति** । तथा च 'आन्महतः समानाधिकरणजातीययो'रिति महच्छब्दस्यात्वमिति भावः ॥ ४-२-५ ॥

**शे०चं०— शङ्काबीजेति** । भूतप्रकरणादिरूपशङ्काबीजेत्यर्थः । तदुभयानुवादतामेव दर्शयति **भूतेष्वित्यादिना** ॥ **यद्वेति** । पूर्वोदाहृतश्रुतौ वायोरुत्तमत्वोक्त्या तत्रेन्द्रादीनामार्थिको लयलाभः । अत्र तु पक्षे वायाविन्द्र इत्यादौ निर्दिष्टानां केषाञ्चित् साक्षादेव तत्र लयोक्तिरिति पक्षयोर्भेदोऽवधेयः । नन्वनेन महत्तत्त्वाभिमानित्वप्राप्तावपि न सर्वाभिमानित्वप्राप्तिरिति विवक्षितासिद्धिरित्यतो भवेदेवं यद्यत्र महतोऽभिमानीति षष्ठीतत्पुरुषो विवक्षितः स्यात् । न चैवम् । किन्तु समानाधिकरणसमास एव । तथा च परमधार्मिक इत्यादौ धर्मेण परमत्वलाभवदत्रापि सन्निधानादभिमानित्वेनैव महत्त्वलाभात् सर्वाभिमानित्वसिद्धिरित्यभिप्रेत्य समानाधिकरणसमासमाह **महांश्चासाविति** ॥ **ग्रामकस्येति** । अल्पार्थे कप्रत्ययविधानादल्पस्य ग्रामस्येत्यर्थः ।

**॥ इति भूतप्रकरणे विद्यमान'वायु'शब्दः मुख्यप्राणार्थकः ॥**
**॥ इति अन्योक्तमोक्षस्वरूपनिराकरणम् ॥**

***॥ इति अनेकलयाधिकरणम् ॥ ४-२-५ ॥***

★ ★ ★

## ॥ अथ परा(लया)धिकरणम् ॥

**॥ अथ शेषादिमार्गेण देवतानां लयक्रमः ॥**
**॥ अथ मुख्यप्राणद्वारा सर्वदेवानां विष्णौ लयः ॥**

### ब्र०सू०— ॐ तानि परे तथा ह्याह ॐ ॥

१२९ सु०— अस्यार्थः । **तानि** भूताभिमानिप्रभृतीनि दैवानि **परे** परमात्मनि लीयन्ते **तथा ह्याह** श्रुतिरिति ।

परि०— तानि परे तथा ह्याहेति सूत्रम् ॥ तथा ह्याह श्रुतिरितीति । 'सर्वे देवाः प्राणमाविश्य देवे मुक्ता लयं परमे यान्ती'ति श्रुतिरित्यर्थः ॥

१३० **सु०**— अत्र सर्वेषां देवानां परमात्मनि साक्षाल्लयः प्रतीयते । तत्परिहाराय भाष्यं 'प्राणद्वारेणे'ति । तत्रापि प्राणे सर्वेषां साक्षाल्लयः प्रतीयते । अतो विस्पष्टं व्याचष्टे **तस्मिन्निति** ।

**अनु०— तस्मिँल्लयं यान्ति भूतान्यशेष-**
**क्रमाविरोधेन स एव विष्णौ ।**

**अशेषक्रमाविरोधेन** श्रुत्याद्युक्तं सर्वं क्रममनुसृत्य । **भूतानि** भूतादीनि दैवानि **तस्मिन्** प्रधानवायौ लयं यान्ति । **स एव विष्णौ लयं याति** । यश्च वायाविन्द्र इति श्रुताविन्द्रादीनां प्रधानवायौ लयोऽभिहितः सोऽपि न साक्षादित्याह **इन्द्रादीनामिति** ।

**इन्द्रादीनां तत्र लयः क्रमं तु**
**प्रोक्तं विशेषादनुसृत्य नान्यत् ॥**

**तत्र** प्रधानवायौ । **विशेषादिति** तृतीयार्थे पञ्चमी । विशेषवाक्येन **प्रोक्तमनुसृत्य** व्याख्यातव्यः । **न त्वन्यद्व्याख्यानं साक्षात् तत्र लय** इति । विशेषवाक्यविरोधादिति भावः ।

**परि०— श्रुत्याद्युक्तं सर्वं क्रममिति** । वक्ष्यमाणमित्यर्थः । 'प्रोद्गातॄणां चमसभक्ष' इत्यत्रेव बहुवचनमाद्यर्थ इत्याह **भूतादीनीति** ॥ **तृतीयार्थे इति** । 'चैत्ररथेन लिङ्गादि'त्यत्रेव तृतीयापञ्चम्यो- र्हेतुरूपैकार्थ्यादिति भावः । ल्यपः समानकर्तृकक्रियान्तरापेक्षामाह **व्याख्यातव्य इति** । तुशब्दा- न्वयेनानूद्यार्थमाह **न त्वन्यदिति** । तत्किं व्याख्यानमित्यत आह **साक्षात्तत्र लय इति** ।

**यादु०— सर्वं क्रममिति** । वक्ष्यमाणमित्यर्थः ।

**कं०रा०— तत्रापीति** । 'प्राणद्वारेण सर्वाणि देवानि परमात्मनि लीयन्त' इति भाष्येऽपि सर्वेषां देवानां प्राणे साक्षाल्लयः प्रतीयत इत्यर्थः ॥ **विशेषादिति** । पञ्चम्यास्तृतीयार्थत्वं किमर्थमङ्गीकार्यमित्यतः प्रोक्तमित्यनेन अन्वयसिद्ध्यर्थं तदङ्गीकर्तव्यमित्यभिप्रेत्य विशेषशब्दस्य विशेषवाक्यपरत्वं गृहीत्वा अन्वयमाह **विशेषवाक्येन प्रोक्तमिति** । व्याख्यातव्य इति पदमध्याहार्यमित्याशयेनाह **अनुसृत्य व्याख्यातव्य इति** ।

तथा च इन्द्रादीनां प्रधानवायौ लयो विशेषवाक्येन प्रोक्तं क्रममनुसृत्य व्याख्यातव्यः । तेषां तत्र साक्षाल्लय इत्यन्यव्याख्यानं तु नेवेति मूलस्य योजनेति भावः ।

शे०चं०— **सर्वं क्रममिति** । तस्मादशेषा इत्यादिना वक्ष्यमाणं सर्वं क्रममित्यर्थः । मूले भूतानीति बहुवचनमाद्यर्थे भूतादिपदं च अभिमानिदेवतापरं प्राणद्वारेण सर्वाणि दैवतानि परमात्मनि विलीयन्त इत्यादि-भाष्यादित्यभिप्रेत्य तद्व्याचष्टे **भूतानि भूतादीनि दैवानीति** । विशेषात्प्रोक्तमित्यत्र करणत्वाद्विशेषस्य विशे-षेणेति तत्र तृतीयया भवितव्यम्, पञ्चमी तु कथमित्यत आह **तृतीयार्थ इति** । सुपां सुलुगिति स्मरणादिति भावः । विशेषपदं च योग्यत्वाद्विशेषवाक्यपरमित्याह **विशेषवाक्येनेति** ॥ **न त्वन्यद्व्याख्यानमिति** । निषिद्धं व्याख्यानमेवोपदर्शयति **साक्षात्तत्र लय इतीति** । कुतो नेत्यत आह **विशेषेति** ।

**वा०र०**— प्राणद्वारेण सर्वाणि दैवानीति पाठः । सर्वं क्रममितीतिप्रतीकोपादानपूर्वकं तद्व्याख्यानानन्तरं मूले भूतानीत्यादि पाठः । मूलकोशे तथैव सत्त्वात् । वैपरीत्येन वाक्यनिबन्धस्तु लेखकप्रमादात् ।

**स०व्र०**— विशेषस्योपादाननिमित्तत्वयोरभावात् पञ्चम्युपपत्तिरित्यतो व्याचष्टे **तृतीयार्थ इति** । तृतीया चेत्थंभूतलक्षणेति हृदयम् ।

**॥ इति मुख्यप्राणद्वारा सर्वदेवानां विष्णौ लयः ॥**

* * *

**॥ अथ मार्गद्वयस्य स्थूलनिरूपणम् ॥**

१३१ **सु०— तमेव क्रमं सङ्क्षेपेण तावदाह तस्मादिति ।**

**अनु०— तस्मादशेषा गिरिजां प्रविश्य**
**तयैव रुद्रं सह तेन वाणीम् ।**
**तया पतिं प्राप्य सहैव तेन**
**लयं हरौ यान्ति समस्तजीवाः ॥**

**विशेषप्रमाणस्य सर्वथा अनुसर्तव्यत्वादिति भावः । अत्र गिरिजाशब्दो वारुणी-सौपर्णीपरो व्याख्येयः । तथा रुद्रशब्दः शेषगरुडपरः । तथा च वक्ष्यति । तया गिरिजया**

**सहैव रुद्रं प्राप्य, पतिं वाण्याः । समस्तजीवा** इत्यस्यैव विवरणं **अशेषा** इति । **यद्वा, रुद्रं प्रविशन्तीत्यध्याहारेण व्याख्येयम् । अस्यैव विवरणं उत्तरवाक्यजातम् ।**

**परि०— तथा च वक्ष्यतीति** । 'उमागिरीशावपि भारतीराविति स्मे'त्यत्र तथा 'इन्द्रप्रवेशस्तु यदोच्यत' इत्यत्र चेति भावः । 'तयैव रुद्रमि'त्यत्र तच्छब्दार्थमाह **तया गिरिजयेति** । पतिमित्यत्राकाङ्क्षां पूरयति **वाण्या इति** । वाक्यभेदेन पदद्वयस्य सार्थक्यमिति भावेनाह **यद्वेति** ॥ **अस्यैव विवरणमिति** । 'तस्मिन्लयं यान्ती'त्यादिश्लोकद्वयोक्तस्येत्यर्थः । अत एव प्राक् तमेव क्रमं सङ्क्षेपेणाहेत्युक्तमिति ।

**यादु०— तथा च वक्ष्यतीति** । उमागिरीशावितीत्यत्र 'इन्द्रप्रवेशस्तु यदोच्यते'त्यत्रेति शेषः ॥ **अशेषा इतीति** । न चात्र समस्तेत्येतदेवाशेषा इत्यस्य विवरणं किं न स्यादिति शङ्का । न विद्यते शेषो येषां तेऽशेषा इति सङ्कोचनिषेधपरस्याशेषपदस्यैव सङ्कोचनार्हसमस्तपदविवरणरूपत्वस्य न्याय्यत्वात् । अशेषाः समस्तजीवा इति कर्तृवाचकपदद्वयसार्थक्याय वाक्यभेदमाश्रित्याह **यद्वेति** ॥ **अस्यैवेति** । अस्मिन् लयं यान्ति भूतानीत्यादिश्लोकद्वयोक्तस्यैवेत्यर्थः ।

**वं०प०— अस्यैवेति** । तस्मिन् लयं यान्तीति श्लोकद्वयोक्तस्यैव विवरणं 'सोमस्तु वारिशयत' इत्यादिना वाक्यजातेन क्रियत इत्यर्थः ।

**कं०रा०— गिरिजाशब्द इति** । येषां शेषमार्गस्तद्विवक्षायां गिरिजाशब्दो वारुणीपरो व्याख्येयः । येषां गरुडमार्गस्तद्विवक्षायां गिरिजाशब्दः सौपर्णीपरो व्याख्येय इत्यर्थः । तथा रुद्रशब्द इत्युत्तरत्राप्येवं द्रष्टव्यम् । अशेषाः समस्तजीवा इति पदद्वयं व्यर्थमित्यत आह **समस्तजीवा इत्यस्यैव विवरणमशेषा इति** । समस्तजीवा इत्यत्र समस्तशब्दस्य सङ्कुचितवृत्तित्वशङ्कायां तन्निरासार्थं न विद्यते शेषो येषां ते अशेषा इति समस्तशब्दस्य सङ्कुचितवृत्तितया व्याख्यानं क्रियते अतः न वैयर्थ्यमिति भावः । यद्वा समस्तजीवा हरौ लयं यान्तीति सामान्येनोक्तस्य अशेषा गिरिजां प्रविश्य तया सह रुद्रं प्रविशन्तीत्यध्याहारेण व्याख्येयमिति भिन्नवाक्यत्वात् पदद्वयं सार्थकमेव न त्वेकमपरस्य विवरणरूपमिति भावः । न च वाच्यं भिन्नवाक्यत्वपक्षेऽपि पूर्ववाक्यस्थस्याशेष इत्यस्यैवोत्तरवाक्ये अनुषङ्गसम्भवात् समस्तजीवा इत्यस्य वैयर्थ्यमिति । आकाङ्क्षितार्थार्पकपदाभाव एवानुषङ्गस्याश्रयणीयत्वेन तत्सद्भावस्थलेऽनुषङ्गस्यायोगात् ।

**शे०चं०— तमेव क्रममिति** । तस्मादशेषा इत्यादिना वक्ष्यमाणं सर्वं क्रममित्यर्थः ॥ **तावदिति** । सोमस्त्वित्यादिना विस्तरस्याप्युच्यमानत्वादिति भावः ॥ **वक्ष्यतीति** । 'उमागिरीशावपि भारतीरावि'त्यादिना गिरिजारुद्रशब्दयोर्वारुणीशेषपरत्वम् । 'इन्द्रप्रवेशस्तु यदोच्यतेऽत्र तदा ह्युमेत्येव सुपर्णपत्नी'त्यादिना च तयोः

सुपर्णसुपर्णीपरत्वं च वक्ष्यतीत्यर्थः । तयेत्यत्र रुद्रं, सहेति वक्ष्यमाणसहशब्दस्यान्वयं, तेन च अवधारणस्यान्वयं चाभिप्रेत्याह **गिरिजया सहैवेति** । तया पतिं प्राप्येति प्राप्यशब्दस्य न यथाश्रुत एवान्वयः किन्तु योग्यत्वाद्रुद्रमपीत्यभिप्रेत्याह **रुद्रं प्राप्येति** । ननु समस्तजीवा गिरिजां प्रविश्य तया सह रुद्रं प्रविश्य तेन सह वारुणीं प्रविश्य तया सह तत्पतिं प्राप्य **हरौ** लयं यान्तीत्येतावतैव विवक्षितक्रमाभिधानात् अशेषा इत्यनर्थकमित्यतः समस्तशब्दार्थे प्राप्तसङ्कोचशङ्कापरिहारेण तद्विवरणरूपत्वान्न तद्वैयर्थ्यमित्याशयेनाह **अशेषा इतीति** । क्रियान्तराध्याहारमात्रेण वाक्यभेदमाश्रित्य कर्तृवाचकपदद्वयसार्थक्यसम्भवे नागतिकविवरणत्वकल्पनमुचितमित्याशयेन क्रियाध्याहारेण वाक्यभेदमाश्रित्याह **यद्वेति** । अनेनाशेषा गिरिजां प्रविश्य रुद्रं प्रविशन्ति । अनन्तरं रुद्रेण सह वाणीं प्राप्य तया सह तत्पतिं प्राप्य हरौ समस्तजीवा लयं यान्तीति वाक्यभेदेन योजनोक्ता भवति ॥ **अस्यैवेति** । तस्मादशेषा इति श्लोकोक्तस्यैव प्रमेयस्य सोमस्त्वित्याद्युत्तरवाक्यजातं विवरणम्, अतो नानर्थक्यमित्युक्तं भवति । अत एव प्राक् सङ्क्षेपेणेत्युक्तमिति द्रष्टव्यम् ।

**वा०र०**— तयैवेत्यत्रापि रुद्रमिति पाठः । ननु सन्निहितप्रविश्येत्यस्यैव रुद्रमित्यत्रापि सम्बन्धोपपत्तौ किमिति व्यवहितप्राप्येत्यस्य सम्बन्धाश्रयणं मूल इति चेन्न । वारुणीत्यादीनामिति मूलम् । स्रष्टृत्वमित्यादिकं प्रागुपपादितमस्माभिः तत्प्रकारेण पुरद्भावो नात्रेति ज्ञेयम् । पूर्वविष्टानिति मूलम् । पूर्वे यत्र वयं प्रविष्टस्तावित्यर्थान्न दोषः । अत्र हि रुद्रमित्यत्रेव वाणीमित्यत्रापि क्रियापदमावश्यकम् । तच्च प्रविश्येत्येतद्रूपं व्यवहितमिति प्राप्येत्येवं रूपं सन्निहितमाश्रयणीयमिति वाच्यम् । न चानुक्तिर्युज्यते । अतः प्रविश्य प्राप्येत्यनयोरेकैकत्र सन्निधानेऽपि नोभयोरुभयत्र सन्निधानं व्यवधानं वाऽस्ति रुद्रमित्यत्रानुवृत्तं वाणीमित्यत्राकृष्टमिति कल्पने गौरवमित्यभिप्रायेणोभयोरविशेषेण प्रविश्येत्यस्य वा प्राप्येत्यस्य वा सम्बन्धे वक्तव्ये एकस्योपादानं मूलकृता कृतमिति न दोषः । एतदभिप्रेत्यैव टीकायां ननु समस्तेति वाक्ये वाणीपर्यन्तं प्रविश्येत्येवोक्तिः । अनेनाशेषा इति वाक्ये वाणीं प्राप्येत्युक्तिरित्युक्तिद्वयमिति ध्येयम् । **सङ्कोचेति** । सर्वेभ्यः कामेभ्य इत्यादौ तथा दृष्टेरिति भावः । **वाक्यभेदमिति** । वाक्यभेदमात्रेण योजनाभेदः न तु अर्थत इति भावः । **इत्युक्तं भवतीति**। इति शेष इति वेति भाव इति वार्थः ।

**स०व्र०**— तदेव व्याख्यानमुदाहरति **तथा च वक्ष्यतीति** । 'उमागिरीशावपि भारतीराविति स्म वाग्वेदगता ब्रवीति । अहीन्द्रपत्नीमहिपं विरिञ्चपत्नीं विरिञ्चं च विमुक्तिकाले । इन्द्रप्रवेशस्तु यदोच्यतेऽत्र सदा ह्युमेत्येव सुपर्णपत्नी । उक्ता सुपर्णश्च गिरीशनाम्ना ततो विरोधश्च न कश्चनात्रे'त्यादिना वक्ष्यतीत्यर्थः । अशेषाः समस्तजीवा इत्यनयोः पौनरुक्त्यं परिहरति **समस्तजीवा इत्यस्य विवरणं अशेषा इति** । अयं भावः । समस्तजीवा इत्युक्ते सङ्कोचोऽपि प्रतीयते । समस्तशब्दस्य सङ्कुचितार्थत्वेनापि प्रयोगस्य 'समस्ताः समागता' इत्यादौ दृष्टत्वात् । अतोऽशेषा इत्युक्तम् । न विद्यते शेषो येषां तेऽशेषाः । शेषरहिता इति यावत् । शेषरहिताः समस्ता अपीति लीनत्वेन प्रसक्ताः सर्वेऽपि न तु केचिदेवेति न सङ्कोचः कार्य इत्युक्तं भवति । समस्तजीवा गिरिजां प्रविश्य तया सह रुद्रं प्रविश्य तेन सह वाणीं प्रविश्य तया सह तत्पतिं प्राप्य हरौ लयं यान्ती-

त्यन्वयः । तत्र समस्तजीवा गिरिजां प्रविशन्तीत्यत्र केचिदेव गिरिजां प्रविशन्ति केचिन्नेति न सङ्कोचनीयम् । सर्वेषामपि गिरिजायामेव प्रवेश इत्यत्र अशेषा इत्यनेन समस्तजीवा इत्येतद्विवृतं भवतीति ज्ञातव्यम् । अत्र च तृतीये 'हरेरेवमशेषेण सर्वशब्दसमन्वय' इत्यनुव्याख्यानव्याख्यानं 'सर्वेऽपि ते मुक्तगणा' इत्यनुव्याख्यान-व्याख्यानं च टीकाकारीयं ज्ञापकम् ॥ **अस्य चेति** । अशेषाः समस्तजीवा गिरिजां प्रविशन्तीत्यस्यैव सोमस्त्वित्याद्युत्तरवाक्यजातं विवरणमित्यर्थः ।

**॥ इति मार्गद्वयस्य स्थूलनिरूपणम् ॥**

* * *

**॥ अथ शेषमार्गनिरूपणम् ॥**

**१३२ सु०— तत्र 'वायाविन्द्र' इति श्रुतावुक्तानामिन्द्रादीनां चतुर्णां पृथिव्यादीनां भूतानां च क्रमेणैव वायौ प्रवेश इति यदुक्तं तत्तावत्प्रपञ्च्यते ।**

**इह द्वौ मार्गौ शेषमार्गो गरुडमार्गश्च । तत्र शेषमार्गमादावाह सोमस्त्विति ।**

**अनु०— सोमस्तु वारीशयुतोऽनिरुद्धं**
**विशत्यसौ काममसौ तु वारुणीम् ।**
**सा शेषदेवं स गिरं च सैव**
**वायुं विशत्यञ्ज इतीह निर्णयः ॥**

**वारीशयुत इत्यनेनाब्देवताया वरुणस्य सोमे लय इत्युच्यते । इहेन्द्रादिचतुष्टये सोमस्य भूतेष्वपां वायुप्रवेशो निर्णयः ।**

**परि०— यदुक्तमिति** । अशेषक्रमानुरोधेत्यत्रोक्तमित्यर्थः । तस्य श्रुत्याद्युक्तसर्वक्रममनु-सृत्येति व्याख्यानात् । **इहे**त्यनुवादः, **इन्द्रादिचतुष्टय** इति व्याख्या ॥ **भूतेष्विति** । प्रवेश इत्यन्वयः ।

**वं०प०— द्वौ मार्गाविति** । शेषगरुडमार्गौ ब्रह्माण्डाद्बहिरेवेति ज्ञातव्यम् । **इन्द्रादि चतुष्टय इति** । 'वायाविन्द्रः सोम आदित्यो बृहस्पतिरि'ति वाक्योक्तेन्द्रादिचतुष्टयमध्ये सोमस्य वायुप्रवेशो निर्णयः कृतः । भूतेषु मध्ये अपां वायुप्रवेशो निर्णय इत्यर्थः ।

**कं०रा०— इन्द्रादीनां चतुर्णामिति** । इन्द्रसोमादित्यबृहस्पतीनामित्यर्थः ॥ **इहेति** । 'सोमस्तु वारीशयुत' इति श्लोके इन्द्रादिचतुष्टये सोमस्य वायुप्रवेशे भूतेष्वपां च वायुप्रवेशे निर्णयः कृत इत्यर्थः । वस्तुतस्त्वितीह निर्णय इति मूलस्थस्येह निर्णय इत्यस्य व्याख्यानरूपमिदं वाक्यम् । अनेनेन्द्रादिचतुष्टयमध्यपतितस्य सोमस्य वायुप्रवेशो भूतमध्यपतितानां वायुप्रवेशश्चेहेतीन्द्रशब्देन परामृश्यत इत्युक्तं भवति ।

**शे०चं०— यदुक्तमिति** । इन्द्रादीनां 'तत्र लय' इत्यादिना 'तस्मिँल्लयं यान्ति भूतानी'त्यादिना चेति शेषः ।

**॥ इति शेषमार्गनिरूपणम् ॥**

* * *

**॥ अथ मुक्तिप्रतिपादनावसरे 'उमा-रुद्र'शब्दयोः 'वारुणी-शेष'प्रतिपादकत्वं 'भारती-प्राण'शब्दयोः 'सरस्वती-ब्रह्म'प्रतिपादकत्वमप्यङ्गीकार्यम् ॥**

१३३ **सु०— प्राग्गिरिजां रुद्रमित्युक्तम्** । इदानीं च **गिरं वायुमिति** । एते चत्वारः शब्दाः प्रसिद्धपदार्थका इति प्रतीतिं वारयितुमाह **उमेति** ।

**अनु०— उमागिरीशावपि भारतीरा-**
**विति स्म वाग्वेदगता ब्रवीति ।**
**अहीन्द्रपत्नीमहिपं विरिञ्च-**
**पत्नीं विरिञ्चं च विमुक्तिकाले ॥**

**उमागिरीशाविति भारतीरावित्यपि** । **ईरः समीरः** । **वागित्येतत्पर्यायसमुदायो** गृह्यते । प्रतीतार्थत्वे किं बाधकमित्यत उक्तं **विमुक्तिकाल इति** । विमुक्तिप्रतिपादनावसरे । एतेन उमादीनां चतुर्णामिह जन्मनि मुक्त्यभावादिति बाधकं सूचितं भवति । वेदवाक्यानुसारिणो वयमपि तथैव प्रयुक्तवन्तः स्म इति भावः ।

**परि०—** ननु प्राक् उमादिशब्दानां अप्रयोगात् 'उमागिरीशौ भारतीराविति वागि'ति कथमेकवचनं प्र(वा)युक्तं वाच इति वक्तव्यत्वादित्यत आह **वागिति** ॥ **एतत्पर्यायेति** । उमादिशब्दपर्यायाणां श्रुत्यन्तराद्युक्तपर्यायाणां च गिरिजां रुद्रं गिरं वायुं इत्याद्युक्तगिरिजोमादिशब्दानां

समुदायो गृह्यत इत्यर्थः । वेदगता वाक् तथा वदतु नाम भवन्तः किमर्थमेवं वदन्तीत्यत आह **वेदवाक्येति** । **वयं** मूलकाराः । **तथैव** गिरिजोमादिशब्दैनैवेत्यर्थः ।

**कं०रा०— चत्वारः शब्दा इति** । गिरिजारुद्रगीर्वायुशब्दा इत्यर्थः ॥ **उमागिरीशाविति** । भारतीरावित्यपि वागहीन्द्रपत्नीमहिपञ्च विरिञ्चपत्नीं विरिञ्चं ब्रवीतीति यथाश्रुतग्रहणे वेदगतानां देवताविमुक्तिप्रकरणस्थानामुमादिशब्दपर्यायाणां गिरिजादिशब्दानामहीन्द्रपत्न्यादिप्रतिपादकत्वं न स्यादित्यतो व्याचष्टे **वागित्येतत्पर्यायसमुदायो गृह्यत इति** ॥ **उमागिरीशाविति** । भारतीरावित्यपि वागित्यनेनैतेषामुमादिशब्दानामेतत्पर्यायशब्दानां च समुदायो गृह्यते न तु गौरित्याहेत्यादौ गोशब्दस्वरूपमात्रं गृह्यत इति भावः । अत एवेदं निरस्तम् । एतत्पर्यायसमुदायो गृह्यते चेदुमादिशब्दपर्यायाणां गिरिजादिशब्दानामेवाहीन्द्रपत्न्यादिप्रतिपादकत्वं स्यान्न तूमादिशब्दानाम् । यत्र पर्यायग्रहणं तत्र तद्ग्रहणं नेत्यस्य सभाराजामनुष्यपूर्वेत्यादौ दृष्टत्वादिति । एतत्पर्यायसमुदायो गृह्यत इत्यस्यैतेषामुमादिशब्दानामेतत्पर्यायशब्दानां च समुदायो गृह्यत इति व्याख्याततत्वेनोक्तदूषणानवकाशात् समुदाय इत्यनेनेदमभिप्रैति । उमादीनामसाधारण्येन वाचका यावन्तः शब्दास्ते सर्वेऽपि प्रत्येकमहीन्द्रपत्न्यादीन् प्रतिपादयन्तीति तेन क्वचिदप्येतत्पर्यायसमुदायस्याभावः समुदायिनामेतेषां शब्दानां प्रत्येकमहीन्द्रपत्न्यादिप्रतिपादकत्वं न स्याच्चेति दोषद्वयं निरस्तम् । नन्वहीन्द्रपत्न्याद्यभिप्रायेण ओमादिशब्दा वेदे प्रयुज्यन्ते च । प्रयुज्यन्तां नाम आचार्यैस्ते शब्दाः तथैकस्मात्प्रयुक्ता इत्याशङ्कायामाचार्याभिप्रायमाह **वेदवाक्यानुसारिण इति** ॥ किमत्र प्रयोजनान्वेषणेनेति । उमादिशब्दानां वारुण्यादिषु रूढलक्षणेति भावः ।

**शे०चं०— प्रागिति** । सङ्क्षेपेण क्रमाभिधायके वाक्य इत्यर्थः ॥ **इदानीमिति** । सोमस्त्विति प्रपञ्चवाक्य इत्यर्थः । भारतीराविवितीत्यत्रत्येतिशब्दः योग्यत्वात् पूर्वत्रापि सम्बध्यत इत्याशयेनाह **उमागिरीशाविवितीति** । उमागिरीशावपीत्यपिशब्दस्य यथास्थितयोजनायां वैयर्थ्यमाशङ्क्य भिन्नक्रमतया तं योजयति **इत्यपीति** । निर्दिष्टशब्दमात्रपरत्वे वाक्शब्दस्य तत्पर्यायशब्दसमुदायस्य प्रसिद्धार्थपरित्यागेन अप्रसिद्धार्थपरत्वालाभप्रसङ्गात् । तल्लाभायाह **वागित्येतत्पर्ययेति** । किमनेन प्रसिद्धार्थत्वे बाधकमुक्तमित्यत आह **एतेनेति** ॥ **वृत्ताविति** । अमुख्यवृत्तावित्यर्थः । तस्याः शक्यसम्बन्धादिरूपनिमित्तापेक्षत्वादिति भावः ।

**वा०र०—** भारतीराविवितीत्यत्रत्येतिशब्द इति पाठः । **निर्दिष्टशब्दमात्रपरत्वेति** । वाक्शब्दस्योमागिरीशाविति वागिति प्रागुक्तनिर्देशप्रकारानुसरणीया वागुमागिरीशपदोपेता तस्या एवाहीन्द्रपत्न्या वाचकत्वादिप्राप्तावपि पार्वतीरुद्रादितत्पर्यायपदोपेताया उक्तपरत्वाप्राप्तेरित्यर्थः । मूलानुसारेण वाक्शब्दस्येत्येवोक्तम् । इति वाक्शब्दस्येति वक्तुमुचितम् । इतीत्यनेन निर्देशप्राप्तेस्तत्रैव निर्देशान्तरोपलक्षणया प्राप्तावपि वाक्शब्दस्य यथास्थितार्थतया तत्र व्यत्यासाभावात् । एतेन वाक्शब्दपर्यायवचनादिशब्दग्रहणस्यात्रानभिप्रेतत्वाद्यथाश्रुतार्था सङ्गतिरिति परास्तम् ।

**॥ इति मुक्तिप्रतिपादनावसरे 'उमा-रुद्र'शब्दयोः 'वारुणी-शेष'प्रतिपादकत्वं 'भारती-प्राण'शब्दयोः 'सरस्वती-ब्रह्म'प्रतिपादकत्वमप्यङ्गीकार्यम् ॥**

॥ अथ उमादिपदानां वारुण्यादिपरत्वे निमित्तोक्तिः ॥

१३४ सु०— उमादिशब्दानां वारुण्यादिवृत्तौ किं निमित्तमित्यत आह **त एवेति** ।

**अनु०— त एव यत्तत्पदमाप्नुवन्ति**

यद्यस्मात्त उमाद्या एव तत्पदं वारुण्यादिपदं उत्तरकल्पे प्राप्नुवन्ति तस्मादिति पूर्वेण सम्बन्धः । अनेन उमात्वादीनां वारुणीत्वादीनां च एकद्रव्यसम्बन्धो लक्षणाबीजमित्युक्तं भवति । प्रसिद्धपदत्यागेन अप्रसिद्धपदप्रयोगे किं प्रयोजनमित्यत आह **तत्काल इति** ।

तत्काल एतान् समुपास्य जीवाः ।
ब्रह्मत्वकाले प्रविशन्ति चैता-
निति स्म वाक् तादृशतामुपैति ॥

**तत्काले** उमात्वादिकाले । **एतान्** उमादीन् देवान् । **ब्रह्मत्वकाले** तेषामेव वाय्वादीनां ब्रह्मत्वादेः काले । **एतान्** वारुण्यादीन् । **चो** यस्मादित्यर्थे । **इति** तस्मात् । **वाक्** वेदवाणी । **तादृशताम्** उमादिशब्दवत्ताम् ।

एतदुक्तं भवति । यो यस्मिन्नतिपरिचयवान् तस्याश्रमान्तरप्राप्त्यादिना नामान्तरे प्राप्तेऽपि तदभिज्ञाः तं प्रति तं पूर्वनाम्नैव व्यवहरन्तीति लोके सुप्रसिद्धम् । तथाऽत्रापि प्रयोग इति किं प्रयोजनान्वेषणेनेति ।

**परि०**— अस्फुटत्वादाह **एतदुक्तं भवतीति** ॥ **आश्रमान्तरप्राप्त्यादिनेति** । राजाऽऽदिना प्रीत्यादिना नामान्तरे प्राप्त इत्यादि **आदिपदेन** ग्राह्यम् ।

**वं०प०**— **एतत्पर्यायेति** । उमागिरीशपर्यायाणां पार्वतीशङ्करादिशब्दानां भारतीवायुपर्यायाणां विद्युत्प्राणादिशब्दानामित्यर्थः ॥ **एकद्रव्येति** । देवानां जीवस्वरूपैकद्रव्येत्यर्थः ।

**कं०रा०**— **अनेनेति** । अग्नियुक्तः सूर्यो गुरुमाप्य तेन गुरुणा सह शक्रं प्राप्येत्यनेनाग्नौ सर्वे देवा विलीयन्तेऽग्निरिन्द्र इन्द्र उमायामित्यत्राग्निरिन्द्रे विलीयत इति वाक्यमग्निः सूर्यबृहस्पतिद्वारेन्द्रे विलीयत इत्यर्थपरमित्युक्तं भवतीत्यर्थः । **इन्द्रादिष्विति** । वायाविन्द्रः सोम आदित्यो बृहस्पतिरिति श्रुत्युक्तेष्विन्द्रादिषु मध्य इत्यर्थः ।

**शे०चं०**— ननु तथाऽपि किं प्रयोजनमिति शङ्काया न परिहारः प्रयोजनानुक्तेरित्यतः प्रयोजनानुक्तावपि तदुपासनादिना तत्रातिपरिचयसूचनेन प्रयोजनानपेक्षत्वसूचनात् तत्परिहारोपपत्तिरित्याह **एतदुक्तं भवतीति** ॥ **तस्येति** । यस्मिन्नित्युक्तस्येत्यर्थः । **तदभिज्ञाः** तत्परिचयाभिज्ञाः **तं प्रति** यः परिचयवान् तं प्रतीत्यर्थः ॥ **तमिति** । यस्य नामान्तरप्राप्तिः तस्येत्यर्थः ।

**वा०र०**— **किन्निमित्तकमिति मूलम्** । शक्यसम्बन्धादिरूपं किन्निमित्तमित्यर्थः ।

**॥ इति उमादिपदानां वारुण्यादिपरत्वे निमित्तोक्तिः ॥**

* * *

**॥ अथ गरुडमार्गनिरूपणम् ॥**

१३५ **सु०**— इदानीं गरुडमार्गमाह **सूर्य इति** ।

**अनु०**— **सूर्योऽग्नियुक्तो गुरुमाप्य तेन**
**शक्रं सहैतेन सुपर्णपत्नीम् ।**
**तया सुपर्णं सह तेन वार्णी**
**ब्रह्माणमेतद्गत एव याति ॥**

**अग्नियुक्त** इत्यनेन अग्नेः सूर्ये लय इत्युच्यते । अनेन अग्निरिन्द्र इति श्रुतिः परम्परापेक्षेत्युक्तं भवति । **एतद्गतो** वाणीगत एव । एतेन इन्द्रादिष्विन्द्रादित्यबृहस्पतीनां, भूतेषु तेजसो, वायौ लयो विवृतो भवति ।

**परि०**— **एतेनेन्द्रादिष्विन्द्रादित्यबृहस्पतीनामिति** । इन्द्रादित्यबृहस्पतीनां क्रमाल्लयकथनेन इन्द्रस्य सुपर्णपत्न्यां, आदित्यस्य तु गुरौ, गुरोश्च शक्रे, इत्येवं लयो विवृतः । तथा सूर्योऽग्नियुक्त इत्युक्त्या सूर्यद्वारा तेजसो वायाविति विवृतं भवतीत्यर्थः ।

**वं०प०**— भूतेषु मध्ये तेजसोऽग्नेः । यस्मिन्काले इन्द्रप्रवेशः कथ्यते तदा तस्मिन्काले एव इन्द्र उमायामित्यत्र उमाशब्देन सुपर्णपत्नी उक्ता नान्यदेत्येवं प्रतीतिनिरासायाह **अधिकरणमात्रस्येति** । न तु कालरूपाधिकरणस्येत्यर्थः । तदेव दर्शयति **यत्र श्रुताविति** । तथा च **यदा** यत्र श्रुतौ **तदा** तत्र श्रुतावित्यर्थो

द्रष्टव्यः । उमाशब्दस्य सुपर्णपत्न्यां प्रवृत्तौ गिरीशनाम्नः सुपर्णे प्रवृतौ च किं निमित्तमित्यत आह **अत्र पदसादृश्यमिति** । उमासुपर्णीपदयोर्गिरीशसुपर्णपदयोश्च साम्यं प्रवृत्तिनिमित्तमित्यर्थः ।

**॥ इति गरुडमार्गनिरूपणम् ॥**

* * *

**॥ अथ इन्द्रलयोक्तिसन्दर्भे उमारुद्रपदयोः 'सौपर्णी-गरुड'परत्वम् ॥**

१३६ **सु०—** नन्वेतत् 'इन्द्र उमायामुमा रुद्रे विलीयत' इति श्रुतिविरुद्धम् । उमारुद्रशब्दयोः स्वार्थपरित्यागेऽपि वारुणीशेषपरतया व्याख्यातत्वादित्यत आह **इन्द्रेति** ।

**अनु०—** इन्द्रप्रवेशस्तु यदोच्यतेऽत्र
तदा ह्युमेत्येव सुपर्णपत्नी ।
उक्ता सुपर्णश्च गिरीशनाम्ना
ततो विरोधश्च न कश्चनात्र ॥

**यदातदाशब्दावधिकरणमात्रस्योपलक्षकौ यत्र श्रुतौ अत्र उमायामिन्द्रप्रवेश उच्यते। तस्याश्चोमाया रुद्रे । सुपर्णपत्न्येव । गिरीशनाम्ना** गिरीशपर्यायेण । **सौपर्ण्यामिन्द्रलयस्य बलवच्छ्रुतिसिद्धत्वादिति हिशब्दः । अत्र पदसादृश्यं प्रवृत्तिनिमित्तमिति भावः ।**

**परि०—** **अधिकरणमात्रस्येति** । न तु कालरूपाधिकरणविशेषस्येत्यर्थः । तथात्वे कोऽर्थः सम्पन्न इत्यत आह **यत्र श्रुताविति** ॥ **अत्रेति** । 'इन्द्र उमायां उमा रुद्र' इति श्रुताविल्यर्थः । एवकारान्वयेनानुवादः **सुपर्णपत्न्येवेति** । गिरीशशब्दग्रहणतन्त्रमिति भावेनाह **गिरीशनाम्ना गिरीशपर्यायेणेति** । उमादिशब्देन सुपर्णपत्न्यादिग्रहणं किं निमित्तमित्यत आह **अत्र पदेति**। उमादिपदं सौपर्ण्यादिपदसदृशं न न्यूनाधिकभावापन्नमित्यर्थः ।

**कं०रा०—** **एतदिति** । 'शक्रं सहैतेन सुवर्णपत्नी तया सुपर्णमि'तीन्द्रस्य सुपर्णपत्न्यां तस्याश्च सुपर्णे लयकथनमित्यर्थः । उमारुद्रशब्दयोः स्वार्थपरित्यागस्य कृतत्वान्न विरोध इत्यत आह **उमेति** । इन्द्र उमायामुमा रुद्र इति श्रुतिगतयोरुमारुद्रशब्दयोः स्वार्थपरित्यागेऽप्युमागिरीशावपि भारतीराविति स्म वाग्वेदगता ब्रवीति ।

अहीन्द्रपत्नीमहिपं वारुणीशेषपरतया व्याख्यातत्वात् तदनुसारेणेन्द्रस्योमाशब्दितवारुण्यां तस्याश्च शेषे लयस्य वक्तव्यत्वादिन्द्रस्य सौपर्ण्यां तस्याश्च सुपर्णे लयकथनं विरुद्धमिति भावः । नन्विन्द्रप्रवेशस्तु यदोच्यते तदा ह्युमेत्येव सुपर्णपत्नीत्यत्र यदातदाशब्दौ कालरूपाधिकरणप्रतिपादकौ सर्वैकान्यत्किं यत्तदः कालेदेति दाप्रत्ययस्य काले विहितत्वात् । तच्चायुक्तम् । एकस्याः श्रुतेः कालभेदेनानेकार्थपरत्वानुपपत्तेरित्यतस्तौ लक्षणयाऽधिकरणमात्रपरावित्याह **यदातदाशब्दाविति** । यदातदाशब्दस्याधिकरणार्थत्वं दर्शयति **यत्र श्रुताविति** । यत्र श्रुतावुमायामिन्द्रप्रवेश उच्यते तस्याः सोमाया उच्यते तत्र श्रुताविति उमाशब्दपर्यायेण सुपर्णपत्न्येवोक्ता गिरीशनाम्ना गिरीशपर्यायेण सुपर्ण एवोक्तः । तत्र तु श्रुतावुमायां कामदेवप्रवेश उच्यते । तस्याश्चोमाया रुद्रे तत्रैवोमारुद्रशब्दौ वारुणीशेषपरत्वेन व्याख्यातौ । ततोऽत्र न कश्चन विरोध इति मूलाभिप्रायो द्रष्टव्यः । यत्र श्रुतावुमायामिन्द्रप्रवेश उच्यते तत्रोमाशब्दस्य सौपर्णीपरत्वं कस्मात्कल्प्यत इत्यतो मूलस्थं हिशब्दं हेतुसमर्पकत्वेन व्याचष्टे **सौपर्ण्यामिन्द्रलयस्येति** । ननूमादिशब्दानां वारुण्यादिषु प्रवृत्तौ उमात्वादीनां वारुणीत्वादीनां च एकद्रव्यसम्बन्धरूपं निमित्तमस्तीति तेषां तत्र प्रवृत्तिर्युक्ता । प्रकृते तु उमात्वादेः सौपर्णीत्वादेश्चैकद्रव्यसम्बन्धरूपनिमित्ताभावादुमादिशब्दस्य सौपर्ण्यादौ वृत्तिः न युक्तेत्यत आह **अत्रेति** ।

**शे०चं०—** यदातदाशब्दयोः कालरूपाधिकरणविशेषवाचकत्वात् तस्य च प्रकृतेऽसम्भवादुपलक्षणया श्रुतिरूपाधिकरणपरतामाह **यदातदेति** । एतदेव दर्शयति **यत्र श्रुताविति** । उमेत्येवेत्येवशब्दस्य वैयर्थ्यादिप्रसङ्गाद्भिन्नक्रमतया तं योजयति **सुपर्णपत्न्येवेति** । तावता गिरीशपदस्य सुपर्णपरत्वलाभेऽपि रुद्रशब्दस्य तदलाभान्नोमा रुद्रे विलीयत इति श्रुतिविरोधपरिहारसिद्धिरित्यत आह **गिरीशपर्यायेणेति** । प्रतीतार्थपरत्वे बाधकाभावान्न लक्षणया सुपर्ण्यादिपरत्वमित्यत आह **सौपर्ण्यामिति** । उमागिरीशपदयोः सुपर्ण्यादिषु वृत्तौ किं निमित्तम् । न हि तेन विना लक्षणा सम्भवतीत्यत आह **अत्रेति** ।

**वा०र०—** उमायां यत्रेन्द्रप्रवेश उच्यते तत्रोमापदेन सुपर्णपत्नीत्येतावतैव पूर्तेः सुपर्णश्च गिरीशनाम्नेत्यस्य वैयर्थ्यमित्यत इन्द्रप्रवेशोऽत्रेत्येतदुपलक्षणयार्थान्तरस्यापि सङ्ग्राहकत्वेन योजयति । **तस्याश्चोमाया रुद्र इति मूलम्** ।

**स०व्र०— यदेति** । श्रुतिरूपाधिकरणस्योपलक्षकावित्यर्थः ।

**॥ इति इन्द्रलयोक्तिसन्दर्भे उमारुद्रपदयोः 'सौपर्णी-गरुड'परत्वम् ॥**

* * *

॥ अथ भृग्वादीनां वैवस्वतादिमनूनाञ्च लयक्रमः ॥

१३७ सु०— अधुना 'तानि पर' इत्युक्तानां हिरण्यगर्भे लयप्रकारमाह **भृग्वादय इति** ।

अनु०— भृग्वादयो दक्षमवाप्य तेन
प्राप्येन्द्रमेतेन सुपर्णपत्नीम् ।
विशन्ति ये मनवो राजमुख्या
मनुं प्रविश्यात्र गता महेन्द्रम् ॥

सुपर्णपत्न्याः सुपर्णे लयः सिद्ध एव । इन्द्रपर्यन्तमेव वक्तव्ये अधिकवचनमुक्तदार्ढ्यार्थम् । एवमुत्तरत्रापि । **ये मनवो** वैवस्वताद्याः **ये च राजमुख्याः** प्रियव्रताद्यास्ते स्वायम्भुवमनुं प्रविश्य **अत्र** स्वायम्भुवे **मनौ गता** वर्तमाना **महेन्द्रम्** । **विशन्तीत्युभयत्र सम्बध्यते** ।

परि०— 'सुपर्णपत्नी विशन्ती'त्यत्र विशन्तीति पदस्य महेन्द्रमित्यत्राप्यन्वय इति भावेनाह **इत्युभयत्र सम्बध्यत इति** ।

वं०प०— नन्वत्र सुपर्णपत्नीपर्यन्तमेव लय उक्तो न तु तस्या अन्यत्र लयः अतो न्यूनतेत्यत आह **सुपर्णपत्न्या इति** । ननु शक्रसहितेन सुपर्णपत्नीमिति पूर्ववाक्येनैवेन्द्रस्य सुपर्णपत्न्यां लय उक्त एवास्ति अत एतेन सुपर्णपत्नीमिति पुनः किमर्थमुच्यत इत्यत आह **इन्द्रपर्यन्तमेवेति** ॥ **उभयत्रेति** । विशन्तीत्येतत् सुपर्णपत्नी महेन्द्रमित्युभयत्र सम्बध्यत इत्यर्थः ।

कं०रा०— ननु **भृग्वादय** इत्यत्र भृग्वादयो दक्षमवाप्य तेन सहेन्द्रं प्रविशन्तीतीन्द्रपर्यन्तमेव प्रवेशो वक्तव्यो न तु सुपर्णपत्नीं विशन्तीति सुपर्णपत्नीपर्यन्तम् । इन्द्रस्य सुपर्णपत्न्यां लय इत्यस्य 'सूर्योऽग्नियुक्तो गुरुमाप्य तेन शक्रं सहैतेन सुपर्णपत्नीमि'त्यनेनैव सिद्धत्वादित्यत आह **इन्द्रपर्यन्तमिति** । इन्द्रपर्यन्तमेव प्रवेशो वक्तव्ये एतेन सुपर्णपत्नीमिति यदधिकवचनं तत्प्रागुक्तस्य सुपर्णपत्न्यामिन्द्रलयस्य दार्ढ्यार्थमित्यर्थः । **भृग्वादय** इत्यत्रादिशब्देन वसिष्ठमरीच्यादेर्ग्रहणमिति सन्न्यायरत्नावल्यामुक्तम् ॥ **एवमुत्तरत्रापीति** । 'आकाश उवाच गुरुं प्रविश्य तेनैव यातः पुरुहूतदेवमि'त्यत्रापि सूर्योऽग्नियुक्तो गुरुमाप्य तेन शक्रमित्यनेनोक्तस्य गुरोरिन्द्रप्रवेशस्य वचनदार्ढ्यार्थमित्यर्थः ॥ **विशन्तीत्युभयत्र सम्बन्ध्यत इति** । विशन्ति ये मनव इत्यत्रत्यं विंशतीतिपदं भृग्वादयो दक्षमवाप्य तेन प्राप्येन्द्रमेतेन सुपर्णपत्नीमिति पूर्वत्र ये मनवो राजमुख्या मनुं प्रविश्य अत्रागता महेन्द्रमित्युत्तरत्र च सम्बध्यत इत्यर्थः ।

**शे०चं०**— ननु तथाऽपि हिरण्यगर्भे लयप्रकारानुक्तेः कथं तत्र लयमाहेत्यवतार इत्यतः सुपर्ण्याः सुपर्णेतरस्य च वाणीद्वारा हिरण्यगर्भे उक्तरीत्या लयस्य सिद्धत्वान्न तदनुक्तिर्दोष इत्याह **सुपर्णपत्न्या इति** । ननु तर्हि इन्द्रपर्यन्तमेव लयो वक्तव्यः स्यात् । इन्द्रस्य सुपर्णपत्न्यादिद्वारेण हिरण्यगर्भे लयस्य सिद्धत्वादित्यत आह **इन्द्रपर्यन्तमेवेति** ॥ **एवमिति** । यत्र यत्राधिकवचनं दृश्यते तत्सर्वमुक्तदार्ढ्यार्थमित्यवगन्तव्यमित्यर्थः ॥ **उभयत्रेति** । सुपर्णपत्नी विशन्तीति पूर्वत्र महेन्द्रं प्रविशन्तीत्युत्तरत्र, चेत्युभयत्र सम्बध्यत इत्यर्थः ।

**वा०र०— सुपर्णेतरस्य च वाणीद्वारा हिरण्यगर्भ इति** । अनेन मूले सुपर्ण्याः सुपर्ण इत्येतदुपलक्षणमिति सूचितं भवति । प्रवेशेनेत्यस्योद्वाष्यत्वं परिहरति **सप्तम्यर्थ इति** । सप्तम्यास्त्रलिति सूत्रादिति भावः ।

**स०व्र०— एवमिति** । अधिकवचनमुक्तदार्ढ्यार्थमित्यर्थः ॥ **उभयत्रेति** । विशन्तीत्येतद्गिरिजां विशन्तीति महेन्द्रं विशन्तीत्युभयत्र सम्बध्यत इत्यर्थः ।

**॥ इति भृग्वादीनां वैवस्वतादिमनूनाञ्च लयक्रमः ॥**

* * *

**॥ अथ पृथिव्याकाशाभिमानिनोः सनकादीनाञ्च लयक्रमः ॥**

१३८ **सु०**— भूतेषु पृथिव्याकाशयोर्लयप्रकारो वक्तव्यः, तमाह **आकाश इति** ।

**अनु०— आकाश उर्वी च गुरुं प्रविश्य**
**तेनैव यातः पुरुहूतदेवम् ।**
**सनादयो यतयः काममेव**
**विशन्ति शिष्टा अपि हव्यवाहम् ॥**

वायुभूतस्य मुख्याभिमानी **प्रधानवायुरित्युक्तम्** । अमुख्याभिमानिनस्तु 'शक्रं मरुद्गणा' इति लयो वक्ष्यते ॥ **सनादय इति** । सनत्कुमारव्यतिरिक्ताः । तस्य कामावतारत्वात् । कामस्य तु वारुण्यामुक्त एव लयः । **शिष्टा** उक्तेभ्यः ।

एतेन 'अग्नौ सर्वे देवा विलीयन्त' इत्यस्य विषयो दर्शितः ।

**परि०**— भूतचतुष्टयस्य लय उक्तः वायुभूतस्य लयो वक्तव्य इत्यत आह **वायुभूतस्येति** ॥ **प्रधानेति** । तस्य तु लयः प्रागुक्त इति भावः ।

**वं०प०**— भूतेषु वायोर्लयानुक्तेराह **वायुभूतस्येति** । भूतवायोरित्यर्थः । **एतेन** शिष्टा इत्यनेन ॥ **विषयो दर्शित इति** । 'अग्नौ सर्वे देवा विलीयन्त' इत्यत्र सर्वदेवशब्देन, 'अग्नावग्नय' इति महोपनिषदि 'अग्नयस्तेजसी'ति चतुर्वेदशिखायां च प्रधानाग्नौ लीयमानत्वेन ये निर्दिष्टा एकोनपञ्चाशदग्नयस्त एव सर्वे देवा इत्यनेन ग्राह्या इत्यर्थः । अग्नीनामनेकत्वं च 'त एवैकोनपञ्चाशत्साकं पितृपितामहैरि'ति भागवते प्रसिद्धम् । अत एव अनलकुलेन्द्र इति प्रधानाग्निनाम । यथोक्तं भाष्ये— 'अग्नौ सर्वे देवा विलीयन्त इति तत्र तत्र निर्दिष्टानामेवे'ति ।

**कं०रा०**— **भूतेष्विति** । भूतेषु मध्ये पृथिव्याकाशयोर्यो लयप्रकारो वक्तव्यः तमाहेत्यर्थः । सनादय इत्यनेन सनत्कुमारव्यतिरिक्ताः कस्माद्गृह्यन्त इत्यत आह **तस्येति** । सनत्कुमारस्य च कामावतारत्वात् कामस्य च वारुण्यां लयो 'विशत्यसौ काममसौ च वारुणीमि'त्यत्रोक्त एवेत्यतः सनादय इत्यनेन सनत्कुमारव्यतिरिक्ता गृह्यन्त इति भावः । 'शिष्टा अपि हव्यवाहमि'त्यत्र शिष्टा इत्यस्यावशिष्टा इत्यर्थं मनसि निधाय केभ्योऽवशिष्टा इत्याकाङ्क्षायामाह **उक्तेभ्य इति** । तथा च उक्तव्यतिरिक्ता हव्यवाहं प्रविशन्तीति मूलार्थ इति भावः ।

**शे०चं०**— **उक्त एवेति** । 'काममसौ च वारुणीमि'त्युक्तत्वादिति भावः ॥

**॥ इति पृथिव्याकाशाभिमानिनोः सनकादीनाञ्च लयक्रमः ॥**

* * *

**॥ अथ वर्णाश्रमनिष्ठमनुष्याणां, पितृदेवतानां, गन्धर्वादीनां लयक्रमः ॥**

१३९ **सु०**— अस्यापवादमाह **वर्णाश्रमेति** ।

**अनु०**— वर्णाश्रमाचाररता मनुष्या
धर्मं मनुं सोऽपि समेति काले ।
तमेव सर्वे पितरः सुरानुगाः
सर्वे कुबेरं स च सोममेव ॥

एतत्प्रसङ्गान्मुक्तौ प्रवेशमात्रमुक्तं न तु देहलयः । तेषामुत्क्रमणस्य विद्यमानत्वात् । **वर्णाश्रमाचाररता** इत्यनेन मनुष्याणां मुक्तौ वर्माश्रमवत्त्वमस्तीति सूचयति । धर्मस्य तु स्वायम्भुवे मनौ लय एव । **काले** मोक्षकाले । **सर्वे पितरः** तं धर्ममेव संयान्ति । **सर्वे सुरानुगा** गन्धर्वाद्याः कुबेरम् ।

**परि०— लय एवेति** । न तूत्क्रान्तिरित्यर्थः ।

**यादु०— एतत्प्रसङ्गादिति** । इदमुपलक्षणम् । वक्ष्यमाणानामपि पितॄणां सुरानुगानां च प्रवेशमात्रं न देहलयः । तेषां प्रतीकालम्बनत्वेनोत्क्रमणस्य विद्यमानत्वात् गन्धर्वाद्या इत्यत्र आद्यपदेन सिद्धचारणानां ग्रहणम् ।

**वं०प०— अपवादमिति** । शिष्टा इति सामान्योक्त्या यमधर्मपितृगन्धर्वादीनामप्यग्नौ लयप्राप्तेः तदपवादमाहेत्यर्थः ।

**कं०रा०—** वर्णाश्रमाचाररतानां मनुष्याणां धर्मे देहलय एव किं न स्यादित्यत आह **तेषामिति** ।

**शे०चं०— अस्येति** । 'विशन्ति शिष्टा अपि हव्यवाहमि'त्यस्येत्यर्थः । मनुष्या धर्मे इत्येतावता पूर्तेर्वर्णाश्रमेत्यादितद्विशेषणानर्थक्यमाशङ्क्य तत्प्रयोजनमाह **वर्णेति** ॥ **लय एवेति** । न प्रवेशमात्रमित्यर्थः ।

**॥ इति वर्णाश्रमनिष्ठमनुष्याणां, पितृदेवतानां, गन्धर्वादीनां लयक्रमः ॥**

* * *

**॥ अथ सायुज्यमुक्तिनिरूपणम् ॥**

१४० **सु०—** उपसंहरति **विमुक्तीति** ।

**अनु०— विमुक्तिकाले प्रविशन्त्यभीक्ष्णं**
**भोगांश्च तद्देहगताः प्रभुञ्जते ।**

एवं सर्वे यथोक्तप्रकारेण विमुक्तिकाले प्रविशन्त्युत्तमानिति शेषः । न केवलं प्रविशन्ति किं तर्हीत्यत आह **अभीक्ष्णमिति** । आविष्टग्रहवदित्यर्थः । किमनेन प्रवेशेनेत्यत आह **आनन्देति** ।

आनन्दसुव्यक्तिरमुत्र तेषां
भवति

**अमुत्र उत्तमेषु प्रवेशेन ।**

कं०रा०— परदेहगतानां कथं भोग इति शङ्कानिरासार्थमाह **आविष्टग्रहवदिति** ।

शे०चं०— सप्तम्यर्थेऽत्र लय इत्यभिप्रेत्य अपेक्षितं पूरयन् योजयति **उत्तमेषु प्रवेशेनेति** ।

* * *

१४१ **सु०**— प्रविष्टानां पुनर्निर्गमोऽस्ति न वेति शङ्कायामाह **अतश्चेति** ।

अनु०— अतश्चेष्टत एव निर्गताः ।
क्रीडन्ति

**अत** एभ्य उत्तमेभ्यो निर्गताश्चेति सम्बन्धः । **इष्टम्** इच्छा । नपुंसके भावे क्तः । निर्गतानां पुनः प्रवेशोऽस्ति न वेत्यत आह **भूयश्चेति** ।

भूयश्च समाविशन्ति
तानेव

**तान्** पूर्वप्रविष्टानेव ।

नन्वेवंविधा मुक्तिः क्वापि नोपलब्धेत्यत आह **सायुज्यमिति** ।

सायुज्यमिदं वदन्ति ॥

**वदन्ति** पुराणादीनि । सयुजां भावो हि **सायुज्यम्** । किं इदं सायुज्यं सर्वेषामस्ति । नेति ब्रूमः । तर्हि सायुज्यहीनानां कीदृशी वृत्तिरित्यत आह **सायुज्येति** ।

एतत्प्रसङ्गान्मुक्तौ प्रवेशमात्रमुक्तं न तु देहलयः । तेषामुत्क्रमणस्य विद्यमानत्वात् । **वर्णाश्रमाचाररता** इत्यनेन मनुष्याणां मुक्तौ वर्माश्रमवत्त्वमस्तीति सूचयति । धर्मस्य तु स्वायम्भुवे मनौ लय एव । **काले** मोक्षकाले । **सर्वे पितरः** तं धर्ममेव संयान्ति । **सर्वे सुरानुगा** गन्धर्वाद्याः कुबेरम् ।

**परि०— लय एवेति** । न तूत्क्रान्तिरित्यर्थः ।

**यादु०— एतत्प्रसङ्गादिति** । इदमुपलक्षणम् । वक्ष्यमाणानामपि पितॄणां सुरानुगानां च प्रवेशमात्रं न देहलयः । तेषां प्रतीकालम्बनत्वेनोत्क्रमणस्य विद्यमानत्वात् गन्धर्वाद्या इत्यत्र आद्यपदेन सिद्धचारणानां ग्रहणम् ।

**वं०प०— अपवादमिति** । शिष्टा इति सामान्योक्त्या यमधर्मपितृगन्धर्वादीनामप्यग्नौ लयप्राप्तेः तदपवादमाहेत्यर्थः ।

**कं०रा०—** वर्णाश्रमाचाररतानां मनुष्याणां धर्मे देहलय एव किं न स्यादित्यत आह **तेषामिति** ।

**शे०चं०— अस्येति** । 'विशन्ति शिष्टा अपि हव्यवाहमि'त्यस्येत्यर्थः । मनुष्या धर्मे इत्येतावता पूर्तेर्वर्णाश्रमेत्यादितद्विशेषणानर्थक्यमाशङ्क्य तत्प्रयोजनमाह **वर्णेति** ॥ **लय एवेति** । न प्रवेशमात्रमित्यर्थः ।

**॥ इति वर्णाश्रमनिष्ठमनुष्याणां, पितृदेवतानां, गन्धर्वादीनां लयक्रमः ॥**

* * *

**॥ अथ सायुज्यमुक्तिनिरूपणम् ॥**

१४० **सु०—** उपसंहरति **विमुक्तीति** ।

**अनु०— विमुक्तिकाले प्रविशन्त्यभीक्ष्णं**
**भोगांश्च तद्देहगताः प्रभुञ्जते ।**

एवं सर्वे यथोक्तप्रकारेण विमुक्तिकाले प्रविशन्त्युत्तमानिति शेषः । न केवलं प्रविशन्ति किं तर्हीत्यत आह **अभीक्ष्णमिति** । आविष्टग्रहवदित्यर्थः । किमनेन प्रवेशेनेत्यत आह **आनन्देति** ।

## आनन्दसुव्यक्तिरमुत्र तेषां
## भवति

**अमुत्र उत्तमेषु प्रवेशेन** ।

कं०रा०— परदेहगतानां कथं भोग इति शङ्कानिरासार्थमाह **आविष्टग्रहवदिति** ।

शे०चं०— सप्तम्यर्थेऽत्र लय इत्यभिप्रेत्य अपेक्षितं पूरयन् योजयति **उत्तमेषु प्रवेशेनेति** ।

* * *

१४१ **सु०— प्रविष्टानां पुनर्निर्गमोऽस्ति न वेति शङ्कायामाह अतश्चेति** ।

## अनु०— अतश्चेष्टत एव निर्गताः ।
## क्रीडन्ति

**अत** एभ्य उत्तमेभ्यो **निर्गताश्चे**ति सम्बन्धः । **इष्टम्** इच्छा । नपुंसके भावे क्तः । निर्गतानां पुनः प्रवेशोऽस्ति न वेत्यत आह **भूयश्चेति** ।

## भूयश्च समाविशन्ति
## तानेव

**तान्** पूर्वप्रविष्टानेव ।

नन्वेवंविधा मुक्तिः क्वापि नोपलब्धेत्यत आह **सायुज्यमिति** ।

## सायुज्यमिदं वदन्ति ॥

**वदन्ति** पुराणादीनि । सयुजां भावो हि **सायुज्यम्** । किं इदं सायुज्यं सर्वेषामस्ति । नेति ब्रूमः । तर्हि सायुज्यहीनानां कीदृशी वृत्तिरित्यत आह **सायुज्येति** ।

सायुज्यहीनास्तु लये तु सर्वे
प्रोक्तेन मार्गेण विशन्ति सृष्टौ ।
बहिश्च निर्यान्ति

**लये तु** लय एव । **विशन्ति** उत्तमान् । **बहिः** तेभ्यः । एतत्सायुज्यभाजामपि समानमिति नेत्याह **तत इति** ।

ततोऽन्यदापि
सायुज्यभाजां भवति प्रवेशः ॥

**ततः** लयकालात् ।

**परि०— अत** इत्यनुवादः । **एभ्य** इति व्याख्या । तादात्म्यमिति भ्रमनिरासायाह **सयुजामिति** । यद्वा कथमिदं सायुज्यमित्यतः अवयवशक्त्येत्याह **सयुजामिति** । भावार्थे ष्यञ्प्रत्यये आदिवृद्धौ रूपमिति भावः ।

**कं०रा०—** 'अतश्चेष्टत एव निर्गता' इत्यत्रेष्टशब्दस्य कर्मणि निष्पन्नत्वे इच्छातो निर्गता इति विवक्षितार्थस्यालाभः । इच्छाविषयस्य निर्गमनं प्रति हेतुत्वाभावादनन्वयश्चेत्यतो व्याचष्टे **इष्टमिच्छेति** । लये तु सर्व इत्यत्र तुशब्दोऽवधारणार्थ इत्यभिप्रेत्याह **लये तु लय एवेति** । तेभ्य उत्तमेभ्य एतदिति लयकाल एवोत्तमप्रवेशनं सायुज्यभाजामपि समानं किमित्याकाङ्क्षायां ततो नेत्याहेत्यर्थः ॥ **ततो लयकालादिति** । सायुज्यजीवास्तु लये सर्वे प्रोक्तेन मार्गेण विशन्तीति पूर्वग्रन्थे लयशब्दितनाशस्य वेशनक्रियां प्रत्यधिकरणत्वायोगेन लयशब्दस्य लयकालपरतया लयकालस्य प्रकृतत्वात् तत इति परामर्शो युक्तः । पूर्वत्र सृष्टिशब्दोऽपि सृष्टिकालपर इति द्रष्टव्यम् ।

**शे०चं०— अत एभ्य इति** । यद्यप्येतत्तदोशित्युक्तत्वादत इत्येतददोरूपमित्येतेभ्य इति वक्तुमुचितम् । तथाऽप्येतत्तदोशित्यत्रेदम इशित्यत इदम इत्यस्यानुवृत्तिरस्त्वित्याशयेनैवमुक्तम् । क्वचित्तु एतेभ्य इत्येव पाठः । तत्र न किञ्चिदेतदित्यवधेयम् । अतश्चेति चशब्दो न यथाश्रुतसम्बन्धः । किन्तु भिन्नक्रम इति भावेनाह **निर्गताश्चेतीति** । मूले आद्यादित्वात्तृतीयान्तात्तसिरित्यभिप्रेत्य कर्मसाधनताप्रतीतिनिरासाय भावसाधनतामाश्रित्येष्टशब्दं व्याख्याति **इष्टमिच्छेति** । अत्र टीकायामिच्छानुरूपमिति पाठः कल्पितः । मूलकोशेष्वदर्शनात् ॥ **नपुंसक इति** । एषणमिष्टमिति भावे क्त इत्यर्थः । **वदन्ति पुराणादीनीति** । करणे कर्तृत्वोपचारेण समाधेयम् ।

**वा०र०— एतदोऽशिति** । अयं च वृत्त्याद्यभिप्रेतः पाठः । भाष्यकारेण त्वेतदोऽन्निति नान्तपाठ एवोपपत्तिः । तत्र स्वारस्यादिकं नवीनेन हरदत्ताद्युक्तरीत्या वर्णितं तदनुसारेण च प्रागस्माभिरत एव चोपमेत्यधिकरणेषूपपादितम् । साधुत्वं च तत्रैवोपपादितमिति ज्ञेयम् । **यथाश्रुतेति** । यथाश्रुतः सम्बन्धो यस्यासौ तथोक्तः । **करणे कर्तृत्वोपचारेणेति** । पुराणादीनामचेतनत्वेन प्रधानक्रियाकर्तृत्वाभावेऽपि अवान्तरस्वव्यापारे कर्तृत्वमस्तीत्यवान्तरव्यापारवतः करणस्य कर्तृत्वविवक्षया वदन्तीति कर्तृत्वोक्तिरित्यर्थः ।

**स०व्र०— नपुंसक इति** । एषणमिष्टमिति भावे क्त इत्यर्थः । न तु यो यस्माज्जातः स तस्मिन् लीयत इत्युक्तम् । तथात्वे भृग्वादीनां दक्षे लयाभावापातात् । तेषां ततोऽनुत्पन्नत्वात् । तत्राह **एतदिति** ।

**॥ इति सायुज्यमुक्तिनिरूपणम् ॥**

* * *

**॥ अथ 'लय'विषये प्रमाणोल्लेखः ॥**

१४२ **सु०**— नन्वेतत्सर्वं कुतः प्रमाणात् प्रतिपत्तव्यमित्यत आह **उक्तमिति** ।

**अनु०— उक्तं समस्तं परमश्रुतौ हि**

**प्रोक्तं च**

अस्यास्मिँल्लय इत्युक्तं **समस्तम्** । **परमश्रुतिश्च** विस्तरभयान्न पठिता । **च**शब्द उत्तरवाक्येन सम्बध्यते । प्रमाणान्तरमाह **सर्गेति** ।

**सर्गक्रमतो विपर्ययः ।**

**मुक्तौ**

**मुक्तौ सर्गक्रमतो विपर्यय** इति । यो यस्माज्जातः तस्य तस्मिन् मुक्तिरिति तावदङ्गीकरणीयमित्यर्थः । एतच्च अपवादाभावे सतीति ज्ञेयम् । तथा च न्यायविवरणे । कुत एतदित्यत आह **लय इति** ।

**लये यद्वत्**

साधारणप्रलये सर्गक्रमाद्विपर्ययस्य सत्त्वादिति भावः । एतदपि कुत इत्यत आह **अथो इति** ।

**अथो लयश्च**

**विपर्ययेणेत्यवददगिरां प्रभुः ।**

**अथो**शब्दः अर्थान्तरे । **विपर्ययेण** सर्गक्रममपेक्ष्य । **अवदत्** उपपादितवान् । **गिरां** वेदवाचां **प्रभुः** सूत्रकारः । यथा 'विपर्ययेण तु क्रमोऽत उपपद्यते चे'ति ।

लये सृष्टिक्रमतो विपर्ययश्चेत् मुक्तौ तथा भाव्यमित्यत्र किं नियामकमित्यत आह **लय इति** ।

**लयो यतो मुक्तिरियं सुराणां**

**यतः** कारणात् सुराणां **लयः** एव **इयं मुक्तिः** न मनुष्याणामिव प्रागेव देहादुत्क्रान्तिः । तस्मादुक्तं युक्तम् । सामान्यविशेषभावान्न साध्याविशिष्टतादोषः । सर्गश्च उक्तानुगुण एव श्रुत्यादिसिद्ध इति भावः ।

ननु प्राङ् मुक्तानां भोगादिकं समर्थितम् । इदानीं तूच्यते लय एव मुक्तिरिति । तत्कथं पूर्वापरविरोधो न भवतीत्यत आह **भोग इति** ।

**भोगो विशेषेण च**

**विशेषेण** देवपदादप्यतिशयेन । देहहानिलक्षणा मुक्तिर्लयान्न विशिष्यत इत्युक्तं न तु सर्वाऽपीति भावः । अत एव प्रागियमित्युक्तम् ।

**परि०— उत्तरवाक्येनेति** । किञ्चेति वा गिरां प्रभुश्चावददिति वा सम्बध्यत इत्यर्थः ॥ **तथा च न्यायविवरण इति** । तत्समानानां च विशेषवचनाभावे स्वसमानलयस्थान एव लयोपपत्तेरित्यजनकेऽपि लयस्य उक्तत्वादिति भावः । उदाहरणं तु वरुणादजातानामप्यश्विप्रमुखानां विशेषवचनाभावेन स्वसमानाबादिदेवतास्थाने वरुणे लयः । उक्तं हि '(मृत्य)ऋभवः पृथिव्यां वरुण आप' इति श्रुतौ 'पृथिव्यामृभवो विलीयन्ते वरुणेऽश्विनावि'ति ॥ **साधारणप्रलय इति** । महदादिजडसाधारणप्रलय इत्यर्थः ॥ **अर्थान्तरे इति** । प्रकृतमुक्त्यपेक्षया साधारणलयरूपार्थान्तर इत्यर्थः ॥ **उपपादितवानिति** । न्यायनिबन्धनेन निर्णयात्मकत्वात् न तत्र संशयः कार्य इति भावः ॥ **किं**

**नियामकमिति** । तथात्वे मनुष्याणाममपि तथाभावः स्यादिति भावः । ननु 'लयो यतो मुक्तिरियं सुराणामि'त्यनेन विमतः सुरलयः मुक्तिर्भवितुमर्हति सुरलयत्वात् व्यतिरेकेण साधारणलयवदित्यभि-(मतेप्रयोगेसा)प्रेतानुमाने साध्याविशिष्टता साधनस्येत्यत आह **सामान्येति** । सुरलयत्वरूपविशेषेण मुक्तित्वसामान्यं साध्यते । अयं वृक्षः शिंशुपात्वात् इतिवदित्यतो न दोष इति । सुराणां लयः सर्गक्रमाद्विपर्ययेण भवितुमर्हति लयत्वात् साधारणलयवत् इति पूर्वश्लोकाभिमते प्रयोगे तु साध्या-विशेषशङ्कैव नास्ति हेतुसाध्ययोरत्यन्तभेदात् ।

केचित्तु विमतो लयः सृष्टितो विपरीतक्रमवान् लये विपरीतक्रमसत्त्वादिति पूर्वत्र प्रयोगोऽभिमतः । तथा च लये विपरीतक्रमसत्त्वाल्लयो विपरीतक्रमवानित्युक्तं स्यात् । एवं च साध्या-विशेषः लयसामान्यगतेन विपरीतक्रमेण लयविशेषसुरलयमुक्तौ साध्यत इति न दोष इत्यर्थः इत्याहुः । ननु सृष्टिक्रमो (यदि) भवदुक्तलयक्रमात् क्वचिदन्यथाऽप्यस्तु न हि जनकजन्ययोरानु-पूर्वीनियमे नियामकमस्तीत्यत आह **सर्गश्चेति** । तस्मादशेषा इत्यादिना येन क्रमेण लय उक्तः तद्विपरीतक्रमो नियमेन श्रुत्यादिसिद्धो न क्वचिदन्यथा अस्तीत्यर्थः ॥ **प्राङ्मुक्तानामिति** । 'भोगांश्च तद्देहगताः प्रभुञ्जते' इत्यत्रेत्यर्थः । यथेष्टतो निर्गत्यादिः **आदिपदार्थः** । ननु लये विपरीतक्रमश्चेत् मुक्तावपि तथा भाव्यमित्येतत् कुतः । तथात्वे मनुष्याणामपि तथा स्यादिति भावेन शङ्कितस्य किमुत्तरमित्यत आह **देहहानीति** ॥ **अत एवेति** । सुरलयरूपा मुक्तिरेव लयाविशिष्टेत्यभिमतत्वा-देवेत्यर्थः ।

**यादु०— तथा च न्यायविवरण इति** । तत्समानां च विशेषवचनाभावे स्वसमानलयस्थान एव लयोपपत्तेरिति न्यायविवरणेऽनुत्पादकेऽपि लयस्योक्तत्वादित्यर्थः । यथा वरुणाद्यनुत्पन्नानामश्विप्रभृतीनां विशेष-वचनाभावात् स्वसमानाबादिलयस्थाने वरुणादौ लय इति ज्ञातव्यम् ॥ **साधारणप्रलय इति** । महदादिजड-साधारणप्रलय इत्यर्थः ॥ यद्वा सामान्यप्रलय इत्यर्थः ॥ **अर्थान्तर इति** । प्रकृतमुक्त्यपेक्षयाऽर्थान्तर इत्यर्थः । तथा च प्रकृतसुरमुक्तिभिन्नः साधारणो लय इत्युक्तं भवति ॥ **उपपादितवानिति** । अतो न तदस्माभिः साधनीयमिति भावः ॥ **सुराणां लय एवेयं मुक्तिरिति** । नन्वेवं साधारणलये सर्गक्रमतो विपर्ययस्य सत्त्वात् सुरमुक्तिरूपप्रलयोऽपि तद्वानिति साधने प्रलयगतेन विपरीतक्रमेण प्रलयेऽपि विपरीतक्रमः साध्यत इत्युक्तं स्यात् । ततश्च साध्यसाधनयोरभेदेन साध्याविशिष्टतेत्यत आह **सामान्यविशेषेति** । साधारणलयसुरमुक्त्योरिति शेषः । तथा च लयसामान्यधर्मभूतः सर्गक्रमतो विपर्ययस्तद्विशेषरूपायां मुक्तौ साध्यते न तु लयसामान्य एव, येनोक्तदोषः स्यादिति शेषः । ततश्चायं प्रयोगः । सुराणां सायुज्यरूपा मुक्तिः लयसामान्यधर्मभूतसर्गक्रम-विपरीतक्रमवती । लयविशेषत्वात् । यो यद्विशेषः स तत्सामान्यधर्मवान् यथा ब्राह्मणविशेषस्तत्सामान्यधर्म-

भूताध्ययनादिमानिति । यद्वा सुरा मुक्तौ सर्गक्रमवैपरीत्यवन्तो लये सर्गक्रमवैपरीत्यवत्त्वात् । व्यतिरेकेण यज्ञदत्तवदिति प्रयोगः । अत्राप्रयोजकत्वमाशङ्क्य तन्निवर्तकतया लयो यतो मुक्तिरिति पदत्रयं व्याख्यातम् ।

**वं०प०— उक्तानुगुण इति** । यस्य यस्मिन् लयः तस्य तस्मादुत्पत्तिरित्येव श्रुत्यादिसिद्ध इत्यर्थः ॥ **लय एव मुक्तिरिति** । न हि प्रलये भोगोऽस्तीति भावः ॥ **देहहानिलक्षणा मुक्तिरिति** । मुक्तिरेवेत्यर्थः ॥ **सर्वाऽपीति** । मुक्तिरित्यर्थः । 'कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोगश्चतुष्टयमि'ति मुक्तेश्चातुर्विध्यस्य प्रतिपादितत्वादित्यर्थः ॥ **इयमित्युक्तमिति** । 'लयो यतो मुक्तिरियं सुराणामि'त्यत्र इयं मुक्तिर्लय इति विशिष्योक्त्या भोगादिरूपा सर्वा मुक्तिर्लयरूपेति लभ्यते अतो न पूर्वोत्तरविरोध इति भावः ।

**कं०रा०— ननु** यो यस्मात् तस्य तस्मिन् मुक्तिरित्येतदयुक्तम् । अश्विप्रभृतीनां वरुणाद्यनुत्पन्नानां तत्र लयस्याङ्गीकृतत्वादित्यत आह **एतच्चेति** । यो यस्माज्जातस्तस्य तस्मिन्मुक्तिरित्येतच्चापवादाभावे सतीति ज्ञेयम् । वरुणाद्यनुत्पन्नानामश्विप्रभृतीनां वरुणादौ लयस्तु 'पृथिव्यामृभवो विलीयन्ते वरुणोऽश्विनावि'त्यादिश्रुतिबलादङ्गीकृतोऽतो न कश्चिद्दोष इति भावः । वरुणाद्यनुत्पन्नानामश्विप्रभृतीनां वरुणादौ लय इति न्यायविवरणसम्मतिमाह **तथाचेति** । 'तत्समानानां च विशेषवचनाभावे स्वसमानलयस्थान एव लयोपपत्तेरि'ति न्यायविवरणे तथैवोक्तमिति भावः । न्यायविवरणार्थश्च 'स्रष्टृष्वेव च सृज्यानां प्रवेश' इत्यनुव्याख्यानस्थचशब्दव्याख्यानरूपस्य क्वचिदस्रष्टृष्वपीति चशब्द इति सुधावाक्यस्य व्याख्यानावसरे तत्त्वप्रकाशिकानुसारेणास्माभिरनूदितो द्रष्टव्यः ॥ **कुत इति** । यो यस्माज्जातस्तस्य तस्मिन्मुक्तिरित्येतत् कुत इत्यत आहेत्यर्थः ॥ **एतदपीति** । साधारणप्रलये सर्गक्रमाद्विपर्ययस्य सत्त्वमपि कुत इत्यत आहेत्यर्थः ॥ **अथोशब्द इति** । अथोशब्दः साधारणप्रलयरूपार्थान्तरे वर्तत इत्यर्थः । ननु सूत्रकारः सर्ग्रक्रमविपर्ययेण लय इत्यवददित्येतावन्मात्रेण नोक्तशङ्कापरिहार इत्यतो व्याचष्टे **अवददुपपादितवानिति ॥ विपर्ययेण तु क्रमोऽत उपपद्यते चेति** । सूत्रकारः 'कर्ता प्राणादिकस्यास्य हन्ता भूम्यादिकस्य च । यः क्रमाद्व्युत्क्रमाच्चैव स हरिः पर उच्यते । अनुरूपः क्रमसृष्टौ प्रतिरूपो लये क्रमः । इति क्रमेण भगवान् सृष्टिसंहारकृद्धरिरि'ति स्मृत्यवष्टम्भेन 'पूर्वे पूर्वे यतो विष्णोः सन्निधानं क्रमाधिकम् । सामर्थ्याधिकमेतेषां पश्चादेव लयस्तथे'ति वचनप्रमितया पूर्वेषां सामर्थ्याधिक्योपपत्त्या च सर्गक्रमविपरीतक्रमेण लय इत्येतदुपपादितवान् । अतः शङ्कापरिहारो भवत्येवेति भावः । ननु सुराणां लय एव मुक्तिश्चेद्देवतामुक्तिरूपलयस्य सर्गक्रमविपरीतक्रमवत्त्वसाधने लये यद्वदिति दृष्टान्तीकृतसाधारणप्रलयस्य पक्षाविशिष्टता स्यादुभयोर्लयत्वाविशेषादित्यत आह **सामान्येति** । लयसामान्यस्य दृष्टान्तत्वात् देवतामुक्तिरूपलयविशेषस्य च पक्षत्वात् साध्यधर्मवत्तया साध्यो यः पक्षस्तदविशिष्टतारूपो दृष्टान्तस्य नास्तीत्यर्थः ॥ **सर्गश्चेति** । सुराणां लयश्चोक्तलयादिगुण एव श्रुत्यादिसिद्ध इत्यर्थः ॥ **देवपदादप्यतिशयेनेति** । तथाच देवपदादप्यतिशयेन भोगश्च सुराणां मुक्तिरिति भोगविशेषेण चेति मूलस्य योजनेति भावः । ननु सुराणां विशेषेण भोगश्च मुक्तिश्चेल्लय एव मुक्तिरिति सुरमुक्तेर्लयादविशेषोक्तिः कथमित्यतस्तदुक्तेस्तात्पर्यमाह **देहहानिलक्षणेति** । सुराणां देहहानिलक्षणा मुक्तिर्लयात्र विशिष्यत इत्यभिप्रेत्योक्तं न तु सर्वाऽपि मुक्तिर्लयान्न विशिष्यत इत्युक्तमित्यर्थः ॥ **अत एवेति** । देहहानि-

लक्षणा मुक्तिर्लयात्र विशिष्यत इत्यर्थस्याभिप्रेतत्वादेव लयो यतो मुक्तिरियं सुराणामित्यत्रेयमित्युक्तं सुराणां लय एवेयं मुक्तिरित्युक्तम् । इयमितिपदमहिम्नैतत्पादप्रतिपाद्यदेहहानिरूपमुक्तिरेव लभ्यते न तु चतुर्थपादप्रतिपाद्यभोग-रूपमुक्तिरिति भावः ।

**शे०चं०— उत्तरवाक्येन सम्बध्यत इति** । सर्गक्रमत इत्युत्तरवाक्येन सम्बध्यत इत्यर्थः । अनेन उत्तरवाक्योक्तस्यानुमानस्य प्रमाणान्तरत्वसूचकश्चशब्द इत्युक्तं भवति । अत एव प्रमाणान्तरमाहेति वक्ष्यतीति ध्येयम् ॥ **तस्य तस्मिन्मुक्तिरितीति** । तस्य तस्मिँल्लय इत्यर्थः । तत्तदुत्पन्नानामेव यदि तत्र तत्र लयः तर्हि वरुणाद्यनुत्पन्नानामश्विप्रभृतीनां वरुणादौ लयो न स्यादित्यत आह **एतच्चेति** । कुतोऽस्य नियमस्यौत्सर्गिकत्व-मित्यत आह **तथा चेति** । 'तत्समानानां च विशेषवचनाभावे स्वसमानलयस्थान एव लयोपपत्तेरि'ति *न्याय-विवरणे* अनुत्पादकेऽपि लयस्योक्तत्वाद्वरुणाद्यनुत्पन्नानामपि तदुत्पन्नाबादिदेवतासमानानामश्विप्रभृतीनां स्वसमाना-बादिदेवतालयस्थाने वरुणादौ लयो नानुपपन्न इति भावः ॥ **साधारणप्रलय इति** । महदादिजडसाधारणप्रलय इत्यर्थः ॥ **अर्थान्तर इति** । मुक्तिरूपलयविशेषस्य सर्गक्रमापेक्षया विपरीतक्रमवत्त्वं प्रकृतोऽर्थः । ततोऽन्य-द्यत्साधारणलयस्य सर्गक्रमविपरीतक्रमवत्त्वरूपमर्थान्तरं तत्राथोशब्दो वर्तत इत्यर्थः । तथा च प्रकृतसुरमुक्तिभिन्नः प्रलयः साधारणो लय इत्युक्तं भवति ॥ **उपपादितवानिति** । अतो न तदुपपादनीयमिति भावः ॥ **किं निया-मकमिति** । लयेत्यस्य सृष्टिक्रमतो विपर्ययेऽप्यदेवानामिव देवानामप्यन्यथैव मुक्तिसम्भवादप्रयोजकत्वमिति भावः ॥ **इयं मुक्तिरिति** । देहहानिलक्षणा मुक्तिरित्यर्थः । मनुष्याणामिवेत्यत्र मनुष्यशब्दो देवव्यतिरिक्तलक्षको न तु मनुष्यमात्रविषय इति प्रागुक्तमवधेयम् । नन्वेतावता, देवा मुक्तौ सर्गक्रमविपरीतक्रमवन्तो, लये सर्गक्रम-विपरीतक्रमवत्त्वात्, सम्मतवदित्यनुमानमुक्तं भवति । तच्चानुपपन्नम् । मुक्तेरपि लयत्वेन लयगतविपरीतक्रमेण लयगतविपरीतक्रमसाधने हेतुसाध्ययोरभेदेन साध्यवैशिष्ट्यापातादित्यतः साधारणलयसुरमुक्त्योः सामान्यविशेष-भावाल्लयसामान्यगतसर्गक्रमविपरीतक्रमवत्त्वेन हेतुना लयविशेषभूतसुरमुक्तौ सर्गक्रमविपरीतक्रमवत्त्वसाधनान्न साध्यवैशिष्ट्यमित्याशयेनाह **सामान्येति** ॥ **उक्तानुगुण एवेति** । लयक्रमविपरीतक्रमवानेवेत्यर्थः । तथाऽपि कथं पूर्वोत्तरविरोधपरिहार इत्यत आह **देहहानिलक्षणयेति** ॥ **अत एवेति** । सर्वस्या अपि मुक्तेर्लयाविशेषा-भावादेवेत्यर्थः । अन्यथा मुक्तिरित्येव पूर्वत्र वक्तव्यतया इयमिति तद्विशेषणमनर्थकं स्यादिति भावः ।

**वा०र०— ततोन्यद्यत्साधारणेति** । उक्तप्रकृतार्थापेक्षया यदर्थान्तरमिति सम्बन्धः । **साधारण-लयस्य** अमहदादिमहदादिसाधारणलयस्येत्यर्थः । **प्रागुक्तमिति** । देवानां च मनुष्याणामित्यनुव्याख्यावसरे उक्तमित्यर्थः ।

**स०व्र०— तथा चेति** । स्पष्टमिति शेषः । न्यायविवरणं प्रागेवोदाहृतम् ॥ **अर्थान्तर इति** । मुक्तिरूपलयविशेषस्य सर्गक्रमापेक्षया विपरीतक्रमवत्त्वं प्रकृतोऽर्थः । ततोऽन्यद् यत्साधारणलयस्य सर्गक्रम-विपरीतक्रमवत्त्वरूपमर्थान्तरत्वं तत्राथोशब्दो वर्तत इत्यर्थः । नन्वेतावता देवा मुक्तौ सर्गक्रमविपरीतक्रमवन्तः लये सर्गक्रमविपरीतक्रमवत्त्वादित्युक्तं भवति । तन्न । मुक्तेरपि लयत्वेन हेतुसाध्ययोरभेदापातेन साध्यावैशिष्ट्य-

मित्याशङ्क्य लयविशेषभूताया मुक्तेः सर्गक्रमविपरीतक्रयवत्त्वं साध्यं लयसामान्यस्य तत्त्वं हेतुरिति सामान्य-विशेषभावान्न दोष इत्याह **सामान्येति** ॥ **उक्तानुगुणः** । लयक्रमवैपरीत्येनेत्यर्थः । **अत एव** सर्वस्या मुक्तेर्लयाविशेषाभावादेवेत्यर्थः ।

* * *

१४३ **सु०—** भोगश्च मुक्तिरिति सूत्रकारानुक्तं कस्मादुपसङ्ख्येयमित्यत आह **यमिति** ।

**अनु०—** **यं वदिष्यति ।**

**यं** भोगं चतुर्थपादे सूत्रकारो वक्ष्यति मुक्तित्वेन **सः** । प्रमाणान्तरं चाह **उक्तश्चेति** ।

**उक्तश्च बिम्बप्रतिबिम्बभावः**
**पैङ्गिश्रुतावुक्तलयानुसारतः ।**

**बिम्बप्रतिबिम्बभावः** देवानां **उक्तलयानुसारतः** इति । यस्मिन् यस्य अस्माभिर्लय **उक्तः** स बिम्बः अपरः प्रतिबिम्ब इत्युक्तमस्तीत्यर्थः । ततः किमित्यत आह **बिम्ब इति** ।

**बिम्बे लयो यन्नियतश्च मुक्तौ**
**चिदात्मनां तद्वशता च सर्वदा ॥**

**मोक्षानन्तरमपि सर्वदा** । एतदुत्तरत्रोपयोगि । प्रसङ्गादिहोक्तम् । **यद्यस्मान् मुक्तौ** प्रतिबिम्बस्य **बिम्बे लयो नियतः** प्रमाणप्रसिद्धः, तानि चान्यत्र पठितानि, तस्मादुक्तं युक्तमिति ।

**परि०—** **उपसङ्ख्येयमिति** । वक्तव्यमित्यर्थः । यन्नित्यस्यान्वयमाह **स इति** । स भोगो विशेषेणेत्यर्थः । सर्वदित्येतत्संसार इति भ्रमनिरासायाह **मोक्षानन्तरमपि सर्वदेति** ॥ **एतदिति** । मुक्तौ सदा बिम्बवशत्वकथनं 'अत एव चानन्याधिपतिरि'त्येतद्व्याख्याने 'अनन्यभृत्यत्वमिहो-दितेभ्य' इत्यादावुत्तरत्रोपयोगीत्यर्थः । यत्तच्छब्दाध्याहारेण अन्वयमाह **यद्यस्मान्मुक्ताविति** ।

नियत इत्यस्यार्थः **प्रमाणसिद्ध** इति ॥ **तानि चेति** । प्रमाणानि **अन्यत्र** तात्पर्यनिर्णये ॥ **उक्त-मिति** । सृष्टिक्रमतो विपरीतक्रमो लय इत्युक्तं युक्तमित्यर्थः ।

**यादु०— एतदुत्तरत्रेति** । एतन्मुक्तौ चिदानन्दात्मनां बिम्बवशत्वमुत्तरत्र, 'अत एव चानन्याधि-पतिरि'ति सूत्रव्याख्यान इत्यर्थः ॥ **उक्तं युक्तमिति** । सुरमुक्तेः सर्गक्रमविपरीतक्रमवत्त्वं युक्तिसिद्धमित्यर्थः ॥ युक्तिश्च, 'प्रतिबिम्बस्य बिम्बे लयरूपत्वाद्व्यतिरेकेण पितापुत्रादिलयवदि'त्येवंरूपा । श्रुत्युपात्तस्यास्य हेतोर्बलव-त्त्वात् तत्त्वलयरूपसपक्षाद्व्यावृत्तत्वेऽपि नासाधारण्यं दोष इति ज्ञातव्यम् । तदधीनत्वे सति तत्सदृशत्वरूप-प्रतिबिम्बत्वस्य तत्त्वेष्वपि सत्त्वेनान्वय्येवायम् ।

**कं०रा०— स इति** । भोगश्चेति पूर्वेणान्वयः ॥ **एतदुत्तरत्रोपयोगीति** । मोक्षानन्तरमपि सर्वदा चिदानन्दात्मनां बिम्बवदुत्तरोत्तरवचनान्यपि पतिरित्यत्रोपयोगिप्रसङ्गादिहोक्तमित्यर्थः ।

**शे०चं०— स इति** । स इत्यस्य पूर्वेण सबन्धः । ननु मोक्षानन्तरमपि चिदात्मना भगवद्वशत्व-मस्तीत्येतत् 'अत एवानन्याधिपतिरि'ति चतुर्थपादीयाधिकरणप्रमेयमिति तत्रैवेदं वक्तुमुचितम् । अत्र तु तत्कथनस्य का सङ्गतिरित्यत आह **एतदुत्तरत्रेति** । अत्र यद्यपि तथापीति पूरणीयम् । ततश्च यद्यप्येतदुत्तर-त्रोपयोगि तथाऽपि प्रसङ्गादिहोक्तिर्नानुपपन्नेत्युक्तं भवति ॥ **उक्तं युक्तमिति** । देवानां मुक्तेः सर्गक्रमविपरीत-क्रमवत्त्वमिति यदुक्तं तद्युक्तमित्यर्थः ।

**वा०र०— अत एवानन्याधिपतिरिति चतुर्थपादीयेति** । एतच्च मूलपाठानुसारेण । पाठविचारस्तु तत्सूत्रेऽस्माभिर्विधास्यते ।

**स०व्र०— सः** भोगः । ननु मोक्षानन्तरमपि भगवद्वशत्वमस्तीति चतुर्थपादप्रतिपाद्यं किमर्थमत्रोच्यत इत्यत आह **एतदुत्तरत्रोपयोगीति** ॥ **तानि चान्यत्र पठितानीति** ।

**॥ इति 'लय'विषये प्रमाणोल्लेखः ॥**

* * *

**॥ अथ मुख्यप्राणदेवस्य 'लय-मुक्त्योः' निरूपणम् ॥**

१४४ **सु०—** यदुक्तं 'सर्वेषां भूतानां प्राणे लयस्तस्य विष्णावि'ति तदसत् । 'प्राण-स्तेजसि तेजः परस्यां देवतायामि'ति श्रुतिविरोधात् । बिम्बे प्रतिबिम्बस्य लय इति च असत् । न हि प्राणस्तेजोभूतस्य प्रतिबिम्ब इत्यत आह **तेजोऽभिधामिति** ।

अनु०— तेजोऽभिधां तु श्रियमाप्य विष्णु-
मग्रे ततः पुत्रतयैव वायुः ।
आप्तः प्रसूतः पुनरेव विष्णुं
प्रविश्य मुक्तः प्रलयेऽत्र तिष्ठति ॥

**वायुः प्रलये तेजोऽभिधां श्रियमाप्य** तत्र लीनो भूत्वा **विष्णुमाप्तः** । सृष्टिकाले जातेऽग्रे सर्वेभ्यः पूर्वं, **ततो** विष्णोः, **पुत्रतया** हिरण्यगर्भत्वेन **प्रसूतः । पुनरेव प्रलये मुक्तौ विष्णुं प्रविश्य अत्र** विष्णौ तिष्ठति ।

इदमुक्तं भवति । तेजःशब्दस्य लक्ष्मीवाचित्वान्नोक्तविरोधः । एवं तर्हि 'विलीनो हि प्रकृतौ संसारमेती'ति श्रुतेर्वायोः संसारप्रसङ्ग इति चेन्न । इष्टत्वात् । हिरण्यगर्भत्वेन पुनर्जननाङ्गीकारात् । एवमपि ब्रह्मविदो मुक्त्यभावप्रसङ्ग इति चेन्न । हिरण्यगर्भत्वानन्तरं मुक्तिस्वीकारादिति । इदं च प्राणशब्दस्य वायुवाचित्वपक्षमादायोक्तम् । हिरण्यगर्भ-वाचित्वपक्षे तु भाष्योक्तं द्रष्टव्यम् ।

**परि०—** 'श्रियमाप्ये'त्येतस्यार्थः **तत्र विलीनो भूत्वेति** । व्यवहितपदयोरन्वयेनानुवादो **विष्णुमाप्त इति** । अग्रे इत्यनुवादः, **सर्वेभ्यः पूर्व**मिति व्याख्या । ततो विष्णोरित्यपि व्याख्येय-व्याख्यानभावेन ज्ञेयम् । यदुक्तमित्यादिना कृतशङ्कोद्धारप्रकारमाह **इदमुक्तमिति** । यद्वा मूले पुन-र्जननाद्युक्तेः कृत्यं व्यनक्ति **इदमुक्तमिति** ॥ **प्राणशब्दस्येति** । 'प्राणस्तेजसी'ति श्रौतस्येत्यर्थः ॥ **भाष्योक्तमिति** । 'प्राणस्य तेजसि लयो मार्गमात्रमुदाहृतमि'ति 'सोऽध्यक्ष' इति सूत्रभाष्योक्तं प्राणशब्दितहिरण्यगर्भस्य तेजःशब्दितश्रियःप्राप्तिमात्रं न तु तत्र देहलय इत्युक्तं द्रष्टव्यमित्यर्थः ।

**यादु०— तेजोभूतस्येति** । तेजोभूताभिमानिनोऽग्नेरित्यर्थः ॥ **इदं चेति** । प्राणस्य तेजसि लयोप-पादनमित्यर्थः ॥ **भाष्योक्तमिति** । 'प्राणस्य तेजसि लयो मार्गमात्रमुदाहृतम् । सर्वेशितुश्च सवदिरन्तरस्यान्यत्र लयः कथमि'ति भाष्योक्तम् । हिरण्यगर्भस्य तेजसि लयो नाम तत्प्राप्तिमात्रं न तु तत्र देहलय इति प्रमेयं द्रष्टव्यमित्यर्थः ॥ ४-२-७ ॥

*इति श्रीमद्वेदेशतीर्थपूज्यपादानां शिष्येण यदुपतिना विरचितायां सुधाटिप्पण्यां*
*चतुर्थाध्यायस्य द्वितीयः पादः ॥ ४-२ ॥*

वं०प०— **नोक्तविरोध इति** । प्राणस्तेजसीति श्रुतिविरोधो नेत्यर्थः ॥ **एवमपीति** । ब्रह्मविदोऽपि वायोर्हिरण्यगर्भत्वेन पुनर्जननाङ्गीकार इत्यर्थः ।

कं०रा०— **तेजोभूतस्येति** । तेजआख्यभूताभिमानिनोऽग्नेरित्यर्थः ॥ **तेजःशब्दस्य लक्ष्मीवाचित्वान्नोक्तविरोध इति** । 'छाया विष्णो रमा तस्याश्छाया धाते'ति श्रुतेर्वायोर्लक्ष्मीप्रतिबिम्बत्वात् तस्य तेजःशब्दितलक्ष्मीलयाङ्गीकारे प्रतिबिम्बस्य बिम्बे लय इत्युक्तस्य विरोधो नास्तीत्यर्थः । उपलक्षणमेतत् । सर्वेषां भूतानां प्राणे लयस्तस्य विष्णौ लय इति वायोस्तेजःशब्दितलक्ष्मीद्वारा विष्णौ लयस्य विवक्षितत्वात् प्राणस्तेजसि तेजः परस्यां देवतायामिति श्रुतिविरोधो नेत्यपि द्रष्टव्यम् ॥ **इदमिति** । 'प्राणस्य तेजःशब्दितलक्ष्मीलय' इत्येतत् 'प्राणस्तेजसी'ति श्रुतिस्थप्राणशब्दस्य वायुवाचित्वपक्षमाश्रित्योक्तमित्यर्थः ॥ **हिरण्यगर्भेति** । श्रुतिस्थप्राणशब्दस्य हिरण्यगर्भवाचित्वपक्षे तु 'प्राणस्य तेजसि लयो मार्गमात्रमुदाहृतमि'ति भाष्योक्तं द्रष्टव्यमित्यर्थः । तदर्थः 'चतुर्मुखस्य तेजसि लयो नाम तत्प्राप्तिमात्रं न तु देहलयः । तस्य साक्षात्परमात्मनि लययोग्यत्वादि'ति **तत्त्वप्रकाशिकोक्तो** द्रष्टव्यः ।

शे०चं०— **तेजोभूतस्येति** । तदभिमानिनोऽग्नेरित्यर्थः । तेजोभिधामिति तेजःशब्दस्य लक्ष्मीवाचित्वकथनमात्रेणैवोक्तविरोधपरिहारात् भाष्ये इतरांशवैयर्थ्यमित्यतः तत्तद्व्यावर्त्यशङ्काप्रदर्शनपूर्वकं तत्तदंशसार्थक्यं दर्शयन्नेवाभिप्रायमाह **इदमुक्तं भवतीति** ॥ **नोक्तविरोध इति** । प्रतिबिम्बस्य बिम्बे लय इत्युक्तस्य तथा सति प्राणस्य तेजोभूताप्रतिबिम्बत्वात् तेजसि लयाभावप्रसङ्गरूपो विरोधो नेत्यर्थः । नन्वेतद्विरोधपरिहारेऽपि, यदुक्तं प्राणस्य भगवति लय इति तत्तावद्गतमेव । प्राणस्य तेजसि लयाभ्युपगमादित्यत आह **इदं चेति** । प्राणस्य तेजसि लयोपपादनमित्यर्थः । तर्हि प्राणस्य तेजसि लयात् साक्षाद्भगवल्लयाभावप्राप्त्या तदुक्तिरनुपपन्ना स्यादित्यतो हिरण्यगर्भवाचकत्वाभिप्रायेण प्राणस्य भगवति साक्षाल्लयाभिधानमप्युपपन्नमेव । 'प्राणस्य तेजसि लयो मार्गमात्रमुदाहृतमि'ति भाष्योक्तरीत्या हिरण्यगर्भस्य तेजोभिधायां लक्ष्म्यां तत्प्राप्तिरूपलयस्याभ्युपगमेऽपि तत्र साक्षाद्देहलयस्यानभ्युपगमेन भगवत्येव तद्देहलयस्याविरुद्धत्वादित्याशयेनाह **हिरण्यगर्भवाचित्वपक्षे त्विति** ।

स०व०— **नोक्तविरोधः** प्रतिबिम्बस्य बिम्बे लय इति यदुक्तं तद्विरोधः । प्राणस्य तेजोभूताप्रतिबिम्बत्वे तेजसि लयो न स्यादिति विरोधो नेत्यर्थः । नन्वेतद्विरोधपरिहारेऽपि यदुक्तं प्राणस्य भगवति लय इति तत्तावद्गतमेव । प्राणस्य तेजसि लयाभ्युपगमादित्याशङ्क्य प्राणशब्दस्य वायुपरत्वात् तस्य तेजसि लयः सम्भवत्येवेत्याह **इदं चेति** । तर्हि साक्षाल्लयकथनं कथमित्यतः तत्र प्राणशब्दस्य वायुपरत्वात् तस्य च तेजसि लयसम्भवात् साक्षाल्लयोपपत्तिरित्याह **हिरण्यगर्भेति** ॥ **भाष्योक्तम्** । 'प्राणस्य तेजसि लयो मार्गमात्रमुदाहृतमि'ति भाष्योक्तं समाधानमित्यर्थः ।

**॥ इति मुख्यप्राणदेवस्य 'लय-मुक्त्योः' निरूपणम् ॥**

॥ अथ मुक्तानां नित्यसुखवत्त्वम् ॥

१४५ सु०— मुक्तानां स्वस्वोत्तमदेवताः प्रविश्यावस्थानमित्युक्तम् । नैतावदेव । किन्तु भगवत्प्रवेशोऽप्यस्ति । उक्तश्च भोगो नानन्दस्य जनकः किन्तु व्यञ्जक एव । आनन्दस्तु स्वरूपभूत इत्याह **सर्वेऽपीति** ।

अनु०— सर्वेऽपि ते मुक्तगणा अमन्द्र-
सान्द्रं निजानन्दमशेषतोऽपि ।
भुञ्जन्त एवासत ईशदेहे
लयेऽथ सर्गे बहिरेव यान्ति ॥

**सर्वेऽपीत्युक्ते** देवानां प्रकृतत्वात् त एवेति प्रतीतिं वारयितुम् **अशेषतोऽपीत्युक्तम्** । **भुञ्जन्तः** अनुभवन्तः ।

**कं०रा०**— 'भुजोऽनवन' इति भुजेः पालनव्यतिरिक्तेऽभ्यवहाररूपार्थे आत्मनेपदस्य विहितत्वात् प्रकृते च भुञ्जन्तीति परस्मैपदप्रयोगात् पालनार्थत्वं प्रतीयते । तन्निरासार्थं व्याचष्टे **भुञ्जन्तोऽनुभवन्त इति** ।

**शे०चं०**— **अशेषतोऽप्युक्तमिति** । आद्यादिभ्य उपसङ्ख्यानात् प्रथमान्तात्तसिः । ततश्चाशेषा निःशेषा अपि देवा इत्यर्थलाभादुक्तप्रतीतिनिराससिद्धिरिति भावः ॥ **अनुभवन्त इति** । इति यावदिति शेषः ।

॥ इति मुक्तानां नित्यसुखवत्त्वम् ॥

* * *

॥ अथ निर्ऋतेः, मरुद्गणस्य, विष्वक्सेनादीनां लयक्रमः ॥

१४६ सु०— शिष्टा हव्यवाहमित्यस्यापवादान्तरमाह **प्रयातीति** ।

अनु०— प्रयाति धर्मं निर्ऋतिस्तु शक्रं
मरुद्गणाः पारिषदास्तथैव ।
सर्वेऽनिरुद्धं पृतनाधिपाद्याः

**निर्ऋतिस्तु धर्मं प्रयाति । मरुद्गणाः शक्रं प्रयान्ति । तथाशब्दः** समुच्चये । **पृतनाधिपाद्या** विष्वक्सेनाद्याः **सर्वे** भगवतः पार्षदा **अनिरुद्धं प्रयान्ति । देहलयार्थमिति** शेषः । अनिरुद्धस्य तु कामे लय उक्त एवेत्येवार्थः । अत्र **प्रमाणमाह तुरेति ।**

## तुरश्रुतिर्हीत्थम्

**अत एव एतत् तत्रैव नोक्तं परमश्रुतौ अनुक्तत्वात् ।**

**परि०— अपवादान्तरमिति** । 'वर्णाश्रमाचाररता' इत्युक्तापवादापेक्षाऽपवादान्तरमित्यर्थः ॥ **तत्रैवेति** । लयक्रमोक्तिप्रकरण एवेत्यर्थः । 'अत एवे'त्युक्तं व्यनक्ति **परमश्रुतावनुक्तत्वादिति** । अस्यार्थस्य तत्रैवोक्तौ 'उक्तं समस्तं परमश्रुतौ हि प्रोक्तमि'त्येतदसाधु स्यात् । परमश्रुतौ अस्यार्थस्याभावात् अतोऽत्र व्यवधानेनोक्तमित्यर्थः ।

**वं०प०— अपवादान्तरमिति** । शिष्टा इति सामान्योक्तेर्निर्ऋतिमरुद्गणपार्षदानामपि अग्नौ लयप्राप्तेरपवादमाहेत्यर्थः । वर्णाश्रमाचारेत्यादिना धर्मपितृगन्धर्वादिविषयेऽपवादस्योक्तत्वादपवादान्तरमित्युक्तम् ॥ **अत एवेति** । तुरश्रुत्युक्तत्वादेवेत्यर्थः । यद्यप्ययमपवादो वर्णाश्रमाचारेत्याद्यनन्तरं तत्रैव वक्तव्यो न तु व्यवधानेनात्र । तथाऽपि तत्रोक्तं समस्तं परमश्रुतौ हि प्रोक्तमित्युच्यते । प्रयाति धर्ममित्यादिप्रमेयं परमश्रुतौ नोक्तं किन्तु तुरश्रुतावेव अतो व्यवधानेनोक्तमित्यर्थः ॥ ४-२-७ ॥

*इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचिते टीकाऽधृतसुधावाक्यार्थविवरणे चतुर्थाध्यायस्य द्वितीयः पादः समाप्तः ॥ ४-२ ॥*

**कं०रा०—** अपवादान्तरमिति उक्तेभ्योऽन्ये हव्यवाहं विशन्तीत्यस्य 'वर्णाश्रमाचाररता मनुष्या धर्म'-मित्युक्तोऽपवाद उक्तः । इदानीं तस्यापवादान्तरमाहेत्यर्थः । **अत एवैतदिति** । प्रयाति धर्मं निर्ऋतिरित्यादिप्रमेयस्य तुरश्रुतावुक्तत्वेन परमश्रुतावनुक्तत्वादेतत्प्रमेयं वर्णाश्रमाचाररता मनुष्या धर्ममित्यत्रैव नोक्तमित्यर्थः । उभयोरपवादत्वाविशेषेऽपि वर्णाश्रमाचाररता मनुष्या धर्ममित्यादेः परमश्रुत्युक्तत्वात् 'प्रयाति धर्मं निर्ऋतिरि'-त्यादेस्तुरश्रुत्युक्तत्वात् प्रकरणभेदेनोक्तेरिति भावः ॥ ४-२-७ ॥

*॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतंत्रस्वतन्त्रश्रीमद्व्यासतीर्थमुनिवर्यपौत्रश्रीपतितीर्थपूज्यपादानां शिष्येण रामचन्द्रभिक्षुणा कृतायां श्रीमन्न्यायसुधाव्याख्यायां चतुर्थाध्यायस्य द्वितीयः पादः ॥ ४-२ ॥*

**शे०चं०— अपवादान्तरमिति** । वर्णाश्रमाचाररता इत्यपवादस्योक्तत्वादपवादान्तरमित्युक्तम् । ननु च शक्रं मरुद्गणा इत्यपि प्रागेव किं नोक्तमित्यत आह **अत एवेति** । अत एवेत्युक्तमेव दर्शयति **परमेति** । तुरश्रुत्युदितत्वे तच्छ्रुत्यनुक्तत्वादेव तच्छ्रुत्युक्तक्रमोक्तिदशायामेवास्यानुक्तिर्युक्तेत्यर्थः ।

यद्विद्याधीशगुरोः शुश्रूषान्या न रोचते यस्मात् ।
अस्त्वेषा भक्तियुता श्रीविद्याधीशपादयोः सेवा ॥

*इति श्रीमत्पदवाक्यप्रमाणविदामग्रेसराणां श्रीमत्सकलविद्वच्चक्रचूडामणीनां श्रीमद्विद्याधीशपूज्यपादानां निजशिष्यकेशवस्य कृतौ श्रीमद्गुरुराजोपदिष्टमार्गानुवर्तिन्यां श्रीमन्न्यायसुधाविषमपदवाक्यार्थविवृतौ शेषवाक्यार्थचन्द्रिकायां चतुर्थाध्यायस्य द्वितीयः पादः ॥ ४-२ ॥*

**वा०र०— तच्छ्रुतीति** । परमश्रुतीत्यर्थः ।

आनन्दाब्धिप्रजातत्रिदशतरुगुरुश्रीनिवासानुजश्री
विद्याधीशाख्यरत्नाद्भुतविदमृतगोः केशवाचार्यवर्यात् ।
रुग्मिण्यायां प्रजातस्य विबुधनरसिंहस्य गुर्वीयसौध-
व्याख्यापाठादिशोधात्मकविवृत्तिकृतावौत्क्रमः पात्समाप्तः ॥

श्रीमन्न्यायसुधागूढशेषवाक्यार्थचन्द्रिका ।
गुरुराजकृता पाद उत्क्रान्ते सेविता मया ॥

*इति श्रीमत्सकलविद्वच्चक्रचूडामणिश्रीगुरुराजवर्यविरचितश्रीमन्न्यायसुधाव्याख्यानरूपशेषवाक्यार्थचन्द्रिकायाः व्याख्यापाठादिशोधे गुरुराजपुत्रनरसिंहकृते चतुर्थाध्याये द्वितीयः पादः ॥*

**स०व्र०—** ननु शक्रं मरुद्गणा इत्येतत्प्रागेव किं नोक्तमित्यत आह **अत एवेति** । यतोऽस्मिन्नर्थे तुरश्रुतिः प्रमाणत्वेन प्रदर्श्यते अत एवेत्यर्थः ॥ *इति चतुर्थे द्वितीयः ॥*

* * *

**१४७ सु०— पादार्थमुपसंहरति इयमिति ।**

**अनु०— इयं विमुक्तिः ॥**

***इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने चतुर्थाध्यायस्य द्वितीयः पादः ॥***

देवादीनां देहलयरूपा **विमुक्तिः** उक्तेति ॥

**परि०**— शेषस्योपयोगमाह **पादार्थमिति** ॥ ४-२-७ ॥

*इति श्रीमन्न्यायसुधापरिमळे राघवेन्द्रयतिकृते चतुर्थाध्यायस्य*
*द्वितीयः पादः सम्पूर्णः ॥*

**॥ इति निर्ऋतेः, मरुद्गणस्य, विष्वक्सेनादीनां लयक्रमः ॥**
**॥ इति शेषादिमार्गेण देवतानां लयक्रमः ॥**

* * *

१४८ **सु०**—

इति श्रीमत्पूर्णप्रमतिभगवत्पादसुकृते-
रनुव्याख्यानस्य प्रगुणजयतीर्थाख्ययतिना ।
कृतायां टीकायां विषमपदवाक्यार्थविवृतौ
चतुर्थेऽध्यायेऽत्रोत्क्रमणचरणः पर्यवसितः ॥

*इति श्रीमन्न्यायसुधायां चतुर्थाध्यायस्य द्वितीयः पादः ॥*

★ ★ ★

।। श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ।।

# अथ चतुर्थाध्यायस्य तृतीयः पादः

**।। अथ पादप्रतिपाद्यार्थनिरूपणम् ।।**

१ **सु०— मार्गो गम्यं चास्मिन्पाद उच्यत इति भाष्यम् । तत्प्राक् प्रसङ्गाद्विवृतमपीह अवसरप्राप्तौ विशेषतो विवृणोति उत्क्रान्तेति ।**

**अनु०— उत्क्रान्तमार्गश्च विमुक्तगम्यं**
**पादोदितं**

**ये शरीरादुत्क्रान्ता मानुषास्तेषां मार्गो भगवल्लोकगमनार्थः । गम्यमपि तेषामेवेति प्रतीतिनिरासाय उक्तं विमुक्तेति । ये कर्मणो देहाच्च विमुक्ताः तेषां सर्वेषामपि गम्यम् । इदमुभयमेतत्पादोदितम् ।**

**परि०— प्राक् प्रसङ्गाद्विवृतमपीति** । 'देवानां मोक्ष उत्क्रान्तिश्चास्मिन्पाद उच्यते' इति द्वितीयपादीयभाष्यविवरणप्रसङ्गात् 'उत्क्रान्तिमार्गौ देवानां न प्रायेण भविष्यत' इत्यनेन विवृतमपीत्यर्थः ।

**यादु०— प्रागिति** । 'उत्क्रान्तिमार्गौ देवानां न प्रायेण भविष्यत' इत्यत्रेत्यर्थः ।। **विशेषत इति** । स्फुटतयेत्यर्थः ।

**कं०रा०— तत्प्राक् प्रसङ्गादिति** । 'उत्क्रान्तिमार्गौ देवानां न प्रायेण भविष्यत' इत्यत्र तृतीयपादप्रतिपाद्यत्वेन भाष्योक्तयोर्मार्गगम्ययोर्मध्ये मार्गो देवानां नास्तीत्युक्त्या देवव्यतिरिक्तानां मार्गः सर्वेषां गम्यं च अस्मिन्पाद उच्यत इत्यर्थपरतया मार्गो गम्यं च अस्मिन्पाद उच्यत इति भाष्यं व्याख्येयमिति सूचितत्वात् तद्भाष्यं प्राक् प्रसङ्गात् सामान्यतो विवृतमपि इह अवसरप्राप्तौ स्फुटत्वेन विवृणोतीत्यर्थः ।। **शरीरादुत्क्रान्ता इति** । शरीरात् सुषुम्नानाड्योत्क्रान्ता इत्यर्थः ।। **उभयमेतत्पादोदितमिति** । एतत्पादस्योभयप्रतिपादकत्वेऽर्थैक्याभावादेकवाक्यता न स्यादिति शङ्कासमाधानमस्माभिः प्रागुक्तमनुसन्धेयम् ।

**शे०चं०— प्रागिति** । 'उत्क्रान्तिमार्गो देवानां न प्रायेण भविष्यतः' इत्यादिना पूर्वपाद इति शेषः। एतत्पादप्रतिपाद्यस्य पूर्वपादे विवरणमसङ्गतमित्यत उक्तं **प्रसङ्गादिति** । अत्र पादे तद्विवरणस्य का सङ्गतिरित्यत उक्तम् **अवसरेति** । तर्हि विवृतस्य पुनर्विवरणात् पौनरुक्त्यमित्यत उक्तम् **विशेषत इति** । स्फुटतयेत्यर्थः । पूर्वं देवानां तृतीयपादोदितो मार्गो नेति निषेधेन उत्क्रान्तानामेव मार्गः तत्पादोदितं गम्यं तु सर्वेषामित्यर्थतः सूचितस्यार्थस्यात्र मुखतः सङ्कीर्तनान्न पौनरुक्त्यमिति भावः ।

**वा०र०—** जातिरूपार्थैक्यनिमित्तकमेवेतीति पाठः ।

आनन्दाब्धिप्रजातत्रिदिशतरुगुरुश्रीनिवासानुजश्री-
विद्याधीशाख्यरत्नाद्भुतविदमृतगोः केशवाचार्यवर्यात् ।
रुग्मिण्यायां प्रजातस्य विबुधनरसिंहस्य गुर्वीयसौध-
व्याख्यापाठादिशोधात्मकविवृतिकृतौ मार्गपादः समाप्तः ॥

*इति श्रीमत्सकलविद्वच्चक्रचूडामणिश्रीगुरुराजवर्यविरचितश्रीमन्न्यायसुधाव्याख्यानरूपशेषवाक्यार्थचन्द्रिकायाः व्याख्यापाठादिशोधे गुरुराजपुत्रनरसिंहकृते चतुर्थाध्यायस्य तृतीयः पादः ॥*

**॥ इति पादप्रतिपाद्यार्थनिरूपणम् ॥**

* * *

**॥ अथ एतत्पादगताधिकरणानां पूर्वपक्षसिद्धान्तयुक्तयः ॥**

२ **सु०—** अत्राधिकरणेषु पूर्वपक्षयुक्तीः सिद्धान्तयुक्तीश्चाह **सुक्रमेति** ।

**अनु०—** सुक्रमविक्रमौ च ।
सान्तानिकप्राप्तिरभीष्टता च
सौकर्यमित्यन्यमतस्य तर्काः ।
विशेषसम्प्राप्तिरुरुत्वमाप्तिः
क्रमानुरागः कथितानुवृत्तिः ।
सिद्धान्तनिर्णीतिकराः

अन्यमतस्येति जातावेकवचनम् । सिद्धान्तनिर्णीतिकरास्तर्का इति शेषः ।

**परि०**— सुक्रमेत्यादेर्मूलस्थस्यायं सम्बन्धः । अर्चिरादिना तत्प्रथितेः । **सुक्रमः** पूर्वमतस्य युक्तिः **विशेषसम्प्राप्तिः** सिद्धान्तस्य ॥ वायुशब्दादविशेषविशेषाभ्याम् । **सुक्रमः विशेषसम्प्राप्तिः** ॥ तटितोधिवरुणः । **सुक्रमः विशेषसम्प्राप्तिः** ॥ आतिवाहिकस्तल्लिङ्गात् । **सुक्रमः विशेषसम्प्राप्तिः** । वैद्युतेनैव ततस्तच्छ्रुतेः । **विक्रमः उरुत्वम्** । कार्यं बादरिः । **सान्तानिकप्राप्तिः अभीष्टता च सौकर्यम्** इति पूर्वपक्षयुक्तयः । **आप्तिः क्रमानुरागः कथितानुवृत्तिरिति** सिद्धान्तस्य । पूर्वत्र तर्का इति श्रवणादत्रापि तथैवेति भावेनाह **तर्का इति शेष इति** ।

**गु०दी०**— **अर्चिरादिना तत्प्रथितेरित्यधिकरणे** तत्र मार्गस्यान्यथोक्तेरधिकारिभेदेन पृथक् पृथक् मार्गसुक्रमोपपत्तेरिति **सुक्रम** एव पूर्वपक्षप्रापकः । 'सर्वे वा एते उत्क्रामन्ति तेऽर्चिषमेवाभियन्ति ततो वायुं ततोऽहः पूर्वपक्षमित्येष उ एव ब्रह्मपथः द्वे सृती अशृणवं पितृणामहं देवानामुत मर्त्यानाम् । ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं चे'ति विशेषश्रुतितो ज्ञानिनामेकमार्गस्यैव प्राप्तत्वादिति **श्रुतिविशेषाख्यविशेषसम्प्राप्तिरेव** सिद्धान्तस्थापिका । अहं पितॄणां देवानां च द्वे सृती मार्गौ अशृणवम् । उत मर्त्यानां स्वर्गलोकादधः पततां एकं मार्गमशृणवं इति पूर्वेणान्वयः । ताभ्यामेजत् 'एजृ कंपने' इति धातोः कर्मिणो ज्ञानिनश्चेति द्विविधविशिष्टचेष्टायुक्तं जगच्चेति । देवयानेन विष्णुलोकं पितृयानेन स्वर्गलोकमन्तरा इमौ द्वौ मार्गौ विना मध्ये यन्मर्त्यानां वर्त्म तेन पितरं मातरं एतीति श्रुत्यर्थः ॥ ४-३-१ ॥

**वायुशब्दादविशेषविशेषाभ्यामित्यधिकरणे** 'अर्चिषे वायुमागच्छति अर्चिषोऽहरागच्छति' इति श्रुतिद्वयोक्तयोः अहर्वायोरुभयोरपि अधिकारिभेदेन द्वितीयप्राप्यत्वे मार्गद्वयस्यापि एकग्रामप्रापकत्वदर्शनेन सुक्रमः स्यादिति पुनरपि **सुक्रम** एव पूर्वपक्षप्रापकः । 'स इतो गतो द्वितीयां गतिं वायुमागच्छती'ति वायोर्द्वितीयगम्यत्वेन विशिष्य श्रवणात् अर्चिषोऽहरिति सामान्यवचनं तृतीयप्राप्यतयापि नेयमिति **विशेष** एव सिद्धान्तस्थापकः ॥ ४-३-२ ॥

**तटितोऽधिवरुणःसम्बन्धादित्यधिकरणे** 'संवत्सराद्वरुणलोकं संवत्सरात्तटितमागच्छती'ति श्रुतिद्वयविगानदर्शनादधिकारिभेदेन मार्गद्वयकथने पूर्ववत् सुक्रम इति **सुक्रम एव** पूर्वपक्षप्रापकः । 'तटिता ह्यूह्यते वरुणलोक' इति तटितो वरुणलोकस्य च वाह्यवाहकभावसम्बन्धकथनात् संवत्सरात्तटिदेव प्राप्या । संवत्सराद्वरुणलोकमिति सामान्यवचनं तु पूर्ववत्तृतीयप्राप्यतयाऽपि नेयमिति **विशेष** एव सिद्धान्तस्थापकः ॥४-३-३॥

**वैद्युतेनैव ततस्तच्छ्रुतेरित्यधिकरणे** 'सोमादग्निं अग्नेरिन्द्रमि'ति सोमादवरस्याग्नेरपि प्राप्तेः वैद्युतशब्दोक्तप्रधानवायोः ब्रह्मणोऽर्वाक् कश्चिदवरः प्राप्योऽस्त्विति क्वचित् **विरुद्धक्रमाख्यविक्रम** एव पूर्वपक्षप्रापकः । उत्तमत्वात् तस्यैव ब्रह्मप्रापयितृत्वशक्तेर्न मध्येऽन्यः कल्पनीय इति सम्यक् ब्रह्मणः प्राप्तिर्यस्मात्सम इति **सम्प्राप्तिः** सिद्धान्तस्थापिका ॥ ४-३-४ ॥

**कार्यं बादरिरस्य गत्युपपत्तेरिति सूत्रे** चतुर्मुखमुक्तिपर्यन्तं बन्धस्य सन्ततत्वनियमात्तावत्परब्रह्मप्राप्तिर्नास्ति । किन्तु कार्यब्रह्मप्राप्तिरेवेति **सान्तानिकत्वमेव** पूर्वपक्षप्रापकम् । **परं जैमिनिर्मुख्यत्वादिति सूत्रे** परब्रह्मण एव ब्रह्मशब्दमुख्यार्थत्वेन प्रथमप्राप्तत्वादवरोहायुक्तेः तस्यैव प्राप्तिनियम इति **प्राप्तिः** पूर्वपक्षप्रापिका । **न च कार्ये प्रतिपत्त्यभिसन्धिरिति सूत्रे** परप्राप्तिर्यस्याभीष्टा तस्य तत्प्राप्तिरिति नियमः । न तु प्राप्नुवानीत्यभिसन्धिरहितकार्यप्राप्तिरित्य**भीष्टतैव** पूर्वपक्षप्रापिका । बहुधा श्रुतेर्यथासौकर्यं चतुर्मुखस्य परस्य वा प्राप्तिरित्यभीष्टतैव पूर्वपक्षप्रापिका । बहुधा श्रुतेर्यथासौकर्यं चतुर्मुखस्य परस्य वा प्राप्तिरिति **सौकर्यमेव** श्रुतिद्वयविगानपरिहाराय कस्यचित्पूर्वपक्षप्रापकम् ॥ ४-३-५ ॥

**अप्रतीकालम्बनान्नयतीत्यादिसिद्धान्तसूत्रे** 'यान्ति देवं परं केचित् पूर्वं केचिल्लये विभुम् । योग्यतातारतम्येन विशेषोऽयमपीष्यते' इति श्रुतेर्योग्यतातारतम्यबलेन केषाञ्चिदवरत्वात् केषाञ्चिदुरुत्वादुच्चनीचयोरेकप्रकारप्राप्त्ययोगेन च **तथा प्राप्तेर्**यथा श्रुतौ कथितं तथैव परब्रह्मप्राप्तिरिति बादरिमतप्राप्तपूर्वपक्षस्योरु**त्वमेव** सिद्धान्तस्थापकम् । परं ब्रह्मैव प्राप्नुवन्तीति जैमिन्युक्तपूर्वपक्षस्याप्युक्तश्रुतावेव 'केचिल्लये विभुमि'ति केषाञ्चित् परान्तकाल एव परब्रह्मप्राप्त्युक्तेः सर्वेषां पूर्वमेव परब्रह्मप्राप्तिरिति नियमो **नेत्याप्तिरेव** सिद्धान्तस्थापिका । 'क्रमानुरागी भगवान् क्रमात्पुम्भिरवाप्यते अतः क्रमात्समृद्धे तु ज्ञाने ब्रह्मलये नरैः । प्राप्यते नियमेनैव कैश्चिदेवाप्यते मृतावि'ति **भगवतः क्रमानुरागः** तृतीयपूर्वपक्षस्य सिद्धान्तस्थापकः । 'प्रतीकाश्चतुर्मुखमप्रतीकाश्च परममुहैते गच्छन्त्यागच्छन्ति च । चतुर्मुखात्परमं परमाच्चतुर्मुखं यावद्विलयम् । अथ सह चतुर्मुखेन विमुच्यन्ते । आनन्दिनो भवन्ती'ति श्रुत्युक्तानुवृत्तेरेव न्याय्यत्वात् । अप्रतीकालम्बनाः परमं प्राप्नुवन्ति । कदाचित् स्वेच्छया चतुर्मुखं चाप्नुवन्ति प्रतीकालम्बनास्तु चातुर्मुखमेवेति **कथितानुवृत्तिरेव यथासौकर्यं** चतुर्मुखप्राप्तिर्वा परब्रह्मप्राप्तिर्वेति पूर्वपक्षस्य पूर्वोक्तपूर्वपक्षत्रयस्य च सिद्धान्तस्थापिका इति बादरायणस्य मतम् । न चैतेषां मतानां परस्परविरोधः शङ्कनीयः । बादर्युक्तप्रकारेण प्रतीकालम्बनानां चतुर्मुखप्राप्तिरेव । अप्रतीकालम्बनानां तु जैमिन्युक्तरीत्या परब्रह्मप्राप्तिरेव । स्वेच्छयाऽपि परब्रह्मप्राप्तियोग्यानामेव परब्रह्मप्राप्तिः । कार्यब्रह्मप्राप्तियोग्यानां तु तत्प्राप्तिः । न तु सर्वेषामनियमेन बादरिजैमिन्युक्तरीत्या नियमेन च प्राप्तिर्न । अतः सर्वथा विरोधो न । ईषद्विरोधस्तु उभयथा च दोषादिति सर्वमतेष्वपि ईषदीषद्दोषदर्शिव्यासवत् सर्वज्ञत्वाभावात् न दोषाय । अत एव किञ्चिन्मतभेदे सत्यपि सर्वथा मतभेदाभावादेकाधिकरण्यमिति सर्वमवदातम् ॥४-३-६॥

*इति श्रीमद्वादिराजपूज्यचरणविरचितायां गुर्वर्थदीपिकायां चतुर्थाध्यायस्य तृतीयः पादः ॥*

**कं०रा०**— एतत्पादीयपूर्वपक्षाणां बहुत्वादन्यतमस्य तर्का इत्यत्र अन्यतमस्येत्येकवचनमयुक्तमित्यत आह **अन्यतमस्येति ॥ जातावेकवचनमिति** । यद्यपि सूत्रेऽप्रतीकालम्बनानां गम्यमुक्तमिति 'अप्रतीकालम्बनान्नयती'ति सूत्रे 'परं जैमिनिर्मुख्यत्वादि'ति सूत्रस्थस्य परमित्यस्यानुवृत्तेरप्रतीकालम्बनान् परं ब्रह्म नयतीत्यत्र प्रतीकालम्बनानां परब्रह्मरूपगम्यं कण्ठरवेणोक्तं प्रतीकालम्बनानां तु कार्यब्रह्मरूपं गम्यं परिशेषसिद्धम्, अतः सूत्रे कण्ठतोक्तमेव आदौ वक्तव्यमिति । तथाऽप्यस्यानुव्याख्यानस्यास्पष्टस्य स्पष्टीकरणार्थं प्रवृत्तत्वात् परिशेष-

सिद्धस्य चास्पष्टत्वात् । अप्रतीकालम्बनशब्दार्थस्याभावस्य प्रतीकालम्बनरूपभावनिरूप्यत्वाच्च परिशेषसिद्धं प्रतीकालम्बनगम्यरूपार्थमादावाहेत्यर्थः ।

**शे०चं०**— एतत्पादीयतत्तदधिकरणनिरसनीयपूर्वपक्षाणामनेकत्वादन्यमतानामिति बहुवचनेन भवितव्यम् । अन्यमतस्येत्येकवचनं तु कथमित्यतो नेदं व्यक्त्यैक्यनिबन्धनमेकवचनं किं नाम जातिरूपार्थैक्यनिमित्तकमेवेति नानुपपत्तिरित्याह **अन्यमतस्येतीति** ।

**॥ इति एतत्पादगताधिकरणानां पूर्वपक्षसिद्धान्तयुक्तयः ॥**

* * *

**॥ अथ प्रतीकालम्बनानां अप्रतीकालम्बनानाञ्च गतिप्रकारः ॥**

## ब्र०सू०—ॐ अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ॐ ॥

३ **सु०**— विमुक्तगम्यं प्रतिपादयितुम् इदं सूत्रम् । तद्भाष्ये न विस्पष्टमित्यतः स्पष्टीकरिष्यन् प्रतीकशब्दार्थं तावदाह **प्रतीकमिति** ।

**अनु०**— प्रतीकं

देहादिकं

**आदिपदेन** मनःप्रभृतीनां भगवत्प्रतिमानां ग्रहणम् । यद्यपि सूत्रे अप्रतीकालम्बनानां गम्यमुक्तं प्रतीकालम्बनानां तु परिशेषसिद्धम्, तथाऽपि अस्पष्टस्पष्टीकरणार्थं प्रवृत्तत्वात् अभावस्य भावपूर्वकत्वाच्च परिशेषसिद्धमेवार्थमादावाह **तद्गतमिति** ।

तद्गतमेव ये नराः ।

उपासते ते पुरतः समाप्नुयु-
र्ब्रह्माणमस्मान्मतिमाप्य विष्णुम् ।
प्राप्स्यन्ति

प्रतीकगतमेव **विष्णुम्** । **ते** प्रतीकालम्बनाः । **पुरतः** प्राक् प्रलयकालात् । **अस्मात्** ब्रह्मणः । **मतिं** भगवज्ज्ञानविशेषम् । **प्राप्स्यन्ति** प्रलये । इदानीं सूत्रितामप्रतीकालम्बनानां गतिं प्रपञ्चयति **अत इति** ।

अतोऽन्येऽपि तमाप्य तस्मा-
द्धरिं गता मुक्तिभाजः परान्ते ॥

*इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने चतुर्थाध्यायस्य तृतीयः पादः ॥*

प्रतीकालम्बनेभ्यः **अन्ये** व्यासोपासका अप्रतीकालम्बनाः । प्रथमतः **तं** विष्णुं **आप्य अपि** परान्तकाले । तस्माद्विष्णोः **तं** ब्रह्माणं **आप्य हरिं गता** भवन्तीति ॥

**परि०— मनःप्रभृतीनामिति** । 'मनो ब्रह्मेत्युपासीते'त्यादिश्रुत्युक्तानां मनःप्रभृतीनामित्यर्थः । **त** इति अनुवादः । **प्रतीकालम्बना** इति व्याख्या । पुरत इत्यस्यार्थः **प्राक् प्रलयकालादिति** । 'विष्णुं प्राप्स्यन्ती'त्यत्र कदेत्याकाङ्क्षायामाह **प्रलय** इति ॥ **विष्णुं प्राप्यापीति** । वैकुण्ठे अमुक्तस्थानगतं विष्णुं प्राप्यापीत्यर्थः । **अपिपदस्य** प्राप्यापीत्यन्वय इति भावः ॥

*इति श्रीमन्न्यायसुधापरिमळे राघवेन्द्रयतिकृते चतुर्थाध्यायस्य तृतीयः पादः ॥*

**यादु०— प्राक्** तृतीयपादोदिते । मार्गो देवानां नेति प्रतिषेधेनोत्क्रान्तानामेव मार्गस्तृतीयपादोदितं गम्यं तु सर्वेषामपीत्येतदर्थात्सूचितम् । अत्र तु तन्मुखत एव वक्तीति भावः ॥ **विष्णुमाप्येति** । वैकुण्ठलोकगतं विष्णुमाप्येत्यर्थः ॥ **ब्रह्माणमिति** । पृथिव्याद्यन्तर्गतं महत्तत्त्वगतं च ब्रह्माणं क्रमेण प्राप्य हरिं वासुदेवं **गता** भवन्तीत्यर्थः ॥ ४-३-७ ॥

*इति श्रीमद्वेदेशतीर्थपूज्यपादानां शिष्येण यदुपतिना विरचितायां सुधाटिप्पण्यां चतुर्थाध्यायस्य तृतीयः पादः ॥ ४-३ ॥*

**वं०प०— तं विष्णुमिति** । वैकुण्ठादिस्थितं विष्णुमाप्य स्थिता अपीत्यर्थः ॥ **परान्तकाले** । परं ब्रह्मायुस्तदन्तकाले प्रलयकाल इत्यर्थः ॥ **तस्माद्विष्णोरिति** । तल्लोकादित्यर्थः ॥ **हरिमिति** । लिङ्गभङ्गानन्तरं वासुदेवं गता भवन्तीत्यर्थः । 'आनन्दमानन्दमयोऽवसाने सर्वात्मके ब्रह्मणि वासुदेवे । एतां गतिं भागवतो गतो

य' इत्यादिवचनैर्वासुदेवप्रवेशस्यैव मुक्तित्वावगमादिति ज्ञातव्यम् ॥ उक्तं च भगवत्पादैः 'इत्थं विचिन्त्य परमः स तु वासुदेवनामा बभूव निजमुक्तिपदप्रदाते'ति ॥ ४-३-६ ॥

*इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचिते टीकाऽधृतसुधावाक्यार्थविवरणे चतुर्थाध्यायस्य तृतीयः पादः समाप्तः ॥ ४-३ ॥*

**कं०रा०— प्रतीकगतमेव विष्णुमिति** । 'अस्मान्मतिमाप्य विष्णुमि'त्युत्तरवाक्यस्थं विष्णुमिति पदं तद्गतमेवेत्यत्रापि सिंहावलोकनन्यायेन सम्बध्यत इति भावः ॥ **पुरतः कृतप्रलयकालादिति** । अस्मान्मतिमाप्य विष्णुं प्राप्स्यन्ति प्रलयकाल इत्यत्र प्रकृतो यः प्रलयकालः तत्पुरत इत्यर्थः । तमाप्येत्यस्यावृत्तिमभिप्रेत्याह **तं ब्रह्माणमाप्येति** ॥ ४-३-६ ॥

*॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीमद्व्यासतीर्थमुनिवर्यपौत्रश्रीपतितीर्थपूज्यपादानां शिष्येण रामचन्द्रभिक्षुणा कृतायां श्रीमन्न्यायसुधाव्याख्यायां चतुर्थाध्यायस्य तृतीयः पादः ॥ ४-३ ॥*

**शे०चं०— विष्णुमाप्येति** । वैकुण्ठलोकगं विष्णुमाप्येत्यर्थः ॥ **ब्रह्माणमिति** । पृथिव्याद्यन्तर्गतं महत्तत्त्वगतं च ब्रह्माणं क्रमेण प्राप्य हरिं वासुदेवं गता भवन्तीत्यर्थः ।

यद्विद्याधीशगुरोः शुश्रूषान्या न रोचते तस्मात् ।
अस्त्वेषा भक्तियुता श्रीविद्याधीशपादयोः सेवा ॥

*इति श्रीमत्पदवाक्यप्रमाणविदामग्रेसराणां श्रीमत्सकलविद्वच्चक्रचूडामणीनां श्रीमद्विद्याधीशतीर्थपूज्यपादानां निजशिष्यस्य केशवस्य कृतौ श्रीमद्गुरुराजोपदिष्टमार्गानुवर्तिन्यां श्रीमन्न्यायसुधाविषमपदवाक्यार्थविवृतौ शेषवाक्यार्थचन्द्रिकायां चतुर्थाध्यायस्य तृतीयः पादः सम्पूर्णः ॥ ४-३ ॥*

**॥ इति प्रतीकालम्बनानां अप्रतीकालम्बनानाञ्च गतिप्रकारः ॥३**

४ **सु०—**

**इति श्रीमत्पूर्णप्रमतिभगवत्पादसुकृते-**
**रनुव्याख्यानस्य प्रगुणजयतीर्थाख्ययतिना ।**
**कृतायां टीकायां विषमपदवाक्यार्थविवृतौ**
**चतुर्थाध्याये(र्चिःप्रभृति)स्मिन् गमनचरणः पर्यवसितः ॥**

***॥ इति श्रीमन्न्यायसुधायां चतुर्थाध्यायस्य तृतीयः पादः सम्पूर्णः ॥***

★ ★ ★

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

# अथ चतुर्थाध्यायस्य चतुर्थः पादः

॥ अथ अस्य पादस्य पूर्वपक्षसिद्धान्तयुक्तयः ॥

१　सु०—पादप्रतिपाद्यं तत्सङ्गतिश्च प्रसिद्धैवेत्यतः पूर्वोत्तरपक्षयुक्तीरेवाह **अतिक्रमेति** ।

अनु०— अतिक्रमोक्तिः कृतिरर्थलाभः
परागतिः पारगतिस्तदोकः ।
समस्तकार्यं वशिता च विश्व-
सम्भावना युक्तयस्त्वन्यपक्षे ॥

सामान्यरूपं प्रतिभानमुक्ति-
राश्चर्यता कृत्रिमताऽस्तदोषः ।
विशेषक्लृप्तिः कृतनिश्चयश्च
माहात्म्यमित्येव सुनिर्णयार्थाः ॥

**अन्यपक्षे** पूर्वपक्षेषु । **सुनिर्णयः** सिद्धान्तनिर्णयः **अर्थः** प्रयोजनं यासां ताः **सुनिर्णयार्था** युक्तयः ।

परि०— प्रसिद्धैवेति । 'कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोग' इति प्रागुक्तदिशेति भावः ॥ अतिक्रमेत्यादिमूलपदानामयं सम्बन्धः ॥ सम्पद्याविहाय स्वेन शब्दात् । **अतिक्रमोक्तिः** पूर्वपक्षस्य युक्तिः **सामान्यरूपं** सिद्धान्तस्य ॥ मुक्तः प्रतिज्ञानात् । कृतिः **प्रतिभानम्** ॥ आत्मा प्रकरणात् । **अर्थलाभ उक्तः** ॥ अविभागेन दृष्टत्वात् **परागतिः आश्चर्यता** ॥ ब्राह्मेण जैमिनिः । **परागतिः अकृत्रिमता** ॥ सङ्कल्पादेव च । **तदोकः अस्तदोषः** ॥ अत एव च अनन्याधिपतिः । **तदोकः अस्तदोषः** ॥ अभावं बादरिः । **समस्तकार्यं विशेषक्लृप्तिः** ॥ जगद्व्यापारवर्जम् । **समस्तकार्यं**

**विशेषक्लृप्तिः** ॥ स्थितिमाह दर्शयतश्चैवम् । **वशिता कृतनिश्चयः** ॥ अनावृत्तिश्शब्दात् । **विश्व-सम्भावना माहात्म्यम्** ॥ युक्तय इति पूर्वत्र श्रवणात् तदनुवृत्तिं मत्वा आह **सुनिर्णयार्था इति** ।

गु०दी०— **सम्पद्याविहाय स्वेन शब्दादित्यधिकरणे** 'एतं सेतुं तीर्त्वे'त्यत्रातिक्रमोक्तेः मुक्तौ ब्रह्म तीर्त्वा गच्छतीत्य**तिक्रमोक्तिरेव** पूर्वपक्षप्रापिका । तरतीति सामान्यप्रतीतेः ब्रह्म तीर्त्वा इदं गच्छतीति विशेषानुक्तेश्च । 'इमां घोरामशिवा नदीं तीर्त्वा ब्रह्म सम्पद्यत' इति विशेषोक्तेश्च । एतं सेतुं प्रत्यन्यत् तीर्त्वे-त्यर्थोपपत्तेरिति 'सेतुं तीर्त्वे'ति वाक्यस्य **सामान्यरूपत्वमेव** सिद्धान्तस्थापकम् ॥ ४-४-१ ॥

**मुक्तः प्रतिज्ञानादित्यधिकरणे कृतिमत्वात्** 'स तत्र पर्येती'ति परितः प्राप्त्यादिकृतिमत्त्वात् अमुक्त एवोच्यत इति **कृतिरेव** पूर्वपक्षप्रापिका । श्रुतौ 'स्वेन रूपेणाभिनिष्पद्यते' इति मुक्तस्य स्पष्टप्रतिमानत्वात् स्वस्वरूपाविर्भावस्य मुक्तं विनाऽसम्भवादित्यर्थः । तया श्रुत्या 'स तत्र पर्येती'ति उत्तरश्रुतेरपि एकवाक्यत्वात् **कृतिरपि** मुक्तिकृतिरेवेति **प्रतिभानमेव** सिद्धान्तस्थापकम् ॥ ४-४-२ ॥

**आत्मा प्रकरणादित्यधिकरणे** परञ्ज्योतिःशब्देनादित्यज्योतिरङ्गीकारे 'स तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं हैव स पाप्मना विनिर्मुक्त' इत्यादिना एकार्थत्वेऽतिप्रयोजनमिति **अर्थलाभ एव** पूर्वपक्षप्रापकः । अथ किमुच्यते परञ्ज्योतिरिरिति 'आत्मैव हि परञ्ज्योतिः स हि परमो द्योतते जीवाच्चाजीवाच्च तस्मादाहुः परञ्ज्योतिरि'ति 'तमेव जीवोऽभिसम्पद्य स्वेन रूपेणाभिनिष्पद्यत' इति तस्यैव परञ्ज्योतिष्ट्वोक्तेः सावकाशलिङ्गात् निरवकाशश्रुतेरेवातिबलत्वादिति विशिष्यो**त्तयाख्योक्तिरेव** सिद्धान्तस्थापिका ॥ ४-४-३ ॥

**अविभागेन दृष्टत्वादित्यधिकरणे** परमगतित्वादीश्वराभुक्ता अपि भोगाः मुक्तौ भवन्ति । ईश्वरस्य स्वत एव पूर्णानन्दत्वात् अभोगस्यापि सम्भवादिति **परा गतिरेव** पूर्वपक्षप्रापिका । 'पूर्णानन्दः पूर्णभोक्ता पूर्णकर्ता पूर्णज्ञानः पूर्णभाः पूर्णशक्तिः आश्चर्यत्वाद्भगवान् वासुदेवो विरुद्धशक्तिः न तु दोषस्पृगीशः' इत्या-श्चर्यतयैव ब्रह्मण उभयोक्तेः सावकाशोपपत्तिमात्रात् निवकाशश्रुतियुक्तोपपत्तेरेव बलवत्वादि**त्याश्चर्यतैव** सिद्धान्त-स्थापिका ॥ ४-४-४ ॥

**ब्राह्मेण जैमिनिरुपन्यासादिभ्य इत्यधिकरणे** पारगतत्वान्मुक्तस्य चिन्मात्रदेहोऽपि नास्तीति **पार-गतिरेव** पूर्वपक्षप्रापिका । 'अथ विमुक्तस्य चिन्मात्रदेहो भवति चिन्मात्राणि कारणानि तैरीशानुगृहीतैर्भोगान् भुङ्क्ते' इति श्रुतेः अकृतिमत्वात्तस्य देहस्यानपगमादिति **अकृत्रिमतैव** सिद्धान्तस्थापिका ॥ ४-४-५ ॥

**सङ्कल्पादेव च तच्छ्रुतेरित्यधिकरणे** भगवदोकसि स्थितत्वान्मुक्तस्य तस्याप्योकस्त्वसाम्येन तत्त-दुपायसाध्यभोगसाधनत्वमिति **सदोक** एव पूर्वपक्षप्रापकम् । ये भोगाः परमात्मा भुज्यन्ते ते सर्वे मुक्तैर्भुज्यन्ते इति पूर्वपक्षिणो भावः । निर्दोषत्वात्तदोकसो मुक्तस्य सङ्कल्पादेवेति श्रुत्युक्तानुसारेणोपपत्तेरित्यतः **तद्दोष एव** सिद्धान्तस्थापकः । अस्तदोष इति वदता दोषकरलक्ष्मीभोगादिकं न मुक्तानामिति सूचितम् । स्वयोग्यभोगास्तु स्वसङ्कल्पादेव सिद्ध्यन्तीति संसारिभ्यो मुक्तानामतिशयश्चेति भावः ॥ ४-४-६ ॥

**अत एव चानन्याधिपतिरित्यधिकरणे** परगृहगतत्वादस्य राजगृहगतस्येव स्वाधमा अपि कदाचिदीशत इति **सदोक** एव पूर्वपक्षप्रापकम् । निर्दोषत्वादेव मुक्तस्य ईश्वरस्य तत्रस्थानां च मुक्तान्तराणां राजदोषवद्दोषासम्भवात् । 'मुक्तानां पतयो देवाः देवानां च प्रजापतिः । तस्य विष्णुर्न चैवेदं पारावर्यं विनश्यती'ति श्रुतेश्च यथायोग्यमेव स्वीकारोपपत्तेरित्य**स्तदोषत्वमेव** सिद्धान्तस्थापकम् ॥ ४-४-७ ॥

**अभावं बादरिराह ह्येवमित्यधिकरणे** देहभावे तत्कार्यदुःखादि तदभावे भोगासम्भव इति दो इति **समस्तकार्यमेव** पूर्वपक्षप्रापकम् । 'देहाभावाच्च भावाच्च निर्भोगत्वं च दुःखिताम् । यान्त्यमुक्ता नोभयं च मुक्तानां वशिता यत' इति श्रुत्यैव विशेषक्लृप्तेरिति **विशेषक्लृप्तिरेव** सिद्धान्तस्थापिका ॥ ४-४-८ ॥

**जगद्व्यापारवर्ज्यमित्यधिकरणे** सङ्कल्पादेव समस्तसम्भवात् सृष्ट्यादिसमस्तकार्यसम्भव इति **समस्तकार्यमेव** पूर्वपक्षप्रापकम् ॥ 'व्यापारो जगतो विष्णोर्मुक्तानां तु स्वभोगगः । नहि स्वर्णं शुद्धमपि वह्निकार्यकरं भवेत् । अयोग्यशक्तितस्त्वेव नाधिकानन्दसम्भवः । नहि कश्चित्सुशक्तोऽपि चकाराचेतनं चितिम् । न च कामस्तथा भूयात् ततः स्यात्सत्यकामते'ति श्रुत्या विशेषक्लृप्तेरेवेति **विशेषक्लृप्तिरेव** सिद्धान्तस्थापिका ॥ ४-४-९ ॥

**स्थितिमाह दर्शयतश्चैवं प्रत्यक्षानुमाने इत्यधिकरणे** वशित्वान्मुक्तस्यापि वृद्धिरिति **वशितैव** पूर्वपक्षप्रापिका । 'अभ्यासपाटवात् स्नेहात् अश्रमत्वादुपासना । भक्तिश्च सुखरूपैव मुक्तानां न तु साधनमि'ति श्रुतेः मुक्तानां कृतकृत्यत्वेन निःश्रमत्वादुपासनावदभ्यासपाटवात् निर्दोषत्वात् स्नेहाधिक्याच्च तस्यैव परमसुखरूपत्वे फलरूपत्वादिति **कृतनिश्चय** एव सिद्धान्तस्थापकः ॥ ४-४-१० ॥

**अनावृत्तिः शब्दादनावृत्तिः शब्दादित्यधिकरणे** अनन्तत्वेऽपि कालस्य त्रयोदशीपञ्चदशीवत् कदाचित् समस्तस्यापि सम्भवात् मुक्तस्यापि पुनरावृत्त्याशङ्केति **विश्वसम्भावनैव** पूर्वपक्षप्रापिका । विश्वस्य समस्तस्यापि कालस्य कदाचित्समाप्तिसम्भावनेत्यर्थः । 'अशेषकामसत्यत्वात् मुक्तानां न पुनर्भवः । यस्मात्सकामयेदेव मुक्तानामपुनर्भवमि'ति श्रुतेः सत्यकामत्वादिमाहात्म्यात् न **पुनरावृत्तिरिति माहात्म्यमेव** सिद्धान्तस्थापकम् । माहात्म्यादिति वदता कालस्यापि नित्यत्वाख्यमाहात्म्यात् न परिसमाप्तिरित्यपि सूचितम् ॥ ॥ ४-४-११ ॥

**यादु॰— प्रसिद्धैवेति** । 'भोगमाहास्मिन्पादे' इति वा, 'कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोगश्चतुष्टयमि'ति पूर्वग्रन्थे वेति शेषः ।

**कं॰रा॰— पादप्रतिपाद्यमिति** । 'कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोगश्चतुष्टयम् । फलं मोक्ष इति प्रोक्तः क्रमात्पादेषु चोदित' इत्यत्रैव पादप्रतिपाद्यस्य तत्सङ्गतेश्च प्रसिद्धत्वात् एतत्पादीयाधिकरणेषु पूर्वोत्तरपक्षयुक्तीरेवाहेत्यर्थः ।

शे०चं०— नन्वेकवाक्यतासिद्धये पादप्रतिपाद्यस्य, तस्य सङ्गतेश्चावश्यवक्तव्यत्वात् तदनुक्ते मूले न्यूनत्वमित्यतो 'भोगमाहास्मिन्पाद' इति भाष्यात् 'कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोगश्चतुष्टयमि'त्यनुव्याख्यानाद्वा तयोः सिद्धत्वान्न तदनुक्तिर्न्यूनत्वापादिकेत्याशयवानाह **पादेति** । अत इत्यतःपरं तदुभयमनुक्त्वेति शेषः ॥ **पूर्वोत्तरेति** । अन्यथा 'व्याख्यां करोम्यन्वपि चे'ति प्रतिज्ञाव्याघातादिति भावः । सिद्धान्तस्यापि पूर्वपक्षादन्यत्वादन्यशब्देन तत्प्रतीतिं निवारयन्नेव जात्यभिप्रायमेकवचनमित्याशयेनाह **पूर्वपक्षेष्विति** । सिद्धान्तस्यैव सुनिर्णयविषयत्वाद्युक्तीनां तदसम्भवेन षष्ठीतत्पुरुषानुपपत्तेः सुनिर्णयस्य साध्यत्वालाभेनार्थशब्देन चतुर्थीसमासस्याप्यनुपपत्तेर्बहुव्रीहिपक्षेऽपि सुनिर्णयशब्दस्य यथार्थनिर्णयमात्रपरत्वे तत्प्रयोजनत्वलाभेऽपि सिद्धान्तनिर्णयप्रयोजनकत्वालाभात् तल्लाभाय सुनिर्णयशब्दार्थकथनपूर्वकं बहुव्रीहिमेवाह **सुनिर्णय इति** । पूर्ववाक्यादनुवर्तत इत्याशयेनाह **युक्तय इति** ।

वा०र०— **सिद्धत्वान्न तदनुक्तिरिति** । अनेन तत्सङ्गतिश्च सिद्धैवेत्येव मूलपाठः । प्रसिद्धैवेति पाठे सिद्धत्वमेवार्थ इति सूचितं भवति । सुनिर्णयविषयत्वादित्युक्त्याऽर्थशब्दोऽयं विषयवाचीत्युक्तं भवति । **षष्ठीतत्पुरुषेति** । सुनिर्णयस्यार्थाः सुनिर्णयार्था इति षष्ठीतत्पुरुषेत्यर्थः । उपलक्षणं चैतत् । युक्तानां सुनिर्णयप्रयोजनत्वापत्त्यार्थशब्दस्य प्रयोजनार्थत्वेऽपि षष्ठीतत्पुरुषार्थानुपपत्तिरित्यपि ध्येयम् । **चतुर्थीसमासस्यापीति** । सुनिर्णयायायं सुनिर्णयार्था इति देवदत्तायायं देवदत्तार्थं पय इत्यादौ सुरूपादेर्देवदत्तार्थत्वेऽपि देवदत्तस्य तदसाध्यवत्सुनिर्णयस्याप्यसाध्यत्वमिति भावः । बहुव्रीहिपक्षेऽर्थशब्दस्य विषयपरत्वम् । सुनिर्णयस्य मुक्तिविषयत्वाभावादयुक्तमिति मत्वाऽऽह **सुनिर्णयशब्दस्येति** ।

**॥ इति अस्य पादस्य पूर्वपक्षसिद्धान्तयुक्तयः ॥**

* * *

# ॥ अथ अनन्याधिपतित्वाधिकरणम् ॥

**॥ अथ मुक्तानां नियतान्यानियम्यत्वमेव सूत्रार्थः ॥**

## ब्र०सू०— ॐ अत एव चानन्याधिपतिः ॐ ॥

२ **सु०**— इदं (एतत्) सूत्रं कश्चिद्व्याख्याति । अत एव चावन्ध्यसङ्कल्पत्वा-(देवान)दन्यानधिपतिर्विद्वान् भवति । नास्यान्योऽधिपतिर्भवतीत्यर्थ इति । तदिदमसदिति भावेनाह **अनन्येति** ।

# अनु०— अनन्यभृत्यत्वमिहोदितेभ्य-
# स्त्वन्यस्य भृत्यत्वनिवारणाय ।

**इह सूत्रे मुक्तस्यानन्याधिपतिरिति यत् अनन्यभृत्यत्वं उक्तं तत्तु उदितेभ्यो ये यस्य मुक्तस्य अधिपतित्वेनोदिताः शास्त्रे तेभ्यः अन्यस्य भृत्यो न भवति मुक्त इति प्रतिपादनाय । न तु सर्वथा अधिपतिनिवारणाय । कुतः । अनन्यपदप्रयोगात् । अन्यथाऽपतिरित्यवक्ष्यत् ।**

**परि०**— विद्वान् ब्रह्मज्ञानी । यत्तच्छब्दाध्याहारेण योजयति **यदनन्येति** । **उदितेभ्य** इत्यनुवादः **य** इत्यादि व्याख्या ।

**वं०प०— अवन्ध्यसङ्कल्पत्वादिति** । सर्वथा पतिशून्यो भविष्यामीति सङ्कल्पवशादिति भावः ॥ **अनन्यभृत्यत्वमिति** । अन्योऽधिपतिरस्य नास्तीत्युक्तेऽयमन्यभृत्यो न भवतीति लब्धमित्यर्थः ॥ **इत्यवक्ष्यदिति** । लघु चैवं सति सूत्रं स्यादिति भावः ।

**कं०रा०— कश्चिदिति** । मायावादीत्यर्थः ॥ **अवन्ध्यसङ्कल्पत्वादिति** । 'सङ्कल्पादेव तच्छ्रुतेरि'ति पूर्वसूत्रे स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादिश्रुत्यवष्टम्भेनोक्तमवन्ध्यसङ्कल्पत्वम् अतःशब्देन परामृश्यत इति भावः । विदुषैवात्मनोऽन्यस्वामिकत्वस्य सङ्कल्पितत्वात् तस्य तथात्वमिति चोद्यं न हि प्राकृतोऽपि सङ्कल्पयन्नन्यस्वामिकत्वमात्मनः सत्यां गतौ सङ्कल्पयतीति परेणैव परिहृतम् ॥ **अन्यथेति** । स्यादतो हेतुद्वये तात्पर्यं वाच्यम् ।

**शे०चं०— अन्यथेति** । तदुक्तेः सर्वथाऽधिपतिनिवारणार्थत्व इत्यर्थः ॥ **अवक्ष्यदिति** । तावतैव विवक्षितप्रमेयसिद्धेरिति भावः ।

**वा०र०**— मूले अत एव चानन्याधिपतिसूत्रपाठः । मूलकोशे तथैव सत्त्वात् । सूत्रभाष्ये तथैव पाठाभिप्रायेणैव चशब्दो विपक्षव्यावृत्त्यर्थ इत्युक्तेः । पूर्वपक्ष्यभिमतराजग्रहादिनिविष्टस्याधमनियम्यत्ववत्स्वावरनियम्यत्वमिति शङ्कानिरासार्थत्वस्य तत्त्वप्रकाशिकायामुक्तेश्च । तद्विवरणं च *तत्त्वप्रकाशिकावाक्यार्थप्रदीपे*ऽस्मत्कृतं द्रष्टव्यम् । तत्त्वप्रदीपादौ चर्चार्थकथनादिकमस्ति । परभाष्येऽप्येवमेव पाठः । व्याख्यानावसरे चात एव चावन्ध्यसङ्कल्पत्वादेवेति पाठः । तथैव परभाष्ये सत्त्वात् । यत्र कचिदन्याधिपतिरित्येव पाठः तत्र न च शब्दाभावो निमित्तम् । अपि तु भाष्ये पूर्वपक्षे प्रदशनेन सिद्धान्ताभिधानं पूर्वपक्षप्रतिक्षेपार्थतया चशब्दयुक्तं सम्पूर्णसूत्रमुपात्तम् । अत्र तु परोक्तमनन्याधिपतिरित्यस्य व्याख्यानमात्रं निराक्रियत इति चशब्दत्यागेनावशिष्टमेव सूत्रं पठितम् । एवमेव द्वितीयपादीयटीकास्थानुवादोऽपि योज्य इति ज्ञेयम् । **अमृतत्वस्योत यत्पतित्वमिति** मूले उतामृतत्वस्येति न श्रुतिवाक्यम्, किन्तु स्ववाक्यमेव । वागित्येव श्रुत्युपादानमिति सूचितं भवति ।

**॥ इति मुक्तानां नियतान्यानियम्यत्वमेव सूत्रार्थः ॥**

॥ अथ विष्णुः मुक्तानां पतिः ॥

३ **सु०—** इतश्चैवमेवेत्याह **पतिमिति** ।

पतिं यदेषामपि विष्णुमाह
ह्युतामृतत्वस्य पतित्ववाग्घरेः ॥

**यत्** यस्मात् हरेः **अमृतत्वस्य उत यत् पतित्वं** तस्य **वाक्** 'उतामृतत्वस्येशान' इति श्रुतिरिति यावत् । **विष्णुं** एषां मुक्तानां **पतिं आह** । ततोऽप्युक्त एव सूत्रार्थो नापर इति ।

**परि०—** **हरेरिति** । यत्पतित्वमित्यन्वयः । कस्य पतित्वमित्यत आह **अमृतत्वस्योतेति** । मुक्तवर्गस्यापीत्यर्थः । मूले अर्थानुवाद इति भावेन तद्वाक्यमाह **उतामृतत्वस्येति** । मुक्तवर्गस्यापीशान इत्यर्थः ।

॥ इति विष्णुः मुक्तानां पतिः ॥

* * *

॥ अथ अनुमानेनापि मुक्तानां नियम्यत्वसिद्धिः ॥

४ **सु०—** अनुमानेनाप्येतमर्थं समर्थयते **एतेऽपीति** ।

अनु०— एतेऽपि चान्याधिपतित्वयुक्ता
विष्णवन्यचित्त्वेन यथा पुमांसः ।
प्रसिद्धिभाजस्त्विति चानुमैव
ह्यभीष्टसिद्ध्यै भवतीह निश्चयात् ॥

**अपि चेति** प्रमाणसमुच्चये । **एते** मुक्ताः । अन्योऽधिपतिर्येषां तेऽन्याधिपतयः । तेषां भावोऽन्याधिपतित्वं तेन युक्ताः । **विष्णवन्यत्वेन चित्त्वेन** जीवत्वेन च । **तु**शब्दो विशे-

**षार्थः । परकीयव्याख्यानानुसारेण अन्याधिपतित्वयुक्ता इति प्रतिज्ञातम् । स्वमते त्वधिपतियुक्ता इत्येव प्रतिज्ञेति । यदि कश्चिदुदाहृतश्रुत्यर्थे विप्रतिपद्येत तस्यानुमानेनैवाल-(मित्यक्त)मित्यनुमैव चेह मुक्तेष्वभीष्टस्याधिपतिसाहित्यस्य सिद्ध्यै भवतीति । कथम् । व्याप्तिपक्षधर्म(त्व)तयोः प्रमितत्वादिति हिशब्दः । मुक्ता अधिपतिरहिता मुक्तत्वात् अवन्ध्यसङ्कल्पत्वात् ईश्वरवदिति अनुमानप्रतिरोध इति चेन्न । मूलप्रकृतावनैकान्त्यात् । विपक्षे बाधकाभावाच्च । तदिदमुक्तं निश्चयादिति ।**

**परि०— प्रमाणसमुच्चय इति** । उदाहृतश्रुतेः समुच्चय इत्यर्थः ॥ **विशेषार्थ इति** । संसारिरूपपुंविशेषग्रहणार्थमित्यर्थः ॥ **परकीयेति** । नास्यान्योऽधिपतिर्भवतीत्यर्थ इति परेण व्याख्यानादिति भावः ॥ **मूलप्रकृताविति** । देहेन्द्रियादिबन्धहीनत्वरूपमुक्तत्वहेतोः वन्ध्यसङ्कल्पत्वाभावस्य वा परमते धर्माणां जडगतत्वेन अवन्ध्यसङ्कल्पत्वस्यैव वा तत्र सत्त्वादिति भावः ।

**वं०प०— विशेषार्था** इत्युक्तं विशदयति **परकीयेति** । न अस्य अन्यः अधिपतिः भवतीति परेण व्याख्यातत्वादिति भावः । इति विशेषार्थ इति सम्बन्धः ॥ **उदाहृतश्रुत्यर्थ इति** । न केवलं मनुष्याणामीशानः किन्त्वमृतत्वस्यामरवर्गस्य देवताजातस्यापीशान इत्यर्थसम्भवेन मुक्तनियामकत्वस्य तदर्थत्वादिति भावः ॥ **अनुमैवेति** । माऽस्तु श्रुतिरिति भावः ।

**कं०रा०—** तत्र च चित्त्वमात्रस्येश्वरेऽपि सत्त्वेन व्यभिचारः स्यात् अतश्चित्त्वशब्देन जीवत्वं लक्षणीयमित्यभिप्रेत्याह **विष्णवन्यत्वेन चित्त्वेन जीवत्वेन चेति** । तुशब्दस्य विशेषार्थत्वं दर्शयति **परकीयेति** । अनन्याधिपतिरित्यस्यान्याधिपतिराहित्यपरतया परेण व्याख्यातत्वात् तदनुसारेणान्याधिपतित्वयुक्त इति प्रतिज्ञातम् । स्वमते त्वधिपतियुक्ता इत्येव प्रतिज्ञेति विशेषार्थस्तुशब्द इत्यन्वयव्याप्तिपक्षधर्मतयोः प्रमितत्वादिति ॥ **हिशब्द इति** । न च वाच्यं मुक्तौ विष्णवन्यत्वजीवभावयोरभावादुक्तहेत्वोः न पक्षधर्मतेति । 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता, एतमानन्दमयमात्मानमुपसङ्क्रामति, परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते, प्रज्ञानेत्रो लोक' इत्यादिश्रुतिभिर्मुक्तौ भेदस्य जीव एव सन् ब्रह्म प्राप्नोतीत्यर्थं प्रतिपादयन्त्या 'ब्रह्मैव सन् ब्रह्माप्येती'ति श्रुत्या मुक्तौ जीवभावस्य प्रतीतत्वात् ब्रह्मैव सन्निति श्रुतावाद्यब्रह्मशब्दस्य परब्रह्मपरत्वं यथा न सम्भवति तथोपपादितमधस्तात् ॥ **मूलप्रकृताविति** । चित्प्रकृतावित्यर्थः ।

**शे०चं०— अपि चेतीति** । निपातसमुदाय इत्यर्थः । तेन चापिशब्दयोरन्यतरेणैव प्रमाणसमुच्चयसिद्धेर्नान्यतरवैयर्थ्यप्रसङ्ग इति भावः । समासप्राबल्यात् षष्ठीतत्पुरुषाश्रयणे मुक्तानामन्यान्प्रत्यधिपतित्वप्राप्तावपि तस्येदानीमप्रसक्तत्वात् प्रस्तुतस्य च मुक्तानामन्याधिपतियुक्तत्वस्यालाभात् । अन्यश्चासावधिपतिश्चान्याधि-

पतिस्तेन युक्त इति कर्मधारयगर्भतृतीयातत्पुरुषपक्षे प्रकृतोपयोगलाभेऽपि त्वप्रत्ययवैयर्थ्यापातात् । तदुभय-परित्यागेन जघन्यपदार्थबहुव्रीहिमेव समाश्रयते **अन्य इति** । विष्णवन्यचित्त्वेनेति भाष्ये हेतुरुक्तः स न युक्तः। विष्णवन्यत्वमात्रस्यैव तत्र हेतुत्वसम्भवेन व्यर्थविशेष्यत्वात् हेतुद्वये तात्पर्यस्य च चित्त्वस्य विष्णावपि सत्त्वेन व्यभिचरिततया तस्य हेतुत्वासम्भवेनायोगात् नास्य हेतुसमर्पकत्वमित्यतो विष्णुव्यावृत्ततया चित्त्वं व्याकुर्वन्नेव हेतुद्वयपरतया तद्व्याचष्टे **विष्णवन्यत्वेनेत्यादि** । तुशब्दोक्तं विशेषमेव दर्शयति **परकीयेति** । केचित्त्वबाधितविषयत्वरूपविशेषद्योतनार्थ इत्यर्थः । अन्यथा हिशब्देन व्याप्तिपक्षधर्मतयोः प्रमितत्वकथनेन लिङ्गराहित्य-रूपासिद्धेः त्रिविधाव्याप्तेश्चाभावप्रतिपत्त्या तत्प्रयुक्ताभासत्वशङ्कानुदयसमर्थनेऽपि वक्ष्यमाणरीत्या निश्चयादित्य-सत्प्रतिपक्षितत्वसूचनेन सत्प्रतिपक्षितत्वप्रयुक्तस्याभासत्वस्य निवारणेऽप्यबाधितत्वस्यासूचनेन बाधितत्वप्रयुक्ता-भासत्वस्यानिवारणात् अनुमैवेत्यवधारणस्याश्लिष्टत्वप्रसङ्गादिति भावमुक्त्वा, परकीयेत्युत्तरग्रन्थः अधिपतियुक्ता इत्येतावतैव पूर्तेः प्रतिज्ञायामन्यपदस्य वैयर्थ्यपरिहारार्थ इत्याहुः । श्रुतेरुपन्यस्तत्वात् तदनुमैवेत्यवधारणानुप-पत्तिमाशङ्क्य परिहरति **यदीति** । ननु मूलप्रकृतेरपि पक्षतुल्यत्वाद्वा ईश्वरकोटिनिविष्टत्वाभ्युपगमाद्वा न तत्रा-नैकान्त्यमित्यत आह **विपक्ष इति** ।

**वा०र०—** नास्य हेतुसमर्पकत्वमिति पाठः । तथा चेति शेषः । तथा च नास्येति पाठस्तु स्वरस एव । अभासत्वस्य निवारणेऽपि चेति चयुक्तः पाठः स्वरसः । तदभावे तु तदर्थान्तभविनार्थो बोध्यः । परकीयेतरग्रन्थेऽधिपतियुक्ता इतीत्येव पाठः ।

**स०व्र०—** तुशब्दद्योतितं विशेषमाह **परकीयेति** । मूलप्रकृताविति मुक्तत्वावन्ध्यसङ्कल्पत्वयोरस्तत्र सत्त्वेऽपि अधिपतिरहितत्वस्य तत्राभावादित्यर्थः । ननु मुक्तत्वावन्ध्यसङ्कल्पत्वाभ्यामेव अधिपतिराह हीति सिसाधयिषितत्वात् पक्षतुल्यत्वान्न व्यभिचार इत्यत आह **विपक्ष इति** । तथा च अप्रयोजकत्वमिति भावः ।

**॥ इति अनुमानेनापि मुक्तानां नियम्यत्वसिद्धिः ॥**

* * *

**॥ अथ ब्रह्मादीनां मुक्तस्वकीयावरनियामकत्वमात्रम् ॥**

५ **सु०—** न केवलं मुक्तानां भगवानधिपतिः किं त्वन्येऽपि यथासम्भवं भवन्ती-त्याशयवानाह **मुक्तेति** ।

अनु०— मुक्तस्वकीयावरयन्तृतास्ति
मुक्तावपि ब्रह्मपुरःसराणाम् ।

**ब्रह्मपुरःसराणामपि मुक्तौ मुक्ताश्च ते स्वकीयाः स्वैः सह मुक्तिं गताश्च तेऽवराश्च मुक्तस्वकीयावराः तन्नियन्तृताऽस्ति । अमुक्तान् प्रति यन्तृता सर्वथा नास्ति । यथाऽऽह सूत्रकारः 'विकारावर्ति चे'ति । मुक्तेष्वपि कल्पान्तरे मुक्तान् स्वकल्पे मुक्तेष्वप्युत्तमान् समांश्च प्रति नास्तीत्यतो मुक्तेत्याद्युक्तम् । अनेन परोदाहृतश्रुतीनां गतिश्चोक्ता भवति ।**

**परि०**— अपिपदान्वयेनानुवादो **ब्रह्मपुरस्सराणामपि मुक्ताविति** । मुक्तेत्युक्तिकृत्यमाह **अमुक्तानिति** ॥ **(तथा)यथाऽऽहेति** । अत्रैव पादे ॥ **विकारेति** । विकारं संसारं आवर्तयतीति विकारावर्ति तद्विषयं व्यापरणं मुक्तानां नास्ति । चशब्दो नञनुकर्षणार्थः । इमं मानवमावर्तं नावर्तन्त इति 'तथाहि दर्शयती'ति सूत्रशेषस्यार्थः ॥ **इत्याद्युक्तमिति** । मुक्तस्वकीयावरनियन्तृतेत्युक्तमित्यर्थः ॥ **अनेनेति** । मुक्तस्वावरनियन्तृताकथनेन 'आप्नोति स्वाराज्यं', 'सर्वेऽस्मै देवा बलिमावहन्ति', 'तेषां सर्वेषु लोकेषु कामचारो भवती'त्यादिश्रुतीनां 'जगद्व्यापारे'ति प्रधानसूत्रे परभाष्योदाहृतानां मुक्तस्वकीयावरनियामकविषयत्वेन गतिश्चोक्ता भवतीत्यर्थः ।

**यादु०**— **तान् यन्तृतेति** । तृजन्तस्य कर्तरि चेति षष्ठीसमासप्रतिषेधात् तृन्नन्तेनायं द्वितीयासमासः । गम्यादावस्याप्युपसङ्ख्येयत्वादिति भावः ॥ **परोदाहृतश्रुतीनामिति** । जगद्व्यापारवर्जमिति सूत्रव्याख्यानावसरे सङ्करेणोदाहृतानां 'आप्नोति स्वाराज्यं', 'सर्वेऽस्मै देवा बलिमावहन्ति', 'तेषां सर्वेषु लोकेषु कामचारो भवती'त्याद्यानां श्रुतीनामित्यर्थः । स्वाराज्यादिपदानां मुक्तस्वकीयावरपरताया अनेन सूचितत्वादिति भावः ।

**वं०प०**— **विकारावर्ति चेति** । चशब्दान्नञः समाकर्षः । विकारावर्तिव्यापारो मुक्तानां न विद्यत इत्यर्थः ।

**कं०रा०**— **तन्नियन्तृताऽस्तीति** । न च वाच्यं नियन्तृपदस्य तृन्नन्तत्वे 'न लोके'त्यादिना षष्ठीप्रतिषेधात् षष्ठ्येव न भवति । तृजन्तत्वे तु कर्तरि चेति षष्ठीसमासप्रतिषेधात् समासानुपपत्तिरिति । उभयत्र कृद्योगलक्षणायाः षष्ठ्या एव प्रतिषेधात् शेषलक्षणायाः षष्ठ्याः समासोपपत्तेः । श्रितादिषु गम्यादीनामुपसङ्ख्यानमित्युक्तेस्तृन्नन्तस्य नियन्तृशब्दस्य तच्छब्देन द्वितीयान्तेन वा समासोपपत्तेः । 'मुक्तस्वकीयावरयन्तृते'ति मूलेऽप्येवमेवोपपत्तिर्द्रष्टव्या । मुक्तस्वकीयावरपदानां व्यावर्त्यानाह 'अमुक्तान्प्रती'त्यादिना । कल्पान्तरे मुक्तानित्यत्र प्रतियन्तृता नास्तीति पदान्यनुषज्यन्ते । समांश्च प्रति नास्तीत्यत्र नियन्तृतापदमनुकृष्यते । 'मुक्तेत्याद्युक्तमि'ति अमुक्तव्यावृत्त्यर्थं मुक्तपदं कल्पान्तरमुक्तव्यावृत्त्यर्थं स्वकीयपदं स्वोत्तमस्वसमव्यावृत्त्यर्थम् अपरपदं च प्रयुक्तमिति भावः ॥ **अनेनेति** । मुक्तानां स्वकीयावरयन्तृत्ववचनेनाधिपतिराहित्येन प्रमाणतया परोदाहृतश्रुतीनाममुक्तकल्पान्तरमुक्तस्वावरमुक्तस्वसममुक्तनियम्यत्वाभावविषयतया गतिश्चोक्ता भवतीत्यर्थः ।

**शे०चं०—** यन्तृशब्दस्य तृन्नन्तत्वेऽपि तद्योगे न लोकेति षष्ठ्या निषेधेन तत्समासस्य दुरापास्तत्वात् । तृजन्तत्वे च तद्योगे कर्तरि चेति वा तृजकाभ्यां कर्तरीति वा षष्ठीसमासनिषेधेन षष्ठीसमासासम्भवात् कथं समास इत्यतो द्वितीयासमास एवायं श्रितादिषु गम्यादीनामुपसङ्ख्यानात् गम्यादेश्चाकृतिगणत्वादित्याशयवान् अवरान् प्रति यन्तारः अवरयन्तारः तेषां भावः तत्तेति विग्रहमभिप्रेत्याह **तान्यन्तृतेति** । इदं च तृन्योगे न लोकेति योग्यस्य षष्ठीमात्रनिषेधकत्वम् । निषेधस्य नित्यत्वं कर्तरि चेत्यादेः षष्ठीमात्रसमासनिषेधकत्वं कारकषष्ठीसमासनिषेधकत्वेऽपि निषेधस्य नित्यत्वं चाभ्युपगम्यैव न तु वस्तुतः । यथा चैतत्तथा 'सृष्टिबन्धनमोक्षादिकर्तृत्वस्य श्रुतत्वतः' इत्यत्रैव प्रपञ्चितमिति न पुनः प्रपञ्च्यत इति ध्येयम् । मुक्तस्वकीयावरेत्यत्र मुक्तग्रहणप्रयोजनमाह **अमुक्तानिति** । स्वकीयत्वविशेषकृत्यमाह **मुक्तेष्वपीति** । अवरत्वविशेषस्य तदाह **स्वकल्प इति** ॥ **परोदाहृतेति** । जगद्व्यापारवर्जमिति सूत्रव्याख्यानावसरे 'आप्नोति स्वाराज्यं', 'सर्वेऽस्मै देवा बलिमावहन्ति' । 'तेषां सर्वेषु लोकेषु कामचारो भवती'ति सङ्करोदाहृतश्रुतीनामित्यर्थः ।

**वा०र०— श्रुतत्त्वत इत्यत्रैवेति** । तृतीयस्य तृतीय इति शेषः । एतदर्थकत्वसूचनादितीति पाठः। चक्षुरन्तरस्थप्रसादेनेत्यादिग्रन्थः प्रथमः । अनेन देवेनेत्यादिरित्युक्तमित्यन्तर इति ज्ञेयम् । चक्षुरन्तरस्थप्रसादेन परार्वाक्तनलोकवर्तिनां मुक्तानामिति पाठः । अन्यादृशस्तु लेखकप्रमादात् । अत्रैकैकप्रसादेनोभयलोकप्रवर्तिनियामकत्वक्रमेणोभयोरुभयनियामकत्वं चान्यथाप्रतीतत्वेन दर्शितमिति ज्ञेयम् । मोक्षपर्यन्तमिति पाठः । **अत एवात्रेति** । प्रारब्धकर्मेति वाक्य इत्यर्थः ।

**स०व्र०— अनेन परोदाहृतेति** । अथ य इह आत्मानमनुविद्य व्रजत्येतांश्च सत्यकामास्तेषां सर्वेषु लोकेषु कामचारो भवति इति परोदाहृतेत्यर्थः ।

**॥ इति ब्रह्मादीनां मुक्तस्वकीयावरनियामकत्वमात्रम् ॥**

* * *

**॥ अथ उक्तार्थे श्रुतिप्रमाणम् ॥**

६ **सु०—** कुत एतदित्यत आह **अनेनेति** ।

**अनेन देवेन तथाऽमुना च**
**हीष्टे परार्वाक्तनलोकिनामिति ।**

**फलं श्रुतिर्ज्ञानित आह**

**अनेन** चक्षुरन्तस्थेन देवेन प्रसन्नेन **तथा अमुना** आदित्यान्तर्गतेन च परार्वाक्तन-लोकवर्तिनां मुक्तानाम् **ईष्टे** ईशिता भवतीति **श्रुतिः** ज्ञानतो मुक्तनियन्तृत्वं **फलं आह हीति** । अत्र **अमुना** परलोकिनां, **अनेन अर्वाक्तनलोकिनामिति** ज्ञेयम् । **अनेन** 'अथ य एवं विद्वान्' इत्याद्यां 'सोऽमुनैव ये चामुष्मात्पराञ्चो लोकास्तांश्चाप्नोति देवकामांश्च, अथानेनैव ये चैतस्मादर्वाञ्चो लोकास्तांश्चाप्नोति मनुष्यकामांश्चे'ति श्रुतिमुपादत्ते ।

नन्वस्यां श्रुतावुक्तमिदं ज्ञानफलं मुक्तिगतमित्येतत् कुत इत्यत आह **मुक्ताविति** ।

**मुक्ता-**
**वेतच्च सर्वाऽशुभनाशलिङ्गात् ॥**

**एतच्च सर्वलोकाप्तिलक्षणं फलं मुक्तावेव । 'उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद' इति सर्वपापक्षयलिङ्गात् । न हि मुक्तेरितरत्रैतत्सम्भवति । प्रारब्धपापस्य आमोक्षं विद्यमानत्वात् ।**

**परि०— कुत एतदिति** । मुक्तस्वकीयावरनियन्तृत्वं कुतो मानाज्ज्ञेयमित्यर्थः । मूल-पदानामर्थयोजनां चाह **अनेन चक्षुरन्तःस्थेनेत्यादिना** । मूले अनेन अमुनेत्युक्तिक्रमानुरोधेन परार्वाक्तनलोकिनामित्यपि यथाक्रममन्वेतीति भ्रमनिरासायाह **अत्रेति** । मूल इत्यर्थः । ज्ञानिपरत्व-ज्ञापनायोक्तं **इत्याद्यामिति** । अस्य इति श्रुतिमिति वक्ष्यमाणेनान्वयः ॥ **इति श्रुतिमिति** । प्रथमा-ध्यायस्थछन्दोगश्रुतिमित्यर्थः ।

**यादु०— आमोक्षमिति** । शिंशुमारप्राप्तिरूपमोक्षपर्यन्तमित्यर्थः । न तु लिङ्गशरीरभङ्गरूपमोक्ष-पर्यन्तमिति । 'वैश्वानरे द्युनद्यां वा देहे वा सूर्यमण्डले । विधूय सर्वपापानि यान्ति किंस्तुघ्नकेशवमि'ति प्रमाण-विरोधात् । 'प्रारब्धकर्मशेषस्तु विरजातरणावधिरि'ति वचनं तु पुण्यप्रारब्धावस्थानपरमन्यथोक्तवचनविरोधादिति ज्ञातव्यम् ।

**वं०प०—** अनेन देवेन तथाऽमुना च देवेन परार्वाक्तनलोकिनामीष्ट इत्यत्र यथायोग्यं सम्बन्धो न यथाक्रममित्याह **अत्रामुनेति** । सोऽमुनैवेत्यत्र तच्छब्दो ज्ञानिपरामर्शक इति दर्शयितुम् **अथ य एवं विद्वा-नित्याद्यामित्युक्तम्** ।

**कं०रा०— अनेन चक्षुरन्तःस्थेनेति** । अथ 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते, य एषोऽन्तरक्षिणि पुरुषो दृश्यते' इत्यादित्यान्तःस्थस्य चक्षुरन्तःस्थस्य 'सोऽमुनैवे'त्यादिश्रुतेः 'अथ अनेनैवे'-त्यादिश्रुतेश्च प्रवृत्तत्वात् अमुनेत्यस्यादित्यान्तर्गतपरमात्मपरतया च व्याख्यानं कृतमिति द्रष्टव्यम् । 'अनेन देवेन तथा अमुना च हीष्टे परार्वाक्तनलोकिनामि'ति मूले निर्देशक्रमानुसारेण अनेन चक्षुरन्तःस्थेन देवेन परलोकिनामीष्टे । अमुना आदित्यान्तर्गतेन देवेन अर्वाक्तनलोकाधिपत्यस्य चोक्तत्वेन तद्विरुद्धत्वादित्यभिप्रेतमन्वयमाह **अत्रेति** ॥ **अनेन देवेनेति** । मूले अमुना परलोकिनामीष्टे अनेन अर्वाक्तनलोकिनामीष्टे इत्यन्वय इति ज्ञेय-मित्यर्थः । 'अधीगर्थदयेशां कर्मणी'ति कर्मणि षष्ठी ॥ **अनेनेति** । 'अनेन देवेन तथा अमुना च हीष्टे परा-र्वाक्तनलोकिनामि'त्यनेन अथ 'यदेतदेवं विद्वान् साम गायत्युभौ साम गायति सोऽमुनैव ये चामुष्मात्पराञ्चौ लोकास्तांश्चाप्नोति देवकामांश्चाथानेनैव ये चैतस्मादर्वाञ्चो लोकास्तांश्चाप्नोति मनुष्यकामांश्चे'ति श्रुतिमुपादत्त इत्यर्थः । श्रुतिस्थेनोभावित्यनेन सूर्यचक्षुःस्थितौ गृह्येते अतः स्वकीयेत्युक्तमनुसन्धेयमिति ।

**शे०चं०—** मुक्तस्वकीयावरयन्तृत्वनिरूपणेन तद्वाक्यानामप्येतदर्थकत्वसूचनादिति भावः ॥ अनन्वय-परिहाराय इतिशब्दाध्याहारेण योजयति **इति श्रुतिरिति** । चक्षुरन्तरस्थप्रसादेन परार्वाक्तनवर्तिनां लोकानामीष्ट इत्यादित्यान्तःस्थभगवत्प्रसादेनापि परार्वाक्तनलोकवर्तिनां मुक्तानामीष्ट इति चक्षुरन्तरस्थप्रसादेन परलोकवर्तिनां मुक्तानामीष्ट इति आदित्यान्तःस्थभगवत्प्रसादेनार्वाक्तनलोकवर्तिनां मुक्तानामीष्ट इति च अन्यथाप्रतीतिनिरासाय यथावत्सम्बन्धमाह **अत्रेति** । 'अनेन देवेने'त्यादि भाष्यं न स्वरूपेण श्रुतेरनुवादरूपं किं त्वर्थत इत्यभिप्रेत्य तत्सङ्गृहीतां श्रुतिं दर्शयति **अनेनेति** । मुक्तनियन्तृताया ज्ञानफलत्वस्य श्रुत्यारूढतालाभाय **अथ य एवं विद्वानित्याद्यामित्युक्तम्** । प्रारब्धपापस्येत्यत्र पापशब्दोऽशुभमात्रपरः । अत एव पाप्मशब्देनाशुभस्य प्रकृत्यादे-र्बन्धस्य विवक्षितत्वादिति वक्ष्यतीति ध्येयम् ॥ **आमोक्षमिति** । लिङ्गदेहभङ्गलक्षणमोक्षपर्यन्तमित्यर्थः । 'प्रारब्धकर्मशेषस्तु विरजातरणावधिरि'ति वचनात् सतोऽपि प्रारब्धकर्मशेषस्याल्पत्वात् । अल्पत्वे च निःस्व-प्रयोगदर्शनात् । 'वैश्वानरे द्युनद्यां वा देहे वा सूर्य एव वा । विधूय सर्वपापानि यान्ति किंस्तुघ्नकेशवमि'ति ततः-पूर्वमेव सर्वपापविधूननवचनमप्युपपन्नम् । अत एवात्र शेषस्त्विति शेषपदं प्रयुक्तमित्यवधेयम् ।

**॥ इति उक्तार्थे श्रुतिप्रमाणम् ॥**

* * *

**॥ अथ चतुर्मुखस्यैव सर्वलोकाधिपत्यम् ॥**

७ **सु०—** यदिदं सर्वलोकाधिपत्यं मुक्तौ फलमुक्तं तत्सर्वेषामपि मुक्तानामिति प्रतीतिनिरासायाह **लोकेति** ।

**अनु०— लोकाधिपत्यं च विधातुरेव**
**सर्वात्मना**

**सर्वात्मना लोकाधिपत्यं च** मुक्तस्य **विधातुरेव** । अन्येषां यथायोग्यमिति भावः । स्वकीयेत्युक्तमनुसन्धेयम् । अत्र प्रमाणमाह **इत्याहे**ति ।

**इत्याह तुरश्रुतिश्च ।**

सा च अन्यत्र द्रष्टव्या । चशब्दो वक्ष्यमाणयुक्तिसमुच्चयार्थः । श्रुत्यन्तरमप्येवमेव व्याख्येयमित्याह **सर्व इ**ति ।

**सर्वे बलिं देवगणा वहन्ती-**
**त्येतच्च नान्यस्य तु युक्तिमेति ।**

'स वेद ब्रह्म, सर्वेऽस्मै देवा बलिमावहन्ती'ति श्रुत्युक्तं मुक्तस्य सर्वदेवपूज्यत्वं च अनवधिकं विधातुरेव न सर्वेषामुक्तश्रुतेरेवेत्यर्थः । इतोऽप्येवमित्याह **ने**ति । पूजका अपि हि देवा मुक्ता एव । अमुक्तानां मुक्तसम्बन्धस्य निवारितत्वात् । तथा च सर्वे देवा मुक्ताः सर्वैर्मुक्तैर्देवैः पूज्यन्त इत्युक्तं स्यात् । एतच्च व्याहतम् । तत एव त(स्यैवोत्त)स्योत्तमत्व-स्याधमत्वस्य क्वाप्यदर्शनात् । अत उक्त एव श्रुत्यर्थः ।

**परि०**— असङ्कुचितं लोकाधिपत्यमिति भ्रमनिरासाय आह **इत्युक्तमनुसन्धेयमिति** ॥ **सा चान्यत्रेति** । 'मुक्तानां न जगद्यन्नस्तथाऽपि विबुधाः सदा । मुक्तानां तु नियन्तारः तेषां ब्रह्माऽस्य वै हरिरि'ति न्यायविवरणे द्रष्टव्येत्येके ॥ **वक्ष्यमाणेति** । 'न चेह विज्ञानफलं समुक्तमि'त्यादिना वक्ष्यमाणेशधर्मत्वादिरूपयुक्तिसमुच्चयार्थ इत्यर्थः ॥ **उक्तेति** । तुरश्रुतेरेवेत्यर्थः ॥ **निवारितत्वा-दिति** । 'मुक्तस्वकीयावरयन्तृते'ति मूलकृता 'विकारावर्ति चे'ति सूत्रकृता चेति भावः ।

**यादु०— सा चान्यत्रेति** ॥ **उक्तश्रुतेरेवेति** । तुरश्रुतेरेवेत्यर्थः ।

**वं०प०— वक्ष्यमाणयुक्तीति** । 'नान्यस्य तु युक्तिमेती'ति वक्ष्यमाणेत्यर्थः ॥ **अनवधिकमिति** । अधिकारिवर्ग इति शेषः ॥ **उक्तश्रुतेरेवेति** । तुरश्रुतेरेवेत्यर्थः । अमुक्ताः पूजकाः किं न स्युरित्यत आह

**अमुक्तानामिति** ॥ **निवारितत्वादिति** । 'न प्रेत्य संज्ञाऽस्ती'ति श्रुत्येत्यर्थः । अमुक्तानां मुक्तविषयकज्ञान-स्यैवाभावे तत्पूजकत्वस्यैवायोगादिति भावः ।

**कं०रा०— मुक्तस्य विधातुरिति** । कल्पान्तरमुक्तान् स्वसममुक्तांश्च प्रत्याधिपत्याभावात् स्वकीया-वरयन्तृतेति यत्प्रागुक्तं तदत्रानुसन्धेयमित्यर्थः ॥ **अत्रेति** । सर्वात्मना लोकाधिपत्यं च मुक्तस्य विधातुरेवेत्यत्र प्रमाणमाहेत्यर्थः ॥ **श्रुत्यन्तरमिति** । 'ता यो वेद, स वेद ब्रह्म सर्वेऽस्मै देवा बलिमावहन्ती'ति श्रुत्यन्तरमपि विधातृपरतयैव व्याख्येयमाहेत्यर्थः ॥ **अनवधिकमिति** । समग्रमित्यर्थः ॥ **उक्तश्रुतेरेवेति** । सर्वात्मना लोकाधिपत्यं मुक्तस्य विधातुरेवेत्यर्थप्रतिपादकतुरश्रुतेरेवेत्यर्थः ।

**शे०चं०— सर्वलोकाधिपत्यमिति** । परार्वाक्तनलोकाधिपत्यमित्यर्थः ॥ **स्वकीयेत्युक्तमिति** । परार्वाक्तनलोकवर्तिस्वकीयावरमुक्तनियामकत्वमेव न तु मुक्तामुक्तस्वकीयास्वकीयादिसाधारण्येन तल्लोकवर्ति-सकलनियामकत्वमित्यर्थः ॥ **सा चान्यत्र द्रष्टव्येति** । अत्र सा चान्यत्र पठितेति वक्तव्ये तथाऽनुक्त्वा अन्यत्र द्रष्टव्येत्येकवचनात् तादृशश्रुतिरुन्नेतव्येत्येव ग्रन्थकृदभिप्रेतमिति विज्ञायते ॥ **वक्ष्यमाणेति** । 'नान्यस्य हि युक्तिमेती'त्युत्तरत्र वक्ष्यमाणेत्यर्थः ॥ **सर्वेषामिति** । न सर्वेषामनवधिकं किं तु यथायोग्यमेवेत्यर्थः ॥ **उक्त-श्रुतेरेवेति** । तुरश्रुतेरेवेत्यर्थः ॥ **निवारितत्वादिति** । 'न प्रेत्य संज्ञाऽस्ती'त्यादिश्रुतेरिति भावः ॥ **उक्त एवेति**। स्वकीयावरसर्वदेवपूज्यत्वं विधातुरेव; अन्येषां तु यथायोग्यमित्युक्त एवेत्यर्थः ।

**स०व्र०— सा चान्यत्र द्रष्टव्या** ॥ **उक्तश्रुतेरेवेति** । तुरश्रुतेरेवेत्यर्थः । **उक्त एव श्रुत्यर्थ इति**। मुक्तस्य विधातुरेवानवधिकसर्वपूज्यत्वमित्येवं श्रुत्यर्थ इत्यर्थः ।

**॥ इति चतुर्मुखस्यैव सर्वलोकाधिपत्यम् ॥**

* * *

**॥ अथ श्रुतिघटकलोकशब्दस्य मुख्याऽमुख्यवृत्त्या मुक्तवाचकत्वम् ॥**

८ **सु०— स्यादेतत्** । तांश्चाप्रोतीत्युक्त आप्ता सर्वाशुभनाशलिङ्गाद्भवतु मुक्तः । तस्य च अत्र लोकाप्तिरेवोच्यते । न तु मुक्तस्वकीयावरयन्तृतेत्यत आह **लोका इति** ।

## अनु०— लोका इतीहापि तु लोकिनां वचो

**इह श्रुतौ लोका इति** पदं तावत् **लोकिनां वचः**प्रतिपादकम् । न केवलमाप्ता मुक्तः । लोकपदमपि लोकिविषयमिति **अपि**शब्दः । **तु**शब्दो वृत्तिविशेषद्योतकः । यथा मञ्चशब्दो मञ्चस्थेषु पुरुषेषु विद्यते तथा लोकशब्दोऽपि लोकस्थेषु पुरुषेष्विति । अत्र

लक्षणाबीजसम्बन्धस्तु स्फुट एव । लाक्षणिकप्रयोगप्रयोजनं वाच्यमित्यत आह लोका इति ।

**लोका इति ह्येव रवः प्रजासु ।**
**प्रयुज्यते सर्वजनैः सदैव**

हिशब्दः प्रसिद्धौ । प्रयोजनानुसन्धानेन विनेति एवशब्दः । **रवः** शब्दः । **प्रजासु** प्रजाविषये । रूढलक्षणैषा तत्र किं प्रयोजनान्वेषणेनेति भावः ।

अथवा किं लक्षणया । यतो वाचक एव लोकशब्दो जनानामिति भावेनाह **लोका इति** । **सर्वजनैः** इति शब्दशक्तिज्ञैः ।

प्रकारान्तरेण लोकशब्दस्य पुरुषवाचित्वमाह **तदिति** ।

**तन्मानिनो लोकपदेन चोक्ताः ॥**

लोकाभिमानिनः । अभिमान्यधिकरणन्यायेनेति भावः ।

**परि०**— इत्युक्त आ(प्त इति)प्तेति । 'अनेन देवेने'त्यत्र सुधायामुदाहृतछन्दोगश्रुत्युक्त-लोकाप्तिमानित्यर्थः । मूलं योजयति इह **श्रुताविति** ॥ **आप्ता इति (प्तेति)** । लोकाप्ति-(मानित्य)मन्त इत्यर्थः ॥ **वृत्तिविशेषेति** । लक्षणावृत्तेर्मुख्यवृत्तेर्वा द्योतकः । **स्फुट एवेति** । आधाराधेयभावरूपो व्यक्त इत्यर्थः ।

**यादु०**— **यतो वाचक एवेति** । 'लोकस्तु भुवने जन' इत्यभिधानादिति भावः ।

**वं०प०**— **सम्बन्धस्त्विति** । तत्रस्थरूप इत्यर्थः ॥ **शब्दशक्तिज्ञैरिति** । 'लोकस्तु भुवने जने' इत्यभिधानादिति भावः ॥ **तद्विवक्षेति** । जनविवक्षेत्यर्थः ।

**कं०रा०**— **आप्तेति** । आप्तृशब्दस्येदं रूपम् ॥ **जानामीति** । 'लोका इति ह्येव वरः प्रजास्वि'ति मूलानुसारेण प्रजानामिति वक्तव्ये यज्जनानामित्युक्तं तेन लोकशब्दस्य जनवाचकत्वे 'लोकस्तु भुवने जन' इति कोशवाक्यं प्रमाणमिति सूचयति **अभिमान्यधिकरणेति** । 'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यामि'त्यत्र अभिमन्यमानवाचकशब्दानामभिमानिषु मुख्यतायाः समर्थितत्वात् लोकाभिमानिषु लोकशब्दो मुख्य इति भावः।

**शे०चं०**— तुशब्दद्योतितं वृत्तिविशेषमेव सूचयति **सम्बन्ध इति** । तत्तल्लोकस्थत्व इत्यर्थः ॥ **स्फुट एवेति** । अतस्तदनिरूपणं न भाष्ये न्यूनत्वापादकमिति भावः ॥ **वाच्यमिति** । अन्यथा स्वायत्तन्याय-विरोधादिति भावः । विषयत्वं सप्तम्यर्थ इति भावेनाह **प्रजाविषय इति** । तथाऽपि प्रयोजनानुक्तेः किं प्रयोजनमिति शङ्काया नानेन परिहार इत्यतः तदनुक्तावपि तदनपेक्षत्वसूचनात् तत्परिहार इत्याह **रूढेति** । अस्वतन्त्रप्रयोगरूपेत्यर्थः । अखण्डशक्त्युपपादकतया भाष्यकारीयप्रयोगबाहुल्यकथनस्योपयोगसम्भवे तत्परि-त्यागेन प्रयोजनानपेक्षत्वसूचकतया रूढलक्षणात्वोपपादकत्वेन तदुपयोगवर्णनं क्लिष्टमित्यपरितोषात् पक्षान्तरमाह **अथवेति** । अङ्गीकारवादत्वाल्लक्षणापक्षस्य न पूर्वोत्तरविरोध इत्याशयेनाह **किं लक्षणयेति** ॥ **वाचक इति** । 'लोकस्तु भुवने जन' इत्यभिधानादिति भावः । अखण्डशक्त्युपपादनानुरूपतया सर्वजनैरित्येतद्व्याचष्टे **शब्द-शक्तिज्ञैरिति** । सर्वजनानामव्यवधानेन प्रकृतत्वेऽपि योग्यत्वाल्लोकानामेव तच्छब्देन परामर्श इत्याह **लोकाभि-मानिन इति** । नन्वस्तु लोकिनां लोकाभिमानित्वं लोकशब्दवाच्यत्वं तु कुत इत्यतोऽभिमन्यमानवाचकानां शब्दानामभिमानिनि मुख्यताया 'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यामि'त्यभिमान्यधिकरणसिद्धत्वात् लोक-शब्दस्यापि तदभिमानिवाचकत्वमेवेत्याह **अभिमान्यधिकरणन्यायेनेतीति** ।

**स०व्र०**— वृत्तिविशेषमेव दर्शयति **यथेति** ।

**॥ इति श्रुतिघटकलोकशब्दस्य मुख्याऽमुख्यवृत्त्या मुक्तवाचकत्वम् ॥**

* * *

**॥ अथ श्रुत्यन्तरसमाख्ययाऽपि लोकशब्दस्य मुक्तार्थकत्वम् ॥**

९ **सु०— अस्तु लोकशब्दस्य जनेषु वृत्तिः तथाऽप्यस्यां श्रुतौ तद्विवक्षा कुतो ज्ञायते । न तावताऽपीष्टसिद्धिः । मुक्तविषयतायां प्रमाणाभावात् । आप्तिरेव चेहोच्यते न तु तन्निय-मनमित्यत आह तद्वा इति ।**

**अनु०— तद्वास्तु मुक्ता इह लोकशब्दा**
**अन्योन्यनाथा इति पैङ्गिनां श्रुतिः ॥**

तुशब्दोऽवधारणे । इह ये च अमुष्मादित्यस्यां श्रुतौ तद्वाः परावलोकगताः मुक्ता एव लोक इति शब्दो एषां ते लोकशब्दाः । ते च अन्योन्यनाथाः उत्तमा अधमानां स्वीयानां नियामका इत्येवमेतच्छ्रुतिव्याख्यानरूपा पैङ्गिश्रुतिरस्ति । यद्यपि मुक्तस्य विकारावर्तिव्यापारनिषेधादेव एतत् सिद्धम् । तथाऽपि दार्ढ्या श्रुत्युदाहरणम् ।

**एतेन लक्षणापक्षे मुख्ये बाधकं च उक्तं भवति । अभिमानिपक्षे तु भूतपूर्वगत्या मुक्तेषु लोकशब्दो व्याख्येयः ।**

**परि०— तद्विवक्षा** लोकस्थजनविवक्षा ॥ **न तावताऽपीति** । लोकविवक्षयाऽपीत्यर्थः ॥ **आप्तिरेवेति** । लोकप्राप्तिरेवेत्यर्थः । इहेति व्याख्येयानुवादः ॥ **एतत्सिद्धमिति** । लोकस्थमुक्तनियन्तृत्वं सिद्धमित्यर्थः ॥ **एतेनेति** । व्याख्यानरूपश्रुतिकथनेन । लक्षणापक्षे साधकीभूतमिति शेषः । मुख्ये लोकपदस्य लोकरूपेऽर्थे पैङ्गिश्रुतिविरोधरूपबाधकं च उक्तम् । न केवलं तत्स्थत्वरूपसम्बन्धाख्यं लक्षणाबीजमिति चार्थः ॥ **भूतपूर्वगत्येति** । मुक्तेः पूर्वं लोकाभिमानित्वं भूतमिति इदानीमपि **लोकशब्देन** गृह्यन्ते। भ्रष्टाधिकारेऽपि लोके घट्टाधिकार्ययमिति व्यवहारदर्शनादिति भावः।

**वं०प०— कुतः** प्रमाणात् ॥ **तावताऽपीष्टसिद्धिरिति** । जनविवक्षाज्ञापकसद्भावमात्रेणापि भवतामिष्टसिद्धिः न भवतीत्यर्थः । कथमित्यत आह **मुक्तविषयतायामिति** । तथा च लोकशब्दोक्तजनानां मुक्तत्वमित्यर्थः । इदमेव च भवतामिष्टं तत्र सिद्धमिति भावः । अस्तु वा मुक्तविषयकत्वं तथाऽपि भवदिष्टं तन्नियमनमपि अत्र नोच्यत इत्याह **आप्तिरेवेति** ॥ **पैङ्गिश्रुतिरस्तीति** । सा चात्र न पठिता अन्यत्र द्रष्टव्येति भावः ॥ **यद्यपीति** । मुक्तो लोकान् जनानाप्नोतीति नियमनं तावदुक्तं मुक्तानाममुक्तनियमनस्य निषिद्धत्वादन्यथाऽनुपपत्त्या मुक्तनियमनमेवात्रोच्यत इत्येवमस्य वाक्यस्य मुक्तविषयकत्वं मुक्तस्य विकारावर्तिव्यापारनिषेधादेव सिद्धमिति नैतच्छ्रुतिव्याख्यानरूपपैङ्गिश्रुत्युदाहरणं कर्तव्यमित्यर्थः ॥ **लक्षणापक्ष इति** । लोकशब्दस्य तत्रस्थेषु पुरुषेषु लक्षणेति पक्ष इत्यर्थः ॥ **बाधकं चेति** । जडभूतलोकनियामकत्वरूपामुख्यार्थाङ्गीकारो न युक्तः । लोकानां विकारत्वेन मुक्तानां विकारावर्तिव्यापारस्य निषिद्धत्वाद्वा तद्वास्तु मुक्ता इह लोक इत्याद्यर्थे पैङ्गिश्रुतिसद्भावेन मुख्यार्थाङ्गीकारे तद्बाधापत्तेरिति बाधकं चोक्तं भवतीत्यर्थः ।

**कं०रा०—** ननु लोकशब्दस्य लोकाभिमानिजनेष्वभिमान्यधिकरणन्यायेन मुख्यत्वात् मुख्यार्थस्यैव च तात्पर्यविषयत्वौचित्यात् तद्विवक्षा ज्ञायत इत्यत आह **तावताऽपीति** ॥ **मुक्तविषयतायामिति** । लोकशब्दस्येति शेषः । प्रकारान्तरेण मुक्तानां मुक्तनियामकत्वरूपेष्टसिद्धेरभावमुपपादयति **आप्तिरेवेति** । 'सोऽमुनैव ये चामुष्मात् पराञ्चो लोकास्तांश्चाप्नोती'ति श्रुतौ लोकशब्दविवक्षितजनाप्तिरेवोच्यते न तु तन्नियामकत्वम्, अतश्च नेष्टसिद्धिरित्यत आहेत्यर्थः ॥ **यद्यपीति** । 'एष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते नावर्तन्त' इति श्रुत्या 'स्वाधिकारेण वर्तन्ते देवा मुक्तावपि स्फुटम् । बलिं हरन्ति मुक्ताय विरिञ्चाय च पूर्ववत्। सब्रह्मकास्तु ते देवा विष्णवे च विशेषतः । न विकाराधिकारस्तु मुक्तानामन्य एव तु । विकाराधिकृता ज्ञेया ये नियुक्तास्तु विष्णुने'ति वाराहवचनेन च मुक्तानाममुक्तविषयव्यापारनिषेधादेव उदाहृतश्रुतौ लोकशब्दस्य मुक्तविषयत्वं सिद्धम्, अतो ये च अमुष्मात् पराञ्चो लोका इति श्रुतिव्याख्यानरूपपैङ्गिश्रुत्युदाहरणं व्यर्थमिति यद्यपि तथाऽप्युदाहृतश्रुतिस्थालोकशब्दस्य मुक्तिविषयत्वदार्ढ्यार्थं श्रुत्युदाहरणं कृतमित्यर्थः । उपलक्षणमेतत् । आप्तिरेव

चेहोच्यते न तु तन्नियामकत्वमिति दूषणनिरासार्थं मुक्तानामन्योन्यनाथत्वरूपाप्तिप्रतिपादकश्रुत्युदाहरणमित्यपि द्रष्टव्यम् ॥ **एतेनेति** । पैङ्गिश्रुत्युदाहरणेन लोकशब्दस्य लोकस्थपुरुषेषु लक्षणेति पक्षे लोकशब्देन मुख्यार्थग्रहणे लोकशब्दव्याख्यानरूपपैङ्गिश्रुतिविरोधरूपं बाधकं चोक्तं भवतीत्यर्थः । ननु लोकशब्देन लोकाभिमानिन उच्यन्त इति पक्षे मुक्तेषु लोकशब्दप्रवृत्तिनिमित्तामुक्त्यवस्थायां लोकाभिमानित्वाभावादित्यत आह **अभिमानिपक्षे त्विति** । भ्रष्टाधिकारे दण्डनाथशब्द इवेति भावः ।

**शे०चं०**— अङ्गीकृत्यापि तद्विवक्षां दूषयति **तावतेति** । अङ्गीकृत्यापि मुक्तविषयतादूषणमाह **आप्ते-रेवेति** । अन्योन्यनाथा इत्यस्य परस्परनियम्यनियामकभाववन्त इत्यन्यथाप्रतीतिनिरासाय तात्पर्यमाह **उत्तमा इति** ॥ **एतत्सिद्धमिति** । मुक्तानामवरनियामकत्वमित्येतत्सिद्धमित्यर्थः ॥ **एतनेति** । श्रुत्युदाहरणेनेत्यर्थः ॥ **बाधकमिति** । लोकशब्दस्य तद्वाच्यलोकपरत्वे लोकिपरत्वव्यवस्थापकश्रुतिविरोधलक्षणमित्यर्थः । नन्वभि-मान्यधिकरणन्यायेन लोकशब्दस्य लोकिपरत्वपक्षे कथं लोकशब्देन मुक्तप्राप्तिः । मुक्तानां लोकाभिमानाभावादित्यत आह **अभिमानिपक्ष इति** ॥ **भूतपूर्वेति** । मुक्तिदशायां लोकाभिमानाभावेऽपि पूर्वं तदभिमानित्वेनेत्यर्थः ।

**स०व्र०**— **एतेनेति** । लोकशब्दस्य लोकलक्षणेत्यस्मिन्पक्षे लोकशब्दस्य मुख्यार्थभूतलोकमात्रपरत्वे मुक्तानाममुक्तविषयकव्यापारे निषेधरूपबाधकमित्यर्थः ।

* * *

१० **सु०**— **प्रकारान्तरेणास्यां श्रुतौ मुक्तस्य मुक्तनियामकत्वं प्रतिपादयन्नाह अलोकेति** ।

## अनु०— अलोकशब्देन विमुक्तिभाजो
## वाच्याः

**लोकदोषातीतत्वाद्विदेहत्वाद्वेति भावः । ततः किं प्रकृत इत्यत आह पदमिति** ।

## पदं तादृगपीह युक्तम् ।

**इह पराञ्चो लोका अर्वाञ्चो लोका इत्यत्र तादृग् अलोक इत्यपि पदं छेत्तुं युक्तम् । लोकालोकशब्दयोः संहिताय(ां) समानरूपत्वादिति भावः ।**

**परि०**— **प्रकारान्तरेणेति** । दर्शयन्नित्यन्वयः ।

**वं०प०**— **संहितायामिति** । सन्ध्युच्चारणकाल इत्यर्थः ।

**कं०रा०**— अलोकशब्देन विमुक्तिभाजः केन निमित्तेन वाच्या इत्यत आह **लोकदोषेति** । लोकदोषातीतत्वरूपं लोकवैलक्षण्यम् अलोकशब्दप्रवृत्तिनिमित्तमिति भावः ॥ **विदेहत्वादिति** । लोक्यतेऽनेनेति ज्ञानसाधनदेहो लोकशब्दार्थः । स न विद्यते यस्येति देहराहित्यमलौकिकशब्दप्रवृत्तिनिमित्तमिति भावः ।

**शे०चं०**— **संहिताया इति** । लोका इति पदच्छेदपक्षे अलोका इति पक्षे च, पराञ्चो लोका इति, अर्वाञ्चो लोका इति, संहितायाः समानत्वादित्यर्थः ।

**॥ इति श्रुत्यन्तरसमाख्ययाऽपि लोकशब्दस्य मुक्तार्थकत्वम् ॥**

* * *

**॥ अथ योगवृत्त्याऽपि लोकशब्दस्य मुक्तार्थत्वम् ॥**

११ **सु०— योगवृत्त्याऽपि लोकशब्दस्य मुक्तेषु वृत्तिः सम्भवतीत्याह लोकेति ।**

**अनु०— लोकाभिधाश्चापि यतो हि मुक्ताः**
**प्रकाशरूपाः सततं च सर्वे ॥**

**यतः सर्वेऽपि मुक्ताः सततमपि प्रकाशरूपाः प्रसिद्धाः ततोऽपि लोकाभिधाः । लोकतेः पचाद्यचि कृते रूपमेतत् । दर्शनं प्रकाश इति च नार्थान्तरम् ।**

**परि०**— **लोकतेरिति** । 'लोकृ दर्शने' इत्यतो 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति अच्प्रत्यये लोक इति रूपमित्यर्थः ॥ ननु दर्शनार्थकशब्दस्य कथं प्रकाशार्थत्वमित्यत आह **दर्शनमिति** ।

**यादु०**— ननु लोकृदर्शने इति लोकतेर्दर्शनार्थतया व्याख्यातत्वात् कथं प्रकाशरूपा इति यौगिकार्थप्रदर्शनमित्यत आह **दर्शनं प्रकाश इति** ॥ **उक्तमिति** । 'लोकाधिपत्यं च विधातुरेव सर्वात्मनेत्याह तुरश्रुतिश्चे'त्यनेन यदुक्तं तदेव सप्रमाणकं प्रमेयं ब्रह्मैवेत्यारभ्य तुरश्रुतिश्चेत्यन्तेन वाक्येन स्मारयितुमाहेत्यर्थः ।

**वं०प०**— **लोकतेरिति** । लोकृ दर्शने इति धातोरित्यर्थः । 'नन्दिग्रहिपचादिभ्य' इति सूत्रेण कर्तर्यच्प्रत्यय इत्यवधेयम् । कर्त्रर्थकाच्प्रत्यये सति निष्पन्नो लोकशब्दः प्रकाशवत्त्वमेवाह न तु प्रकाशरूपत्वम् । तथाऽपि मुक्तानां प्रकाशो न तद्भिन्न इत्याशयेन प्रकाशरूपा इत्युक्तमित्यवधेयम् ।

**कं०रा०— लोकतेरिति** । लोकृ दर्शन इत्यस्मात्पचाद्यचि कृते लोकेति रूपमिति भावः । तर्हि दर्शनरूपा इति वक्तव्ये प्रकाशरूपा इति कथमुक्तमित्यत आह **दर्शनमिति** ।

**शे०चं०—** मूले यत इत्युक्तत्वात् तत इत्यस्य लाभम् अपिशब्दस्याध्याहृतेन सम्बन्धं, चशब्दस्याप्यर्थत्वं हिशब्दस्य प्रसिद्ध्यर्थत्वं च अभिप्रेत्य यथाश्रुतहेतुहेतुमद्भावप्रतीतिं निवारयन्नेव लोकेत्यादिभाष्यं योजयति **यत इत्यादिना** । **रूपमेतदिति** । लोकृ दर्शने इत्यस्मात्पचाद्यचि लोकशब्दनिष्पत्तिरिति भावः । ननु दर्शनार्थत्वाद्धातोः कथं प्रकाशरूपा इति यौगिकार्थप्रदर्शनमित्यत आह **दर्शनमिति** ।

**वा०र०—** दर्शनमितीति प्रतीकोपादानानन्तरमुक्तमितीत्यतः प्राक्सम्भवतीति बाधितत्वादिति भाव इत्ययं ग्रन्थः ।

* * *

**१२ सु०— यदुक्तं प्राग्लोकाभिमानिनो ये मुक्तास्त इह लोकशब्दार्था इति तदसत् । ते हि उत्तमाः । न च तन्नियमनं मुक्तानां सम्भवतीत्यतो मोक्तं विस्मार्षीरित्याह ब्रह्मैवेति ।**

## अनु०— ब्रह्मैव लोकाधिपतिर्विमुक्तो
## भवेदिति प्राह तुरश्श्रुतिश्च ॥

**तथा च नानुपपत्तिरिति ।**

**परि०— मोक्तमिति** । मा विस्मार्षीरिति माङोऽन्वयः । 'लोकाधिपत्यं च विधातुरेवे'त्यादिनोक्तमित्यर्थः ।

**वं०प०— मुक्तानां** नीचानाम् ॥ **उक्तमिति** । 'लोकाधिपत्यं च विधातुरेवे'त्युक्तमित्यर्थः ।

**कं०रा०— मोक्तं विस्मार्षीरिति** । उक्तं मा विस्मार्षीरित्यन्वयः ।

**शे०चं०— सम्भवतीति** । बाधितत्वादिति भावः ॥ **उक्तमिति** । 'लोकाधिपत्यं च विधातुरेव सर्वात्मनेत्याह तुरश्श्रुतिरि'त्यादिनोक्तमित्यर्थः । तथा च ब्रह्मैवेत्युत्तरग्रन्थस्य लोकाधिपत्यमित्यादिना प्रागुक्तार्थस्मारकत्वान्न पुनरुक्तिरिति भावः ।

**॥ इति योगवृत्त्याऽपि लोकशब्दस्य मुक्तार्थत्वम् ॥**

* * *

॥ अथ मायावाद्यभिप्रेतश्रुत्यर्थनिराकरणम् ॥

१३ **सु०—** एवं स्वमतेन श्रुतिं व्याख्याय यत्परेषां व्याख्यानमादित्यमण्डले परमेश्वर-मुपासीनस्य विदुषः परलोकाधिपत्यं भवति चक्षुष्युपासीनस्यार्वाक्तनलोकाधिपत्यं भवतीति तन्निराकरोति **न चेति** ।

**अनु०—** न चेह विज्ञानफलं समुक्तं
लोकाधिपत्यं

इह श्रुतौ । **लोकाधिपत्यं** विज्ञानफलं समुक्तमिति व्याख्यानं न युक्तम् । कुत इत्यत आह **रवीति** ।

रविबिम्बगे हरौ ।
उक्तं पृथक् तच्च पुरैव यस्मात्

**चशब्देन** चक्षुर्गते चेति समुच्चिनोति । **यस्मात्** कारणात् **तत्** लोकाधिपत्यं **पुरैव** पूर्ववाक्य एव **रविबिम्बगे हरौ** चक्षुरन्तर्गते च **पृथक्** विभागेनोक्तम् । आदित्यगतं प्रकृत्य 'स एष ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे (देवे) देवकामानां चे'ति । तथाऽक्षिगतम् । 'स एष ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चे'ति । तस्मान्नेति ।

एतदुक्तं भवति । न समस्तलोकाधिपत्यं विदुषो युज्यते । तस्य भगवद्धर्मत्वेन अत्रैव उक्तत्वादिति ।

**परि०—** **स्वमतेन श्रुतिं व्याख्यायेति** । मुक्तब्रह्मणः परार्वाक्तनलोकमानिनः तेन सह मुक्तान् प्रति नियन्तृत्वपरेयं श्रुतिरिति व्याख्यायेत्यर्थः । **अमुष्मात्** सूर्यमण्डलादित्यर्थः । **पराञ्च** उपरितनाः ॥ **अक्षिगतमिति** । प्रकृतेत्यनुषङ्गः ।

**वं०प०—** **विदुषो** ज्ञानिनः अमुक्तस्य । **समुक्तं** सम्यगुक्तम् । **निराकरोति** लोकाधिपत्यं रवि-बिम्बचक्षुरन्तर्गतभगवद्धर्मत्वेनोक्तमस्ति तज्ज्ञानिनः फलत्वेन वक्तुं न युक्तमित्येवं निराकरोतीत्यर्थः । **प्रकृत्य** अधिकृत्य । **अक्षिगतं** प्रकृत्येति वर्तते ।

**कं०रा०— विदुषः परलोकाधिपत्यमिति** । अनेन परमतेऽस्याः श्रुतेर्ज्ञानिविषयत्वं न तु मुक्तविषयत्वमित्युक्तं भवति । **तथाक्षिगतमिति** । प्रकृत्येति सम्बध्यते ।

**शे०चं०— श्रुतिं व्याख्यायेति** । अथ य एवं विद्वानित्याद्यां श्रुतिं व्याख्यायेत्यर्थः । विभागेनोक्तमित्येतदेव विशदयति **आदित्यगतमित्यादि** । 'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यत' इत्युपक्रमे श्रवणादिति भावः ॥ **अक्षिगतमिति** । प्रकृत्येति वर्तते । 'अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते' इत्युपक्रमे श्रवणादिति भावः । एतावताऽपि कथमुक्तशङ्कापरिहार इत्यत आह **एतदुक्तं भवतीति** ।

* * *

**१४ सु०— भगवद्धर्मोऽपि विदुषो भवतीत्यङ्गीकारे को दोष इति चेत् । तत्किं भगवान् स्वीयसर्वलोकाधिपत्यं परित्यज्य विदुषे ददातीति । उत विद्वांसमवान्तरेश्वरं करोतीति । अथ विद्वांस्तादात्म्यं प्राप्नोतीति ।**

**नाद्यः । भगवदैश्वर्यस्य समस्तश्रुत्यादौ नित्यत्वावगमात् । किं चैकस्मै विदुषे दत्तस्वाधिपत्यो भगवानन्यस्मै (विदुषे) किं दद्यात् । सर्वपापक्षयलिङ्गविरोधाच्च ॥ अत एव न द्वितीयः । हिरण्यगर्भे तद्युज्यत इति चेन्न । पाप्म(प)शब्देन प्रकृत्यादेर्बन्धस्य विवक्षितत्वात् । अत एवोक्तं सर्वाशुभेति । 'तस्योदिति नामे'ति हि परमेश्वरस्योच्छब्दं नामत्वेनोक्त्वा तस्य निर्वचनं क्रियते 'स एष सर्वेभ्यः पाप्मभ्य उदित' इति । तत्रोदितत्वमेवोच्छब्दार्थः । कस्मादित्यपेक्षायां योग्यं किमपि ग्राह्यम् । न च तत्पापमेवेति नियामकमस्ति । अतः सर्वमप्यशुभं तत्र विवक्षितम् । तदेव च विदुषः फलमुच्यते ।**

**तृतीयं निराकरोति भेद इति ।**

## अनु०— भेदोऽमुनेत्यादि च सम्यगुक्तः ॥

**विदुषः । परमेश्वरादिति शेषः । आदिपदेन अनेनेत्यस्य ग्रहणम् । क्रियाविशेषणं चैतत् । भेदश्चेति सम्बन्धः । सम्यगिति । स्पष्टम् । न हि तदात्मा तत्प्रसादात् तद्धर्मा भवति ।**

**परि०— नित्यत्वेति** । 'एष नित्यो महिमा ब्राह्मणस्ये'त्येवमागमादित्यर्थः । श्रुतीनामनादिनित्यतया सर्वदा भगवन्महिमप्रतिपादनात् तत्प्रतिपादितैश्वर्यं नित्यमिति भावेन 'समस्तश्रुत्यादावि'त्युक्तम् । सर्वत्र नित्यपदाश्रवणादाह **किञ्चेति** ॥ **सर्वपापक्षयेति** । 'उदेति ह वै सर्वेभ्यः

पाप्मभ्य' इत्युक्तस्य मुक्तलिङ्गतयोपासके अयोगादिति भावः ॥ **अत एवेति** । लिङ्गविरोधादेवेत्यर्थः ॥ **सर्वाशुभेति** । एतच्च 'सर्वाशुभनाशलिङ्गादि'ति पूर्ववाक्ये पापनाशलिङ्गादित्यनुक्त्वा सर्वाशुभेत्युक्त्या प्रकृत्यादिबन्धनाशस्य विवक्षितत्वं ज्ञायत इति भावः । 'पाप्मभ्य' इत्येव श्रवणात् कथं प्रकृत्यादिबन्धविमुक्तत्वं व्याख्यायत इत्यतः प्रकरणबलादित्याह **तस्योदितिनामेतीति** ॥ **क्रियाविशेषणमिति** । अमुनेत्यादि यथा भवति तथा भेदश्चेत्यर्थः । चशब्दान्वयेनानुवादो **भेदश्चेति** ।

**गु०दी०— हिरण्यगर्भे तद्युज्यत** इत्यत्र तत् पापरहितत्वाख्यलिङ्गं युज्यते । ऋजुगुणाग्रेसरत्वादिति भावः । ऋजवः पापवन्त इत्यस्य च व्याहतत्वादिति भावः ।

**यादु०— सर्वपापक्षयलिङ्गेति** । 'उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदे'ति वाक्योक्तं सर्वपापक्षयरूपं यन्मुक्तलिङ्गं तद्विरोधाच्चेत्यर्थः । प्रारब्धपापवति विदुषि सर्वपापक्षयासम्भवादिति भावः । 'उदेति ह' इत्यस्मिन्वाक्ये सर्वपापपदं प्रकृतिबन्धादिरूपसर्वाशुभपरमित्यत्र नियामकं वक्तुमाह **तस्योदितनामेत्यादिना** ॥ **उदितत्वमेवेति** । उद्गतत्वमेवेत्यर्थः ॥ **सर्वमपीति** । परमेश्वरे सङ्कोचे कारणाभावादिति भावः ॥ **तदेव चेति** । 'तं यथा यथोपासत' इति श्रुतेर्वक्तुमुचित इति शेषः ।

**वं०प०— नित्यत्वावगमादिति** । तथा च स्वीयं परित्यज्य ददातीति वक्तुं न शक्यत इत्यर्थः ॥ **अत एवेति** । सर्वपापक्षयलिङ्गविरोधादेवेत्यर्थः ॥ **न द्वितीय इति** । अवान्तरेश्वरस्य सर्वलोकाधिपत्यं न युज्यते तस्मिन् सर्वपापक्षयरूपलिङ्गस्य बाधितत्वादिति भावः । **हिरण्यगर्भे** अवान्तरेश्वरभूते । 'उदेति ह वै सर्वेभ्यः पाप्मभ्य' इति श्रुतौ पाप्मशब्देन प्रकृतिबन्धादिसर्वाशुभमेव विवक्षितं न सङ्कोच इत्यभिप्रेत्योपपादयति **तस्योदितिनामेत्यादिना** । सर्वमप्यशुभं प्रकृतिबन्धादिरूपम् ॥ **फलमुच्यत इति** । इदं चामुक्ते ज्ञानिनि हिरण्यगर्भे न सम्भवतीत्याशयः ॥ **क्रियेति** । इत्यादि यथा स्यात् तथोक्त इति उक्तरूपक्रियाविशेषणमित्यर्थः । अन्यथा इत्यादिनेति वक्तव्यत्वादिति भावः ।

**कं०रा०— सर्वपापक्षयेति** । अस्याः श्रुतेर्ज्ञानिविषयत्वे 'उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदे'त्युक्तसर्वपापक्षयलिङ्गविरोधो ज्ञानिनः प्रारब्धपापस्यामोक्षं सत्त्वात् अतो ज्ञानिविषयतया अस्याः श्रुतेर्व्याख्यानमयुक्तमिति भावः ॥ **अत एव न द्वितीय इति** । भगवान्विद्वांसमवान्तरेश्वरं करोतीति द्वितीयपक्षोऽपि न सम्भवति । विदुषि सर्वपापक्षयलिङ्गविरोधादेवेत्यर्थः । हिरण्यगर्भस्य पापकार्यदुःखाभावेन पापाभावात् सर्वपापक्षयलिङ्गं हिरण्यगर्भरूपविदुषि युज्यत इति शङ्कते **हिरण्यगर्भ इति** ॥ **अत एवोक्तमिति** । 'उदेति ह वै सर्वेभ्यः पाप्मभ्य इत्यत्र पाप्मशब्देन प्रकृत्यादिबन्धस्यापि विवक्षितत्वादेव मुक्तावेतच्च सर्वाशुभनाशलिङ्गत्वादित्यत्र सर्वाशुभेत्युक्तम् । तथाच हिरण्यगर्भरूपज्ञानिन्यपि पाप्मशब्दविवक्षितप्रकृत्यादिबन्धस्य सत्त्वात् तत्रापि सर्वपापक्षयलिङ्गं न युक्तमिति भावः । ननु सर्वाशुभेत्याचार्यैरुक्तत्वेऽपि श्रुतिस्थपाप्मशब्देन सर्वाशुभस्य विवक्षितत्वं कुतो ज्ञायत इत्यतः तदुपपादयति **तस्योदेति नामेत्यादिना** ॥ **कस्मादित्यपेक्षायामिति** ।

कस्मादुदित इत्यपेक्षायामित्यर्थः ॥ **तत्रेति** । 'स एष सर्वेभ्यः पाप्मभ्य उदित' इति श्रुतावित्यर्थः ॥ **तदेव चेति** । यत्प्रकृतिबन्धादि सर्वाशुभराहित्यं परमेश्वरस्योच्छब्दार्थत्वेनोक्तं तदेतत् 'विदुष उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदे'ति श्रुत्या फलत्वेनोच्यते । अतः सर्वाशुभस्य पापशब्देन विवक्षितत्वं ज्ञायत इति भावः ॥ **तृतीयमिति** । विद्वांस्तादात्म्यं प्राप्नोतीति तृतीयपक्षं निराकरोतीत्यर्थः । अमुनेत्यादिना भेदः सम्यगुक्त इति वक्तव्ये अमुनेत्यादि चेति कथमुक्तमित्यत आह **क्रियाविशेषणं चैतदिति** । अमुनेत्यादीत्येतत्क्रिया-विशेषणमित्यर्थः । अमुनाऽनेनेति पदद्वयेन कथं भेद उक्त इत्यत आह **न हीति** ।

**श्रे०चं०— सर्वेति** । 'उदेति ह वै सर्वेभ्यः पाप्मभ्यः य एवं वेदे'ति वाक्योक्तं यत्सर्वपापक्षयरूप-मुक्तलिङ्गं तद्विरोधाच्चेत्यर्थः । प्रारब्धपापवति ज्ञानिनि सर्वपापक्षयासम्भवादिति भावः । **अत एवेति** । सर्वपापक्षयलिङ्गविरोधादेवेत्यर्थः ॥ **तदिति** । सर्वपापक्षयरूपलिङ्गमित्यर्थः । हिरण्यगर्भस्यावान्तरेश्वरत्वादिति भावः ॥ **पापेति** । हिरण्यगर्भे प्रकृत्यादिबन्धस्य सत्त्वेन सर्वाशुभनाशरूपसर्वपापक्षयाभावादित्यर्थः । ननु सर्वेभ्यः पाप्मभ्य उदित इत्यत्र सर्वाशुभनाशोक्तौ किं विनिगमकमित्यत आह **तस्योदिति नामेत्यादिना** ॥ **उदितत्वमेवेति** । उद्गतत्वमेवेत्यर्थः ॥ **सर्वमपीति** । परमेश्वरे तत्सङ्कोचे कारणाभावादिति भावः ॥ **तदेव चेति** । 'उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदे'ति श्रुतेरिति भावः । ननु करणत्वाद्वाक्यस्यामुनेत्यादिनेति तृतीयया भवितव्यम् । इत्यादीति तु कथमित्यत आह **क्रियाविशेषणं चैतदिति** । साधनं परित्यज्य धात्वर्थ-मात्रविशेषणं क्रियाविशेषणमित्यर्थः । ततश्च क्रियाद्वारेण स्त्रीलिङ्गत्वे प्राप्ते क्रियाव्ययविशेषणानां क्लीबत्वमेक-वचनान्तत्वं च वाच्यमिति क्लीबत्वस्यैकवचनान्तत्वस्याव्ययत्वस्य च विधानात् अव्ययादाप्सुप इति सुब्लोपे इत्यादीत्युपपन्नमिति भावः । इत्यादि चेत्यत्र चशब्दस्य वैयर्थ्येन यथाश्रुतसम्बन्धानुपपत्तेर्भिन्नक्रमतया तं योजयति **भेदश्चेति सम्बन्ध इति** । सम्यग्भेदोक्तिमेव स्पष्टयति **न हीति** ।

**वा०र०— पाप्मेतीति** प्रतीकोपादानम् । यज्ञमिति क्रियाविशेषणमिति गीताभाष्यव्याख्यानरूप-तट्टीकानुसारेणाह **साधनमिति** । ततश्च क्रियाद्वारेणेत्यादि आनन्दमयाधिकरणादौ प्रपञ्चितं तत एवावधेयम् । तदुपपादनमधिकं तद्व्याख्यानावसरेऽस्मदीयं ज्ञेयम् ।

**स०व्र०— सर्वपापक्षयेति** । न हि मुक्तेरितरत्रैतत्सम्भवति । प्रारब्धपापस्य आमोक्षं विद्यमानत्वा-दिति भावः ॥ **अत एवेति** । सर्वपापक्षयलिङ्गविरोधादेवेत्यर्थः ॥ **तद्युज्यत इति** । सर्वपापक्षयलिङ्गं युज्यत इत्यर्थः । तस्यावान्तरेश्वरत्वादिति भावः ॥ **पापेति** । हिरण्यगर्भे प्रकृत्यादिबन्धस्य सत्त्वेन सर्वाशुभनाशरूप-सर्वपापक्षयाभावादित्यर्थः । ननु 'सर्वेभ्यः पाप्मभ्य' इत्यत्र सर्वाशुभनाशो नोच्यत इत्यत आह **तस्योदिति नामेति** ।

**॥ इति मायावाद्यभिप्रेतश्रुत्यर्थनिराकरणम् ॥**

* * *

**॥ अथ श्रुतेः अभेदपरत्वे दोषकथनम् ॥**

१५ **सु०—** भवेदेतत् यदि अमुना अनेनेत्येतत् अमुना देवेन प्रसन्नेन निमित्तेनेति व्याख्यायेत । न चैवम् । किं नाम अमुना रूपेण अमुष्य तादात्म्यं प्राप्य, तथा अनेन रूपेणास्य तादात्म्यं प्राप्येति । न चैवं सति भेदोक्तिरस्तीत्यत आह **त्वप्रत्ययमिति** ।

**अनु०— त्वप्रत्ययं चाप्यतिहाय नैव**
**रूपेण तेनेति भवेदिहार्थः ॥**

**चशब्दस्तत्समान(ार्थ)प्रत्ययान्तरसमुच्चयार्थः** । **अपिशब्दो** रूपेणेति पदस्य । **तेन** इति अमुना अनेन इति उभयोः ग्रहणम् । **अतिहाय प्रवृत्तायामिह श्रुतौ** । भवे(देवं प)दयं परस्याभिलाषः श्रुतिस्तु न तथा वक्ति । यदि खल्वदस्त्वेनादस्त्तयेदंत्वेनेदन्तयेति भाववाची प्रत्ययः स्यात् । यदि वा(चा)ऽमुना रूपेणात्मना, अनेन रूपेणात्मनेति पदं स्यात् । तदा प्रतीमोऽयमर्थः श्रुत्यभिप्रेत इति । न चैतदस्तीति ।

**परि०—** शङ्कते **भवेदिति** । **अमुना** रूपेणेत्यनुवादः । अमुष्य तादात्म्यमाप्येत्यर्थोक्तिः । **एवमग्रेऽपि** ॥ **प्रत्ययान्तरेति** । तल्प्रत्ययेत्यर्थः ॥ **रूपेणेति पदस्येति** । समुच्चयार्थ इत्यनुकर्षः । रूपेणेति पदमपि अतिहायेत्यर्थकतया **अपिशब्दः** समुच्चयार्थ इत्यर्थः । ल्यबन्वयघटनाय क्रियान्तरमाह **प्रवृत्तायामिति** । इहेत्यनुवादः **श्रुतौ** इति व्याख्या । अस्फुटत्वान्निकृष्य स्वयमर्थं व्यनक्ति **भवेदेवमिति** ।

**वं०प०—** **प्रत्ययान्तरेति** । तल्प्रत्ययेत्यर्थः । 'तस्य भावस्त्वतलावि'ति सूत्रादित्यर्थः । तथा च त्वप्रत्ययं चशब्दात् तत्समानार्थकं तल्प्रत्ययमपिशब्दाद्रूपेणेतिपदं चातिहाय प्रवृत्तायामिह श्रुतौ । तेन अमुना । अनेन रूपेणेत्यर्थो न भवेदिति मूलार्थो द्रष्टव्यः । **प्रत्ययः** त्वतलोरन्यतरः प्रत्ययः । अपिशब्दसमुच्चेयमर्थं दर्शयति **यदि चेति** । रूपेणेत्यस्यार्थः **आत्मनेति** । अमुख्यतादात्म्यं प्राप्तेत्यर्थः । अनेन रूपेणेत्यस्यार्थः **आत्मनेति** । अस्य तादात्म्यं प्राप्येत्यर्थः ।

**कं०रा०—** अमुना रूपेणेत्यस्य पर्यवसितार्थमाह **अमुष्य तादात्म्यं प्राप्येति** । अक्ष्यादित्यमण्डलस्थपरमेश्वरस्य तादात्म्यं प्राप्येत्यर्थः । अनेन रूपेणेत्यस्य पर्यवसितार्थमाह **अस्य तादात्म्यं प्राप्येति** । अक्षिस्थपरमेश्वरस्य तादात्म्यं प्राप्येत्यर्थः । **चशब्द इति** ॥ **त्वप्रत्ययं चेति** ॥ चशब्दस्त्वप्रत्ययसमानार्थकतल्प्रत्ययसमुच्चयार्थ इत्यर्थः ॥ **अपिशब्द इति** ॥ **अपिशब्दो रूपेणेति** । तदस्य समुच्चयार्थ इत्यन्वयः ॥

**तेनेतीति** । तेनेत्यनेन अमुना तेनेत्युभयोर्ग्रहणमित्यर्थः । ननु त्वप्रत्ययं चाप्यतिहाय 'नैव रूपेण तेनेति भवेदिहार्थ' इत्यत्र भवेदिति क्रियायामर्थस्य कर्तृत्वेनातिहायेति क्रियायामिहेतिशब्दोपात्तश्रुतेः कर्तृतया क्रिययोः समानकर्तृत्वाभावात् क्त्वात्प्रत्ययादेशल्यबनुपपत्तिरित्यत आह **प्रवृत्तायामिति** । अतिहाय प्रवृत्तायामिह श्रुताविति प्रवृत्तायामित्यस्याध्याहारेण योजनायामतिहायनप्रवृत्त्योः समानकर्तृत्वात् ल्यबुपपत्तिरिति भावः ।

**शे०चं०— प्रत्ययान्तरेति** । भाववाचकतल्प्रत्ययरूपप्रत्ययान्तरेत्यर्थः ।

* * *

१६ **सु०— ननु भावप्रधाना निर्देशा बहुलमुपलभ्यन्ते । ततो विनाऽपि प्रत्ययेन सोऽर्थो भविष्यति । सोपस्कराणि च वाक्यानि भवन्ति । ततो रूपेणेत्यादिपदाध्याहारो वा करिष्यते । को दोष इति चेन्न । निश्चिते हि वाक्यार्थे तदुपपद्यते । न च तन्निश्चायकमत्रास्तीत्याशयवान् दोषान्तरमाह भवतीति ।**

**अनु०— भवत्यसावित्यणुशब्दमत्र**
**विहाय वाक्यानि बहूनि दोषः ।**

**यद्यस्यां श्रुतौ तादात्म्यप्रास्या(प्तौ) तदीयं सर्वलोकाधिपत्यमस्य भवतीत्यर्थो विवक्षितः स्यात् । तर्ह्यत्रैतदर्थप्रतिपादने 'अयं विद्वानसौ परमात्मा भवती'त्येतावदेव वक्तव्यम् । न तु सोऽमुनैवेत्यादिकम् । तादात्म्यप्राप्तौ तद्धर्म(र्म्य)स्य स्वतःसिद्धत्वात् । अयं असौ भवतीत्यल्पं शब्दं विहाय बहूनि वाक्यानि प्रयुञ्जानायाः श्रुतेरकुशलत्वदोषः स्यात् । न हि कश्चिदल्पीयसा प्रयत्नेन सिद्ध्यत्यर्थे महान्तं प्रयत्नमातिष्ठमा(नः सद्भि)नो महद्भिराद्रियते । किं चात्र परमेश्वरः सगुणो वा विवक्षितो निर्गुणो वा । आद्ये न विदुषः तत्तादात्म्यमस्ति । परेणा(प्य)नभ्युपगतत्वात्(मात्) । न द्वितीयः । निर्गुणस्याऽऽदित्यादिपरिच्छेदानुपपत्तेः । ऐश्वर्यासम्भवाच्च । न च तद्रूयङ्गतस्य सर्वलोकाधिपत्यं भवतीति ।**

**परि०—** ननु परागर्वाक्तनलोकाधिपत्यरूपभगवद्धर्मप्राप्त्यर्थमेतावान् शब्दः प्रयुक्त इत्यत आह **तादात्म्यप्राप्ताविति** । ऐश्वर्यासम्भवं व्यनक्ति **न च तद्रूयमिति** । तत्तादात्म्यं प्राप्तस्येत्यर्थः ।

**गु०दी०—** तद्रूयं गतस्येत्यत्र तद्रूयं तदात्मकत्वम् ।

**यादु०—** तद्रूयं तद्भावम् ॥ ४-४-७ ॥

**वं०प०**— नन्वयं विद्वानसौ परमात्मा भवतीत्युक्तौ तादात्म्यमेव प्राप्तं न तु सर्वलोकाधिपत्यरूपस्तद्धर्मः अतः तत्प्रतिपादनाय सोऽमुनैवेत्यादिकं सार्थकमित्यत आह **तादात्म्यप्राप्ताविति** । **तद्धर्म्यस्य** तद्धर्मवत्त्वस्येत्यर्थः ॥ **न विदुष इति** । विशिष्टयोरैक्यायोगादिति भावः ॥ **परेणापीति** । तथात्वे तत्त्वमस्यादिवाक्ये चिन्मात्रलक्षणा न क्रियेतेति भावः ॥ **आदित्यादिपरिच्छेदेति** ॥ निर्गुणस्यापरिच्छिन्नत्वेनादित्यचक्षूरूपपरिच्छिन्नस्थानस्थितत्वमत्रोच्यमानमनुपपन्नमित्यर्थः ॥ **ऐश्वर्येति** । निर्गुणस्य लोकाधिपत्यादिरूपैश्वर्यस्य पूर्ववाक्योक्तस्यासम्भवादित्यर्थः । **तद्भूयं** निर्गुणब्रह्मभावम् ।

**कं०रा०**— **यद्यस्यां श्रुतौ तादात्म्यं प्राप्येति** वर्तमानस्येति शेषः । तथाच अस्यां श्रुतौ तादात्म्यं प्राप्य वर्तमानस्यास्य सर्वलोकाधिपत्यं भवतीत्यर्थो यदि विवक्षितः स्यादित्यर्थः । **तेन प्राप्येति** ल्यबुपपत्तिः प्रयुञ्जानायाः श्रुतेरिति पदद्वयमध्याहार्यमित्याशयेनाह **बहूनि वाक्यानि प्रयुञ्जानायाः श्रुतेरिति** । दोषं विवृणोति **अकुशलत्वदोष इति** ॥ **निर्गुणस्यादित्यादीति** । निर्गुणस्यापरिच्छिन्नत्वेनादित्यस्थोऽक्षिस्थ इत्यादित्याक्षिकृतपरिच्छेदायोगादित्यर्थः ॥ **ऐश्वर्यासम्भवाच्चेति** । निर्गुणस्येति वर्तते । द्वितीयपक्षे दूषणान्तरमाह **न च तद्भूयमिति** । निर्गुणभावं गतस्य सर्वलोकाधिपत्यं न सम्भवति चेत्यर्थः । भुवो भाव इति अनुपसर्गे सुप्युपदे भुवो धातोर्भावे क्यप्प्रत्ययस्य विहितत्वात् तच्छब्द उपपदे भवतेर्भावे क्यप्रत्यये तस्य कित्वेन क्ङिति चेति गुणप्रतिषेधे च तद्भूयमिति रूपम् ।

**शे०चं०**— **बहुलमिति** । इहैव शास्त्रे 'मुक्तोपसृप्यव्यपदेशादि'त्यादयः । व्याकरणे च 'द्व्येकयोर्द्विवचनैकवचन' इत्यादय इत्यर्थः ॥ **तत इति** । वाक्यस्य सोपस्करत्वादित्यर्थः । भाष्यकारीयं शाब्ददोषव्युत्पादनं शाब्ददोषोऽपि लगतीत्यभिप्रेत्यैव न त्वर्थदोषोऽत्र न लगतीत्यभिप्रेत्येत्याशयवान् स्वयमर्थदोषमाह **किञ्चेति** ॥ **अनभ्युपगमादिति** । सगुणस्य कल्पितत्वादिति भावः ॥ **निर्गुणस्येति** । आदित्यादिपरिच्छिन्नत्वे सगुणत्वापातादित्यर्थः ॥ **ऐश्वर्येति** । निर्गुणस्याप्यैश्वर्याभ्युपगमे निर्गुणत्वव्याघातादित्यर्थः ॥ **न चेति** । नापीत्यर्थः ॥ **तद्भूयङ्गतस्येति** । यद्यपि वदः सुपीत्यतः सुपीत्यनुवृत्तौ भुवो भाव इत्यनेन तस्य भावमिति तच्छब्दे उपपदे भवतेर्धातोर्भवनरूपेऽर्थे क्यप्प्रत्यये कित्त्वाद्गुणाभावे च सति निष्पन्नत्वाद् भूयशब्दस्य तद्भवनमात्रार्थतया न तत्त्वार्थत्वम् । तथाऽपि 'स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपी'त्यभिधाने ब्रह्मभूयब्रह्मत्वब्रह्मसायुज्यशब्दानां पर्यायतामभिधाय 'देवभूयादिकं तद्वदि'त्युत्तरवाक्ये देवभूयदेवत्वदेवसायुज्यशब्दानामपि पर्यायतामुक्त्वा आदिपदेन मूर्खभूयमूर्खत्वमूर्खसायुज्यशब्दानामिव तद्भूयतत्त्वतत्सायुज्यशब्दानामपि पर्यायत्वस्याभिधानिकत्वाद्व्याकरणस्य च साधुत्वाद् व्याख्यानमात्रपरत्वाद्युक्तमेव तद्भूयशब्दस्य तत्त्वार्थत्वम् । तथा च तद्भूयं तत्त्वं ब्रह्मत्वमिति यावत् तत्प्राप्तस्येत्यर्थः पर्यवस्यति ॥ एतदेवाभिप्रेत्योक्तं टीकायां ब्रह्मभूयाय परब्रह्मत्वायेतीति ध्येयम् ।

**वा०र०**— **अनभ्युपगमादितीति** । अनभ्युपगतत्वादित्यस्यार्थानुवादोऽयम् । कचिदनभ्युपगमादित्येव मूलपाठः । तद्भूयङ्गतो नाम तत्त्वं प्राप्तः । तच्छब्दश्च प्रकृतनिर्गुणब्रह्मपरः । तथा च तादृशं ब्रह्मत्वं प्राप्ततद्भूय-

गतस्तस्येति पर्यवसानमुत्तरत्र विवक्षुरूपोद्घातेन तद्भूयशब्दस्य तावत् तत्त्वार्थत्वं व्युत्पादयितुमाशङ्कते **यद्यपि वद इत्यादि** । अत्र यद्यपि तद्भूयशब्दस्य न तत्त्वार्थत्वमिति प्रतिज्ञायां तद्भवनमात्रार्थतयेति हेतुः । कुतस्तद्भवनमात्रार्थत्वमित्यत उक्तं **भुवो भाव** इत्यनेन **तच्छब्दे उपपद इत्यादि निष्पन्नत्वादित्यन्तम्** । तच्छब्दस्योपपदत्वप्रतिपादनस्यावसरप्राप्तये उक्तं **वदः सुपीत्यादिना** । तथा च सुबन्ते उपपदे भूधातोर्भवनरूपेऽर्थे क्यबिति सूत्रार्थः सूचितो भवति । तच्छब्दे उपपद इत्याद्युक्तस्य तद्भूयशब्दे प्रकृतिप्रत्ययादिदर्शनेन समवेतार्थत्वमिति दर्शयितुं ब्रह्मभूयशब्द इव विग्रहोऽत्रेति दर्शितं **तस्य भवनमितीति** । अत्र तस्य भवनतद्भूयमिति पाठः स्वरसः । तस्य भवनमितीत्येव पाठेऽपि तद्भूयमिति शेषः । तथा च तस्य भवनं तद्भूयमित्येवं विग्रहमनुसृत्य तच्छब्दे उपपद इत्यादि योज्यम् । अत एवोदाहरिष्यमाणामरगतब्रह्मभूयशब्दव्याख्यानावसरे ब्रह्मणो ज्ञानस्य भवनं ब्रह्मभूयमिति व्युत्पत्तिं प्रदर्श्य ब्रह्मणैकत्वं मोक्ष इत्यर्थ इति प्रतिपाद्य भुवो भाव इति क्यबिति *क्षीरस्वामिनोक्तम्*— 'अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् । विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते' इत्यष्टादशाध्यायगीतावाक्यं व्याकुर्वता शङ्करेणापि ब्रह्मभूयाय ब्रह्मभवनाय कल्पते समर्थो भवतीति व्याख्यातमिति भावः । **इत्यभिधान इति** । द्वितीयकाण्डस्थब्रह्मवर्ग इत्यर्थः । पर्यायत्वस्याभिधानेन तस्याभिधानिकत्वादिति पाठः । अभिधानेनेत्यस्याभावो लेखकागतः । कथं तर्हि भुवो इत्यनेन क्यपि भवनार्थत्वमात्रव्युत्पादनं व्याकरण इत्यत आह **व्याकरणस्य चेति** ॥ **तद्भूयशब्दस्य तत्त्वार्थमिति** । क्षीरस्वामिनाऽपि भावनार्थत्वं व्युत्पाद्यापि तात्पर्यतया ब्रह्मणैकत्वं मोक्ष इत्यत इति प्रतिपादितमिति भावः । शाङ्करीयोक्तस्थलीयब्रह्मभवनायेत्यस्यापि ब्रह्मत्वार्थमित्येवं फलितोऽर्थ इति भावः । एवमुपोद्घातेन तद्भूयशब्दार्थमभिधाय प्रकृतोपयोगितया तदादिशब्दं विवृण्वन्यथावसितार्थमाह **टीकायामिति** । अष्टादशाध्यायगीताभाष्यटीकायामित्यर्थः । अनेन ब्रह्मभूयायेत्यस्य परब्रह्मत्वायेत्यर्थकत्वोपपादनं पूर्वोक्तरीत्यैव तट्टीकायां द्रष्टव्यमिति सूचयति ।

**स०व्र०— निर्गुणस्येति** । आदित्यादिपरिच्छिन्नत्वे सगुणत्वापातादित्यर्थः ॥ **ऐश्वर्येति** । निर्गुणस्याप्यैश्वर्याभ्युपगमे निर्गुणत्वव्याघातः स्यादित्यर्थः ।

**॥ इति श्रुतेः अभेदपरत्वे दोषकथनम् ॥**

* * *

**॥ अथ उपसंहारपूर्वकं सङ्क्षेपतः पादार्थकथनम् ॥**

१७ **सु०— अपव्याख्याननिराकरणमुपसंहरन् पादार्थं सङ्क्षेपेणाह अत इति ।**

**अनु०— अतो जगद्व्यापृतिमन्त एव**
**ब्रह्मादयः पूर्णगुणाः क्रमेण ।**

**अमन्दमानन्दमजस्रमेव**
**भुञ्जन्त आत्मीयमजात्समासते ॥**

**जगच्छब्देन** स्वी(स्वकी)यावरमुक्ता गृह्यन्ते । **जगद्व्यापारवर्जमित्येतन्मुक्तेतर-जगद्विषयम्** । अतो न तद्विरोध इत्येतदप्यनेन सूचयति । **अन्यथा** स्वावरमुक्तनियामका एवेत्यवक्ष्यत् । **तथा च** अनन्याधिपतिपदमुक्तार्थमेवेति भावः । **आत्मीयं** न तु पारमेश्वरम् । **अजात्** परमेश्वरात् तं अविहायेत्यर्थः । तत्प्रसादादिति वा ।

**परि०— उक्तार्थमेवेति** । स्वावराधिपतिरहिताः किन्तूत्तमाधिपतिमन्त इत्युक्तार्थं न तु सर्वात्मनाऽधिपतिशून्या इति परोक्तार्थमित्यर्थः । अजशब्दस्तत्प्रसादलक्षक इति भावेनाह **तत्प्रसादादिति वेति** ।

**वं०प०— अपव्याख्यानेति** । अनन्याधिपतिरित्यस्य नास्यान्योऽधिपतिर्भवतीति परकृतापव्याख्यानेत्यर्थः । ननु पूर्वं मुक्तस्वकीयावरयन्तृताऽस्तीत्युक्तम् । अत्र जगद्व्यापृतिमन्त इत्युच्यते । तत्र जगच्छब्देन स्वावरामुक्तनियामकत्वस्यापि प्राप्त्या 'विकारावर्ति चे'त्युक्तविरोधः स्यादित्यत आह **जगच्छब्देनेति** । ननु स्वकीयावरमुक्तविषयकनियमनादिरूपव्यापृत्यङ्गीकारेऽपि जगद्व्यापारवर्जमिति सूत्रविरोधः स्यात् । तत्र मुक्तामुक्तजगद्व्यापारमात्रप्रतिषेधादित्यत आह **जगद्व्यापारवर्जमित्येतदिति** ॥ **अनेनेति** । जगद्व्यापृतिमन्त इति वचनेनेत्यर्थः । कथमनेन तत्सूचनमित्यत आह **अन्यथेति** । सूत्रविरोधपरिहारसूचनस्यानभिप्रेतत्व इत्यर्थः । स्वावरमुक्तनियामका एवेत्यवक्ष्यदिति । न तु जगद्व्यापृतिमन्त इतीत्यर्थः ॥ अयं भावः । पूर्वं मुक्तस्वकीयावरनियन्तृताऽस्तीत्युक्तत्वात् सङ्क्षेपतः पदार्थकथनसमयेऽपि तदनुसारेण स्वावरमुक्तनियामका एवेति स्पष्टमेव वक्तव्यं न तु जगद्व्यापृतिमन्त इति । तेन ज्ञायते जगच्छब्द उक्तरीत्या स्वकीयावरमुक्तपरः । जगद्व्यापारवर्जमिति प्रतिषेधस्तु मुक्तेतरजगद्विषय इति । तथा चोपक्रमे मुक्तस्वावरनियामकत्वमुक्तमुपसंहारे च जगद्व्यापृतिमन्त इति । सूत्रे च जगद्व्यापृतिः प्रतिषिद्धा । एतत्त्रयान्यथाऽनुपपत्त्या ज्ञायते उपसंहारे जगच्छब्द उपक्रमानुसारेण स्वावरमुक्तपरः सौत्रो जगच्छब्दोऽमुक्तपर इति प्रतिपत्तव्यमिति । केचित्तु अन्यथेत्यस्य जगद्व्यापृतिमन्त इत्यत्र जगच्छब्देन स्वकीयावरमुक्तानामग्रहण इत्यर्थः ॥ **स्वावरेति** । उपक्रमे मुक्तस्वकीयावरयन्तृताया उक्तत्वादुपसंहारेऽपि तथैव वक्तव्यमित्यर्थ इत्याहुः ॥ **तथा चेति** । मुक्तस्वकीयावरयन्तृत्वे सिद्धे सतीत्यर्थः ॥ **उक्तार्थमेवेति** । 'अनन्यभृत्यत्वमिहोदितेभ्य' इत्युक्तप्रकारेणेत्यर्थः । अजादिति ल्यब्लोपनिमित्ता पञ्चमीत्यभिप्रेत्य व्याचष्टे **तमविहायेति** । तत्समीप इत्यर्थः ॥ ४-४-७ ॥

**कं०रा०—** जगद्व्यापृतिमन्त इत्यनेन जगद्व्यापारवर्जमित्यस्य मुक्तेतरजगद्विषयताया दर्शितत्वात् स्वकीयावरमुक्तनियन्तृत्वं मुक्तानामस्तीत्यर्थप्रतिपादकस्य 'अत एव चानन्याधिपतिरि'ति श्रुतस्य जगद्व्यापार-

वर्जमित्यनेन विरोधो नेत्येतत् सूचितं भवतीत्याह **जगद्व्यापारवर्जमित्येतदिति** ॥ **अन्यथेति** । जगद्व्यापृतिमन्त इत्यस्योक्तप्रमेयसूचनपरत्वाभाव इत्यर्थः । एवं जगद्व्यापारवर्जमित्यनेन 'अत एव चानन्याधिपतिरि'ति सूत्रस्य विरोधपरिहारसूचनेन किं लब्धमित्यत आह **तथा चेति** । एवं विरोधपरिहारसूचनेऽनन्याधिपतिरिति पदं स्वोक्तार्थपरमेवेति सिद्धमिति भावः ॥ **तदविहायेति** । अनेनाजादिति पञ्चमी ल्यब्लोपे कर्मण्यधिकरणे च पञ्चमी वक्तव्येति ल्यब्लोपनिमित्ता कर्मणि पञ्चमीत्युक्तं भवति ॥ ४-४-७ ॥

**शे०चं०**— मुक्तेतरजगद्विषयमित्येतदुपलक्षणम् । मुक्तेष्वपि स्वसमानोत्तममुक्तविषयमित्यपि द्रष्टव्यम् ॥ **अन्यथेति** । जगद्व्यापृतिमन्त इति विशेषणस्य जगद्व्यापारवर्जमित्येतन्मुक्तेतरजगद्विषयमित्येतदर्थसूचकत्वाभाव इत्यर्थः ॥ **अवक्ष्यदिति** । आवश्यकत्वात् प्रतिपत्तिलाघवाच्चेत्यर्थः ॥ **उक्तार्थमेवेति** । 'अनन्यभृत्यत्वमिहोदितेभ्य' इत्यादिनोक्तार्थमेवेत्यर्थः । अजादिति ल्यब्लोपनिमित्ता पञ्चमीत्याशयेनाह **तमविहायेति** । सहभोगेऽपि न मुक्तस्य स्वातन्त्र्यमित्येतदर्थोपपादकत्वेनापि व्याचष्टे **तत्प्रसादादिति वेति** ॥ ४-४-७ ॥

**स०व्र०**— **तमविहायेति** । अनेन ल्यब्लोपनिमित्ता पञ्चमीत्युक्तं भवति ।

**॥ इति उपसंहारपूर्वकं सङ्क्षेपतः पादार्थकथनम् ॥**

***॥ इति अनन्याधिपतित्वाधिकरणम् ॥ ४-४-७ ॥***

★ ★ ★

**॥ अथ अन्तिममङ्गलपद्यानि ॥**

१८　**सु०**— **एवं परिसमापितग्रन्थो भगवानाचार्यः स्वप्रतिपादितप्रकारं स्वस्य अतिविशदानादिसार्वज्ञप्रदं निरुपाधिकपरमप्रेमास्पदगुणगणं पुरुषोत्तमं पौनःपुन्येन प्रणमति नम इति ।**

**अनु०**— नमो नमोऽशेषविशेषपूर्ण-
गुणैकधाम्ने पुरुषोत्तमाय ।
भक्तानुकम्पादतिशुद्धसंवि-
द्दात्रेऽनुपाधिप्रियसद्गुणात्मने ॥

**अशेषविशेषैः** पूर्णा ये गुणाः तेषां प्रधानाश्रयाय, भक्ते मयि **अनुकम्पात्** अनुक्रोशात् । अत एव ताच्छीलिकस्य तृनः प्रयोगः । सद्गुणानुवादेनानुपाधिप्रियत्वं तादात्म्यं च विधीयत इति न पुनरुक्तिः ।

**परि०**— मूलोपात्तपुरुषोत्तमविशेषणत्रयस्य 'नमो नम' इति द्विरुक्तेश्च कृत्यं वदन्नवतारयति **स्वप्रतिपादितप्रकारमित्यादिना** । बहुव्रीहिरयम् । **प्रकाराः** शुभधर्माः । **अतिशुद्धेत्यस्यार्थ** अतिविशदेति । **निरुपाधिकेति** । मोक्षादिफलान्तरोपाधिहीनेत्यर्थः ॥ **अत एवेति** । दानस्य दयया स्वाभाविकत्वादेवेत्यर्थः ॥ **ताच्छीलिकस्य तृन इति** । 'आ केस्तच्छीलतद्धर्मतत्साधुकारिष्वि'ति तृतीयाध्यायद्वितीयपादस्थपूर्वसूत्रप्रकृत'ताच्छील्यार्थे तृन्नि'ति सूत्रेण तृनो विधानादिति भावः । आद्यान्त्यविशेषणयोः पौनरुक्त्यशङ्कायामाह **सद्गुणानुवादेनेति** ॥ **तादात्म्यं चेति** । आत्मेतिपदेनेति भावः ॥ ४-४-७ ॥

**यादु०**— आद्यविशेषणस्य कृत्यं सूचयंस्तत्तात्पर्यमाह **स्वप्रतिपादितेति** । अनेनैतद्ग्रन्थप्रतिपाद्यानन्तगुणपूर्णत्ववत्त्वेन पुरुषोत्तमस्याधिकृतत्वादन्तेऽपि वन्दनं युक्तमिति तस्य वन्द्यत्वोपपादनायैतद्विशेषणमित्युक्तं भवतीति ज्ञातव्यम् । वन्द्यत्वोपपादकेष्टत्वप्रदर्शनायोत्तरार्धगतं विशेषणद्वयमित्याशयेनाह **स्वस्येत्यादि** । अत्र संविदः शुद्धत्वं नाप्राकृतत्वं वृत्तिरूपाया अपि संविदो भगवता दीयमानत्वात् । नाप्यभ्रान्तित्वरूपम् । इतरसाधारण्यात् । अतोऽत्र विवक्षितं शुद्धत्वं दर्शयन्नाह **अतिविशदेत्यादि** । तथा च आचार्यसंविदो भारत्यादिसंविदपेक्षया अतिस्पष्टत्वम्, अनादितः सर्वविषयकत्वं च निर्दोषत्ववाचिनः शुद्धशब्दस्यार्थतयाऽत्र विवक्षितम् । अस्पष्टत्वकादाचित्कत्वासर्वविषयकत्वानां संविद्दोषतया प्रसिद्धत्वादिति भावः । पुरुषोत्तमेत्यनेन वन्द्यत्वप्रयोजकं विशिष्टत्वमप्युक्तं भवतीति ज्ञातव्यम् ॥ **अनुक्रोशादिति** । निरुपाधिकपरदुःखप्रहाणेच्छालक्षणकृपाविशेषादित्यर्थः । अनेन संविज्ञानं तस्य न सोपाधिकमिति सूचितम् । अत्रैवोपष्टम्भकमाह **अत एवेति** ।

**वं०प०**— **प्रधानाश्रयाय** मुख्याश्रयाय । 'एके मुख्यान्यकेवला' इत्यभिधानात् सङ्ख्यार्थत्वे पूर्वनिपातः स्यादित्यवधेयम् ॥ **अनुकम्पादिति** । 'मनसा चान्यदाकाङ्क्षादि'त्यत्र आकाङ्क्षादिति घञन्त इति उपासनापादे टीकाकारैरुक्तत्वात् तद्वदनुकम्पादिति शब्दो घञन्तो द्रष्टव्यः । घञन्ताश्च पुलिङ्गा इति भावः ॥ **तृन इति** । दातृशब्दस्य तृन्नन्तत्वादित्यर्थः । 'गुणैकधाम्ने' इति सद्गुणत्वस्योक्तत्वात् पुनरुक्तिरित्यत आह **सद्गुणानुवादेनेति** । बुद्ध्या विवेकेनेति भावः ॥ **तादात्म्यं चेति** । भगवद्गुणानामेव निरुपाधिकप्रीतिविषयत्वं प्राप्तं न भगवत इत्याशङ्काऽप्यनेन परिहृता । गुणानां निरुपाधिकप्रीतिविषयत्वे भगवत एव तत्प्राप्तं तदभेदादिति द्रष्टव्यम् ।

**कं०रा०**— **स्वप्रतिपादितप्रकारमिति** । स्वेन प्रतिपादिताः प्रकारा यस्य तमित्यर्थः । स्वस्येति सम्बन्धमात्रे षष्ठी ॥ **भक्ते मय्यनुकम्पादनुक्रोशादिति** । न च वाच्यं 'कृपा दयाऽनुकम्पा स्यादि'त्यमरोक्तेः तट्टीकायामनुकम्पाशब्दस्य 'गुरोश्च हल' इति स्त्र्यधिकारविहिताप्रत्ययान्तत्वेन व्युत्पादितत्वाच्च स्त्रीलिङ्गत्वेनानुकम्पादिति निर्देशानुपपत्तिरिति । प्रक्रियाकौमुदीटीकायां मयः 'परादुत्र' इत्येतद्व्याख्यानावसरे 'परादिति

न पञ्चमी किन्तु परम् अतति गच्छतीति परात् अत सातत्यगमन इत्यस्य क्विबन्तस्य रूपम् । पराच्चासावुञ् च परादुञिति' व्याख्यातत्वात् । तन्न्यायेनात्राप्यनुकम्पाम् अतति गच्छतीत्यनुकम्पात् भक्तानुकम्पाच्चासाविति शुद्धसंविद्दाता च भक्तानुकम्पादिति शुद्धसंविद्दातेति व्याख्यानस्याभिप्रेतत्वात् अनुकम्पादित्यस्य व्याख्यानरूपमनुक्रोशात्पदमप्यनुक्रोशम् अतति गच्छतीत्यनुक्रोशादिति व्याख्येयम् ॥ **अत एवेति** । भगवतो भक्तानुकम्पत्वादेव ताच्छील्यार्थकस्यातिशुद्धसंविद्दातृ इति तृन्प्रत्ययस्य प्रयोग इत्यर्थः । न तु भक्तानुकम्पारहितस्यातिशुद्धसंविद्दानशीलत्वं सम्भवति तदभावे तदर्थकतृन्प्रत्ययप्रयोगो वा सम्भवतीति भावः । न च वाच्यं तृन्प्रत्ययोऽत्र प्रयुक्त इति कुतो ज्ञायत इति । भगवान् संविद्दानं प्रयोजनोद्देशेन करोति चेत् अपूर्णः स्यात् उद्देशेन विना करोति चेत् तस्य प्रेक्षावत्त्वहानिरिति शङ्कायां 'देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहे'त्युक्तपरिहारसूचनाय ताच्छील्यार्थकतृन्प्रत्ययप्रयोगस्यैवोचितत्वात् । तृच्प्रत्ययप्रयोगे 'कर्तृकर्मणोः कृती'ति प्राप्तषष्ठ्याः समासस्य कर्तरि चेति निषिद्धत्वाच्छेषलक्षणषष्ठीसमासस्य सुरकर्तृकदानक्रियोक्तौ कर्माकाङ्क्षाया एवोत्थितत्वेन क्लिष्टत्वात् । 'श्रितादिषु गमिगम्यादीनामुपसङ्ख्यानमि'त्युक्तेरतिशुद्धसंविदं दाताऽतिशुद्धसंविद्दातेति द्वितीयासमासार्थं तृन्प्रत्ययप्रयोगस्यैवाश्रयणीयत्वाच्चेति कविकल्पद्रुमे ललत्केप्से चिरन् हिंस इत्यादौ घञन्तानामबन्तादिशब्दानामिव घञन्तस्यानुकम्पाशब्दस्य प्रयोगोपपत्तेरनुकम्पादिति पञ्चम्यन्तं भिन्नं पदमिति वा द्रष्टव्यम् । ननु 'अदोषविशेषपूर्णगुणैकधाम्ने' इत्यनेन भगवतः सद्गुणानामुक्तत्वादनुपाधिप्रियसद्गुणात्मन इत्यस्य पुनरुक्ततेत्यत आह **सद्गुणानुवादेनेति** ।

**शे०चं०**— नमोनम इत्येतावतैव पौनःपुन्येन प्रमाणानुष्ठानसिद्धेः किमशेषेत्यादिविशेषणसमूहेनेत्याशङ्क्य नम्यत्वप्रयोजकधर्मकथनार्थत्वान्न तद्वैयर्थ्यमित्याशयेनाद्यविशेषणस्य कृत्यं सूचयन्नेव तत्तात्पर्यमाह **स्वप्रतिपादितेति** । अनेनाशेषपूर्णगुणैकधाम्ना इति विशेषणं वन्द्यत्वप्रयोजकीभूताधिकृतत्वसमर्पकमित्युक्तं भवति । 'भक्तानुकम्पादतिशुद्धसंविद्दात्रेऽनुपाधिप्रियसद्गुणात्मन' इति विशेषणद्वयकृत्यं सूचयन्नेव तत्तात्पर्यमाह **स्वस्येति** । अनेन विशेषणद्वयं वन्द्यत्वप्रयोजकेष्टत्वसमर्पकमित्युक्तं भवति । मूले वन्द्यत्वप्रयोजकवैशिष्ट्योपपादनार्थं क्षराक्षरपुरुषोत्तमत्वसङ्कीर्तनमित्यभिप्रेत्य तदनुवदति **पुरुषोत्तममिति** । सङ्कोचे कारणाभावेन गुणशब्दादेव सकलशुभधर्मप्राप्त्या तत्पूर्णत्वस्य गुणैकधाम्न इत्येतावतैव लाभात् । मूलेऽशेषविशेषपूर्णत्वोक्तेर्वैयर्थ्यमाशङ्क्य नेदं भगवतोऽशेषविशेषपूर्णत्वप्रतिपादनपरं येनानर्थक्यं स्यात् । किं नाम गुणानां प्रत्येकमशेषपूर्णत्वप्रतिपादनपरमित्यतो न वैयर्थ्यमित्याशयेन तथा व्याचष्टे **अशेषविशेषैरिति** । यत्किञ्चिद्भक्तानुकम्पस्य स्वसंविद्दानोपयोगित्वाभावाद्भक्तपदस्य स्वमात्रपरत्वं दर्शयन्नेवानुकम्पशब्दार्थमाह **भक्ते मयीति** ॥ **अनुक्रोशात्** । कृपाविशेषात् । अनेन संविद्दानं न प्रयोजनापेक्षं किन्तु कृपामात्रनिमित्तमित्युक्तं भवति । अत्रैवोपष्टम्भकमाह **अत एवेति** । यतोऽनुक्रोष एव निमित्तं न किमपि स्वप्रयोजनम्, अत एवेत्यर्थः । गुणैकधाम्न इत्यनेन गुणमात्रस्याशेषविशेषपूर्णत्वाभिधानेनैव सत्त्वलाभात् तदर्थकस्य सद्गुणात्मन इत्यस्यानर्थक्यमित्याशङ्क्य परिहरति **सद्गुणानुवादेनेति** ।

**वा०र०—** अणुभाष्ये भक्तानुकम्पादित्यत्रानुकम्पशब्दो घञन्तः । घञजबन्ताः पुंसीति लिङ्गानुशासनात्पुल्लिङ्गः । ततश्चानुकम्पादिति पञ्चम्युपपत्तिव्युत्पादनं तु टीकाकृता शिष्यैरेवोह्यतामिति भावेन न कृतम्। मनसा च अन्यदाकाङ्क्षात्परं न प्रतिपद्यत इत्येतत्पादीयानुभाष्यव्याख्यानरूपमूलटीकायां स्वयमुपपादितं च । एवमभिवीक्षत इत्यधिकरणीयानुभाष्योपपादनावसरेऽपि किञ्चिदुपपादितम् । तदुपपादनं चास्माभिस्तत्प्रपञ्च एव कृतमिति नेह तन्यते ।

**स०व्र०—** यतः अनुक्रोश एव न किमपि स्वप्रयोजनम्, अत एवेत्यर्थः । 'गुणैकधाम्ने सद्गुणात्मन' इत्यनयोः पौनरुक्त्यं परिहरति **सद्गुणेति** ।

**॥ इति अन्तिममङ्गलपद्यानि ॥**

* * *

**॥ अथ अनुव्याख्यानकारैः स्वस्वरूपकथनम् ॥**

१९ **सु०— यथा भगवत्स्वरूपविज्ञानं समस्तपुरुषार्थसाधनं तथा स्वस्वरूपविज्ञानमपि इत्यतः तदाविष्कुर्वन्नाह यस्येति ।**

## अनु०— यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं

**यस्य** वायोः देवस्य **वेदवचने** बळित्थेत्यादौ **अलं दिव्यानि** अद्भुतानि **त्रीणि रूपाणि उदितानि अमुना** वायुना अयं **केशवे** विषये **ग्रन्थः कृतः** इत्यन्वयः ।

**परि०—** व्यवधानादन्वयेनानुवादो **यस्य वायोर्देवस्येति** ।

**वं०प०—** केशवे विषय इति । तस्य गुणपूर्णत्वनिर्दोषत्वज्ञेयत्वगम्यत्वप्रतिपादको ग्रन्थः कृत इत्यर्थः ।

**शे०चं०—** स्वस्वरूपज्ञानस्य निष्प्रयोजनत्वात् तन्मात्रफलकतत्कथनपरोत्तरपद्यवैयर्थ्यमाशङ्क्य स्वरूपज्ञानप्रयोजनकथनेन तत्परिहरन्नेव तत्परतया उत्तरवाक्यमवतारयति **यथेति** । व्यवहितत्वात् दुर्गमार्थत्वाच्च अन्वयप्रदर्शनपूर्वकं श्लोकं व्याचष्टे **यस्येति** । अत्र वायोरित्यनेन मन्त्रे सहःशब्दो वायुपरः । 'प्राणं वाव महान्सह ओजो बलमित्याचक्षते' इति श्रुतेर्वायुरित्युक्तं भवति ॥ **अलं दिव्यानीति** । यद्यपि टीकायामलमित्येतद्वडित्यनेनान्विततया योजितं तथाऽपि दिव्यत्वेऽप्यर्थातिशयलाभाय दिव्यानीत्यनेनान्विततयाऽत्र योजितमिति द्रष्टव्यम् । कथमधिकरणत्वं केशवस्येत्यतो विषयत्वेनेत्यभिप्रेत्य तत्तात्पर्यमाह **केशवविषय इति** ।

**वा०र०— मन्त्रे सह इति** । बलित्थेति मन्त्रे सह इति सहःशब्द इत्यर्थः । इति श्रुतेरित्युक्तं भवतीति पाठः । **टीकायामिति** । सूत्रभाष्यटीकायामित्यर्थः । **कथमधिकरणत्वमिति** । सप्तम्यर्थ इति शेषः । ग्रन्थं प्रति केशवस्याधिकरणत्वाभावादिति भावः । ततश्चाधिकरणसप्तम्यनुपपत्तिरिति भावः । इत्यतःपरं विषयत्वमेतदर्थ इत्यभिप्रेत्याहेति पाठः । विषयत्वेनैवेत्यभिप्रेत्य तात्पर्यमाहेति पाठे घटे ज्ञानमित्यादौ विषयतासम्बन्धेन घटस्य ज्ञानाधिकरणताया अङ्गीकारात् प्रकृतेऽपि विषयत्वेनैवाधिकरणत्वमित्यर्थः । **तत्तात्पर्यमिति** । अनेन विषयसप्तमीयुक्तं भवतीति मूले तात्पर्यसूचनादिति भावः ।

२० **सु०— कीदृशं तस्य मूलरूपं कथम्भूतानि च तानि त्रीणि रूपाणि इत्यत उक्तं बडित्यादि ।**

**अनु०—** बट्तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपु-
र्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥

**यस्य** तन्मूलरूपं **बट्** बलात्मकं **दर्शतं** ज्ञानरूपं च । दृशेरौणादिकोऽतच्प्रत्ययः ।

अनेन वायुशब्दो निरुक्तः । बशब्दो बलवाची । अयतिः गत्यर्थः । गत्यर्थाश्चावगत्यर्थाः । तत उण् । बश्चासौ आयुश्चेति वायुरिति ।

किञ्च **भर्गो** भरणगमनयोः कर्तृ । डुभृञ् भरणे, गम्लृ गतौ, आभ्यामसुन्प्रत्ययो डिच्च । इदमपि वायुशब्दव्याख्यानम् । वा गतिगन्धनयोः इत्यतः 'कृवापाजिमिस्वदिसाध्यशूभ्य उणि'त्युण् । अनेकार्थत्वाद्धातूनां वातिर्भरणेऽपि वर्तते । अपि च **महत्** श्रेष्ठम् । वयः श्रेष्ठत्व इत्यस्मादुण् ।

न केवलं मूलरूपमेवं किन्तु यस्यावतारेषु **निहितं** रूपं **इत्थमेव** ।

यस्य **प्रथमकं** प्रथमं रूपं रामविषयाणि वचांसि मूलरामायणादीनि रामवचांसि तेषां नयं नीयन्ते शिष्येषु प्रवर्त्यन्तेऽनेनेति । एरजित्यच् ।

यस्य **द्वितीयं वपुः पृक्षः** । पृच्छदः पृतनावाची प्रसिद्धः । तस्मिन्कर्मण्युपपदे क्षै क्षय इत्येतस्मात् आतोऽनुपसर्गे क इति कः । उपपदतकारलोपश्छान्दसः । पुल्लिङ्गं(ङ्गः) च श्रुत्यनुसारेण । असुन्वा प्रत्ययः । किदिति नपुंसकमेवेदम् । रिपुपृतनाक्षयकारीत्यर्थः ।

**यस्य तृतीयं वपुः एतन्मध्वः । मधुशब्दः सुखवाची । 'मधु द्यौरस्तु नः पिते'ति प्रयोगात् । वशब्दः शास्त्रापरपर्यायतीर्थवाची । वातेरवगत्यर्थात्करणे घञर्थे कविधानमिति कः । सुखसाधनं तीर्थमस्येति । स्वरित्यत्रेवोकारलोपः ।**

परि०— **अतच्प्रत्यय इति** । 'उणादयो बहुलमि'ति सूत्रादिति भावः ॥ तथाच 'पुगन्ते'ति गुणे दर्शतमिति रूपमित्यर्थः ॥ **अनेनेति** । बट् दर्शतेति कथनेनेत्यर्थः ॥ **गत्यर्थ इति** । 'अयपय गतावि'ति धातुपाठादिति भावः ॥ **तत उणिति** । अयधातोरौणादिके उणप्रत्यये 'अत उपधाया' इति वृद्धावायुरिति रूपम् । तस्य वशब्देन कर्मधारय इत्याह **वश्चासाविति** ॥ **किञ्चेति** । मूलरूपं बलात्मकं ज्ञानरूपं चेत्येतावदेव न किन्तु गुणान्तरयुक्तं चेत्यर्थः । तदाह **भर्ग इति** ॥ **असुन्-प्रत्ययो डिच्चेति** । डित्वात् गमेष्टिलोपः भृञोऽकारोन्तादेश इति भावः ॥ **कृवापाजीति** उणादि-सूत्रम् । डुकृञ् करणे । वा गतिगन्धनयोः । पा पाने । जि जये । डुमिञ् प्रक्षेपे । स्वदि आस्वादने। साध संसिद्धौ । अशु व्याप्तौ । एभ्यो धातुभ्य उणप्रत्ययो भवतीत्युणप्रत्यये 'आतो युक् चिण्कृतोरि'ति युगागमे वायुरिति रूपसिद्धेरिति भावः । **वातिरिति** । वाधातुरित्यर्थः । **अपि चेति**। गुणान्तरोपेतं च तद्रूपमित्यर्थः । इदमपि वायुशब्दव्याख्यानमिति भावेन तदारूढं दर्शयति **वय श्रेष्ठत्व इति** । वय् इत्यस्मादुणि उपधावृद्धौ वायुरिति सिद्धेरिति भावः ॥ **इत्थमेवेति** । उक्त-गुणविशिष्टमित्यर्थः । नयशब्दस्य नेतृत्वमर्थ इति भावेन व्युत्पत्तिमाह **नीयन्त इति** ॥ **शिष्येष्विति** योग्यतयाऽन्वेति ॥ **अनेनेति** । रूपेणेत्यर्थः ॥ **एरजितीति** । इवर्णान्ताद्धातोरच्प्रत्ययो भवतीति 'णीञ् प्रापणे' इत्यतोऽच्प्रत्यये 'सार्वधातुकार्धधातुकयोरि'ति गुणे अयादेशे नयेति रूपसिद्धेरिति भावः ॥ **आतोऽनुपसर्ग इति** । अनुपसर्गे सुप्युपपदे धातोः कप्रत्ययो भवतीति ऐकारान्तात् 'क्षै क्षये' इति धातोः कप्रत्यये 'आदेच उपदेशेऽशिति' इति धात्वैकारस्य आत्वे 'आतो लोप इटि चे'ति तस्य लोपे पृदित्यत्र तकारलोपे च पृक्ष इति सिद्धेरिति भावः । न चैवं वपुर्विशेषणत्वात् पृक्षमिति भाव्यमित्यत आह **छान्दसः पुल्लिङ्ग इति** । 'पृक्षो वपुरि'ति श्रुतौ छान्दसपुल्लिङ्गत्वेन तदनुकरणत्वेनात्रापि पुल्लिङ्ग इति भावः । यद्वा छान्दस इति पूर्वेणान्वेति । नन्वसुन्प्रत्यये कथं 'आदेच उपदेशेऽशिती'ति एकारस्य प्राप्तात्वलोप इत्यत आह **किदिति** । तथा च 'आतो लोप इटि चे'ति आकारलोप इति भावः ॥ **मध्व इति** । मध्वाभिधमित्यर्थः । तत्पदं निर्वक्ति **मधुशब्द इत्यादिना** । **मधु द्यौरिति** । द्यौर्द्युलोकदेवता नोऽस्माकं पिता अतः मधु सुखदास्त्वित्यर्थः ॥ **तीर्थवाचीति** । कथमित्यतोऽवयवार्थमाह **वातेरिति** । 'वा गतिगन्धनयोरि'ति धातोरित्यर्थः ।

**घञर्थ इति** । स च भावे अकर्तरि च कारकेऽपि विहित इति तदर्थ इत्यर्थः । कप्रत्यये आतो लोपे वेति रूपसिद्धेरिति भावः ॥ **अस्येतीति** । मध्व इति पूर्वेणान्वयः । नन्वेवं मधुव इति भाव्यमित्यत आह **स्वरित्यत्रेवेति** । सुवरिति वक्तव्ये उकारलोपेन स्वरिति पठन्ति बह्वृचाः । तथेहापि मधुशब्दोकारलोप इत्यर्थः ।

**गु०दी०**— दृशिधातोरौणादिके अतचि कृते 'उरण्रपर' इति रकारस्थाने आगतस्याकारस्य रपरत्वे कृते दर्शतमिति रूपं भवतीति भावेनोक्तं **दृशेरौणादिक** इति । यावदायुर्बिभर्ति सर्वमन्ते गच्छति चेति भर्ग इत्यर्थः । डिच्चेति वदता डस् प्रत्यय इत्युक्तं भवति । 'डिति चे'ति टेर्लोपे भृग् अस् इति स्थिते पूर्ववत् गुणे रपरत्वे च कृते भर्ग इति शब्दनिष्पत्तिर्भवतीत्यर्थः । **कृपावाजिमिस्वदिसाध्यशूभ्य** इति सूत्रस्य 'कृञ् करणे पा रक्षणे' 'वा गतिगन्धनयो'रित्यादिधातुभ्यः उण् प्रत्ययो भवतीत्यर्थः । णित्वादाकारस्य वृद्धौ कृताया-माकारस्य ऐकारः 'एचोऽयवायाव' इति ऐकारस्य आयादेशे कृते वायुरिति शब्दनिष्पत्तिर्भवतीति ज्ञेयम् । **एरजित्यत्र** एरजिति ईकारान्तात् 'नीञ् प्रापण' इति धातोरचि प्रत्यये कृते गुणे च कृते अयादेशे च कृते नयमिति शब्दनिष्पत्तिर्भवतीत्यर्थः । **आतोऽनुपसर्गे क** इत्यत्र 'आदेच उपदेशेऽशिति' इति एकारस्याकारे कृते 'आतोऽनुपसर्गे क' इति कप्रत्यये च कृते क्ष इति शब्दनिष्पतिर्भवतीत्यर्थः । **किदिति नपुंसकमेवेदमित्यत्र** कित् ककारेत्संज्ञकं नपुंसकं स्यादित्यर्थः । अत एव पूर्वं पुल्लिङ्गत्वं श्रुत्यनुसारेणेत्युक्तम् । स्वरित्यत्रेवेत्यस्य सुवरिति व्याहृतेः स्वरिति पदेनोक्तौ यथा उकारलोपः तथाऽत्रापीत्यर्थः ॥

इयं न्यायसुधाम्भोधेस्तथा भाष्यानुभाष्ययोः ।
अनुव्याख्यासङ्गृहीतन्यायानां विवृतिस्तथा ॥ १ ॥

गुर्वर्थदीपिका वादिराजाख्ययतिना कृता ।
आनन्दतीर्थाख्यगुरोस्तथा व्यासस्य तद्गुरोः ॥ २ ॥

भारत्यास्तत्त्वदेवानां कृपया न स्वशक्तितः ।
गुणा ये त्वत्र दृश्यन्ते ते सर्वे तत्प्रसादजाः ॥ ३ ॥

यदि सन्ति क्वचिद्दोषाः ते मे मन्दमतित्वतः ।
तदवद्यं दयाशीलैः क्षन्तव्यं स्वजनप्रियैः ॥ ४ ॥

नमोऽस्तु वासुदेवाय व्यासदेवाय धीमते ।
असुदेवाय देवेभ्यो गुरुभ्यश्च नमोनमः ॥ ५ ॥

*इति श्रीमत्कविकुलतिलकश्रीमद्वादिराजपूज्यचरणविरचितायां श्रीमन्न्यायसुधाटीकायां गुर्वर्थदीपिकायां चतुर्थाध्यायस्य चतुर्थः पादः ॥*

**यादु०—** ननु भृमृयजिपर्विपच्यमितमिनमिहर्येभ्योऽतच् इति सूत्रे दृशोऽग्रहणात् कथं तस्मादतच् व्याख्यायत इत्यत उक्तम् **औणादिकमिति** । तथा च उणादयो बहुलमित्युक्तत्वात् दृशेरप्यतच् भविष्यतीति भावः ॥ **तत उणिति** । बहुलमित्युक्तत्वादिति भावः । ततश्च णित्वादुपधाकारवृद्ध्या वायुरिति रूपमिति ज्ञातव्यम् ।

**किञ्चेति** । कीदृशं तस्य रूपमिति शङ्कायामन्यदप्युत्तरमुच्यत इत्यर्थः । एवमेवापि चेत्येतदपि नेयम् ॥ **आभ्यामसुन्प्रत्यय इति** । अयमपि बाहुलिक एवेति ज्ञातव्यम् । तथा च गमेष्टिलोपे भृञो गुणे च भर्ग इति रूपमिति भावः । धातुसमुदायात् प्रत्ययश्च प्रागेवोपपादितः ॥ कृवापाजीत्याद्युणादिसूत्रस्यायमर्थः । डुकृञ् करणे, कृञ् हिंसायां, कृ करण इति त्रयाणामपि कृ इत्यनेन ग्रहणम् । निरनुबन्धग्रहणे सामान्यग्रहणमिति परिभाषितत्वात् । वा गतिगन्धनयोः, पा पाने, जि जये, डुमिञ् प्रक्षेपणे, स्वदि आस्वादने, साध् संसिद्धौ, अशू व्याप्तौ एभ्यो धातुभ्य उण्प्रत्ययो भवतीति । उदाहरणानि तु कारुः वायुः पायुरित्यादीनि द्रष्टव्यानि । तथा चानेनोणि कृते आतो युक् चिण्कृतोरिति युगागमे च वायुरिति रूपमिति ज्ञातव्यम् ॥ **वयः श्रेष्ठत्व इति** । अत्र श्रेष्ठत्वशब्देन श्रेष्ठस्य भावः तद्व्यापारः क्रियारूपो विवक्षितः । अन्यथा तद्वाचिनो वयतेर्धातुत्वाभावप्रसङ्गात् । 'भूवादयो धातव' इति क्रियावाचिनामेव धातुत्वाभिधानात् । ततश्चात्रापि णित्त्वादुपधावृद्धौ वायुरिति रूपमिति ज्ञेयम् ।

**तेषामिति** । कर्तृकर्मणोः कृतीति प्राप्तायाः षष्ठ्याः प्रतिपदविधानषष्ठ्या न समास इति प्रतिषेधेऽपि तस्य कृद्योगलक्षणा षष्ठी समस्यत इति वार्तिकेनापोदितत्वात् समासोपपत्तिरिति भावः ॥ **एरजित्यजिति** । इवर्णान्ताद्धातोर्भवि अकर्तरि च कारके संज्ञायामच्प्रत्ययो भवतीति सूत्रार्थः । उदाहरणं तु जयः चयः क्षय इत्यादि ज्ञेयम् । तथाच अनेन सूत्रेण नयतेः करणे अच्प्रत्यये गुणे अयादेशे च सति नयमिति रूपमिति भावः । अत्र वायुना कर्त्रा हनुमदाख्येन प्रथमेन रूपेण रामायणादिशास्त्राणि नीयन्त इति विवक्षितत्वात् हनुमतः शास्त्रप्रवृत्तिकरणत्वमिति ज्ञातव्यम् । अत एव अमुना वायुनेति प्रागुक्तम् । अकर्तरि च कारके संज्ञायामित्यत्र चकारः संज्ञाव्यभिचाराय इति काशिकायामुक्तत्वेन नयमित्यस्य संज्ञात्वाभावेऽप्युक्तप्रत्ययोपपत्तिः ॥ **आतोऽनुपसर्गं इति** । क्षै क्षय इत्यस्यादेच उपदेशेऽशितीत्यनेनात्व आदन्तत्वमिति ॥ **उपपदे तकारलोप इति** । 'आतो लोप इटि चे'ति धात्वाकारलोपोऽपि द्रष्टव्यः । नन्वसुन्प्रत्यये तस्याकित्त्वात् कथं किन्निमित्त आकारलोप इत्यत आह **किदिति** । कित्कार्यकारी विवक्षितः ॥ **मधु द्यौरिति** । द्यौर्द्युलोकाभिमानी देवो नः पिता अतो नः मधु सुखमुद्दिश्य अस्त्वित्यर्थः । इदमुपलक्षणम् । 'मध्वित्यानन्द उद्दिष्ट' इति वचनादित्यपि ग्राह्यम् ॥ **तीर्थवाचीति** । 'वेति तीर्थमुदाहृतमि'ति वचनादिति भावः । ननु कप्रत्ययस्य कर्तर्येव विधानात् कथं करणार्थत्वं तस्येत्यत आह **घञर्थे कविधानमिति** । घञ् चाकर्तरि कारके विहित इति भावः । सुखवाचकेन मधुशब्देन तत्साधनं लक्षणीयमित्याशयेनाह **सुखसाधनमिति** । अस्येति इतिशब्दस्यैतन्मध्व इति पूर्वेणान्वयः । नन्वेवं मधुव इति स्यादत आह **स्वरित्यत्रेवेति** । सुवरिति वक्तव्ये उकारलोपेन यथा स्वरिति पठन्ति ऋग्वेदिनः तथा अत्रापीति भावः ।

**वा०र०— मन्त्रे सह इति** । बलित्थेति मन्त्रे सह इति सहःशब्द इत्यर्थः । इति श्रुतेरित्युक्तं भवतीति पाठः । **टीकायामिति** । सूत्रभाष्यटीकायामित्यर्थः । **कथमधिकरणत्वमिति** । सप्तम्यर्थ इति शेषः । ग्रन्थं प्रति केशवस्याधिकरणत्वाभावादिति भावः । ततश्चाधिकरणसप्तम्यनुपपत्तिरिति भावः । इत्यतःपरं विषयत्वमेतदर्थ इत्यभिप्रेत्याहेति पाठः । विषयत्वेनैवेत्यभिप्रेत्य तात्पर्यमाहेति पाठे घटे ज्ञानमित्यादौ विषयतासम्बन्धेन घटस्य ज्ञानाधिकरणताया अङ्गीकारात् प्रकृतेऽपि विषयत्वेनैवाधिकरणत्वमित्यर्थः । **तत्तात्पर्यमिति** । अनेन विषयसप्तमीयुक्तं भवतीति मूले तात्पर्यसूचनादिति भावः ।

२० **सु०— कीदृशं तस्य मूलरूपं कथम्भूतानि च तानि त्रीणि रूपाणि इत्यत उक्तं बडित्यादि ।**

**अनु०—** बट्तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपु-
र्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥

**यस्य** तन्मूलरूपं **बट्** बलात्मकं **दर्शतं** ज्ञानरूपं च । दृशेरौणादिकोऽतच्प्रत्ययः ।

अनेन वायुशब्दो निरुक्तः । **व**शब्दो बलवाची । अयतिः गत्यर्थः । गत्यर्थाश्चावगत्यर्थाः । तत उण् । वश्चासौ आयुश्चेति वायुरिति ।

किञ्च **भर्गो** भरणगमनयोः कर्तृ । डुभृञ् भरणे, गम्लृ गतौ, आभ्यामसुन्प्रत्ययो डिच्च । इदमपि वायुशब्दव्याख्यानम् । वा गतिगन्धनयोः इत्यतः 'कृवापाजिमिस्वदिसाध्यशूभ्य उणि'त्युण् । अनेकार्थत्वाद्धातूनां वातिर्भरणेऽपि वर्तते । अपि च **महत्** श्रेष्ठम् । वयः श्रेष्ठत्व इत्यस्मादुण् ।

न केवलं मूलरूपमेवं किन्तु यस्यावतारेषु **निहितं** रूपं **इत्थमेव** ।

यस्य **प्रथमकं** प्रथमं रूपं रामविषयाणि वचांसि मूलरामायणादीनि रामवचांसि तेषां नयं नीयन्ते शिष्येषु प्रवर्त्यन्तेऽनेनेति । एरजित्यच् ।

यस्य **द्वितीयं वपुः पृक्षः** । पृच्छदः पृतनावाची प्रसिद्धः । तस्मिन्कर्मण्युपपदे क्षै क्षय इत्येतस्मात् आतोऽनुपसर्गे क इति कः । उपपदतकारलोपश्छान्दसः । पुल्लिङ्गं(ङ्गः) च श्रुत्यनुसारेण । असुन्वा प्रत्ययः । किदिति नपुंसकमेवेदम् । रिपुपृतनाक्षयकारीत्यर्थः ।

**यस्य तृतीयं वपुः एतन्मध्वः ।** मधुशब्दः सुखवाची । 'मधु द्यौरस्तु नः पिते'ति प्रयोगात् । वशब्दः शास्त्रापरपर्यायतीर्थवाची । वातेरवगत्यर्थात्करणे घञर्थे कविधानमिति कः । सुखसाधनं तीर्थमस्येति । स्वरित्यत्रेवोकारलोपः ।

परि०— **अतच्प्रत्यय इति** । 'उणादयो बहुलमि'ति सूत्रादिति भावः ॥ तथाच 'पुगन्ते'ति गुणे दर्शतमिति रूपमित्यर्थः ॥ **अनेनेति** । बट् दर्शतेति कथनेनेत्यर्थः ॥ **गत्यर्थ इति** । 'अयपय गतावि'ति धातुपाठादिति भावः ॥ **तत उणिति** । अयधातोरौणादिके उणप्रत्यये 'अत उपधाया' इति वृद्धावायुरिति रूपम् । तस्य वशब्देन कर्मधारय इत्याह **वश्चासाविति** ॥ **किञ्चेति** । मूलरूपं बलात्मकं ज्ञानरूपं चेत्येतावदेव न किन्तु गुणान्तरयुक्तं चेत्यर्थः । तदाह **भर्ग इति** ॥ **असुन्-प्रत्ययो डिच्चेति** । डित्त्वात् गमेष्टिलोपः भृञोऽकारोन्तादेश इति भावः ॥ **कृवापाजीति** उणादि-सूत्रम् । डुकृञ् करणे । वा गतिगन्धनयोः । पा पाने । जि जये । डुमिञ् प्रक्षेपे । स्वदि आस्वादने। साध संसिद्धौ । अशु व्याप्तौ । एभ्यो धातुभ्य उणप्रत्ययो भवतीत्युणप्रत्यये 'आतो युक् चिण्कृतोरि'ति युगागमे वायुरिति रूपसिद्धेरिति भावः । **वातिरिति** । वाधातुरित्यर्थः । **अपि चेति**। गुणान्तरोपेतं च तद्रूपमित्यर्थः । इदमपि वायुशब्दव्याख्यानमिति भावेन तदारूढं दर्शयति **वय श्रेष्ठत्व इति** । वय् इत्यस्मादुणि उपधावृद्धौ वायुरिति सिद्धेरिति भावः ॥ **इत्थमेवेति** । उक्त-गुणविशिष्टमित्यर्थः । नयशब्दस्य नेतृत्वमर्थ इति भावेन व्युत्पत्तिमाह **नीयन्त इति** ॥ **शिष्येष्विति** योग्यतयाऽन्वेति ॥ **अनेनेति** । रूपेणेत्यर्थः ॥ **एरजितीति** । इवर्णान्ताद्धातोरच्प्रत्ययो भवतीति 'णीञ् प्रापणे' इत्यतोऽच्प्रत्यये 'सार्वधातुकार्धधातुकयोरि'ति गुणे अयादेशे नयेति रूपसिद्धेरिति भावः ॥ **आतोऽनुपसर्ग इति** । अनुपसर्गे सुप्युपपदे धातोः कप्रत्ययो भवतीति ऐकारान्तात् 'क्षै क्षये' इति धातोः कप्रत्यये 'आदेच उपदेशेऽशिति' इति धात्वैकारस्य आत्वे 'आतो लोप इटि चे'ति तस्य लोपे पृदित्यत्र तकारलोपे च पृक्ष इति सिद्धेरिति भावः । न चैवं वपुर्विशेषणत्वात् पृक्षमिति भाव्यमित्यत आह **छान्दसः पुल्लिङ्ग इति** । 'पृक्षो वपुरि'ति श्रुतौ छान्दसपुल्लिङ्गत्वेन तदनुकरणत्वेनात्रापि पुल्लिङ्ग इति भावः । यद्वा छान्दस इति पूर्वेणान्वेति । नन्वसुन्प्रत्यये कथं 'आदेच उपदेशेऽशिती'ति एकारस्य प्राप्तात्वलोप इत्यत आह **किदिति** । तथा च 'आतो लोप इटि चे'ति आकारलोप इति भावः ॥ **मध्व इति** । मध्वाभिधमित्यर्थः । तत्पदं निर्वक्ति **मधुशब्द इत्यादिना** । **मधु द्यौरिति** । द्यौर्द्युलोकदेवता नोऽस्माकं पिता अतः मधु सुखदास्त्वित्यर्थः ॥ **तीर्थवाचीति** । कथमित्यतोऽवयवार्थमाह **वातेरिति** । 'वा गतिगन्धनयोरि'ति धातोरित्यर्थः ।

**घञर्थ इति** । स च भावे अकर्तरि च कारकेऽपि विहित इति तदर्थ इत्यर्थः । कप्रत्यये आतो लोपे वेति रूपसिद्धेरिति भावः ॥ **अस्येतीति** । मध्व इति पूर्वेणान्वयः । नन्वेवं मधुव इति भाव्यमित्यत आह **स्वरित्यत्रेवेति** । सुवरिति वक्तव्ये उकारलोपेन स्वरिति पठन्ति बह्वृचाः । तथेहापि मधुशब्दोकारलोप इत्यर्थः ।

**गु०दी०—** दृशिधातोरौणादिके अतचि कृते 'उरण्रपर' इति रकारस्थाने आगतस्याकारस्य रपरत्वे कृते दर्शतमिति रूपं भवतीति भावेनोक्तं **दृशेरौणादिक** इति । यावदायुर्बिभर्ति सर्वमन्ते गच्छति चेति भर्ग इत्यर्थः । डिच्चेति वदता डस् प्रत्यय इत्युक्तं भवति । 'डिति चे'ति टेर्लोपे भृग् अस् इति स्थिते पूर्ववत् गुणे रपरत्वे च कृते भर्ग इति शब्दनिष्पत्तिर्भवतीत्यर्थः । **कृपावाजिमिस्वदिसाध्यशूभ्य** इति सूत्रस्य 'कृञ् करणे पा रक्षणे' 'वा गतिगन्धनयो'रित्यादिधातुभ्यः उण् प्रत्ययो भवतीत्यर्थः । णित्वादाकारस्य वृद्धौ कृताया-माकारस्य ऐकारः 'एचोऽयवायाव' इति ऐकारस्य आयादेशे कृते वायुरिति शब्दनिष्पत्तिर्भवतीति ज्ञेयम् । **एरजित्यत्र** एरजिति ईकारान्तात् 'णीञ् प्रापण' इति धातोरचि प्रत्यये कृते गुणे च कृते अयादेशे च कृते नयमिति शब्दनिष्पत्तिर्भवतीत्यर्थः । **आतोऽनुपसर्गे क** इत्यत्र 'आदेच उपदेशेऽशिति' इति एकारस्याकारे कृते 'आतोऽनुपसर्गे क' इति कप्रत्यये च कृते क्ष इति शब्दनिष्पतिर्भवतीत्यर्थः । **किदिति नपुंसकमेवेदमित्यत्र** कित् ककारेत्संज्ञकं नपुंसकं स्यादित्यर्थः । अत एव पूर्वं पुल्लिङ्गत्वं श्रुत्यनुसारेणेत्युक्तम् । स्वरित्यत्रेवेत्यस्य सुवरिति व्याहृतेः स्वरिति पदेनोक्तौ यथा उकारलोपः तथाऽत्रापीत्यर्थः ॥

इयं न्यायसुधाम्भोधेस्तथा भाष्यानुभाष्ययोः ।
अनुव्याख्यासङ्गृहीतन्यायानां विवृतिस्तथा ॥ १ ॥

गुर्वर्थदीपिका वादिराजाख्ययतिना कृता ।
आनन्दतीर्थाख्यगुरोस्तथा व्यासस्य तद्गुरोः ॥ २ ॥

भारत्यास्तत्त्वदेवानां कृपया न स्वशक्तितः ।
गुणा ये त्वत्र दृश्यन्ते ते सर्वे तत्प्रसादजाः ॥ ३ ॥

यदि सन्ति क्वचिद्दोषाः ते मे मन्दमतित्वतः ।
तदवद्यं दयाशीलैः क्षन्तव्यं स्वजनप्रियैः ॥ ४ ॥

नमोऽस्तु वासुदेवाय व्यासदेवाय धीमते ।
असुदेवाय देवेभ्यो गुरुभ्यश्च नमोनमः ॥ ५ ॥

*इति श्रीमत्कविकुलतिलकश्रीमद्वादिराजपूज्यचरणविरचितायां श्रीमन्न्यायसुधाटीकायां गुर्वर्थदीपिकायां चतुर्थाध्यायस्य चतुर्थः पादः ॥*

**यादु०**— ननु भृमृयजिपर्विपच्यमितमिनमिहर्येभ्योऽतच् इति सूत्रे दृशोऽग्रहणात् कथं तस्मादतच् व्याख्यायत इत्यत उक्तम् **औणादिकमिति** । तथा च उणादयो बहुलमित्युक्तत्वात् दृशेरप्यतच् भविष्यतीति भावः ॥ **तत उणिति** । बहुलमित्युक्तत्वादिति भावः । ततश्च णित्वादुपधाकारवृद्ध्या वायुरिति रूपमिति ज्ञातव्यम् ।

**किञ्चेति** । कीदृशं तस्य रूपमिति शङ्कायामन्यदप्युत्तरमुच्यत इत्यर्थः । एवमेवापि चेत्येतदपि नेयम् ॥ **आभ्यामसुन्प्रत्यय इति** । अयमपि बाहुलिक एवेति ज्ञातव्यम् । तथा च गमेष्टिलोपे भृञो गुणे च भर्ग इति रूपमिति भावः । धातुसमुदायात् प्रत्ययश्च प्रागेवोपपादितः ॥ कृवापाजीत्याद्युणादिसूत्रस्यायमर्थः । डुकृञ् करणे, कृञ् हिंसायां, कृ करण इति त्रयाणामपि कृ इत्यनेन ग्रहणम् । निरनुबन्धग्रहणे सामान्यग्रहणमिति परिभाषितत्वात् । वा गतिगन्धनयोः, पा पाने, जि जये, डुमिञ् प्रक्षेपणे, स्वदि आस्वादने, साध् संसिद्धौ, अशू व्याप्तौ एभ्यो धातुभ्य उण्प्रत्ययो भवतीति । उदाहरणानि तु कारुः वायुः पायुरित्यादीनि द्रष्टव्यानि । तथा चानेनोणि कृते आतो युक् चिण्कृतोरिति युगागमे च वायुरिति रूपमिति ज्ञातव्यम् ॥ **वयः श्रेष्ठत्व इति** । अत्र श्रेष्ठत्वशब्देन श्रेष्ठस्य भावः तद्व्यापारः क्रियारूपो विवक्षितः । अन्यथा तद्वाचिनो वयतेर्धातुत्वाभावप्रसङ्गात् । 'भूवादयो धातव' इति क्रियावाचिनामेव धातुत्वाभिधानात् । ततश्चात्रापि णित्त्वादुपधावृद्धौ वायुरिति रूपमिति ज्ञेयम् ।

**तेषामिति** । कर्तृकर्मणोः कृतीति प्राप्तायाः षष्ठ्याः प्रतिपदविधानषष्ठ्या न समास इति प्रतिषेधेऽपि तस्य कृद्योगलक्षणा षष्ठी समस्यत इति वार्तिकेनापोदितत्वात् समासोपपत्तिरिति भावः ॥ **एरजित्यजिति** । इवर्णान्ताद्धातोर्भवे अकर्तरि च कारके संज्ञायामच्प्रत्ययो भवतीति सूत्रार्थः । उदाहरणं तु जयः चयः क्षय इत्यादि ज्ञेयम् । तथाच अनेन सूत्रेण नयतेः करणे अच्प्रत्यये गुणे अयादेशे च सति नयमिति रूपमिति भावः । अत्र वायुना कर्त्रा हनुमदाख्येन प्रथमेन रूपेण रामायणादिशास्त्राणि नीयन्त इति विवक्षितत्वात् हनुमतः शास्त्रप्रवृत्तिकरणत्वमिति ज्ञातव्यम् । अत एव अमुना वायुनेति प्रागुक्तम् । अकर्तरि च कारके संज्ञायामित्यत्र चकारः संज्ञाव्यभिचाराय इति काशिकायामुक्तत्वेन नयमित्यस्य संज्ञात्वाभावेऽप्युक्तप्रत्ययोपपत्तिः ॥ **आतोऽनुपसर्ग इति** । क्षै क्षय इत्यस्यादेच उपदेशेऽशितीत्यनेनात्व आदन्तत्वमिति ॥ **उपपदे तकारलोप इति** । 'आतो लोप इटि चे'ति धात्वाकारलोपोऽपि द्रष्टव्यः । नन्वसुन्प्रत्यये तस्याकित्त्वात् कथं किन्निमित्त आकारलोप इत्यत आह **किदिति** । कित्कार्यकारी विवक्षितः ॥ **मधु द्यौरिति** । द्यौर्द्युलोकाभिमानी देवो नः पिता अतो नः मधु सुखमुद्दिश्य अस्त्वित्यर्थः । इदमुपलक्षणम् । 'मध्वित्यानन्द उद्दिष्ट' इति वचनादित्यपि ग्राह्यम् ॥ **तीर्थवाचीति** । 'वेति तीर्थमुदाहृतमि'ति वचनादिति भावः । ननु कप्रत्ययस्य कर्तर्येव विधानात् कथं करणार्थत्वं तस्येत्यत आह **घञर्थे कविधानमिति** । घञ् चाकर्तरि कारके विहित इति भावः । सुखवाचकेन मधुशब्देन तत्साधनं लक्षणीयमित्याशयेनाह **सुखसाधनमिति** । अस्येति इतिशब्दस्यैतन्मध्व इति पूर्वेणान्वयः । नन्वेवं मधुव इति स्यादत आह **स्वरित्यत्रेवेति** । सुवरिति वक्तव्ये उकारलोपेन यथा स्वरिति पठन्ति ऋग्वेदिनः तथा अत्रापीति भावः ।

**वं०प०— अतच्प्रत्यय इति** । दृशिर् प्रेक्षण इत्यस्मादतच्प्रत्यये हलन्त्यमिति चकारलोपे दृशतेति जाते ऋवर्णस्य गुणे तस्य च रपरत्वे दर्शतेति रूपम् । बलवाची । वबयोरभेदादिति भावः । गत्यर्थः । अयपयगताविति धातोरित्यर्थः ॥ **तत उणिति** । अयधातोरुण्प्रत्यये णित्त्वादादिवृद्धौ आयुरिति भवतीत्यर्थः ।

**किञ्चेति** । कीदृशं तन्मूलरूपमिति शङ्कायां विशेषणान्तरमुच्यत इत्यर्थः ॥ **भरणेति** । वायोर्जगद्धारणकर्तृत्वं च सप्तमस्कन्धगते 'लोकान् यो बिभर्ति महाबलः', 'वायुना वै गौतमसूत्रेणे'त्यादिश्रुतिसिद्धमिति द्रष्टव्यम् । गमनं ज्ञानं तत्कर्तृत्वं नाम ज्ञातृत्वं तथाच सर्वज्ञमित्यर्थः ॥ **आभ्यामसुन्प्रत्यय इति** । भृञ् भरणे गम्लृ गतौ आभ्यामसुन्प्रत्यय उन् इत्यस्य लोपे तस्य डित्कार्यकारित्वात् तस्मिन् परतो गमेष्टिभूतस्याम् इत्यस्य लोपे भृधातोर्ऋवर्णस्य गुणे तस्य च रपरत्वे सस्य रुत्वे विसर्गे च सति भर्ग इति सकारान्तं नपुंसकमिति भावः । तथा च भर्गः भर्गसी भर्गांसीति शब्दप्रकारः । **वा गतीति** । तथा च वा धातोः कृवापाजीत्याद्युणादिसूत्रेण उण्प्रत्यये 'आतो युक्चिण्कृतोरि'ति सूत्रेण वाधातोः पुरतो युगागमे उक् इत्यस्य लोपे वाय् उ वायुरिति रूपम् । ननु भर्ग इत्येतत्कथं वायुशब्दव्याख्यानम् । वातेर्गत्यर्थत्वेनैव गमनकर्तृत्वस्यैव प्राप्त्या भरणकर्तृत्वस्याप्राप्तेरित्यत आह **अनेकार्थत्वादिति** । 'क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदर्श्यते । प्रयोगतोऽनुगन्तव्या 'अनेकार्था हि धातवः' इति वचनादिति भावः ॥ **अपि चेति** । मूलरूपस्य विशेषणान्तरमुच्यत इत्यर्थः । **वयः श्रेष्ठत्व इति** । वयधातोरुण्प्रत्यये यकारस्थाकारलोपे णित्त्वादुपधावृद्धौ वायुरिति रूपम् ।

**इत्थमेवेति** । मूलरूपवदेव बलाद्यात्मकमित्यर्थः ॥ **एरजित्यजिति** । ईशब्दस्य षष्ठी एरिति । इवर्णान्ताद्धातोरकर्तरि कारकेऽच्प्रत्ययः स्यादित्यर्थः । तथा च नीत्यस्माद्धातोः करणेऽच्प्रत्यये इकारस्य एकाररूपे गुणे तस्य अयादेशे नयमिति रूपम् ॥ **क्षै क्षय इत्यस्मादिति** । तथा च पृत्शब्दे कर्मण्युपपदे क्षै धातोः 'आदेच उपदेशेऽशिती'ति ऐकारस्य आत्वे 'आतोनुपसर्गे क' इति कप्रत्यये कित्वाद्धात्वाकारलोपे छन्दस्त्वादुपपदतकारलोपे पृक्ष इत्यकारान्तरूपम् । नन्वकारान्तपुलिङ्गोऽयं पृक्षशब्दः । कथं द्वितीयवपुषो विशेषणमित्यत आह **पुलिङ्गमिति** ॥ **श्रुत्यनुसारेणेति** । 'पृक्षो वपुः पितुमानि'ति श्रुत्यनुसारेणेत्यर्थः । अत एवास्वरसादाह **असुन्वा प्रत्यय इति** ॥ **किदिति** । धात्वाकारलोपरूपकित्कार्यकारीत्यर्थः । तथा च पृच्छब्दे कर्मण्युपपदे क्षै क्षय इति धातोरसुन्प्रत्यये ऐकारस्यात्वेऽसुन्प्रत्ययस्य कित्कार्यकारित्वात् तस्मिन्परतो धात्वाकारलोपे सस्य रुत्वे विसर्गे उपपदतकारलोपे च सति पृक्ष इति सकारान्तं नपुंसकमेवेदं वपुषो विशेषणं युक्तमित्यर्थः । पृक्ष पृक्षसी पृक्षांसीति शब्दाकारः ॥ **वातेरिति** । वा गतिगन्धनयोरिति धातोरवगत्यर्थाद्वा धातोर्घञर्थे कविधानमिति वार्तिकेण करणस्यापि घञर्थत्वात् करणे कप्रत्यये कित्वाकारलोपे व् अ वेति रूपम् ॥ **अस्येतीति** । इति हेतोरेतत्तृतीयं वपुर्मध्व इति पूर्वेणान्वयो द्रष्टव्यः । ननु तर्हि मधुव इति स्यान्न तु मध्व इति उकारलोपविधायकाभावादित्यतः छान्दसोऽयमुकारलोपः । भूर्भुवःसुवरिति वक्तव्ये छान्दसत्वेन यथा उकारलोपमाश्रित्य स्वरिति ऋग्वेदिनः पठन्ति तद्वदित्याह **स्वरित्यत्रेवेति** ।

**कं०रा०— तादात्म्यमिति** । भगवत्स्वरूपमित्यर्थः । प्रागुक्तसद्गुणानुवादस्य गुणानामनुपाधिप्रीतिविषयत्वतादात्म्यविधानार्थत्वेन सार्थक्यान्न पुनरुक्तिदोषायेति भावः ॥ **तदिति** । स्वस्वरूपत्वमित्यर्थः ॥

**दृशेरौणादिकोऽतच्प्रत्यय इति** । दृशेरतच्प्रत्यये 'पुगन्तलघूपधस्य चे'ति ऋकारस्य अकारे गुणे तस्य उरण्रपर' इति रपरत्वे च दर्शतशब्दो निष्पन्न इति भावः ॥ **अनेनेति** । 'बट्दर्शतमि'ति पदद्वयेनेत्यर्थः । ननु वायुशब्दस्य बलज्ञानस्वरूपार्थत्वं यदि स्यात् तदा बट्दर्शतमित्यनेन वायुशब्दो निरुक्तो भवेत् । तस्य तदर्थत्वमेव कथमित्यत आह **वशब्द इति** ॥ **अयतिः गत्यर्थ इति** । अयधातुर्गत्यर्थः । अयगताविति धातुपाठादिति भावः । **सत उणिति** । अयतेरुण्प्रत्यये 'अत उपधाया' इत्युपधावृद्धौ वायुशब्दो निष्पन्न इति भावः। **डिच्चेति** । डित्वादम इत्यस्य लोपे असुन्प्रत्यये परतो भृधातो ऋकारस्य गुणे तस्य रपरत्वे च भर्ग इति रूपमिति भावः ॥ **इदमपीति** । भर्ग इत्येतदपीत्यर्थः । 'कृपावाजिमिस्विदिसाधशूभ्य उणि'ति सूत्रस्य अयमर्थः । डुकृञ्-करणे, पा-पाने, वा-गतिगन्धनयोः जि-जये, डुमिञ्-प्रक्षेपणे, स्वद-आस्वादने, साध-संसिद्धौ, अशू-व्याप्तौ एतेभ्यो धातुभ्य उण्प्रत्ययो भवतीति । ननु वातेर्भरणार्थत्वाभावात् भरणगमनार्थस्य भक्तशब्दस्य वायुशब्दव्याख्यानरूपत्वमयुक्तमित्यत आह **अनेकार्थत्वादिति** । श्रेष्ठत्वार्थकं महदित्येतदपि वायुशब्दव्याख्यानरूपमित्यभिप्रेत्य तदर्थतया वायुशब्दं निर्वक्ति **वयःश्रेष्ठ इत्यस्मादुणिति** । यद्यपि वयगतावित्येव धातुपाठः तथाऽपि अनेकार्थत्वाद्धातूनां वयतिः श्रेष्ठत्वेऽपि वर्तत इत्यभिप्रेत्यैवमुक्तम् । अस्मादुण्प्रत्यये 'अत उपधाया' इत्युपधावृद्धौ वायुशब्दो निष्पन्न इति भावः ॥ **एरजित्यचिति** । यद्यप्येरजित्यचिति सूत्रव्याख्यानावसरे काशिकायां भावे अकर्तरि च कारक इति वर्तते । यावत्कृत्यल्युटो बहुलमितीत्युक्त्वा इवर्णान्ताद्धातोर्भवे अकर्तरि च कारके संज्ञायामच्प्रत्ययो भवतीति सूत्रार्थस्य वर्णितत्वात् कर्तर्यच्प्रत्ययो न युक्तः । अज्विधौ भयादीनामुपसङ्ख्यानं नपुंसके भावे क्तादिनिवृत्त्यर्थमित्युक्तत्वेन भयं वर्षमित्यादेर्भवेऽच्प्रत्ययान्तस्य नपुंसकत्वेऽपीतरेषामच्प्रत्ययानां चयः जयः क्षय इत्यादीनां पुलिङ्गत्वात् रामवचोनयमिति नपुंसकत्वं च अयुक्तमिति । तथाऽपि णीञ् प्रापण इत्यस्माद्भावेऽच्प्रत्ययान्तत्वेन निष्पन्नान्नयशब्दात् तत्करोति ण्यन्तात्पचाद्यचि कृते निष्पन्नस्य नयशब्दस्य विशेष्यलिङ्गत्वात् प्रापणकर्तृत्वार्थकत्वाच्च न कश्चिद्दोषः । नीयन्ते शिष्येषु प्रवर्त्यन्तेऽनेनेति नयमित्येतत्तु नयशब्दात् तत्करोति ण्यन्तात्पचाद्यचि कृते निष्पन्नस्य नयशब्दस्य पर्यवसितो योऽर्थस्तत्कथनपरं यस्मान्नयशब्दात् करोत्यर्थे णिजुत्पाद्यते । स कथं निष्पन्न इत्यतः सूत्रमुदाहृतमिति ध्येयम् । रामविषयकवचसां शिष्येषु प्रापणे हनुमदन्तर्गतभगवत एव कर्तृत्वम् । प्रथमरूपस्य तु करणत्वमिति हृदि निधाय नीयन्ते शिष्येषु प्रवर्त्यन्ते चेति करणव्युत्पत्तिमुक्त्वा करणार्थनयशब्दस्य कथं निष्पत्तिरित्याकाङ्क्षायां एरजित्यचिति सूत्रमुदाहृतम् । लिङ्गस्याभियुक्तप्रयोगानुसारित्वान्नपुंसकलिङ्गं च युक्तमिति द्रष्टव्यम् ॥ **पृच्छब्द इति** । यद्यपि मांसपृतनासानूनां मांसपृत्स्नवो वाच्याः शसादौ चेत्युक्तेः शसादौ परतः पृतनाशब्दादेशरूपपृच्छब्दः पृतनावाचित्वेन प्रसिद्ध इति भावः ॥ **क्षै क्षय इत्यस्मादिति** । क्षै क्षय इत्यस्मात् अशितिप्रत्यये विवक्षिते 'आदे च उपदेशेऽशितीति एकारस्यात्वे कृते पश्चात् 'आतोऽनुपसर्गे क' इति कप्रत्यये 'आतो लोप इटि चे'त्याकारलोपे च पृक्ष इति रूपमिति भावः । तथाऽपि पृच्छब्दतकारलोपः कथमित्यत आह **उपपदतकारलोप इति** । ननु वपुःशब्दसमानाधिकरणस्य पृक्षशब्दस्य पुलिङ्गत्वं कथमित्यत आह **पुलिङ्गमिति** । 'पृक्षो वपुः पितुमान्नित्यआशये द्वितीयमासमशिवासु मातृष्वि'ति श्रुतौ पृक्षशब्दस्य पुलिङ्गतया प्रयुक्तत्वात्

तदनुसारेणात्रापि पुलिङ्गं प्रयुक्तमिति भावः ॥ **असुन्वा प्रत्यय इति** । पृच्छब्दे कर्मवाचिन्युपपदे क्षै क्षय इत्यस्मादसुन्वा प्रत्ययः कित् कित्कार्यकारी । तथाच पूर्ववदाकारलोपे निष्पन्नमिदं पृक्ष इति सकारान्तं पदं नपुंसकमेवेत्यर्थः । पृक्ष इत्यस्य पर्यवसितार्थमाह **रिपुपृतनेति** । वशब्दस्य शास्त्रापरपर्यायतीर्थवाचित्वं कथमित्यत आह **वातेरिति** । गत्यर्थानां ज्ञानार्थत्वेन वातेरवगत्यर्थत्वात् । तस्मात्करणे घञर्थे कविधानात् कप्रत्यये 'आतो लोप इटि चे'त्याकारलोपे च निष्पन्नस्य वशब्दस्य ज्ञानसाधनशास्त्रापरपर्यायतीर्थवाचित्वं युक्तमिति भावः । वशब्दः शास्त्रवाचीत्येतावत्येव वक्तव्ये शास्त्रापरपर्यायतीर्थवचनं मध्वशब्दानन्दतीर्थशब्दयोरेकार्थत्वं सूचयितुम् ॥ **यथोक्तमिति** । 'मध्वित्यानन्द उद्दिष्टो वेति तीर्थमुदाहृतम् । मध्व आनन्दतीर्थः स्यात्तृतीया मारुतीतनुरि'ति । ननु मधुशब्दस्य वशब्देन समासे मधुव इति निर्देशः स्यात् मध्व इति तु कथं निर्दिश्यत इत्यत आह **स्वरित्यत्रेवेति** । शोभनं वः सुखं यस्येति विग्रहे सुवरिति निर्देष्टव्ये स्वरिति कैश्चिन्निर्दिश्यते । तत्र यथा पूर्णो भूतिवरोऽनन्तसुखो यद्व्याहृतीरित इति निरुक्तत्वादुकारलोपः तथाऽत्रापि 'मध्वित्यानन्द उद्दिष्ट' इत्यादिना निर्देशादुकारलोप इति भावः । यथोक्तम् । 'वर्णागमो वर्णविपर्ययश्च तथा परौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तमि'ति । उक्तं च पाणिनिना 'पृषोदरादीनि यथोपदिष्टमि'ति।

**श्लो०चं०— औणादिक इति** । उणादयो बहुलमित्युक्तत्वात् । भृमृदृशियजिपर्विपच्यमितमिनमिहर्येभ्योऽतच् इति विशेषविहितत्वेऽप्यतच्प्रत्ययस्य बहुलग्रहणाद् दृशेरपि प्राप्त्या तस्मिन् परतो लघूपधगुणे सति दर्शतशब्दनिष्पत्तिरिति भावः ।

**तत उणिति** । अयतेरुणादेर्बाहुलकादुणि णित्वादत उपधाया इत्युपधाऽकारवृद्ध्या वायुरिति रूपनिष्पत्तिरिति भावः ।

**किञ्चेति** । कीदृशं तस्य मूलरूपमिति शङ्काया अन्यदप्युत्तरमस्तीत्यर्थः ॥ **आभ्यामसुन्प्रत्यय इति**। उणादयो बहुलमित्युक्तत्वात् । धातुसमुदायादसुन्प्रत्यये तत्सन्नियोगेन पूर्वधातोः सार्वधातुकार्धधातुकयोरिति गुणे रपरत्वे प्रत्ययस्य ङित्त्वविधानसामर्थ्यात् गमेष्टेरिति टिलोपे च सति भर्गशब्दनिष्पत्तिरिति भावः । न च भृञः साक्षात्प्रत्ययसन्नियोगाभावेऽपि यथाकथञ्चित्संयोगेन गुणवत्तस्य ङित्वविधाने तत्सन्नियोगात् भृञोऽपि टिलोपः स्यादिति वाच्यम् । बहुलवचनेनैव प्राप्तस्यापि तस्य बाधकसम्भवादित्याहुः । वस्तुतो ङित्करणस्येष्टसिद्ध्यर्थत्वान्न किञ्चिदेतदिति ध्येयम् । उणिति वातेरुण्प्रत्यये आतो युक् चिण्कृतोरिति युगागमे च सति वायुशब्दनिष्पत्तिरिति भावः ॥ **वयः श्रेष्ठत्व इति** । ननु वयतेः श्रेष्ठत्वार्थत्वे क्रियावाचित्वाभावात् कथं धातुत्वम् । न हि श्रेष्ठत्वस्य 'यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते । आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते' इति। 'गुणभूतैरवयवैः समूहः क्रमजन्मनाम् । बुद्ध्या प्रकल्पितो भेदः क्रियेति व्यपदिश्यत' इति । 'स च पूर्वापरीभूत एकत्वादक्रमात्मकः । पूर्वापराणां धर्मेण तदर्थेनानुगम्यत', इति वैयाकरणपरिकल्पितक्रियात्वमस्ति येन तदर्थकस्य वयतेर्धातुत्वं स्यादिति चेन्न । ऋग्भाष्यटीकोक्तरीत्या वदनैकदेशस्य कपोलस्योक्तलक्षणक्रियात्वाभावेऽपि वदनैकशब्देन विवक्षितस्य तद्व्यापारस्य क्रियात्वात् तद्वाचित्वेन वैयाकरणमते गण्डयतेर्धातुत्ववत् श्रेष्ठत्वशब्देन

विवक्षितस्य तद्व्यापारस्य क्रियात्वात् तद्वाचितया वयतेरपि धातुत्वस्याप्रत्यूहत्वात् । ततश्च वयतेरुणि णित्त्वादत उपधाया इति उपधावृद्धौ वायुशब्दनिष्पत्तिरिति भावः ।

**निहितमिति** । प्रेरितमित्यर्थः । भगवतेति शेषः । उपलक्षणं चैतत् । अवतीर्णं चेत्यपि द्रष्टव्यम् । अनेन मन्त्रे, तन्मूलरूपम् । **यत** आद्यादित्वात्तृतीयान्तात्तसिः । ततश्च येनेत्यर्थः ॥ भगवतेति यावत् । **वपुषे** अवताराय । **इत्था** इत्थमेव । **अधायि** निहितम् । इत्थमेवाजनि च अवतीर्णं चेति योजना सूचिता भवति।

'प्रथमकमि'ति स्वार्थे कप्रत्यय इति भावेनोक्तं **प्रथममिति** । रामस्य वचांसि सीतां प्रति नीतवदिति वा रामवचःसु यो नय आज्ञारूपस्तद्युक्तमिति वा टीकोक्तरीत्या सत्येव व्याख्याने अर्थान्तरमप्याह **रामेति** । अत्र विषयत्वं षष्ठ्यर्थः सम्बन्ध इत्यभिप्रेत्योक्तं **विषयाणीति** । तान्येव भृङ्गिग्राहिकया दर्शयति **मूलेति** ॥ **एरजित्यजिति** । इवर्णान्ताद्धातोर्भविऽजिति अच्प्रत्ययविधानान्नयतेः करणेऽच्प्रत्यये गुणायादेशयोर्नयशब्दनिष्पत्तिः । अत्र च वायुना कर्त्रा करणभूतहनुमदाख्यप्रथमरूपेण रामायणादीनि शास्त्राणि नीयन्त इत्यर्थस्य विवक्षितत्वाद्युक्तमेव हनुमतः शास्त्रप्रवृत्तिं प्रति करणत्वम्, अत एव च अमुना वायुनेति प्रागुक्तमिति ध्येयम् ।

**क इति** । आदेच उपदेशेऽशितीति कृतात्वात् क्षै क्षय इत्यस्माद्धातोरातोनुपसर्गे क इति कप्रत्यये आतो लोप इटि चेत्याकारलोपे पृक्ष इति रूपसिद्धिरिति भावः । ननु तथाऽपि पृत्क्ष इति रूपं स्यात् । पृक्ष इति तु कथमित्यत आह **उपपदेति** । ननु च वपुःशब्दस्य नपुंसकलिङ्गत्वात् विशेषणानां च विशेष्यनिघ्नत्वात् पृक्षं द्वितीयं वपुरिति नपुंसकलिङ्गेन भवितव्यम्, पृक्ष इति पुलिङ्गं तु कथमित्यतः 'पृक्षो वपुः पितुमानिति' श्रुतौ पुलिङ्गस्य श्रुतत्वात् तदनुसारेण भाष्येऽपि पुलिङ्गप्रयोग इत्याह **पुलिङ्गमिति** । अत्र च पक्षे पुलिङ्गस्य छान्दसत्वं कल्पनीयं भवतीत्यपरितोषात् पृक्ष इत्यस्यापि नपुंसकतामेवाश्रित्य विशेषणविशेष्यभावमुपपादयति **असुन्वेति** । नन्वस्मिन्पक्षे आतो लोप इटि चेत्यनेनाकारलोपः सिद्ध्यति तस्य किन्निमित्तकत्वात् । असुनश्च अकित्त्वादित्यतोऽत्र पक्षेऽसुनोऽपि कित्त्वाश्रयणाद्युक्त एवाकारलोप इत्याशयेनाह **किदितीति** ।

भाष्ये मध्वशब्द आनन्दतीर्थशब्दसमानार्थ इत्यभिप्रेत्य तदुपपादनाय मध्वशब्दावयवभूतं मधुशब्दं 'मध्वित्यानन्द उद्दिष्ट' इति प्रमाणानुसारेण सुखवाचितया व्याचष्टे **मधुशब्द इति** । प्रमाणाभावेन तत्र तस्याखण्डशक्त्यसिद्धेरवयवार्थाननुगमेन तत्सापेक्षयोगवृत्तेरप्यनुपपत्तेः कथं मधुशब्दस्यानन्दवाचित्वमित्यतोऽखण्डशक्तिमेवाभिप्रेत्य तत्साधकं प्रमाणमाह **मधु द्यौरिति** । पिता द्यौर्नो मधु सुखमस्त्वित्यर्थः । 'वेति तीर्थमुदाहृतमि'ति प्रमाणं मनसि निधाय तदवयवशब्दं तीर्थवाचितया व्याचष्टे **वशब्द इति** । प्रमाणाभावेन तत्र तस्याखण्डशक्त्यसिद्धेः प्रकृतिप्रत्ययविभागस्यात्र अस्फुटत्वेन अवयववृत्त्यनुपपत्त्या तत्सापेक्षयोगस्याप्यनुपपत्तेः न वशब्दस्य शास्त्रापरपर्यायतीर्थवाचित्वमित्यतो योगवृत्त्यैव तस्य तद्वाचित्वमित्यभिप्रेत्य प्रकृतिप्रत्ययविभागप्रदर्शनेनावयववृत्तिमुपदर्शयति **वातेरिति** । अवगत्यर्थाद्वातेर्वात्यवगच्छत्यनेनेति घञर्थे करणे कप्रत्यये आतो लोप इटि चेत्याकारलोपे व इति रूपनिष्पत्तिरिति भावः । ननु कर्तर्येव कप्रत्ययविधानात् कथं करणार्थत्वं तस्येत्यतो घञर्थे कमिति घञर्थे तद्विधानात् । घञश्च 'अकर्तरि च कारके संज्ञायामि'ति कर्तृभिन्नभावकरणादि-

साधारणत्वेन तदर्थे विहितस्य कस्यापि भावकरणादिसाधारणत्वाद्युक्तं करणार्थत्वमित्याशयेनोक्तं **घञर्थे कविधानमितीति** । ननु मध्व इत्यत्र न मधुनो व यस्येति बहुव्रीहिराश्रयितुं शक्यः । तथा सति व्यधिकरणबहुव्रीह्याश्रयणप्रसङ्गात् । नापि मधु व यस्येति समानाधिकरणः । वशब्दोक्तशास्त्रस्य सुखत्वाभावेन तदयोगादित्यतोऽत्र सुखवाचकस्यापि मधुशब्दस्य लक्षणया तत्साधनपरत्वेन सुखपरत्वाभावान्न समानाधिकरणतदनुपपत्तिरित्यभिप्रेत्य तं दर्शयति **सुखसाधनमिति** । नन्वेवं मध्वशब्दनिर्वचने मधुव इति भवितव्यम् । मध्व इति तु कथमित्यत आह **स्वरित्यत्रेवेति** । स्वरित्यत्रेव निरुक्तत्वात् अत्र उकारलोप इत्यर्थः ।

**वा०र०— कथंभूतानि च तानि त्रीणि रूपाणीति** मूलम् । उपलक्षणं चैतत् । किञ्च तेषां कार्यमित्यपि ज्ञेयम् । अत एव वायोरामवचोनयमिति तेषां रूपाणां कार्याणि कथ्यन्त इति ज्ञेयम् । **मृडशीति** । अत्र भृदृशीङ्यजिपर्विपच्यमितमिनमिहर्येभ्योऽतजिति सूत्रपाठः । भृदृशीङ् यजिपर्वीपचि अमितमितमिहर्य एतेभ्योऽतच्प्रत्ययो भवतीति सूत्रार्थः । भरतः मरतः यजत इत्याद्युदाहरणम् । अतच्प्रत्ययस्येति विशेषरहितत्वेऽपीति सम्बन्धः । मध्यदीपिकान्यायेन बहुलग्रहणादित्यत्राप्यतच्प्रत्ययस्येत्येतत्सम्बध्यते । तथा च दृशेरपि बहुलग्रहणादतच्प्रत्ययस्य प्राप्त्येति योजना । क्वत्यं बहुलग्रहणमित्यत उक्तं **उणादयो बहुलमित्युक्तत्वादिति** । तथा चोणादयो बहुलमित्येतत्सूत्रीयबहुलग्रहणादित्युक्तं भवति । मूलकोशे तु बहुलग्रहणादिति नास्ति । उणादयो बहुलमित्युक्तत्वादित्येतावदेवास्ति । तत्पाठे उणादयो बहुलमित्युक्तत्वाद् दृशेरप्यतच्प्रत्ययस्य प्राप्तेरिति योजनीयम् । **इत्युक्तत्वादित्यस्येति** । सूत्रे बहुलग्रहणादित्यर्थः । इदं च बाहुलकाश्रयणेन दृशेरतच्प्रत्ययोपपादनं भृदृशीङिति दशपादीस्थपाठमाश्रित्य तत्पाठ एव दर इति शीङोरिवातच्प्रत्ययप्राप्त्या दृशेस्तदप्राप्ते बाहुलकाश्रयणीयत्वात् । भृमृदृशियजिपर्वीति सूत्रपाठे तु दृशेरेव पाठस्य सूत्रे सत्वेन तस्माल्लक्षणोक्त एवातजिति न बाहुलकाश्रयणप्रसक्तिः । अत एव रुशन्तमग्निं दर्शतं बृहन्तम् । तरणिर्विश्वदर्शत इत्यादिवेदभाष्यैर्दर्शतशब्दो भृमृदृशीति सूत्रेण दृशेरतच्प्रत्ययान्तत्वेनैव व्याख्यातः । परन्तु तत्पाठेऽपि दरतेः शीङश्चातच् बाहुलकादाश्रयणीयः । अत्र च मरतेर्दृशेश्चेति साम्ये तथैव पाठे निर्बन्धो नवीनस्यायुक्तः । मन्त्रविरोधस्तु तदुद्भावितो नायाति । बाहुलकादपि मन्त्रप्रयोगोपपत्तेः । भाष्ये दृशेरतजित्युक्तिरपि पाठान्तराभिप्रायेण वा बाहुलकाभिप्रायेण वेयं सङ्ख्यानाभिप्रायेण वोपपन्नेति तद्विरोधोऽपि तदुद्भावितो दशपादीपाठ इति ज्ञातव्यम् । 'वायवायाहि दर्शते'त्यत्र तु नातच्प्रत्ययः । किन्तु दृशेर्भवि घञि दर्शशब्दं व्युत्पाद्य तनोतेश्च डप्रत्ययं व्युत्पाद्य दर्शोदर्शनं तेन तः ततः दर्शतेति ऋग्भाष्यटीकोक्तरीत्या डप्रत्ययं धातुद्वयमेवेति ज्ञेयम् । कथं निरुक्त इत्यतस्तत्प्रकारं दर्शयति । मूले **वशब्दो बलवाची** । न तत्र व्युत्पादनापेक्षेत्याशयः । तथैव टीकाकृता 'वायवायाही'त्येतत् ऋग्भाष्यटीकायामुक्तेः । अयतिः गत्यर्थ इत्यादि मूलं ऋग्भाष्यटीकातट्टीकामनुसृत्य व्याख्येयम् ।

**इतीत्यस्येति** । निरुक्त इति पूर्वेण सम्बन्धः । मूले **भरणगमनयोः कर्त्रिति** । 'भारतिज्ञानरूपत्वात्' इति ऋग्भाष्यानुसारेण तट्टीकायां भा दीप्तावित्यादिकमुक्तमित्यविरोधः । मूले **वर्तत** इत्यनन्तरं इतिशब्दोऽध्याहार्यः । तस्य च व्याख्यानमित्यनेन सम्बन्धः । इदमपि वाय्विति पूर्वोक्तरीत्या सुज्ञेयमिति भावेन

महत्त्वव्याख्याने तथोक्तम् । **धातुसमुदायादिति** । तथा चेष्टमेव सिद्ध्यति न त्विष्टमपि । भृत्रष्टिलोपस्त्वनिष्ट इति भावः । वातेरुणिति पाठः । मञ्जरीशेष्याद्यनुसारेणाह **यावत्सिद्धमसिद्धं वेत्यादि** । **गण्डयतेरिति** । गण्डिवदनैकदेश इति धातुपाठः । मञ्जरीशेष्याद्यनुसारेण यन्मूलमित्यादिना मूलरूपस्य बलात्मकत्वादिकमुक्तं तदनुवादपूर्वकं इच्छायामेवेत्याद्यतिदेशमन्यत्र कृतं योजयति **न केवलमिति** । अत्रैवमिति पाठे एवमित्यस्य बलात्मकत्वादिविशिष्टमित्यर्थः । एवेति पाठे एवंविधमिति शेषः । पक्षद्वयेऽपि यस्येत्यतःपूर्वं किन्त्विति पूरणीयम् । निहितत्वस्याधिकरणापेक्षत्वाद्वपुष इत्येतन्मन्त्रतात्पर्यमुक्तं **यस्यावतारेष्विति** । निहितमित्यस्य स्थापितमित्यर्थः । भगवतेति शेषः । इत्येतद्ग्रन्थानन्तरं निहितमितीत्यादिः सूचितो भवतीत्याहुरित्यन्तो ग्रन्थः । तत्राहुरित्यनेनोक्तयोजनायास्तत्त्वप्रकाशिकानुसारित्वेऽपीह तत्त्वप्रकाशिकावन्निहितमित्यस्य योजनाभावे-नोक्तमन्त्रयोजनासूचनायोगः । अत एव निहितमित्यस्य प्रेरितमिति व्याख्यानमवतीर्णं चेति पूरणं चायुक्तम् । न केवलमित्येतन्मूलाननुसारित्वादित्यस्वरसः सूचितः । **सत्येव व्याख्यान इति** । इति व्याख्यानद्वयं सिद्धव-त्कृत्यार्थान्तरमाह **अपिः पदार्थे सोपपादनमर्थान्तरमिति** । अनेन मूलस्यैकयोजनामात्रम् । टीकोक्ततद-न्तरोपलक्षणं नयपदव्युत्पादनं चात्राधिकमित्युक्तं भवति । **कृतात्वादिति** । कृतमात्वं यस्य तस्मादित्यर्थः । **मूले कर्मणीति** । इदं च 'आतोनुपसर्गे' इति सूत्रे कर्मण्यणित्यतः कर्मणीत्यनुवृत्तिसम्भवस्थलानुसारेणास्तीति पक्षाश्रयणेन न त्वनुवृत्तिनियममभिप्रेत्य । तदभावात् । तथा चैतत् तथा अधिकरणीयटीकायां 'वायवायाही'-त्येतत्सम्बन्धिटीकाव्याख्याने चास्मदीये द्रष्टव्यम् । अत एवाक्षयं पुरुषस्याक्षमित्येतत्तत्त्वनिर्णयटीकायां नञुपपदे क्षै क्षय इत्यस्मादित्युक्तमिति ज्ञातव्यम् । **किन्निमित्तत्वादिति** । इटश्चात्र प्रसक्त्यभावेन किन्निमित्तकत्वस्यैवा-वाच्यत्वात् तस्य च असम्भवादित्याशयः । **न शब्दस्येति** । शब्दस्य न शास्त्रेति योज्यम् । वचसीति सप्तमी विषयसप्तमीति न कृतमित्येतत्सम्बन्धानुपपत्तिरिति भावेनोक्तं **वचनविषय इति** ।

**सं०व्र०— अनेनेति** । बट् दर्शतमिति पदद्वयेनेत्यर्थः ॥ **एरजित्यजिति** । इवर्णान्ताद्धातोरच्प्रत्ययः स्यात् अकर्तरि कारके भावे चेत्यनेन भावेऽच्प्रत्ययस्य विहितत्वात् कथं प्रकृते कर्मण्यजिति चेत् । मैवम् । अत्रापि नयनं नयः रामवचसां नयो येनेति विग्रहाश्रयणेन भावप्रत्ययाङ्गीकारेणादोषात् । न चैवं नीयते शिष्येषु प्रवर्त्यतेऽनेनेति मूलविरोधः । तस्यार्थकथनमात्रत्वात् । यद्वा बहुलग्रहणात् कर्मण्यच्प्रत्ययोपपत्तिः । बाहुलका-त्कर्तरि घञादिवदिति भावः । 'आतोनुपसर्गे क' इति कप्रत्यये 'आतो लोप इटि च'त्याकारलोपे पृक्ष इति रूपसिद्धिरिति भावः । ननु पृत्क्ष इति भवेत् पृक्ष इति तु कथमित्यत आह **उपपदेति** । वपुःशब्दस्य नपुंसक-लिङ्गत्वात् विशेषणानां च विशेष्यनिघ्नत्वात् पृक्षं द्वितीयं वपुरिति भवितव्यम् । पृक्ष इति पुलिङ्गं कथमित्यत आह **पुल्लिङ्गमिति** । 'पृक्षो वपुः पितुमानि'ति श्रुत्यनुसारेणात्र पुल्लिङ्गमित्यर्थः ॥ **किदितीति** । एवं चाकार-लोपोपपत्तिरिति भावः ॥ **वातेरिति** । वाति गच्छत्यनेनेति वः इति विग्रहः । ननु मधुव इति भविष्यति । मध्व इति तु कथमित्यत आह **स्वरित्यत्रेवेति** ।

**॥ इति अनुव्याख्यानकारैः स्वस्वरूपकथनम् ॥**

॥ अथ ग्रन्थोपसंहारः ॥

२१ सु०— भगवत्स्वरूपप्रतिपादनेनैव ग्रन्थोपसंहारः समुचित इत्याशयवान् नित्यापरोक्षं भगवन्तं सम्बोध्य स्तौति **निःशेषमिति** ।

**अनु०— निःशेषदोषरहितकल्याणाखिलसद्गुण ।**
**भूतिस्वयम्भुशर्वादिवन्द्यं त्वां नौमि मे प्रियम् ॥**

***इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते***
***श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रानुव्याख्याने चतुर्थाध्यायस्य चतुर्थः पादः ॥***

**भूतिः** महालक्ष्मीः ॥

**परि०—** भूतिपदस्यानेकार्थत्वाद्विवक्षितमर्थमाह **भूतिर्महालक्ष्मीरिति** ।

**यादु०—** विभूतिपदव्याख्यानव्याजेनान्ते माङ्गलिकं शब्दं पठति भगवाँष्टीकाकारः ॥ **विभूतिर्महालक्ष्मीरिति** । आदौ श्रिय इति अन्ते च महालक्ष्मीरिति श्रीवाचकशब्दस्य सम्पुटाकारेण प्रयोगाच्छ्रीकरोऽयं ग्रन्थ इति सूचयितुमिदमिति साम्प्रदायिकाः ।

**वं०प०—** सम्बोधनाभिप्रायमाह **नित्यापरोक्षमिति** । भूतिपदव्याख्यानव्याजेनान्ते माङ्गलिकं पदं बध्नाति **भूतिर्महालक्ष्मीरिति** ।

**कं०रा०—** परोक्षस्य भगवतो निःशेषदोषरहितकल्याणाखिलसद्गुणेति सम्बोधनमयुक्तमित्यत उक्तम् **नित्यापरोक्षमिति** । स्वं प्रतीति शेषः । 'शम्भुस्वयम्भुहरयो हरिणेक्षणानां येनाक्रियन्ते'त्यादौ स्वयम्भुशब्दप्रयोगस्य दृष्टत्वात् 'भूतिस्वयम्भुशर्वादिवन्द्यमि'ति मूले स्वयम्भुशब्दप्रयोग उपपन्नः ।

**शे०चं०—** मङ्गलाचरणस्य पूर्वमेव कृतत्वात् किं पुनस्तत्करणेनेत्यतः तत्र निमित्तं वदन्नेव सम्बोधनपूर्वकस्तुतौ च निमित्तं सूचयन्नेव स्तुतिरूपमङ्गलाचरणपरतयोत्तरपद्यं सङ्गमयति **भगवदिति** । अप्रसिद्धेर्भूतिपदार्थमाह **महालक्ष्मीरिति** । अत्र च ग्रन्थे श्रियः पत्य इत्यादौ, महालक्ष्मीरिति चान्ते श्रीवाचकशब्दस्य सम्पुटाकारेण प्रयोगाच्छ्रीकरोऽयं ग्रन्थ इति सूचितमिति *गुरुचरणाः* ।

**ए०बा०— भूतिः स्वयंभुशर्वादि** इत्यत्र भूतिपदं 'इन्दिरा च रमा लक्ष्मीर्हिरण्या गगना तथा । रक्ता रक्ततरा भूतिर्विभूतिश्च श्रियो नवे'त्येकादशतात्पर्यानुरोधेन श्रीलक्ष्मीरूपपरमिति अभिप्रेत्य व्याचक्षते **भूतिर्महालक्ष्मीरिति** ।

॥ इति ग्रन्थोपसंहारः ॥

॥ अथ न्यायसुधायां अन्तिममङ्गलपद्यानि ॥

२२ सु०—

**वचनप्रसूनमाला जयतीर्थाख्येन भिक्षुणा रचिता ।**
**ध्रियतां हृदये सदये कमलामहिलेन पूरुषेण ॥ १ ॥**

**परि०**— कृतं व्याख्यानं स्वामिने समर्पयति **वचनेति** । यथा हि लोके भिक्षुकः तत्र तत्रोद्यानेषु पुष्पाण्याहृत्य मालां कृत्वा समर्पयेच्चेत्तां यथा दयालुर्हृदये बिभर्ति एवं वचनप्रसूनमाला मया समर्पिता हृदये दयया ध्रियतां इयं साध्वीत्यङ्गीक्रियतामित्यर्थः । **कमला** लक्ष्मीः **महिला** भार्या यस्येति स तथा तेनेत्यर्थः । माला हि प्रमदायुक्तस्यैव हृदयङ्गमेति **कमलामहिलेन** इत्युक्तम् ।

**यादु०**— **कमलामहिलेति** । कमला रमा, महिला वनिता, यस्य स तथोक्तः । 'वनिता महिला तथे'त्यभिधानात् ।

**वं०प०**— **वचनप्रसूनेति** । यथा कश्चिद्भिक्षुकः पुष्पमालां विरचय्य ऐश्वर्यवन्तं कञ्चनप्रभुं प्रति दत्ता चेत् सा यथा तदुपरि दयया हृदये तेन ध्रियते तद्वदित्यर्थः । 'महिला वनिता तथे'त्यभिधानात् कमला महिला यस्यासौ कमलामहिलो लक्ष्मीपतिः तेनेत्यर्थः ।

**शे०चं०**— एवं समापितग्रन्थव्याख्यानो भगवाँष्टीकाकारः स्वकीर्त्यनुवृत्तये स्वनाम ग्रन्थे उपनिबध्नन्नेव स्वकृतस्य ग्रन्थस्य प्रचयाद्यभिमतसिद्ध्यर्थं तस्य पुष्पमालात्वेन प्रीतिपूर्वकं भगवता हृदये धारणप्रार्थनारूपमङ्गलमाचरति **वचनेति** । सकलवाङ्मनसदेवतया रमया युत एव भगवति पुष्पमालात्वेन ग्रन्थसमर्पणमभिमतसिद्ध्यङ्गमिति ज्ञापयितुं **कमलामहिलेनेत्युक्तम्** । **कमला** लक्ष्मी **महिला** वनिता यस्य तेनेत्यर्थः । 'वनिता महिला तथे'त्यभिधानात् ।

**ए०बा०**— एवं संपूर्णसुधास्रिग्धाष्टीकाकृतः स्वकृतिं स्वामिने समर्पयन्ति **वचनेत्यादिना** ॥ **वचनप्रसूनमाला जयतीर्थाख्येन भिक्षुणा रचिता । ध्रियतां हृदये सदये कमलामहिलेन पूरुषेण** ॥ वचनान्येव प्रसूनानि पुष्पाणि तेषां माला । 'प्रसूनं कुसुमं सुममि'त्यमरः । तथाहि लोके कश्चित् भिक्षुकः तत्रतत्रोद्यानेषु पुष्पाणि विचित्य आहृत्य मालां विरच्य कश्चित्प्रभुमर्पयति चेत् स दयालुः हृदये बिभर्ति तथा भिक्षुणा ममाचार्यवचनान्येव प्रसूनानि तत्र तत्र बृहद्भाष्याद्याचार्यग्रन्थरूपोद्यानेषु विचित्य विरचितेयं माला कमला लक्ष्मीर्महिला वनिता यस्यासौ तथोक्तस्तेन । 'वनिता महिला तथे'त्यमरः । **पूरुषेण पूर्णषड्गुणेन** । पुरिशेत इति

पुरुषस्तेनेति वा । 'पुरिशेते यतः सोऽथ पुरुषश्चेति गीयत' इत्युक्तेः । पूर्णेति वा । पृपालनपूरणयोरित्यतः पुरः कुषन्निति कुषन्प्रत्ययः कित्वाद्गुणाभावः । उदोष्णपूर्वस्येत्युत्वं परत्वं च । अन्येषामपीति वा दीर्घः । 'पुरुषाः पूरुषा नरा' इत्यमरः । सदये हृदये ध्रियताम् । धृञ् धारण इत्यतो भौवादिकात्कर्मणि लोडात्मनेपदम् । रीङ्शय लिङ्क्षिति रिङादेशः । माला हि प्रमदया युतस्यैव हृदयङ्गमेति भावः । एतेन लक्ष्म्याऽपीयं माला समर्पिता भवति । पुरुषेण वायुनापि ध्रियतामित्यपि पृथगन्वयेन वायोरपीयं समर्पिता भवति । 'ब्रह्मा तु पुरुषः स्मृतः । एवं वायुरपि ज्ञेयमि'ति तन्त्रसारोक्तेः ॥ १ ॥

**२३ सु०—**

**न वैदुष्यभ्रान्त्या न च वचनचातुर्यकुधिया**
**न मात्सर्यावेशान्न च चपलतादोषवशतः ।**
**परं श्रद्धाजाड्यादकृषि कृतिमाचार्यवचसि**
**स्खलन्नप्येतस्माज्जगति न हि निन्द्योऽस्मि विदुषाम् ॥ २ ॥**

**परि०— श्रद्धाजाड्यादिति** । भक्तिपारवश्यादित्यर्थः । **अकृषि** कृतवानस्मि । एतस्मात्स्खलनदोषान्न हि निन्द्योऽस्मि । किन्तु मान्य एव भवामीत्यर्थः ।

**यादु०— श्रद्धाजाड्यात्** भक्तिपारवश्यात् । **आचार्यवचसि** विषये । **कृतिं** तदर्थप्रकाशनरूपाम् । आचार्यवचसीत्यस्य श्रद्धाजाड्यादित्यनेनान्वयः ।

**वं०प०— अकृषि** अकार्षम् ।

**कं०रा०— श्रद्धाजाड्यादिति** । भक्त्यतिशयादित्यर्थः ॥ **अकृषीति** । उत्तमपुरुषप्रयोगादहमिति लभ्यते । 'अस्मदो द्वयोश्चे'त्यत्र अन्यतरस्यामित्यस्य अनुवृत्तेः बहुत्वार्थकमेकवचनम् । आचार्यविषयकग्रन्थकरणरूपक्रियाजन्यसुकृतविशेषस्य कर्तृगामित्वादात्मनेपदम् । कृञः लुङादेशे इटि च्लेः सिजिति सिजादेशे सिचः सकारस्य आदेशप्रत्यययोरिति षत्वे 'लुङ्लङ्लृङ्क्ष्वडुदात्त' इत्यडागमे च अकृषीति रूपम् ॥

कल्याणपूर्णः करुणानिवासः कर्तेन्दिरादेः कमलायताक्षः ।
प्रीणातु नित्यं परमः श्रुतीड्यः श्रीमुक्तनाथः श्रितपारिजातः ॥

*॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीमद्व्यासतीर्थमुनिवर्यपौत्रश्रीपतिपूज्यपादानां शिष्येण रामचन्द्रभिक्षुणा कृतायां श्रीमन्न्यायसुधाव्याख्यायां चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४-४ ॥*

**श्री०चं०—** केवलं गुरुदेवताभक्त्यतिशयसाध्यतत्प्रसादलब्धैतद्ग्रन्थप्रतिपादितपदस्वरूपप्रमाणप्रमेयोपपादकन्यायजाते नानादरः कार्य इतीममर्थं व्यञ्जयन्नेव स्वगर्वं परिहरति **न वैदुष्यभ्रान्त्येति** । आचार्यवचसि पूर्णप्रमतिभगवत्पादरचितश्रीमदनुव्याख्यानरूपवचनविषये कृतिं तत्रत्यविषमपदवाक्यविवृतिं **अकृषीति** । करोतेर्लुङात्मनेपदोत्तमपुरुषैकवचनम् । व्यञ्जकं चात्र विदुषामित्येतदेवेति *गुरुचरणाः* ।

**वा०र०—** **करोतेर्लुङिति** । लुङि तस्य तिबाद्यादेशे ञित्वादात्मनेपदे उत्तमपुरुषैकवचने इटि तस्य शपि प्राप्ते तदपवादेन च्लि प्राप्ते च्लेः सिचि कृत्रे अनिडादित्वादिडभावे इति स्थिते उतो वृद्धिर्लुकि हलीत्यतो हलीत्यनुवृत्तेरस्ति सिचोरपृक्त इत्यनेन ईटोऽप्राप्त्या पदेकसकारस्यादेशप्रत्ययोरिति षत्वे इडागमे चाकृषीति रूपमित्यर्थः ।

**स०व्र०—** **अकृषीति** । डुकृञ् करण इत्यस्य लुङुत्तमपुरुषैकवचनम् ॥

*॥ इति चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ॥*

**ए०बा०—** अन्तेऽपि स्वगर्वमपनुदन्ति **न वैदुष्येत्यादिना** ॥ **न वैदुष्यभ्रान्त्या न च वचनचातुर्यकुधिया न मात्सर्यविशान्न च चपलतादोषवशतः । परं श्रद्धाजाड्यादकृषि कृतिमाचार्यवचसि स्खलन्नप्येतस्माज्जगति न हि निन्द्योऽस्मि विदुषाम्** ॥ २ ॥ आचार्यवचसि श्रद्धाजाड्यात् भक्तिपारवश्यादित्यन्वयः । आचार्यवचसि विषये कृतिं तदर्थप्रकाशनरूपम् । अकृषि । अकार्षम् । डुकृञ् करण इत्यतो लुङात्मनेपदम् । च्लेः सिच्युत्तमपुरुषैकवचनम् । एतस्मात् । स्खलनात् ॥ २ ॥

**२४　सु०—**

**अनुव्याख्याऽमृताम्भोधेः समुत्पन्नाऽतिनिर्मला ।**
**इयं न्यायसुधा भौमैर्विबुधैः सेव्यतां सदा ॥ ३ ॥**

**परि०—** **भौमैः** भूमिगतैः । **विबुधैः** भूसुरैः ब्राह्मणैरित्यर्थः ॥

ये तु न्यायसुधापानकामुका रसिका बुधाः ।
आघ्रायेमं परिमळं सेवन्तां ते सुधामिमाम् ॥ (सेवन्ते तामिमां सुधाम्)

ज्ञानाब्धिरप्यवादीद्यत्स्खलत्वं स्वात्मनस्तदा ।
मादृशानां स्खलत्वं किं वाच्यं क्षाम्यन्तु तद्बुधाः ॥

*इति श्रीमन्न्यायसुधापरिमळे सुधीन्द्रगुरुपादशिष्यराघवेन्द्रयतिकृते*
*चतुर्थाध्यायस्य चतुर्थः पादः सम्पूर्णः ॥ ४-४ ॥*

**यादु०— न्यायसुधेति** । अमृतहेतुत्वेन सुधारूपा न्यायाः यस्यामिति विग्रहः । अग्न्याहितादिवत् परनिपातः । **भौमैर्विबुधैः** भूसुरैर्ब्राह्मणैरिति यावत् । इत्यशेषमतिमङ्गलम् ॥

वासवीवियति व्यक्तं परापरविभासकम् ।
व्यासाभिधमहं वन्दे महामोहतमोपहम् ॥ १ ॥

अपारागाधश्रीजयमुनिकृतग्रन्थहृदयप्रपञ्चे मे यत्नो यदपि परिहासैकफलकः ।
तथापि श्रीव्यासालवमतिकृपादृष्टिबलतः कृतो यत्तेन स्यात्सकलसुजनाह्लादजनकः ॥ २ ॥

वेदेशयोगिवरमानसनीरजस्थश्रीमध्वहृत्कमलवासिरमानिवासः ।
व्यासोऽस्त्वनेन जयतीर्थमुनीन्द्रवाक्यगूढाशयप्रकटनेन सदा विभूत्यै ॥ ३ ॥

*इति श्रीमद्वेदेशतीर्थपूज्यपादानां शिष्येण यदुपतिना कृतायां सुधाटिप्पण्यां*
*चतुर्थाध्यायस्य चतुर्थः पादः ॥*

**वं०प०—** प्रसिद्धा सुधा दिविष्ठैर्विबुधैः सेव्यते । इयं तु **भौमैः** भुविष्ठैः, **विबुधैः** भूसुरैः विद्वद्भिर्ब्राह्मणैः, सेव्यतामित्यर्थः इत्यशेषमतिमङ्गलम् ॥

यादवाचार्यहृत्स्थश्रीमध्वाचार्यहृदब्जगः ।
आनन्दादिगुणोद्रिक्तः प्रीयतां बादरायणः ॥ १ ॥

वेदेशमुनिसत्पादसेवासम्प्राप्तवैभवान् ।
यादवार्यान् वरसुधाटीकाकारान् वयं नुमः ॥ २ ॥

श्रीमन्न्यायसुधाटीका यादवाचार्यनिर्मिता ।
तत्राधृतानि वाक्यानि तान्यत्र विवृतान्यलम् ॥ ३ ॥

*इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचिते टीकाऽधृतसुधावाक्यार्थविवरणे*
*चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ॥ ४-४ ॥*

**शे०चं०—** श्रवणमननाभ्यामसकृदेतद्ग्रन्थसेवनमेवैतद्ग्रन्थतात्पर्यविषयीभूतार्थावगतिकारणं न तु प्रसिद्धसुधाया इव कादाचित्कमपि तत् तथेति व्यञ्जयन्नेव स्वकृतग्रन्थस्य हेतुकथनपूर्वकं सर्वदा सकलभूसुरसेव्यतां प्रार्थयते **अनुव्याख्याऽमृताम्भोधेरिति** ।

**ए०बा०— अनुव्याख्येति ॥ अनुव्याख्यामृताम्भोधेः समुत्पन्नातिनिर्मला । इयं न्यायसुधा भौमैर्विबुधैः सेव्यतां सदा ॥ ३ ॥** अमृतत्वहेतुतया सुधारूपा न्याया यस्यां सा न्यायसुधा । आहि-

ताम्र्यादिवत्पूर्वनिपात इत्याहुः । न्यायानां समूहो न्यायं तस्य समूह इत्यण् । तदेव सुधेति वा तदेव सुधा यस्य सेति वा । आयानां स्वामिग्राह्यभागानां समूह आयम् । प्राग्वदण् । नितरमायां स्वामिग्राह्यभागानां समूहो यस्यां सा तथोक्ता । सा च सा सुधा चेति वा वयं प्रतीमः । तदस्मिन्नध्यायलाभशुल्कोपदादीयत इति सूत्रे आयः स्वामिग्राह्यभाग इति व्याख्यानात् । एतेनैतत्पठनपाठनादिफलं स्वेषामस्तीत्यावेदितमित्यशेषमतिमङ्गलम् ॥ ३ ॥

श्रीसुधापद्यविवृतिर्बालेन विवृतास्त्वियम् ।
अनन्ताचार्यहृद्गश्रीनृहरेर्हृदयङ्गमम् ॥ १ ॥

सुधे यदा गोमतिर्मे बालस्य क्षाम्यचुञ्चुके ।
मन्तून् क्षमन्ते बालानां मातरो बलवत्सलाः ॥ २ ॥

उपस्पृष्टेति बालेन नावधीर्या बुधैः सुधा ।
वत्सोत्सृष्टं पयः कृष्णो मुष्णन् किं न पिबत्यलम् ॥ ३ ॥

*इति श्रीमदेर्यनन्ताचार्यपूज्यपादाराधकेन तत्तनूजेन बालशर्मविरचितः*
*श्रीमन्न्यायसुधोपस्पर्शः सम्पूर्णः ॥*

२५　**सु०—**

**इति श्रीमत्पूर्णप्रमतिभगवत्पादसुकृते-**
**रनुव्याख्यानस्य प्रगुणजयतीर्थाख्ययतिना ।**
**कृतायां टीकायां विषमपदवाक्यार्थविवृतौ**
**चतुर्थेऽध्यायेऽस्मिँश्चरमचरणः पर्यवसितः ॥**

***इति श्रीमन्न्यायसुधायां चतुर्थोऽध्यायः सम्पूर्णः ॥***

**शे०चं०—** 'इति श्रीमदि'ति पद्ये **प्रगुणत्वं** ऋजुत्वं अवक्रगतित्वमिति यावत् इत्यशेषमतिमङ्गलम् ॥

सकलसुगुणपात्रं सर्वदोषैकजैत्रं सुमतिसुगतिदात्रं सुष्ठुसज्ज्ञाननेत्रम् ।
निखिलजनिजनित्रं नित्यदुष्टैकवेत्रं नवनवसुचरित्रं नौमि लक्ष्मीकलत्रम् ॥ १ ॥

शुभगुणगणगात्रं शुद्धविज्ञाननेत्रं श्रुतिविततचरित्रं श्रान्ततापातपत्रम् ।
श्रमजलधिवहित्रं शान्तमन्तःपवित्रं श्रयत विबुधमित्रं शक्तियोगीन्द्रपौत्रम् ॥ २ ॥

विद्याख्यरत्नप्रभवाय बुद्धौ विद्योतमानाय सुबृंहिताय ।
शुद्धाय नित्यं मुनिसेविताय मध्वाद्भुताम्भोनिधये नमोऽस्तु ॥ ३ ॥

श्रीमद्व्याससुशास्त्रशुद्धजलधिं मध्वोक्तसत्तर्कदु-
स्तर्काख्यामरदानवाश्रितमतिश्रेष्ठं हि हृद्भूभृता ।
आलोड्याखिलतत्त्वभासकमहारत्नानि चाप्नोत् सुधां
सोऽयं योगिमहेन्द्रसन्निभजयार्याख्यो भवेन्मे मुदे ॥ ४ ॥

श्रीमद्व्यासमतापगापतिवरं श्रीमज्जयप्रोक्तस-
त्सपविष्टितमध्वसन्मुनिवरग्रन्थागवर्येण यः ।
संल्लोड्याखिलसन्नयामृतवरं तत्त्वादिसद्दीपिका-
सत्तात्पर्यसुचन्द्रिकातरुवरं यस्तर्कसत्ताण्डवम् ॥ ५ ॥

निष्कास्याद्भुतखण्डनत्रयमुखव्याख्यानरत्नोच्चयं
दृष्ट्वा कुत्सितयुक्त्यरातिपिहितं श्रीव्यासतीर्थो बुधः ।
स्वोक्तिं रक्षितुमत्र यः प्रतिपदं सम्यग्विशेषार्पको
विद्याधीशयतीन्द्रसद्गुरुवरः किं नावतीर्णः स हि ॥ ६ ॥

यद्धस्ताम्बुजसङ्गतोऽहमभवं देव्याः कटाक्षाश्रयो
यद्व्याख्यानदिवाकरेण विदुषामन्तस्तमः संहृतम् ।
ये प्रीता भुवि चन्दनद्रुम इव स्वीयं स्ववत्कुर्वते
तान् भक्त्यादियुजो भजे परगुरूनानन्दभट्टारकान् ॥ ७ ॥

यः श्रीनिवासमृगराट् सकलान्मदान्धमायाविसिन्धुरसुकुम्भगिरीन्विदार्य ।
सत्तर्कतीक्ष्णनखरैर्विरराज मध्वसिद्धान्तचारुविपिने तमलं भजेऽहम् ॥ ८ ॥

श्रीमत्सुधाद्भुताम्भोधिविक्रीडनविचक्षणान् ।
श्रीमद्विद्याधीशमुनीन् वन्दे विद्यागुरून् मम ॥ ९ ॥

अथ तत्कृपयैवाहं तत्सुशिक्षितमार्गतः ।
तेषामाज्ञां पुरोधाय तत्प्रसादाप्तवैभवः ॥ १० ॥

शिक्षितान् युक्तिनिचयान् स्मारं स्मारं यथामति ।
अकार्षं भावगूढायाः सुधायाः शेषपञ्चिकाम् ॥ ११ ॥

व्यक्तं त्यक्त्वा यदव्यक्तं तत्तच्छास्त्रानुसारतः ।
मूलग्रन्थान् समालोच्य न चोद्ग्रन्थं बहूदितम् ॥ १२ ॥

यद्विद्याधीशगुरोः शुश्रूषाऽन्या न रोचते तस्मात् ।
अस्त्वेषा भक्तियुक्ता श्रीविद्याधीशपादयोः सेवा ॥ १३ ॥

मया विरचिता शेषसुधावाक्यार्थचन्द्रिका ।
अनया भावि यत्पुण्यं तदाप्नोतु गुरुर्मम ॥ १४ ॥

*इति श्रीमत्पदवाक्यप्रमाणविदामग्रेसराणां श्रीमत्सकलविद्वच्चक्रचूडामणीनां श्रीमद्विद्याधीशतीर्थपूज्यपादानां निजशिष्यस्य केशवस्य कृतौ श्रीमद्गुरुराजोपदिष्टमार्गानुवर्तिन्यां श्रीमन्न्यायसुधाविषमपदवाक्यार्थविवृतौ शेषवाक्यार्थचन्द्रिकायां चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४-४ ॥*

**वा०र०—** एवं समापितैतद्ग्रन्थव्याख्यानष्टीकाकारोऽन्तेऽपि मङ्गलमाचरति **सकलसुगुणेत्यादि** । एते च आनन्दमयाधिकरणोपक्रम एव श्लोका व्याख्याताः । **सुधायाः शेषपञ्चिकामिति** । शेषा चासौ पञ्चिका च शेषपञ्चिका । स्वामिकृतपञ्चिकाशेषभूतां पञ्चिकामित्यर्थः । विभाषेति महाविभाषाया समासाभावः । पञ्चिका-स्वरूपं दर्शयति **व्यक्तमिति** । व्यक्तं त्यक्त्वा यदव्यक्तं तदेवेह पञ्चिकायामुदितमिति योज्यम् । कथमुदित इत्यत उक्तं **मूलग्रन्थान् समालोच्य तच्छास्त्रानुसारत इति** । अतिविस्तृतत्वे शिष्याणां बुद्ध्यारोहायोगप्रसङ्गेऽपि इह तथात्वाभावान्न तत्प्रसङ्ग इति भावेनोक्तं **न चोद्ग्रन्थमिति** । उद्ग्रन्थो यथा स्यात् तथा न बहूदितमिति विशेषणत्वेन योज्यम् । आकर्षमिति लुङ्परस्मैपदोत्तमैकवचनम् । स्वकीयग्रन्थकरणवृत्तिः केवलगुरुसेवात्व-बुद्ध्यैवेति नाहङ्कारलेशस्यापि सम्भावनेति दर्शयति **यद्विद्याधीशेति** । तत्त्वनिर्णयटीकाकृता स्वकृतग्रन्थफलस्य गुरावर्पणं कृतमिति सम्प्रदायशिक्षणायैव स्वकृतग्रन्थफलं गुरावर्पयति **मयेति** ॥ **विषमपदवाक्यार्थेति** । विषमो मार्गः विषम उपन्यास इत्यादाविव विषमत्वं दुर्गमादिकमवधेयमित्यशेषमतिमङ्गलम् ।

सद्बोधोरुसुखोन्नतिद्युतिवरौदार्याग्र्यवीर्यातुल-
स्वातन्त्र्यादिगुणार्णवं जनिमृतिभ्रान्त्यादिदोषातिगम् ।
वैराग्योन्नतभक्तिसंश्रुतमतिध्यानैश्च साक्षात्कृतं
सद्भिः प्राप्यमजेशपूर्वसुरपं लक्ष्मीनृसिंहं भजे ॥ १ ॥

श्रीमध्वं जयराजमुत्तममतिं श्रीव्यासतीर्थं गुरुं
विद्याधीशयतीश्वरं गुरुमपि प्रोद्यन्मनीषाश्रयम् ।
अन्यांश्च प्रणमामि विस्तृतमतीनानन्दतीर्थीयस-
च्छास्त्रव्याकृतितत्परानन्नुदिनं ज्ञानादिवीर्याय मे ॥ २ ॥

विद्याख्यरत्नप्रभवाय बुद्धौ विद्योतमानाय सुबृंहिताय ।
शुद्धाय नित्यं मुनिसेविताय मध्वाद्भुताम्भोनिधये नमोऽस्तु ॥ ३ ॥

श्रीमद्व्याससुशास्त्रशुद्धजलधिं मध्वोक्तसत्तर्कदु-
स्तर्काख्यामरदानवाश्रितमतिश्रेष्ठं हि हृद्भूभृता ।
आलोड्याखिलतत्त्वभासकमहारत्नानि चाप्नोत् सुधां
सोऽयं योगिमहेन्द्रसन्निभजयार्याख्यो भवेन्मे मुदे ॥ ४ ॥

श्रीमद्व्यासमतापगापतिवरं श्रीमज्जयप्रोक्तस-
त्सर्पविष्टितमध्वसन्मुनिवरग्रन्थागवर्येण यः ।
संलोड्याखिलसन्नयामृतवरं तत्त्वादिसद्दीपिका-
सत्तात्पर्यसुचन्द्रिकातरुवरं यस्तर्कसत्ताण्डवम् ॥ ५ ॥

निष्कास्याद्भुतखण्डनत्रयमुखव्याख्यानरत्नोच्चयं
दृष्ट्वा कुत्सितयुक्त्यरातिपिहितं श्रीव्यासतीर्थो बुधः ।
स्वोक्तिं रक्षितुमत्र यः प्रतिपदं सम्यग्विशेषार्पको
विद्याधीशयतीन्द्रसद्गुरुवरः किं नावतीर्णः स हि ॥ ६ ॥

यद्धस्ताम्बुजसङ्गतोऽहमभवं देव्याः कटाक्षाश्रयो
यद्व्याख्यानदिवाकरेण विदुषामन्तस्तमः संहृतम् ।
ये प्रीता भुवि चन्दनद्रुम इव स्वीयं स्ववत्कुर्वते
तान् भक्त्यादियुजो भजे परगुरूनानन्दभट्टारकान् ॥ ७ ॥

यः श्रीनिवासमृगराट् सकलान्मदान्धमायाविसिन्धुरसुकुम्भगिरीन्विदार्य ।
सत्तर्कतीक्ष्णनखरैर्विरराज मध्वसिद्धान्तचारुविपिने तमलं भजेऽहम् ॥ ८ ॥

श्रीमत्सुधाद्भुताम्भोधिविक्रीडनविचक्षणान् ।
श्रीमद्विद्याधीशमुनीन् वन्दे विद्यागुरून् मम ॥ ९ ॥

अथ तत्कृपयैवाहं तत्सुशिक्षितमार्गतः ।
तेषामाज्ञां पुरोधाय तत्प्रसादात्तवैभवः ॥ १० ॥

शिक्षितान् युक्तिनिचयान् स्मारं स्मारं यथामति ।
अकार्षं भावगूढायाः सुधायाः शेषपञ्चिकाम् ॥ ११ ॥

व्यक्तं त्यक्त्वा यदव्यक्तं तत्तच्छास्त्रानुसारतः ।
मूलग्रन्थान् समालोच्य न चोद्ग्रन्थं बहूदितम् ॥ १२ ॥

यद्विद्याधीशगुरोः शुश्रूषाऽन्या न रोचते तस्मात् ।
अस्त्वेषा भक्तियुक्ता श्रीविद्याधीशपादयोः सेवा ॥ १३ ॥

मया विरचिता शेषसुधावाक्यार्थचन्द्रिका ।
अनया भावि यत्पुण्यं तदाप्नोतु गुरुर्मम ॥ १४ ॥

*इति श्रीमत्पदवाक्यप्रमाणविदामग्रेसराणां श्रीमत्सकलविद्वच्चक्रचूडामणीनां श्रीमद्विद्याधीशतीर्थपूज्यपादानां निजशिष्यस्य केशवस्य कृतौ श्रीमद्गुरुराजोपदिष्टमार्गानुवर्तिन्यां श्रीमन्न्यायसुधाविषमपदवाक्यार्थविवृतौ शेषवाक्यार्थचन्द्रिकायां चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४-४ ॥*

**वा०र०**— एवं समापितैतद्ग्रन्थव्याख्यानष्टीकाकारोऽन्तेऽपि मङ्गलमाचरति **सकलसुगुणेत्यादि** । एते च आनन्दमयाधिकरणोपक्रम एव श्लोका व्याख्याताः । **सुधायाः शेषपञ्चिकामिति** । शेषा चासौ पञ्चिका च शेषपञ्चिका । स्वामिकृतपञ्चिकाशेषभूतां पञ्चिकामित्यर्थः । विभाषेति महाविभाषाया समासाभावः । पञ्चिका-स्वरूपं दर्शयति **व्यक्तमिति** । व्यक्तं त्यक्त्वा यदव्यक्तं तदेवेह पञ्चिकायामुदितमिति योज्यम् । कथमुदित इत्यत उक्तं **मूलग्रन्थान् समालोच्य तच्छास्त्रानुसारत इति** । अतिविस्तृतत्वे शिष्याणां बुद्ध्यारोहायोगप्रसङ्गेऽपि इह तथात्वाभावान्न तत्प्रसङ्ग इति भावेनोक्तं **न चोद्ग्रन्थमिति** । उद्ग्रन्थो यथा स्यात् तथा न बहूदितमिति विशेषणत्वेन योज्यम् । आकर्षमिति लुङ्परस्मैपदोत्तमैकवचनम् । स्वकीयग्रन्थकरणवृत्तिः केवलगुरुसेवात्व-बुद्ध्यैवेति नाहङ्कारलेशस्यापि सम्भावनेति दर्शयति **यद्विद्याधीशेति** । तत्त्वनिर्णयटीकाकृता स्वकृतग्रन्थफलस्य गुरावर्पणं कृतमिति सम्प्रदायशिक्षणायैव स्वकृतग्रन्थफलं गुरावर्पयति **मयेति** ॥ **विषमपदवाक्यार्थेति** । विषमो मार्गः विषम उपन्यास इत्यादाविव विषमत्वं दुर्गमादिकमवधेयमित्यशेषमतिमङ्गलम् ।

सद्बोधोरुसुखोन्नतिद्युतिवरौदार्याग्र्यवीर्यातुल-
स्वातन्त्र्यादिगुणार्णवं जनिमृतिभ्रान्त्यादिदोषातिगम् ।
वैराग्योन्नतभक्तिसंश्रुतमतिध्यानैश्च साक्षात्कृतं
सद्भिः प्राप्यमजेशपूर्वसुरपं लक्ष्मीनृसिंहं भजे ॥ १ ॥

श्रीमध्वं जयराजमुत्तममतिं श्रीव्यासतीर्थं गुरुं
विद्याधीशयतीश्वरं गुरुमपि प्रोद्यन्मनीषाश्रयम् ।
अन्यांश्च प्रणमामि विस्तृतमतीनानन्दतीर्थीयस-
च्छास्त्रव्याकृतितत्पराननुदिनं ज्ञानादिवीर्याय मे ॥ २ ॥

आनन्दाब्धिप्रजातत्रिदशतरुगुरुश्रीनिवासानुजश्री-
विद्याधीशाख्यरत्नाद्भुतविदमृतगोः केशवाचार्यवर्यात् ।
रुग्मिण्यायां प्रजातस्य विबुधनरसिंहस्य गुर्वीयसौध-
व्याख्यापाठादिशोधात्मकविवृत्तिकृतावन्त्यपादश्चतुर्थे ॥ ३ ॥

श्रीमन्न्यायसुधागूढशेषवाक्यार्थचन्द्रिका ।
गुरुराजकृताऽध्याये तुरीये सेविता मया ॥ ४ ॥

*इति श्रीमत्सकलविद्वद्बृन्दशिखामणिश्रीपाण्डुरङ्गिकेशवाचार्यवर्यनामकश्रीगुरुराजवर्यविरचित श्रीमन्न्यायसुधाविषमपदवाक्यव्याख्यानरूपशेषवाक्यार्थचन्द्रिकायाः व्याख्यापाठादिशोधात्मकविवृतौ वाक्यार्थरत्नमालाभिधायां गुरुराजपुत्रपाण्डुरङ्गिनरसिंहसूरिविरचितायां चतुर्थाध्यायस्य चतुर्थः पादः ॥*

**॥ इति न्यायसुधायां अन्तिममङ्गलपद्यानि ॥**

**॥ इति चतुर्थाध्यायस्य चतुर्थपादः ॥**

***॥ समाप्तोऽयं ग्रन्थः ॥***

**॥ श्रीकृष्णार्पणमस्तु ॥**

★ ★ ★

*अनेन कर्मणा एतद्ग्रन्थप्रतिपाद्यः*
*समस्तगुर्वन्तर्गतभारतीरमणमुख्यप्राणान्तर्गतसीतापतिश्रीमन्मूलरामचन्द्रः प्रीयताम् ।*
*प्रीतो भवतु ।*
*श्रीकृष्णार्पणमस्तु ॥*

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्याऽत्मना वाऽनुसृतः स्वभावम् ।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ॥

॥ श्रीकृष्णार्पणमस्तु ॥

★ ★ ★

# परिशिष्टानि


पुटसंख्या

१) श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

**ब्रह्मसूत्रानुव्याख्यानम्** १०९९४ - ११०२७

२) श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य प्रप्रथमटीका

श्रीपद्मनाभतीर्थविरचिता

**सन्न्यायरत्नावली** ११०२८ - ११०४५

३) श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीका

श्रीत्रैविक्रमार्यकृता

**नयचन्द्रिका** ११०४६ - ११०५९

४) श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीका

श्रीशङ्करपण्डिताचार्यविरचिता

**अनुव्याख्यानसम्बन्धदीपिका** ११०६० - ११०६८

॥ श्रीः ॥

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

# अथ चतुर्थाध्यायः

## अथ चतुर्थाध्यायस्य प्रथमः पादः

एतदध्यायप्रतिपाद्यनिरूपणम्, प्रथमं कैश्चित् सूत्रैः साधनस्यैव चिन्ता

समन्वयाविरोधाभ्यां सिद्धे वस्तुनि साधने ।
विचारितेष्वशेषेषु साधनेषु विशेषतः ॥ १६८४ ॥

नित्यशः कार्यमत्यन्तमवश्यम्भावि साधनम् ।
चिन्त्यते प्रथमं तत्र

### ॥ आवृत्त्यधिकरणम् ॥

**ॐ आवृत्तिरसकृदुपदेशात् ॐ ॥ ४-१-१ ॥**

**ॐ लिङ्गाच्च ॐ ॥ ४-१-२ ॥**

श्रवणादेरावृत्तेरावश्यकत्वनिरूपणम्

श्रवणादिसकृत्क्रिया ॥ १६८५ ॥

आवृत्तिर्वेति सन्देहे कर्तव्यावृत्तिरेव हि ।
उपदेशोऽतत्त्वमसीत्यादि ह्यसकृदेव यत् ॥ १६८६ ॥

"लिङ्गाल्लातव्यतः पूर्वमृजोर्ब्रह्मत्वतः शतात् ।
शुश्रावोग्रतपा नाम योग्यो रुद्रपदस्य यः ॥ १६८७ ॥

सार्धं परार्धं विष्णोस्तु गुणान् भक्त्या सदोद्यतः ।
तत्त्रिभागमुपासां च चक्रे सम्भृतमानसः ॥ १६८८ ॥"

दशमन्वन्तरं शक्रपदयोग्यो गरुत्मतः ।
पदयोग्यात्सुमनसः सुनन्दो नाम चाशृणोत् ॥ १६८९ ॥

उपासां चक्र उद्युक्तो मन्वन्तरचतुष्टयम् ।
सूर्याचन्द्रमसोश्चैव पदयोग्यौ सुतेजसौ ॥ १६९० ॥

सुरूपः शान्तरूपश्च मन्वन्तरचतुष्टयम् ।
अशृण्वतां सुमनसो मन्वन्तरमुपासताम् ॥ १६९१ ॥

ततः प्रोक्तास्तु ते सर्वे भक्त्योग्रतपआदयः ।
अपश्यन् परमं विष्णुं तत्प्रसादैधिताः सदा" ॥ १६९२ ॥

इत्युक्तं विष्णुना साक्षात् ग्रन्थे सत्तत्त्वसंज्ञिते ।

*॥ इति आवृत्त्यधिकरणम् ॥ १ ॥*

## ॥ आत्माधिकरणम् ॥

### ॐ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॐ ॥ ४-१-३ ॥

'आत्मा' इति मुख्यया वृत्त्या नारायणस्य नाम,
विष्णुः आत्मा स्वामी इति सर्वथा उपास्यः

आत्मेति नाम कथितं साक्षान्नारायणस्य हि ॥ १६९३ ॥

'आत्मा ब्रह्म महांस्तारः परमेशः शुचिश्रवाः ।
विष्णुर्नारायणोऽनन्त इति श्रीपतिरीर्यते' ॥ १६९४ ॥

इति पैङ्गिश्रुतिश्चैव तथैव परमश्रुतिः ।
'ओमात्मा भगवान्विष्णुरात्मानन्दोऽक्षरः स्वराट् ॥ १६९५ ॥

विश्वत्राता नृसिंहोऽजो नारायण उरुक्रमः ।
अनसूया तथैवात्रेर्जज्ञे पुत्रानकल्मषान् ॥ १६९६ ॥

दत्तं दूर्वाससं सोममात्मेशब्रह्मसम्भवान् ।'
इति भागवते चैव तस्मादात्मा जनार्दनः ॥ १६९७ ॥

तस्मादुपास्यो विष्णुरिति ज्ञातव्यः सज्जनैः सदा ।
तथैवोपासते सन्तस्तथैवोपदिशन्ति च ॥ १६९८ ॥

आदानार्थत्वतश्चायमात्मशब्दः पतिं वदेत् ।
स्वामी मे विष्णुरित्येव नित्यदोपास्यमञ्जसा ॥ १६९९ ॥

'स्वामी विष्णुरिति ध्यानं विशेषणविशेष्यतः ।
कर्तव्यं सर्वथैवैतन्न कथञ्चन विस्मरेत्' ॥ १७०० ॥

इति सत्तत्त्ववचनं षाड्गुण्यवचनं परम् ।
'मम स्वामी हरिर्नित्यं सर्वस्य पतिरेव च' ॥ १७०१ ॥

इति ध्येयः सर्वदैव भगवान् विष्णुरव्ययः ।

*॥ इति आत्माधिकरणम् ॥ २ ॥*

* * *

## ॥ न प्रतीकाधिकरणम् ॥

### ॐ न प्रतीके न हि सः ॐ ॥ ४-१-४ ॥

प्रतीकसंस्थितत्वेन विष्णुः ध्येयः न तु प्रतीकमेव विष्णुरिति

'प्रतीकविषयत्वेन न कार्या विष्णुभावना ॥ १७०२ ॥

प्रतीकं नैव विष्णुर्यन्मिथ्योपासा ह्यनर्थदा ।
योऽन्यथा सन्तमात्मेशमन्यथा प्रतिपद्यते ॥ १७०३ ॥

किं तेन न कृतं पापं चोरेणात्मापहारिणा ।'
''योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ॥ १७०४ ॥

किं तेन न कृतं पापं चोरेणात्मापहारिणा'' ।
''योऽन्यथैव स्थितं विष्णुमन्यथा प्रतिपद्यते ॥ १७०५ ॥

किं तेन न कृतं पापं चोरेण ब्रह्महारिणा'' ।
'स्वात्मानं प्रतिमां वापि देवतान्तरमेव वा ॥ १७०६ ॥

चेतनाचेतनं वाऽन्यत् ध्यायेद्यः केशवस्त्विति ।
किं तेन न कृतं पापं चोरेणेशापहारिणा' ॥ १७०७ ॥

'योऽन्यद्विष्णुरिति ध्यायेज्जानीयाद्वा हरिं तथा ।
अन्धे तमसि मज्जेत् स यत्र नैवोत्थितिः क्वचित्' ॥ १७०८ ॥

'योऽन्यद्विष्णुरिति ध्यायेद्विष्णुरन्यदिति स्म वा ।
अन्यथाध्यानदोषेण सोऽन्धे तमसि मज्जति' ॥ १७०९ ॥

'योऽन्यद्विष्णुरिति ध्यायेद्विष्णुरन्यदिति स्म वा ।
महातमसि मग्नस्य तस्य नैवोत्थितिः क्वचित्' ॥ १७१० ॥

'यत्किञ्चिदन्यथासंस्थमन्यथाध्यातमञ्जसा ।
ध्यातुर्महादोषकरं किमु सर्वेश्वरो हरिः' ॥ १७११ ॥

'यत्किञ्चिदन्यथासंस्थमन्यथाध्यातमञ्जसा ।
महादोषकरं विष्णुः किमु सर्वेश्वरेश्वरः' ॥ १७१२ ॥

'यत्किञ्चिदन्यथासंस्थमन्यथाध्यातमञ्जसा ।
अनर्थकारणं लोके किमु सर्वेश्वरेश्वरः ॥ १७१३ ॥

न किञ्चिदन्यथा ज्ञेयं ध्येयं वा तेन कुत्रचित् ।
किमु सर्वोत्तमो विष्णुर्ज्ञेयो नीचतया क्वचित् ॥ १७१४ ॥

तस्माद्वस्तु यथारूपं ज्ञेयं ध्येयं च सर्वदा ।
कारणं पुरुषार्थस्य नान्यथा भवति क्वचित्' ॥ १७१५ ॥

इति श्रुतिपुराणोक्तिबलतो न प्रतीकता ।
ध्येया विष्णोः क्वचिद्यस्मान्मिथ्याज्ञानमनर्थदम् ॥ १७१६ ॥

इत्यभिप्रेत्य 'न हि स' इत्याह भगवान् प्रभुः ।
प्रतीकसंस्थितत्वेन ध्येयो विष्णुर्न चान्यथा ॥ १७१७ ॥

*॥ इति नप्रतीकाधिकरणम् ॥ ३ ॥*

* * *

# ॥ ब्रह्माधिकरणम् ॥

## ॐ ब्रह्मदृष्टिरुत्कर्षात् ॐ ॥ ४-१-५ ॥

विष्णुः ब्रह्मेति ध्येयः, ब्रह्मशब्दप्रवृत्तिनिमित्तं पूर्णत्वम्—उत्कर्षः

ब्रह्मेति च सदा ध्येयो भगवान् विष्णुरञ्जसा ।
उत्कृष्टो ब्रह्मशब्दार्थः पूर्णत्वं ब्रह्मता यतः ॥ १७१८ ॥

आधिव्याधिनिमित्तेन विक्षिप्तमनसोऽपि तु ।
ध्येयैव ब्रह्मता नित्यं विष्णोर्भक्त्या निरन्तरम् ॥ १७१९ ॥

इति प्रकाशिकायां च वचनं विष्णुनेरितम् ।

'आत्मेति तु' इति सूत्रे ईशस्य जीवत्वं प्रतिपाद्यत इत्यपव्याख्याननिरसनम्

नात्मेति सूत्रमीशस्य जीवत्वप्रतिपादकम् ॥ १७२० ॥

आत्मशब्दं यतो हेतुं कृत्वा जीवं न्यवारयत् ।
स्वशब्दात् प्राणभृच्चैव नोक्त इत्येव वेदराट् ॥ १७२१ ॥

यद्यात्मशब्दो जीवेऽपि कथं स विनिवारयेत् ।
आत्मशब्दोदितस्तस्माद्विष्णुरेव न चापरः ॥ १७२२ ॥

'आत्मब्रह्मादयः शब्दास्तमृते विष्णुमव्ययम् ।
न वदन्ति यतो नान्यं क्वापि तैर्गुणपूर्णता' ॥ १७२३ ॥

नारायणाध्यात्मगतमिति यद्वैष्णवं वचः ।
यदि जीवेशयोर्वेदपतिरैक्यं च मन्यते ॥ १७२४ ॥

आत्मशब्दं कथं तस्मान्निवारयति युक्तितः ।
भेदस्य व्यपदेशं च स्थितिं चादनमेव च ॥ १७२५ ॥

भेददार्ढ्ये हेतुमाह तात्पर्यं स जगत्पतिः ।
व्यावहारिकभेदश्चेत् क्वासावव्यावहारिकः ॥ १७२६ ॥

व्यावहारिकमित्येव वचनं व्यावहारिकम् ।
उत नेति विकल्पे तु यदि स्याद्व्यावहारिकम् ॥ १७२७ ॥

तस्यापि बाध्यता चेत् स्यात् भेदः स्यात् पारमार्थिकः ।
अव्यावहारिकत्वं चेद्भेदोऽयं सत्यतां गतः ॥ १७२८ ॥

एकस्यासत्यतायां हि द्वयोरेव विरुद्धयोः ।
अन्यस्य सत्यतैव स्यादिति केन निवार्यते ॥ १७२९ ॥

असत्यं नोक्तमित्युक्ते सत्यमुक्तमिति प्रजाः ।
जानन्त्युक्तं तु नो सत्यमित्युक्तेऽसत्यतामपि ॥ १७३० ॥

न स्वप्नेऽपि द्वयं मिथ्या तत्रैकं सत्यमेव हि ।
भावाभावावुभौ तत्र कथं मिथ्या भविष्यतः ॥ १७३१ ॥

भावस्य हि निषेधे तु नाभावस्य निषेधनम् ।
स्ववाचोऽसत्यता चेत्स्यात् तस्माद्भेदस्य सत्यता ॥ १७३२ ॥

तस्माज्जीवेशयोर्भेद उक्तन्यायेन गम्यते ।

'न प्रतीके' इत्यादिसूत्रस्य 'प्रतीकेषु जीवमतिं न बध्नीयात्' इति अपव्याख्याननिरसनम्

एतस्मादात्मशब्दोऽयं परमात्माभिधा भवेत् ॥ १७३३ ॥

प्रतीकविषयत्वेन विष्णुदृष्टिर्न तद्भवेत् ।
प्रतीके विष्णुरित्येव तस्मात्कार्या ह्युपासना ॥ १७३४ ॥

न च विष्णुः प्रतीकं यत्तस्मात्

'ब्रह्मदृष्टिः' इत्यादिसूत्रस्य 'प्रतीके ब्रह्मदृष्टिः कार्या' इत्यपव्याख्याननिरसनम्

नात्मेत्युपासना ।
इति पक्षो यदा ब्रह्मदृष्टिश्चात्र विरुध्यते ॥ १७३५ ॥

स नेति युक्तिस्तत्रापि समेत्युक्तविरुद्धता ।
यद्यप्युत्कर्षमात्रेण ह्यतद्भावेऽप्युपासना ॥ १७३६ ॥

उत्कर्ष आत्मनोऽपि स्याच्चेतनत्वादचेतनात् ।
तस्मादतत्त्वं नोपास्यमिति वेदविदां मतम् ॥ १७३७ ॥

उत्कर्षाद्ब्रह्मताध्याने यदि स्यात् फलमञ्जसा ।
ब्रह्मणो नीचताज्ञानादनर्थः किं न जायते ॥ १७३८ ॥

अचेतनस्य ब्रह्मत्वध्याने तुष्टिर्न हि क्वचित् ।
नीचस्य स्वात्मताज्ञानात् कुप्यति ब्रह्म लोकवत् ॥ १७३९ ॥

चण्डालो नृप इत्युक्ते नृपश्चण्डाल इत्यपि ।
को विशेषः परिज्ञाते नृपेण स्यात्कथञ्चन ॥ १७४० ॥

पुरतो नरदेवस्य चण्डालो यदि पूज्यते ।
राजवत् किं न कोपः स्याद्राज्ञो लोकेऽभिपश्यति ॥ १७४१ ॥

राज्ञस्तु पुरतः प्रोक्ते चण्डाले नृप इत्यपि ।
आत्मानं स इति प्रोक्तमितिवद्ध्येव कुप्यति ॥ १७४२ ॥

अभेदेनैतयोर्ध्याने को विशेषो वचस्यपि ।
अयं राजा त्वमित्युक्ते चण्डालेऽथ नृपेऽपि च ॥ १७४३ ॥

चण्डाल इति तु प्रोक्ते सममेव हि दूषणम् ।
ध्यातेऽप्येकस्य तद्भावे तद्भावोऽन्यस्य किं न तत् ॥ १७४४ ॥

न चैव तदविज्ञातं सर्वज्ञब्रह्मणा क्वचित् ।
तस्मादपेशलं सर्वमन्यस्य ब्रह्मतावचः ॥१७४५ ॥

तस्माद्यथोक्तमार्गेण ब्रह्मोपास्यं मुमुक्षुभिः ।

*॥ इति ब्रह्माधिकरणम् ॥ ४ ॥*

* * *

## ॥ आदित्याधिकरणम् ॥

**ॐ आदित्यादिमतयश्चाङ्ग उपपत्तेः ॐ ॥ ४-१-६ ॥**

*॥ इति आदित्याधिकरणम् ॥ ५ ॥*

* * *

## ॥ आसीनाधिकरणम् ॥

ॐ आसीनः सम्भवात् ॐ ॥ ४-१-७ ॥

ॐ ध्यानाच्च ॐ ॥ ४-१-८ ॥

ॐ अचलत्वं चापेक्ष्य ॐ ॥ ४-१-९ ॥

ॐ स्मरन्ति च ॐ ॥ ४-१-१० ॥

ॐ यत्रैकाग्रता तत्राविशेषात् ॐ ॥ ४-१-११ ॥

*॥ इति आसीनाधिकरणम् ॥ ६ ॥*

## ॥ आप्रायणाधिकरणम् ॥

ॐ आ प्रायणात्तत्रापि हि दृष्टम् ॐ ॥ ४-१-१२ ॥

*॥ इति आप्रायणाधिकरणम् ॥ ७ ॥*

* * *

## ॥ तदधिगमाधिकरणम् ॥

ॐ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॐ ॥ ४-१-१३ ॥

कर्मनाशाख्यज्ञानफलनिरूपणम्

तथोपास्याञ्जसा दृष्टं ब्रह्म पापं च भस्मसात् ॥ १७४६ ॥

करोति निखिलं पूर्वं पाश्चात्यस्याप्यसङ्गताम् ।

करोति

ॐ इतरस्याप्येवमसंश्लेषः पाते तु ॐ ॥ ४-१-१४ ॥

तद्विषश्चैवं पुण्यनाशोऽप्यसङ्गता ॥ १७४७ ॥

ॐ अनारब्धकार्ये एव तु पूर्वे तदवधेः ॐ ॥ ४-१-१५ ॥

**ॐ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॐ ॥ ४-१-१६ ॥**

**ॐ अतोऽन्यदपीत्येकेषामुभयोः ॐ ॥ ४-१-१७ ॥**

**ॐ यदेव विद्ययेति हि ॐ ॥ ४-१-१८ ॥**

'यदेव विद्यया' इति सूत्रस्य 'तच्छ्रुतेः' इति सूत्रेण पुनरुक्तिपरिहारः

यदेव विद्ययेत्यत्र पूर्वोक्ताद्धि विशिष्यते ।
पूर्वं स्वर्गादिलब्ध्यर्थं वीर्यवत्त्वेन चोदितम् ॥ १७४८ ॥
कर्म विद्यायुतं पश्चान्मोक्षे वीर्यप्रदं त्विति ।

**ॐ भोगेन त्वितरे क्षपयित्वाथ सम्पत्स्यते ॐ ॥ ४-१-१९ ॥**

प्रारब्धकर्मानन्तरमेव ब्रह्मद्विट्ब्रह्मदर्शिनोः तमोमोक्षौ

ततो भोगेन पुण्यं च क्षपयित्वेतरत्तथा ॥ १७४९ ॥
ब्रह्मद्विट् ब्रह्मदर्शी च तमोमोक्षाववाप्नुतः ।

प्रारब्धकर्मणामानन्त्येन भोगेन तन्नाशोऽशक्य इति शङ्कापरिहारः

"ब्रह्मणां शतकालात् तु पूर्वमारब्धसङ्क्षयः ॥ १७५० ॥
ब्रह्मणस्त्वेव तावत्त्वं पञ्चाशद्ब्रह्मणस्तथा ।
रुद्रस्य विंशदेव स्यादिन्द्रस्यार्कादिके दश ॥ १७५१ ॥
अन्येषां ब्रह्ममात्रस्य त्वन्त आरब्धसङ्क्षयः ।
ब्रह्मणैव सहातश्च परं नारायणं व्रजेत्" ॥ १७५२ ॥
इति सत्तत्त्ववचनं स्वयं भगवतोदितम् ।

*॥ इति तदधिगमाधिकरणम् ॥ ८ ॥*

*इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते ब्रह्मसूत्रानुव्याख्याने चतुर्थाध्यायस्य प्रथमः पादः ॥*

* * *

॥ श्रीः ॥

# अथ चतुर्थाध्यायस्य द्वितीयः पादः

प्रथमपादोक्तं कर्मनाशाख्यं फलं देवमनुष्यसाधारणम्, द्वितीयपादप्रतिपाद्या देहादुत्क्रान्तिः, तृतीयपादप्रतिपाद्यार्चिरादिमार्गश्च देवानां प्रायेण न भविष्यतः

देवानां च मनुष्याणामेतावत्सममेव हि ॥ १७५३ ॥
उत्क्रान्तिमार्गौ देवानां न प्रायेण भविष्यतः ।

पादचतुष्टयविषयनिरूपणम्

कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोगश्चतुष्टयम् ॥ १७५४ ॥
फलं मोक्ष इति प्रोक्तं क्रमात् पादेषु चोदितम् ।

देवानां मार्गस्य उत्क्रान्तेश्च स्वरूपनिरूपणम्

स्रष्टृष्वेव च सृज्यानां प्रवेशो ब्रह्मणो लये ॥ १७५५ ॥
देवानां मार्ग उद्दिष्टो नार्चिरादिर्न चोत्क्रमः ।
स्रष्टुस्तु ग्रासभूतस्य देहस्तत्र लयं व्रजेत् ॥ १७५६ ॥
यतः सृज्यस्य देवस्य नैवोत्क्रान्तिस्ततो भवेत् ।
लयाच्चैवार्चिरादीनां लोकानामपि सर्वशः ॥ १७५७ ॥
कथं मार्गो भवेत् तेषां विशतामुत्तरं स्वतः ।
जातानां मानुषे लोके देवानां तु कदाचन ॥ १७५८ ॥
उत्क्रान्तिमार्गौ भवतो न तदा मुक्तिरिष्यते ।
अन्येषामपि साक्षात्तु मुक्तिः प्राप्यापि तं हरिम् ॥ १७५९ ॥
सहैव ब्रह्मणा भूयादिति शास्त्रस्य निर्णयः ।

उक्तार्थे श्रुतिपुराणोक्तयः

'क्ष्माम्भोऽनलानिलवियन्मनइन्द्रियार्थ-
भूतादिभिः परिवृतः प्रतिसञ्जिघृक्षुः ।

अव्याकृतं विशति यर्हि गुणत्रयात्मा
कालं परं स्वमनुभूय परः स्वयम्भूः ॥ १७६० ॥

एवं परेत्य भगवन्तमनुप्रविष्टाः
ये योगिनो जितमरुन्मनसो विरागाः ।
तेनैव साकममृतं पुरुषं पुराणं
ब्रह्म प्रधानमुपयान्त्यगताभिमानाः ॥ १७६१ ॥

'भगवन्तमनुप्राप्ता अपि तु ब्रह्मणा सह ।
परमं मोक्षमायान्ति लिङ्गभङ्गेन योगिनः' ॥ १७६२ ॥

'प्राप्ता अपि परं देवं सहैव ब्रह्मणा पुनः ।
आनन्दव्यक्तिमायान्ति पूर्णा लिङ्गस्य भङ्गतः' ॥ १७६३ ॥

इति श्रुतिपुराणोक्तिबलाद्विज्ञायते च तत् ।

चतुर्थपादोक्तः भोगः देवनरादिसाधारणः

भोगस्तु सर्वदेवानां नरादीनां च विद्यते ॥ १७६४ ॥

द्वितीयपादे देवानामुत्तरोत्तरेषु प्रवेशो प्रथमं निरूप्यते

तत्र प्रवेशो देवानामुत्तरोत्तरतः क्रमात् ।
उच्यते देहगानां च वृत्तीनामेवमेव तु ॥ १७६५ ॥

तत्तद्वादिभिः स्वोत्प्रेक्षामात्रेण निरूपितं मोक्षस्वरूपं न प्रामाणिकम्

तत्र मोक्षस्वरूपं तु वादिनः प्रतिभाश्रयात् ।
नाना वदन्ति

वादिनां मतिभेदे गुणभेदः कारणम्

पुंसां हि मतयो गुणभेदतः ॥ १७६६ ॥

पृथक् पृथक् प्रजायन्ते तमसैवान्यथामतिः ।
रजसा मिश्रबुद्धित्वं सत्त्वेनैव यथामतिः ॥ १७६७ ॥

मुक्तमतिस्वरूपम्

गुणातीता विमुक्तानां मतिः शुद्धचितिर्यतः ।
सम्यगेवाथ नित्या च तत्तन्माहात्म्ययोगतः ॥ १७६८ ॥

श्रियः मतेः स्वरूपम्

बहुला चातिविशदा स्पष्टा चैव श्रियो मतिः ।
महाशुद्धचितित्वेन ततोऽप्यतिमहाचितिः ॥ १७६९ ॥

नारायणस्य मतेः स्वरूपम्

अशेषोरुविशेषाणामतिस्पष्टतया दृशिः ।
नित्यमेकप्रकारा च नारायणमतिः परा ॥ १७७० ॥

सूर्यप्रभावदखिलं भासयन्ती निरन्तरा ।
निर्लेपा वीतदोषा च नित्यमेवाविकारिणी ॥ १७७१ ॥

भगवद्गताशेषविशेषविषयीकारित्वं विहाय अन्यधर्मवत् लक्ष्मीज्ञानम्

विशेषांस्तद्गतांस्त्यक्त्वा प्रायस्तल्लक्षणा श्रियः ।
तथैव स्पष्टताभावात् तत्तन्त्रत्वात्तु केवलम् ॥ १७७२ ॥

न तादृशी

लक्ष्मीमतिविशेषणानां मुक्तब्रह्ममतौ अतिदेशः

ब्रह्मणस्तु प्रायेणैवं श्रियो यथा ।

तदन्येषां मुक्तानां मतिः वृद्धिह्रासवती

मुक्तानां तु तदन्येषां समुद्रतरलोपमा ॥ १७७३ ॥

अग्निज्वालावदेव स्यात् सृतिगानां दृशो भवः ।

गुणभेदनिमित्तं वादिनां मतिभेदनिरूपणोपसंहारः

एवंविधेषु ज्ञानेषु तमसा मुष्टदृष्टयः ॥ १७७४ ॥

खद्योतसदृशात्यल्पज्ञानत्वादन्यथादृशः ।
वदन्ति वादिनो मोक्षं नानामतसमाश्रयात् ॥ १७७५ ॥

जिनोदितमोक्षस्वरूपनिरूपणम्

आश्रित्य प्रतिभामाह जिनस्तत्रातितामसीम् ।
ज्ञानात् कर्मक्षयान्मोक्षो भवेद्देहाख्यपञ्जरात् ॥ १७७६ ॥

पञ्जरोन्मुक्तखगवदलोकाकाशगोचरः ।
नित्यमूर्ध्वं व्रजत्येव पुद्गलो हस्तपादवान् ॥ १७७७ ॥
इति

जिनोदितमोक्षस्वरूपनिरासः

तत्केन मानेन मोक्षरूपं प्रदर्श्यते ।
गतिरूर्ध्वा च दुःखेता गतित्वाल्लौकिकी यथा ॥ १७७८ ॥
इत्युक्ते चानुमानैकशरणस्य किमुत्तरम् ।
अनूर्ध्वगतिता तत्र यद्युपाधिः खगस्य च ॥ १७७९ ॥
दूरोर्ध्वगमने दुःखमिति साध्यानुगो न सः ।
प्रतिसाधनरूपस्य नानुमानस्य दूषणम् ॥ १७८० ॥
उपाधिः प्रतिरूपं हि साधनं तन्न चापरम् ।
अथापि सशरीरत्वं चात्रोपाधिर्न वै भवेत् ॥ १७८१ ॥
गतित्वं यत्र देहित्वमिति यत्साधनानुगम् ।
आगमाननुसारित्वे प्रसङ्गोऽयं यतस्ततः ॥ १७८२ ॥
नापसिद्धान्तता दोषः प्रसङ्गे यदि सा भवेत् ।
तदैवातिप्रसङ्गः स्यान्न प्रसङ्गः क्वचिद्भवेत् ॥ १७८३ ॥
लोकाकाशगतित्वं चेदुपाधिः साधनानुगः ।
सोऽपीत्युक्ते वदेत् किं स तस्माद्वेदोदितो भवेत् ॥ १७८४ ॥

बौद्धोक्तमोक्षस्वरूपनिरासः

मोक्ष एवं स्वयं विष्णुर्यद्यपीशो ह्यशेषवित् ।
चकार सौगतमतं मोहायैव चकार यत् ॥ १७८५ ॥
असुराणामयोग्यानां वेदमार्गे प्रवर्तताम् ।
अतोऽसुराधिकारत्वान्न ग्राह्यं तन्मतं क्वचित् ॥ १७८६ ॥
चतुष्प्रकारं तच्चोक्तं शून्यं विज्ञानमेकलम् ।
अनुमेयबहिस्तत्त्वं तथा प्रत्यक्षबाह्यगम् ॥ १७८७ ॥

इति तत्र तु ये शून्यं वदन्त्यज्ञानमोहिताः ।
ते मोक्षं तादृशं ब्रूयुर्निःशङ्कं मायिनो यथा ॥ १७८८ ॥

न किञ्चिन्मुक्त्यवस्थायामात्मात्मीयमथापि वा ।
एकस्मिन् संसृतेर्मुक्ते न किञ्चिदवशिष्यते ॥ १७८९ ॥

तत्संवृत्यैव भेदोऽयं चेतनाचेतनात्मकः ।
दृश्यते संसृतेर्ध्वंसे निर्विशेषैव शून्यता ॥ १७९० ॥

न सत्त्वं नैव चासत्त्वं शून्यतत्त्वस्य विद्यते ।
न सुखत्वं न दुःखत्वं न विशेषोऽपि कश्चन ॥ १७९१ ॥

निर्विशेषं स्वयम्भातं निर्लेपमजरामरम् ।
शून्यं तत्त्वमसम्बाधं नानासंवृतिवर्जितम् ॥ १७९२ ॥

अशेषदोषरहितं मनोवाचामगोचरम् ।
मोक्ष इत्युच्यतेऽसद्भिर्नानासंवृतिदूषितम् ॥ १७९३ ॥

संसृत्यवस्था विज्ञेया संवृत्यैव विशिष्यते ।
स्थितया ध्वस्तया चैव संसृतिर्मोक्ष इत्यपि ॥ १७९४ ॥

केचित्तेष्वन्यथा प्राहुः संवृत्यैव त्वनेकधा ।
अवच्छिन्नं महाशून्यं नाना पुद्गलशब्दितम् ॥ १७९५ ॥

यस्य शून्यैकरसताज्ञानात्सा त्वपगच्छति ।
स पुद्गलत्वनिर्मुक्तो महाशून्यत्वमेष्यति ॥ १७९६ ॥

संवृत्या यस्त्ववच्छिन्नो दुःखान्यनुभवत्यलम् ।
इति

शून्यवादिमायावादिनोः साम्यप्रदर्शनम्

एवं मायिनश्चाहुरेकजीवत्ववादिनः ॥ १७९७ ॥

बहुजीवमताश्चेति माया तेषां तु संवृतिः ।
निर्विशेषत्ववाचैव शून्यं ब्रह्मेति नो भिदा ॥ १७९८ ॥

सच्चित्सुखादिकं चैव किं कुतोऽखण्डवादिनः ।
व्यावर्त्यमात्रभेदस्तु विद्यते शून्यवादिनः ॥ १७९९ ॥

अनृतादेरपोहं तु स्वयमेव हि मन्यते ।
निर्विशेषत्वतो नैव विशेषो ब्रह्मशून्ययोः ॥ १८०० ॥

प्रामाण्यादि च वेदस्य फलतः सममेव हि ।
अतत्त्वावेदकं यस्मात् प्रमाणं तेन कथ्यते ॥ १८०१ ॥

अतत्त्वावेदकत्वं यदप्रामाण्यं सतां मतम् ।
दीर्घभ्रान्तिकरी चेत् स्यादतत्त्वावेदकप्रमा ॥ १८०२ ॥

रज्जुसर्पादिविज्ञानादप्याधिक्यादमानता ।
स्यादागमस्यानिवर्त्यमहामोहप्रदत्वतः ॥ १८०३ ॥

तलनैल्यादिविज्ञानमाकाशे मानतां व्रजेत् ।
छत्राकारत्वविज्ञानं चन्द्रप्रादेशतामितिः ॥ १८०४ ॥

निर्भेदत्वं तु शून्यस्य तेनाप्यङ्गीकृतं सदा ।
सत्त्वासत्त्वादिधर्माणामभाव उभयोर्मतः ॥१८०५ ॥

न हि सत्प्रतियोगित्वं शून्यत्वं तेन चेष्यते ।
न च दुःखविरोधित्वादन्या ह्यानन्दतेष्यते ॥ १८०६ ॥

मायिना शून्यपक्षेऽपि ज्ञानं जाड्यविरोधि च ।
धर्माः केऽपि न सन्त्येव को विशेषस्ततस्तयोः ॥ १८०७ ॥

अद्वैतं न सूत्रकाराभिमतं, सूत्रेषु तन्निराकरणात्

एतादृशानां पक्षाणां दूषणं प्रभुणा कृतम् ।
स्वपक्षसाधनेनैव 'नाभाव' इति चोक्तितः ॥ १८०८ ॥

आत्मविनाशस्य न मोक्षत्वं अपुरुषार्थत्वात्, एतद्दूषणं मायिनोऽपि समम्

आत्माभावे पुमर्थः क इष्टस्यात्मावधिर्यतः ।
यदि नात्मावधिर्मोक्षो मोक्षः स्याद्घटशून्यता ॥ १८०९ ॥

कल्पितत्वाद्विशेषाणां मायिनोऽपि समं हि तत् ।
दृश्यमाने विशेषेऽपि यदि चेदविशेषता ॥ १८१० ॥

घटाभावोऽविशेषः स्यात् पाश्चात्यश्चेदनागतः ।

शून्यभावब्रह्मभावयोः मोक्षत्वसाधकमनुमानं सत्प्रतिपक्षदूषितम्

न मोक्षो विमतो यस्माददेहो घटशून्यता ॥ १८११ ॥

यथेत्युक्तो वदेत् किं स योऽनुमामात्रमानकः ।
न च मायी वदेदत्र पूर्वोक्तेनैव वर्त्मना ॥ १८१२ ॥

अमानत्वात् श्रुतेस्तस्य

अदेहत्ववादिनी श्रुतिः प्राकृतशरीराहित्यमेव वदति

न चादेहत्ववादिनी ।
श्रुतिः काचिददेहत्वमप्राकृतशरीरता ॥ १८१३ ॥

मोक्षे भोगं यतो ब्रूते जक्षन् क्रीडन्निति श्रुतिः ।

शून्यभावब्रह्मभावयोर्मोक्षत्वनिरासोपसंहारः

निर्दुःखत्वान्न तन्मोक्षः प्रतिपन्नं यथेति च ॥ १८१४ ॥

अनुमादूषणं किं स्याद्वादिनोः शून्यमायिनोः ।
दुःखं दुःखादभिन्नत्वान्मोक्षोऽपि स्यादसंशयम् ॥ १८१५ ॥

भेदे सद्वैततैव स्यादित्याद्यमितदोषतः ।
हेयं मायामतेनैव सह शून्यमतं बुधैः ॥ १८१६ ॥

विज्ञानवाद्यभिमतमोक्षस्वरूपनिरासः

एवं विज्ञानवादोऽपि ज्ञानमात्रविशेषतः ।
अद्वैततामतं साक्षादुक्तदोषस्ततो भवेत् ।
कालो न केवलज्ञानी कालत्वात् प्रतिपन्नवत् ॥ १८१८ ॥

एतयाऽनुमया रोधान्न तादृङ्मोक्षरूपता ।
यदि कालोऽपि नेत्याह कदेति प्रश्न उत्तरम् ॥ १८१९ ॥

किं वक्ष्यति यदाऽवस्थां वदेत् सा पक्षतां व्रजेत् ।
अवस्थात्वादिति ह्येव हेतुः सापि कदेति च ॥ १८२० ॥

पृष्टे कालश्च वक्तव्यो नाकालत्वं ततो भवेत् ।
न काल इति सामान्यनिषेधे कालगप्रमा ॥ १८२१ ॥

निरुणद्धि समश्चायं त्रयाणामुक्तवादिनाम् ।
एकजीवत्वपक्षे तु कालाभावादियं प्रमा ॥ १८२२ ॥

कुपिता कालमाधाय द्वैतमेवोपपादयेत् ।
विमतः प्रपञ्चवान् कालः कालत्वात् प्रतिपन्नवत् ॥ १८२३ ॥

इति चान्यानुमैकत्वं जीवस्य विनिवारयेत् ।

कालैकत्व-शब्दैकत्व-शिवैकत्ववादिषु एतद्दोषाणामतिदेशः

कालशब्देश्वरैकत्वमतान्यप्येवमेव हि ॥ १८२४ ॥

निराकृतानि तेषां च समत्वात् पक्षदोषयोः ।

वैभाषिकसौत्रान्तिकाभिमतमोक्षस्वरूपनिरासः

ज्ञानं स्वरसभङ्गचेव नित्यसन्तानमिष्यते ॥ १८२५ ॥

बौद्धाभ्यामपराभ्यां तु तत्राप्युक्तानुमा रिपुः ।
मोक्षो न शुद्धविज्ञानसन्तानी कालगत्वतः ॥ १८२६ ॥

प्रतिपन्नो यथेत्येतदनुमानं तदुत्तरम् ।
अनुमानानि सर्वाणि प्रतिसाधनयोगतः ॥ १८२७ ॥

निषिद्धान्युक्तभङ्गचैव श्रुतयश्चास्मदुक्तिगाः ।

साङ्ख्यनैयायिकाद्यभिमतस्य मोक्षे सुखराहित्यस्य निरासः

साङ्ख्यनैयायिकाद्याश्च प्राहुर्मोक्षं च निःसुखम् ॥ १८२८ ॥

इच्छाद्वेषप्रयत्नादेरपि सर्वात्मना लयम् ।
तत्राहुर्नैतदप्यत्र शोभनं श्रुतयो यतः ॥ १८२९ ॥

महानन्दं च भोगं च नियमेन वदन्ति हि ।

'प्रियाप्रिये न स्पृशतः' इति श्रुत्यर्थनिरूपणम्

प्राकृतप्रियहानिस्तु प्रियास्पृष्टिरितीर्यते ॥ १८३० ॥

अप्रियं प्रतिकूलं तदविशेषेण शब्दितम् ।
नास्ति ह्यप्राकृतं दुःखं सतो जीवस्य कुत्रचित् ॥ १८३१ ॥

प्रियं स्वरूपमेवास्य बलानन्दादिवाक्यतः ।
हेयत्वादप्रियस्यैव प्रियहानेरनिष्टतः ॥ १८३२ ॥

न समस्तप्रियाभावो मोक्षे प्रोक्ते तु युज्यते ।
अप्रियस्य स्वरूपत्वमसुरेष्वेव हि श्रुतम् ॥ १८३३ ॥

असुरा नैवमेवं च नैवं चाखिलमानुषाः ।
इत्यात्मप्रियहानाय को यतेत च बुद्धिमान् ॥ १८३४ ॥

'न प्रेत्य संज्ञास्ति' इत्यादिश्रुत्यर्थनिरूपणम्

संज्ञा नास्तीत्यपि ह्यस्य नामुक्तज्ञेयतेति हि ।
धर्मानुच्छित्तिमेवास्य यतो वक्त्युत्तरश्रुतिः ॥ १८३५ ॥

आशङ्क्यास्य ज्ञानहानिं मैत्रेय्या मोहमाह माम् ।
भवानित्युक्तवत्या हि नाहं मोहं वदामि ते ॥ १८३६ ॥

इत्युक्त्वा याज्ञवल्क्यो हि स्वरूपानाशमूचिवान् ।
ज्ञानरूपस्य विज्ञाननाशस्तन्नाश एव यत् ॥ १८३७ ॥

इति शून्यमतोच्छित्त्यै पुनरानन्दपूर्वकान् ।
धर्मानाहाप्यनुच्छिन्नांस्तार्किकैर्विनिवारितान् ॥ १८३८ ॥

मात्रासंसर्गमप्याह तथा माध्यन्दिनश्रुतिः ।
आचिक्षेप मतं तच्च यस्मिन्न विषयादनम् ॥ १८३९ ॥

घ्राणादिभोगाभावस्य त्वनिष्टत्वहृदा श्रुतिः ।
येनेदमखिलं वेद विज्ञातारं स्वमेव च ॥ १८४० ॥

केन तं च विजानीयादित्यनिष्टं च सर्वथा ।
नाखिलज्ञापको विष्णुरज्ञेयो नियमेन हि ॥ १८४१ ॥

तज्ज्ञानार्थं हि वेदानामखिलानां प्रवर्तनम् ।
प्रत्यक्षमात्मविज्ञानाविरोधानुभवादपि ॥ १८४२ ॥

न स्वविज्ञानितायां च विरोधः कश्चनेयते ।
कर्तृकर्मविरोधश्च नित्यानुभवरोधतः ॥ १८४३ ॥

कथमेव पदं गच्छेद्विरोधोऽदृष्टबाधनम् ।

'सोऽश्नुते' इत्यादिश्रुतयः मुक्तस्य विषयभोगसद्भावं वदन्ति

"सोऽश्नुते सर्वकामांश्च" "कामान्नी कामरूप्यथ" ॥ १८४४ ॥

इत्यादिश्रुतयश्चोक्तमर्थमेव वदन्ति हि ।

'यत्र हि द्वैतमिव भवति' इति श्रुत्यर्थः

अस्वातन्त्र्यादिवेत्युक्तं न द्वैताभावतः क्वचित् ॥ १८४५ ॥

आत्मैवाभूदिति ह्यस्मादविशेषप्रसङ्गतः ।
"अस्वातन्त्र्योपमाभेदभेदेष्विव उदीरितः" ॥ १८४६ ॥

शब्दतत्त्व इति प्रोक्तं मैत्रेय्युक्तोत्तरं च किम् ।

मोक्षे सुखाभावे तस्य अपुरुषार्थत्वस्य प्रपञ्चनम्

सुखादिधर्महानौ तु मुक्तेः किं च प्रयोजनम् ॥ १८४७ ॥

यद्यर्थो दुःखहानिः स्यादनर्थः सुखनाशनम् ।
तयोश्च दुःखहानाद्धि सुखनाशोऽधिको भवेत् ॥ १८४८ ॥

प्राप्यापि दुःखं महत्सुखलेशाप्तये जनः ।
यतते सुखहानौ हि को मोक्षाय यतेत्पुमान् ॥ १८४९ ॥

अल्पाच्च सुखनाशाद्धि बिभेत्यतितरां जनः ।
महच्च दुःखमाप्नोति सुखनाशनिवृत्तये ॥ १८५० ॥

न च रागनिमित्तं तद्वीतरागा अपि स्फुटम् ।
नारदाद्याः सुखार्थाय सहन्ते दुःखमञ्जसा ॥ १८५१ ॥

युद्धादिदर्शनं यस्मात् सुदुःखेनापि कुर्वते ।
"यदेन्द्रवैरोचनयोर्ब्रह्मास्त्राभ्यां सुतापिताः ॥ १८५२ ॥

अपि नैवाजहुर्युद्धरसात् ते नारदादयः ।"
इति स्कान्दवचस्तस्मात् सुखाभावाय को यतेत् ॥ १८५३ ॥

विमतो दुःखयुग्यस्माच्चेतनः सन् सुखोज्झितः ।
प्रतिपन्नो यथेत्येव चानुमा केन वार्यते ॥ १८५४ ॥

मोक्षे सुखसद्भावे श्रुति-पुराणप्रमाणानि

सर्वश्रुतिपुराणेषु सुखभावोक्तितस्तथा ।
मुक्तौ न ग्राह्यमेवैतत्सुखाभावमतं बुधैः ॥ १८५५ ॥

"सोऽनानन्दा(दुःखा)द्विमुक्तः सन्नानन्दी भवति स्फुटम् ।"
"निर्गुणे ब्रह्मणि मयि धारयन् विशदं मनः ॥ १८५६ ॥

परमानन्दमाप्नोति यत्र कामोऽवसीयते ।"
"न विष्णुसदृशं दैवं न मोक्षसदृशं सुखम् ॥ १८५७ ॥

न वेदसदृशं वाक्यं न वर्णोऽङ्कारसंमितः ।"
"यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ॥ १८५८ ॥

कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधि ।"
इति श्रुतिपुराणानि तत्र तत्र वदन्ति हि ॥ १८५९ ॥

अतो मोक्षो सुखाभाव इति यत्किञ्चिदेव हि ।

मुक्तानां स्वरूपभूतदेहवत्त्वप्रतिपादनम्

शिरःकराद्यभावश्च न मुक्तस्य भवेत् क्वचित् ॥ १८६० ॥

श्रुतयश्च पुराणानि मानमत्र बहूनि च ॥ १८६१ ॥

"न वर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः ।
न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः ॥ १८६२ ॥

श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः ।
सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः ॥ १८६३ ॥

प्रवालवैडूर्यमृणालवर्चसां परिस्फुरत्कुण्डलमौलिमालिनाम् ।
भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानावलिभिर्महात्मनाम् ॥ १८६४ ॥

विद्योतमानप्रमदोत्तमाभिः सविद्युदभ्रावलिभिर्यथा नमः ।
श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः" ॥ १८६५ ॥

"ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्करीषु ।
ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः" ॥ १८६६ ॥

कामान्नरूपी चरतीतिपूर्वश्रुत्या पुराणोक्तिभिरप्यदोषः ।
देहः स्वरूपात्मक एव तेषां मुक्तिं गतानामपि चेयते हि ॥ १८६७ ॥

शिरःकराद्यैरपि मुक्तिभाजो युक्ता यतस्ते पुरुषा इदानीम् ।
यथेति पूर्वा अनुमाश्च जीवस्वरूपमङ्गादिकमावयन्ति ॥ १८६८ ॥

संसारे भिन्नस्य भिन्नाभिन्नस्य वा जीवस्य मोक्षे ब्रह्मणा
अत्यन्तमैक्यमिति भास्करादिमतनिरासः

न ब्रह्मरूपत्वममुष्य देहिनो मुक्तावपि स्यात् प्रमया कथञ्चित् ।
स ब्रह्मणा सहितोऽशेषभोगान् भुङ्क्ते तथोपेत्य सुखार्णवं तम् ॥ १८६९ ॥

यत्तत्परं ज्योतिरुपेत्य जीवो निजस्वरूपत्वमवाप्य कामान् ।
भुङ्क्ते स देवः पुरुषोत्तमोऽजः आत्मेति चोक्तो गुणपूर्तिहितोः ॥ १८७० ॥

सेतुः स देवोऽखिलमुक्तिभाजामुतामृतस्येष्ट इहेशिता यत् ।
इत्यादिवाक्यैर्भगवद्वशः सन् भुङ्क्तेऽखिलान् मुक्तिगतोऽपि भोगान् ॥ १८७१ ॥

कालोऽप्यसौ नैक्ययुतः परेण जीवस्य कालो यत एष यद्वत् ।
इत्यादिका अप्यनुमाः प्रमाणं मुक्तौ च जीवस्य परत्वरोधे ॥ १८७२ ॥

कथं च यः पूर्वमसौ न पश्चाद्भवेत् स एवेत्यपि युक्तिमेति ।
यतो न दृष्टं यदभून्न पूर्वं पश्चात्तदासेति कुतश्च किञ्चित् ॥ १८७३ ॥

जीवः स्वभावतः एव परमात्मना भिन्नाभिन्नः, संसारे भेद एव व्यक्तः, अभेदः अविद्यादिना आवृतः, मुक्तौ द्वावपि व्यक्ताविति यादवप्रकाशादिमतनिरासः

न चैव मुक्तेन हरेः पृथक्त्वमैक्यं तथा स्यादिति युक्तिमेति ।
यतो न कुत्रापि भिदाभिदा च दृष्टा चितश्चेतनया कुतश्चित् ॥ १८७४ ॥

मोक्षवादार्थोपसंहारः

इत्थं मतानि भ्रमजानि यस्मान्मोक्षं समुद्देश्यमपि भ्रमेण ।
विदुर्न सम्यग्यदपीह लौकिकाः सुखं मम स्याद्धि सदेति जानते ॥ १८७५ ॥

तृतीयाध्यायस्य चतुर्थपादे पूर्वपक्षयुक्तयः

औदार्यमुच्चावचशक्तिरात्मस्वरूपदार्ढ्यं च निजस्वभावः ।
स्वातन्त्र्यमापूर्णविशेषयोग्यताविरोधहानिश्च चतुर्थपादे ॥ १८७६ ॥

तत्रैव सिद्धान्तयुक्तयः

व्यवस्थितिस्त्वविशेषस्थितिश्च निषेधसामान्यविधिक्रियाणाम् ।
विभक्तता चात्वरयैव सिद्धिर्विपक्षसम्प्राप्तिविरुद्धहेतवः ॥ १८७७ ॥

चतुर्थाध्यायस्य प्रथमपादे पूर्वपक्षयुक्तयः

सुशक्यता शश्वदतिप्रसिद्धिर्विवेकविन्यासविचारसंज्ञाः ।
नानाप्रवृत्तिः कृतकृत्यता च विपक्षतर्काः समतीतपादे ॥ १८७८ ॥

तत्रैव सिद्धान्तयुक्तयः

महाफलत्वं प्रविविक्तता च सन्धिग्रहः साधनमाप्तकृत्यम् ।
विशेषकार्यं कृतिसंस्थितिश्च सुयुक्तयो निर्णयगाः स्वपक्षे ॥ १८७९ ॥

चतुर्थाध्यायस्य द्वितीयपादे पूर्वपक्षयुक्तयः

व्यामिश्रता कार्यकरत्वमर्थक्लृप्तिः सुदार्ढ्यं परतन्त्रता च ।
समानधर्मः कृतशेषता च लोकोपमा पूर्वमतानुसाराः ॥ १८८० ॥

तत्रैव सिद्धान्तयुक्तयः

विशेषसाम्यश्रुतिराढ्यता च समानलोपो महिमाविशेषः ।
कृतार्थता शश्वदनुप्रवृत्तिः सिद्धान्तनिर्णीतिविशिष्टहेतवः ॥ १८८१ ॥

* * *

## ॥ वाङ्मनसाधिकरणम् ॥

**ॐ वाङ्मनसि दर्शनाच्छब्दाच ॐ ॥ ४-२-१ ॥**

**ॐ अत एव च सर्वाण्यनु ॐ ॥ ४-२-२ ॥**

*॥ इति वाङ्मनसाधिकरणम् ॥ १ ॥*

## ॥ मनःप्राणाधिकरणम् ॥

**ॐ तन्मनः प्राण उत्तरात् ॐ ॥ ४-२-३ ॥**

*॥ इति मनःप्राणाधिकरणम् ॥ २ ॥*

## ॥ अध्यक्षाधिकरणम् ॥

**ॐ सोऽध्यक्षे तदुपगमादिभ्यः ॐ ॥ ४-२-४ ॥**

*॥ इति अध्यक्षाधिकरणम् ॥ ३ ॥*

## ॥ भूताधिकरणम् ॥

**ॐ भूतेषु तच्छ्रुतेः ॐ ॥ ४-२-५ ॥**

*॥ इति भूताधिकरणम् ॥ ४ ॥*

* * *

## ॥ नैकस्मिन्नधिकरणम् ॥

**ॐ नैकस्मिन् दर्शयतो हि ॐ ॥ ४-२-६ ॥**

'वायाविन्द्रः' इत्यादिश्रुतौ वायुशब्देन प्रधानवायुः विवक्षितः

प्रधानवायुस्त्विह वायुनामा भूतेष्विति प्रोक्तगतोऽपि युक्त्या ।
यस्मात् श्रुतौ पवते चेति भूम्नि प्रोक्तो यतो भूतमानी च सोऽपि ॥ १८८२ ॥
महामानी त्वल्पमानी च यस्मात् तच्छब्देनाप्युच्यते ते न सोऽपि ।

॥ इति नैकस्मिन्नधिकरणम् ॥ ५ ॥

* * *

## ॥ समनाधिकरणम् ॥

**ॐ समना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॐ ॥ ४-२-७ ॥**

**ॐ तदपीतेः संसारव्यपदेशात् ॐ ॥ ४-२-८ ॥**

**ॐ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॐ ॥ ४-२-९ ॥**

**ॐ नोपमर्देनातः ॐ ॥ ४-२-१० ॥**

**ॐ अस्यैव चोपपत्तेरूष्मा ॐ ॥ ४-२-११ ॥**

**ॐ प्रतिषेधादिति चेन्न शारीरात् ॐ ॥ ४-२-१२ ॥**

**ॐ स्पष्टो ह्येकेषाम् ॐ ॥ ४-२-१३ ॥**

**ॐ स्मर्यते च ॐ ॥ ४-२-१४ ॥**

॥ इति समनाधिकरणम् ॥ ६ ॥

* * *

## ॥ पराधिकरणम् ॥

**ॐ तानि परे तथा ह्याह ॐ ॥ ४-२-१५ ॥**

श्रुत्युक्तक्रमेण देवानां प्रधानवायौ लयः, तस्य च विष्णौ लयः

तस्मिन् लयं यान्ति भूतान्यशेषक्रमाविरोधेन स एव विष्णौ ॥ १८८३ ॥
इन्द्रादीनां तत्र लयः क्रमं तु प्रोक्तं विशेषादनुसृत्य नान्यत् ।

सङ्क्षेपतः लयक्रमः

तस्मादशेषा गिरिजां प्रविश्य तयैव रुद्रं सह तेन वाणीम् ॥ १८८४ ॥
तया पतिं प्राप्य सहैव तेन लयं हरौ यान्ति समस्तजीवाः ।

शेषमार्गः

सोमस्तु वारीशयुतोऽनिरुद्धं विशत्यसौ काममसौ तु वारुणीम् ॥ १८८५ ॥
सा शेषदेवं स गिरं च सैव वायुं विशत्यञ्ज इतीह निर्णयः ।
उमागिरीशाविति भारतीराविति स्म वाग्वेदगता ब्रवीति ॥ १८८६ ॥
अहीन्द्रपत्नीमहिपं विरिञ्चपत्नीं विरिञ्चं च विमुक्तिकाले ।
त एव यत्तत् पदमाप्नुवन्ति तत्काल एतान् समुपास्य जीवाः ॥ १८८७ ॥
ब्रह्मत्वकाले प्रविशन्ति चैतानिति स्म वाक् तादृशतामुपैति ।

गरुडमार्गः

सूर्योऽग्नियुक्तो गुरुमाप्य तेन शक्रं सहैतेन सुपर्णपत्नीम् ॥ १८८८ ॥
तया सुपर्णं सह तेन वाणीं ब्रह्माणमेतद्गत एव याति ।
इन्द्रप्रवेशस्तु यदोच्यतेऽत्र तदा ह्युमेत्येव सुपर्णपत्नी ॥ १८८९ ॥
उक्ता सुपर्णश्च गिरीशनाम्ना ततो विरोधश्च न कश्चनात्र ।

हिरण्यगर्भे लयप्रकारः

भृग्वादयो दक्षमवाप्य तेन प्राप्येन्द्रमेतेन सुपर्णपत्नीम् ॥ १८९० ॥
विशन्ति ये मनवो राजमुख्या मनुं प्रविश्यात्र गता महेन्द्रम् ।
आकाश उर्वी च गुरुं प्रविश्य तेनैव यातः पुरुहूतदेवम् ॥ १८९१ ॥
सनादयो यतयः काममेव विशन्ति शिष्टा अपि हव्यवाहम् ।
वर्णाश्रमाचाररता मनुष्या धर्मं मनुं सोऽपि समेति काले ॥ १८९२ ॥
तमेव सर्वे पितरः सुरानुगाः सर्वे कुबेरं स च सोममेव ।
विमुक्तिकाले प्रविशन्ति

सायुज्यप्रकारः

अभीक्ष्णं भोगांश्च तद्देहगताः प्रभुञ्जते　॥ १८९३ ॥

आनन्दसुव्यक्तिरमुत्र तेषां भवत्यतश्चेष्टत एव निर्गताः ।
क्रीडन्ति भूयश्च समाविशन्ति तानेव सायुज्यमिदं वदन्ति　॥ १८९४ ॥

सायुज्यहीनास्तु लये तु सर्वे प्रोक्तेन मार्गेण विशन्ति सृष्टौ ।
बहिश्च निर्यान्ति ततोऽन्यदापि सायुज्यभाजां भवति प्रवेशः　॥ १८९५ ॥

उक्तं समस्तं परमश्रुतौ हि प्रोक्तं च सर्गक्रमतो विपर्ययः ।
मुक्तौ लये यद्वदथो लयश्च विपर्ययेणेत्यवदद्गिरां प्रभुः　॥ १८९६ ॥

देवानां लयविषये ज्ञातव्यांशाः

लयो यतो मुक्तिरियं सुराणां भोगो विशेषेण च यं वदिष्यति ।
उक्तश्च बिम्बप्रतिबिम्बभावः पैङ्गिश्रुतावुक्तलयानुसारतः　॥ १८९७ ॥

बिम्बे प्रतिबिम्बस्य लयः, 'प्राणस्तेजसि' इत्यत्र तेजश्शब्दः श्रीवाचकः

बिम्बे लयो यन्नियतश्च मुक्तौ चिदात्मनां तद्वशता च सर्वदा ।
तेजोऽभिधां तु श्रियमाप्य विष्णुमग्रे ततः पुत्रतयैव वायुः　॥ १८९८ ॥

आप्तः प्रसूतः पुनरेव विष्णुं प्रविश्य मुक्तः प्रलयेऽत्र तिष्ठति ।

सर्वे मुक्ताः लये भगवन्तं प्रविश्य आनन्दमनुभवन्ति, सृष्टौ बहिरायान्ति

सर्वेऽपि ते मुक्तगणा अमन्दसान्द्रं निजानन्दमशेषतोऽपि　॥ १८९९ ॥

भुञ्जन्त एवासत ईशदेहे लयेऽथ सर्गे बहिरेव यान्ति ।

उक्तादन्ये देवाः अग्निं प्रविशन्ति इत्यस्यापवादप्रदर्शनपूर्वकं पादार्थोपसंहारः

प्रयाति धर्मं निर्ऋतिस्तु शक्रं मरुद्गणाः पारिषदास्तथैव　॥ १९०० ॥

सर्वेऽनिरुद्धं पृतनाधिपाद्यास्तुरश्रुतिर्हीत्थमियं विमुक्तिः ।

*॥ इति पराधिकरणम् ॥ ७ ॥*

* * *

## ॥ अविभागाधिकरणम् ॥

**ॐ अविभागो वचनात् ॐ ॥ ४-२-१६ ॥**

*॥ इति अविभागाधिकरणम् ॥ ८ ॥*

* * *

## ॥ तदोकोऽधिकरणम् ॥

**ॐ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॐ ॥ ४-२-१७ ॥**

**ॐ रश्म्यनुसारी ॐ ॥ ४-२-१८ ॥**

**ॐ निशि नेति चेन्न सम्बन्धात् ॐ ॥ ४-२-१९ ॥**

**ॐ यावद्देहभावित्वाद्दर्शयति च ॐ ॥ ४-२-२० ॥**

**ॐ अतश्चायनेऽपि हि दक्षिणे ॐ ॥ ४-२-२१ ॥**

*इति तदोकोऽधिकरणम् ॥ ९ ॥*

* * *

## ॥ योग्यधिकरणम् ॥

**ॐ योगिनः प्रति स्मर्येते स्मार्ते चैते ॐ ॥ ४-२-२२ ॥**

*॥ इति योग्यधिकरणम् ॥ १० ॥*

*इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीब्रह्मसूत्रानुव्याख्याने चतुर्थाध्यायस्य द्वितीयः पादः ॥*

* * *

॥ श्रीः ॥

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

# अथ चतुर्थाध्यायस्य तृतीयः पादः

एतत्पादप्रतिपाद्यार्थनिरूपणम्

उत्क्रान्तमार्गश्च विमुक्तगम्यं पादोदितं

एतत्पादीयपूर्वपक्ष-सिद्धान्तयुक्तयः

सुक्रमविक्रमौ च ॥ १९०१ ॥

सान्तानिकप्राप्तिरभीष्टता च सौकर्यमित्यन्यमतस्य तर्काः ।
विशेषसम्प्राप्तिरुरुत्वमाप्तिः क्रमानुरागः कथितानुवृत्तिः ॥ १९०२ ॥

सिद्धान्तनिर्णीतिकराः

## ॥ अर्चिराद्यधिकरणम् ॥

**ॐ अर्चिरादिना तत्प्रथितेः ॐ ॥ ४-३-१ ॥**

*॥ इति अर्चिराद्यधिकरणम् ॥ १ ॥*

## ॥ वायुशब्दाधिकरणम् ॥

**ॐ वायुशब्दादविशेषविशेषाभ्याम् ॐ ॥ ४-३-२ ॥**

*॥ इति वायुशब्दाधिकरणम् ॥ २ ॥*

## ॥ तटिदधिकरणम् ॥

**ॐ तटितोऽधि वरुणः सम्बन्धात् ॐ ॥ ४-३-३ ॥**

*॥ इति तटिदधिकरणम् ॥ ३ ॥*

* * *

## ॥ आतिवाहिकाधिकरणम् ॥

**ॐ आतिवाहिकस्तल्लिङ्गात् ॐ ॥ ४-३-४ ॥**

**ॐ उभयव्यामोहात्तत्सिद्धेः ॐ ॥ ४-३-५ ॥**

*॥ इति आतिवाहिकाधिकरणम् ॥ ४ ॥*

## ॥ वैद्युताधिकरणम् ॥

**ॐ वैद्युतेनैव ततस्तच्छ्रुतेः ॐ ॥ ४-३-६ ॥**

*॥ इति वैद्युताधिकरणम् ॥ ५ ॥*

## ॥ कार्याधिकरणम् ॥

**ॐ कार्यं बादरिरस्य गत्युपपत्तेः ॐ ॥ ४-३-७ ॥**

**ॐ विशेषितत्वाच्च ॐ ॥ ४-३-८ ॥**

**ॐ सामीप्यात्तु तद्व्यपदेशः ॐ ॥ ४-३-९ ॥**

**ॐ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॐ ॥ ४-३-१० ॥**

**ॐ स्मृतेश्च ॐ ॥ ४-३-११ ॥**

**ॐ परं जैमिनिर्मुख्यत्वात् ॐ ॥ ४-३-१२ ॥**

**ॐ दर्शनाच्च ॐ ॥ ४-३-१३ ॥**

**ॐ न च कार्ये प्रतिपत्त्यभिसन्धिः ॐ ॥ ४-३-१४ ॥**

**ॐ अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ॐ ॥ ४-३-१५ ॥**

प्रतीकं देहादिकं तद्गतमेव ये नराः ।
उपासते ते पुरतः समाप्नुयुर्ब्रह्माणमस्मान्मतिमाप्य विष्णुम् ॥ १९०३ ॥

प्राप्स्यन्त्यतोऽन्येऽपि तमाप्य तस्मात्
हरिं गता मुक्तिभाजः परान्ते ।

**ॐ विशेषं च दर्शयति ॐ ॥ ४-३-१६ ॥**

*॥ इति कार्याधिकरणम् ॥ ६ ॥*

*इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीब्रह्मसूत्रानुव्याख्याने चतुर्थाध्यायस्य तृतीयः पादः ॥*

★ ★ ★

॥ श्रीः ॥

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

# अथ चतुर्थाध्यायस्य चतुर्थः पादः

एतत्पादीयपूर्वपक्षसिद्धान्तयुक्तयः

अतिक्रमोक्तिः पुरुषार्थलाभः परागतिः पारगतिस्तदोकः ॥ १९०४ ॥

समस्तकार्यं वशिता च विश्वसम्भावना युक्तयस्त्वन्यपक्षे ।
सामान्यरूपं प्रतिभानमुक्तिराश्चर्यता कृत्रिमतास्तदोषः ॥ १९०५ ॥

विशेषक्लृप्तिः कृतनिश्चयश्च माहात्म्यमित्येव सुनिर्णयार्थाः ।

## ॥ सम्पद्याधिकरणम् ॥

**ॐ सम्पद्याविहाय स्वेन शब्दात् ॐ ॥ ४-४-१ ॥**

*॥ इति सम्पद्याधिकरणम् ॥ १ ॥*

## ॥ मुक्ताधिकरणम् ॥

**ॐ मुक्तः प्रतिज्ञानात् ॐ ॥ ४-४-२ ॥**

*॥ इति मुक्ताधिकरणम् ॥ २ ॥*

## ॥ आत्माधिकरणम् ॥

**ॐ आत्मा प्रकरणात् ॐ ॥ ४-४-३ ॥**

*॥ इति आत्माधिकरणम् ॥ ३ ॥*

## ॥ अविभागाधिकरणम् ॥

**ॐ अविभागेन दृष्टत्वात् ॐ ॥ ४-४-४ ॥**

*॥ इति अविभागाधिकरणम् ॥ ४ ॥*

## ॥ ब्राह्माधिकरणम् ॥

**ॐ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॐ ॥ ४-४-५ ॥**

**ॐ चितिमात्रेण तदात्मकत्वादित्यौडुलोमिः ॐ ॥ ४-४-६ ॥**

**ॐ एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॐ ॥ ४-४-७ ॥**

*॥ इति ब्राह्माधिकरणम् ॥ ५ ॥*

## ॥ सङ्कल्पाधिकरणम् ॥

**ॐ सङ्कल्पादेव च तच्छ्रुतेः ॐ ॥ ४-४-८ ॥**

*॥ इति सङ्कल्पाधिकरणम् ॥ ६ ॥*

* * *

## ॥ अनन्याधिपत्यधिकरणम् ॥

**ॐ अत एव चानन्याधिपतिः ॐ ॥ ४-४-९ ॥**

मुक्तानां भगवान् अधिपतिः, यथासम्भवं अन्येऽपि,
तेषां सर्वथा अनन्याधिपतित्वं नात्र सूत्रे प्रतिपाद्यते

अनन्यभृत्यत्वमिहोदितेभ्यस्त्वन्यस्य भृत्यत्वनिवारणाय ॥ १९०६ ॥

पतिं यदेषामपि विष्णुमाह ह्युतामृतत्वस्य पतित्ववाग्घरेः ।
एतेऽपि चान्याधिपतित्वयुक्ता विष्णवन्यचित्त्वेन यथा पुमांसः ॥ १९०७ ॥

प्रसिद्धिभाजस्त्विति चानुमैव ह्यभीष्टसिद्ध्यै भवतीह निश्चयात् ।
मुक्तस्वकीयावरयन्तृतास्ति मुक्तावपि ब्रह्मपुरस्सराणाम् ॥ १९०८ ॥

अनेन दवेन तथाऽमुना च हीष्टे परार्वाक्तनलोकिनामिति ।
फलं श्रुतिर्ज्ञानत आह मुक्तावेतच्च सर्वाशुभनाशलिङ्गात् ॥ १९०९ ॥

मुक्तौ सर्वात्मना लोकाधिपत्यरूपफलं, निरवधिकं सर्वदेवपूज्यत्वं च विधातुरेव, अन्येषां तु यथायोग्यम्

लोकाधिपत्यं च विधातुरेव सर्वात्मनेत्याह तुरश्रुतिश्च ।
सर्वे बलिं देवगणा वहन्तीत्येतच्च नान्यस्य तु युक्तिमेति ॥ १९१० ॥

मुक्तानां स्वकीयावरयन्तृत्वनिरूपणम्

लोका इतीहापि तु लोकिनां वचो लोका इति ह्येव रवः प्रजासु ।
प्रयुज्यते सर्वजनैः सदैव तन्मानिनो लोकपदेन चोक्ताः ॥ १९११ ॥

तद्वास्तु मुक्ता इह लोकशब्दा अन्योन्यनाथा इति पैङ्गिनां श्रुतिः ।
अलोकशब्देन विमुक्तिभाजो वाच्याः पदं तादृगपीह युक्तम् ॥ १९१२ ॥

लोकाभिधाश्चापि यतो हि मुक्ताः प्रकाशरूपाः सततं च सर्वे ।
ब्रह्मैव लोकाधिपतिर्विमुक्तो भवेदिति प्राह तुरश्रुतिश्च ॥ १९१३ ॥

आदित्यमण्डले परमेश्वरमुपासीनस्य विदुषः लोकाधिपत्यमित्यपव्याख्याननिरासनम्

न चेह विज्ञानफलं समुक्तं लोकाधिपत्यं रविबिम्बगे हरौ ।
उक्तं पृथक् तच्च पुरैव यस्मात् भेदोऽमुनेत्यादि च सम्यगुक्तः ॥ १९१४ ॥

त्वप्रत्ययं चाप्यतिहाय नैव रूपेण तेनेति भवेदिहार्थः ।
भवत्यसावित्यणुशब्दमत्र विहाय वाक्यानि बहूनि दोषः ॥ १९१५ ॥

अपव्याख्याननिराकरणोपसंहारपूर्वकं पादार्थस्य सङ्क्षेपेणोक्तिः

अतो जगद्व्यापृतिमन्त एव ब्रह्मादयः पूर्णगुणाः क्रमेण ।
अमन्दमानन्दमजस्रमेव भुञ्जन्त आत्मीयमजात्समासते ॥ १९१६ ॥

*इति अनन्याधिपत्यधिकरणम् ॥ ७ ॥*

## ॥ अभावाधिकरणम् ॥

**ॐ अभावं बादरिराह ह्येवम् ॐ ॥ ४-४-१० ॥**

**ॐ भावं जैमिनिर्विकल्पाम्नानात् ॐ ॥ ४-४-११ ॥**

**ॐ द्वादशाहवदुभयविधं बादरायणोऽतः ॐ ॥ ४-४-१२ ॥**

**ॐ तन्वभावे सन्ध्यवदुपपत्तेः ॐ ॥ ४-४-१३ ॥**

**ॐ भावे जाग्रद्वत् ॐ ॥ ४-४-१४ ॥**

**ॐ प्रदीपवदावेशस्तथा हि दर्शयति ॐ ॥ ४-४-१५ ॥**

**ॐ स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॐ ॥ ४-४-१६ ॥**

*॥ इति अभावाधिकरणम् ॥ ८ ॥*

## ॥ जगद्व्यापाराधिकरणम् ॥

**ॐ जगद्व्यापारवर्जम् ॐ ॥ ४-४-१७ ॥**

**ॐ प्रकरणादसन्निहितत्वाच्च ॐ ॥ ४-४-१८ ॥**

**ॐ प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॐ ॥ ४-४-१९ ॥**

**ॐ विकारावर्ति च तथाहि दर्शयति ॐ ॥ ४-४-२० ॥**

*॥ इति जगद्व्यापाराधिकरणम् ॥ ९ ॥*

## ॥ स्थित्यधिकरणम् ॥

**ॐ स्थितिमाह दर्शयतश्चैवं प्रत्यक्षानुमाने ॐ ॥ ४-४-२१ ॥**

**ॐ भोगमात्रसाम्यलिङ्गाच्च ॐ ॥ ४-४-२२ ॥**

*॥ इति स्थित्यधिकरणम् ॥ १० ॥*

* * *

# ॥ अनावृत्त्यधिकरणम् ॥

## ॐ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॐ ॥ ४-४-२३ ॥

*॥ इति अनावृत्त्यधिकरणम् ॥ ११ ॥*

* * *

परिसमापितग्रन्थो भगवानाचार्यः पुरुषोत्तमं पौनःपुन्येन प्रणमति

नमो नमोऽशेषविशेषपूर्णगुणैकधाम्ने पुरुषोत्तमाय ।
भक्तानुकम्पादतिशुद्धसंविद्दात्रेऽनुपाधिप्रियसद्गुणात्मने ॥ १९१७ ॥

श्रीमदाचार्याणां स्वरूपाविष्करणम्

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपु-
र्मध्वो यत् तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥ १९१८ ॥

भगवत्स्वरूपप्रतिपादनपुरस्सरं भगवत्स्तवेन ग्रन्थोपसंहारः

निःशेषदोषरहित कल्याणाखिलसद्गुण ।
भूतिस्वयम्भुशर्वादिवन्द्यं त्वां नौमि मे प्रियम् ॥ १९१९ ॥

*इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीब्रह्मसूत्रानुव्याख्याने चतुर्थाध्यायस्य चतुर्थः पादः ॥*

★ ★ ★

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

## श्रीमदानन्दतीर्थभगवत्पादविरचित-श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य प्रप्रथमटीका

## श्रीपद्मनाभतीर्थविरचिता

# सन्न्यायरत्नावली

## अथ चतुर्थाध्यायः

१६८४ यस्य समन्वयाविरोधाध्यायद्वयसिद्धस्य विष्णोः प्राप्तिसाधनविचारः कृतः साधनाध्यायेन तत्प्राप्तिलक्षणं फलमस्मिन्नध्याये निरूप्यते । तत्र प्रथमं कतिपयैश्चाधिकरणैः साधनविशेषविचारोऽनुवर्तिष्यते । अशेषसाधनानां गताध्याये विचारितत्वेऽपि विशेषतो यदत्यावश्यकमपरोक्षज्ञानसाधनं येन विना मोक्षमात्रमपि न सिद्ध्यति तदत्र विचार्यते । बाहुल्येन फलविचारित्वादस्याध्यायस्य फलाध्यायत्वं न विरुध्यते । तत्र तावदिदं विचार्यते । परमात्मनोऽपरोक्षज्ञानाय प्राग्वर्णितं यच्छ्रवणादि तत्किं सकृदनुष्ठेयमुत असकृदिति । किं तावद्युक्तं सकृदिति ब्रूमः । कुतः 'श्रोतव्यो मन्तव्य' इत्यादिविधेः तावता चरितार्थत्वात् । यथा फलाय सकृदनुष्ठीयते ज्योतिष्टोमस्तद्विधेस्तावता चरितार्थत्वात् । अत्रोच्यते । 'स एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मे'त्याद्यसकृदुपदेशाच्छ्रवणादेरावृत्तिः कर्तव्यैव । यदि सकृच्छ्रवणादिना दृश्यते परमात्मा तर्हि तस्यासकृदुपदेशोऽनर्थकः स्यात् । न च श्रवणादेः सकृदनुष्ठानेन तद्विधिः सार्थक इति वाच्यम् । सकृच्छ्रवणादिनाऽपरोक्षज्ञानानुदयात् । दृष्टं हि फलमपरोक्षज्ञानम् । अतः परमात्मापरोक्षज्ञानपर्यन्तं श्रवणादेरनुष्ठानेन तद्विधेः सार्थक्यं नान्यथा । यथा व्रीहीनवहन्तीत्ययं विधिर्न सकृद्व्रीहीणामवघातेन सार्थकः किं तु तेषां तुषकणविमोक्षपर्यन्तावघातेनैव सार्थकः । अवघातस्य दृष्टफलत्वात् । अपि च । ध्यानादिकं ह्यपरोक्षज्ञानसाधनम् । ध्यानशब्दश्च न सकृच्छ्रवणे प्रसिद्धः किन्तु सजातीयप्रत्ययप्रवाहवाचित्वेन प्रसिद्धः 'पिता प्रोषितपुत्रं ध्यायति चिन्तयती'त्यादौ । विष्णुध्यानादेरावृत्तिर्बृहत्तन्त्रे चोक्ता । 'नित्यशः श्रवणं चैव मननं ध्यानमेव च । कर्तव्यमेव पुरुषैर्ब्रह्मदर्शनमिच्छुभिरि'ति । तदेतदाह **समन्वयेत्यादि** । अनेन 'आवृत्तिरसकृदुपदेशादि'ति सूत्रं व्याख्यातं भवति ।

१६८७ 'लिङ्गाच्चे'ति सूत्रमनूद्य सतत्त्ववचनेनैव व्याचष्टे **लिङ्गादित्यादिना** । इतोऽपि विष्णोः श्रवणादिकमावर्तयितव्यम् । उग्रतपःप्रभृतिभिर्महद्भिरावर्तमानत्वात् । तथा हि । लातव्यानामजुरैकोनशतब्रह्मस्वतीतेषु ब्रह्मा भविष्यति । तस्मादुग्रतपा नाम रुद्रपदयोग्य एकोनशतब्रह्ममहाकल्पेभ्यः पूर्वं महाकल्पस्यादित आरभ्य ब्राह्ममान-

---

* प्रतिपरिच्छेदं प्रारम्भे सूचिताः सङ्ख्याः अनुव्याख्यानश्लोकसङ्ख्याः इति ज्ञातव्यम् ।

परिगणितपञ्चसप्ततिसंवत्सरकालं विष्णुगुणान् शुश्राव । ब्राह्ममानपरिगणितपञ्चविंशतिसंवत्सरकालं तानेव दध्यावापश्यच्च । तथा सुनन्दादयोऽपीन्द्रादिपदयोग्याः स्वस्वशक्त्यनुसारानुष्ठितश्रवणाद्यावृत्त्यैव विष्णुमपश्यन्नित्यर्थः ।

१६९३ यदत्यावश्यकसाधनमावर्तयितव्यं तत्प्रदर्शयन् 'आत्मेति तूपगच्छन्ति ग्राहयन्ति चे'त्येतत्सूत्रं व्याचष्टे **आत्मेत्यादिना** । तत्र तावदात्मशब्दार्थो न विष्णोरन्य आशङ्कनीयः । विष्णावेवात्मशब्दस्य 'गौणश्चेन्नात्मशब्दादि'त्यादिसूत्रेण पूर्वमेव प्रतिपादितत्वात् ।

१६९४ पैङ्गिश्रुत्यादिभिश्चैतद्दृढयति **आत्मा ब्रह्मेत्यादिना** । अतश्चायमर्थः सूत्रस्य भवति । यो जगदुपास्यः स आत्मा विष्णुरिति ज्ञातव्यः । एवं हि सन्त उपगच्छन्ति उपासते । ग्राहयन्ति उपदिशन्ति चेति । आत्मशब्दश्च सर्वमादत्त इत्यात्मेति स्वामित्वविशिष्टं विष्णुमभिदधाति । स्वामी हि सर्वमात्मीयतयाऽऽदत्ते । अतः स्वस्वामित्वेन विष्णुरुपासितव्य इत्युक्तं भवति ।

१७०० अस्मिन्नर्थे सत्तत्त्ववचनं षाड्गुण्यवचनं च दर्शयति **स्वामीत्यादिना** । तथा च श्रुतिः 'पतिं विश्वस्यात्मेश्वरमि'ति ।

*॥ इति आत्माधिकरणम् ॥ २ ॥*

* * *

# ॥ न प्रतीकाधिकरणम् ॥

१७०२ ननु नाम ब्रह्मेत्युपास्त इत्यादिवचनं नामादिप्रतीकं सर्वं विष्णुत्वेनोपास्यं न तु स्वपतित्वेन विष्णुरुपास्य इत्याशङ्कां परिहरति । 'न प्रतीके न हि स' इत्येतत्सूत्रं च व्याचष्टे **प्रतीकेत्यादिना** । प्रतीकस्य विष्णुत्वाभावात् तस्मिन्विष्णुभावना न कर्तव्या ।

१७०४ 'योऽन्यथासन्तमि'त्यादिश्रुतीतिहासादिवचनैरयथार्थस्य ध्यानस्यानर्थसाधनत्वप्रतिपादनात् हरौ प्रतीकबुद्धिवत्प्रतीकेऽपि हरिबुद्धिरन्याय्येत्येतदुच्यते **योऽन्यथेत्यादिना** ।

१७१६ न हि विप्रे चण्डालबुद्धिवच्चण्डालेऽपि विप्रबुद्धेरकरणीयत्वे विशेषः कश्चित् । दृश्यते चानर्थसाधनत्वमहौ स्रग्बुद्धिवत् स्रज्यप्यहिबुद्धेः । अतोऽतिहीने प्रतीकेऽत्युत्तमविष्णुभावनां कुर्वतो विष्णूत्कर्षापहारदोषेणातिकष्टनरकप्राप्तिर्भवत्येव । इयमेव ह्यभिप्रेत्य प्रतीके विष्णुभावना निषिद्धा भगवता **न प्रतीक इति** ।

१७१७ 'एवं तर्हि नाम ब्रह्मेत्युपास्त' इत्यादिवचनस्य कोऽर्थ इत्यपेक्षायामाह **प्रतीकेति** । अतो न प्रतीकाद्यभेदेन विष्णुर्ध्येयः किं तु सर्वप्रतीकस्थत्वेनैव ध्येयः ।

*॥ इति नप्रतीकाधिकरणम् ॥ ३ ॥*

* * *

# ॥ ब्रह्माधिकरणम् ॥

१७१८ 'न केवलं पतित्वेन ध्येयः किन्तु ब्रह्मत्वेन च ध्येय' इत्यत्र प्रकाशिकावचनमाह **ब्रह्मेति** । अनेन 'ब्रह्मदृष्टिरुत्कर्षादि'ति सूत्रं व्याख्यातं भवति ।

१७२० अत्र विष्णोर्विश्वपतित्वमसहमानेन 'आत्मेति तूपगच्छन्ती'त्यादिसूत्रत्रयस्य यदन्यथाव्याख्यानं कृतम् 'अहं ब्रह्मेत्युपासनमत्र विधीयत' इत्यादि तद्विघटयति **नात्मेत्यादिना** । नात्मेति सूत्रम् अहंब्रह्मेत्युपासनाविधायकम् । जीवब्रह्मणोर्भेदस्य प्रागेव साधितत्वात् । न च आत्मशब्दोऽयमहंप्रत्ययवेद्यजीववाची । विष्ण्वैकवाचिनस्तस्य निर्निमित्तमर्थान्तरे प्रवृत्त्ययोगात् । न च नारायणादिशब्दवदात्मशब्दो न विष्णोरेव वाचक इति वाच्यम् । 'द्युभ्वाद्यायतनं स्वशब्दादि'ति सूत्रविरोधात् । अनेन हि सूत्रेण यस्मिन्द्यौरित्यादिवाक्ये श्रूयमाणस्य विष्णुत्वे तद्वाक्यगतात्मशब्दो लिङ्गत्वेन निर्दिष्टः । न हि जीवादिसाधारणोऽसौ विष्णुलिङ्गत्वेन निर्देष्टुं शक्यते । आत्मशब्दविरोधादेव । 'नानुमानमतच्छब्दात्' इति सूत्रेण रुद्रं निराकृत्य 'प्राणभृच्च' इति सूत्रेण जीवोऽपि निराकृतः । 'यस्मिन् द्यौः' इत्यादिवाक्यार्थत्वेन जीवस्यात्मशब्दार्थत्व इदं निराकरणमसम्भावितं स्यात् । गुणैराततत्त्ववाच्यात्मशब्दो विष्णावेव वर्तितुं योग्यो न जीव इति । यतो विष्णुनोक्तमात्मब्रह्मेत्यादिना नारायणाध्यात्मे । अतो विष्णुरेवात्मशब्दार्थः न तस्य जीवेनैक्यम् । यदि तदभिप्रेतं सूत्रकृतस्तेन तर्ह्यात्मशब्दो जीवे न निवार्येत । जीवविष्णोरभेदेन विष्णाविव जीवेऽप्यात्मशब्दः किं न स्यादित्याशङ्क्य 'भेदव्यपदेशात्', 'स्थित्यदनाभ्यां चे'ति सूत्राभ्यां जीवेशभेदं साधयित्वा निवारित आत्मशब्दो जीव इत्यर्थः ।

१७२६ आरोपितभेदाभिप्रायेण जीवेशभेदोपपादनं सूत्रेषूपपद्यते चेत्क्वचिदनारोपितभेदेन भाव्यम् । आरोपस्यानारोपपूर्वकत्वदर्शनात् । रजताद्यारोपे दृश्यते हि अनारोपितं रजतम् । नगरादौ क्वचिदनारोपितरजताङ्गीकारे तन्न्यायेन जीवेशभेदस्यानारोपितस्य सिद्धिर्दुर्वारा । तदाह **व्यावहारिकेति** ।

१७२७ अपि च भेदमात्रमवस्तुभूतमिति वचनं सत्यमनृतं वा । सत्यं चेद्वचनतदर्थभेदस्य सत्यत्वात् भेदमात्रमवस्तुभूतमित्येतद्व्याहतं स्यात् । अनृतं चेदर्थभावात् भेदो वस्तुभूतः स्यात् । परस्परविरुद्धयोरितरनिषेधस्येतरविधिनान्तरीयकत्वात् । उक्तमसत्यं न भवति चेत् सत्यमित्येव सत्यं न भवति चेदनृतमित्येव न हि कस्यचित्संशयः । तदाह **व्यावहारिकमिति** ।

१७३१ ननु स्वप्नस्य मिथ्यात्वेन तत्रेदं रजतं नेदं रजतमिति व्यवहृतयोरेकत्वतदभावयोरुभयोरपि मिथ्यात्वान्न परस्परविरुद्धयोरितरेतरनिषेधेऽन्यविधिसिद्धिरित्यत आह **न स्वप्न इति** । स्वप्नप्रतीतयो रजततदभावयोः स्वप्नप्रतीत्वमात्रेण बाध्यत्वे स्वप्नद्रष्टुरपि बाध्यत्वं स्यात् । न च तस्य स्वप्नगजादिवद्बाध्यत्वं वक्तुं युक्तम् । स्वप्नमहमन्वभवमिति स्वप्नोत्तरकालेऽपि तद्द्रष्टुरनुवर्तमानत्वात् । अतः परस्परविरुद्धयोरुभयोरपि बाधस्य क्वचिदप्यसम्भवाद्भिन्नं सर्वमसत्यमित्येतद्वचनतदर्थयोरपि भिन्नत्वेनासत्यत्वापत्त्या न जीवेशभेदसत्यत्वं निराकर्तुं शक्यते । नापीशादन्यत्रात्मशब्दो नेतुं शक्यते । अतो नाहं ब्रह्मेत्युपासनं नाप्यादित्यादिप्रतीकं ब्रह्मेत्युपासनं युज्यत इत्यर्थः ।

१७३५ एवमात्मेति सूत्रार्थं परोक्तं विघटय्य 'न प्रतीके न हि स' इत्येतत्सूत्रोक्तन्यायविरोधेन 'ब्रह्मदृष्टि-रुत्कर्षादि'त्येतत्सूत्रार्थं परोक्तं विघटयति **न च इत्यादिना** । यथाऽऽत्मनः सकाशाद्भिन्नत्वादुपासकेन स्वात्मतया प्रतीकं नोपास्यम् । एवं ब्रह्मणः सकाशादपि भिन्नत्वाद्ब्रह्मतयाऽपि नोपास्यमेवाविशेषात् । अतः अहंग्रहं प्रतीके निषिध्य तत्र ब्रह्मतोपास्तिमङ्गीकुर्वतः स्वपूर्वापरवाक्यविरोधो दुष्परिहरः । अथोच्येत । उत्कृष्टत्वाद्ब्रह्मणस्तद्दृष्टिः प्रतीके ब्रह्मव्यतिरिक्तेऽपि योग्या । उत्कृष्टदृष्टिर्ह्यपकृष्टे क्रियमाणा दृष्टा । यथा क्षत्तरि राजदृष्टिरिति । तर्ह्यात्मदृष्टिरपि मन आदिप्रतीके क्रियेत । तस्मादचेतनादुत्कृष्टत्वादात्मनश्चेतनत्वात् । अतोऽन्यस्मिन्नन्योपासनं कथमपि न घटत इत्यभिप्रेतं न प्रतीक इति सूत्रं कुर्वतो भगवत इत्यर्थः ।

१७३८ उत्कृष्टतया दृष्टादपकृष्टाल्लोके फलदर्शनाद्ब्रह्मतयोपासितात्प्रतीकात् फलं भविष्यतीति चेत् । निकृष्टेन प्रतीकेनाभिन्नतया ध्यानाद्ब्रह्मणोऽनर्थोऽपि भवेदेव । प्रतीकं तु मन आदिकं ब्रह्मतयोपासितमपि नार्थदं भवितु-मर्हति । न ह्यचेतनं क्वचिदुत्कृष्टतया सम्भावितं तुष्यद्वाऽर्थं ददद्वा दृष्टम् । ब्रह्मस्वरूपेण नीचवस्तु ध्यायतः ब्रह्म तु क्रुद्धं सदनिष्टं दद्यादेव लोकवत्तदाह **उत्कर्षादिति** ।

१७४० ननु प्रतीकं ब्रह्मतयोपास्यते न पुनर्ब्रह्म प्रतीकतया । अतः कथं बह्मणः कोप इत्येतामाशङ्कां लोकवदित्युक्तं विवृण्वन् परिहरति **चण्डाल इत्यादिना** ।

१७४२ **आत्मानं स इति प्रोक्तमितिवद्ध्येव कुप्यतीति** । स्वात्मानं चण्डाल इति प्रोक्तवान् मत्वा कुप्यतीत्यर्थः ।

१७४४ न च वाच्यं प्रतीकस्य ब्रह्मात्मकत्वात्तत्र ब्रह्मदृष्टिः क्रियते न ब्रह्मणः प्रतीकदृष्टिस्तस्य प्रतीकाद्भिन्नत्वादतः कथं ब्रह्मकोप इति । ब्रह्माभिन्नात्प्रतीकाद्ब्रह्मणो भेदासम्भवात् । न हि भवति घटः स्वयुक्तघटेनायुक्त इति । अतः प्रतीकस्य ब्रह्मतया ध्यानेऽपि ब्रह्मणोऽपि प्रतीकात्मता ध्यातेति तत्कोपो दुष्परिहरः । तदाह **ध्यात इति** ।

१७४५ न च वाच्यं यथा चण्डालादौ राजभावनां कुर्वन्नपि कश्चिद्राजाऽपरिज्ञातो न राज्ञा दण्ड्यते । एवं ब्रह्मदृष्टिं प्रतीके कुर्वन्नपि कश्चिद्ब्रह्मा परिज्ञातो ब्रह्मणा न दण्ड्यतामिति । सर्वज्ञत्वाद्ब्रह्मणस्तदज्ञानासम्भवादित्याह **नचेति** ।

१७४६ उपसंहरति **तस्मादिति** ।

१७४६ साधनशेषविचारं समाप्य इतःपरं फलं निरूप्यते । फलं च कर्मक्षयादि भगवत्प्राप्त्यन्तं ज्ञानस्य । तत्र तावत् कर्मक्षयं निरूपयति **तथेत्यादिना** ।

१७४६ 'यद्यथा पुष्करपलाश आपो न श्लिष्यत एवमेवंविदि पापं कर्म न श्लिष्यते । तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हैवास्य सर्वे पाप्मानः प्रदूयन्त' इत्यादिश्रुतिबलाद्ब्रह्मज्ञानानन्तरं कृतस्य दुष्कर्मणोऽश्लेषः । पूर्वकृतस्यानारब्धकार्यस्य विनाशश्च भवेत् । तथा दैत्यादीनां विष्णावुत्कटद्वेषोत्पत्तेरनन्तरं कृतस्य सुकर्मणोऽश्लेषः । पूर्वकृतस्यानारब्धकार्यस्य विनाशश्च । तथा चोक्तमग्नेये 'यथाऽश्लेषो विनाशश्च मुक्तस्य तु विकर्मणः । एवं सुकर्मणश्चापि पततस्तमसि ध्रुवम्' इति । अनेन 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्', 'इतरस्याप्येवमसंश्लेषः पाते त्वि'ति सूत्रद्वयं व्याख्यातं भवति ।

१७४८ ज्ञानिना कृतं दुष्कर्मैव तेन न श्लिष्यते न तु विष्ण्वर्पणबुद्ध्याऽनुष्ठितं सुकर्मेत्येतदर्थप्रतिपादकं सूत्रं 'यदेव विद्ययेति ही'ति। तदतीताध्यायगतैः 'अधिकोपदेशादि'त्यादिसूत्रैरुक्तार्थत्वेन व्यर्थमित्याशङ्क्य परिहरति **यदेवेति**।

१७४९ न च 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामि'ति वचनात् ज्ञानिनो दुष्कृतवत् सुकृतमप्यशेषमेव नश्यत्विति वाच्यम्। तत्र साधुकृत्याशब्दस्यानपेक्षितकाम्यकर्मविषयतयोपपन्नत्वात्। अन्यथा 'न ह्यस्य कर्म क्षीयते' इति श्रुतिविरोधात्। न च 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुत' इत्यादिवचनादारब्ध-कार्ययोरपि पुण्यपापयोर्भोगमन्तरेण विनाशः किं न स्यादिति वाच्यम्। 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ यत्सम्पत्स्यत' इति श्रुत्या विरोधात्। अनया यावदारब्धकर्माविमोक्षस्तावज्ज्ञानिजीवनस्य प्रतिपादितत्वात्। अतो वचनान्तरानुरोधादनारब्धकर्मणामेव ज्ञानेन विनाशो वर्णनीयः। अतः प्रारब्धकर्मोपभुज्यैव विष्णोर्द्विट् तमो ज्ञानी मोक्षमाप्नोति।

१७५२ तदाह **तत इति**। प्रारब्धकर्म च नैकशरीरकर्मसमाप्यं किन्त्वधिकमधिकं मोक्षं साधयतामधिकमधिकमेव कालमनुवर्तत इत्यत्र सत्तत्त्ववचनं प्रमाणमाह **ब्रह्मणामिति**। ब्रह्मशतकालस्यादौ कियतः कालस्य ब्रह्मापरोक्ष-ज्ञानसाधनार्थं गतत्वादपरोक्षज्ञानसाधनमारभ्य किञ्चिन्न्यूनं ब्रह्मशतकालमनुवर्तते हिरण्यगर्भत्वयोग्यजीवस्य प्रारब्ध-कर्म। रुद्रपदयोग्यस्य जीवस्याप्येवं किञ्चिन्न्यूनं पञ्चाशद्ब्रह्मकालमनुवर्तते प्रारब्धकर्म। इन्द्रादिपदयोग्यानामप्येवं प्रारब्धकर्मसु कालतो ह्रासक्रमो भवतीत्यर्थः। अनेन 'भोगेन त्वितरे क्षपयित्वाऽथ सम्पत्स्यते' इति सूत्रं व्याख्यातं भवति।

*॥ इति तदधिगमाधिकरणम् ॥ ८ ॥*

*इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां चतुर्थाध्यायस्य प्रथमः पादः ॥ ४-१ ॥*

* * *

# अथ चतुर्थाध्यायस्य द्वितीयः पादः

१७५३ अभिहितः कर्मक्षयः। उत्क्रान्तिरधुनाऽभिधातव्या। उत्क्रान्तिमार्गौ तु कर्मक्षयवन्न देवमनुष्यसाधारणौ। देवानामुत्क्रान्तिमार्गयोः प्रायेणासम्भवात्। कर्मक्षयस्य सुषुम्नयोत्क्रमणस्यार्चिरादिमार्गगमनस्य च ज्ञानसाध्यत्वेन मोक्षान्तर्भूतत्वान्न तदभिधानमसङ्गतमस्मिन्नध्याये। पृथिव्यादिदेवानां ब्रह्मप्रलये प्रलीयमानानां स्वस्वकारणप्रवेश एव परेशप्राप्तेर्मार्गो न त्वर्चिरादिलोकलक्षणस्तस्य तदा प्रलीयमानत्वेनाभावात्। उत्क्रान्तिश्च स्वस्वकारणेन देवेन ग्रस्यमानदेहानां देवानां न युज्यते। तेषामपि ब्रह्मप्रलयात् पूर्वं मनुष्यलोके अंशेन जातानां उत्क्रान्तिमार्गौ सम्भवतः, न तु मुक्तिस्तेषां तदा। सा तु ब्रह्मलय एव भवति। ये मनुष्यादयो ज्ञानेन क्षीणकर्माणो देहादुत्क्राम्यार्चिरादिमार्गेण भगवन्तं विष्णुं प्राप्तास्तेषामपि निःशेषबन्धमुक्तिर्हिरण्यगर्भस्य मुक्तिसमय एव भवति। तदाह **देवानामित्यादिना**।

१७६० अस्मिन्नर्थे 'क्ष्माम्भ' इत्यादिभगवद्वचनं 'भगवन्तमनुप्राप्ता' इत्यादिश्रुतिवचनं दर्शयति **क्ष्माम्भ इत्यादिना**।

१७६४ भोगस्तु अन्त्यपादाभिधेयो न उत्क्रान्तिमार्गवत् मनुष्याणामेव किं तु देवानामपि विद्यत एवेत्याह **भोग इति**।

१७६५ एवं सति 'वाङ्मनसि दर्शनाच्छब्दाच्चे'त्यादिसूत्रार्थः को भवतीत्यपेक्षित आह **तत्रेति**। 'वाङ्मनसि सम्पद्यते मनः प्राण' इत्यादिवचनेन न केवलं वागादिवृत्तीनां मनआदिषु लयः किं तु वागादिदेवानां मनआदिदेवेषु मुक्तौ प्रवेशश्चोच्यते। 'उमा वै वाक् समुद्दिष्टा मनो रुद्र उदाहृत' इत्यादौ वागादिशब्दानामभिमानिव्यपदेशत्वावगमादित्यर्थः।

१७६६ ननु मोक्षमेकधैव सर्वे किमिति न प्रतिपादयन्तीत्यत आह **पुंसामिति**।

१७६७ सत्त्वरजस्तमोगुणभेदात् सम्यग् ईषत्सम्यग् असम्यङ्मतयः संसारिणो जायन्ते। मुक्तमतिस्तु गुणातीतत्वेन प्राकृतमनोवृत्त्यमिश्रत्वात् सम्यगेव। सा च तत्तन्माहात्म्यतारतम्यानुसारात् तारतम्येन बहुलत्वादिधर्मोपेता। ततोऽप्यतिविशदत्वादिधर्मोपेता लक्ष्मीमतिः। ततोऽप्यतिस्फुटत्वादिधर्मोपेता सर्ववस्त्वनन्तविशेषस्फुरणरूपा नारायणमतिरिति।

१७७३ **समुद्रतरलोपमेति** मुक्तरुद्रादिमतेः सङ्कोचविकासप्रकारो दर्शितः। अग्निज्वालादिवदित्यमुक्तरुद्रादिमतेरेवंरूपत्वाभावातिशयो दर्शितः। तत्र 'सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी'ति वचनादन्यथाज्ञानं तमोजन्यं तद्वन्तवादिनो दुर्दर्शनावलम्बेन तत्त्वतो मोक्षमज्ञात्वाऽन्यथा वदन्तीत्यर्थः।

१७७६ तत्र तावज्जिनोक्तं दूषयितुमनुवदति **आश्रित्येत्यादिना**।

१७७८ दूषयति **तदित्यादिना**।

१७८० यः सततोर्ध्वगतिमान्मुक्तो जिनाभ्युपगतः स दुःखोपेतः। चेतनत्वे सत्यधिकगतिमत्त्वात्। अधिकगतिमद्देवदत्तवदित्यनुमानेन निराकृतत्वान्न सतोर्ध्वगतिमान् मुक्तत्वेनानुमातुं शक्यते। ननु दुःखित्वे चेतनत्वे सत्यधिगतिमत्त्वं न हेतुः। अनूर्ध्वगतिमत्त्वेन सोपाधिकत्वात्। अनूर्ध्वगतिमत्त्वप्रयुक्तत्वाद्देवतादौ दुःखित्वस्येति चेन्नैवम्। दूरोर्ध्वगमनवत्यपि खगे क्लेशयोगादनूर्ध्वगतिमत्त्वस्य साध्याव्यापकत्वेन उपाधिलक्षणरहितत्वादित्यर्थः। अपि च सततोर्ध्वगत्यादिलक्षणे वेदविरुद्धमोक्षे परेणोपन्यस्तानुमानस्य यत्प्रतिपक्षानुमानमुद्भावितं न तस्योपाधिदूषणं भवितुमर्हति। उपाधेरप्यनुमानत्वात्। व्यापकानुपलब्धिलिङ्गकानुमानं ह्युपाधिः। व्यापकोपाधिनिवृत्त्या व्याप्यसाध्यस्य पक्षान्निवृत्तेः साध्यमानत्वात्। एवं सति प्रतिपक्षानुमानस्य प्रतिपक्षान्तरानुमानमुपन्यस्तं स्यादुपाध्युपन्यासेन। न हि प्रतिपक्षानुमानस्य प्रतिपक्षान्तरानुमानं दूषणम्। तुल्यबलवत्त्वात् तयोः। तदाह **प्रतिसाधनेति**।

१७८१ अभ्युपगम्याप्युपाधिदूषणं उपाध्यन्तरमाशङ्क्य परिहरति **अथाऽपीति**। जडशरीरवत्त्वोपाधिरपि न दुःखित्वप्रयोजकः। साधनव्यापकत्वेनोपाधिलक्षणरहितत्वात्। चेतनत्वे सति गतिमत्त्वहेतोः जडशरीरत्वेन लोके व्याप्तत्वात्। तेन हेतुना तस्योपाधेर्नित्योर्ध्वगमनवत्यपि मुक्ते साधयितुं शक्यत्वादित्यर्थः।

१७८२ ननु चेतनत्वे सति गतिमत्त्वहेतुना जिनोक्तमुक्तस्य जडशरीरवत्त्वे वेदोक्तस्यापि तत्स्यात्। चेतनत्वे सति गतिमत्त्वात्। ततश्चापसिद्धान्तः स्यादित्याशङ्क्य परिहरति **आगमेति**।

१७८४ न च न वेदाननुसार्यनुमानेन मोक्षः साधयितुं शक्यते । तेनैव दूषयितुमपि शक्यत्वादित्यतिप्रसङ्गोक्तौ नापसिद्धान्तस्योद्भावनं युज्यते । उद्भावनेऽपि प्रसङ्गमात्रापह्नवत्वेनातिप्रसङ्गः स्यादित्यर्थः । न च लोकाकाशगतिमत्त्वेनोपाधिना जिनोक्तस्यालोकगतस्य मुक्तस्य दुःखित्वं निवारयितुं शक्यते । चेतनत्वे सति गतिमत्त्वहेतुनैव तस्याप्युपाधेः सततोर्ध्वगतिमति मुक्ते साधयितुं शक्यत्वेन साधनव्यापकत्वादुपाधित्वासम्भवात् । साध्यव्यापकत्वे सति साधनाव्यापकस्यैवोपाधित्वात् । तदाह **लोकेति** ।

१७८५ यथा जैनमोक्षोऽनुपपन्न एवं बौद्धानुमतमोक्षोऽनुपपन्नः । यद्यपि विष्णववतारेणैव बुद्धेन सर्वज्ञेन बौद्धमतं कृतम् । तथाऽप्यसुरमोहार्थं कृतमिति पुराणोक्तत्वेनासुराधिकारित्वात् सद्भिस्त्याज्यमेव । यथोक्तं भागवते 'ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम् । बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यती'ति । बौद्धमतमपि प्रतिपाद्यभेदाच्चतुःप्रकारम् । तत्र शून्यप्रतिपादनं ये माध्यमिकाः कुर्वन्ति तैर्मोक्षो मायिभिरिव निरूप्यते । तदाह **एवमिति** ।

१७८९ मायावादिमतस्य माध्यमिकमतेन साम्यं दर्शयितुं तावन्माध्यमिकमतमनुवदति **न किञ्चिदित्यादिना** ।

१७८९ एकपुद्गलवादो बहुपुद्गलवादश्चेति द्विविधः शून्यवादः । तथा हि । वस्तुतः शून्यस्वरूपस्यैव संवृतिवशात् पुद्गलत्वं पुद्गलस्य मुक्तौ न कश्चिदवशिष्यते । तथा संवृत्यैव शून्यस्य बहुधावच्छेदात् बहवः पुद्गला भवन्ति । तत्र शून्यैक्यज्ञानेन यस्य संवृतिर्निवृत्ता तस्य पुद्गलभावनिवृत्त्या शून्यतापत्तिर्भवति । यस्त्वनिवृत्तसंसृतिः संसरन्नास्ते संवृतिसम्बन्धनिवृत्तिवशादेव बन्धमोक्षौ शून्यस्य वस्तुतस्तु न बन्धो न मोक्ष इति ।

१७९७ उपन्यस्तेन शून्यवादेन मायावादस्य साम्यं दर्शयति **एवमित्यादिना** । मायावादोऽपि द्विविधः । एकजीववादो बहुजीववादश्चेति । एकपुद्गलवादः प्रागुक्तः स एवैकजीववादः । यो बहुपुद्गलवादः स एव बहुजीववादः । या संवृतिः शून्यजगदाध्यासकारणत्वेन माध्यमिकैरभिमता सैवाविद्यापरनामा माया ब्रह्मणि जगदध्यासकारणत्वेन मायिभिरभिमता । शून्यब्रह्मणोर्भेदोऽपि न वक्तुं शक्यते । मायिमाध्यमिकाभ्यां निर्विशेषत्वाङ्गीकारात् । न च सच्चिदानन्दलक्षणस्य ब्रह्मणः शून्यत्वं विरुद्धमिति वाच्यम् । निर्विशेषत्ववादिना ब्रह्मणि सत्त्वादेर्निरूपयितुमशक्यत्वात् । अनृतादिव्यावृत्तिमात्रस्य तु सदादिशब्दवाच्यत्वेऽपि शून्यत्वाविरोधित्वात् । माध्यमिकेनापि शून्यस्य सर्वापोहरूपतयाऽभ्युपगमात् । अतो न कथमप्युत्प्रेक्षितुं शक्यते विशेषः शून्यब्रह्मणोर्निर्विशेषत्ववादिनेत्यर्थः ।

१८०१ ननु वेदप्रामाण्यवादिनो मायिनो वेदबाह्यस्य माध्यमिकस्य च कथमेकः सिद्धान्त इत्यत आह **प्रामाण्येति** । अतत्त्वावेदकं प्रमाणमङ्गीकुर्वता मायिनोच्यमानं वेदस्य प्रामाण्यं माध्यमिकेनोच्यमानमप्रामाण्यं च फलत एक एव । अतत्त्वावेदकस्याप्रमाणलक्षणत्वात् । तत्त्वावेदकस्यैव प्रमाणलक्षणत्वात् । अन्यथा प्रमाणाप्रमाणभेदो न स्यादित्यर्थः ।

१८०२ यदतत्त्वावेदकमद्वैतज्ञानैकबाध्यं तत्प्रमाणम् । यदन्येनापि बाध्यं तदप्रमाणमिति प्रमाणाप्रमाणयोः सामयिकभेदे तद्विपरीतसमयोऽपि दुःष्परिहरः स्यादविशेषत्वात् । न च वेदादेर्दीर्घभ्रमजनकत्वेन नाप्रामाण्यमिति वाच्यम् । अल्पकालीनभ्रमजनकस्याप्रामाण्ये अतिदीर्घकालीनभ्रमजनकस्य सुतरामप्रामाण्यात् । अन्यथा चन्द्रप्रादेशत्वाभिज्ञानस्याप्यतिदीर्घकालमनुवर्तमानस्यायथार्थस्य मानत्वं स्यात् । तदाह **दीर्घेति** ।

१८०५ यथा वेदाप्रामाण्यं परिहर्तुमशक्यं मायिना तथा तेन ब्रह्मणः शून्यत्वमपि परिहर्तुमशक्यमिति सविस्तरमाह **निर्भेदत्वमिति**। मायिना ब्रह्मण इव माध्यमिकेन शून्यस्य सजातीयविजातीयस्वगतभेदवर्जितत्वेन अङ्गीकृतत्वात्, ताभ्यां ब्रह्मणः शून्यस्य भेदो वक्तुं न शक्यते। यथा निर्विशेषत्वं वदता मायिना ब्रह्मणि सत्त्वासत्त्वादिधर्मो नाङ्गीकृतः। एवमसौ माध्यमिकेनापि शून्ये नाङ्गीकृतः। अतोऽपि तन्निरूपणस्याप्यविशेषः। न हि सत्प्रतियोगित्वलक्षणमसत्त्वाख्यं धर्मं शून्यस्याङ्गीकरोति माध्यमिकः। शून्याद्वैतभङ्गप्रापत्तेः। दुःखजडनिषेधरूपतामन्तरेण सुखज्ञानयोर्भावरूपयोर्ब्रह्मण्यनभ्युपगमात्र वाद्यभिमतशून्याद्विशेष्टुं शक्यं मायिना। किं बहुना कस्यापि धर्मस्यानभ्युपगमेन कथमपि विशेषस्य वक्तुमशक्यत्वात्। शून्यं ब्रह्मेति संज्ञाभेदमात्रं मायिमाध्यमिकयोर्मते। अतो यः शून्यस्वरूपो मोक्षो माध्यमिकाभिमतः स एव मायिनोऽभिमत इति निराकरणेन निराकृतो भवति। निराकृतस्त्वेष मोक्षो भगवता सूत्रकृता सर्वकामावाप्तिलक्षणस्य स्वाभिमतमोक्षस्य ख्यापनेन। प्रमाणैः सम्यक्स्थापितपक्षविरुद्धपक्षान्तरोदयासम्भवात्। 'नाभाव उपलब्धेरि'ति यत्सूत्रं प्रमाणैरुपलभ्यमानत्वहेतुना जगतः शून्यत्वं निराकारत्वं तेनापि निराकृतः शून्यस्वरूपो मोक्षः। अनेनैव न्यायेन वाद्यन्तराभ्युपगतमोक्षा अपि वैदिकमोक्षविरुद्धा निराकृता वेदितव्याः।

१८०९ तत्र तावच्छून्यस्वरूपं विस्तरेण निराकरोति **आत्मेति**। न हि शून्यवाद्यभ्युपगतमोक्षः पुरुषार्थो भवति। आत्माभावरूपत्वात्। न हि स्वनाशः पुरुषेणार्थ्यते। अप्रियो हि प्रियनाशः। सर्वस्य प्रियो ह्यात्माऽतिशयेन पुत्रादिभ्यः। न हि तस्मादधिकं लोके प्रियं किञ्चिदित्यर्थः।

१८०९ यस्तु सजातीयविजातीयत्वेन भेदवर्जितं शून्यभावरूपं मोक्षमिच्छन्नात्मावशेषमोक्षं नाङ्गीकरोति। किं तु देहवदात्मनोऽपि नाशमाकाङ्क्षते। तन्मते पटनाशोऽपि मोक्षः स्यात्। न हि घटनाशादन्यो नाशो मोक्षतयाऽशास्योऽस्ति। अद्वैतभङ्गात्। अयं घटनाशोऽयमात्मनाश इति भेदस्य संवृतघटाद्युपाधिकत्वेनाङ्गीकारात्। ब्रह्मभावं मोक्षमभ्युपगच्छतो मायिनोऽपीदं घटनाशस्य मोक्षत्वापत्तिदूषणं भवत्येव। न हि ब्रह्मणोऽन्यो कल्पितत्वात् घटनाशः। अद्वैतभङ्गापत्तेरित्याह **यदीति**।

१८१० न च वाच्यं निर्विशेषशून्यतापत्तिरेव मोक्षोऽङ्गीकृतः। घटनाशस्तु घटप्रतियोगिकत्वेन विशेषितो न मोक्षत्वमाप्तुमर्हतीति। आत्मशून्यस्याप्यात्मप्रतियोगित्वेन विशेषितस्य निर्विशेषत्वे घटनाशस्यापि भविष्यतु निर्विशेषत्वप्रसङ्गः। तदाह **दृश्यमान इति**।

१८१० न च अनुमानेन शून्यरूपो मोक्षः साधयितुं शक्यो वेदबाह्येन। आत्मनः शून्यत्वापत्तिर्न मोक्षो देहरहितत्वात् घटनाशवदित्यनुमानपराहतत्वादित्याह **न मोक्ष इति**।

१८१२ ननु यो देहरहितत्वहेतुना दूषितो माध्यमिको मोक्षस्तमवैदिकं ब्रुवन्मायी तस्य हेतोः श्रुत्या बाधं वदिष्यतीत्याशङ्क्य परिहरति **न चेति**। यद्वेदं तन्मिथ्येत्यङ्गीकारादवेद्यस्य श्रुत्याऽपि वेत्तुमशक्यत्वादप्रमाणभूतैव श्रुतिरिति न तया मोक्षदूषणं परिहर्तुं शक्यं मायिनेत्यर्थः।

१८१४ ननु 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत' इति मुक्तमदेहं श्रावयन्ती श्रुतिः कथमुपपद्यत इत्याशङ्क्याह **न चेति**। 'स तत्र पर्येति जक्षन् क्रीडन् रममाणः' इत्यादिविषयभोगं वदन्त्या मुक्तस्य सदेहत्वेन प्रतिपादनत्वात् अदेहत्वश्रुतिः प्राकृतदेहराहित्यविषयतयोपपन्नेति न काचिच्छ्रुतिरदेहत्वप्रतिपादिकेत्यर्थः। अपि च यदि कश्चि-

न्निर्विशेषभावस्य घटनाशवन्निर्दुःखत्वेन मोक्षं निराकुर्यात् तर्हि मायिमाध्यमिकौ किमुत्तरं दद्याताम्। न च तत्र मायी श्रुत्योत्तरं दातुं शक्नोति। तन्मतेऽपि श्रुत्यप्रामाण्यस्याप्यापादितत्वात्। तदाह **निर्दुःखत्वादिति**।

१८१६ किं चाद्वैताभ्युपगमे मुक्तस्यादुःखरूपत्वं न सिद्ध्यति। दुःखेनाभिन्नत्वात्। भिन्नत्वे सविशेषत्वापत्तिः सद्वितीयापत्तिश्च स्यात् तदाह **दुःखमिति**। अतोऽनन्तदोषदुष्टत्वान्मायिसम्मतमोक्षेण सहैव माध्यमिकाभिमतमोक्षो हेय इत्यर्थः।

१८१८ निर्विशेषशून्यस्वरूपमोक्षनिराकरणेन निर्विशेषविज्ञानस्वरूपो मोक्षो योगाचाराभिमतो निराकृतो भवतीत्याह **एवमिति**। ज्ञानमात्राभ्युपगमे न शून्यवादाद्विज्ञानवादोऽतिरिच्यते। निर्विशेषाद्वैताभ्युपगम एव विज्ञानव्यतिरेकेण कालक्षणानभ्युपगमात्। क्षणिकत्वविशेषोऽपि वस्तुतो विज्ञानस्य नाभ्युपगतो विज्ञानवादिना। अतो निर्विशेष-शून्यमोक्षोऽमोक्षः स्यात्। घटशून्यतेत्यादिना यो दोषोऽभिहितः स द्वैतशून्यविज्ञानमोक्षेऽपि भवत्येवेत्यर्थः।

१८२२ मोक्षकालो न निवृत्तद्वैतेन विज्ञानेन युक्तः कालत्वादिदानीन्तनकालवदित्यनेनाप्यनुमानेन द्वैतशून्यरूप-विज्ञानमोक्षोऽपि निराकृतः। न च कालाभावादिदमनुमानं नोदेतुं शक्नोतीति वाच्यम्। कालत्रयेऽपि कालस्य निषेद्धु-मशक्यत्वात्। न च कालः कदा नास्तीति प्रश्नस्य मोक्षावस्थायां नास्तीत्युत्तरमिति वाच्यम्। मोक्षावस्था न निवृत्तद्वैतज्ञानवती अवस्थात्वात्संसारावस्थावदित्येतेनानुमानेन द्वैतशून्यमोक्षनिराकरणानुपपत्तेः। मोक्षावस्थाऽपि कदेति प्रश्नस्य कालं विहाय दुष्परिहरत्वाच्च। इतः पूर्वमपि कालोऽस्ति **सम इति**। यस्त्वेकमुक्तौ सर्वजगद्बाधं न मन्यते बहुजीववादी तन्मते कालनित्यत्वानुभवस्य कथञ्चित्कोपाभावेऽप्येकजीववादिपक्षे भवत्येव कोपः। एक-जीववादिनैकमुक्तौ सर्वशो कालादेर्जगतो बाधानभ्युपगमात्। ततश्चासौ कुपितः कालनित्यत्वानुभवे मोक्षेऽपि कालमापाद्येदानीन्तनकालवत्कालेऽपि द्वैतमापादयेदेव। तदाह **एकजीवेति**।

१८२३ न केवलमेकजीववाद्यभ्युपगतमोक्षस्य द्वैतशून्यत्वमनुभवेन विरुद्धम्। किं तु मोक्षकालः प्रपञ्चवान् काल-त्वादिदानीन्तनकालवदित्यनुमानेनापि विरुद्धमित्याह **विमत इति**।

१८२३ यान्यान्यद्वैतमतानि तानि तान्यप्युक्तदोषैर्दूषितानि। अद्वैतमतानां तद्दूषणानां चातिवैषम्याभावादित्याह **कालेति**।

१८२६ उक्तेन प्रपञ्चसत्यत्वसाधकानुमानेन वैभाषिकसौत्रान्तिकाभिमतोऽपि निर्विषयचित्सन्ततिरूपो मोक्षो निराकृतः। न निर्विषयचित्सन्ततिर्मोक्षः कालसम्बन्धित्वात् संसारवदित्यनुमानेनापि निराकृत इत्याह **मोक्ष इति**।

१८२७ अत एवं प्रतिपक्षानुमानपराहतत्वान्न वेदबाह्यवाद्युक्तानुमानैर्मोक्षः साधयितुं शक्यते। वैदिकैस्तु सर्व-कामावाप्तिलक्षणो मोक्षः साधयितुं शक्यत एव। श्रुतिसामर्थ्यात्। तदाह **अनुमानानीति**।

१८२८ ये वेदप्रामाण्यवादिनः सर्वकामावाप्तिलक्षणं मोक्षं नाङ्गीकुर्वन्ति तैरभ्युपगतमोक्षमनूद्य दूषयति **साङ्ख्ये-त्यादिना**। साङ्ख्यादिभिर्दुःखद्वेषादिदोषाणामिव सुखेच्छादेरपि यन्मोक्षे लयवर्णनं तदप्यनुपपन्नम्। श्रुतिभिर्मोक्षे महानन्दस्य दिव्यविषयभोगस्य चाविसंवादेन प्रतिपादितत्वादित्यर्थः।

१८३० न च अप्रियवत् प्रियस्यापि मोक्षे वृत्तिभावे 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत' इति वचनविरोधः इति वाच्यम् । प्राकृतप्रियहानिविषयत्वादस्य वचनस्येत्याह **प्राकृतेति** । अप्रियं तत्र सर्वं निवर्तत इति विवक्षितम् । न तु प्राकृतमेवेत्यस्ति विशेषः । मोक्षयोग्यजीवस्य प्राकृतप्रियाभावं सुखादिरूपं प्रियमेव हि स्वरूपत्वेन मोक्षभोगस्य श्रावयन्ती गौपवनश्रुतिः । 'बलमानन्द ओजश्च सहो ज्ञानमनाकुलम् । स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्विभोः' इति । यथाऽप्रियमपुरुषार्थत्वेन मोक्षविरोधित्वान्न मोक्षे युज्यते । एवं प्रियाभावोऽप्यपुरुषार्थत्वेन मोक्षविरुद्धत्वान्मोक्षे न युज्यत एव । न च एवमप्राकृतसुखादिरूपत्वम् अन्धतामिस्रयोग्यानाम् असुराणामपि भवत्विति वाच्यम् । तेषामविनाशानादिदुःखादिस्वरूपत्वात् । तथा ह्याग्निवैश्यश्रुतिः 'नित्यानन्दो नित्यज्ञानो नित्यबलः परमात्मा । नैवमसुरा एवमनेवं च मनुष्या' इति । भविष्यत्पर्वणि च 'नित्यानन्दज्ञानबला देवा नैवं तु दानवाः । दुःखोपलब्धिमात्रास्ते मानुषास्तूभयात्मकाः । तेषां यदन्यथादृश्यं तदुपाधिकृतं मतमि'ति । अतः असुरप्रकृतीनामेवाप्राकृतदुःखादिस्वरूपत्वम् । देवप्रकृतीनां त्वप्राकृतसुखादिस्वरूपत्वमेव । अत एवाप्राकृतसुखानुभवरूपमोक्षसिद्ध्यर्थं संसारसुखपरित्यागेन प्रयत्नो घटते । अन्यथा संसारसुखहानाय न कोऽपि यतेत । यथा न प्रियाप्रिये स्पृशत इत्येतेन न मुक्तस्य सुखाभाव उच्यते । एवं 'न प्रेत्य संज्ञाऽस्ती'ति वाक्येनाप्यविनाशी वा अरे अयमात्माऽनुच्छित्तिधर्मेति वाक्यशेषविरोधान्न मुक्तस्य ज्ञानाभाव उच्यते । किन्तु प्रत्यक्षपदार्थवन्मुक्तमन्ये न जानन्त्यमुक्ता इत्येतदेवोच्यते । तदाह **संज्ञेति** ।

१८३६ एतदेव विवृणोति **आशङ्क्येत्यादिना** । अयमर्थः । 'न प्रेत्य संज्ञास्ती'ति यद्याज्ञवल्क्यवचनं तदभिप्रायमजानत्या मैत्रेय्याः शङ्केयम् । सा होवाच मैत्रेयी अत्रैव मा भगवान् मोहान्तमापीपदिति । आपीपत् – प्रापयामासेत्यर्थः ।

१८३९ एवं न प्रेत्य संज्ञाऽस्तीति सम्मुग्धवचनेन मैत्रेय्या शङ्कां कारयित्वा याज्ञवल्क्यः परिहरति । न वा अरे अहं मोहं ब्रवीम्यविनाशी वा अरे अयमात्माऽनुच्छित्तिधर्मेति । अत्र मुक्तज्ञाननाशोऽयुक्त इत्याशङ्कायां परिहारत्वे नाशं वदतोऽयमभिप्रायः । न मुक्तस्यात्मनो ज्ञाननाशः शङ्कनीयः । ज्ञाननाश आत्मनोऽपि ज्ञानस्वरूपत्वेन नाशप्रसङ्गात् । अविनाशी वा ह्यात्माऽसौ प्रसिद्धो वेदेषु । एतदात्मनः शून्यवाद्युक्तशून्यत्वनिराकरणायोक्तम् । न विद्यते उच्छित्तिर्येषां तेऽनुच्छित्तयो धर्मा ज्ञानानन्दादयो यस्यासावुच्छित्तिधर्मेति व्याख्यानेऽविनाशीत्यनेन पौनरुक्त्यं स्यात् । मात्रासंसर्गस्त्वस्य भवतीति श्रुत्या दिव्यविषयानुभवश्रवणाच्च न मुक्तस्य बुद्ध्याद्यभाव इत्याह **मात्रेति** । न च मुक्तस्य द्रष्टृत्वादिधर्मसद्भावे 'यत्र तु अस्य सर्वमात्मैवाभूत् केन कं पश्येत् केन कं जिघ्रेदि'त्यादिवाक्यविरोध इति वाच्यम् । दर्शनघ्राणादिरहितमोक्षप्रतिपादकपक्षाक्षेपपरत्वात् तस्य वाक्यस्य । अन्यथानुच्छित्तिधर्मा यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यादिपूर्ववाक्यविरोधः स्यात् । घ्राणादिभोगाभावस्यानपेक्षितत्वादनपेक्षिताभिधानं च स्यात् । 'येनेदं सर्वं विजानाति तं च केन विजानीयात् तद्विज्ञातारमरे केन विजानीयादि'त्यत्र यत्र त्वस्य सर्वमात्मेत्यादिवाक्यशेषश्च ज्ञानशून्यात्मावस्थानं मोक्ष इत्येतत्पक्षानिष्टापादानरूपेणैव घटते नान्यथा । तथा हि । येन सर्वमिदं ज्ञायते न तावत्तस्य विष्णोरज्ञानं पुरुषार्थः । तथा सति वेदानां वैयर्थ्यं स्यात् । तेषां विष्णुज्ञापनार्थं प्रवृत्तत्वात् । नापि ज्ञातुः स्वस्याज्ञानं पुरुषार्थः । तथा सति घटादिवज्जडतुल्यतया हेयत्वापातात् । न च स्वस्य

स्वज्ञातृत्वे विरोधः कश्चित् । कर्तृकर्मविरोधस्तु अत्र मामहं जानामीत्यनुभवबाधितो नास्पदं लभते । दृष्टबाधेन विरोधोऽपि विरुध्यते तदाह **आचिक्षेपेति** ।

१८४४ ज्ञानरहितमोक्षाक्षेपेण दिव्यविषयानुभवलक्षणमोक्षो योऽभिहितः स तथैवाङ्गीकर्तव्यः श्रुत्यन्तरबलात् । अन्यथा सोऽश्नुत इत्यादिश्रुत्यन्तरविरोधः स्यात् । तदाह **सोऽश्नुत इति** ।

१८४५ ननु मोक्षे घ्राणादिभोगो न युज्यते घ्रातृघ्रेयभेदसापेक्षत्वात् तस्य । यत्र हि द्वैतमिव भवतीत्यत्रेवशब्दे-नासत्त्वप्रतिपादनादित्याशङ्क्याह **अस्वातन्त्र्यादिति** ।

१८४६ लोके यो यदधीनः स तस्याद्वितीय इत्युच्यते न तु मुख्यतोऽद्वितीय एवेति । तथा विष्णवधीनत्वात् घ्रातृघ्रेयादिकं द्वैतमिवेत्युच्यते न त्वविद्यमानत्वात् । तथा सति तदितर इतरं पश्यतीत्यादिवाक्यशेषविरोधः स्यात् । यत्र तु अस्य सर्वमात्मैवाभूदित्येतद्वाक्याद्यत्र हि द्वैतमिवेत्यस्यार्थाधिक्यं च न स्यादित्यर्थः । इवशब्द-स्यास्वातन्त्र्यवाचित्वं शब्दतत्त्वेऽप्युक्तमित्याह **अस्वातन्त्र्येति** ।

१७४७ किं च यदि सुखज्ञानादिरहित एव मोक्षो याज्ञवल्क्येनाभिहितः स्यात् तर्ह्यत्रैव मा भगवान्मोहं तमापीपदिति मैत्रेय्यीचोद्यमपरिहृतं स्यादित्याह **मैत्रेयीति** ।

१७४७ अपि च सुखादिधर्मरहितो मोक्षः पुरुषार्थो न स्यात् । न च दुःखनिवृत्तिरूपत्वेन मोक्षस्य पुरुषार्थत्वं वाच्यम् । सुखोच्छित्तिरूपत्वेनापुरुषार्थत्वस्यापि वक्तुं शक्यत्वात् । किं च यस्तु ज्ञानरहितं मुक्तं मन्यते तन्मते निःशेषदुःखनिवृत्तेः पुरुषार्थत्वं नोपपद्यते । न ह्यात्मसम्बन्धित्वेनाननुभूयमाना दुःखनिवृत्तिः पुरुषार्थत्वेन दृष्टा कुत्रचित् । तदाह **किञ्चेति** ।

१८४८ दुःखनिवृत्तितोऽपि सुखस्यापेक्षितत्वात् सुखदुःखनिवृत्तिरूपमोक्षस्यापुरुषार्थत्वादप्यतिशयेनापुरुषार्थत्वं स्यात् । अल्पसुखार्थमपि महता दुःखेन प्रवर्तमानत्वाज्जनस्य । तदाह **तयोरित्यादिना** ।

१८५४ न च सुखित्वे मुक्तस्य संसारिवद्दुःखित्वमपि स्यादिति वाच्यम् । सुखरहितत्वेऽपि दुःखित्वापत्तेः । लोके सुखरहितचेतनस्य दुःखित्वदर्शनात् । तदाह **विमत इति** ।

१८५५ इतोऽपि निःसुखमोक्षपक्षो हेय इत्याह **सर्वश्रुतीति** ।

१८५६ मोक्षानन्दप्रतिपादकश्रुतिपुराणवाक्यान्युदाहरति **सोऽनानन्दादित्यादिना** । **निर्गुणे ब्रह्मणीति** भगव-द्वचनं भागवतस्थम् ।

१८६० उपसंहरति **अत इति** । न च मोदप्रमोदाद्यानन्दः मुक्तस्य कथम्, विदेहत्वादिति वाच्यम् । श्रुतिपुराण-वाक्यैरप्राकृततद्वत्त्वेनोक्तत्वात् । तथा हि । 'तस्मै स्वलोकं भगवान् प्रसादितः सन्दर्शयामास परं न यत्पदम् । व्यपेतसंक्लेशविमोहसाध्वसं सन्दृष्टवद्भिर्विबुधैरतिस्तुतम् । न वर्तते यत्र रजस्तमस्तयोः स्थानम्' इत्यादिभागवत-वचनेनैव अप्राकृतदेहत्वेन उक्ताः मुक्ताः । परं न यत्पदं यस्माल्लोकात्परं पदं स्थानं नास्तीत्यर्थः'।

१८६० 'ऋचां त्वः पोषमास्ते' इत्यनया ऋचादिपुष्टत्वेन सामगानादिकर्तृत्वेनोक्तत्वान्मुक्तब्रह्मणो देहवन्त इति प्रतीयते। 'अस्माल्लोकात्प्रेत्य कामान्नी कामरूप्यनुसञ्चरन्' इत्यादिश्रुत्याऽपि संसारमण्डलातीतत्वेन मुक्तोऽप्राकृत-रूप इत्युच्यते। प्रकृतिकार्यरूपत्वाभावादेव मुक्तानां देहो न तेभ्यो भिन्न इत्यवसीयते। तदाह **शिरःकरेत्यादिना**।

१८६८ मुक्तिभाजो देहयुक्ताः चेतनत्वात् संसारिवदित्याद्यनुमयाऽपि देहेन्द्रिययुक्तं मुक्तस्वरूपं ज्ञायत इत्याह **शिरःकराद्यैरिति**।

१८६९ यथा देहशून्यत्वमनुपपन्नं मुक्तस्यैवं तस्य ब्रह्मत्वापत्तिरपि न प्रमाणेन साधयितुं शक्यते। बहुश्रुतिविरो-धात्। तथा हि। 'सोऽश्नुते सर्वान्कामान् सह ब्रह्मणा विपश्चिता', 'एतमानन्दमयमात्मानमुपसङ्क्रम्य', 'इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन्। एतत्सामगायन्नास्ते', 'एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते। स उत्तमः पुरुषः। स तत्र पर्येति जक्षन् क्रीडन्', 'अमृतस्यैष सेतुः', 'उतामृतत्वस्येशानो यदन्नेनातिरोहती'त्यादिश्रुतिभिर्हि मुक्तस्य भगवद्वशस्यैव सर्वकामावाप्तिरुच्यते। तदाह **न ब्रह्मरूपत्वमिति**।

१८६९ 'तथोपेत्य सुखार्णवं भोगान् भुङ्क्ते' इत्यनेनैतमानन्दमिति श्रुतिं सूचयति। यत्तदित्यनेनैष सम्प्रसाद इत्येतां श्रुतिं योजयन् दर्शयति। यत्प्रसादाद्यं परञ्ज्योतिःशब्दाभिधेयं प्राप्य विभूतिस्वरूपो मुक्तजीवो जक्षन् क्रीडन्नास्ते स एव विष्णुरत्रोत्तमपुरुषशब्देनोच्यते। तस्य जीवादवरादुत्तमपुरुषवाचित्वान्न जीवोऽर्थः। 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत' इति वचनात्। तथैव 'परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचे'त्यत्र आत्मशब्देनापि गुणैराततत्वाद्विष्णुरेवोच्यत इत्यर्थः।

१८७२ अनुमानेनापि मुक्तस्येशेनाभेदाभावं दर्शयति **काल इति**।

१८७३ अयमर्थः। न हि कश्चिदिदानीमीशेनाभेदमापद्यमानो दृष्टः। यत्पूर्वं येन भिन्नमासीत् तत्पश्चात्तेनाभिन्नं भवतीत्येतत् न हि कथञ्चिद्युक्त्या साधयितुं शक्यते। न हि किञ्चिद्येन पूर्वं भिन्नं तेन पश्चादभेदं केनापि कारणेनापद्यमानं दृष्टं कुत्रचित्। यथोक्तं श्रीविष्णुपुराणे 'परमात्मात्मनोर्योगः परमार्थ इतीष्यताम्। मिथ्या तदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यत' इति। मुक्तस्य हरिणा भेदाभेदौ नाहं सः सोऽहमित्यनुसन्धानकारणभूतावपि युक्तिविरुद्धौ।

१८७४ न हि कुत्रचित् तथाविधौ भेदाभेदौ चेतनस्य चेतनान्तरेण लोके दृष्टौ। तदाह **न चैवेति**।

१८७५ जैनमोक्षनिराकरणमारभ्योक्तमर्थमुपसंहरति **इत्थमिति**। सर्वकामावाप्तिलक्षणत्वेन यः सर्वपुरुषार्थोत्तमो मोक्षस्तमपि जैनबौद्धसाङ्ख्यादयो भ्रमाकुलितत्वाद्यतः सम्यङ् न विदुरतस्तैः कृतानि मोक्षप्रतिपादनानि भ्रममूलानि। लोके मूढा अप्यात्मनः सुखभोगः स्यादितीच्छन्ति। न तु तत्र विप्रतिपद्यन्ते। तेभ्योऽप्येते मोक्षे घ्राणादिसुख-भोगमनङ्गीकुर्वतो वादिनो मूढा इत्यर्थः।

१८७६ अधुना सिंहावलोकनन्यायेन तावत्तृतीयाध्यायचतुर्थपादस्याधिकरणेषु पूर्वपक्षयुक्तीरभिधाय क्रमेण सिद्धान्तयुक्तीराह **औदार्यमित्यादिना**।

१८७८ एतदध्यायप्रथमपादस्य अधिकरणेषु पूर्वपक्षयुक्तीरभिधाय क्रमेण सिद्धान्तयुक्तीराह **सुशक्यतेत्यादिना** ।

१८८० एतत्पादाधिकरणेषु पूर्वपक्षयुक्तीरभिधाय क्रमेण सिद्धान्तयुक्तीराह **व्यामिश्रतेत्यादिना** । यो देवानां स्वस्वोत्तमदेवतानुप्रवेशरूपो मोक्षो वक्तुमारब्धोऽस्मिन्पादे सोऽधुना प्रपञ्चते 'वाङ्मनसि दर्शनादि'त्यादिसूत्रैः । उमादीनां रुद्रादिषु प्रवेशोऽभिहितः । ततोऽन्येषां देवानां पृथिव्यादिषु लयोऽभिहितो 'भूतेषु तच्छ्रुतेरि'त्यनेन सूत्रेण ।

*॥ इति भूताधिकरणम् ॥ ४ ॥*

* * *

## ॥ नैकस्मिन्नधिकरणम् ॥

१८८२ तत्रोदाहृतश्रुतौ 'वायाविन्द्रः सोम आदित्यो बृहस्पतिरि'तीन्द्रादीनां यस्मिन् लय उच्यतेऽसौ भूतमध्यपतितत्वेऽपि प्रधानवायुरेव न भूतवायुः । न हि तस्मिन्निन्द्रस्य तत उत्तमस्य लयो युज्यते । वातीति वायुरिति योगस्य प्रधानवायौ युक्तत्वात् स एवात्र वायुशब्देनोच्यते न च भूतवायुरेव । 'वाति स वायुः एष देवतानादिर्योऽयं पवत' इति श्रुतिविरोधात् । प्रधानवायोरपि जडशब्दभूतवाय्वभिमानित्वाच्च भूतवायुशब्दवाच्यत्वं युक्तम् । न च अप्रधानवायुरेव जडभूतवाय्वभिमन्यमान इति वाच्यम् । महदादिसर्ववस्त्वभिमानिनि प्रधानवायौ भूताभिमानस्यापरिहार्यत्वात् । न हि राज्याधिपतेर्ग्रामस्वामित्वं न विद्यते । तदाह **प्रधानेति** ।

१८८३ 'भूतानि पर' इत्यनेन वचनेन भूतानां परमात्मनि लयोऽभिहितः । स प्रधानवायुद्वाराऽवगन्तव्यः । प्रधानवायुरेव साक्षात्परे प्रविशति । 'स प्राणमसृजत प्राणः श्रद्धां खं वायुमि'त्यादिश्रुत्या मुख्यवाय्वादिक्रमेण सृष्टिश्रवणात् । भूतानां च पृथिव्यादीनां स्वस्वकारणदेवताप्रवेशद्वारा मुख्यवायौ प्रवेशो न तु साक्षात् । सर्वेषामिन्द्रसोमादीनामपि यो मुख्यवायौ श्रुत्युक्तः प्रवेशः सोऽपि स्वस्वकारणदेवताप्रवेशेनैवावगन्तव्यः । तदाह **तस्मिन्निति**।

१८८४ तमेव स्वस्वकारणप्रवेशक्रमं प्रपञ्चयति **तस्मादित्यादिना** ।

१८८६ ननूमागिरीशयोर्वारुणीशेषजन्मन्येव मुक्तिर्भारतीमुख्यवायोरपि ब्रह्माणीब्रह्मजन्मन्येव मुक्तिरभ्युपगन्तव्या । 'स्थितप्रज्ञोऽपि यस्तूर्ध्वं प्राप्य रुद्रपदं ततः । साङ्कर्षणतनौ मुक्तिमगाद्विष्णुप्रसादत' इत्यादिवचनात् । प्रसिद्धं हि बलेर्भविष्यदिन्द्रत्वमिव मुख्यवाय्ववतारस्य हनुमतो भविष्यद्ब्रह्मत्वं पुराणादिषु । अतो नोमादिष्विन्द्रादीनां मुच्यमानानां लयो युज्यते ।

तथा सति तेषामुमादिभिः सह पुनर्जननप्रसङ्गात् । नायं दोषः । अत्रोमादीनां मुक्तिकालीनप्रवेशस्थानत्वमुच्यते । 'अग्निरिन्द्र इन्द्र उमायामुमा रुद्रे विलीयत' इत्यादिश्रुतौ । तत्रोमागिरीशभारतीवायुशब्दैर्वारुणीशेषब्रह्माणीविरिञ्चादीनां पूर्वगत्या ग्रहणोपपत्तेः । यस्मादुमादय एव महाकल्पान्तरे वारुण्यादिपदं प्राप्नुवन्ति । अतो यदेतदुमादिपदस्थास्तदा तानुपासितवन्त इन्द्रादिजीवा वायोर्ब्रह्मत्वे सत्यनन्तरमुच्यमाना उमादीन्प्रविशन्तीत्युमादिषु मुच्यमानजीवप्रवेशवचनं युज्यते । तदाह **उमेति** ।

१८८८ अधुना सुपर्णादिषु प्रविश्य मुच्यमानानाह **सूर्य इति** ।

१८८९ नन्विन्द्रस्योमां प्रविश्य रुद्रे प्रवेशः श्रुत्युक्तः तत्कथं तस्य सौपर्णीं प्रविश्य गरुडप्रवेशोऽत्रोक्तः । नैष दोषः । यदोमायां कामदेवः प्रविशतीत्युच्यते तदोमाशब्देन वारुण्युच्यते । यदेन्द्रः प्रविशतीत्युच्यते तदोमाशब्देन सौपर्ण्युच्यते । गरुडश्च गिरीशनाम्नोच्यते इति व्यवस्थायोगेनाविरोधात् । तदाह **इन्द्रेति** ।

१८९० इन्द्रं प्रविश्य मुच्यमानानन्यांश्च कांश्चित्कामं प्रविश्य मुच्यमानानाह **भृग्वादय इत्यादिना** । आदिशब्देनात्र वसिष्ठमरीच्यादेर्ग्रहणम् ।

१८९२ **सनादय इत्यत्र** आदिशब्देन सनन्दनसनत्सुजातादेर्ग्रहणम् । शिष्टा इत्यत्रोक्तव्यतिरिक्तदेवा हव्यवाहं प्रविशन्तीत्यर्थः । अनेनाग्नौ सर्वे देवा विलीयन्त इत्येतच्छ्रुतिविषयः प्रदर्शितो भवति ।

१८९३ **तमेव** धर्ममेवेत्यर्थः । **सुरानुगा** देवगन्धर्वा इत्यर्थः ।

१८९३ य एते स्वस्वोत्तमदेवेषु प्रविष्टा उक्तास्ते परकायप्रविष्टयोगसिद्धवत्तत्रैव भोगान्भुञ्जते मुक्तास्तत्रैव व्यक्तस्वरूपानन्दाश्च भवन्ति । सच्चिदानन्ददेहेभ्यो मुक्तेभ्यः स्वस्वोत्तमदेवेभ्यो बहिः स्वेच्छया निर्गत्य क्रीडित्वा तानेव प्रविशन्ति । अयं हि तेषां सायुज्यलक्षणो मोक्षो यः क्षीरनीरवदाविष्णुं स्वस्वोत्तमदेवतासंश्लेषः संयोगो नामायं प्रवेशः । स्वस्वोत्तमदेवताप्रवेशस्तु क्रमेण प्रलयकाले सायुज्यहीनानामपि भवत्येव । सृष्टिकाले तु ताभ्यो बहिर्निर्गतानां तेषां सामीप्यादिकमेव न सायुज्यम् । प्राप्तसायुज्यमोक्षाणां तु सृष्टिकालेऽस्त्येव स्वस्वोत्तमदेवतासु प्रवेशः । तदेतदाह **भोगांश्चेत्यादिना** ।

१८९६ यदेतदुक्तं तत्परमश्रुतौ विस्तरेणोक्तमित्याह **उक्तमिति** ।

१८९६ न चोत्तमदेवानां स्वावरदेवतानुप्रवेशो मुक्तिर्न स्यादिति वाच्यम् । सृष्टिक्रमविपरीतक्रमभावित्वात् लयवन्मोक्षस्य । लयश्च सृष्टिक्रमविपरीतक्रमेणेत्युक्तं सूत्रकृता 'विपर्ययेण तु क्रम उपपद्यते चे'ति । योऽयं देवानां स्वस्वकारणभूतदेवतालय उक्तः प्रवेशनामको यश्च चतुर्थपादे विशेषेण वक्ष्यमाणो भोगस्तदुभयमेव तेषां मुक्तिश्च । अतो यथा महदादिजडानां सृष्टिक्रमवैपरीत्येन लयः । तथा तदभिमानिदेवानामपि सृष्टिवैपरीत्येनैव मोक्षो युज्यते लयविशेषत्वान्मोक्षस्य । ब्रह्मादिक्रमेणैव देवानां बिम्बप्रतिबिम्बभावादेवावरदेवस्योत्तमदेवे लयः पूर्वोक्तस्तथैवाङ्गीकर्तव्यः । तथैतेषां बिम्बप्रतिबिम्बभावश्च पैङ्गिश्रुत्योक्तत्वाद्युज्यते बिम्बभूतदेव एव प्रतिबिम्बभूतदेवस्य लयो मुक्तिदशायां न तु प्रतिबिम्बभूतदेवे बिम्बभूतदेवस्य । बिम्बाधीनत्वात्प्रतिबिम्बस्य । अतः प्रतिबिम्बरूपाणां मुक्तानां स्वस्वबिम्बदेवताधीनता न कदाचिदपि निवर्तते । तदेतदाह **सर्गक्रम इत्यादिना** ।

१८९८ **तेजोऽभिदां त्विति** श्लोकस्यायमर्थः— 'प्राणस्तेजसि तेजः परस्यां देवतायामि'त्यस्यां श्रुतौ प्राणपरमात्मनोर्मध्ये तेजःशब्देन या निर्दिष्टा श्रीस्तां लयेऽग्रे भविष्यद्ब्रह्मपदमनुभविष्यन्मुख्यवायुराप्यानन्तरं श्रियमाप्तः । पुनः सृष्टिकालाग्रे विष्णुमाप्यानन्तरं श्रियमाप्तः । ताभ्यां मातापितृभ्यां पुत्रतया प्रसूत उत्पादितः । पुनः प्रलये विष्णुं प्रविश्य मुक्तः सन् तत्र तिष्ठतीति ।

१८९९ ये मुक्तास्तेषां सर्वदा स्थितिप्रकारमाह **सर्व इति**। उक्तप्रकारेण ये विष्णुं प्रविष्टा मुक्तास्ते प्रलयकाले न सुप्तवद्विष्णौ तत्संस्पर्शसुखमजानन्तस्तिष्ठन्ति । किन्तु विष्णुसंसर्गात्सम्यगाविर्भूतमानन्दमनुभवन्त एव तिष्ठन्ति सृष्टिकाले तु विष्णुदेहविशेषान्निर्गत्य वैकुण्ठादिषु क्रीडन्तीत्यर्थः ।

१९०० पूर्वोक्तेभ्योऽन्ये ये निर्ऋत्यादयस्ते धर्मादिषु प्रविशन्तीत्याह **प्रयातीति**। धर्मदेवानां स्वायम्भुवमन्वादिमार्गेण मुक्तिः पूर्वोक्तैव ज्ञातव्या। तत्र मरुद्गणाः शक्रं प्रयान्ति इत्यनेन 'मरुतो मारुत' इति श्रुत्या यो मरुतां प्रधानवायौ लय उक्तः स इन्द्रादिद्वारा उक्त इति ज्ञापितं भवति। पृतनाधिपतिर्विष्वक्सेनः।

१९०० उक्तार्थे च तुरश्रुतिरस्तीति दर्शयति **तुरश्रुतिर्हीत्थमिति**। उक्तार्थमुपसंहरति **इयं विमुक्तिरिति**। अत्रोक्तप्रकारैव न जिनाद्युक्तप्रकारेत्यर्थः ।

*॥ इति पराधिकरणम् ॥ ७ ॥*

*॥ इति श्रीमदानन्दतीर्थभगवत्पादकृतब्रह्मसूत्रानुव्याख्यानटीकायां सन्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां चतुर्थाध्यायस्य द्वितीयः पादः ॥ ४-२ ॥*

* * *

# अथ चतुर्थाध्यायस्य तृतीयः पादः

१९०१ यस्य क्षीणकर्मण उत्क्रमणं निरूपितं प्राक् तस्योत्क्रान्तस्य गमनमार्गो गम्यं च वस्तु निरूप्यते । अनेनार्चिरादिना तत्प्रथितेरित्यादिना पादेनेत्याह **उत्क्रान्तेति**।

१९०१ अस्य पादस्याधिकरणेषु पूर्वपक्षतर्कानभिधाय क्रमेण सिद्धान्ततर्कानाह **सुक्रमेत्यादिना**।

१९०३ अर्चिरादिमार्गेण गतानां ब्रह्मप्राप्तिः श्रूयते। 'स एनान् ब्रह्म गमयति' इति। अत्र यद्गम्यतया प्रतीतं ब्रह्म तच्चतुर्मुखाख्यं कार्यब्रह्मेति बादरिमतम् । परब्रह्मेति जैमिनिमतम् । मतद्वयमेतत्सयुक्तिकमुपन्यस्य यद्भगवता स्वमतमुपन्यस्तम् 'अप्रतीकालम्बनान्नयतीति बादरायण' इति। तद्विवृणोति **प्रतीकमिति**। अयमर्थः। देहाद्यधिष्ठानस्थितविष्णुदर्शिनः प्रतीकालम्बनाख्याः । सर्वगतविष्णुदर्शिनोऽप्रतीकालम्बनाख्याः । तत्र प्रतीकालम्बनास्तावच्चतुर्मुखमेव प्राप्य तदुपदेशेन ज्ञानमुज्चलितं कुर्वन्तस्तिष्ठन्ति । प्रलयकाले विष्णुं प्राप्नुवन्ति । अप्रतीकालम्बनास्तु चतुर्मुखं प्राप्यानन्तरमेव ततो विष्णुं प्राप्नुवन्ति। उभयेऽपि निःशेषबन्धध्वंसं द्विपरार्धावसान एव प्राप्नुवन्ति। तथा चोक्तम् 'अप्रतीकाश्रया ये हि ते यान्ति परमेव तु। स्वदेहे ब्रह्मदृष्ट्यैव गच्छेद्ब्रह्म सलोकताम्। ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते परात्मनः प्रविशन्ति परं पदमि'ति। अनेन न बादरिमतस्यात्यन्तबाधो नापि जैमिनिमतस्येत्युक्तं भवति। कैश्चिदपरब्रह्मणः कैश्चिच्च परब्रह्मणो योग्यताभेदाद्गम्यानुगमात्।

*॥ इति श्रीमदानन्दतीर्थभगवत्पादकृतब्रह्मसूत्रानुव्याख्यानटीकायां सन्यायरत्नावल्यां श्रीपद्मनाभतीर्थभट्टारकविरचितायां चतुर्थाध्यायस्य तृतीयः पादः ॥ ४-३ ॥*

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

# अथ चतुर्थाध्यायस्य चतुर्थः पादः

१९०४ श्रीविष्णुं प्राप्याविर्भूतस्वरूपस्य मुक्तस्य कामभोगोऽस्मिन्पादे प्रतिपाद्यते । अस्य पादस्याधिकरणानां पूर्वपक्षयुक्तिमालामुद्धृत्य सिद्धान्तयुक्तिमालामुद्धरति **अतिक्रमोक्तिरित्यादिना** ।

१९०६ 'सङ्कल्पादेव च तच्छ्रुतेरि'त्यनेन सूत्रेण 'सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ती'त्यादिश्रुतिबलात्सङ्कल्पमात्रसाध्यो मुक्तस्य भोगो न व्यापारान्तरसाध्य इत्युक्तं भगवता सूत्रकृता । 'अत एव चानन्याधिपतिरि'ति यदुक्तं तस्यार्थमाह **अनन्यभृत्यत्वमित्यादिना** ।

१९०७ यस्य मुक्तस्य यावन्तोऽधिपतयो विष्ण्वादय इयदामननादौ प्रतिपादितास्तस्य तेभ्योऽन्यो नियन्ता संसारिण इव स्वाधमः कदाऽपि नास्तीत्येतदेवास्मिन्सूत्रे विवक्षितं न तु तस्य मुक्तस्य न कोऽप्यधिपतिरिति । तथा सति हरेर्मुक्ताधिपतित्वं वदन्त्या 'उतामृतत्वस्येशान' इति श्रुत्या विरोधः स्यात् । तस्मिन्सूत्रे मुक्तस्याधिपतिशून्यत्वं विवक्षितं चेदधिपतिरस्य नास्तीत्येतावता पूर्णत्वादनधिपतिरित्येव योगः स्यात् । न त्वनन्याधिपतिरिति । अन्यशब्दस्य वैय्यर्थ्यात् । न च संसारिण एव विष्ण्वधीना न मुक्ता इति वाच्यम् । अमुक्ता अनन्येनाधिपतिना युक्ता विष्ण्वन्यचेतनत्वात् संसारिपुरुषवदित्यनुमानविरोधात् । तदेतदाह **एत इति** ।

१९०७ न च 'अविभागेन दृष्टत्वादि'त्येतत्सूत्रोक्तेनाविभागेन मुक्तविष्णुभेदस्य निराकृतत्वान्न मुक्तानां विष्णुरधिपतिरिति वाच्यम् । अविभागस्य भेदनिराकरणत्वात् ।

१९०८ न ह्यविप्रयुक्तयोर्लतावृक्षयोरभेदो भवति । तेन न केवलं विष्णोरेव मुक्ताधिपत्यं किन्तु मुक्तब्रह्मादीनामपि स्वस्वावरमुक्ताधिपत्यमस्तीत्याह **मुक्तस्वकीयेति** ।

१९०९ एतदुपपादयति **अनेनेत्यादिना** ।

१९०९ 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते । उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद । अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते । अथ य एतदेवं विद्वान् साम गायत्युभौ साम गायति सोऽमुनैव स एष वाऽमुष्मात्पराञ्चो लोकास्तांश्चाप्नोति देवकामांश्चाथानेनैव ये चैतदस्मादर्वाञ्चो लोकांस्तांश्चाप्नोति मनुष्यकामांश्चेति छन्दोगश्रुतावादित्येऽक्षिणि च स्थितविष्णुज्ञानफलं तावदुपरितनादधस्तनलोकैश्वर्यं सर्वपापनिवृत्तिविशिष्टं प्रतीयते । एतच्च सर्वाशुभनाशलिङ्गान्मुक्तावेवेत्यङ्गीकर्तव्यम् । न ब्रह्ममुक्तस्य सर्वपापेभ्य उद्गमनं युज्यत इत्यर्थः ।

१९१० ज्ञानफलं च लोकाधिपत्यं ज्ञानतारतम्यात् तारतम्येनैव सिद्ध्यति । तत्र समग्रं लोकाधिपत्यं समग्रज्ञानवतो मुक्तविधातुरेवेत्यत्र तुरश्रुतिमाह **लोकाधिपत्यमिति** । 'ता यो वेद स वेद ब्रह्म सर्वेऽस्मै देवा बलिमावहन्ती'त्यस्यां च श्रुतौ व्याहृतिभिः प्रतिपाद्यपरब्रह्मज्ञानफलं मुक्तौ सर्वदेवतापूज्यत्वं प्रतीयमानं मुख्यं मुख्यविधातुरेव । समग्रज्ञानत्वात् । न हि यस्मै कस्मैचित्सर्वे देवा बलिमावहन्तीति युज्यते । तदाह **सर्वे बलिमिति** ।

१९११ ननु यदुक्तं लोकाधिपत्यं मुक्तविधात्रादीनां तन्न युज्यते प्राकृतलोकाधिपत्यस्यामुक्तब्रह्मादिष्वेव युक्तत्वादित्यत आह **लोका इति**।

१९१२ न हि लोक इति प्राकृतभुवनमेवोच्यते। 'लोकस्तु भुवने जन' इत्यभिधानात् जनानामपि लोकशब्दार्थत्वात्। लोकाभिमानिनामपि लोकशब्दार्थत्वाच्च। ततश्चेह योग्यतावशाद्भूरादिष्वन्तर्लोकादिषु लोकेषु वर्तमाना मुक्ताः स्वान् स्वकीयत्वेनाभिमन्यमानान् मुक्तनाथांश्च उत्तममुक्तलोका इति निर्दिष्टा इत्यत्र पैङ्गिश्रुतिमाह **तद्वा इति**। अथवा पूर्वनिर्दिष्टा मुक्ता लोकातीतत्वेनालोकत्वात् पराञ्चोऽलोका इत्यत्राकारप्रश्लेषेणालोका इत्युच्यन्ते। अथवा लोका इत्येव निर्देशः। प्रकाशरूपत्वात् तेषाम्। प्रकाशस्यापि लोकशब्दार्थत्वात्। तदाह **अलोकेति**।

१९१३ एवंविधलोकाधिपत्यं च मुक्तचतुर्मुखस्यैवेत्यत्र तुरश्रुतिमाह **ब्रह्मेति**।

१९१४ ननु 'ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टेदेवकामानां च यच्चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामांश्चे'त्यनेन यदादित्येऽक्षिणि स्थितस्य च हरेर्लोकाधिपत्यमुक्तं तदेवोक्तम् 'अधिपत्यमथ एतदेवं विद्वान् साम गायती'त्यादिना ज्ञानफलं नान्यत्। आदित्यादिस्थेन हरिणैकीभूतस्य विदुषः पृथगाधिपत्यासम्भवात्, अतः कथं मुक्तब्रह्मणोऽपि लोकाधिपत्यमुच्यत इत्याशङ्क्य परिहरति **न चेति**।

१९१६ आदित्यादिस्थे हरौ लोकाधिपत्यस्य पूर्वं पृथगेवोक्तत्वात्। तद्विदुषश्च पश्चाल्लोकाधिपत्यस्य पृथगेवोक्तत्वात्। नादित्यादिस्थे हरावुक्तलोकाधिपत्यमेतज्ज्ञानफलतयोच्यत इति युज्यते। न हि यद्ग्रामस्वामित्वं राज्ञस्तदेव राजनियुक्तपुरुषस्यापीति घटते। न चादित्यस्थेन हरिणैकीभूतस्य विदुषः पृथक्लोकाधिपत्यासम्भव इति वाच्यम्। 'सोऽमुनैवे'त्यादिना आदित्यस्थहरिदत्तलोकाधिपत्यस्य विदुषस्तस्माद्धरेर्भेदेन स्पष्टमुच्यमानत्वात्। न च सोऽमुनेत्यादिना आदित्यस्थपुरुषरूपेण अक्षिस्थपुरुषरूपेण विद्वांस्तांस्तान् लोकानाप्नोतीत्युच्यत इति वाच्यम्। रूपेणेति शब्दस्याश्रवणात्। यदि सोऽमुनेतिवत्तत्स्थत्वेनेति श्रवणं स्यात्। तर्ह्यादित्यादिस्थेन रूपेण विद्वांस्तान् लोकानाप्नोतीत्ययमर्थो युक्तः स्यात्। न चात्र तथा त्वतलादिप्रत्ययोऽस्ति भाववाचकोऽतो नासावर्थे युक्तः। किञ्चास्मिन्पक्षे ये चामुष्मादिति विदुषो मुक्तौ लोकाधिपत्यप्रतिपादकानि व्यर्थान्येव भवेयुः। किन्तु 'य एतदेवं विद्वानयमसौ भवती'त्येतावदेव वाक्यं स्यात्। विदुषश्चादित्यादिस्थहरेश्चाभेदकथने चादित्यस्थहरिगतलोकाधिपत्यस्य विदुषि सिद्धत्वादयमसौ भवतीत्येतद्वाक्यश्रवणं सोऽमुनेत्यादि व्यर्थबहुवाक्यश्रवणं चेत्यादिदोषो दुर्निवारो जीवेशाभेदवादिन इत्यर्थः। अतो 'हिरण्मयपुरुषो दृश्यते हिरण्मयश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदेति नाम स एष सर्वेभ्यः पाप्मभ्य उदित' इत्यत्र पुण्डरीकाक्षत्वादिना य आदित्यादिगतो निर्धारितो विष्णुस्तत्प्रसादात्स्थावरमुक्तजीवादैश्वर्यवन्त एव ब्रह्मादयः क्रमेण गुणपूर्णाः। स्वं स्वमानन्दं निरन्तरमनुभवन्तः समासत इत्युपसंहरति **अत इति**।

१९१७ घटशरावादीनामुदकेन पूर्णानां पूर्तौ तारतम्यमिव मुक्तब्रह्मादीनामपि गुणैः पूर्णानां पूर्तौ तारतम्यमस्तीत्यभिप्रायः। अनेन 'अधिकारिकमण्डलस्थोक्तेरि'त्यादेरर्थः उक्तो भवति। अधुना अयं भगवानाचार्यो यत्प्रसादा-

दागमापारवार्युद्धरणोपायन्यायप्लवरूपमिमं ग्रन्थं कृतवान्, यं चानेनाशेषविशेषपूर्णगुणगणपात्रतया प्रतिपादितवान्, यत्कारुण्येनैवंविधामतिशुद्धां संविदं लब्धवान्, यत्कल्याणगुणेषु स्वस्य निरुपाधिका प्रीतिस्तं पुरुषोत्तमं पौनःपुन्येन नमति **नमो नम इति**।

१९१८ **यस्येति** श्लोकस्यायमर्थः— यच्छब्दश्रवणात् तच्छब्दोऽत्र अध्याहर्तव्यः। यस्य वायोर्देवस्य वेदवचने त्रीणि रूपाण्युदितानि तस्य यदेतत्तृतीयं रूपम् अमुना रूपेण अयं केशवविषयो ग्रन्थः केशवमेवोद्दिश्य कृतः। यदेतद्रूपत्रयप्रतिपादकं वेदवचनं 'बळित्था तद्वपुषेऽधायि दर्शतं देवस्य भर्ग' इत्यादि तदर्थोऽत्र कथ्यते। **बट् इत्यादिना**। तद्रूपत्रयं बट् बलात्मकम्। दर्शतं भगवद्द्रष्टृ। भरणगमनयोगात् भर्गशब्दाभिधेयं महन्महनीयम्। इत्थं वक्ष्यमाणप्रकारेण विष्णुना निहितम्। तत्र भगवतो रामस्य वचः सीतां प्रति नीतवत् तत्प्रथमं रूपम्। नृपव्याजदैत्य-पृतनाक्षयकारित्वात् पृक्षशब्दाभिधेयं द्वितीयं रूपम्। मध्वशब्दाभिधेयमानन्दतीर्थाख्यं तृतीयं रूपम्। तथा च उक्तं भाववृत्तादौ—

१९१९ शास्त्रेणानेन प्रतिपाद्यं विष्णोस्तत्त्वं सङ्क्षिप्य प्रदर्शयन् पुनः तं प्रणमति **निःशेष इति**।

*॥ इति श्रीमदानन्दतीर्थभगवत्पादकृतब्रह्मसूत्रानुव्याख्यानटीकायां सन्न्यायरत्नावल्यां*
*श्रीपद्मनाभतीर्थभट्टारकविरचितायां चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४-४ ॥*

★ ★ ★

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

**श्रीमदानन्दतीर्थभगवत्पादविरचित-श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीका**

**श्रीत्रैविक्रमार्यकृता**

# नयचन्द्रिका

## अथ चतुर्थोऽध्यायः

१६८४ वृत्तानुवादपूर्वकमधिकरणसङ्गतिं दर्शयति **समन्वयेति**। वस्तुनि प्रतिपाद्यपदार्थे साधने साधनाध्याये कथं फलाध्याये साधनं प्रतिपाद्यत इत्याशङ्का भगवतैव निरस्ता। प्रायिकत्वाच्चाध्यायानां पादानां च न विरोध इति। अत्यन्तावश्यम्भावि महापद्यप्यवश्यत्वेन भावनीयम्। तद्विना मोक्षमात्रस्यालभ्यत्वात्।

१६८६ 'आवृत्तिरसकृदुपदेशादि'ति सूत्रं व्याख्याति **कर्तव्येति**। 'स एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इति नवकृत्वोपदेशः।

१६८७ 'लिङ्गाच्चे'ति सूत्रमनूद्य सत्तत्त्ववचनेन व्याख्याति **लिङ्गादिति**। लातव्यतऋजोर्ब्रह्मभावात् पूर्वमेव कियत् पूर्वब्रह्मणां शतात् **सार्धं** परार्धं ब्रह्मशतायुर्दीर्घकालं स्वस्मादर्धसहितं पञ्चसप्तति ब्रह्मवत्सरानित्यर्थः। **तत्त्रिभागं** ततस्तृतीयांशं पञ्चविंशतिब्रह्मवत्सरानिति भावः ॥ १ ॥

१६९३ 'आत्मेति तूपगच्छन्ति ग्राहयन्ति चे'ति सूत्रं व्याख्याति **आत्मेतीति**।

१६९४ तत्र मानमाह **आत्मा ब्रह्मेति**। **तारः** संसारतारकः शुद्धो वा।

१६९५ **स्वराट्** स्वतन्त्रः। 'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानपि। यच्चास्य सन्ततो भावस्तस्मादात्मेति भण्यत' इति वचनान्नियताश्रयत्वेन नित्यत्वमादत्त इति ह्यात्मा। तथाच भागवते— 'हरिर्हि साक्षाद्भगवन् शरीरिणामात्मा ऋषीणामिव तोयमीप्सितः। हित्वा महान्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दम्पतीनामि'ति। नियताश्रयत्वाविवक्षायामृषितोयदृष्टान्त उच्यते। अन्यथा प्रत्यक्षविरोधात् ॥ २ ॥

१७०२ 'नाम ब्रह्मेत्युपास्त' इत्यादौ सामानाधिकरण्योक्तिभ्रमेण प्राप्तामन्यथोपास्तिं निराकुर्वन् 'न प्रतीके न हि स' इति सूत्रं व्याख्याति **प्रतीकेति**।

१७०३ तत्र मानमाह **योऽन्यथेति**।

---

* प्रतिपरिच्छेदं प्रारम्भे सूचिताः सङ्ख्याः अनुव्याख्यानश्लोकसङ्ख्याः इति ज्ञातव्यम्।

१७१७ 'न हि स' इति विपक्षबाधकप्रमाणं प्राबल्यं द्योतयतीत्याकूतम् ॥ ३ ॥

१७१८ 'ब्रह्मदृष्टिरुत्कर्षादि'ति सूत्रं व्याख्याति **ब्रह्मेतीति** । तत्र मानमाह **आधीति** ।

१७२० जीवः स्वयं ब्रह्मेत्युपासते उपदिशन्ति च विद्वांस इति परयोजनां दूषयति **नात्मेतीति** ।

१७२१ 'द्युभ्वाद्यायतनं स्वशब्दात्', 'प्राणभृच्चे'ति निवारयन्नुक्तार्थे मानमाह **आत्मशब्दमिति** । आत्मब्रह्मेति युक्तितः स्वशब्दादिति हेतुप्रयोगरूपेण 'भेदव्यपदेशाच्च', 'भेदव्यपदेशाच्चान्यः', 'भेदव्यपदेशात्', 'स्थित्यदनाभ्यां चे'ति भेददार्ढ्ये मानमाह । पुनःपुनस्तात्पर्यात् ।

१७२६ नन्वत्र प्रतिषिध्यमानो भेदः केवलं व्यवहारमात्रनिवर्तको न परमार्थः । अस्यारोपितत्वादित्यत आह **व्यावहारिकतेति** । आरोपस्यानारोपितदर्शनपूर्वकत्वनियमात् । भेदारोपार्थं कुत्रचित्परमार्थभेदेन भवितव्यमिति भावः । व्यावहारिकं भेदपञ्चकमिति शेषः ।

१७२७ **वचनं** वचनाभिधेयम् । **यदि स्याद्व्यावहारिकमिति** स्वपदमेव व्याख्याति ।

१७२८ **तस्यापीति** । तस्य भेदबाध्यत्वस्य बाध्यता स्याच्चेद्भेदः पारमार्थिकः स्यात् । भेदबाध्यत्वस्याबाध्यत्वं चेत्तेन ब्रह्मणो भेदस्याङ्गीकार्यत्वादयं भेदः सत्यतां गतः ।

१७२८ ननु भेदबाध्यत्वस्याभावापरपर्यायस्याङ्गीकारेऽपि नाद्वैतहानिः । भावाद्वैतं ह्यभ्युपगम्यत इति मैवम् । अभावाद्ब्रह्म भिन्नं चेद्भेदसत्यता स्यात् । अभिन्नं चेदभाव एव वा ब्रह्मैव वा स्यात् । एकतत्त्वस्य निर्विशेषत्वाङ्गीकारात् । अभावमात्रत्वेऽपसिद्धान्तः । ब्रह्ममात्रत्वे तु भेदाभावो नास्तीत्युक्तं स्यात् । तथाच भेदसत्यता स्यात् । भेदभेदाभावयोरेकतरनिषेधोऽन्यतरविधिपर्यवसायीति सोदाहरणं प्रतिपादयति **एकस्येति** ।

१७३१ ननु स्वप्नेऽध्यस्तस्य रजतस्य च रजतत्वं मिथ्या हि । पुनर्बाधप्रतीतरजतत्वस्य शुक्तित्वमपि मिथ्यैव । एवमेवात्रापि परस्परविरुद्धयोर्द्वयोर्मिथ्यात्वं स्यादित्यत आह **न स्वप्न इति** । यद्यपि नेदं रजतं शुक्तिरेवेति प्रतीतं शुक्तित्वं नास्ति तथाऽप्यरजतत्वस्यैव । प्रबोधे सति रजतत्वस्यानुपलभ्यमानत्वात् । न ह्यरजतत्वं नाम शुक्तित्वमेवेति नियमः । वासनायाश्चारजतत्वसम्भवात् । भेदो मिथ्येति स्ववाचः ॥ २ ॥

१७३४ उत्तरसूत्रं पुनरपि तात्पर्याद्विस्तरतो विवृणोति **प्रतीकेति** । तस्मादन्यथोपास्तेरनर्थहेतुत्वात् ॥ ३ ॥

१७३५ स्यादेतत् । प्रतीके इदमात्मेत्युपासना कार्या । न हि स आत्मा अहंग्रहेण उपास्यः । प्रतीके तु ब्रह्मदृष्टिः कर्तव्या । ब्रह्मत्वस्योत्कर्षरूपत्वात् । तथोपास्तौ प्रतीकस्य तुष्टिसम्भवात् । ततोऽभीष्टसौलभ्यादित्येवानयोर्योजनेत्यत आह **नात्मेत्युपासनेति** । इत्युक्तविरुद्धता तस्मात्स्वस्यैवोक्तयुक्तिविरुद्धता । अचेतननामादिप्रतीकादिति शेषः ।

१७४० स्यात्किम् । नात्र प्रतीकस्य ब्रह्मताध्यानेन ब्रह्मणो नीचध्यानं किन्तु प्रतीकस्योच्चत्वमेवेत्यत आह **चण्डाल इति** ।

१७४२ **आत्मानमित्यादेरयमर्थः**। अयं चण्डालो न तु नृप इति वदता आत्मानं विषयीकृत्यैव चण्डाल इति प्रोक्तमित्यभिप्रायसहितवदेव कुप्यति ।

१७४४ ध्यात इत्यादेरयमर्थः । ब्रह्मप्रतीकयोरैक्यस्य ब्रह्मभावे ध्याते सति तदैव ब्रह्मणः प्रतीकभावो ध्यातो न स्यात्किम् । यथा चण्डालस्य राजत्वभावनायां राज्ञा न ज्ञातायां राजकोपो न स्यादेवं प्रतीकस्य ब्रह्मभावनायां च ब्रह्माविज्ञानतायां न ब्रह्मकोप इत्यत आह **न चैवेति** ॥ ४ ॥

१७४६ 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादि'ति सूत्रं व्याख्याति **तथेति** ।

१७४७ 'इतरस्याप्येवमसंश्लेषः पाते त्वि'ति सूत्रं व्याख्याति **तद्विष इति** । भगवद्द्वेषोऽपि द्वेषपरिपाके सति पूर्वस्य पुण्यस्य नाश उत्तरस्यासङ्गता च स्यात् । स्यान्मतम् ।

१७४८ यदेव विद्ययेति हीति ज्ञानिकर्मणोऽन्यकर्मण आधिक्यं ह्युच्यते । शेषत्वादित्यादावपि तदेव । तस्मात् कथं पुनरुक्तिः न स्यादित्यत आह **यदेवेति** ।

१७४९ **पश्चान्मोक्षे वीर्यप्रदं त्विति** मोक्षे आनन्दोद्रेकलब्ध्यर्थं कर्मणो वीर्यप्रदं ज्ञानमिति पश्चादत्रोदितम् ।

'भोगेन त्वितरे क्षपयित्वाऽथ सम्पत्स्यत' इति सूत्रं व्याचष्टे **तत इति** । प्रारब्धं पुण्यपापं च क्षपयित्वा ब्रह्मविदुत्तमः । प्राप्नोति ब्रह्मदर्शी मोक्षं प्राप्नोति ।

१७५० कियता कालेन प्रारब्धकर्मक्षय इत्याशङ्कां प्रमाणवाक्येन परिहरति **ब्रह्मणामिति** । आरब्धकर्मक्षयस्तु उच्चावचानां सर्वेषामपि ब्रह्मणां शतकालात्पूर्वं स्यादेव । कर्मणस्तावत्काले वर्तित्वं ब्रह्मण एव ॥ ८ ॥

*इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीकायां त्रैविक्रमार्यकृतौ नयचन्द्रिकायां चतुर्थाध्यायस्य प्रथमः पादः ॥ ४-१ ॥*

★ ★ ★

# अथ चतुर्थाध्यायस्य द्वितीयः पादः

१७५४ एवं तावद्वैराग्यादिभिरुत्पन्नेन ब्रह्मदर्शनेन कर्मक्षयमात्रम् । एतदध्यायपादानां सङ्गतिं दर्शयति **कर्मेति** ।

१७५५ कथं देवानामुत्क्रान्तिमार्गौ न स्यातामित्यत आह **स्रष्टृष्विति** । अन्येषां व्यासदर्शिनामृषिशतादीनामुत्क्रमणकाल एव मोक्षो न विद्यते ।

१७५९ **प्राप्यापीत्यपि**शब्दाच्चतुर्मुखं प्राप्यापि तेनैव सहेति गम्यते । साक्षान्मुक्तिरिति वचनात् ।

१७६० जीवन्मुक्तेषु भगवल्लोकमात्रं प्राप्तेष्वपि मुक्तिशब्दव्यवहारोऽस्तीत्याकूतम् । अत्र भागवतवचनं स्मृत्यन्तरं श्रुतिं च मानमाह **क्ष्मेति** । यदा ब्रह्मा सर्वसंहारेच्छुः पृथिव्यादिदेवताभिः मनोदेवताभ्यामिन्द्रकामाभ्याम् इन्द्रियदेवताभिश्चन्द्रादिभिस्तद्विषयदेवताभिर्बृहस्पत्यादिभिश्च अहङ्कारदेवतया वीन्द्रेण शेषेण च परिवृतः परिवारभूतैः प्रवेशार्थं बिम्बत्वेन वृतो निर्विकारं ब्रह्म विष्णवाख्यं विशति, तदा ते योगिनोऽपि तेन ब्रह्मणा साकमेवाभिमानसहिता

एव न तु पराभेदेन गताभिमानाः । के योगिनः के भगवन्तमनुप्रविष्टा भगवल्लोकमुख्यं ह्युपयान्ति पृथक् पृथक् स्वरूपमनुप्रविष्टाः प्रजापतौ ब्रह्मचर्यमुपवसेतिवल्लक्षणासम्भवात् ।

१७६५ 'वाङ्मनसि दर्शनाच्छब्दाच्चे'ति सूत्राभिप्रायमाह **तत्र प्रवेश इति** । **तत्र** तेषां मुक्तिं प्राप्तवतां मध्ये । तत्र तस्यामवस्थायाम् । एवंविधे मोक्षे विवक्षिते सतीत्यर्थः । ननु युक्त्यागमाभ्यां तत्त्वतो विचार्यमाणे सति मोक्षस्यैकप्रकारस्यैव सम्भवात् कुतो नानाप्रकारेण वदन्तीत्यत आह **पुंसामिति** । तत्तन्माहात्म्ययोगतो ब्रह्मादिमुक्तानां स्वस्वमहत्त्वतारतम्यानुकूल्येन ज्ञानस्य महत्त्वम् ।

१७६९ **बहुला** विश्वदेशव्यापिनी । **अतिविशदा** अन्यथाज्ञानलवेनाप्यमिश्रिता । **स्पष्टा** बहुविशेषविषया ।

१७७१ **निरन्तरा** विश्वविच्छेदरहिता । विश्वकालव्यापिनीति भावः । **निर्लेपा** विवशसङ्गरहिता । **वीतदोषा** अन्यथाज्ञानमिश्रत्वादिदोषरहिता ।

१७७२ **विशेषान्** नित्याविकारित्वादीन् । ब्रह्ममतेरपि श्रीमतिवत् स्पष्टत्वाभावं तत्तन्त्रत्वादिकं च वैलक्षण्यमभिप्रेत्य प्रायः शब्दः प्रयुक्तः ।

१७७३ **तदन्येषां** समुद्रतरलोपमा ब्रह्मणोऽन्येषां मुक्तानां मतिस्तु समुद्रतरङ्गवत् सङ्कोचविकासवती ।

१७७४ वृद्धिह्रासापेक्षया अग्निज्वालादृष्टान्तः ।

१७७५ यथा खद्योतप्रद्योतनेनात्यल्पेन शाखारूढपक्षिपतत्रे पत्रभ्रमो जायते । एवमेतादृशाऽप्यन्यथैवार्थो ज्ञायते । तदाह **खद्योतेति** । विमता गतिर्दुःखेता पुद्गलावच्छिन्नचिरतरगतित्वात् रणभीतगतिवत् । कथं गतित्वादिहेतुं प्रयुक्तवतोऽयमभिप्रायः स्यादिति न शङ्कनीयम् । नित्यमूर्ध्वं व्रजत्येव पुद्गल इत्युक्तगतेरेवात्र विवक्षितत्वात् ।

१७७९ **अनूर्ध्वेत्यादेरयमर्थः** । अनूर्ध्वगतित्वं दुःखेतरत्वप्रयोजकं न गतित्वमात्रम् । तस्मादनेनोपाधिना प्रयोजकोऽयं हेतुरित्युच्यते तर्हि तत्र ब्रूमः । साधनव्यापकः साध्यसमव्याप्तिर्ह्युपाधिर्नाम । अयं च साध्यव्याप्तिमात्र भवति । या दुःखेता साऽनूर्ध्वगतिरिति व्याप्त्यभावात् । दृष्टा हि दुःखितैव स्वर्गस्य दूरोर्ध्वगतिः । अपि च वेदविरुद्धस्यान्यमोक्षस्य साधकत्वेनानुमानं ह्युत्प्रेक्षते ।

१७८० तत्प्रतिसाधनरूपस्यास्मदनुमानस्योपाधिर्दूषणं न भवति । उपाधेः प्रत्यनुमानसूचनात्मकत्वात् । अत्राविनाभावबलेनोपाधिनिवृत्त्या पक्षात् साध्यनिवृत्तिर्विवक्षिता । विमता गतिर्दुःखेता न भवति । अनूर्ध्वगतित्वरहितत्वाद्वैधुर्येण रणभीतगतिवदिति प्रत्यनुमानं ह्यत्र विवक्षितं स्यादित्याकूतम् ।

१७८१ प्रत्यनुमानस्य प्रत्यनुमानं केनापि नाङ्गीकृतं हि । अभ्युपगम्याह **अथापीति** ।

१७८२ हस्तपादवत् पुद्गलवादिना सशरीरत्वं नाम जडशरीरत्वमभिप्रेतं हि । तस्माद्यत्र मोक्षे विवक्षितगतित्वमस्ति तत्र देहवत्त्वमप्यस्तीति न्यायाङ्गीकारे मुक्तानां शक्त्यादिकमङ्गीकुर्वतोऽपसिद्धान्तः स्यादित्यत आह **आगमेति** ।

१७८३ **अतिप्रसङ्गः** अतिप्रसङ्गतः । कथमतिप्रसङ्गः स्यादित्यत आह **नेति** । या गतिः सर्वलोकानां का गतिरिति । साधनानुग आगमानुसारित्व इत्युक्तन्यायोऽत्राप्यनुसर्तव्यः । मोक्ष एवमस्माभिः प्रतिपाद्यमानप्रकारेण

भवेत् । यद्यपि सर्ववित्त्वादज्ञानादिरहितः सर्वेशत्वान्निरनिष्टत्वेन निरवद्यत्वेन विप्रलम्भरहितो विष्णुः स्वयं सौगतमतं चकार । तथाऽपि न ग्राह्यम् । कुतः । असुराणां मोहायैव चकारेति यदतोऽसुराधिकारत्वात् । तर्हि विष्णोरपि क्वचिद्विप्रलम्भकत्वादाप्तत्वं नास्तीति च न वाच्यम् । गुह्यभङ्ग्या प्रणीतानां तेषामेव सूत्राणां भगवता व्याख्यातानां देवजनस्य सज्ज्ञानजनकत्वात् । अन्यत्र श्रोतृदोषादेव भ्रान्तिकरत्वात् ।

१७८७ एकलमद्वैतमनुमेयबहिस्तत्त्वम् ।

१७८९ अनेन प्रत्यक्षेण प्रतिबिम्बेनानुमेयमेव बाह्यं वस्तु प्रत्यक्षगं प्रत्यक्षं बाह्यं च स्यादेव । जगत्क्षणिकमिति प्रतिपाद्यमानानां चतुर्विधत्वाच्चतुर्विधमुक्तं मायिसाम्यं दर्शयितुं माध्यमिकमतमनुवदति **न किञ्चिदिति** ।

न हि मायिना पक्षेऽप्यहंप्रत्ययवेद्य आत्माऽस्ति । अहम्प्रत्ययवेद्यस्याहङ्कारत्वेन हेयत्वाभ्युपगमात् । न विशेषोऽपि कश्चन चेतनत्वजडत्वसप्रतियोगिकत्वादिकोऽन्यो विशेषोऽपि कश्चन न विद्यते ।

१७९२ **निर्लेपं** निःसङ्गम् । एवंविधं शून्यं भावनया स्वरूपीभूतं मोक्ष इत्यसद्भिरुच्यते ।

१७९६ **शून्यैकरसताज्ञानात्** । आत्मनः शून्यमात्रसारत्वानुभवात् ।

१७९७ मायिसाम्यमुपपादयति **एवमिति** । एकस्यैव जीवत्वं वदन्तीत्येकजीवत्ववादिनः ।

१७९८ बहवो जीवा इति मतमेषामिति बहुजीवमताः । **निर्विशेषत्वे**त्यादेरयमर्थः । उभयोरपि सर्वविशेषरहितत्व-वचनेनैव शून्यं ब्रह्मेत्यनयोर्भेदो नास्तीत्यायातम् ।

१७९९ सच्चित्सुखाद्यात्मकं हि ब्रह्म माय्यङ्गीकरोति । तस्मात् कथं शून्यसाम्यमित्यत आह **सदिति** । अखण्डं तत्त्वमिति वादिनो ब्रह्मणः सच्चित्सुखात्मादिकं ब्रह्मणो विशेषं किमाहो स्वरूपमात्रम् । मनोवाचामगोचरस्य तस्य सच्चित्सुखादिकं कुतश्च प्रमाणादवगम्यते । सत्त्वादिकं ब्रह्मणो विशेषणं तथाऽप्यनृतादीनां व्यावर्त्यानां भेदात् तत्र सत्त्वादिपदानि लक्षणया वर्तन्ते परमित्यत आह **व्यावर्त्येति** ।

१८०० तदेवोपपादयति **अनृतेति** । अपोहं शून्यादिति शेषः ।

१८०१ अपि च सर्वविशेषरहितत्वाद्ब्रह्मणः शून्यादपि कश्चिद्विशेषो नास्ति । मिथो विशेषस्यापि सर्वविशेषान्तः-पातित्वात् । कथं वैदिकस्य मायिनो वेदबाह्येन साम्यमित्यत आह **प्रामाण्यादिति** ।

१८०२ आदिशब्दादपौरुषेयत्वात् स्मृतिप्रामाण्यम् । स्यादेतत् । देशकालानन्तरादिभिः सह बाध्यमानाद्वेद-वाक्यादेरतत्त्वावेदकप्रमाणादापाततो बाध्यानां रज्जुसर्पविज्ञानादीनामप्रमाणानामस्ति हि वैलक्षण्यमित्यत आह **दीर्घेति** ।

१८०४ दीर्घकालमनिवर्तमानस्य प्रमाणत्वाङ्गीकारेऽतिप्रसङ्गं चाह **तलेति** । **आदि**शब्दाद्व्यतिविप्रकृष्टत्वज्ञानं सजातीयविजातीयस्वगतभेदरहितत्वं ब्रह्मणोऽङ्गीक्रियते हि मायिना ।

१८०५ तन्माध्यमिकेनाप्यङ्गीक्रियत इत्याह **निर्भेदत्वमिति** ।

१८०६ कथं सदद्वैतवादिनो माध्यमिकस्य च साम्यमित्यत आह **न हि सदिति** । न हि तेन शून्यत्वं नाम कस्यचित्सत्पदार्थस्याभाव इत्यङ्गीक्रियते सविशेषत्वभयात् । अयमपि ब्रह्मणो देशकालसम्बद्धां सत्तां नाङ्गीकरोत्येव ।

१८०७ ज्ञानं जाड्यविरोधि च । मायिपक्षे शून्यपक्षेऽपि ज्ञानं जाड्यविरोधिमात्रं न भावरूपम् ।

१८०८ तेऽपि अभावरूपा अपि कस्मात्सूत्रकारभट्टारकेणैतत्पक्षमोक्षो न निराकृत इत्यत आह **एतादृशानामिति**। स्वपक्षे मोक्षस्य दृढसाधनेन तद्विरुद्धानां निराकरणं कृतं स्यादेव ।

१८०९ 'नाभाव उपलब्धेरि'त्युक्तितश्च तन्मोक्ष विस्तरतो निराकरोति **आत्मेति** । सुखं मे स्यादितीष्टस्यात्माऽवधिः । यस्यात्मनो विनाशेन शून्यभावो मोक्षो नात्मावधिस्तर्हि कस्यचिद्घटस्य नाशेन शून्यतामोक्षः स्यात् ।

१८१० मायिनोऽपि ब्रह्मणः सत्त्वादिविशेषाणां कल्पितत्वात् घटाभावात् ब्रह्मभावस्य मोक्षस्य निर्विशेषत्वात् घटनाशमात्रेणैव मुक्तत्वं समं हि । कथं घटाभावस्य निर्विशेषमोक्षत्वं घटते । घटप्रतियेगिकत्वादिविशेषवत्त्वादित्यत आह **दृश्यमान इति** ।

१८११ आत्माभावस्यात्मप्रतियोगिकत्वादिविशेषे दृश्यमानेऽपि यद्यविशेषताऽस्तीत्युच्यते तर्हि घटाभाव एव अविशेषः स्यादित्युत्तरम् । अनुभवविरोधस्य समत्वात् । यदि चेदिति पक्षान्तरानुवादनिपातेनापि विवक्षितार्थमेव विशिनष्टि । आहोस्विदितिवत् ।

ननु न हि वयमात्मनाशमात्रं मोक्षं ब्रूमः । साम्प्रतं प्रपञ्चबाधसहितः पाश्चात्यात्माभावो हि मोक्षः । स एव निर्विशेषश्चेति चेत् । अनागतः पाश्चात्यघटाभाव एव मोक्षः स्यात् । स एव निर्विशेषश्चेत्युत्तरम् । वेदाप्रामाण्यवादिना केनानुमानमात्रेण ह्येवंविधो मोक्षो विधीयते । तत्र चैवं प्रत्यनुमा सम्भवति । विमतो मोक्षो न सम्भवति । अदेहत्वात् घटाभाववदिति । तदाह **न मोक्ष इति** ।

१८१२ ननु 'अशरीरो वाव भवत्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत' इत्यागमविरुद्धत्वात् कालात्ययापदिष्टोऽयं हेतुरिति वदन्तं मायिनं प्रत्याह **न चेति** । अतत्त्वावेदकत्ववचनमप्रामाण्यवचनमेवेति पूर्वोक्तवर्त्मना मोक्षादिवाक्यं न तत्त्वावेदकमेवास्माभिरङ्गीक्रियत इति यावन्मनोवाग्भ्यामनुसन्धीयते तावदनिर्वाच्यमित्यभ्युपगमात् ।

१८१३ तथाऽप्यदेहत्ववाक्यविरोधः परिहर्तव्यो हीत्यत आह **न चादेहत्वेति** । यद्दुःखमित्यादेरयमर्थः । विमतो मोक्षो न भवति दुःखत्वाद्यथा क्षतक्षारजदुःखमित्यत्र किं दूषणम् । न च अद्वैतवादिनोर्हेतुरसिद्ध इति वक्तुं शक्यते । निर्विशेषमोक्षस्य दुःखत्वात् । भेदाङ्गीकारे द्वैतभङ्गप्रसङ्गात् । विज्ञानवादोऽप्येवं हेयः । उक्तदोषो घटनाशस्य मोक्षादिः । नैतादृङ्मोक्षरूपता तादृशो निर्विशेषज्ञानभावस्य मोक्षरूपता न सम्भवति ।

१८२० मुक्त्यवस्था न केवलज्ञानिनी । अवस्थात्वात् इदानीन्तनावस्थावत् ।

१८२१ कालो नाम पदार्थो नास्तीति कालस्य सामान्यनिषेधे क्रियमाणे सति पूर्वं कालोऽभूदिदानीमप्यस्ति पश्चादपि भविष्यतीति कालगोऽनुभवस्तन्निरोधं निरुणद्धि च । स्वव्याहतं चेदं कदाचिदपि कालो नास्तीति वचनम् ।

कालाभावाधिकरणत्वेन कदाचिदिति कालत्रयस्याप्यभ्युपगतत्वात् । समश्चायं कालानभ्युपगमदोषो मायिमाध्य-मिकयोगाचार्याणाम् ।

१८२३ यद्यपि बहुजीववादिपक्षे एकमुक्तौ सर्वनिवृत्त्यभावात् कथञ्चित्तद्विरोधो नास्तीत्यभ्युपगम्यते । तथाऽप्येक-जीवत्वपक्षे त्वेकमुक्तावेव सर्वनिवृत्त्यभ्युपगमादियं कालप्रमा तद्विरोधिनी भेदमुपपादयदेव । एकजीववादो मानेनापि विरुद्ध इत्याह **विमत इति** ।

१८२४ कालाद्वैतवादिनो दैवज्ञापसदाः शब्दाद्वैतवादिनो वैयाकरणापसदा ईश्वराद्वैतवादिनः पाशुपतैकदेशिन-स्तन्मतानि चानेनैव न्यायेन निराकृतानीत्याह **कालेति** ।

१८२४ समत्वात्पक्षदोषयोर्विवर्तपक्षत्वेनाद्वैतस्य निर्विशेषत्वेन च पक्षस्य समत्वात् अत एवात्रोपन्यस्तस्य दोष-स्यापि समत्वात् । **ज्ञानमि**त्यादेरयमर्थः । वैभाषिकसौत्रान्तिकाभ्यां निर्विशेषविषयज्ञानं मोक्षेऽपि क्षणिकमिष्यते । तत्सन्तानमात्रं नित्यम् । उक्तानुमा कालत्वहेतुना प्रवृत्ता । मोक्षकालः सविशेषज्ञानवान् कालत्वात् संसारकालवदिति।

१८२६ अनुमानान्तरेणापि दूषयति **मोक्ष इति** ।

१८२७ **अनुमानानी**त्यादेरयमर्थः ।

१८२८ वादिभिः स्वमतसाधकत्वेन प्रयुक्तान्यनुमानानि सर्वाण्यप्येवमुक्तभङ्ग्या प्रतिसाधनोपपत्तेरेव निषिद्धानि । तर्हि युष्मत्पक्षसाधकानुमानानां प्रतिसाधनानि सम्भवेयुरित्यत आह **श्रुतय इति** ।

अस्मद्वचनेषु प्रमाणत्वेन श्रुतयो वर्तन्ते । **च**शब्दाच्छ्रुत्यनुगृहीता अनुमाश्च । **नैयायिकाद्या** इत्याद्यशब्दा-द्वैशेषिकाद्याः। 'बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराणां नवानामात्मगुणानामत्यन्तोच्छित्तिर्मोक्ष' इति वदन्ति।

१८३० 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत' इत्यस्याः श्रुतेः का गतिरित्यत आह **प्राकृतेति** । अप्रियं नाम आत्मनः प्रतिकूलं हि । तत्सामस्त्येनोक्तम् । 'बलमानन्द ओजश्च सहो ज्ञानमनाकुलम् । स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्विभोरि'ति श्रुतिवाक्यम् । 'नित्यानन्दो नित्यज्ञानो नित्यबलः परमात्मा । नैवमसुरा एवमनेवं च मनुष्या' इति श्रुतिः । परमात्मा विशिष्टचेतनो मुक्तियोग्य इत्याकूतम् । एकवचनं तु समुदायापेक्षया युज्यते । 'न प्रेत्य संज्ञाऽस्ती'ति वाक्यविरोधात् कथं मुक्तस्य ज्ञानं स्यादित्यत आह **ज्ञेयतेति** । अस्य मुक्तस्य मुक्त-संज्ञानविषयता नास्तीति संज्ञा नास्तीति वाक्यस्यार्थः ।

१८३६ उक्तार्थमेवोपपादयति **आशङ्क्येति** । 'न प्रेत्य संज्ञाऽस्तीत्यात्मनोक्ते सति मुक्तस्य ज्ञानहानिमुक्ता-माशङ्क्यात्रैव मा भगवान्मोहान्तमापीपन्न प्रेत्य संज्ञाऽस्तीत्युक्तवत्या मैत्रेय्याः प्रबोधनार्थं याज्ञवल्क्येन वा अरे अहं मोहं ब्रवीमि । अविनाशी वा अरे अयमात्माऽनुच्छित्तिधर्मा' इति स्वरूपनाशमूचिवान् । धर्मानप्यनुच्छिन्नान्याह । मोहान्तमापीपत् मोहपरिपाकं प्रापयत् । 'न वा अरे अहं मोहं ब्रवीमि । हे मैत्रेयि अहं मोहकारणं न ब्रवीमि वै । ज्ञानरूपस्य ज्ञाननाशो नाम स्वरूपनाश एवे'ति यत्तस्मान्मैत्रेय्याः स्वरूपनाशाशङ्काऽऽसीत् । अतः सा परिहृता । तेनैव शून्यमतनिराकरणमप्यासीत् ।

१८३९ **मात्रासंसर्गस्त्वस्य** भवतीति माध्यन्दिनश्रुतिः। विषयभोगमाहात्म्यस्य मुक्तस्य। स च बुद्ध्याद्यादिभाव एव घटते। ननु 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् केन कं जिघ्रेदि'त्यादिवाक्ये मोक्षे विषयाक्षेपः क्रियते हीत्यत आह **आचिक्षेपेति**। अनिष्टत्वहृदा मुमुक्षोरनभीष्टत्वाभिप्रायेण विद्यमानस्य सर्वस्य निर्विशेषमात्रात्मकत्वेन च चक्षुराद्यभावाद्दर्शनघ्राणादिभोगरहितमोक्षाक्षेपरूपो ह्ययं व्यपदेश इति भावः।

१८४० **येनेत्यादेरयमर्थः**। 'विज्ञातारमरे केन विजानीयादि'त्यत्र सर्वज्ञापकत्वेन विज्ञातृशब्दोक्तं विष्णुमात्मानं वा।

१८४१ 'बुद्ध्याद्यभावपक्षे केन विजानीयादि'ति पक्षाक्षेपेणोच्यमानं परमात्मन आत्मनश्च ज्ञानं सर्वथाऽनिष्टं हि। तदेवोपपादयति **नाखिलेति**।

१८४२ **प्रत्यक्षमिति** क्रियाविशेषणम्। साक्षिप्रत्यक्षतया वर्तमानमिदमात्मज्ञानमित्यर्थः।

१८४३ नन्वात्मन आत्मज्ञानं कर्तुः कर्मविरोधेन पराहतमित्यत आह **कर्त्रिति**। अहं मां जानामीति नित्यानुभवः। विरोधे दृष्टबाधनम्। प्रमाणोपलब्धस्यार्थस्य बाधनमेव हि विरोधो नाम।

१८४५ ननु यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यत्रेवशब्दात् तद्वतो अद्वैतभावो हि मोक्ष इत्यत आह **अस्वातन्त्र्यादिति**। तथा सति यत्र त्वस्य 'सर्वमात्मैवाभूदि'त्यस्मादद्वैतपक्षानुवादिवाक्याद्विशेषाभावेन पुनरुक्ति-प्रसङ्गाद्भेदशब्दं प्रयुज्येवशब्दप्रयोगे तु भेदाभेदावुक्तौ स्यातामित्याशयः। न च वाच्यमिवशब्देन दर्शनाभावस्य विवक्षितत्वात्। तथासति तदितर इतरं पश्यतीति वाक्यशेषे भेदोक्तिविरोधश्च। तस्मादद्वैतमिवेत्युक्ते परमात्माधीनो भेद इत्यर्थः। अत्रैव मेति मैत्रेय्युक्तोत्तरमुच्छिन्नधर्मेति वाक्यं च कीदृशमित्यालोच्यताम्। दृष्टत्वादिधर्मानुच्छेदो हि तत्राप्यभिप्रेयत इत्याशयः।

१८४७ **सुखादी**त्यादिशब्दाद्बुद्धिः। न हि बुद्धिरहितस्य दुःखादिनिवृत्त्या किञ्चित्प्रयोजनम्। आत्मसम्बन्धित्वेन अज्ञातत्वात्।

१८४८ **तयोश्चेत्यादेरयमर्थः**। तयोरर्थानर्थयोर्मध्ये दुःखहानात् सुखनाशोऽधिकगुरुर्भवेत्। तस्माद्गुर्वर्थहानिभया-ल्लघ्वर्थाय न यतेत।

१८४९ तदेवोपपादयति **प्राप्याऽपीति**। स्यात् किं सत्यमेव वनिताभोगाद्यल्पसुखाप्तये वित्तार्जनादिनिमित्तमहादुःखं प्राप्नुवन्ति प्राणिनः। तत्कर्मरागमूढत्वनिमित्तम्।

१८५१ न हि विवेकिनस्तथा कुर्वन्तीत्यत आह **न च रागेति**।

१८५४ विमतो दुःखयुक् चेतनत्वे सति सुखार्थित्वात् सम्मतवदिति च मुक्तानां सुखाभाववादिनं प्रत्यतिप्रसङ्गानुमा।

१८५० 'स दुःखाद्विमुक्त आनन्दी भवती'ति पैङ्गिश्रुतिः। 'निर्गुण' इति भगवद्वचनम्। अनन्यहैतुकं साक्षाद्भगव-द्भक्तिरूपम्। 'सुखमानन्द इत्युक्तो मुदो भोगनिमित्तकाः। प्रमोदस्तद्विशेषोत्थो मुक्तामात्यल्पभोगत' इति ऋग्वेद-संहितायाम्।

१८५९ किं बहुना सर्वकामस्य विषयाः पर्याप्ता इत्याह **कामस्येति** । 'सर्वेदं जगत्प्रमाणमादाय परस्तव युतोऽसौ भगवान्विष्णुः स हि मोक्षप्रदः सदा । इन्दुरिष्टप्रदानाद्यो वायुरादाय गच्छति । इन्द्रनाम्नः केशवस्य समीपं मुक्तिमञ्जसे'ति स्कान्दे ।

१८६० ननु शिरःकरादिरहितत्वान्मुक्तस्य कथं दर्शनादिभोगः स्यादित्यत आह **शिर इति** ।

१८६२ 'तस्मै स्वलोकं भगवान् सभाजितः सन्दर्शयामास परान्न यत्पदम् । व्यपेतसंक्लेशविमोहसाध्वसं सन्दृष्टवद्भिर्विबुधैरभिष्टुतो न वर्तत' इत्यादि *श्रीमद्भागवते*। परं न यत्पदं यतो विशिष्टं स्थानं नास्ति । रजस्तमसो मिश्रितं सत्त्वं च नास्तीति विशेषशुद्धसत्त्वस्य विद्यमानत्वात् । **कालविक्रमः** जरामरणादिः । **माया** त्रिगुणाच्छादिका परमाच्छादिका च । अपरे प्राकृतदेहादयो व्याध्यादिहेतवः किमुत । **सुरुचः** सुकान्तयः ।

१८६३ **सुपेशसः** सुपुष्टयः । **सुवर्चसः** सुतेजसः ।

१८६७ 'इमाँल्लोकान् कामान्नी कामरूप्यनुसञ्चरन् । अश्रृण्वन्तः कर्णवन्तः सखाय' इत्यादिश्रुतिः । नैकामुक्तिभाजः शिरःकराद्यैर्युक्ताश्चेतनत्वादिदानीन्तनात्मवत् ।

१८६८ तदाह **शिर इति** । न चात्र संसारित्वादिकमुपाधिः । उक्तप्रमाणविरुद्धत्वेनाभासत्वात् तस्य । मुक्तिकालो विवक्षितकरादिमान् कालत्वादिदानींतनकालवदिति पूर्वशब्दादवगन्तव्यम् । 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता । एतमानन्दमयमात्मानमुपसङ्क्रम्य । एष सम्प्रसादोऽस्माल्लोकाच्छरीरात्समुत्थाय परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते । एष आत्मेति होवाच । अमृतस्यैष सेतुः । उतामृतत्वस्येशानो यदन्नेनातिरोहति । इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागता' इत्यादीनि वाक्यानि ।

१८७२ **इत्यादिका अपी**त्यादिशब्दान्मुक्त्यवस्था जीवस्य परेणैक्ययुक्ता न । अवस्थात्वात् । संसारावस्थावत् । न च साध्यविकलो दृष्टान्तः । इदानीं भेदस्य प्रत्यक्षेणानुभूयमानत्वात् । अबाध्यप्रत्यक्षस्याप्रमाणत्वे वादिनोऽनुमानदूषणश्रवण एव प्रत्यक्षस्याप्रामाण्याद्दूषणं नोक्तमित्यायातम् ।

१८७३ **कथञ्चेत्यादे**रयमर्थः ।

१८७४ दुःखीति किञ्चिद्वस्त्वपि कुतो हेतोरपि न दृष्टमिति यस्मान्मुक्तौ जीवस्य ब्रह्मणो भेदाभेदपक्षं निराकरोति **न चैवेति** ।

१८७५ उक्तार्थं निगमयति **इत्थमिति** । केवललौकिका मूढा अपि मम सदा सुखं स्यादिति यत्सुखं सामान्यतो जायते तद्रूपं समुद्दिश्य मोक्षमप्येते वादिनो भ्रमेण न विन्दन्ति यस्मात्तस्मादेतानि मतानि सर्वाण्यपीत्थमुक्तयुक्तिभिर्भ्रमजान्येव ।

१८७६ सिंहावलोकनन्यायेन साधनाध्यायचतुर्थपादे विपक्षस्वपक्षयुक्तीर्दर्शयति **औदार्यमिति** ।

१८७८ अनन्तरसमतीते पादे च उभययुक्तीर्दर्शयति **सुशक्यतेति** ।

१८८० अस्मिन्पादे च उभयीर्युक्तीर्दर्शयति **व्यामिश्रतेति** ।

१८८२ प्रकृतं देवमोक्षं प्रपञ्चयति **प्रधानेति** । इहभूतेषु । तच्छ्रुतेः 'नैकस्मिन्दर्शयतो ही'त्येकस्मिन्नधिकरणे । वायाविन्द्रः सोम आदित्यो बृहस्पतीन्द्रादीनां लयस्थानत्वेनोच्यते हि । कश्चिद्वायुर्भूतप्रकरणत्वात् भूतवायुरेवेति न मन्तव्यं किन्तु प्रधानवायुरेव । इन्द्रादिलयस्थानत्वान्यथाऽनुपपत्तियुक्त्या कथं प्रधानवायोर्भूताभिमानित्वम् । यावता तच्छब्देनोच्यत इत्यत आह **यस्मादिति** । सोऽपि श्रुतौ भूतमानिलिङ्गत्वेनोक्त इति यस्मात्तस्माद्भूतमानी चेति यतस्तत एव । 'एष ह वै यज्ञो योऽयं पवत' इत्यत्र मुख्यप्राणो ह्युच्यते । तस्य मनश्च वाक्यवर्तनीति मनो-वाग्यानत्वस्य भूतवायावभावात् ।

१८८२ 'अयं वै ब्रह्म योऽयं पवते तमेताः पञ्च देवताः परिम्रियन्त' इति च ब्रह्मशब्दो भविष्यद्ब्रह्मणि मुख्यप्राणे एवं हि घटते न तु भूतवायौ । कथं महत्तत्त्वाभिमानिनो मुख्यप्राणस्य भूताभिमानित्वमित्यत आह **महामानीति** । दृश्यते हि राज्याभिमानिनो राज्ञः स्वभृत्याभिमतग्रामाद्यभिमानित्वम् ।

१८८४ **नान्यत्** नान्यदा ॥ ५ ॥ कथं क्रम इत्याकाङ्क्षायामाह **तस्मादिति** ।

१८८५ अशेषाः क इत्यत आह **सोमस्त्विति** ।

१८८६ कथं वाय्वादीनां ब्रह्मादिपदं प्राप्यतां मुमुक्षतां प्रवेशो मुक्तिः स्यादित्यत आह **इतीति** ।

१८८६ वेदवागहीन्द्रपत्नी महिषं च उमागिरीशाविति ब्रवीति । विरिञ्चपत्नीं विरिञ्चभारतीशाविति ब्रवीतीत्यन्वयः । वाय्वादित्वकाल उपासितवतामधिकारिणां तेषु ब्रह्मादिपदं प्राप्तेष्वपि वाय्वादिशब्दव्युत्पत्तिमत्त्वाद्वेदवागादिशब्दैरपि तान् वदन्तीत्याशयः ।

१८८९ स्यात् । किं वाङ्मनसीत्यादावुमागिरीशावुच्येते । तस्माद्गरुडमार्गवचनस्य कोऽवकाश इत्यत आह **इन्द्रेति** ।

१८९० **भृग्वादय** इत्यादिशब्दान्मरीच्यादयः ।

१८९१ **ये मनवो** वैवस्वतादयः । पृथ्वादयो राजमुख्याश्च ते स्वायम्भुवमनुं प्रविश्य तद्द्वारेण महेन्द्रं गता भवन्ति ।

१८९३ **तमेव** धर्ममेव । **तद्देहगताः** विष्णुदेहगताः ।

१८९४ **इष्टतः** इच्छातः । भावे क्तप्रत्ययदर्शनात् ।

१८९६ तत्र तत्र सर्गक्रमकथनमपि मुक्तिक्रमानुमापकं भविष्यतीत्यभिप्रायेणाह **सर्गेति** । मुक्तौ क्रमस्य सर्गक्रमतो विपर्ययो भवेत् । सुराणां स्वबिम्बदेवतासूत्तरोत्तरः प्रवेशरूपो लयो भोगश्च मुक्तिरिति यत एतस्मादेव हि वेदपतिर्लय एव सर्गक्रमतो विपर्ययेणेत्यवदत् । मुक्तेरपि लय एवान्तर्भावादित्याशयः ।

१८९७ पैङ्गिश्रुतिरप्येनं मुक्तिक्रममर्थात्प्रकटयतीत्यभिप्रायेणाह **उक्तश्चेति** ।

१८९८ **तेजोऽभिधामित्यादेरयमर्थः** । भूतवृत्तिमाश्रित्य वायुशब्दशब्दितोऽयं ब्रह्मा सर्वमुक्तगणैः प्रविष्टः प्रथमतस्तेजोऽभिधां श्रियं केवलमाप्य विष्णुं प्रविश्य ततो विष्णोः पुत्रत्वेन देवीं प्रवेशरूपेण प्राप्ततया देव्या प्रसूतः पुनरपि विष्णुं प्रविश्येत्थम्भावेन मुक्तो भूत्वा प्रलयकालेऽस्मिन्विष्णावेव तिष्ठति ।

१९०० सिंहावलोकनन्यायेन देवमोक्षशेषमाह **प्रयातीति** । मरुद्गणाश्च शक्रं प्रयान्ति । इत्थं वदति हि तुरश्रुतिः । इयमस्माभिः प्रपञ्चितैव मुक्तिरिति स्थितम् ॥ ७ ॥

*इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीकायां त्रैविक्रमार्यकृतौ नयचन्द्रिकायां चतुर्थाध्यायस्य द्वितीयः पादः ॥ ४-२ ॥*

★ ★ ★

# अथ चतुर्थाध्यायस्य तृतीयः पादः

१९०१ पादसङ्गतिं दर्शयति **उत्क्रान्तेति** । उत्क्रान्तानां मार्गो मुक्तानां गम्यं वस्तु चेति द्वयमस्मिन्पाद उदितम् । युक्तीरुभयीश्च दर्शयति **सुक्रमेति** ।

१९०३ 'अप्रतीकालम्बनानि'त्यादिसूत्राभिप्रायमाह **प्रतीकमिति** । देहादिकमित्यादिशब्दाच्चक्षुरादिकम् । अतोऽन्ये तद्व्याप्तिदर्शिनोऽपि प्रथमं विष्णुं प्राप्ता अपि परान्ते तं ब्रह्माणमाप्य तेन सह तल्लोकाद्धरिं गता मुक्तिभाजो भवन्ति ॥ ६ ॥

*इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीकायां त्रैविक्रमार्यकृतौ नयचन्द्रिकायां चतुर्थाध्यायस्य तृतीयः पादः ॥ ४-३ ॥*

★ ★ ★

# अथ चतुर्थाध्यायस्य चतुर्थः पादः

१९०४ अस्मिन्पाद उभयीश्च युक्तीश्च दर्शयति **अतिक्रमोक्तिरिति** ।

१९०६ 'अत एव चानन्याधिपतिरि'त्यस्याभिप्रायमाह **अनन्यभृत्यत्वमिति** । इह शास्त्रे । 'परमोऽधिपतिस्तेषां विष्णुरेव न संशयः । ब्रह्मादिमानुषान्तानां सर्वेषामविशेषतः । ततः प्राणादिनामान्ताः सर्वेऽपि पतयः क्रमात् । आचार्याश्चैव सर्वेऽपि यैर्ज्ञानं सुप्रतिष्ठितम् । एतेभ्योऽन्यः पतिर्नैव मुक्तानां नात्र संशयः' इति वाराहे । 'उतामृतत्वस्येशान' इति 'हरेर्मुक्तजातेरपि स्वामित्ववाक् । मुक्ता अन्याधिपतित्वयुक्ता विष्णवन्यचित्त्वाद्यथा संसारिणः । अथैतदेवं विद्वान् साम गायत्युभौ । स साम गायति । सोऽमुनैव । स एष एवास्मात्पराञ्चो लोकास्तांश्चाप्नोति । देवकामांश्चाथोऽनेनैव । ये चैतस्मादर्वाञ्चो लोकास्तान्याप्नोति मनुष्यकामांश्चे'ति श्रुतिराह । 'एष आदित्यस्थ-

पुरुषवेदकः । ये चामुष्मादादित्यादुपरितनमुक्तास्तान्नियच्छति । मुक्तदेवानामभीष्टार्थांश्च प्रापयति । सोऽमुनैव सोऽमुष्य प्रसादेनैवं भवति नात्मशक्त्या । अक्षिस्थपुरुषवेदकश्चास्य प्रसादेन य एतस्मादधस्तनमुक्तास्तान्नियच्छति । मनुष्याणामभीष्टार्थांश्च प्रापयति यथायोग्यम् । कप्यासः पद्मरक्ताक्षः सूर्यगश्चाक्षिगश्च सः । गायकस्तस्य विष्णोर्यः स स्वर्ग्यांश्च नृलोकगान् । कामान् दद्यान्नरश्चेत्स्यात्सुराणां च नृणामपि । मोक्षदो यदि वायुः स्यान्मुख्योद्गाता ततोऽनिल' इति *सत्तत्व* इति । उदेति हि सर्वेभ्यः पाप्मभ्यो य एवं वेदेति सर्वाशुभनाशनलिङ्गादतल्लोकैश्वर्यं मुक्तावित्येवाङ्गीकर्तव्यम् । 'ता यो वेद स वेद ब्रह्म । सर्वेऽस्मै देवा बलिमावहन्ती'त्यत्रोच्यमानं सर्वदेवपूज्यत्वं च ब्रह्मणोऽन्यस्य नोपपद्यते हि ।

१९११ लोकशब्दार्थमाह **लोका इति** ।

१९१२ प्रस्तुत्यान्योन्य**नाथा**' इति हि *पैङ्गिश्रुतिः* । लोकविलक्षणत्वादलोकशब्देनापि मुक्ता वाच्याः । पराञ्चो लोका इत्यादौ तादृशं पदवचनं च युक्तम् ।

१९१३ आलोकरूपत्वाच्च लोकशब्दवाच्यत्वं घटत इत्याह **लोकाभिधा इति** ।

१९१४ नन्विह सोऽमुनैवेत्यादौ ज्ञानफलत्वेनोक्तं लोकाधिपत्यं रविबिम्बगे हरावेवैक्येन स्याज्ज्ञानिनः । स आदित्यरूपेणैव तथा भवतीत्यत आह **न चेहेति** ।

'स एष ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे । देवकामानां च स एष एतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चेत्यपुरुषाक्षिपुरुषयोर्लोकाधिपत्यं पुरैव पृथगुक्तं हि । तदैक्यपक्ष एतद्वचनस्य पुनरुक्तित्वं स्यादि'त्याशयः । यथा बदरिकानाथ द्वारकानाथ इत्यपि अवाङ्नाथ इति तद्वदिहोच्यते । 'सर्वनाथोऽपि भगवान् सन्निधानविशेषत' इति *मानसे* । सोऽमुनैवाथानेनैवेत्यादित्यपुरुषाक्षिपुरुषयोर्ज्ञानिनोऽनुग्राहकत्वेन सम्यग्भेदश्चोक्तः । सोऽदस्त्वेनेत्यादित्वप्रत्ययमतिहाय वर्तमानस्य सोऽमुनैवेत्यादिवाक्यस्यादित्यपुरुषाक्षिपुरुषरूपेणेत्याद्यर्थो नैव भवेत् ऐक्यपक्षे तु भवत्यसौ भवत्ययमित्यणुवाक्यं विहाय बहूनि वाक्यानि वृत्तानीति तेषां वैयर्थ्यस्य दोषः स्यान्मायिनः ।

१९१६ 'जगद्व्यापारवर्ज्यमि'ति सूत्रस्याभिप्रायमाह **अत इति** । जगद्व्यापारवत एव क्रमेण यथायोग्यं स्वातन्त्र्यादिपूर्णगुणा ब्रह्मादयः । अत उक्तभङ्ग्या मुक्तस्य जगद्व्यापारवर्जितत्वात् ॥ ७ ॥

१९१७ आत्मनः परमाभीष्टाय केवलगुरवे नमस्करोतीमां ग्रन्थकृतिमुपसंहरन् **नमो नम इति** । लोके मित्रादय उपकाराद्युपाधिना प्रिया भवन्ति । अस्य श्रीमन्मध्वस्य तु पुरुषोत्तमगुणाः केनाप्युपाधिना न प्रियाः । किन्तु स्वभावत एव तदाह **अनुपाधिप्रियसद्गुणात्मन इति** ।

१९१८ गुरुस्वरूपं जानतां हि गुरुभक्तिद्वारेण विद्या फलतीत्यभिप्रायेणात्मस्वरूपसंवेदनपूर्वकमिमं ग्रन्थं केशवे समर्पयति **यस्येति** ।

**यस्य** वायोः बळित्थेत्यादिवेदवचने त्रीणि रूपाण्युदितानि दिव्यानि स्तुत्यानि । यस्य देवस्य महद्रूपं मूलरूपमित्थमेव निहितम् । श्रीमन्नारायणेन त्रयाणां वपुषां प्रादुष्करणार्थमेवं क्लृप्तम् । तन्मूलरूपं कीदृग्भूतमित्याकाङ्क्षायामाह **बळित्थेत्यादि** । बट् बलरूपं ततत्वात् तत् दर्शतमतिशयेन दर्शरूपम् । प्रातिलौम्येन तृतीयात् । तृतीयस्याप्यतिशयार्थत्वात् । दुष्टान् भर्जयतीति भर्गः । त्रीणि रूपाणि कानीत्याकाङ्क्षायामाह । प्रथमं रामवचोनयं हनूमद्रूपमित्यर्थः । द्वितीयं वपुः पृक्षः । सम्प्रक्तत्वात् पृतना पृथगित्युच्यते । तां क्षयतीति पृक्षः । भीमसेन इति यावत् । तृतीयं मध्वः । मधुशब्द आनन्दवाची । कामानलमधुलवैः शमयन् दुरापैरित्यादौ दृष्टत्वात् । अकारो तीर्थवाची पापप्रतिषेधत्वार्थस्य । अथवा वकारस्तीर्थवाची । तस्यामृतवाचित्वेन जलवाचित्वसम्भवात् । एवं **मध्व** आनन्दतीर्थः । यत्त्वेतत् यत्तु देशकालाभ्यां सन्निकृष्टं मध्वाख्यं तृतीयं वपुः । अमुना रूपेण तेन वायुना केशवे ब्रह्मसूत्रानुभाष्यात्मको ग्रन्थः कृत इति । अत्र **बटित्यादिना** 'बळित्था तद्वपुषेऽधायि दर्शतमि'त्यादिवचनं च सूचयति । तथाच भाववृत्ते । 'हनशब्दो ज्ञानवाची हनूमान् मतिशब्दितः । रामस्य वृत्तरूपस्य वाचस्तेनानयन्त हि । पृतनो भीम इत्युक्तो वाचोमामातरः स्मृताः । ऋगाद्या इतिहासं च भारतं पञ्चरात्रकम् । प्रोक्ताः सप्तशिवास्तत्र वायो भीमस्ततः स्मृतः । मध्वित्यानन्द उद्दिष्टो वेति तीर्थमुदाहृतम् । मध्व आनन्दतीर्थः स्यात् तृतीया मारुतीतनुरि'ति सूक्तगतं रूपत्रयमेतन्महात्मनः । 'यो वेद वेदवित् स स्यात्तत्त्ववित् तत्प्रसादत' इति । साधको रामवाक्यानां तत्समीपगतः सदा । हनूमान् प्रथमो ज्ञेयो भीमस्तु बहुभुक् पितोः । पृतनाक्षयकारी च द्वितीयस्तु तृतीयकः । पूर्णप्रज्ञस्तथाऽऽनन्दतीर्थनामा प्रकीर्तितः । दशेति सर्वमुद्दिष्टं सर्वं पूर्णमिहोच्यते । प्रज्ञा प्रमितिरुद्दिष्टा पूर्णप्रज्ञस्ततः स्मृतः । आसमन्तात् पतित्वेन गूढं कलियुगे हरिम् । असत्यमप्रतिष्ठं च जगदेतदनीश्वरम् । वदद्भिर्गूहितं सन्तं तृतीयोऽसुर्मथायति । येन विष्णोर्हि वर्पाख्यान् गुणानज्ञासिषुः परान् । ईशानाशः सूरयश्च निगूढान्निर्गुणोक्तिभिः । त्रेतायां द्वापरे चैव कलौ चेति क्रमाच्च यः । एतेषां परमो विष्णुर्नेता सर्वेश्वरेश्वरः । स्वयम्भुर्ब्रह्मसंज्ञोऽसौ परोऽस्मै ब्रह्मणे नम' इति यजुःसंहितायाम् ।

१९१९ ग्रन्थावसानेऽपि मङ्गलाचरणाद्यर्थं परममङ्गलकीर्तनं मङ्गलदेवतापतिं नारायणं स्तौति **निःशेषेति** ।

मृत्या जात्याभिवृद्ध्या व्ययपरिमनव्याधिभीदुःखशोकै-
लोभक्रोधप्रमोहभ्रमतमविषयैः कौतुकेष्वप्रमोदैः ।
लज्जापित्तापिपासाक्षुदभिभवजरापारतन्त्र्यादिभिर्वा
दोषैरन्यैरशेषैरपि रहित सदा नौमि नारायण त्वाम् ॥ १ ॥

ऐश्वर्याद्यैस्तु षड्भिः सकलजगदभिस्रष्टृताद्यष्टरूपै-
र्भूमस्वामित्वसौख्यैः सततचितिमनौदार्यगाम्भीर्यधैर्यैः ।
स्वातन्त्र्याद्यैश्च सर्वैरमितगुणगणैः सर्वदा सर्वदेशे
सर्वोत्कृष्टैरभिन्नैर्निभृतनिजतनुं नौमि विष्णो भवन्तम् ॥ २ ॥

श्रीब्रह्मप्राणवाग्भ्यो गतिगरुडमृडैर्वारुणीपत्रिपत्नी
रुद्राणीन्द्रेन्द्रपत्नीस्तरणिवरुणवह्न्यादिदेवर्षिमर्त्यैः ।
वेदान्ताद्यग्र्यविद्याश्रुतिमतिवचनध्यानपूजावितानै-
र्वन्द्यं भक्त्या भवन्तं प्रतिभवमनिशं पाहि मां नौमि विष्णो ॥ ३ ॥

आस्तम्भादाम्बुजोत्थात्सकलचिदचितो नाशिनो नात्र साराः
किन्तैः सान्तैरनन्तस्त्वमधिकदयितः सर्वतः सर्वथा मे ।
हे स्वामिन् विश्वरूपेत्यतनु तनुनुतं श्रीमदानन्दतीर्थ-
त्रैलोक्याचार्यदेवैर्भुवनगुरुतमैर्नौमि नारायण त्वाम् ॥ ४ ॥

समर्पयामो नयचन्द्रिकामिमां परात्मने चन्द्रघटामिवामलाम् ।
कृष्णार्पिताकृष्णजुषां महात्मनां लभेत हीयं मुखवासविभ्रमम् ॥ ५ ॥

सच्चेतः कुमुदं नयेद्विकचता सान्द्रं तमो ध्वंसयेत्
विष्णोरुन्नमयेत् दयाजलनिधिं विष्णोः पदं दर्शयेत् ।
श्रीमद्गुर्वनुकम्पयैव शरदा स्वच्छद्विजप्रेष्ठया
भातेयं नयचन्द्रिका श्रितवती पूर्णानुभाष्योडुपम् ॥ ६ ॥

सच्छेमुषीकुमुदिनी परितापहन्त्री न्यायामृताब्धिमणिसागरबन्धुभूताम् ।
पूर्णानुभाष्यशशिमण्डलमण्डनाङ्कां ग्रन्थे बबन्ध विजये नयचन्द्रिकां खे ॥ ७ ॥

*इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीकायां त्रैविक्रमार्यकृतौ नयचन्द्रिकायां चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४-४ ॥*

॥ श्रीकृष्णार्पणमस्तु ॥

★ ★ ★

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादविरचित-श्रीमद्ब्रह्मसूत्रानुव्याख्यानस्य टीका

श्रीशङ्करपण्डिताचार्यविरचिता

# अनुव्याख्यानसम्बन्धदीपिका

## अथ चतुर्थाध्यायस्य प्रथमः पादः

१६८४ प्रथमाध्यायमारभ्य प्रतिपादितार्थं तुरीयाध्यायगतेनावृत्तिरित्यादि सूत्रप्रतिपाद्यार्थेन सङ्गमयति **समन्वयेति**।

१६८५ अथावृत्त्यादि सूत्रं व्याख्याति **तत्रेति**।

१६८७ न केवलमसकृदुपदेशादेव श्रवणाद्यावर्तनसिद्धिः किन्तु लिङ्गाच्च सिद्ध्यतीति वक्तुं लिङ्गाच्चेति सूत्रमुद्धृत्य सत्तत्ववचनेन व्याख्याति **लिङ्गादिति**।

१६९९ श्रवणाद्यावृत्तिवदात्मेत्युपदेशोपास्ती च सर्वथा कर्तव्य इति वक्तुमात्मेत्यादि सूत्रं व्याख्याति। आत्म-शब्दार्थं व्याख्याति **आदनेति**।

१७०० स्वामी विष्णुरित्यस्मिन्नर्थे प्रमाणमाह **स्वामीति**।

॥ इति आत्माधिकरणम् ॥ २ ॥

★ ★ ★

### ॥ नप्रतीकाधिकरणम् ॥

१७०२ नाम ब्रह्मेत्युपास्ते इत्यादौ नामादिप्रतीकस्य विष्णुत्वोक्तेः न तस्य सर्वाधिपत्यं ध्येयमित्याशङ्कापरिहाराय न प्रतीक इत्यादि सूत्रार्थमाह **प्रतीकेति**।

१७०३ हरौ प्रतीकबुद्धिवत्प्रतीकेऽपि हरिबुद्धिः न कार्येति च सूत्राभिप्रेतम्। तत्रापि मानमाह **योऽन्यदिति**।

१७०५ तत्र मानमाह **य इति**।

१७०८ हरौ प्रतीकबुद्धिवत्प्रतीकेऽपि हरिबुद्धिः न कार्येति च सूत्राभिप्रेतम्। तत्रापि मानमाह **योऽन्यदिति**।

॥ इति नप्रतीकाधिकरणम् ॥ ३ ॥

---

* प्रतिपरिच्छेदं प्रारम्भे सूचिताः सङ्ख्याः अनुव्याख्यानश्लोकसङ्ख्याः इति ज्ञातव्यम्।

## ।। ब्रह्माधिकरणम् ।।

१७१८ विष्णोः स्वामित्ववत्पूर्णत्वमपि ध्येयमिति वक्तुं 'ब्रह्मदृष्टिरुत्कर्षादि'ति सूत्रं व्याख्याति **ब्रह्मेति**।

१७२० यत्त्वात्मेत्यादिसूत्रमहं ब्रह्मेत्यादि जीवैक्याभिप्रायेणापरे योजयति तन्नेत्याह **नात्मेति**।

१७२१ कथं तदित्याशङ्कायां 'द्युभ्वाद्यायतनं स्वशब्दात्, प्राणभृच्चे'ति सूत्राभ्यामात्मशब्दाज्जीवोऽयं द्युभ्वाद्यायतनं नेत्यभिप्रेतजीवनिराकरणपरिहाराय प्रकटयति **स्वशब्दादिति**।

१७२२ एवमप्यात्मशब्देन जीववचने सूत्रविरोधोऽस्तीत्याह **यदीति**।

१७२४ ब्रह्मैक्याज्जीवेऽप्यात्मशब्दः सम्भवतीत्याशङ्क्य परिहरति **यदीति**।

१७२६ सूत्रेणारोपितभेदस्य विवक्षितत्वादनारोपितजीवेशैक्यं सूत्राभिप्रेतमिति चेत्तन्न युक्तम्। आरोपितरूप्यस्यानारोपितरूप्यसापेक्षत्ववदारोपितस्यानारोपितभेदसापेक्षत्वेन भेदस्य व्यावहारिकतानुपपत्तेरित्याह **व्यावहारिकेति**।

१७२७ इतोऽपि भेदो मिथ्येति वचनं न युक्तमित्याह **व्यावहारिकमिति**।

१७२८ भेदो व्यावहारिक इति वचनस्यार्थेन बाध्ये चेद्वचनतदर्थयोर्भेदस्यापि तद्वदबाध्यत्वेन न सर्वभेदमिथ्यात्वसिद्धिः। तदर्थो बाध्यश्चेद्भेदः परमार्थः स्यात्परस्परविरुद्धयोरन्यतरनिषेधस्यान्यतरविनान्तरीयत्वात्। ननु नायं नियमः। स्वप्नदृष्टत्वेनेदं रजतं नेदं रजतमितिप्रतीतयोरन्यतरतदभावयोरुभयोरपि मिथ्यात्वादिति नैतत्साधु। स्वप्नदृष्टत्वादेव मिथ्यात्वाङ्गीकारे द्रष्टुरपि मिथ्यात्वप्रसङ्गात्। द्रष्टुः तत्स्वप्नमपश्यमिति। स्वप्नोत्तरकालेऽनुवृत्तेन मिथ्यात्वमित्यर्थः।

१७३५ एवमात्मेति सूत्रार्थं परोक्तं विघटय्य प्रतीक इति सूत्रविरुद्धत्वेन ब्रह्मदृष्टिरित्यादि सूत्रमपि यत्परो व्याख्याति। तद्व्याख्यानं तं विरोधपूर्वसूत्रार्थानुवादपूर्वकं दर्शयित्वा विघटयति **न चेति**।

१७३९ अचेतनत्वान्मन आदि प्रतीकस्य ब्रह्मत्वेनाध्यातस्य तुष्ट्यभावान्न तद्ध्यानं सफलम्। किन्तु नीचतया ध्यातस्य ब्रह्मको वाद्युपद्रवोऽपि भवतीत्याह **अचेतनस्येति**।

१४४० प्रतीकं ब्रह्मेति हि ध्यानं न ब्रह्मप्रतीकमिति। तस्मान्न ब्रह्मणः स्वनीचताध्यातेन कोपोपपत्तिरित्याशङ्कापरिहाराय लोकवदित्युक्तमेव प्रपञ्चयति **चण्डाल इति**।

१७४१ चण्डालो नृप इति वचनवद्राजचण्डालपूजा च न कोपकारणमित्याह **पुरत इति**।

१७४२ विशेषः परिज्ञात इत्युक्तम्। कारणत्वाविशेषं स्पष्टयति **राज्ञ इति**।

१७४३ उक्तिभेदसत्यपि कोपजनकत्वे कुतो विशेषो नासीदिति चेदभेदेन प्रतिपादनसाम्यादित्यभिप्रैति **अभेदेनेति**।

१७४३ उभयथोक्तेरप्यभेदप्रतिपादनेन दण्डदूषणसाम्यमप्यनुभवसिद्धमिति दर्शयति **अयमिति**।

१७४४ को विशेष इति प्रस्तुत प्रतिपादितं विशेषाभावं निगमयति **ध्यात इति**।

१७४५ राजवत्कचित्तदज्ञानसम्भवाद्ब्रह्मापि स्वनीचताध्यातारं कञ्चन न दण्डयतीत्यत आह **न चेति** ।

**॥ इति ब्रह्माधिकरणम् ॥ ४ ॥**

★ ★ ★

## ॥ आदित्याधिकरणम् ॥

१७४६ अवश्यम्भाविज्ञानसाधनमुक्तम् । अथ ज्ञानस्य कर्मक्षयंरूपं फलं 'तदधिगम' इत्यादिसूत्राभिप्रायस्पष्टीकरणपूर्वकमाह **तथेति** ।

१७४७ 'इतरस्यापी'त्यादिसूत्रार्थमाह **तद्द्विष इति** ।

१७४८ ज्ञानिनां दुष्कृत्यता तद्भगवदर्पणेन कृतसुकृताशोको नास्तीत्येतदर्थप्रतिपादकं यत्सूत्रं यदेव विद्ययेति हीति तदतीतपादगतैः 'अधिकोपदेशादि'त्यादिसूत्रैरुक्तार्थत्वेन व्यर्थमित्याशङ्क्य परिहरति **यदेवेति** ।

१७४९ ज्ञानिनः सुकृतसंश्लेषे तस्य पुत्रादयमुपयन्ति । सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यमिति श्रुतिविरोध इति न कर्म जायत वचनान्नानिष्टसुकृततया न विषयत्वोपपत्तेः । तद्वाक्यस्य तर्हि 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुने'तिवचनात् प्रारब्धकर्मणो भस्मीभावान्न भोग्यत्वमिति । न वध्यं तस्य तावदेव चिरं मानविमोक्ष्येन स सत्यत इति संसारस्य प्रारब्धकर्मभागनाशावधिकैरित्यर्थः । प्रारब्धपुण्यपापयोः भोगमन्तरेण नाशानुपपत्तिं निमित्तीकृत्य भोगेन नाशं 'भोगेन त्वितरे' इत्यादिसूत्रार्थविवरणेनाह **तत इति** ।

१७५१ प्रारब्धकर्मनाशानन्तरं मोक्ष इत्युक्तम् । प्रारब्धकर्मणः कालावधिं च ब्रह्मादीनां सत्तत्त्ववचनेन विविच्य दर्शयति **ब्रह्मणस्त्वेवेति** ।

★ ★ ★

# अथ चतुर्थाध्यायस्य द्वितीयः पादः

१७५३ कर्मक्षयः सर्वेषां ज्ञानिनां समः । उत्क्रान्तिमार्गो न तावित्याह **देवानामिति** ।

१७५४ फलाध्याये फलकथनं विना कर्मक्षयशरीरोत्क्रमणमार्गगमनानि कुतः कथ्यन्त इत्याशङ्क्य पादानां सङ्गतिकथनपूर्वकं परिहरति **कर्मेति** ।

१७५८ दुष्कर्मनाशस्य शतृनाशवद्देहोत्क्रमणस्य निर्मलमोक्षवत् मार्गगमनस्य स्वर्गगतिवत् हर्षकारणत्वात् फलरूपत्वमिति यावत् । 'उत्क्रान्तिमार्गो देवानां न प्रायेणे'त्युक्त्या केषाञ्चित्कदाचित्तावभिप्रेतौ । तस्मात्केषां कदा तावित्यत आह **जातानामिति** ।

१७५९ उत्क्रम्यार्चिरादि यथा हरिं गतानामपि सम्यक् मुक्तिब्रह्मणः पूर्वनुत् किन्तु सहैवेत्याह **अन्येषामिति** ।

१७६० अस्मिन्नर्थे 'क्ष्माम्भ' इत्यादि भागवतवचनं भगवतमनुप्राप्ता इत्यादि श्रुतिवचनं चाह **क्ष्माम्भ इति** ।

१७६१ **आगताभिमानाः** आगतभगवद्बहुमाना इत्यर्थः ।

१७६२ ज्ञातफलं तुरीयफलाचोदितभोगेषूत्क्रान्तिमार्गवन्नरादीनामेवास्तु वा देवानामिति न मन्तव्यम् । किन्तु सर्वेषामस्तीत्याह **भगवन्तम् इति** ।

१७६५ कर्मक्षयकथनानन्तरं प्रसङ्गतः प्राप्तमुत्क्रान्त्यादिकं विभागेन विहितं अथ वाङ्मनसीत्यादिसूत्रेषु क्रान्ति-प्रतिपादनाङ्गतया किमुच्यत इत्यत आह **तत्रेति** ।

१७६६ किमिति सर्वमोक्षमेकध्वैरेव न प्रतिपाद्यन्त इत्यत आह **पुंसामिति** ।

१७८० समुद्रतरलोपमेति मुक्तरुद्रादिमते सङ्कोचविकासप्रकारो दर्शितः । अग्निज्वालादिमुक्तरुद्रादिमते एकरूप-त्वाभावातिशयो दर्शितः । विवादास्पदीभूतो मुक्तिदः सचेतनत्वे सत्यूर्ध्वगतिमत्त्वात्पक्षभूतान्मुक्तस्य गमनवदि-त्यनुमानेन यः सततोर्ध्वगतिमान्मुक्तो जिनाप्युपगतः स दुःखोपेतः चेतनत्वे सत्यधिकगतिमत्त्वात् अधिकगति-मद्देवदत्तवदित्यनुमानेन निराकृतत्वान्न सततोर्ध्वगतिमान्मुक्तत्वेनानुमातुं शक्यते । चेतनत्वे सत्यूर्ध्वगतिमत्त्वं दुःखत्वोपाधिः न भवति । दूरोर्ध्वगमन इत्यपि दुःखदर्शनात्साध्यन्यूनत्वेन समव्याप्तिरहितत्वादित्यर्थः ।

१७८० प्रतिसाधनानुमानस्योपाधिः वक्तुं न शक्यते इत्याह **प्रतिसाधनेति** ।

१७८१ कुत इति चेदुपाधेः प्रतिसाधनरूपत्वादिति प्रतिपादयति **उपाधिरिति** ।

१७८१ पक्षादुपाधिव्यावृत्तिलिङ्गेन साध्याभावलक्षणसाध्यस्य साध्यमानत्वात्प्रत्यनुमानरूपं ह्युपाधिः प्रत्यनुमानस्य प्रत्यनुमानं तद्दूषणं तुल्यबलत्वात्तयोः सतः प्रथमानुमानेन विपक्षसन्देहान्तरसाध्यनिर्णय इत्यर्थः । प्रत्यनुमानस्या-भ्युपगम्याप्युपाधिदूषणमुपाध्यन्तरमाशङ्क्य परिहरति **अथापीति** ।

१७८२ यत्र गतिमत्त्वं तत्र जडशरीरत्वमिति चेदपसिद्धान्त इत्यत आह **आगमेति** ।

१७८५ जनाभिमतमोक्षवद्बौद्धाभिमतमोक्षोऽप्यनुपपन्नमित्याह **एवमिति** ।

१७८९ मायावादिमतस्य माध्यमिकमतेन साम्यं दर्शयितुं माध्यमिकमतमनुवदति **न किञ्चिदिति** ।

१७९७ इत्युपन्यस्तेन शून्यवादेन मायावादस्य साम्यं दर्शयति **एवमिति** ।

१८०१ मायावादिना वेदप्रामाण्याङ्गीकारात् तदनङ्गीकुर्वतो माध्यमिकात् कथं विशेषो नास्तीत्यत आह **प्रामा-ण्यादीति** ।

१८०२ यत्तु चिरकालमतीत्याद्वेदज्ञानबाध्यं तदतत्त्वावेदकमपि प्रमाणम् । यत्तु झटिति बाध्यं शुक्तिरजतादिविषयं तदतत्त्वावेदकमप्रमाणमिति विभागेन भेदादिविषयवेदस्यातत्त्वावेदकत्वेऽपि प्रामाण्यं युक्तमित्यत आह **दीर्घेति** ।

१८०५ वेदाप्रामाण्यवन्मायिना ब्रह्मणः शून्यत्वमपि परिहर्तुमशक्यमित्याह **निर्भेदत्वमिति** ।

१८०९ वेदाननुसारित्वादेते पक्षा निराकृताः । शून्यवादस्त्वात्मनः शून्यत्वाङ्गीकाराच्च न घटत इति विशेषतो निराक्रियते **आत्मेति** ।

१८०९ सर्वेभ्योऽप्यात्मन इष्टत्वात्तदभावे किमुत तदभीष्टसिद्धिरिति वक्तव्यमित्यर्थः । आत्मनोऽभावादात्मीय-पुरुषार्थो न घटत इत्युक्तम् । यद्यनात्मीयोऽपि तस्य पुरुषार्थः तर्हि घटशून्यता च पुरुषार्थः स्यादित्यत आह **यदीति** ।

१८१० मायिनोऽपि घटशून्यतैव मोक्षः स्यान्निर्गुणब्रह्मभावस्य परमार्थतस्तद्भेदादित्याह **कल्पितत्वादिति** ।

१८१० निर्विशेषशून्यतापत्तिरेव मोक्षाङ्गीकृतो घटनाशस्तु घटप्रतियोगित्वेन विशेषितत्वान्न मोक्ष इत्याशङ्क्य आत्मशून्यभावस्यात्मप्रतियोगित्वविशेषस्य दृश्यमानस्याप्यङ्गीकारे घटाभावस्यापि घटप्रतियोगित्वविशेषणानङ्गी-कारेण निर्विशेषशून्यभावलक्षणमोक्षत्वं प्रसज्यत इति परिहरति **दृश्यमान इति** ।

१८११ आत्मनोपासत्योर्निर्विशेषः शून्यभावः कथं परिदृष्टघटभावः स्यादित्युच्येत । तर्हि भविष्यद्घटभाव एव स्यादित्याह **पाश्चात्यश्चेदिति** ।

१८११ केवलमनुभवादेव मायिमाध्यामिकाभिमतमोक्षो विरुद्धः । अनुमानाच्च विरुद्ध इत्याह **न मोक्ष इति** ।

१८१३ मायिनस्तु श्रुतिप्रमाणाङ्गीकारात् तेन स्वाभिमतमोक्षसिद्धिरित्यत आह अश........वसन्तमिति श्रुतेः । प्राकृतदेहराहित्यविषयत्वाद्देहो न मोक्षः इति मतं श्रुत्यविरुद्धं चेत्याह **न चेति** ।

१८१४ अनुमानान्तरविरुद्धं च तन्मतमित्याह **निर्दुःखत्वादिति** ।

१८१८ तत्राप्यनुमानविरोधमाह **कालो नेति** ।

१८२० मोक्षावस्थायां कालो नेतिवदेच्चेत्सावस्थैव केवलज्ञानिनीतेति पक्षीकर्तव्येत्याह **यदाऽवस्थामिति** ।

१८२१ कदेति प्रश्ने तदेत्युत्तरं यदि वक्तव्यं तर्ह्येवाकालत्वं विरुद्धम् । न तु तथोत्तरभूतवक्तव्यं कालस्याभावा-त्तदवच्छेदेन प्रश्नस्यैवासम्भवादित्यत आह **न काल इति** ।

१८२२ त्रयाणां मायिमाध्यमिकविज्ञानं वादिनामित्यर्थः ।

१८२२ यदि बहुजीववादिभिः केनापि प्रकारेण कालोऽभ्युपगम्यते एकजीववादिना स्वमुक्तौ सर्वथापि तदनभ्युप-गमादधिक एव दोषस्तन्मत इत्याह **एकेति** ।

१८२३ एकत्वमते कालो न केवलं जानात्यनुमाविरोध उक्तः । अनुमानान्तरेण विरोधमाह **विमत इति** ।

१८२६ विमतः प्रपञ्चवान् काल इत्युक्तानुमाविभाषिकात्सौभ्रान्तिकाभ्युपगतनिर्विषयनिरस्तसन्ततिरूपमोक्षे रिपुः तदनुमायाः शब्दादिप्रपञ्चकज्ञानविषयसाधकत्वादिति यावत् । एतदनुमानेनापि तन्मतं न युक्तमित्याह **मोक्ष इति** ।

१८२८ तर्हि भगवत्पक्षे किं मोक्षे प्रमाणमित्यत आह **श्रुतय इति** ।

१८२८ वैदिका अपि साङ्ख्याद्याः मोक्षं निस्सुखं ब्रुवते । तदनूद्य विघटयति **सङ्ख्येति** ।

१८३० अशरीरवावसम्भवन्नपि या प्रिये पशुदात इति मोक्षे सुखं निषिद्धमित्यत आह **प्राकृतेति** ।

१८३१ तर्ह्यप्रियमपि प्राकृतमेव न स्पृशति । न त्वप्राकृतमित्यत आह **नास्तीति** ।

१८३२ सुखं स्वरूपमपि विद्यत इति सप्रमाणकमाह **प्रियमिति** ।

१८३२ इतोऽपि सर्वाप्रियपरित्यागेन सुखस्वरूप एव मोक्ष इत्याह **हेयत्वादिति** ।

१८३३ प्रियं स्वरूपमेवेति । सतोऽपि जीवस्य सुखरूपत्वमुक्तम् । अथासते दुःखस्वरूपं सप्रमाणकमाह **अप्रियस्येति** ।

१८३४ बुद्धिमतपुरुषापादितफलत्वाच्च मोक्षो न निस्सुख इत्याह **आत्मेति** ।

१८३५ यदि मुक्तो सुखमनुभूयते तर्हि तस्य ज्ञानं स्यात्तच्च न प्रेत्यसंज्ञास्तीति निषिद्धमित्यत आह **संज्ञेति** ।

१८३६ प्रेत्य संज्ञा नास्तीति मुक्तेः संसारिणः परिज्ञानं नास्तीत्येवोच्यते । न पुनर्मुक्तस्य ज्ञानाभावः अविनाशीत्याह 'रेऽयमात्मे'त्याद्युत्तरवाक्यविरोधादित्यर्थः ।

१८३६ 'न प्रेत्यसंज्ञास्ती'त्यत्र मुक्तस्य ज्ञानाभावाङ्गीकारवाक्यशेषविरोधोऽस्तीत्येतदेव प्रपञ्चयति **अशाङ्ख्येति** ।

१८३९ ज्ञानरूपस्य विज्ञाननाशस्तन्नाश एव यत इति हेतोः संज्ञा नास्तीत्युक्तम् । श्रुत्वा जीवनाशं मन्यमानाया मैत्रेय्याभावान्मोहकारणमुक्तवानित्युक्तवत्या याज्ञवल्क्यं च स्थलविहाराय शून्यमतनिरासाय च जीवस्वरूपनाशमूचिवान् । पु.....स्तार्किकमतनिराकरणाय बुद्धिसुखादि धर्माणामनुच्छित्तिमाह **न स्व च** त उच्छित्तिर्येषां तु च्छि याथना आनया अनुच्छिति **य म** णस्य सोऽनुच्छित्तिधर्मेत्युक्तेत्यविनाशीत्यनेन पौनरुक्त्यं स्यादिति यावद्विषयभोगं वदन्त्या माध्यन्दिनश्रुत्या मुक्तस्य बुद्धिसुखादिराहित्यं विरुद्धमित्याह **मात्रेति** ।

१८४० यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीति मुक्तस्य विषयतो यदुच्यत इति चेद्यत्र त्वस्य सदमात्मैवाभूतत्केन कं पश्येदिति वचनविरोध इति न मन्तव्यम् । सा श्रुतिर्घ्राणादिभोगाभावस्यानिष्टत्वाभिप्रायेण विषयवर्जितो मोक्ष इति मतमाचिक्षेपेति यत्तस्मादित्यर्थः ।

१८४० प्राणादिभोगाभावस्यानिष्टत्वं प्रतिपादयति **येनेति** ।

१८४१ अश्रुतं श्रोत्रमतं मन्त्रित्यादिना ज्ञेयो विष्णुः । कथं ज्ञातुं श्रुत्याभिप्रेतः स्यादित्यत आह **नाखिलेति** ।

१८४२ विष्णोर्ज्ञेयत्ववज्जीवस्य स्वज्ञेयत्वं च श्रुत्या प्रपञ्चे कर्तृकर्मविरोध इत्यत आह **प्रत्यक्षमिति** ।

१८४३ कर्तृकर्मविरोधो न प्रतीयते चेदप्यनुमीयते इत्यत आह **कर्तृकर्मेति** ।

१८४४ अनुमानस्य दृष्टिमूलत्वाद्दृष्टिबाधनं विरोध एव । दृष्टेस्त्वनुमानमूलत्वान्नानुमानबाधनं विरोध इत्यर्थः ।

१८४४ माध्यन्दिनश्रुतेरुक्तार्थानङ्गीकारे श्रुत्यन्तरविरोधोऽस्तीत्याह **सोऽश्नुते इति** ।

१८४४ इतर इतरं पश्यतीति वाक्यशेषविरोधात् । यत्र त्वस्य सर्वमात्मैवाभूदित्यस्य यत्र हि द्वैतमिवेत्यस्मादविशेषप्रसङ्गाच्चरमः सविशेषणतो भोगाभावपक्षो युक्त इत्यर्थः ।

१८४५ यत्र हि द्वैतमिवेति द्वैतनिराकरणात् केन कं पश्येदिति प्राणादिविषयभोगाक्षेप एवेत्यत आह **अस्वातन्त्र्यादिति** ।

१८४६ इवशब्दस्यास्वातन्त्र्यार्थविषयत्वेऽभिधानमाह **अस्वातन्त्र्येति** ।

१८४७ लोके यथा यो यदधीनः स तस्माद्द्वितीय इवेत्युच्यते । तथा विष्णवधीनमपि द्रष्टृदृश्यादिकं तदधीनत्वाद्द्वितीयमिवेत्युच्यते न तदभिन्नत्वादिति । यावन्मुक्तस्य ज्ञानिसुखाद्यभावे मैत्रेयीचोद्यमप्यर्थरहितं स्यादित्यत आह **मैत्रेयीति** ।

१८४७ इतोऽपि मोक्षे सुखाभावो नेत्याह **सुखादीति** ।

१८४८ दुःखनाशलक्षणपुरुषार्थात् सुखनाशलक्षणो पुरुषार्थोऽतिरिक्त इत्याह **तयोरिति** ।

१८४९ तदेव प्रतिपादयति **प्राप्येति** ।

१८५० अतीतपद्याभिप्रायमेव प्रकटयति **अल्पादिति** ।

१८५४ सुखे सति दुःखं भवतीत्युत्प्रेक्ष्यते चेत्सुखाभावे च सम्मतवदित्याह **विमत इति** ।

१८७५ जैननिराकरणमारभ्योक्तमर्थमुपसंहरति **इत्थमिति** ।

१८७६ अथ सिंहावलोकनन्यायेन अतीतवादगताः पूर्वपक्षसिद्धान्तयुक्तीरुक्त्वा वर्तमानपादगताश्चाह **औदार्यमित्यादीनि** ।

१८८२ 'वाङ्मनसी'त्यादि सूत्राभिप्रायकथनेन देवतानां स्वोत्तमेषु प्रवेशरूपं मोक्षं च तत्र प्रवेशो देवानामित्यत्र प्रस्तुतं भूतेषु तच्छ्रुतेरित्यादि सूत्राभिप्रायकथनेन प्रपञ्चयितुं 'वायाविन्द्रः सोम आदित्यो बृहस्पतिरि'ति सूत्राभिप्रेतवाक्ये वायुशब्देन मुख्यप्राण उच्यत इत्याह **प्रधानवायुरिति** ।

१८८२ तत्र युक्तिमाह **यस्मादिति** ।

१८८४ इन्द्रादीनामपि मुख्यवायौ लयोऽस्तु बिम्बद्वारेण ........................................शयति **तस्मादिति** ।

१८८६ उत्तमादिभिः सह जीवानां मुक्तिरुच्यते चेदुमादीनां वारुणीत्वादिजननाभावप्रसङ्ग इत्यत आह **उमेति** ।

१८८७ **तत्काले** उमादित्वकाल इत्यर्थः ।

१८८९ यदि .............................. प्रविशति । तर्हीन्द्र उमायामिति न युक्तमित्यत आह **इन्द्रेति** ।

१८९६ उत्तमानामवरेषु प्रवेशः किमिति मोक्षे न स्यादित्यत आह **सर्गक्रमत इति** ।

१८९७ मुक्तौ प्रवेशस्य सर्गक्रमतो विपर्यय इत्यर्थः ।

१८९७ अत्र प्रवेशाधिकरणत्वेन कथितां बिम्बस्वरूपप्रविष्टत्वेन कथितानां प्रतिबिम्बत्वस्य च पिङ्गशब्दादित्यात् । उक्तलयानुसारित्वं तस्मा इति यावत् ।

१८९८ 'प्राणस्तेजसी'त्यादेरर्थमाह **तेजोऽभिधामिति** ।

१८९९ इयं विमुक्तिर्न जिनाद्यभिमतेत्यर्थः ।

१९०१ पादसङ्गतिमुक्त्वा पूर्वपक्षयुक्तीराह **उत्क्रान्तेति** ।

१९०३ गम्यमधिकृत्य पादादेकमिति मताविरोधं नन्दपदप्रतीकालम्बिनां नयतीत्यादिसूत्रं व्याख्याति **प्रतीकमिति** ।

★ ★ ★

# अथ चतुर्थाध्यायस्य चतुर्थः पादः

१९०४ स्वबिम्बद्वारेण भगवति प्रविश्य मुक्तानां भागप्रतिपादक पादगतपूर्वपक्षसिद्धान्तयुक्तीराह **अतिक्रमोक्तिरिति** ।

१९०६ 'अत एव चानन्याधिपति'सूत्रार्थो मुक्तो अधिपतिरहित इति न किन्तु एतेभ्यः प्रस्तुतेभ्यो बिम्बभूतेभ्योऽन्याधिपतिरहित इत्येवेत्याह **अनन्येति** ।

१९०७ अस्मिन्नर्थेऽनुमानं च प्रयुङ्क्ते **एतेऽपीति** ।

१९०८ 'अविभागो वचनादि'ति सूत्रेण भेदनिरासान्न मुक्तस्याधिपतिरिति न वाच्यम् । भिन्नयोरपि लतावृक्षयोरविभागोपलब्धेरिति यावन्न केवलं हरेरेव मुक्ताधिपत्यं किन्तु मुक्तब्रह्मादीनामपि स्थावरमुक्ताधिपत्यमस्तीति 'प्रत्यक्षोपदेशादि'त्यादिसूत्रव्याख्यानेनाह **मुक्तेति** ।

१९०९ एतदुपपादयति **अनेनेत्यादिना** ।

१९१० 'य आदित्यादिस्थपुरुषौ विद्वान् साम गायति स य आदित्यस्य पुरुषोऽस्मादुत्तरलोकानां देवकामानां चेष्टेमुनैवामुष्मादुत्तरलोकान् देवकामांश्चाप्नोति । योऽक्षिस्थः पुरुषः एतस्मादधस्तनलोकानां मनुष्याकामानां चेष्टे अथानेनैव तस्मादधस्तनलोकाः मनुष्यकामांश्चाप्नोती'त्यन्वयः । 'य एषोऽन्तर आदित्ये हिरण्मयः पुरुषो दृश्यते तस्यादितिनाम स एष सर्वेभ्यः पाप्मभ्यः उदित उदेति इति सर्वेभ्यः पाप्मभ्यो य एवं वेद । अथ य एषोंतरक्षि.................................. कथंस्तद्यजूंस्तद्ब्रह्म अथ य एतदेवं विद्वान्सामगायत्युभौ स गायति सामून वस एष चामुष्मा.................................सम्भवादित्यर्थः ।

१९११ लोकानाप्नोति इति कथं मुक्ताधिपत्यमुच्यते लोकानामचेतनत्वादित्यत आह **लोका इति** ।

१९१२ अथ पराञ्चो लोका इत्यादौ लोका आलो .... इति च पदं युक्तम् । मुक्तानां प्रकाशरूपत्वाल्लोकविलक्षणाचेत्याह **अलोकेति** ।

१९१३ तुरश्रुत्युदित सर्वलोकाधिपत्यं संसारिब्रह्मण एव । किन्तु मुक्तब्रह्मणोऽप्यभिप्रेतमित्याह **ब्रह्मैवेति** ।

१९१४ रविबिम्बगे हरावुक्तं लोकाधिपत्यमेव सोऽमुनैवामुष्मात्पराञ्चो लोकाधिपत्यमेव । सामुनैवामुष्मात्पराञ्चो लोकरस्तांश्चाप्रोति देवकामांश्चेति । तद्विदुषस्तज्ज्ञानफलं लोकाधिपत्यमुच्यते । तदभेदेन प्रथमाधिपत्यसम्भवात् तस्माद्विरिञ्चस्य कथं मुक्ताधिपत्यं युक्तमित्यत आह **न चेति** ।

१९१५ पुरा हरेः लोकाधिपत्यमुक्तं पश्चात्तज्ज्ञानिनश्च पृथगुक्तमित्येतावता पृथगाधिपत्यं न सम्भवति । ज्ञानिना हर्यभेदादित्यत आह **त्वप्रत्ययमिति** । **अमुनेति** । वसतित्वेनेत्यश्रवणात् तेन रूपेणेत्यर्थो अयुक्त इति यावत् । किञ्च ऐक्यपक्षे तु य एवं वेदायमसौ भवतीत्यणुशब्दमात्रेण तदभिन्नस्य ज्ञानिनो ब्रह्मण उक्तलोकाधिपत्यं सिद्धं भवति । न च तथा श्रूयते । तस्मा-ज्ज्ञानिनो श्रुतब्रह्मभावग्रहणं ज्ञानिनः पृथग्लोकाधिपत्यं प्रतिपादकानि य एवं विद्वान् सामगायत्युभौ स गायति सोऽमुनैव स एष एवामुख्यात्पराञ्चो लोकास्तांश्चाप्रोति । देवकामांश्चाथानेनैक्ये चैतस्मादर्वाचो लोका इत्यादीनि बहूनि वाक्यानि सप्रयोजकानि तन्मते भवेयुरित्यादिदोष इत्यभिप्रैति **भवत्य-साविति** ।

१९१६ तदेव मुक्तब्रह्मादेः स्थावरलोकाधिपत्यं छन्दोगश्रुत्या प्रतिपादितं निगमयति **अत इति** ।

१९१७ उदकेन पूर्णश्रवादीनां पूर्वतारतम्यवदानन्दपूर्णमुक्तानां पूता तारतम्यमस्तीत्यभिप्रायः । अयमाचाराय भक्त्या यत्प्रसाद्गुणप्रतिपादनम् । अनेन ग्रन्थेन कृतवांस्तं पौनःपुन्येन **नम इति** ।

१९१८ **नमो नम इति** । गुरुभक्तिमन्तरेणापि पुरुषार्थसम्भवात् । गुरुभक्त्यर्थं गुरुस्वरूपं सप्रमाणकमुक्त्वा स्वकृतग्रन्थं केशवे समर्पयन्नाह **यस्येति** ।

१९१९ अनेन ग्रन्थेन प्रतिपाद्यं विष्णोस्तत्त्वं सङ्क्षिप्य प्रदर्शयन् पुनः ......................... ......... ..........
.......................................................................................................................................................
...................... ......................... ............................................... भाष्यस्य ततः समुद्धृता सन्दीपिका ग्रन्थवरस्य सङ्गतम् । अशेषवाच्यनिमुक्तसङ्गा न मुत्रप । श्रीः । .......................... .........
................................................ ...................................... .... ....................... .........
............................................. ..........................................देः श्री वासुदेवबहुबोधनिरोधहीन-सत्तीर्थकीर्तिविततान्परमान् गुरून्नः । ......................... ......... ..........................................
.................................... ....पदाम्बुजमध्वभक्त्यै ॥

*इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचित-अनुव्याख्यानस्य शङ्करपण्डिताचार्यविरचिता सम्बन्धदीपिका सम्पूर्णा ॥*

॥ श्रीकृष्णार्पणमस्तु ॥

★ ★ ★